UNIVERSAL
LIBRARY

OU_184192

UNIVERSAL
LIBRARY

OUP—67—11-1-68—5,000.

OSMANIA UNIVERSITY LIBRARY

Call No. S294.534 D57A Accession No. G 31865

Author दीक्षित, वासुदेव

Title अद्वैतमीमांसाकुतूहलवृत्ति. Vol. I

This book should be returned on or before the date last marked below.

SRI VANI VILAS SASTRA SERIES No. 1.

. . . ADHVARA MIMAMSA .

KUTUHALA VRITTI

OF

SRI VASUDEVA DIKSHITA

EDITED BY

S. KUPPUSWAMY SASTRIGAL M. A.,

Principal, Madras Sanskrit College.

WITH THE CO OPERATION OF

Professors Brahmasri R. CHANDRASEKHARA SASTRIGAL

and Brahmasri P. V. PANCHAPAGESA SASTRIGAL.

श्रीवाणीविलासशास्त्रग्रन्थमाला—१.

अध्वरमीमांसा

कुतूहलवृत्तिः



श्रीवासुदेवदीक्षितविरचिता

मेलापुरस्थगीर्वाणमहापाठशालाध्यक्षेण

एस्. कुप्पुस्वामिशास्त्रिणा

सह

तत्पाठशालाध्यापकाभ्यां

आर्. चन्द्रशेखरशास्त्रिणा

पि. वि. पञ्चापगेशशास्त्रिणा च

संशोधिता ।

(प्रथमोऽध्यायः ।)

श्रीरङ्गस्थ

श्रीवाणीविलासमुद्रायन्त्रालये

संमुद्रिता

दृष्टस्य हि न तावदर्थज्ञान उपयोगः, तस्य तदन्तरेणापि जायमानत्वात्। नापि क्रत्वपूर्वे, अध्ययनविधेरनारभ्य विहितत्वेन तदयोगात्। किंच 'अधीत्य स्नायात्' इति स्मृतेरध्ययनानन्तरं समावर्तनं विदधानाया[1] गुरुकुलवास्तव्येन विचारकरणे बाधः स्यात्। अथाध्ययनविधेः किं भाव्यमिति चेत्, विश्वजिदादिवत्स्वर्ग इति गृहाण। अतः प्रयोजनाभावादत एव च विषयाद्यभावान्नारब्धव्या धर्ममीमांसा। 'प्रायेणानृतवादित्वात्पुंसां भ्रान्त्यादिसंभवात्' इति न्यायेन पुरुषविशेषप्रणीतवेदस्य प्रामाण्यानवधारणाच्चेत्यादिशङ्कापरिहारायाध्वरमीमांसाशास्त्रस्येदमादिमं सूत्रम्—

अथातो धर्मजिज्ञासा ॥ १ ॥

अत्राथशब्द आनन्तर्ये वर्तते। तच्चानन्तर्यमर्थाद्वेदाध्ययननिरूपितमवगम्यते। न हि वेदैकबोध्यो धर्मो वेदाध्ययनमन्तरा शक्यो विचारयितुम्। अतःशब्दो वृत्तं वेदाध्ययनं हेतुत्वेन स्थिरीकुर्वन्नथशब्दस्यानन्तर्यातिरिक्तार्थपरतां निराचष्टे। ज्ञातुमिच्छा जिज्ञासा। सा च धर्मे विशिष्य ज्ञाते न संभवति, अज्ञाते च [2]नतरामिति सामान्यतो ज्ञाते विशेषजिज्ञासा। विशेषज्ञानं च विचारमन्तरा न संभवतीत्यन्तभूतो विचारो जिज्ञासेत्यनेनोच्यते। कर्तव्येत्यध्याहार्यम्। तथा च वेदाध्ययनानन्तरं तद्धेतुको धर्मविचारः कर्तव्य इति सूत्रार्थः। तत्र धर्मस्वरूपविचारस्तावच्छक्तपदश्रुतिरूपया श्रुत्या गम्यमानत्वाच्छ्रौतः। तदतिरिक्तप्रमाणादिविचारस्त्वार्थिकः। न हि वेदैकगम्यधर्मविचारो वेदप्रामाण्यविचारमन्तरा संभवति। नापि साधनफलनिर्णयमन्तरा तत्संभवः। साधनफलनिर्णयाभावे ह्यनुष्ठानद्वारा तदभ्युदयपर्यवसानाभावादलौकिकश्रेयःसाधनता कर्मरूपं कथं सिध्येत्। नापि बुद्ध्याद्यागमाभासतदवगतधर्मस्वरूपसाधनफलाभावनिरूपणं विना तद्विलक्षणप्रमाणस्वरूपसाधनफलनिर्णयसंभवः। तदेवं श्रुत्यर्थाभ्यां प्रमाणस्वरूपसाधनफलैश्च दौश्च धर्मस्य जिज्ञास्यत्वं प्रतिज्ञातं प्रतीमः। तथा चायमर्थः[3] ॥ अथ वेदाध्ययनानन्तरम्, वेदैकभूताध्ययनस्य [4]वृत्तत्वाद्धेतोः, धर्मस्य प्रमाणस्वरूपसाधनफलैरग्रे निरूपयिष्यमाणैः स्वरूपात्मिका चिन्ता, कर्तव्येति शेषः ॥ अयमाशयः। अध्येतव्य[5] इति नियमविधिः। स च दर्शपूर्णमासापूर्वेऽवघातनियमादृष्टस्योपयोगो विधिबलात्कल्प्यते, तथा सर्वक्रत्वपूर्वेष्वध्ययनेनियमादृष्टस्याप्युपयोगः कल्प्यः— अध्ययनगृहीतेनैव स्वाध्यायेन प्रणाड्या क्रत्वपूर्वं जन्यत इति। अनारभ्याधीतस्याप्यध्ययनस्य सामर्थ्यादेव क्रतुविध्याक्षिप्तार्थज्ञान उपयोगः संभवति।

१. धर्माधर्मजिज्ञासाधिकरणम्।

---

1. समावर्तनविधानाय—ख. 2. नितरां—ख. 3. अत्रेत्यारभ्य तथाचायमर्थः इत्येतत्पर्यन्तं क पुस्तके नास्ति. 4. प्राप्तत्वात्—क. 5. अध्येतव्यमिति—क, ग.

॥ श्रीः ॥

अध्वरमीमांसा

॥ कुतूहलवृत्तिः ॥

प्रथमोऽध्यायः ॥

निर्मथ्य निगमसिन्धून्विविधन्यायाभिधा मन्थानैः ।
धर्मसुधामुद्धरते भूयो मुनये नमोऽस्तु जैमिनये ॥ १ ॥

जैमिनिमतिप्रसृष्टां[1] शबरकुमारप्रकामनिष्कृष्टाम् ।
मीमांसां [2]दीदांसारीत्या वृत्त्या परिष्कुर्वे ॥ २ ॥

स्फायच्छाबरभाष्यवार्तिकमहाग्रन्थैकलोलीभव-
त्क्षुभ्यज्जैमिनिसूत्रजालमपृथग्भूरिप्रचारं श्रथम्[3] ।
उद्धृत्य स्फुटबालबोधनकृते श्रीवासुदेवाध्वरी
तत्कौतूहलवृत्तिमाकलयते सन्तो दयन्तामिह ॥ ३ ॥

अथेयमध्वरमीमांसा नारब्धव्या प्रयोजनाभावात् । न चाध्ययनविधिस्तस्य विचारमन्तरेणानुपपत्तेस्तदेव प्रयोजनमिति वाच्यम् । अर्थज्ञानस्याध्ययनविधिभाव्यत्वाश्रवणात्, अध्ययनमर्थज्ञानहेतुरध्ययनत्वाद्भारताद्यध्ययनवदित्यनुमानेन तदर्थमध्ययनस्य प्राप्तत्वाच्च । न च लिखितपाठादिना पक्षप्राप्तमध्ययनमत्र नियम्यत इति वाच्यम् । वैयर्थ्यात् । नियमा-

1. जैमिनिमतप्रसृष्टां—ख. 2. मीमांसा—क, ख, ग. 3. अवृधत्...स्वयम्—क.

किंच, असत्यध्ययननियमविधावग्निहोत्रादिशास्त्राणि विद्वांसमलभमानान्यविद्वांसमेवाधिकृत्य, विद्यामन्तरेणानुष्ठानासंभवाद्विद्यामाक्षिपन्तीति तान्यविशेषेण चतुरो वर्णानधिकुर्युः । सति त्वध्ययननियमविधौ 'वसन्ते ब्राह्मणमुपनयीत' इत्यादिवाक्यावगतोपनयनसंस्कृतत्रैवर्णिकानां क्वचिद्विनियोगापेक्षायां तत्संनिधौ पठितस्य चाध्ययनस्यानिर्दिष्टकर्तृकस्य कर्त्रपेक्षायां परस्परमन्वये सत्यध्ययनमुपनयनसंस्कृतत्रैवर्णिककर्तृकम्, तच्चार्थज्ञानपरंपरया क्रतुसाध्यस्वर्गादिपुरुषार्थपर्यवसायीति लभ्यते । एवं चाग्निहोत्रादिशास्त्राण्यपि विद्वत्त्रैवर्णिकाधिकारिलाभान्न शूद्रमधिकुर्वन्तीत्यपशूद्राधिकरणे वक्ष्यमाणोऽधिकारिनियमोऽप्यध्ययनविधिमूलकः संगच्छते । न [1]चाधीतसाङ्गस्यार्थज्ञानं विचारमन्तरेणापि संभवतीति वाच्यम् । [2]ज्ञानोत्पत्तावपि निर्णयस्य विचाराधीनत्वात् 'अक्काः शर्करा उपदधाति' इत्यज्ञनं येन केनचित्, उत घृतेनैवेति संशयस्य 'संदिग्धे तु वाक्यशेषात्' इत्यनेनैव निरासात् । 'अधीत्य स्नायात्' इत्यत्र तु क्त्वाप्रत्ययात् पूर्वकालत्वमवगतम् । न त्वानन्तर्यम् । [3]तच्च क्वचिद्दृश्यते । न तु सर्वत्र । न हि भुक्त्वा दण्डद्वयं स्थित्वा व्रजति पुरुषे भुक्त्वा व्रजति इति न प्रयुञ्जते । प्रयुक्तमपि नापप्रयोगं मन्यन्ते । तस्माद्धर्मावबोधफलकत्वात्, अत एव च विषयादिलाभात्, आरब्धव्या धर्ममीमांसा । अत्र सूत्रे धर्मपदमधर्मस्याप्युपलक्षणम् । अकारप्रश्लेषेण वा योज्यम् । हानाय तस्यापि जिज्ञास्यत्वात् ।

ननु तथापि धर्मविचारो न कर्तुं शक्यः, धर्मस्य लौकिकाकारहीनत्वेन लक्षणप्रमाणयोरसंभवात् । न ह्यस्य लौकिकाकारः कश्चिद्दृश्यते । नापि प्रमाणमस्ति । न तावत्प्रत्यक्षम्, रूपादि-
२. धर्माधर्मस्वरूपलक्षणाधिकरणम् । रहितत्वात् । नाप्यनुमानोपमाने, तयोः प्रत्यक्षपूर्वकत्वात् । नाप्यर्थापत्तिः, धर्मं विना कस्याप्यनुपपन्नत्वाभावात् । नापि शब्दः, संगतिग्रहणस्य प्रत्यक्षानुमानमूलकत्वात् । नाप्यनुपलब्धिः, तस्याभावमात्रविषयकत्वात् । अत आह—

चोदनालक्षणोऽर्थो धर्मः ॥ २ ॥

सत्यम्, न तस्य लौकिकाकारोऽस्ति । तथापि चोदनागम्यः स्वर्गादिसाधनताख्य आकारोऽस्त्येव । लक्षणमपि सुवचम् । प्रवर्तनाबोधकलिङादिसमभिव्याहृतं वाक्यं चोदना, सा लक्षणं प्रमाणं यस्य सः अर्थः धर्म इति धर्मस्वरूपनिर्वचनात् । इयेनाद्यभिचारवारणाय अर्थ इति । अनर्थफलकत्वानाक्रान्तं श्रेयःसाधनत्वं विवक्षितम् । अन्ये तु, चोदनाशब्देन प्रवर्तकं निवर्तकं च वाक्यमुच्यते । ततश्च 'न हिंस्यात्' इत्यादिनिषेधवाक्यगम्यहिंसादीनां धर्मत्ववारणायार्थपदम् ।

1. अधीताङ्गस्यार्थ—ग. 2. ज्ञानोपपत्तावपि—क. 3. तत्तु—ग.

अनिषिद्धत्वमत्र विवक्षितम् । तथा च प्रवर्तकवाक्यगम्यत्वे सत्यनिषिद्धत्वं धर्मत्वमिति फलति । श्येनाद्यभिचारस्य तु धर्मत्वमेव । न च न हिंस्यादिति निषेधः श्येनाद्यभिचारे प्रवर्तते । निषेधस्य हिंसाविषयत्वाच्छ्येनादेश्चाहिंसात्वात् । अत एव 'यो हिंसितुमिच्छेत्तस्यायमभ्युपायः[1]' इति श्येनफलस्यैव हिंसात्वपरं भाष्यं संगच्छते । न चाभिचारस्य धर्मत्वे शिष्टानां तत्र प्रवृत्त्यापत्तिः । तेषां तत्फलेच्छाभावात् । श्येनानुष्ठायिष्वधार्मिकत्वव्यवहारस्य फलमादायैवोपपत्तेश्चेत्याहुः । वस्तुतस्तु अधर्म इत्यपि च्छेदः । पूर्वसूत्रे अधर्मविचारस्यापि प्रतिज्ञातत्वेन तल्लक्षणावश्यकत्वात् । चोदनेति प्रवर्तकं निवर्तकं च वाक्यमुच्यते । अर्थपदेन इष्टसाधनमनिष्टसाधनं चोच्यते । ततश्च प्रवर्तकवेदवाक्यबोधितश्रेयःसाधनताकत्वं धर्मत्वम् । निवर्तकवेदवाक्यबोधितानिष्टसाधनताकत्वमधर्मत्वमिति फलति । अस्ति चेदं यागादौ हिंसादौ च, प्रवर्तनानिवर्तनाभ्यामिष्टानिष्टसाधनत्वकल्पनात् । अभिचारस्त्वधर्म एव, "नाभिचरित वै" इति निषेधात्, मन्वादिभिरुपपातकेषु तस्य परिगणनाच्च । अत्र लक्षणोक्त्या प्रवर्तकं निवर्तकं च वेदवाक्यं धर्माधर्मयोः प्रमाणमित्यप्यर्थादुक्तं भवति ।

अथ धर्मप्रमाणपरीक्षां प्रतिजानीते—

३. प्रमाणपरीक्षाधिकरणम् ।

तस्य निमित्तपरीष्टिः ॥ ३ ॥

तस्य धर्मस्य यत् निमित्तं प्रमाणम् , तस्य परीष्टिः परीक्षा, क्रियत इति शेषः ।

ननु चोदनैव धर्मे प्रमाणमित्यनुपपन्नम्, धर्मस्य यागादिक्रियारूपस्य प्रत्यक्षत्वात् । अनुमानमपि तत्र प्रमाणम् । अर्थापत्तिर्वा । जगद्वैचित्र्यानुपपत्त्या तत्कल्पनात् । तत्राह—

सत्संप्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षमनिमित्तं विद्यमानोपलम्भनत्वात् ॥ ४ ॥

४. प्रत्यक्षादीनां धर्मे अप्रमाणताधिकरणम् ।

इन्द्रियाणां सत्संप्रयोगे विषयसंनिकर्षे सति पुरुषस्य बुद्धिजन्म प्रत्यक्षस्योत्पत्तिर्भवति । तत् प्रत्यक्षं धर्मस्यानिमित्तं स्वरूपनिश्चायकं न भवति । कुतः, विद्यमानमात्रग्राहित्वात् । अनुमानेरप्युपलक्षणमेतत् ॥ यद्यपि यागादिक्रिया प्रत्यक्षेण गृह्यते । तथापि श्रेयःसाधनत्वरूपेणाग्रहणान्न दोषः । अलौकिकश्रेयःसाधनताकत्वमेव हि धर्मस्वरूपम् । अत एव शूद्रकृतयागादिर्न धर्मः । न च योगिप्रत्यक्षमेव तत्र प्रमाणमिति वाच्यम् ।

1. तस्यायं द्युपायः—क.

योगिनां हि तत्सामर्थ्यं नाकस्मिकम् । किंतु धर्मानुष्ठानादेव भवति । तच्च न धर्मज्ञानं विना भवितुमर्हति । अथ तेषां धर्मज्ञानं योग्यन्तरादिति चेन्न । अनवस्थापत्तेः । तस्माच्चोदनैव शरणम् । अनुमानमर्थापत्तिश्च, यागादिर्धर्मो हिंसादिरधर्म इति विशिष्य विवेचनासमर्थत्वात्तत्समर्थां चोदनामेवापेक्षेते । सा चेदङ्गीकृता, अलमनुमानार्थापत्तिभ्याम् । तस्माच्चोदनैव धर्मे प्रमाणम् ॥

ननु कथं चोदनाया धर्मप्रामाण्यम्, तस्याः शक्तिग्रहापेक्षत्वात्, शक्तिग्रहस्य चालौकिके धर्मेऽसंभवात्, संकेतरूपशक्तेः पुरुषकल्पिततया तस्याः पुरुषदोषादिमूलकत्वसंभवाच्च । किंच 'चित्रया यजेत पशुकामः' इत्यादिचोदना अप्रमाणमेव, यागानुष्ठानानन्तरमेव फलादर्शनात् । न च कालान्तरे तत्संभवतीति वाच्यम् । अनन्तरमेवासंजातस्य पश्चाद्भवनोत्प्रेक्षाया मनोरथमात्रत्वात् । किंच शब्दानामनित्यत्वेन तद्विशेषात्मकतया काठकादिसमाख्यया च वेदस्य पौरुषेयत्वात्कथं प्रामाण्यम्, प्रायेण पुरुषस्यानृतवदनभ्रमप्रमादादिदोषबहुलत्वात् । तस्मान्न चोदनाप्रमाणकत्वं धर्मस्येत्यत आह—

५. चोदनाया धर्मे प्रामाण्याधिकरणम् ।

औत्पत्तिकस्तु शब्दस्यार्थेन संबन्धस्तस्य ज्ञानमुपदेशोऽव्यतिरेकश्चार्थेऽनुपलब्धे तत्प्रमाणं बादरायणस्यानपेक्षत्वात् ॥ ५ ॥

शब्दस्यार्थेन संबन्धः प्रत्याय्यप्रत्यायकभावलक्षणः औत्पत्तिकः नित्यः; जातेः शब्दार्थत्वस्याकृत्यधिकरणे व्युत्पादयिष्यमाणत्वात्, जातेश्च नित्यत्वात्, शब्दनित्यत्वस्य चानुपदमेव वक्ष्यमाणत्वात् । एतेन शक्तेरनित्यत्वदोषो निवारितः । तस्य शब्दार्थसंबन्धस्य शक्तेः ज्ञानं शक्तिग्रहमिति यावत् । उपदेशः वेदवाक्यम्, जनयति प्रसिद्धपदसमभिव्याहारादिति शेषः । उपदेश इत्यस्य प्रसिद्धपदसमभिव्याहार इत्यप्यर्थ इत्यन्ये । 'कमलोदरे मधूनि मधुकरः पिबति' इत्यत्र मधुकरशब्दस्यार्थमजानतोऽन्येषां पदानामर्थमवगत्य तत्समभिव्याहारात्कमलमध्यगते मधुपानं कुर्वति दृश्यमाने भ्रमरे मधुकरशब्दस्य संगतिं गृह्णतो वाक्यार्थबोधवत्[1] 'चित्रया यजेत पशुकामः' इत्यादावपि लोकप्रसिद्धपश्वादिपदसमभिव्याहारात्पशुभाव्यकयागकरणकभावनायामलौकिक्यां [2]लिङः संगतिं गृह्णतो यागः पशुसाधनमिति बोधः संभवति । तेन धर्मे संकेतग्रहासंभवो निरस्तः । अलौकिकश्रेयःसाधनत्वमेव हि धर्मस्वरूपम् । अनुपलब्धे प्रत्यक्षाद्यगृहीतेऽर्थे विधिवाक्यजन्यज्ञानस्य अव्यतिरेकश्च व्यभिचारोऽपि नास्ति, विपर्ययसंशयजनकत्वं नास्तीति यावत् । अनुपलब्ध इत्यनेनानुवादत्वनिरासः । तत् तस्मात् अगृहीतार्थविषयकत्वे सति भ्रमसंशयान्यज्ञानजनकत्वात्

1. बोध इव—क. 2. अलौकिकलिङः—क.

चोदनावाक्यं प्रमाणम् । तुरवधारणे, प्रमाणमेव । अनपेक्षत्वात् पुरुषान्तरे प्रत्ययान्तरे चापेक्षाराहित्यात् । वाक्येषु हि लेधा पुरुषानुप्रवेशः पदपदार्थसंबन्धद्वारेण, वाक्यतदर्थसंबन्धद्वारा वा, संदर्भस्यैव वा भारतादिवत्पौरुषेयत्वेन । तत्र पदपदार्थसंबन्धस्य नित्यत्वमौत्पत्तिकशब्देनोक्तम् । वाक्यार्थबोधस्य पदार्थमूलकत्वं वेदस्यापौरुषेयत्वं चोपरिष्टाद्वक्ष्यते । न च संवादाभावादप्रामाण्यं शङ्क्यम्, 'कारीर्यां वृष्टिकामो यजेत' इत्यादौ समनन्तरभाविदृष्टफलके संवादसत्त्वात्, स्वतःप्रामाण्येन संवादानपेक्षत्वाच्च । बादरायणग्रहणमादरार्थम्, अनधिगतार्थगन्तृत्वमेव प्रमाणलक्षणमादर्तव्यं न त्वन्यदिति । तार्किकास्तु प्रमाकरणं प्रमाणम् । प्रमात्वं च यथार्थानुभवत्वम् । याथार्थ्यं च तद्वद्विशेष्यकत्वावच्छिन्नतत्प्रकारकत्वम् । अनुभवत्वं तु अनुभवामीति प्रतीतिसिद्धः साक्षात्कारानुमित्युपमितिशाब्दबोधसाधारणः स्मृतिव्यावृत्तो जातिविशेषः, न त्वगृहीतग्राहित्वम्; [1]धारावाहिके अव्याप्तेरित्याहुः । तदेतदयुक्तम् । अनुभवामीति प्रतीतिसिद्धानुभवत्वस्य साक्षात्कार एव सत्त्वेनानुमित्यादावव्याप्तेः, स्वर्गमनुभवामि पर्वते वह्निमनुभवामीति प्रतीत्यभावेनानुमित्यादौ तत्सत्त्वे मानाभावात् । तस्मादनधिगतार्थगन्तृत्वमेवानुभवत्वम् । न च धारावाहिकेऽव्याप्तिः, तत्तत्क्षणविशिष्टघटादेः पूर्वपूर्वज्ञानागृहीतस्यैवोत्तरोत्तरज्ञानविषयत्वात् । इदानीं स्पृशामि, इदानीं पश्यामीत्यादिप्रतीत्या कालस्यापि पञ्चेन्द्रियवेद्यत्वात्, कालान्यद्रव्यचाक्षुषत्वस्यैव रूपकार्यतावच्छेदकत्वात्, अनुभवानुसारेण कार्यकारणभावकल्पनात्, अन्यथा लाघवाच्चाक्षुषत्वस्यैव कार्यतावच्छेदकत्वापत्तेः । न च कालोऽतिसूक्ष्मत्वात्कथं प्रत्यक्षग्राह्य इति वाच्यम् । ज्ञानधारायां ह्युपरतायां किमत्र घटोऽवस्थित इति पृष्टः सन्कथयति—अस्मिन्क्षणे मयोपलब्ध इति, प्रातरारभ्यैतावन्तं कालं मयोपलब्ध इति च । कालभेदे त्वगृहीते कथमेवं भवेत् । शतपत्रपत्रशतं मया सूच्या युगपद्भिन्नमिति तु स्थूलकालविषयकम् । वस्तुतस्तु धारावाहिकस्थले तावत्कालव्यापिन्येकैव ज्ञानव्यक्तिः, कारणभेदाभावात्, तद्भेदकल्पने मानाभावात्, [2]योग्यविभुविशेषगुणानां त्रिक्षणावस्थायित्वस्य परिभाषामात्रत्वात् । वस्तुतस्तु स्वसमानविषयकज्ञानानपेक्षोत्पत्तिकज्ञानत्वमेवानधिगतार्थगन्तृत्वम् । अतः कालभेदस्येन्द्रियवेद्यत्वाभावेऽपि न क्षतिः । दिनान्तरे गृहीतस्य घटादेर्दिनान्तरे पुनर्ज्ञानमपि प्रमैव । याथार्थ्यमपि प्रमालक्षणे देयम् । तच्च तद्वति तत्प्रकारकत्वं विशेष्यावृत्त्यप्रकारकत्वं वा । अनुमितेरपि वह्निविशिष्टः पर्वतो विषय इत्यनधिगतार्थगन्तृत्वम् । न च पर्वतस्यानुमितिविषयत्वे पर्वतमनुमिनोमीत्यनुव्यवसायापत्तिः । विधेयताख्यविषयताशालिन एवानुमिनोमीत्यनुव्यवसायभाननियमात् । एवमुपमितावप्यनधिगतार्थगन्तृत्वं बोध्यम् । लौकिकशब्दजन्यज्ञानं तु न प्रमा, अनधिगतार्थगन्तृत्वाभावात् । न च लौकिकशब्दः प्रमाणम्, उक्तप्रमाकरणत्वाभावात् । लौकिके शब्दे

---

1. धारावाहिकैरव्याप्तेः—क, ग. 2. योग्यविशेषगुणानां—ख, ग.

तज्जन्यज्ञाने च प्रामाण्यव्यवहारस्तु तद्वति तत्प्रकारकत्वांशमादाय गौणः। आप्तत्वं चात्रैवोपयुज्यते। वेदस्तु प्रमाणम्, तस्योक्तलक्षणाक्रान्तत्वात्। 'व्रीहिभिर्यजेत' इत्यादिवाक्येषु यागादिपदार्थविषयेऽप्रामाण्यमिष्टमेव। तदुक्तम्—'ब्राह्मणार्थो यथा नास्ति कश्चिद्ब्राह्मणकम्बले। देवदत्तादयो वाक्ये तथैव स्युरनर्थकाः' इति। प्रामाण्यं च स्वतः, अप्रामाण्यं तु परतः। स्वतस्त्वं च कारणगुणसंवाद्यर्थक्रियाज्ञानानधीनत्वम्। परतस्त्वं तु बाधकज्ञानकारणदोषविसंवादज्ञानाधीनत्वम्। याथार्थ्यघटितप्रामाण्यस्य स्वतस्त्वम्, अयाथार्थ्यरूपाप्रामाण्यस्य च परतस्त्वम्, ज्ञानग्राह्यत्वं कारणदोषादिज्ञानग्राह्यत्वं च क्रमेण बोध्यमित्यन्यत्र विस्तरः।

अथ यदुक्तं शब्दार्थयोर्नित्यः संबन्ध इति, तत्राक्षिपति --

कर्मैके तत्र दर्शनात् ॥ ६ ॥

क्रियते इति कर्म कार्यं शब्दः, अतस्तत्संबन्धोऽप्यनित्य इति केचिन्मन्यन्ते। कुतः, तत्र दर्शनात्। तत्र तस्मिन्प्रयत्नोत्तरकाले दर्शनात् प्रयत्नजन्यत्वनिश्चयात्। न च प्रयत्नव्यङ्ग्यत्वेन तदुत्तरदर्शनमुपपद्यत इति वाच्यम्। प्राक्तत्सत्त्वे मानाभावात्। अभिव्यक्तिरपि किं प्रतिबन्धकनिरासेन, उत संस्कारविशेषाधानेन। नाद्यः, प्रतिबन्धकानुपलब्धेः। अथ कर्णे स्तिमितैरवयवैराच्छादननिरासे च तदभिव्यक्तिरिति चेन्न। एवं सति सर्वेषां शब्दानां सर्वगतत्वेन श्रोत्रसंनिकृष्टतया प्रतिबन्धकाभावदशायां युगपच्छ्रवणापत्तेः। न द्वितीयः। संस्कारोऽपि हि तैः शब्दस्य, उत श्रोत्रस्य, अथोभयोः। नाद्यः, तस्यैकत्वात्सर्वगतत्वादनवयवत्वेन चावयवसंस्कारायोगात्प्रघ्नस्थैर्वायुभिः संस्कृतस्य पाटलीपुत्रेऽप्युपलम्भापत्तेः। न च द्वितीयः, श्रोत्रं ह्याकाशम्, तस्य सर्वेषामेकतया एकदेशस्थध्वनिभिरपि संस्कारात्सर्वेषां शब्दोपलब्धिप्रसङ्गः। न तृतीयः, पक्षद्वयोक्तदोषप्रसङ्गात्। अतः शब्दोऽनित्यः। न च तस्यानित्यत्वेऽपि समवायवत्तत्संबन्धो नित्योऽस्त्विति वाच्यम्। समवायनित्यत्वस्यापि परिभाषामात्रत्वात्।

६. शब्दनित्यत्वाधिकरणम्।

इतोऽप्येवमित्याह—

अस्थानात् ॥ ७ ॥

न च शब्दस्योच्चारणानन्तरं ज्ञातस्य चिरकालं स्थितिरुपलभ्यते। अतोऽपि तदनित्यत्वम् ॥

इतोऽप्येवमित्याह—

करोतिशब्दात् ॥ ८ ॥

शब्दं कुर्वकार्षीत्करोतीत्यादिव्यवहारादपि न नित्यः शब्दः, कृञ उत्पत्त्यर्थकत्वादिति भावः ॥

इतोऽप्येवमित्याह—

सत्त्वान्तरे च यौगपद्यात् ॥ ९ ॥

सत्त्वान्तरे प्राण्यन्तरे यौगपद्यात्, उपलम्भस्येति शेषः । नानादेशस्थैर्वक्तृभिरुच्चारिता युगपन्नानादेशेषूपलभ्यन्ते । न चेदं नित्यस्यैकस्य संभवति । न च नित्यत्वेऽप्यनेकत्वादिदमुपपद्यते । न हि नित्यमेकमेवेति नियम इति वाच्यम् । प्रत्यभिज्ञा हि नित्यत्वे मानम् । यथा ह्यस्तनाह्यस्तनयोस्तथा नानावक्तृकशब्देऽपि प्रत्यभिज्ञाबलान्नित्यत्वे तदैक्यमपीति नानादेशेषु युगपदुपलब्धिर्विरुद्धेत्याशयः ॥

इतोऽप्येवमित्याह—

प्रकृतिविकृत्योश्च ॥ १० ॥

दध्यत्रेत्यत्र प्रकृतेरिकारस्य विकृतेर्यकारस्य च दर्शनादिति शेषः । न हि विक्रियमाणस्य नित्यत्वं संभवतीति भावः ॥

इतोऽप्येवमित्याह—

वृद्धिश्च कर्तृभूम्नास्य ॥ ११ ॥

कर्तृभूम्ना उच्चारयितृबाहुल्येन वृद्धिः महत्त्वं दृश्यते । अवयवप्रचयकृतं महत्त्वमित्यवयविजननं तत्रेति गम्यते । अभिव्यङ्ग्यत्वे तु नेदमुपपद्यते । न हि बहुभिरल्पैर्वाभिव्यङ्ग्यो घटोऽन्यथोपलभ्यते । अवयवाल्पत्वबहुत्वाभ्यां तु घटादिरन्यथैवोपलभ्यते । अतो घटादिवदनित्यः शब्द इति भावः । यद्यपि तार्किकैः शब्दस्य द्रव्यत्वं नाङ्गीकृतं नापि तस्यावयवित्वम्, तन्मते गुणत्वादिति; तथापि तदन्य एवात्र पूर्वपक्षीत्याशयः ॥

अनित्यत्वं दूषयति—

समं तु तत्र दर्शनम् ॥ १२ ॥

तुरनित्यत्वं व्यावर्तयति। तत्र प्रयत्नोत्तरकाले दर्शनं समम्, कार्यत्वाभिव्यङ्ग्यत्वयोरिति शेषः॥

यदुक्तमुच्चारितप्रध्वस्तः शब्द इति तत्राह—

सतः परमदर्शनं विषयानागमात् ॥ १३ ॥

परमित्यव्ययं युक्तमित्यर्थे 'खलः प्रमाद्यतु परं सज्जने तदसांप्रतम्' इति यथा। स एवायं गकार इति प्रत्यभिज्ञया सतः स्थिरस्यैव शब्दस्य अदर्शनं युक्तम्। कुतः, विषयानागमात् विषयं शब्दं प्रति अभिव्यञ्जकानामनागमात् असंबन्धात्। प्रयत्नोत्तरकालिकं शब्दस्य दर्शनं न शब्दस्य कार्यत्वं साधयति, प्रयत्नव्यङ्ग्यत्वेनापि तदुपपत्तेः॥ यत्तु कथमभिव्यङ्ग्यत्वमिति, श्रोत्रेन्द्रियसंस्कारेणेति ब्रूमः। श्रोत्रेन्द्रियं च कर्णशष्कुल्यवच्छिन्नमाकाशम्। तच्च प्रतिपूरुषं भिन्नमिति नातिप्रसङ्गः। अधिष्ठानभेदाच्च संस्कारव्यवस्था। न चैकेनाधिष्ठानेनाकाशस्य संस्कृतत्वात्सर्वेषामुपलब्धिः स्यादिति वाच्यम्। भोगायतने हि स्वशरीरे पुंसां ज्ञानमुत्पद्यते, न त्वन्यत्र। शब्दज्ञानाङ्गं चायमधिष्ठानसंस्कारः। प्रधानसमदेशत्वं चाङ्गानां गुणः। तेन देहान्तरवतः पुरुषस्य यत्स्वदेहे निष्पादयितव्यं ज्ञानं तस्य तद्देहगत एव संस्कारो निष्पादकः, न तु देहान्तरगतः। विगुणो हि सः, प्रधानदेशत्वाभावात्। नन्वेवमपि संस्कार्यस्यैकत्वात्तद्द्वारत्वाच्च संस्काराङ्गभावस्य देशभेदोऽकिंचित्करः, [1]बहिरेकत्वेन तत्संस्काराणामातिश्याकालानामप्युपसदग्रीषोमीयाङ्गत्वादिति चेत्। न ह्येकस्मिन्नधिष्ठाने सर्वेषां ज्ञानमुपलभ्यते। साधारणमपीन्द्रियं विज्ञानसमानदेशसंस्कारसचिवं विज्ञानमुत्पादयति, नान्यथेति कल्पनेनानतिप्रसङ्गात्। किंच, यद्यप्याकाशमेकमनवयवं च तथापि तस्य परिच्छिन्नैर्घटादिभिर्ये संयोगास्तेऽपि परिच्छिन्ना एव। एवं च कर्णशष्कुलीसंयोगानां प्रतिपूरुषं भिन्नत्वात्तदवच्छिन्नाकाशस्य च श्रोत्रत्वात्सत्यपि स्वरूपैक्येऽवच्छिन्नरूपाणां तेषां भिन्नत्वाद्व्यवस्थासिद्धिः। न चैवमपि सकृत्संस्कृतं श्रोत्रं सर्वशब्दान्प्रकाशयेदिति वाच्यम्। ध्वनयो हि ताल्वादिसंपर्काद्विजातीया [2]विलक्षणसामर्थ्या निष्पद्यन्ते। ततश्च कश्चिदेव ध्वनिः कंचिदेव शब्दमभिव्यनक्तीति व्यवस्थोपपत्तिः। दृष्टा च समानेन्द्रियग्राह्याणामप्यभिव्यञ्जकव्यवस्था। सावित्रं हि तेजो घटादीनामेवाभिव्यञ्जकं न तु नक्षत्राणाम्। निम्बत्वक् चन्दनगन्धस्यैवाभिव्यञ्जिका न तु गन्धान्तराणाम्। किंच शब्दसंस्कारपक्षेऽपि न सर्वपुंसामुपलब्धिप्रसङ्गः, ध्वनीनां परिच्छिन्नत्वेन तद्देश एव शब्दस्य संस्कारात्। संस्कृतेन शब्देन यस्येन्द्रियं संनिकृष्टम्, स एव शृणोतीति कल्पनान्नाभिव्यङ्ग्यत्वे कश्चिद्दोषः।

1. बहिरेकत्वेन—क. 2. संपर्काद्विलक्षणसामर्थ्यात्—ख; विजातीया विलक्षणसामर्थ्यात्—क.

यदुक्तं करोतिशब्दादिति तत्राह—

प्रयोगस्य परम् ॥ १४ ॥

परम् अन्यत् यत्कारणमुक्तं करोतिशब्दादिति, तत् प्रयोगस्य उच्चारणस्य, [1]शब्दं करोतीत्यत्र शब्दोच्चारणस्य उत्पत्तिर्विवक्षितेत्यर्थः ॥

एकस्य नित्यस्य युगपन्नानादेशोपलम्भः कथम् । तत्राह—

आदित्यवद्यौगपद्यम् ॥ १५ ॥

आदित्यस्य एकस्य यथा युगपद्दर्शनं तथा शब्दस्यापीत्यर्थः ॥ 'सर्वगतो हि शब्दो भिन्नदेशैर्ध्वनिभिः स्वे स्वे देशेऽभिव्यज्यमानो भिन्नदेशेऽवभासते । ध्वनयो हि श्रोत्रदेशमागत्यापि शब्दं व्यञ्जयन्तः स्वोत्पत्तिदेशमिव शब्दं भासयन्तीति दर्शनबलादभ्युपगम्यते । ननु, अप्राप्यकारि श्रोत्रम्, न च ध्वन्युत्पत्तिदेशाः श्रोत्रेण प्राप्यन्त इति कथं [2]तद्विशिष्टशब्दग्रहणं श्रोत्रेणेति चेत् । श्रोत्रं हि स्वदेशावस्थितमेव शब्दं बोधयदपि न तद्विशिष्टं बोधयति, किंतु स्वरूपेणैव । शब्दोच्चारणदिश [3]आगता ध्वनयस्तु तया विशिष्टं शब्दं बोधयन्ति । सा च दिक् श्रोत्रप्राप्ता कालवच्छब्दविशेषणतया शक्यते श्रोत्रेण ग्रहीतुम् । ध्वनयश्च क्रमेण मन्दीभवन्तः प्रत्यासन्नादूरतराच्च देशादागतास्तीव्रं मन्दं मन्दतरं च शब्दं बोधयन्ति । बोधविशेषाच्च प्रत्यासन्नदूरादिरूपेणानुमानाद्ध्वन्युत्पत्तिदेशो हृदयं[4] तद्रूपेणागच्छति । तत्र यः शब्दस्य परमार्थदेशस्तस्याग्रहणाद्विशिष्टस्य शब्दस्वरूपस्य च ग्रहणात् ध्वन्युत्पत्तिदेशस्य च ग्रहणान्नयाणां संसर्गभ्रमादेवंविधः प्रत्ययो भवति— प्राच्यां दिश्येतावदन्तराले शब्दः' इति शास्त्रदीपिकायां व्यक्तम् । अत्र '[5]आगता ध्वनयः' इत्युक्त्या ध्वनीनां द्रव्यत्वं सूचितम् । 'वायुगुणत्वं तु युक्तम्' इत्यादिसंदर्भेण गुणत्वमपि प्रपञ्चितम् । तत्र गुणत्वपक्षे ध्वनिमद्वायव एव स्वदेशे यत्नेनोत्पन्नाः श्रोत्रमायान्ति । वीचीतरङ्गन्यायेन कदम्बमुकुलन्यायेन वा तार्किकाणां शब्दगुणस्येन्द्रियसंनिकर्षो वा बोध्यः । भाष्ये तु 'वायवीयाः संयोगविभागा एव व्यञ्जकाः' इति स्थितम् । ध्वनय एव च लोके नादशब्देन व्यवह्रियन्ते । न चाकाशगुणत्वं शब्दस्य युक्तम् । तस्य शङ्खाद्यवच्छिन्ने तस्मिन्नुत्पत्तेर्वाच्यतया संनिकर्षाभावेन श्रोत्रेन्द्रियेण ग्रहणानापत्तेः । वस्तुतस्तु वायोरभिघातकारणत्वेनावश्यकत्वात्तद्गुणत्वमेव युक्तम् । वर्णास्तु नित्यानि द्रव्याणि, वर्णा न

1 ज्ञेयम् । शब्दं—क, घ. 2. तद्विशेषशब्दग्रहणं—ख, ग; तद्विशेषे शब्दग्रहणं—क. 3. दिश आतताः—ख, ग. 4. हृदयदेशं तद्रूपेण—क, ग. 5. दिश आगता—क, ग.

गुणाः, ध्वन्यन्यत्वे सति श्रावणत्वात् शब्दत्ववद्दिग्वत्कालवच्चेत्यनुमानेन अगुणत्वे सिद्धे परिशेषेण द्रव्यत्वसिद्धेः। दिक्कालयोश्च श्रावणत्वस्य [1]अनुभवसिद्धत्वान्नासिद्धिः। एतेन अस्पर्शत्वे सत्येकेन्द्रियग्राह्यत्वाद्रूपादिवद्गुणत्वमिति प्रत्युक्तम्, शब्दत्वे व्यभिचारात्। ननु वर्णा अनित्याः [2]सामान्यान्यत्वे सत्यस्मदादिबाह्यैकेन्द्रियग्राह्यत्वात्, इत्यनुमानादिति चेन्न। अस्यानुमानस्य श्रोत्रं नित्यद्रव्यग्राहकं निरवयवेन्द्रियत्वात् मनोवत् इति सत्प्रतिपक्षतया असाधकत्वात्। न च श्रोत्रं नित्यद्रव्याग्राहकम् अनित्यभूतविशेषगुणग्राहकं वा बहिरिन्द्रियत्वादिन्द्रियत्वाद्वा चक्षुर्वदिति प्रत्यनुमानबाधः। प्रथमेऽनुमाने दृष्टान्ते साध्यवैकल्यात्, चक्षुष आकाशादिनित्यग्राहकत्वात्। द्वितीये च ध्वनिग्राहकतया सिद्धसाधकत्वात्। किंच, व्यक्तिभेदाभावात्स एवायं गकार इति प्रत्यभिज्ञाया जातिविषयकत्वकल्पनानुपपत्त्या प्रत्यभिज्ञाविरोधोऽपि दुर्वारः। न च द्रुतो गकारो विलम्बितो गकार इति विरुद्धधर्मसंसर्गित्वाद्गकारव्यक्तिभेद इति वाच्यम्। तस्याः प्रतीतेर्ध्वनिविषयत्वात्। एतेनोदात्तत्वादिप्रतीतिरपि व्याख्याता। ध्वन्युत्पत्तिश्च तालवादिव्यापारात्। स्थानभेदात्तु मन्द्रोदात्तत्वादिव्यवहारः। किं बहुना, शब्दानित्यत्वपक्षेऽपि नानादेशोपलब्धेर्भ्रान्तित्वमपरिहार्यम्[3], श्रोत्रस्य प्राप्यकारित्वाभावेन वक्तृमुखादिरूपदेशग्रहणस्य भ्रान्तित्वावश्यकत्वात्। तस्मान्नित्यः शब्दः।

यदुक्तं विक्रियमाणत्वादनित्यत्वं तत्राह—

[4]शब्दान्तरमविकारः ॥ १६ ॥

दधि अत्र इत्यस्मात् दध्यत्र इति शब्दान्तरम्। न यकार इकारस्य विकारः। यथा कटं चिकीर्षुस्तृणान्यादत्ते न तथा यकारं प्रयुयुक्षेरिकारोपादानं संभवति, त्वया तस्य गुणत्वस्वीकारात्, अस्मन्मते विभुत्वेन द्रव्यान्तराप्रकृतित्वात्। व्याकरणं तु साधुत्वमात्रज्ञापकम्, न तु प्रकृतिविकारबोधकम्। अत एव 'सिद्धं तु नित्यशब्दत्वात्' 'किमर्थं शास्त्रमिति चेत्, निवर्तकत्वात्सिद्धम्' इति वृद्धिसूत्रस्थं तद्वार्तिकं तद्भाष्यं च संगच्छते। अभियुक्ताश्चाहुः 'उपायाः शिक्ष्यमाणानां बालानामुपकारकाः। असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते' इति॥

यदुक्तं वक्तृबहुत्वाच्छब्दमहत्त्वमिति तत्राह—

नादवृद्धिः परा ॥ १७ ॥

परा अन्या वृद्धिर्या उक्ता वक्तृबहुत्वाच्छब्दस्य वृद्धिरिति, सा वृद्धिर्न शब्दस्य; किंतु

1. युक्तयनुभवसिद्धत्वात्—क, ग. 2. सामान्यवत्वे सति—क, ग, घ. 3. अपरिहारम्—घ. 4. वर्णान्तरम्.

नादवृद्धिः, नादो ध्वनिः तस्य वृद्धिः, शब्दस्यानवयवत्वेन महत्त्वानुपपत्तेः । बहुभिर्नैरन्तर्येणोच्चार्यमाणैर्नादैः सर्वतः कर्णशष्कुलीं प्राप्नुवद्भिः शब्दो महानिति भ्रमः । न तु तस्य महत्त्वमिति भावः ॥

एवं परमतं दूषयित्वा स्वमतमाह—

नित्यस्तु स्याद्दर्शनस्य परार्थत्वात् ॥ १८ ॥

तुरवधारणे । नित्य एव शब्दः स्यात् । दृश्यते अनेनेति दर्शनमुच्चारणम् , तस्य परं प्रत्यर्थप्रत्यायनार्थत्वात् । न ह्युच्चारितस्य शब्दस्य नाशे अन्यस्माच्छब्दजशब्दादर्थप्रतीतिः संभवति, उच्चारिताच्छब्दादर्थं प्रत्येमीत्यनुभवविरोधात् शक्तिग्रहाभावाच्च ॥

इतोऽप्येवमित्याह—

सर्वत्र यौगपद्यात् ॥ १९ ॥

सर्वव्यक्तिषु बोधस्य यौगपद्यात् नित्यः शब्दः । गोशब्देऽभ्युच्चारिते युगपत्सर्वासां गोव्यक्तीनां प्रतीतेरानुभाविकत्वेन आकृतिवचनत्वं शब्दस्याध्यवसीयते । न चाकृत्या अनित्यशब्दस्य संबन्धः कर्तुं शक्यः । नित्यत्वे तु पूर्वपूर्वप्रयोगात् स शक्यग्रह इत्यर्थः ॥

इतोऽप्येवमित्याह—

संख्याभावात् ॥ २० ॥

दश गोशब्दानुच्चारयतीति संख्याप्रतीतेरभावादपि नित्यः शब्दः । दशकृत्वो गोशब्दमुच्चारयतीत्येव प्रतीतेः ॥

इतोऽप्येवमित्याह—

अनपेक्षत्वात् ॥ २१ ॥

यथा घटादि कार्यं स्वोत्पत्तौ समवाय्यसमवायिनिमित्तकारणमपेक्षते तन्नाशे च नश्यति नैवं शब्दः, तस्य समवाय्यादिकारणाभावात् । तस्मान्नित्यः ॥

ननु वायुकारणकः शब्दः, वायुसंयोगवियोगैर्जायमानत्वात् 'वायुरापद्यते शब्दताम्' इति शिक्षाकृदुक्तेश्च । तत्राह—

[1]प्रेक्षाभावाच्च संयोगस्य ॥ २२ ॥

शब्दे वाय्ववयवसंयोगस्यानुपलब्धेः न वायुकारणकः शब्दः । 'प्रख्याभावाच्च योग्यस्य' इति पाठे योग्यस्येति जातावेकवचनम् । वाय्ववयवानां प्रख्यायाः उपलब्धेः अभावादित्यर्थः । यथा पटादौ तन्तवस्तदवयवा उपलभ्यन्ते नैवं शब्दे ॥ ननु वायुर्न प्रत्यक्षः, किंतु तदीय एव स्पर्शः स्पार्शनप्रत्यक्षः, अतः शब्दे वाय्ववयवानुपलब्धिरिति चेन्न । वायुं स्पृशामीति[2] प्रतीत्या तस्यापि प्रत्यक्षत्वात् स्पर्शमात्रोपलम्भापत्तिसंभवाच्च । न च शब्दे अनुद्भूतस्पर्शकल्पनान्न दोष इति वाच्यम् । तथा कल्पने मानाभावात् । चकारः अनुक्तसमुच्चयार्थः इममेव शङ्कापरिहारं समुच्चिनोति ।

नित्यत्वं शब्दस्य वेदसंमतमपीत्याह—

लिङ्गदर्शनाच्च ॥ २३ ॥

'वाचा विरूप नित्यया' इति [3]नित्यत्वानुवादाल्लिङ्गादपि नित्यः शब्दः ॥

ननु तथापि वाक्यार्थे धर्मे चोदनायाः प्रामाण्यं न संभवतीत्याक्षिपति—

उत्पत्तौ वावचनाः स्युरर्थस्यातन्निमित्तत्वात् ॥ २४ ॥

वाशब्दः प्रत्यवस्थाने । उत्पद्यते अवगम्यते इत्युत्पत्तिः वाक्यार्थो धर्मः अलौकिकश्रेयःसाधनताकयागादिभावनात्मकः, तत्र विषये चोदनाः अवचनाः । करणे ल्युट् । अप्रमाणानि ।

७. वेदप्रत्यायकत्वाधिकरणम् ।

कुतः, अर्थस्य अतन्निमित्तत्वात् धर्मावबोधलक्षणकार्यस्य[4] चोदनाहेतुकत्वाभावात्, चोदनावाक्यस्य धर्मावबोधे असामर्थ्यादिति यावत् ॥ तथा हि—किं पदानि प्रत्येकं वाक्यार्थं धर्मं बोधयन्ति, उत तत्समूहात्मकं वाक्यम्, पदार्था वा । नाद्यः, इतरवैयर्थ्यात्प्रत्येकं बोधादर्शनात्, पदानां वाक्यार्थविशेषे संकेतग्रहाभावाच्च । अत एव न द्वितीयतृतीयौ । संकेतमनपेक्ष्य बोधकत्वे तु व्युत्पत्तिवैयर्थ्यं बालानामपि बोधप्रसङ्गश्च ।

समाधत्ते—

तद्भूतानां क्रियार्थेन समाम्नायोऽर्थस्य तन्निमित्तत्वात् ॥ २५ ॥

तद्भूतानां [5]सिद्धपदार्थेषु विद्यमानानां पदानां भावनार्थकेन पदेन सह समाम्नायः पाठः

1. प्रख्याभावाच्च योग्यस्य. 2. इति तस्यापि—ख, ग. 3. वाङ्नित्यत्व—घ. 4. धर्मावबोधकार्यस्य—घ. 5. प्रसिद्ध—घ.

दृश्यते, अतो वाक्यार्थबोधः संभवति। कुतः, अर्थस्य वाक्यार्थबोधस्य तन्निमित्तत्वात् पदार्थोपस्थितिद्वारा पदनिमित्तकत्वात् ॥ पदैरभिहिताः पदार्था एव हि वाक्यार्थं बोधयन्ति, न तु पदानां वाक्यस्य वा तत्र व्यापारः, पदार्थबोधनेनैव कृतार्थत्वात्। अत एव सत्यपि वाक्यश्रवणे अनवहितस्य वाक्यार्थानवबोधः, दीर्घवाक्यैकदेशविस्मरणेऽपि पदार्थस्मृतिशालिनो वाक्यार्थबोधश्च। न च पदार्थानां वाक्यार्थे संबन्धग्रहाभावान्नैतदुपपद्यत इति वाच्यम्। वाक्यार्थलक्षणायां संबन्धग्रहस्यानुपयोगात्, स्वरूपसतः संबन्धस्यैवोपयोगात्। एतेनात्यन्ताप्रसिद्धे वेदार्थे धर्मे संबन्धग्रहासंभवादप्रामाण्यमिति परास्तम्। न चाव्युत्पन्नस्य वाक्यार्थबोधप्रसङ्गः, पदपदार्थसंबन्धग्रहस्यावश्यकत्वात्। समभिव्याहारस्य च नियामकत्वान्नातिप्रसङ्गोऽपि। एवं च वाक्यार्थबोधस्य पदार्थमूलकत्वेन निर्मूलकत्वाभावात् पुरुषापेक्षाभावाच्च निष्प्रत्यूहं धर्मे वाक्यार्थे प्रामाण्यं चोदनायाः।

लोके त्वन्यथापीत्याह—

लोके [1]सन्नियमात्प्रयोगसंनिकर्षः स्यात् ॥ २६ ॥

लोके सन्नियमात् सति मानान्तरेण गृहीतेऽर्थे नियमात्[2] प्रयोगस्य पुरुषसंबन्धः स्यात्। वेदार्थे तु नैव मानान्तरयोग्यत्वमिति भावः ॥

अथ वेदस्य पौरुषेयत्वं पूर्वपक्षयति—

वेदांश्चैके संनिकर्षं पुरुषाख्याः ॥ २७ ॥

एके अन्ये तार्किकाः वेदान् संनिकर्षं गमयन्ति संनिकृष्टकालान्वदन्तीति यावत्, यतस्ते वेदाः पुरुषाख्याः पैप्पलादं कालापं काठकमित्याधुनिकपुरुषेण समाख्यायमाना भवन्ति ॥ अनया हि समाख्यया पुरुषविशेषसंबन्धो वेदानामवगम्यते। न चेयं प्रवचननिमित्ता भवितुमर्हति, प्रवचनस्य साधारणत्वेन समाख्यानिमित्तत्वायोगात्। कर्तृत्वे तु सा घटते। स्वातन्त्र्येण वाक्यरचयितृत्वं हि कर्तृत्वम्। तत् रचकस्यैव; अन्येषां तु तादृक्छब्दोच्चारयितृत्वेऽपि न स्वातन्त्र्यम्। अत एव भारतरघुवंशादिवाक्योच्चारयितृष्वस्मासु न तत्कर्तृत्वव्यवहारः। एवं च वर्णानां नित्यत्वेऽपि तदानुपूर्वीविशेषविशिष्टवेदस्य पौरुषेयत्वादप्रामाण्यम्।

८. वेदापौरुषेयत्वाधिकरणम्।

इतोऽप्येवमित्याह—

---

1. लोके सन्नियमनात्. 2. नियमात् शब्दप्रयोगनियमात्—घ.

अनित्यदर्शनाच्च ॥ २८ ॥

'बबरः प्रावाहणिरकामयत' इति वृत्तार्थकथनेन तस्मिन्समये वेदो नासीदित्यवगमादपि न तस्य प्रामाण्यम् ॥

सिद्धान्तयति—

उक्तं तु शब्दपूर्वत्वम् ॥ २९ ॥

तुः पूर्वपक्षव्यावृत्तौ । शब्दः शब्दनं पूर्वपूर्वाध्ययनम । तत्पूर्वकत्वमुत्तरोत्तराध्ययनस्य अध्येतृभिरुक्तम्। ततश्च विवादाध्यासितं वेदाध्ययनमध्ययनपूर्वकम् अध्ययनत्वात् इदानींतनाध्ययनवत् इत्यनुमानान्नैव वेदस्य प्रथमः कश्चिदध्येतास्ति, येन सकर्तृकत्वं वेदस्य [1]स्यादिति भावः ॥

काठकादिसमाख्यामन्यथयति—

आख्या प्रवचनात् ॥ ३० ॥

प्रवचनातिशयात्काठकादिसमाख्या उपपद्यते ॥

अनित्यदर्शनादित्यत्राह—

परं तु [2]श्रुतिसामान्यमात्रम् ॥ ३१ ॥

परम् अन्यदप्रामाण्यसाधकं यदुक्तमनित्यदर्शनम , तत् श्रुतिसामान्यमात्रमेव । श्रुतीति कर्मणि क्तिच् । 'धाता यथापूर्वमकल्पयत्' 'यथर्तावृतुलिङ्गानि नानारूपाणि पर्यये । दृश्यन्ते तानि तान्येव तथा भावा युगादिषु' इति प्रतियुगं श्रुताः प्रवाहणबबरादयः । तत्सामान्यं प्रवाहणत्वादिकमेव प्रवाहणादिपदेन विवक्षितम । आसीदिति भूतत्वं च भविष्यत्कल्पापेक्षम् । तुर्नार्थे । अतो न दोष इत्यर्थः । तथा च प्रतियुगमनुवर्तमाना बबरादयः प्रवाहनित्यतया चन्द्रसूर्यादिवद्वैदिकपदगोचराः सन्तो नैव वेदस्य नित्यतां व्याकोपयन्तीति भावः ॥

नन्वेवमपि 'गावो वा एतत्सत्रमासत' 'सर्पाः सत्रमासत' 'स आत्मनो वपामुदखिदत्' इत्यादिवेदवाक्यानां प्रमत्तगीतसदृशानां कथं प्रामाण्यमित्यत आह—

---

1. सिध्येत्— क. 2. श्रुतिसामान्यम्.

कृते वा विनियोगः स्यात्कर्मणः [1]समत्वात् ॥ ३२ ॥

वाशब्दोऽवधारणे । कृत इति भावे क्तः । कृते कर्मणि प्रशंसाद्वारा गाव इत्यादीनां विनियोगः अन्वयः स्यात् । अतो धर्मप्रामाण्यमस्त्येव । सन्नादिकर्मणः प्रशंसापेक्षाविषये 'वायव्यं श्वेतमालभेत भूतिकामः, वायुर्वै क्षेपिष्ठा देवता, वायुमेव स्वेन भागधेयेनोपधावति, स एवैनं भूतिं गमयति' इत्यादिविहितकर्मभिस्तुल्यत्वात् । एतच्चाग्रे व्यक्तं भविष्यति । 'कर्मणः संबन्धात्' इति पाठेऽपि सन्नादिकर्मणः प्रशंसापेक्षस्य संबन्धात् सांनिध्यादित्यर्थः ॥ वेदः पौरुषेयः वाक्यत्वात् भारतादिवत् इत्यनुमानं त्वेवं निराकर्तव्यम्— किमिदं पौरुषेयत्वं पुरुषाधीनोत्पत्तिकत्वं वा, मानान्तरेणार्थमुपलभ्य रचितत्वं वा । नाद्यः, सिद्धसाधनत्वात् । आकाशवन्नित्यानां सर्वगतानां कालतो देशतश्च क्रमशून्यानां वर्णानामनित्योच्चारणप्रतिपत्तिक्रमविशिष्टानां पूर्वपूर्वक्रमानुस्मृतिनिमित्ततत्तत्सदृशोत्तरोत्तरक्रमवतां वेदशब्दवाच्यानां पुरुषाधीनोत्पत्तिकत्वात् । न द्वितीयः, कालिदासादिकृतरघुवंशादिसाधारण्यापत्तेः । किंच पुरुषोऽपि कस्तवाभिमतः कश्चिन्मनुष्यो वा योगी वा ईश्वरो वा । नाद्यः, मनुष्ये धर्मादिज्ञानस्य वेदजन्यत्वेन तत्र तस्य कर्तृत्वासंभवात् । न द्वितीयः, योगिनोऽपि हि धर्माधर्मादिप्रमापकं न तावद्बाह्येन्द्रियम्, धर्मादेस्तदयोग्यत्वात् । नापि मनः, [2]तज्जनितज्ञानस्य आत्मयोग्यतद्गुणातिरिक्तविषयत्वात् । नन्वस्मदादिज्ञानस्य तथात्वेऽपि विवेकवैराग्यादिबहुगुणशालिनां योगिनां तादृशज्ञानमस्त्विति चेन्न । एवं सति वेदस्यानादित्वेन अस्मदिष्टापौरुषेयत्वसिद्धेः । न हि तेषां [3]तादृशसंपत्तिर्वेदाध्ययनतदर्थाचरणमन्तरेण संभवति, आकस्मिकत्वापातात् । न तृतीयः, वेदादीश्वरसिद्धावन्योन्याश्रयात् 'ब्रह्म स्वयंभु' 'वाचा विरूपनित्यया' 'अनादिनिधना नित्या वागुत्सृष्टा स्वयंभुवा।' 'स्वयंभूरेष भगवान्वेदो गीतः स्वयंभुवा । शिवाद्या ऋषिपर्यन्ताः स्मर्तारोऽस्य न कारकाः।' इति श्रुतिस्मृतिपुराणवचनैर्वेदानां नित्यत्वावगमेन ईश्वरकर्तृकत्वकल्पनायोगाच्च । नन्वेषामन्यपरत्वान्नैभ्यो नित्यत्वसिद्धिरिति चेन्न । अन्यपराणामपि मानान्तरप्राप्तिविरोधयोरसतोः स्वार्थे प्रामाण्यस्यार्थवादाधिकरणे वक्ष्यमाणत्वात् । अत एव विशिष्टविधेर्विशेष्यविशेषणोभयपरत्वे वाक्यभेदापत्त्या विशिष्टमात्रपरस्य विशेषणांशेऽपि प्रामाण्यमिष्यत एवेति रेवत्यधिकरणे वक्ष्यते । अप्राप्ताबाधितार्थबोधकत्वमेव हि प्रामाण्यम्, न तु तात्पर्यघटितमपि, शब्दान्यप्रमाणे तदभावात् । नन्वेवमन्यपरस्यापि 'वज्रहस्तः पुरंदरः' इत्यार्थवादस्य स्वार्थेऽपि प्रामाण्ये देवताधिकरणविरोध इति चेन्न । देवताधिकरणे 'देवता वा प्रयोजयेदतिथिवद्भोजनस्य तदर्थत्वात्' 'अपि वा शब्दपूर्वत्वाद्यज्ञकर्म प्रधानं स्याद्गुणत्वेन देवताश्रुतिः' इति सूत्रकृता याग एव फलस्य प्रयोजकः, देवता तु यागस्य गुणः, न तु यागाराधिता

1. सम्बन्धात्. 2. तज्जनितस्य आत्म—घ. 3. तादृशगुणसंपत्तिः—घ.

देवता फलं प्रयोजयतीत्येवं देवताया गुणभावो यागं प्रतीत्येतावदेव व्यवस्थापयिष्यते । देवताविग्रहादिकं तु भाष्यकृतैवोत्सूत्रं निराकरिष्यते प्रौढिवादेनेति तत्रैवास्माभिः प्रपञ्चयिष्यते । न च काठकादिसमाख्या कर्तृनिबन्धनैवोपपाद्येति वाच्यम् । तस्याः [1]प्रवचनातिशयनिबन्धनताया उक्तत्वात् । पदविभागक्रमपाठतदर्थख्यापनादिकमेव तदतिशयः । न च वेदा अनाप्तप्रणीतत्वादाप्तप्रणीताः इदानींतनवाक्यविशेषवदिति वाच्यम् । आत्माकाशादौ व्यभिचारात् । अशब्दत्वे सतीति विशेषणमिति चेन्न । आप्तप्रणीतत्वमात्रस्य उक्तविधया वेदेऽप्यङ्गीकारात् । वेदा अपौरुषेयाः संप्रदायाविच्छेदे सति अस्मर्यमाणकर्तृकत्वात् आत्मवदिति सत्प्रतिपक्षत्वाच्च । न च सत्यन्तासिद्धिः, संसारचक्रप्रवर्तकत्वेन संप्रदायविच्छेदाभावात् । नन्वाप्तप्रणीतत्वाभावे बालोन्मत्तादिवाक्यवदप्रामाण्यं स्यादिति चेन्न । प्रमाणानां स्वतःप्रामाण्याभ्युपगमात् । अनाप्तवाक्येष्वनाप्तसंबन्धात्प्रतिबन्ध इत्याद्याकरे स्पष्टम् । एवं च बोधकत्वात्सप्रयोजनत्वान्निरपेक्षत्वाच्च चोदना धर्मे प्रमाणमितिसिद्धं चोदनालक्षणोऽर्थो धर्म इति ॥

इति प्रथमाध्याये प्रथमः पादः ॥

1. प्रवचनादि—क, ख, ग.

द्वितीयः पादः ॥

निर्मथ्य निगमसिन्धून्विविधन्यायाभिधानमन्थानैः ।
धर्मसुधामुद्धरते भूयो मुनये नमोऽस्तु जैमिनये ॥

पूर्वस्मिंस्तर्कपादे विध्यर्थवादमन्त्रनामधेयात्मकवेदस्य सामान्यतः प्रामाण्यं विशिष्य च विधिभागस्य प्रामाण्यं वर्णितम् । अथास्मिन्द्वितीयपादे अर्थवादमन्त्रभागयोर्विशिष्य प्रामाण्यं वर्ण्यते ॥

'वायुर्वै क्षेपिष्ठा देवता, वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूतिं गमयति' इत्याद्यर्थवादा धर्मे प्रमाणं न वेति संशये पूर्वपक्षयति—

आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमुच्यते ॥ १ ॥

पूर्वस्मिन्पादे 'तद्भूतानां क्रियार्थेन समाम्नायः' इत्यधिकरणे आम्नायस्य वेदस्य क्रियार्थत्वात् किं केन कथमित्येवं फलतत्साधनतदितिकर्तव्यतात्मकांशत्रयविशिष्टपुरुषप्रवृत्तिरूपभावना-

१ अर्थवादाधिकरणम् ।

प्रतिपादनार्थत्वावधारणात् अतदर्थानां भावनातदंशत्रयातिरिक्तार्थकानामर्थवादानाम् आनर्थक्यं धर्मप्रमितिरूपप्रयोजनशून्यत्वम् । न ह्यर्थवादेषु भावना गम्यते, तद्बोधकलिङाद्यभावात् । ननु तर्हि तेषां वेदत्वमेव न स्यात्, प्रमाणान्तरागोचरधर्मावेदकत्वस्यैव वेदशब्दप्रवृत्तिनिमित्तत्वादित्याशङ्क्य इष्टापत्त्या परिहरति—तस्मादिति । तस्मात् भावनात्मकधर्मप्रमापकत्वाभावाद्धेतोः अर्थवादजातम् अनित्यमुच्यते। नित्यं वेदवाक्यम् ततोऽन्यदनित्यं लौकिकवाक्यम् उच्यते प्रमादाद्वेदवाक्यसंवलितं पठ्यते ॥ यद्यपि वायव्ययागविधौ वायुरन्तर्भवति, तथापि नात्र स्वरूपेण स वर्ण्यते, लोकत एव तत्सिद्धेः । नापि देवतात्वेन, वायव्यमित्यनेनैव सिद्धेः । क्षेपिष्ठत्वादिकं तु वर्ण्यमानं न विधावन्तर्भवति, लोकसिद्धं च । न च विधेये इष्टसाधनतावगमकस्तुतिसमर्पकतया अर्थवादानां विध्यन्तर्भावादस्तु प्रामाण्यमिति वाच्यम् । इष्टसाधनतावगतिर्हि विनापि स्तुत्या विधिबलादेव भविष्यति, इष्टसाधनतावगतिं विना विधेः प्रवर्तकत्वासंभवेन विधि-

नैवेष्टसाधनतावगतिलाभात्। न चैवं सति लोके[1] इयं गौर्बहुक्षीरा बहुजीवत्स्त्र्यपत्या इत्यादिस्तुतिवैयर्थ्यं शङ्क्यम्। लोके स्तुतेरिष्टसाधनतावगतिदार्ढ्यार्थत्वात्, वेदे च समीहितसाधनतावगतेर्वेदजन्यत्वेनैव दृढतया स्तुत्यनपेक्षणात्। अन्यथा 'ब्रह्मणे ब्राह्मणमालभते' इत्यादिनिरर्थवादस्थले का गतिः। तस्मादर्थवादा न धर्मे प्रमाणम्।

ननु धर्मप्रमाणत्वाभावेऽपि यथाभूतार्थानुवादितया प्रमाणत्वमस्त्वित्याशङ्क्य यथाभूतार्थप्रमितिजनकत्वमपि नास्ति, किमुत धर्मप्रमितिजनकत्वमिति वक्तुं सिद्धार्थेऽप्यप्रामाण्यमुपपादयति—

[2]शास्त्रदृष्टविरोधाच्च ॥ २ ॥

शास्त्रविरोधात् दृष्टविरोधात् शास्त्रदृष्टविरोधाच्च भूतार्थप्रमाणत्वमपि नार्थवादानामित्यर्थः॥ 'स्तेनं मनोऽनृतवादिनी वाक्' इति श्रूयते। अनृतमेव वदति न तु सत्यमित्यनृतवादिनी। ताच्छीलिको णिनिः। अत्र मनसः परद्रव्यापहरणरूपं स्तेयम्, वाचश्चानृतवदनैकस्वभावत्वं बाधितम्। अतो लक्षणया मनःपूर्वकं चोरयेत्, वाग्वच्च कदाचिदनृतं वदेदिति कल्पनायाम् 'न चोरयेत्' 'नानृतं वदेत्' इति शास्त्रविरोधः। दृष्टेति भावे क्तः। प्रत्यक्षविरोधादित्यर्थः। 'धूम एवाग्नेर्दिवा ददृशे नार्चिः' इति प्रत्यक्षविरोधादप्रमाणम्। तथा 'न चैतद्विद्मो ब्राह्मणाः स्मो वयमब्राह्मणा वा' इत्यपि प्रत्यक्षविरोधादप्रमाणम्। दर्शपूर्णमासयोरार्षेयवरणं[3] प्रकृत्य श्रूयतेच्छ्रुतम्। न श्रूयतेत्संभवति,—ब्राह्मणाधिकृतवासन्तिकोपनयनादिपूर्वकं दर्शपूर्णमासौ कुर्वाणो ब्राह्मण्यं स्वगतं प्रति संदिग्धे इति। तथा 'को हि तद्वेद यद्यमुष्मिँल्लोकेऽस्ति वा न वा' इति स्वर्गसंशयपरं वाक्यं शास्त्रदृष्टविरोधादप्रमाणम्। दृष्टेति भावे क्तः। दर्शनमवगमः। 'स्वर्गकामो यजेत' इति शास्त्रान्तर्गतस्वर्गपदजन्यतदवगतिविरोधादित्यर्थः। पूर्वत्र शास्त्रेण विरोधः, इह तु तदेकदेशस्वर्गपदेन विरोध इति भेदः। अथवा पूर्वत्र विधिवाक्येन विरोधः, इह तु 'अमुष्मिन लोके स्त्रियं संभवति' इत्याद्यर्थवादान्तरेण विरोध इति भेदः।

इतोऽप्येवमित्याह—

तथा फलाभावात् ॥ ३ ॥

गर्गत्रिरात्रब्राह्मणं प्रकृत्य श्रूयते 'शोभतेऽस्य मुखं य एवं वेद' इति। अत्र गर्गत्रिरात्रब्राह्मणार्थं जानानस्य शोभत इति लटा वर्तमानमुखशोभालक्षणस्य फलस्य तदानीमविद्यमानस्य

1. लोके इति घ पुस्तके नास्ति. 2. शास्त्रदृष्टि 3. वरणप्रवरं—क, ग.

प्रतिपादनात्स्वार्थेऽप्यप्रामाण्यम्। न हि तदानीं मुखशोभास्ति, प्रत्युत पदपदार्थसंगमनव्यापृतचित्त-विक्षोभप्रयुक्तमुखविकारस्यैवानुभूयमानत्वात् ॥

इतोऽप्येवमित्याह—

[1]अन्यानर्थक्यात् ॥ ४ ॥

आधाने श्रूयते 'पूर्णाहुत्या सर्वान्कामानवाप्नोति' इति। अत्रापि लटा तदानीं सर्वकामावाप्तेरविद्यमानायाः प्रतिपादनादप्रामाण्यं पूर्वसूत्रात्सिद्धमेव। अथापि लेट्कल्पनया फलाय विधिरिति कश्चिद्ब्रूयात्। तं प्रत्युच्यते। नैष फलाय विधिः, तथा सति अग्निहोत्रादिकर्मणां स्वर्गादि-फलाय विधानानर्थक्यप्रसङ्गात्। [2]क्रतुभिर्हि फलान्याजिहीर्षमाणः क्रतुसाधनीभूताहवनीयाद्यग्निनि-[3]र्वर्तकाग्न्याधेयान्तर्गतपूर्णाहुत्यैव सर्वक्रतुफलावाप्तौ सत्यां किमिति क्रतुषु प्रवर्तेत। तदाहुः— '[4]अत्के चेन्मधु विन्देत किमर्थं पर्वतं व्रजेत्। इष्टस्यार्थस्य संप्राप्तौ को विद्वान्यत्नमाचरेत्' इति। 'गृहकोणोऽत्के इत्यपि' इति जयन्तः।

इतोऽप्येवमित्याह—

अभागिप्रतिषेधात्[5] ॥ ५ ॥

भागः भजनं प्राप्तिः प्रसङ्गः अस्त्यास्तीति भागि प्रसक्तम्; अभागि अप्रसक्तम्, तस्य प्रतिषेधादित्यर्थः। 'न पृथिव्यां नान्तरिक्षे न दिव्यग्निश्चेतव्यः' इत्यप्रतिषेध्यप्रतिषेधादप्रमाणम्। पृथिव्यां हि चयनं विहितत्वादप्रतिषेध्यम्। अन्तरिक्षे दिवि च चयनमप्रसक्तमेव ॥

इतोऽप्येवमित्याह—

अनित्यसंयोगात् ॥ ६ ॥

'बबरः प्रावाहणिरकामयत' इत्याद्यप्रमाणम्, अनित्यैर्जनिमद्भिः प्रवाहणादितदपत्यबबरादिभिरर्थैर्वाच्यतया संयोगात्। न हीदानींतनान्पुरुषान्प्रतिपादयदिदं स्वार्थे प्रमाणं भवितुमर्हति, आदिमत्तादोषप्रसङ्गात्। अतो नैवंजातीयकमर्थवादजातं स्वार्थेऽपि प्रमाणम्, किमुत धर्मे ॥

अथ सिद्धान्तयति—

विधिना त्वेकवाक्यत्वात्स्तुत्यर्थेन विधीनां स्युः ॥ ७ ॥

1. आनर्थक्यात्. 2. क्रतु...माणः इति ख पुस्तके नास्ति. 3. वर्तकाग्न्याधाना—ख. 4. अर्के—क, ख, घ. (V. शा. भा. १. २. ४. 5. प्रतिषेधाच्च.

तुः पूर्वपक्षव्यावृत्तौ। विधीनामित्यवयवषष्ठी। अर्थवादा विध्येकदेशाः स्युः। विधिभागस्य च प्रामाण्यं पूर्वस्मिन्पादे व्यवस्थापितमिति भवत्येषां प्रामाण्यम्। कुत एषां विध्येकदेशता, स्तुत्यर्थेन विधिना एकवाक्यत्वात्। स्तुतिः प्ररोचना प्राशस्त्यवर्णना, तामर्थयते अपेक्षत इति स्तुत्यर्थो विधिः। तेन संभूय विशिष्टैकार्थप्रतिपत्तिजनकत्वादित्यर्थः॥ तथा हि— लिङादिप्रत्ययाः प्रवर्तनायां विहिताः। प्रवर्तयितुर्व्यापारः प्रेरणाख्यः प्रवर्तना। आचार्यो हि गामानयतु देवदत्त इति वदति[1]। ततो गामानयन्देवदत्तो ब्रवीति,—आचार्यप्रेरितोऽहं गामानयामीति। स च प्रेरणाख्यव्यापारो नियोजयितृपुरुषनिष्ठोऽभिप्रायविशेषो लोके। वेदे त्वनीश्वरवादे लिङादिनिष्ठो धर्मविशेषः कल्प्यः। सेश्वरवादे तु ईश्वरेच्छैव प्रवर्तना। सा च लिङादिशब्दनिष्ठत्वाद्वा ततः प्राधान्येन गम्यमानत्वाद्वा शब्दभावनेत्युच्यते। तया च किं केन कथमित्यंशत्रयवती पुरुषप्रवृत्तिर्भाव्यते। सेयं प्रवृत्तिः शब्दभावनाभाव्यत्वात् फलोत्पादनव्यापारात्मकत्वाच्च अर्थभावनेत्युच्यते फलभावनेति च। इमां चार्थभावनां प्रति गृहीतशक्तिकलिङादितो ज्ञाता शब्दभावना प्रयोजिका। ततश्च लिङादिशक्तिग्रहः शब्दभावनाज्ञानद्वारा शब्दभावनाभाव्यार्थभावनानिर्वर्तकत्वात् शब्दभावनां प्रति करणम्। इष्टसाधनताज्ञानमपि करणम्, तस्य शब्दभावनाभाव्यप्रवृत्तिं प्रति कारणत्वात्। अर्थवादलब्धप्राशस्त्यं तु तत्राङ्गत्वेनान्वेति। तथा हि, लोके इष्टसाधनादन्यत्र प्रेक्षावतः प्रवृत्तेरभावादिष्टतृप्तिसाधनेऽपि विषसंसृष्टान्नभक्षणे प्रवृत्तेरभावादनिष्टानुबन्धीष्टसाधनतामप्यर्थाद्विधिप्रत्ययो गमयति, तज्ज्ञानस्य प्रवर्तकत्वात्। सर्वस्यापि लौकिकवैदिककर्मणः किंचिदायासाधायकस्य कष्टात्मकस्यानिष्टसाधनताया अपि सत्त्वात् प्रवृत्तिनिवृत्त्योरौदासीन्यापत्तेर्बलवत्त्वेनानिष्टं विशेषणीयम्[2]— बलवदनिष्टाननुबन्धीष्टसाधनताज्ञानं प्रवर्तकमिति। भोजनाद्यायासस्य चानिष्टस्य इष्टतृप्त्याद्यपेक्षया न बलवत्त्वम्, तृप्त्यादिफलोत्कर्षस्य तत्रानुभवसिद्धत्वात्। अत एवोत्कटेच्छापरनामधेया तत्र रुचिर्भवति, निकृष्टतया ज्ञाते फले तदसंभवात्। सा च रुचिरिष्टसाधनतावगत्या निष्पद्यते। तदुत्पादने च कर्तव्ये सतोऽसतो वा गुणस्य कथनेन बलवदनिष्टाननुबन्धित्वज्ञापने सति नान्तरीयकंकिंचिदनिष्टाधायकेऽपीष्टसाधने द्वेषनिरास इति लोकसिद्धमेतत् 'औषधं पिब, शिखा ते वर्धिष्यते' इत्यादौ। ततश्च विधीनां प्रवर्तकानां फलोत्कर्षकथनापेक्षाणाम्, अर्थवादानां च धर्मप्रमित्युपयोगेन सार्थक्यमपेक्षमाणानां श्रुतशब्दशक्तिविधया साक्षाद्धर्मप्रमितिजनने अक्षमाणां परंपरया च तज्जनने द्वारविशेषमपेक्षमाणानां परस्पराकाङ्क्षावशात् विध्यपेक्षितफलोत्कर्षापरनामधेयप्राशस्त्यलक्षकत्वमर्थवादानां पर्यवस्यति। स्वाध्यायविधिरेव च प्रयोजनवदर्थावबोधपर्यवसानं कृत्स्नस्य वेदस्य बोधयन् प्राशस्त्यतात्पर्यकत्वमर्थवादानां गमयति।

1. ब्रवीति—क, घ. 2. बलवत्त्वमनिष्टे विशेषणीयम्—ख.

तात्पर्यानुपपत्त्या च लक्षणेत्यन्यत्र विस्तरः। प्राशस्त्यप्रतिपादनप्रकारस्तु क्षिप्रदेवतासाध्यकं कर्म क्षिप्रमेव फलं दास्यति, अतः प्रशस्तोऽयं याग इत्येवं यथायथमूह्यः। अर्थवादपदानि च न प्रत्येकं प्राशस्त्यं लक्षयन्ति, पदान्तरवैयर्थ्यापत्तेः। किंतु पदसमुदायः। न च समुदायस्य क्वचिदप्यशक्तत्वात्स्वशक्यसंबन्धरूपलक्षणा कथं तत्र स्यादिति वाच्यम्। अवयवद्वारा शक्यसंबन्धस्य समुदायेऽपि सत्त्वात्। साक्षात्स्वावयवद्वारकत्वसाधारण्येन स्वनिष्ठशक्त्या स्वप्रतिपाद्यसंबन्ध एव हि लक्षणा; न तु साक्षादेव स्वनिष्ठशक्त्या स्वप्रतिपाद्यसंबन्धः, गौरवात्। अवयवशक्तिलभ्यैश्च वायुक्षेपिष्ठत्वादिभिरर्थैर्वायुदेवताकयागीयप्राशस्त्यस्य उत्कृष्टफलाधायकत्वलक्षणस्य अविनाभावलक्षणो ज्ञाप्यज्ञापकभावः संबन्धः। वायुक्षेपिष्ठादिपदशक्यैरर्थैर्हि प्राशस्त्यं ज्ञाप्यते—क्षिप्रतमो महात्मा वायुरतिक्षिप्रमुत्कृष्टफलं दास्यति, अतः प्रशस्तं तद्देवताकं कर्मेति। ततश्च वायुक्षेपिष्ठादिपदेषु स्वशक्यार्थद्वारा प्राशस्त्यज्ञापकता तद्द्वारा तत्समुदायेष्विति सिद्धम्। तदेतत् 'तथा यूपस्य वेदिः' इत्यधिकरणे 'अर्धमन्तर्वेदि, अर्धं बहिर्वेदि' इति समुदायेन देशविशेषो लक्ष्यत इति भाष्यवार्तिकादिषु ध्वनितम्। स्पष्टीकृतं च चूडामणिदीक्षितैः। सैषा अर्थवादविध्युद्देशयोः पदैकवाक्यता विज्ञेया, अन्यतरविनाभूतयोस्तयोः साकाङ्क्षत्वात्। तथा च वक्ष्यति 'अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्यात्' इति। केचित्तु अङ्गप्रधानविध्युद्देशानामिव विधायकलिङ्गादिभेदात्स्वार्थनिराकाङ्क्षतया प्रयोजनवशेन संबन्धाद्वाक्यैकवाक्यतेत्याहुः। निरर्थवादविधिप्रदेशेषु तु विधीनामेव द्वे शक्ती कल्पयामः। न च सर्वत्र विधेरेव शक्तिद्वयकल्पनोपपत्तौ किमर्थवादैरिति वाच्यम्। आम्नातस्यैव हि वयमर्थं वक्तुं प्रभवामः, नाम्नानं पर्यनुयोक्तुमित्यास्तां तावत्।

ननु पौरुषेयाण्येवार्थवादवाक्यानि वेदेषु प्रमादपठितानि कुतो न स्युः, तत्राह—

तुल्यं च सांप्रदायिकम् ॥ ८ ॥

चो ह्यर्थे। सांप्रदायिकं मन्वादिस्मर्तृपारंपर्यसिद्धं नियमाध्ययनम्, तदेतत् शिष्टवैदिकपरंपरया विधिभागानामर्थवादभागानां च तुल्यम् आद्रियमाणं दृश्यते। अतः अर्थवादानां पौरुषेयत्वं न युक्तमाश्रयितुम् ॥

अथ 'शास्त्रदृष्टविरोधाच्च' इत्यादिना केषांचिदर्थवादानां स्वार्थेऽप्यप्रामाण्यमुपक्षिप्तं परिहर्तुमुपक्षिपति—

अप्राप्ता चानुपपत्तिः प्रयोगे हि विरोधः स्याच्छब्दार्थ-
स्त्वप्रयोगभूतस्तस्मादुपपद्यते ॥ ९ ॥

उक्ता अनुपपत्तिः 'स्तेनं मनः' इत्यादिवाक्यम् अप्राप्ता वेदितव्या। कुतः। हि यस्मात् विधिकल्पनया स्तेयादिप्रयोगे उच्यमाने विरोधः स्यात्। नैवमस्ति, विधिकल्पनाया अनभ्युपगमात्। तर्हि प्रतीयमानार्थे मनःस्तैन्यादावस्ति विरोध इत्यत आह,—शब्दार्थस्त्वप्रयोगभूत इति। शब्दतो वाच्यविधया प्रतीयमानो मनःस्तेयादिरर्थस्तु, अप्रयोगभूतः प्रयुज्यते अनेनेति प्रयोगः तात्पर्यनामधेयोऽभिप्रायविशेषः, तं प्राप्तो न भवति; अविवक्षित इति यावत्। अतस्तद्विषये विरोधो नास्ति। विधेयस्तुतिमात्रपरत्वादिति भावः। तस्मात् अनुपपत्त्यभावात् 'स्तेनं मनः' इत्यादिवाक्यम् उपपद्यते संगतार्थकं भवति॥

ननु 'वेतसशाखया चावकाभिश्च विकर्षति' इत्यग्न्याख्यस्थण्डिलविकर्षणे वेतसशाखा अवकाश्च विधीयन्ते, आपश्च स्तूयन्ते 'आपो वै शान्ताः' इति। एवंजातीयकानां विधेयस्तावकत्वस्याप्यभावात्कथं धर्मप्रामाण्यम्। तत्राह—

गुणवादस्तु ॥ १० ॥

तुरवधारणे। गुणवादः गुणाभिधानमेव, स्तुतिरेवेति यावत्। अपां स्तुत्या हि तत्प्रभवा वेतसशाखा अवकाश्च स्तुता भवन्ति, यथा वंशे स्तुते देवदत्तादयः। गुणादागतश्च वादो गुणवादः। गौणः शब्द इति यावत्। आप इत्ययं शब्दः अप्कार्यत्वगुणयोगाद्वेतसशाखासु वर्तते; अतो विधेयस्तावकत्वमुपपद्यते। एवमन्यत्रापि यथायथमूह्यम्। उत्तरसूत्राणि गुणवादत्वस्यैव प्रपञ्चनपराणि॥

[1]'स्तेनं मनोऽनृतवादिनी वाक्' इत्यत्र गुणवादत्वमुपपादयति—

रूपात्प्रायात् ॥ ११ ॥

गुणवाद इत्यनुवर्तते। तच्चावर्तते। गुणाभिधानं स्तुतिरित्येकोऽर्थः, [2]गौणः शब्द इत्यन्योऽर्थः। 'हिरण्यं हस्ते भवत्यथ गृह्णाति' इत्यंशुग्रहग्रहणे विहितं हिरण्यं स्तूयते 'स्तेनं मनोऽनृतवादिनी वाक्' इति। तत्र स्तेनमिति प्रच्छन्नं रूपं लक्ष्यते। अनृतवादिनीति प्रायेण अनृतवदनस्वभावत्वं लक्ष्यते। मनः स्तेनवत्प्रच्छन्नम्, वाक् प्रायेण अनृतवदनशीला। हिरण्यं तु तदोषद्वयरहितमित्यभ्यर्हितमिति विधेयस्तुतिरुपपद्यते॥

'धूम एवाग्नेर्दिवा [3]ददृशे' इत्यत्र गुणवादत्वमाह—

दूरभूयस्त्वात् ॥ १२ ॥

---

1. तत्र स्तेनं मनो—क, ग, घ. 2. गुणशब्दः—क. 3. ददृशे—ख.

गुणवाद इत्यनुवर्तते । पूर्ववदर्थद्वयम् । 'धूम एवाग्नेर्दिवा दृदृशे' इत्यत्र 'अग्निं वा वादित्यः सायं प्रविशति, तस्मादग्निर्दूरान्नक्तं दृदृशे' इति पूर्वतरवाक्यात् दूरादित्यनुवर्तते । तत्र दूरादिति दूरभूयस्त्वे गौणम् । दिवा अग्नेः धूमः अतिदूरादृश्यते । अतः 'उद्यन्तं वावादित्यमग्निरनुसमारोहति' इति पूर्ववाक्योक्तं युज्यते । तस्मात् 'अग्निर्ज्योतिर्ज्योतिः सूर्यः स्वाहेत्येव सायं होतव्यम्, सूर्यो ज्योतिर्ज्योतिरग्निः स्वाहेति प्रातः' इति विहितसंसृष्टहोममन्त्रस्तुतिरुपपद्यत इति न विरोधः ।

अथ 'न चैतद्विद्म' इत्यत्र गुणवादत्वमाह—

[1]क्रयपराधात्कर्तुश्च पुत्रदर्शनात् ॥ १३ ॥

गुणवाद इत्यनुवर्तते । 'देवाः पितरः पितरो देवा योऽहमस्मि स सन्यजे । यस्यास्मि न तमन्तरेमि' इति 'प्रवरे प्रियमाणे यजमानो जपति' इत्यत्र एतच्छ्रूयते 'न चैतद्विद्म' इत्यादि। न विद्म इति ब्राह्मण्यस्य दुर्ज्ञानत्वे गौणम् । कुतः । क्रयपराधात् मातुर्व्यभिचारसंभवात् । व्यभिचारश्च जारिणीजारयोरेव सुविज्ञानः । पुत्रस्योत्पादकं तु बीजिनं जारिणी जानाति न तु जारोऽपि, जारान्तरसंभवात् । ततश्च 'सवर्णेभ्यः सवर्णासु जायन्ते हि सजातयः । ....विज्ञास्वेष विधिः स्मृतः' इति स्मृतिसिद्धं ब्राह्मणात्स्वभार्यायां ब्राह्मण्यामुत्पन्नत्वलक्षणं ब्राह्मण्यं मातुरेवैकस्याः सुविज्ञानम् । नन्वेवं सति 'श्राद्धे ब्राह्मणान्निमन्त्रयेत' इत्युपक्रम्य कुण्डगोलकयोर्निमन्त्रणनिषेधान्यथानुपपत्त्या ब्राह्मणमातापितृकत्वमेव ब्राह्मण्यम्, तत्तु क्षेत्रिणमादाय सर्वस्यापि सुविज्ञानमित्यत आह,—कर्तुश्च पुत्रदर्शनादिति । 'उत्पादयितुः पुत्र इति हि ब्राह्मणम्' इत्युपक्रम्य 'रेतोधाः पुत्रं नयति' इत्यादिना बीजावापस्य कर्तुर्जारस्यैव पुत्रः, न तु क्षेत्रिण इत्यर्थस्य [2]आपस्तम्बादिभिर्निर्धारणादित्यर्थः । श्राद्धीयब्राह्मणनिमन्त्रणे कुण्डगोलकनिषेधस्तु 'सगुणानामलाभे तु निमन्त्र्या निर्गुणा अपि' इति प्रसक्तत्वात्संगच्छत इति विज्ञानेश्वरादिभिरुक्तं परिहारं अनुक्तसमुच्चयार्थश्चकारः समुच्चिनोति । ततश्च स्वभार्यायां ब्राह्मण्यां ब्राह्मणादुत्पन्नत्वलक्षणमेव ब्राह्मण्यम् । तच्च मात्रेकसमधिगम्यम् । इतरस्य तु दुर्विज्ञानम् । तदेवंविधमपि ब्राह्मण्यमेतन्मन्त्रजपेन अब्राह्मणस्यापि संपद्यत इति स्तुतिरुपपाद्या ॥

अथ 'को हि तद्वेद' इत्यत्राह—

आकालिकेप्सा ॥ १४ ॥

---

1. अपराधात्. 2. आपस्तम्बादिभिः स्मर्तृभिः—क.

'आकालिकडाद्यन्तवचने' इति पाणिनिः। समानकालावाद्यन्तौ उत्पत्तिविनाशौ यस्येत्यर्थे समानकालशब्दात् ठञ् [1]प्रकृतेराकालादेशश्च निपात्यते। समानशब्द एकत्ववाची। उत्पन्नमात्रविनष्टमित्यर्थ इति तद्भाष्यकैयटयोः स्पष्टम्। इह तु आमुष्मिकफलापेक्षया आशुतरविनश्वरमैहिकं फलं लक्ष्यते। आप्तुमिच्छा ईप्सा। आकालिकस्य ईप्सा आकालिकेप्सा। गुणवाद इत्यनुवर्तते। पूर्ववदर्थद्वयम्। 'अमुष्मिन् लोके अस्ति वा न वा' इति संशयवचनमामुष्मिकस्य कालान्तरदेहान्तरभावित्वलक्षणपरोक्षत्वे गौणम्। विदिश्रेप्सायां गौणः। 'दिक्वतीकाशान्करोति' इति सौमिकशालाया गवाक्षकरणं विहितम्। तस्य च धूमोपद्रवनिवृत्तिरैहिकं फलं सद्यः प्रत्यक्षम्। ज्योतिष्टोमकर्मजन्यमामुष्मिकं तु फलं कालान्तरदेहान्तरभावि परोक्षमेव। प्रत्यक्षत्वात्तात्कालिकत्वाच्च ऐहिक एव फले आगोपालाङ्गनमीप्सा भवति। अत ऐहिकं फलमनादृत्य परोक्षमामुष्मिकं फलं को वेद क ईप्सति। तस्मात्सद्यो धूमनिवृत्तिफलकमतीकाशकरणं श्रेष्ठमिति स्तुतिरुपपद्यते॥

अथ 'शोभतेऽस्य मुखं य एवं वेद' इत्यत्राह—

विद्याप्रशंसा॥ १५॥

गुणवाद इति पूर्ववत्। ब्राह्मणतो गर्गत्रिरात्रस्य ज्ञानादेव मुखशोभाफलं भवति चेत् तदनुष्ठानात्कीदृक्फलं भवेदित्येवं विद्यया ज्ञानेन गर्गत्रिरात्रस्य प्रशंसा क्रियते। यद्यपि पदपदार्थसंगमनव्याप्तक्षुब्धचित्ततया[2] तदानीं मुखवैवर्ण्यमस्ति, तथापि पदवाक्यन्यायविजृम्भितैः शिष्यस्पृहणीयैः शब्दैः शोभमानैर्मुखशोभावचनं गौणम्॥

'पूर्णाहुत्या सर्वान' इत्यत्राह—

सर्वत्वमाधिकारिकम्॥ १६॥

गुणवाद इति पूर्ववत्। तत्तत्सर्वफलसाधकसर्वक्रत्वपेक्षिताहवनीयादिनिष्पादकत्वात् सर्वफलार्थेत्याग्न्याधेयिकी पूर्णाहुतिः स्तूयते। वर्तमानत्वमविवक्षितम्। सर्वपदमाधिकारिकं तत्तदधिकृतसर्वक्रतुफलापेक्षं गौणम्। अतोऽन्धमेधादीनां राजन्यादिमात्राधिकृतत्वेऽपि न दोषः॥

फलवादत्वमभ्युपगम्य यदुक्तम् 'अन्यानर्थक्यात्' इति तन्नाह—

---

1. तत्प्रकृतेः—क. 2. व्यापृतचित्तक्षुब्धतया—ख.

फलस्य कर्मनिष्पत्तेस्तेषां लोकवत्परिमाणतः [1]फलविशेषः स्यात् ॥ १७ ॥

स्वर्गादिफलस्य पूर्णाहुत्यग्निहोत्रादिगुरुलघुकर्मभिर्निष्पत्तिश्रवणात् तेषां कर्मणां परिमाणतः अल्पत्वभूयस्त्वतारतम्यात् फलविशेषः फलतारतम्यं स्यात्, लोकवत् लोके सेवादितारतम्यात्फलतारतम्यवत्। ततश्च पूर्णाहुत्या स्वर्गादिसर्वफलान्यल्पानि भवन्ति, अग्निहोत्रादितस्तु ततस्ततो भूयांसीत्युक्तं भवति ॥

'न पृथिव्याम्' इत्यत्र 'बबरः प्रावाहणिः' इत्यत्र चाह—

अन्त्ययोर्यथोक्तम् ॥ १८ ॥

पूर्वपक्षे 'अभागिप्रतिषेधात्' 'अनित्यसंयोगात्' इत्यन्तिमसूत्रोक्तयोर्दोषयोः उक्तप्रकारेण परिहारो वेदितव्यः ॥ तथा हि— 'स्तेनं मनोऽनृतवादिनी वाक्' इति वाङ्मनसयोर्निन्दा हिरण्यविधिस्तुत्यर्थेत्युक्तं प्राक्। एवमेव पृथिव्यां चयनप्रतिषेधो हिरण्यान्तर्हितचयनविधिस्तुत्यर्थः, 'नान्तरिक्षे न दिवि' इति तु नित्यानुवादः 'अग्निर्हिमस्य भेषजम्' इत्यादिवत्। तथा 'यथर्तावृतुलिङ्गानि नानारूपाणि पर्यये। दृश्यन्ते तानि तान्येव तथा भावा युगादिषु' इति न्यायेन प्रतियुगमनुवर्तमाना बबरादयः प्रवाहनित्यतया चन्द्रसूर्यादिवद्वैदिकपदगोचराः सन्तो नैव वेदस्य नित्यतां विरुन्धत इत्यादि पूर्वपादे 'परं तु श्रुतिसामान्यम्' इत्यत्रोक्तम्। अतः 'बबरः प्रावाहणिः' इत्यादावप्यनित्यसंयोगदोषः परिहृतः। न च पौनरुक्त्यम्; चन्द्रसूर्यबबरादीनां प्रवाहनित्यतावचनस्यापि पूर्वपक्षदशायामप्रामाण्यास्कन्दितत्वेन तद्विषये अनित्यसंयोगदोषस्य पुनः समुन्मेषे सति सिद्धान्तदशायामर्थवादजातस्य साधितप्रामाण्यतया 'यथर्तावृतुलिङ्गानि—' इति बबरादीनां प्रवाहनित्यत्वेनानित्यसंयोगदोषपरिहारस्य पुनरुदयावश्यंभावात्। अत्र लोकवेदविरोधाभावे अर्थवादानां स्वार्थेऽपि प्रामाण्यम्, तद्विरोधे तु [2]स्तावकत्वमेव। 'विरोधे गुणवादः स्यादनुवादोऽवधारिते। भूतार्थवादस्तद्धानादर्थवादस्त्रिधा मतः॥' ततश्च, अचिन्त्यशक्तिकपरमेश्वरतत्कर्तृकसृष्टिप्रलयादिकमप्यस्तीति वार्तिककारैर्वैदिकशिरोमणिभिः प्रपञ्चितम्। अनीश्वरवादिनस्तु प्राभाकरादयो वैदिकैरनादृत्याः। अत्रेदं वक्तव्यम्— 'स्वाध्यायोऽध्येतव्यः' इति वेदार्थज्ञानायाध्ययनविधिः। अत्र हि विधौ कर्मणि तव्यप्रत्ययः। उत्पाद्यत्वमाप्यत्वं संस्कार्यत्वं वा कर्मत्वम्, यथा

1. सारतोवाफल. 2. तु गौण्या—क.

'घटं करोति' 'ग्रामं गच्छति' 'व्रीहीन्प्रोक्षति' इति। अध्ययनं च भावार्थाधिकरणन्यायेन भावनायां करणत्वेनान्वेति। स्वाध्यायस्य च तेनोत्पाद्यत्वासंभवादाप्यत्वं संस्कार्यत्वं वा कर्मत्वं भवति। ततश्चाध्ययनेन स्वाध्यायं प्राप्नुयादिति वचनव्यक्तिः, अध्ययनेन स्वाध्यायं संस्कुर्यादिति वा। तत्राध्ययनेनावाप्तस्य संस्कृतस्य वा स्वाध्यायस्य स्वतः अपुरुषार्थत्वात्, फलाकाङ्क्षायामधीतवेदजन्यधर्मावबोधस्य दृष्टस्य स्वर्गादिसाधनतया फलत्वात्, सति च संभवे अदृष्टकल्पनायोगात्, तमेव प्रयोजनवदर्थावबोधापरनामधेयमधीतस्वाध्यायः फलत्वेन गृह्णाति; अनारभ्याधीतस्याप्यध्ययनस्य सामर्थ्यादेव क्रतुविध्याक्षिप्तार्थज्ञाने उपयोगसंभवात्। ततश्चाधीतेन स्वाध्यायेनार्थावबोधं भावयेदिति पर्यवसन्नोऽर्थः। तत्रार्थवादानां वाक्यविधया धर्मप्रमितिजननशक्त्यभावेऽपि कृत्स्नस्य वेदस्य प्रयोजनवदर्थावबोधपर्यवसानं बोधयता अध्ययनविधिनैव विध्यपेक्षितप्राशस्त्यतात्पर्योन्नयनमुखेनोत्थापितलक्ष्यविधया तत्प्रतिपादनद्वारा विध्युपयोगात् धर्मप्रामाण्यमुपपद्यत इति वार्तिकादिग्रन्थेषु स्थितम्। वस्तुतस्तु स्वाध्यायविधिरक्षरानुपूर्व्यवधारणरूपग्रहणार्थः। अर्थावबोधस्तु गृहीतपदपदार्थसंगतिकस्य स्वत एव भवति, न तु तत्राध्ययनविधेर्व्यापारः, धर्मावबोधान्तत्वे अध्ययनाकार्त्स्न्यप्रसङ्गात्। ब्राह्मणस्य राजसूयाद्यभावेन तन्मन्त्रब्राह्मणाध्ययनस्य व्यर्थत्वात्। किंच, अग्निहोत्रादिलक्षणवेदार्थस्याध्ययनात्प्राक्संध्योपासनवत् पित्राद्युपदेशतो ज्ञाने सति ज्ञातत्वादेव तदवबोधस्य काम्यत्वाभावात्फलत्वानुपपत्तिः। ततः प्राक्तदज्ञाने तु न स कामयितुं शक्यः, ज्ञात एवेच्छानियमात्। अथ सामान्यतो ज्ञाते विशिष्याज्ञाते तदिच्छा संभवति; पित्राद्युपदेशतो विशिष्यावगतेऽप्यौपदेशिकज्ञानस्य प्रामाण्यनिश्चयाय पुनर्बोधकामना च युक्तेति चेन्न। अग्निहोत्रादिविशेषज्ञानानां हि न तावदेकबुद्ध्या विशेषाकारेणोद्देशः, अनन्तत्वात्। सामान्याकारेणोद्देशे च सामान्यज्ञानमेव विधिफलं स्यात्, न तु विशेषज्ञानम्। अतः अर्थावबोधस्योद्देश्यत्वायोगान्न फलत्वम्। न चाध्ययनविधेरर्थावबोधान्तत्वाभावे वेदस्य कथं स्वार्थे तात्पर्यावगम इति वाच्यम्। उपक्रमादिसहकृतशब्दबलादेव तत्संभवात्। तस्मादध्ययनविधिरक्षरग्रहणमात्रफलक एव। तथा च पुरुषार्थानुशासनसूत्राणि वेदभाष्योदाहृतानि 'बोधान्तत्वेऽध्ययनाकार्त्स्न्यम्' 'सोऽकाम्यः प्राग्बोध्यभानाभानयोः' 'उद्देशायोगाच्च' इत्यादीनि। एवं च व्याकरणमहाभाष्ये पस्पशाह्निके 'ब्राह्मणेन निष्कारणो वेदः षडङ्गोऽध्येयो ज्ञेयश्च' इत्युदाहृतायां श्रुतौ ज्ञेयश्चेति पृथग्ज्ञानविधिरर्थवान्भवति। अध्ययनविधेर्बोधान्तत्वे तु तदानर्थक्यं स्पष्टमेव। निष्कारणः, कार्यते अनेनेति कारणं फलम्; दृष्टप्रयोजननिरपेक्षः शिक्षाव्याकरणादिषडङ्गसहितो वेदः अध्ययनेन प्राह्यः तदर्थश्च प्रतिपत्तव्यः। सोऽयं धर्मो न दृष्टफलः, नित्य इति यावत्। तदभावे हि प्रत्यवायः स्मर्यते 'स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थम्' इत्यादि। न च गृहीतपदपदार्थसंगतिकस्य स्वत एव ज्ञानसंभवात्तद्विधिर्व्यर्थ इति वाच्यम्।

न ह्यवश्यं गृहीतपदपदार्थसंगतिकेन भाव्यमिति लोकतो लभ्यम्, अव्युत्पन्नानामपि बहुलमुपलम्भात्, पदपदार्थसंगतिग्रहणमात्रसत्त्वेऽप्यतिगहनवेदार्थज्ञानस्य न्यायविचारमन्तरा अनुपपत्तेश्च । अतः पदपदार्थसंगतिमधिगम्य न्यायविचारतो यथावद्वेदार्थज्ञानमात्रं नित्यतया विधीयते । तदपि स्वस्वपित्रादिक्रमागतवेदभागशाखामात्रस्य, नेतरस्य वेदभागस्य । स्वाध्यायविधौ स्वपदानर्थक्यापातात् । तथा च स्वशाखाया अध्ययनमर्थज्ञानं च नित्यम् । इतरशाखानां स्वध्ययनमर्थज्ञानं च क्रतुविधिप्रयुक्तमार्थिकमेव । न च तत्र स्वाध्यायविधेर्व्यापारः । एवं च स्वशाखायामपि [1]स्वाधिकृतकर्मविधिभागमात्रस्यार्थज्ञानेनापि कर्मसिद्धिरप्रत्यूहा । पुरुषस्तु परं प्रत्यवेष्यतीति तृतीये 'ज्ञाते च वाचनं न ह्यविद्वान्विहितोऽस्ति' इत्यत्र भाष्यवार्तिकयोः स्पष्टम् । न च स्वाध्यायविधिगतस्वशब्दानुसारेण वेदोऽध्येय इति वेदशब्दस्य स्वशाखामात्रपरत्वेऽपि ज्ञेय इत्यंशे वेदशब्दस्य तथा संकोचे मानाभाव इति वाच्यम् । अध्येय इत्यत्रान्वितस्यैव वेदशब्दस्य स्वशाखामात्रपरतया निश्चितस्य ज्ञेय इत्यत्राप्यन्वयवशादेव तथा संकोचलाभात् । कृत्स्नवेदार्थज्ञानस्याध्ययनविधिप्रयुक्तत्वाभावादेव कल्पसूत्रप्रणयनमर्थवत् । उक्तं च भवस्वामिभाष्ये 'ब्राह्मणानां बहुत्वादेकैकस्यां शाखायामपरिसमाप्तत्वादर्थस्य च दुर्बोधत्वात्सर्वजनीनत्वाच्च संहृत्य विवरणार्थं सुखं बुद्ध्वा कर्माण्यनुष्ठाय फलानि सर्वे प्राप्नुयुरिति कल्प आरब्ध आचार्येण' इति । किंचैवम् 'यो ह वा अविदितार्षेयच्छन्दोदैवतब्राह्मणेन मन्त्रेण याजयति वाध्यापयति वा स्थाणुं वर्च्छति गर्तं वापद्यते पापीयान्भवति प्रवामीयते यातयामान्यस्य छन्दांसि भवन्ति, तस्मादेतानि मन्त्रे मन्त्रे विद्यात्' इति ताण्डकतलवकारादिशाखासु मन्त्रप्रतिपाद्यदेवतानां विनियोजकब्राह्मणानां च स्मरणविधानं कृत्स्नवेदार्थज्ञानस्यावश्यकत्वेऽनर्थकं स्यात् । मन्त्रेषु देवतावगमस्तु कात्यायनादिप्रणीतसर्वानुक्रमणिकादिग्रन्थतो वेदार्थज्ञानाभावेऽपि सुलभ एव । विनियोजकब्राह्मणवाक्यज्ञानं च कल्पसूत्रतः सुलभमेव, नानाशाखागतविनियोजकब्राह्मणवाक्यसंग्रहात्मकत्वात्कल्पसूत्राणाम् । 'एवंविदमेवाध्वर्युं कुर्वीत नानेवंविदम्' 'एवंविदमेव होतारं कुर्वीत नानेवंविदम्' 'एवंविदमेवोद्गातारं कुर्वीत नानेवंविदम्' 'एवंविदमेव ब्रह्माणं कुर्वीत नानेवंविदम्' इत्यादिवाजसनेयकादिशाखागतानि स्रुगादानादिब्राह्मणतदर्थविदामेवाध्वर्य्वादिवरणपराणि च कृत्स्नवेदार्थज्ञानस्यानावश्यकतां गमयन्ति । अत एव च कल्पसूत्रेषु सर्वोपसंहरणाय प्रवृत्तेषु कृत्स्नवेदार्थज्ञानं कर्माधिकारिविशेषणतया नोपनिबद्धम् । किंच, ब्रह्ममीमांसायां तृतीयचतुर्थाद्याधिकरणे 'शेषत्वात्पुरुषार्थवादो यथान्येष्विति जैमिनिः' इति सूत्रेणात्मज्ञानं कर्मशेषभूतकर्तृद्वारा पर्णतादिवत्कर्मांगम् । 'तरति शोकमात्मवित्' इति फलश्रुतिस्तु अपापश्लोकश्रवणादिवदर्थवाद इति

1. स्वाधिकृतकर्मविभागमात्रस्य—ग; कर्मविधिमन्त्रभागस्य—क.

जैमिनिमतं पूर्वपक्षतयोद्भाव्य 'तद्वतो विधानात्' इति सूत्रान्तरेण 'आचार्यकुलाद्वेदमधीत्य' इति श्रुत्या सकलवेदार्थज्ञानवतः कर्मविधानादपि लिङ्गात्कर्माङ्गमात्मविद्येति स्वयं युक्त्यन्तरमुद्भाव्य 'अधिकोपदेशात्तु बादरायणस्यैवं तद्दर्शनात्' इति सिद्धान्तमुपक्षिप्य 'अध्ययनमात्रवतः' इति सूत्रेण आचार्यकुलाद्वेदमधीत्येति वाक्ये वेदाध्ययनमात्रवतः कर्म विधीयते, न तु तदर्थज्ञानवतः; येन कृत्स्नवेदार्थज्ञानवतः कर्मविधानादौपनिषदात्मज्ञानस्य कर्मशेषता स्यात्। क्रतुविधिप्रयुक्तार्थज्ञानं तु आर्थिकत्वान्न कर्माङ्गम्, व्रीह्यादिविधौ कर्षणादिवत्। एवं च क्रतुविधिभिर्यावदुपयुक्तवेदभागमात्रार्थज्ञानस्यापेक्षणान्न तद्विरुद्धनिर्गुणात्मज्ञानस्य कर्मशेषता युज्यत इत्यास्थितं भगवता बादरायणेन। तदेतद्भाष्ये भगवत्पादैस्तद्व्याख्यातृभिश्च वाचस्पतिमिश्रप्रभृतिभिर्बहुधा प्रपञ्चितमिति नेह तन्यते। किंच, 'न प्रथमयज्ञे प्रवृञ्ज्यात्प्रवृञ्ज्याद्वा' इत्युपक्रम्य 'योऽनूचानश्रोत्रियस्तस्य प्रवृञ्ज्यात्' इत्यापस्तम्बसत्याषाढभारद्वाजाद्युदाहृतबह्वृचब्राह्मणे 'एकां शाखामधीत्य श्रोत्रियो भवति' इति लक्षितश्रोत्रियस्य 'साङ्गाध्याय्यनूचानः' इति लक्षितानूचानस्य च प्रथमयज्ञे प्रवर्ग्यनियमविधानात्, अतथाविधस्य प्रथमयज्ञे प्रवर्ग्यानियमविधौ पर्यवसानावगमात्, कृत्स्नवेदार्थज्ञानस्य कर्मशेषता दूरापास्ता। ततश्च स्वाध्यायविधिः स्वशाखामात्राध्ययनं प्रयोजयति। ज्ञेयश्चेति विधिरपि स्वशाखामात्रार्थज्ञानस्य प्रयोजकः। तदनुवर्तनोल्लङ्घनयोः पुरुषस्याभ्युदयप्रत्यवायौ। क्रतुविधयस्तु यावदुपयुक्तवेदतदर्थावगममात्रेणापि कृतार्थाः कृत्स्नवेदतदर्थाधिगमे तावन्नैव व्याप्रियन्ते। एवं च अर्थवादविषये स्वाध्यायविधितः फलवदर्थपर्यवसानालाभात् तेषां विध्युद्देशाकाङ्क्षानुत्थानात् विध्यर्थवादानां परस्पराकाङ्क्षावशादेकवाक्यत्वमिति सिद्धान्तो वार्तिककाराद्युक्तोऽनुपपन्नः। अर्थवादानां स्तुतिपरतया विध्येकवाक्यता त्वन्यतराकाङ्क्षयैवोपपाद्या। तथाहि—यथा रक्तः पटो भवतीति वाक्ये पटो भवतीत्येतावति निराकाङ्क्षेऽपि रक्त इत्यस्य भवतिक्रियान्वयं विना [1]आनर्थक्यापत्त्या संनिधिपाठवैयर्थ्यापत्त्या च पटवाक्यस्थ रक्तपदे आकाङ्क्षोत्थितौ पटविशेषणसमर्पकतया रक्तपदं पटवाक्यान्तर्भावमापद्यते, तथार्थवादानां स्वार्थतो निराकाङ्क्षत्वेऽपि विधिप्रत्ययगम्यायाः शब्दभावनाया अंशत्रयमपेक्षमाणाया विधिप्रत्ययत एव भाव्यांशं पुरुषप्रवृत्तिं करणांशं शक्तिग्रहादिकं च व्याकरणादितो लब्धवत्यास्तृतीयांशं स्तुतिमपेक्षमाणायाः स्तुतिलाभमन्तरानुपपत्त्या विध्युद्देशसंनिध्यान्नानवैयर्थ्यापत्त्या[2] च अर्थवादानां विध्युद्देशाकाङ्क्षोत्थितौ तद्वशाच्च लक्षणया तेषां स्तुतिपरत्वमिति भाष्यानुयायी सुगमः पन्थाः। किंच 'औषधं पिब, शिखा ते वर्धिष्यते' इत्यादिलौकिकवाक्येष्विव 'स आत्मनो वपामुदखिदत्' 'गावो वा एतत्सत्रमासत' इत्यार्थवादवाक्येष्वपि असद्वृत्तावलम्बनेन केवलविधेयस्तुतिपरत्वम्, न तु स्वार्थ-

1. आनर्थक्यान्यथानुपपत्त्या—क, ख, ग. 2. वैयर्थ्यान्यथानुपपत्त्या—ख, ग.

परत्वमपि, तथा सत्यप्रामाण्यप्रसङ्गात् । न हि वेदे मात्रामात्रस्याप्यानर्थक्यमिष्यते । तथा च 'तत्सामान्यादितरेषु तथात्वम्' इति न्यायेन तदितरेषामपि 'वायुर्वै क्षेपिष्ठा' इत्याद्यर्थवादानां न स्वार्थपरत्वम्, किंतु जहत्स्वार्थलक्षणया केवलविधेयस्तुतिपरत्वमिति प्रच्छन्नबौद्धाः केचिन्मीमांसकंमन्याः संगिरन्ते । वैदिकशिरोमणयो वार्तिककृतस्तु सर्वेष्वप्यर्थवादवाक्येषु अवयवार्थानतिक्रमेणैव अजहत्स्वार्थलक्षणया प्राशस्त्यपरत्वम्, 'स आत्मनो वपाम्—' इत्यत्रापि सर्गादौ परमेश्वर एव स्वमहिम्ना पशुरूपमन्यदेकं स्वीकृत्य तद्वपोत्कर्तनेन कर्म प्रायुङ्क्तेत्येवंप्रकारेण सर्वत्र स्वार्थे सत्यता उन्नेया; 'आत्मा वा इदमेक एवाग्र आसीत्' 'परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च' इत्याद्यर्थवादवाक्यैरचिन्त्यशक्तिकपरमेश्वरतत्कर्तृकसृष्टिप्रलयाद्यङ्गीकारात्, 'आदित्यो यूपः' इत्यादावपि ऊर्ध्वत्वादिगुणयोगात्स्वार्थपरतापि; तथा च 'विरोधे गुणवादः स्यादनुवादोऽवधारिते । भूतार्थवादस्तद्धानादर्थवादस्त्रिधा मतः' इति मन्यन्ते । युक्तं चैतत्, 'गुणवादस्तु' 'रूपात्प्रायात्' 'दूरभूयस्त्वात्' 'स्त्र्यपराधात्कर्तुश्च पुत्रदर्शनात्' 'आकालिकेप्सा' इत्यादिभिरर्थवादाधिकरणगुणसूत्रैः 'स्तेनं मनः' इत्यादिषु गौण्या वृत्त्यावयवार्थपरत्वस्यापि प्रदर्शनात् । किंच अर्थवादानामवयवार्थपरत्वाभावे 'विधिशब्दाश्च' इति मन्त्राधिकरणस्थगुणसूत्राविरोधः । तत्र 'अग्ने गृहपते सुगृहपतिः' इत्यादिमन्त्रेषु 'शतं हिमाः' इत्याद्यंशानाम् 'शतं त्वा हेमन्तानिन्धिषीयेति वा वैतदाह' इत्यादिवाक्यशेषा मन्त्राणां विवक्षितार्थत्वे लिङ्गमिति व्यवस्थापनात् । किंच स्मृतिपादे यववराहाधिकरणविरोधः । तत्र यववराहवेतसशब्दानां क्रमेण प्रियङ्गुवायसजम्बूषु दीर्घशूकसूकरवञ्जुलेषु च लोके प्रयुज्यमानानामपि वेदे 'यवमयश्चरुर्भवति' 'वाराही उपानहावुपमुञ्चते' 'वैतसे कटे प्राजापत्यान्संचिनोति' इत्यत्र 'यत्रान्या ओषधयो म्लायन्ते अथैते मोदमाना इवोत्तिष्ठन्ति' 'वराहं गावोऽनुधावन्ति' 'अप्सुजो वेतसः' इति वाक्यशेषैर्दीर्घशूकसूकरवञ्जुलपरत्वव्यवस्थापनात् । किंच त्रिवृच्चर्वाद्यधिकरणविरोधः । तत्राश्वबालशब्दस्य 'यज्ञो वै देवेभ्योऽधो भूत्वापाक्रामत्; सोऽपः प्राविशत्; स बालधौ गृहीतः; स बलान्मुक्त्वा विवेश; ते बालाः काशा अभवन्' इति वाक्यशेषेण काशपरताव्यवस्थापनात् । किंच चित्राज्याधिकरणविरोधः । तत्र 'यदाजिमयुस्तदाज्यानामाज्यत्वम्' इत्याज्यशब्दनिर्वचनेन 'आपो वा ऋत्वियमार्च्छंस्तासां वायुः पृष्ठे व्यवर्तत' इत्यार्तवयुक्तानामपां वायुस्पर्शाद्रथन्तरादीनामुत्पत्तिप्रतिपादनेन स्पर्शजन्यं पृष्ठमिति निर्वचनेन च आज्यपृष्ठशब्दयोर्नामधेयत्वव्यवस्थापनात् । किंच 'तद्व्यपदेशं च' इत्यधिकरणविरोधः । तत्र 'यथा ह वै श्येनो निपत्यादत्त एवमयं द्विषन्तं भ्रातृव्यं निपत्यादत्ते' इति वाक्यशेषसिद्धां गौणीं वृत्तिमाश्रित्य नामधेयत्वव्यवस्थापनात् । किंच नामधेयपादे 'वैश्वदेवे विकल्प इति चेत्' इत्यधिकरणविरोधः । तत्र 'यद्विश्वे देवाः समयजन्त तद्वैश्वदेवस्य वैश्वदेवत्वम्' इति निर्वचनमाश्रित्य वैश्वदेवश-

व्यस्य नामधेयत्वव्यवस्थापनात्। किंच तत्सिद्धयधिकरणविरोधः। तत्र 'यजमानः प्रस्तरः' इति यजमानशब्दस्य क्रतुनिर्वर्तकत्वगुणयोगाद्गौण्या वृत्त्या प्रस्तरे वृत्तेर्व्यवस्थापनात्। किंच जात्यधिकरणविरोधः। तत्र 'अग्निर्वै ब्राह्मणः' इति अग्निशब्दस्य 'स मुखतस्त्रिवृतं निरमिमीत तमग्निर्देवतान्वसृज्यत गायत्री च्छन्दो रथन्तरं साम ब्राह्मणो मनुष्याणामजः पशूनाम्' इति मुखजातत्वगुणयोगाद्गौण्या वृत्त्या ब्राह्मणे वृत्तेर्व्यवस्थापनात्। किंच सारूप्याधिकरणविरोधः। तत्र 'यजमानो यूपः' इति यजमानशब्दस्य ऊर्ध्वत्वगुणयोगाद्गौण्या वृत्त्या यूपे वृत्तेर्व्यवस्थापनात्। किंच प्रशंसाधिकरणविरोधः। तत्र 'अपशवो वा अन्ये गोअश्वेभ्यः पशवः' इत्यपशुशब्दस्याप्राशस्त्यगुणयोगाद्गौण्या वृत्त्या अजादिपशुषु वृत्तेर्व्यवस्थापनात्। किंच 'संदिग्धेषु वाक्यशेषात्' इत्यधिकरणविरोधः। तत्र 'अक्ताः शर्करा उपदधात्' इति विधितः सामान्यावगतमञ्जनसाधनम् 'तेजो घृतम्' इति वाक्यशेषाद्घृते व्यवतिष्ठत इति व्यवस्थापनात्। एवमधिकरणान्तराणि बहूनि विरुध्येरन्। विस्तरभिया विरम्यते[1]। वृत्तमर्थवादाधिकरणम्।

अस्ति काम्यः पशुः 'सोमापौष्णं त्रैतमालभेत पशुकामः' इति। त्रिभिः सहजैः इतः [2]त्रीतः यो वा तिस्रः पिबति। ततः स्वार्थिकोऽण्। तत्रेदमाम्नायते 'औदुम्बरो यूपो भवत्यूर्वा उदुम्बर ऊर्क्पशव ऊर्जैवास्मा ऊर्जं पशूनाप्नोत्यूर्जोऽवरुद्धयै' इति। अस्मै इति षष्ठ्यर्थे चतुर्थी। अस्य यूपस्य ऊर्जा ऊर्मूपेण उदुम्बरेण प्रकृतिद्रव्येण ऊर्मूपान्पशूनाप्नोति। ऊर्क् बलं जीवनं वा। अत्र ऊर्वा उदुम्बर इत्यादिराप्नोतीत्यन्तोऽर्थवादः, वैशब्दोपबन्धात् आप्नोतीति वर्तमानापदेशाच्चेति निर्विवादम्। औदुम्बरो यूपो भवति ऊर्जोऽवरुद्ध्या इति तु अप्राप्तत्वात्फलाय औदुम्बरताविधिः, उत अर्थवाद इति संशये पूर्वपक्षयति—

विधिर्वा स्यादपूर्वत्वाद्वादमात्रं ह्यनर्थकम्॥ १९॥

वाशब्दः प्रत्यवस्थाने। 'वायुर्वै क्षेपिष्ठा—' इत्यादीनामर्थवादत्वमस्तु। अयं तु फलाय विधिः स्यात्। कुतः, अपूर्वत्वात्। पूर्वं प्रापकं प्रमाणं यस्य नास्ति तदपूर्वम्। ऊर्गवरोधे फले

२. विधिवन्निगदाधिकरणम्।

औदुम्बरताया: साधनस्य प्रमाणान्तरेणाप्राप्तत्वादित्यर्थः। अप्राप्तप्रापकत्वे च वाक्यमर्थवत्, नार्थवादत्वे। कुतः, वादमात्रं ह्यनर्थकम्। हि यस्मात् वादमात्रं कृत्स्नमर्थवादवाक्यम् अनर्थकप्रायम्; निरर्थवादवाक्यादपि प्रवृत्तिदर्शनात्। नन्वौदुम्बरतायाः कथमूर्गवरोधं प्रति साधनतावगमः, कथं वा तत्र प्रवृत्तिः, इष्टसाधनतावगमकविधिप्रत्याभावादिति चेन्नैवम्। साध्यत्वाव्यभिचरितादर्थ्यचतुर्थ्या साध्यत्वेन प्रतीतस्य ऊर्गवरोधस्य

1. विरुध्येरन्नित्यादि तत्र तत्र स्फुटं भविष्यति—क. 2. सहितः त्रीतः—क, ग.

साधनापेक्षतया तन्निर्वाहाय भवेदितिव्यत्ययेन तत्साधनताबोधकविधिप्रत्ययकल्पनया तदुपपत्तेः। ततश्च औदुम्बरतया ऊर्गवरोधं भावयेदिति वचनव्यक्तिः फलति ॥

ननु 'वादमात्रं ह्यनर्थकम्' इत्यनुपपन्नमित्याशङ्क्य निराकरोति—

[1]लोकवदिति चेन्न पूर्ववत्त्वात् ॥ २० ॥

सप्तम्यन्ताद्वतिः। इयं गौर्बहुक्षीरा जीवत्स्त्र्यपत्या नवप्रसूता क्रयणार्हा इत्यादिवाक्यं विधिप्रत्ययरहितं स्तुतिपरमेव प्रवर्तकतया सार्थकं दृश्यते लोके। तद्वदौदुम्बरो यूपो भवतीत्यारभ्य ऊर्जोऽवरुद्धया इत्यन्तं स्तुतिपरमेव सार्थकमस्त्विति चेन्न। कुतः, पूर्ववत्त्वात् प्रमाणान्तरविदितत्वादित्यर्थः। लोके बहुक्षीरत्वादिकं विद्यमानमेव क्रयणादिप्रवर्तकतया प्रत्यक्षसिद्धमिति तद्वाक्यं विधिप्रत्ययरहितं स्तुतिपरमपि प्रवर्तकं सत्सार्थकमिति युक्तम्। वेदे त्विहाविद्यमानमूर्गवरोधं फलम्, औदुम्बरतायां तत्साधनत्वं च प्रमाणान्तरानवगतमविद्यमानमेव वर्तमानतयावलम्ब्य क्रियमाणा स्तुतिः कथं प्रवर्तिका स्यादिति वैषम्यम्। अतः कालान्तरभाव्यूर्गवरोधफलसाधनताबोधनपर्यवसन्नं फलविधित्वमेवास्थेयम् ॥

इति प्राप्ते सिद्धान्तयति—

उक्तं तु वाक्यशेषत्वम् ॥ २१ ॥

तुः पूर्वपक्षव्यावृत्तौ। विधिवाक्यशेषत्वमर्थवादानामुक्तं पूर्वाधिकरणे। तदिहापि प्रत्येतव्यम् ॥ तथा हि—तादर्थ्यचतुर्थी तावद्ब्राह्मणाय सूप इत्यादौ साध्यत्वं व्यभिचरति। अतो न तद्भाव्यकत्वमौदुम्बरतायाः सा गमयितुमीष्टे, येन तदन्यथानुपपत्त्या विधिः कल्प्येत। ततश्च यूपस्यौदुम्बरतायाः स्वतो भवनासंभवाद्भवतेरन्तर्भावितण्यर्थतामाश्रित्य भावयतीत्यर्थो वक्तव्यः। तत्र च औदुम्बरतैव संनिहितत्वाद्भाव्या स्यात् औदुम्बरं यूपं भावयतीति। न तूर्गवरोधः, व्यवहितत्वात्। न च औदुम्बरतायाः [2]अपुरुषार्थत्वान्न भाव्यत्वसंभव इति वाच्यम्। प्रवर्तनात्मकविधिप्रत्यये सति हि, अपुरुषार्थे पुरुषस्य प्रवर्तयितुमशक्यत्वात् ऊर्गवरोधफलसंबन्धः सिध्येत्। न चात्रास्ति विधिप्रत्ययः। तस्मादौदुम्बरो यूपो भवतीत्यादिः ऊर्जोऽवरुद्ध्या इत्यन्तोऽर्थवादः। अर्थवादानां च विधिवाक्यशेषत्वं पूर्वाधिकरणे निरूपितम्। अतोऽस्याप्यर्थवादस्य विध्यविनाभूतत्वादौदुम्बरं यूपं कुर्वीतेति विधिः कल्प्यः।

---

1. लोकवदिति चेत् ॥ २० ॥ न पूर्वत्वात् ॥ २१ ॥ 2. अपुष्टार्थत्वात्—ख, ग.

तदेतद्दर्शयति—

विधिश्चानर्थकः क्वचित्तस्मात्स्तुतिः प्रतीयेत तत्सामान्या-दितरेषु तथात्वम् ॥ २२ ॥

'अप्सुयोनिर्वा अश्वोऽप्सुजो वेतसः' 'आपो वै शान्ताः शान्ताभिरेवास्य शुचं शमयति' इति क्वचिच्छाखायां श्रूयते । तत्राप्सुयोनिरश्वः कर्तव्यः अप्सुजो वेतसः कर्तव्य इति विधिरशक्यार्थकः । तस्माद्विधित्वासंभवात् शमयित्रीभिरद्भिरश्वस्य वेतसानां च संबन्धो यजमानस्य कष्टं शमयतीति स्तुतिः अस्माद्वाक्यात् प्रतीयेत ज्ञातव्या । तत्सामान्यात् विध्यसंभवतः स्तुतिसंभवतश्च तत्साहश्यात् उक्तवाक्यसाहश्यात् इतरेषु औदुम्बरो यूपो भवतीत्यादिषु तथात्वं स्तुतिवादत्वं प्रत्येतव्यम् । इयांस्तु विशेषः । अप्सुयोनिरश्वः कर्तव्य इति विधिरशक्यत्वान्न संभवति । इह त्वौदुम्बरं यूपं कुर्वीतेति विधिकल्पना निर्बाधेति ॥

नन्वेवमर्थवादतो विधिकल्पने 'यो विदग्धः स नैर्ऋतः' इत्यादीनामपि विधिकल्पकता स्यादित्याक्षिप्य समाधत्ते—

प्रकरणे च संभवन्नपकर्षो न कल्पेत विध्या-नर्थक्यं हि तं प्रति ॥ २३ ॥

चोऽवधारणे । केवलस्तुतिवादत्वे सत्येव विदग्धस्य नैर्ऋतत्वनिन्दया 'तस्मादविदहता श्रुतं कृत्यः' इति विधेः शेषीभवन् यो विदग्ध इति वाक्यशेषः । दर्शपूर्णमासयोः प्रकरणे इतिकर्तव्यताकाङ्क्षालक्षणे संभवन् लभ्यनिवेशः सन् अपकर्षः, कर्मणि घञ्, अपकृष्यमाणः, दर्शपूर्णमासाभ्यामन्यत्र विकृतिषु निविशमानो भवितुं न कल्पेत न समर्थो भवेत् । विधिकल्पकत्वे तु विकृतिष्वपकर्षः प्रसज्येतेति यावत् । कुतः, हि यस्मात् तं प्रति दर्शपूर्णमासकर्मविशेषं प्रति । दर्शपूर्णमासयोरिति यावत् । विध्यानर्थक्यम् 'यो विदग्धः स नैर्ऋतः' इति विधेरसंभवन्निवेशत्वम् । [1]'तस्मादविदहता श्रुतं कृत्यः' इत्यविदाहविधानेन 'यो विदग्धः' इत्यनुवादस्यासंभवात् । अतो महापितृयज्ञे 'विदह्यमानाः परिशेरते' इति विदग्धविषयतया अपकर्षः स्यात् । [2]अथ प्रकृतौ 'रक्षसां भागोऽसि' इति निरस्तो यस्तुषनिचयः नैर्ऋतः स विदग्धः कर्तव्य इति विधिकल्पनं तु

1. अत्राविदहता—क, घ. 2. 'अथ' इति ख, ग पुस्तकयोर्न दृश्यते ।

यत्तच्छब्दयोर्व्युत्क्रमप्रसङ्गादनुचितम् । एतत्सूचनार्थोऽपि चकारः । ततश्च बाधकसत्त्वान्नैवंजातीयकेभ्यो विधिकल्पनमिति भावः ॥

नन्वौदुम्बरं यूपं कुर्वीतेति कल्पितेऽपि विधौ आर्थवादिक ऊर्गवरोधः कुतो न फलत्वेन संबध्यते । तत्राह—

विधौ च वाक्यभेदः स्यात् ॥ २४ ॥

विधिकल्पनार्थम् 'ऊर्जोऽवरुद्ध्यै' इत्यस्य स्तुतौ तात्पर्यं वक्तव्यम् । स्तुतिपराच्च तस्मात् कल्पिते विधौ पुनस्तस्यैव फलसंबन्धे व्यापारात् वाक्यस्य आवृत्तिः स्यात् । चकारोऽनुक्तसमुच्चयार्थः । तथा हि—न तावत्केवलौदुम्बरताया ऊर्गवरोधः फलम्, यूपपदस्यानर्थक्यात् । नापि केवलयूपस्य, औदुम्बरपदस्यानर्थक्यात् । नाप्युभयोः, औदुम्बरतया ऊर्गवरोधं कुर्यात् यूपेनोर्गवरोधं कुर्यादिति वाक्यभेदप्रसङ्गात् । विशिष्टविधौ तु गौरवम् । औदुम्बरत्वलक्षणविशेषणस्य[1] यूपलक्षणविशेष्यान्वयद्वारा फलान्वयस्य विशेष्यान्वयानन्तरभावित्वात् यूपेनोर्गवरोधं कुर्यादौदुम्बरत्वविशिष्टेनेति वाक्यभेदतादवस्थ्यं च । ततश्च औदुम्बरं यूपं कुर्वीतेति कल्पितो विधिः आर्थवादिकमूर्गवरोधं फलमुपेक्ष्य प्रकरणलब्धं क्रतूपकारमेव फलं स्वीकरोति, यूपश्च प्रकृतिप्राप्तोऽनूद्यत इति न तत्कृतोऽपि वाक्यभेदः । औदुम्बरत्वगुणस्य यूपाश्रयसंबन्धमात्रे वाक्यस्य व्यापारात् । तस्मान्नात्र कल्पिते विधौ ऊर्गवरोधः फलत्वेनान्वेतुमर्हतीति अर्थवाद एवेति स्थितम् । 'द्रव्यसंस्कारकर्मसु परार्थत्वात्फलश्रुतिरर्थवादः स्यात्' इति चातुर्थिकतृतीयाद्याधिकरणपुनरुक्तिस्तु तत्रैव परिहरिष्यते । इत्यौदुम्बराधिकरणम् ॥

वरुणप्रघासेषु 'करम्भपात्राणि जुहोति' इति प्रकृत्य श्रूयते 'शूर्पेण जुहोति, तेन अन्नं क्रियते' इति । किमत्र होमसाधनत्वे अन्नकरणत्वस्य हेतुत्वं प्रतिपाद्यते उत अर्थवाद इति संशये पूर्वपक्षयति—

हेतुर्वा स्यादर्थवत्त्वोपपत्तिभ्याम् ॥ २५ ॥

वाशब्दः प्रत्यवस्थाने । 'ऊर्जोऽवरुद्ध्यै' इत्यर्थवादोऽस्तु । अत्र त्वन्नकरणत्वं होमसाधनत्वे हेतुः प्रतिपाद्यः स्यात् । कुतः, अर्थवत्त्वोपपत्तिभ्याम् अर्थवत्त्वादुपपत्तेश्च, हिशब्दस्य हेत्वर्थकत्वात् निरर्थवादवाक्यादिव प्रवृत्त्युपपत्तेश्च । ननु हेतुवादत्वे आनर्थक्यम्, वैदिकार्थस्य हेत्वनपेक्षत्वात् । तेनेति तृतीयागम्यं साधक-

३. हेतुर्वाग्निगदाधिकरणम् ।

1. विशेषणविशिष्टस्य—ख.

तमत्वलक्षणमन्नकरणत्वमपि शूर्पस्यानुपपन्नम्, अन्नोत्पत्तौ शूर्पस्य प्रकृष्टसाधकत्वाभावात्, ततोऽपि तण्डुलाधिश्रयणादेः प्रकृष्टत्वादित्यत्राप्येतदेवोत्तरमर्थवादत्वोपपत्तिभ्यामिति । अर्थशब्दाद्भूम्नि मतुप् । यतः शूर्पमन्नकरणम् अतस्तेन होतव्यमित्युक्त्या येन येनान्नं क्रियते तेन तेन दर्वीपिठरादिना होतव्यमित्यधिकार्थलाभेन हेतुवादस्य प्रयोजनवत्त्वात् प्रणाडिकया अन्नकरणत्वस्योपपत्तेश्च । स्तुतिपरत्वेऽपि शूर्पस्यान्नकरणताया एवमेवोपपाद्यत्वात्, अन्यथा स्तुतेर्निरवलम्बनत्वापत्तेः । शूर्पं होमसाधनम् अन्नकरणत्वादिति हेतुवादः । एवं च यद्यदन्नकरणं तेन तेन होतव्यमिति व्याप्तिं कल्पयति, तथाविधव्याप्तेर्वेदेषु प्रत्यक्षमनुपलम्भात् लोकतश्च तदवगमासंभवात् । ततश्च श्रुतानुमितैकदेशनिष्पन्नमीदृशं वाक्यजातं संपद्यते—शूर्पमन्नकरणत्वाद्धोमसाधनम्, यद्यदन्नकरणं तेन तेन होतव्यमिति । तत्र शूर्पमित्यादि प्रत्यक्षश्रुतम्, यद्यदन्नकरणमित्यादि त्वनुमितम । तत्र प्रथमप्रवृत्तेन शूर्पवाक्येन प्रत्यक्षश्रुतेन शूर्पस्य होमसाधनत्वं प्राप्तम् । अनुमितं तु सामान्यव्याप्तिवचनं शूर्पदर्व्यादीनां सर्वेषामेवान्नकरणानां होमसाधनत्वं विदधत् प्राप्ताप्राप्तविवेकेन शूर्पव्यतिरिक्तदर्व्यादिमात्रे पर्यवस्यति । शूर्पांशे तु तस्यानुवादत्वमेव ॥

तदेवं हेतुवादत्वे प्राप्ते सिद्धान्तयति—

स्तुतिस्तु शब्दपूर्वत्वादचोदना च तस्य ॥ २६ ॥

तुः पूर्वपक्षव्यावृत्तौ । 'शूर्पेण जुहोति' इति विधिः । 'तेन ह्यन्नं क्रियते' इति तस्य स्तुतिः, न तु हेतुवादः । कुतः, शब्दपूर्वत्वात् अन्नकरणत्वे होमसाधनतां प्रति हेतुत्वस्य वेदैकसमधिगम्यत्वात् । न हि तल्लोकतो गम्यम् । वेदश्च शूर्पस्य होमसाधनत्वे शूर्पगतमन्नकरणत्वं हेतुरित्याह, न तु दर्व्यादिगतमपि, तेनेति सर्वनाम्ना प्रकृतस्य शूर्पस्यैव परामर्शात् । अतस्तस्य च दर्व्यादिकस्यापि अचोदना यद्यदन्नकरणं तेन तेन होतव्यमिति विधेरभावः ॥ यदि हि 'शूर्पेण जुहोति' इति प्रत्यक्षवचनं शूर्पविधायकं 'यद्यदन्नकरणं तेन तेन होतव्यम्' इति कल्पितवचनं च दर्व्यादिविधायकं शूर्पांशे चानुवादकमिति स्यात् तर्हि विषमशिष्टविकल्पापत्तिः । अतोऽधिकार्थलाभासंभवात् 'तेन ह्यन्नं क्रियते' इति शूर्पस्यैवान्नकरणत्वेन स्तुतिपरमित्येव युज्यते । न च विकल्पाभावे आनुमानिकं वचनं व्यर्थं स्यादिति तत्सार्थक्याय विषमशिष्टविकल्पोऽप्यङ्गीकार्य इति वाच्यम् । अपेक्षितस्तुतिसमर्पणेनैव सार्थक्ये संभवति [1]हेतुवादत्वस्यावश्यवक्तव्यत्वाभावेन तन्निर्वाहकसामान्यव्याप्तिवचनस्यानपेक्षितत्वात् । न च निरर्थवादविधेरिव शक्तिद्वयकल्पनोपपत्तौ किम-

1. हेतुवादस्य—ख, ग.

नेनार्थवादेनेति वाच्यम् । सार्थवादस्थले आम्नानबलेनार्थवादत एव प्ररोचनायाः संपाद्यतया तद्वैयर्थ्यकथनस्यायुक्तत्वात् । अतो न हेतुवादः ।

ननु, तेनेति न करणतृतीया, शूर्पापेक्षया तण्डुलाधिश्रयणादेरेव प्रकृष्टत्वात् । नापि हेतुतृतीया, वैतुष्यमुत्पाद्य आशुनष्टेऽपि शूर्पेऽन्नस्योत्पत्त्या कुलालजनकवदन्यथासिद्धत्वात् । ततश्चान्नं प्रति करणत्वेन हेतुत्वेन वा कथं शूर्पस्य स्तुतिः । क्रियत इति लटा वर्तमानान्नक्रियानिष्पादकत्वेन स्तुतिरपि शूर्पस्यानुपपन्ना, होमान्ननिष्पादनयोः शूर्पेण युगपत्कर्तुमशक्यत्वात् । इत्याक्षिप्य समाधत्ते—

[1]व्यर्थे स्तुतिरन्याय्येति चेदर्थस्तु विधिशेषत्वाद्यथा लोके ॥ २७ ॥

अर्थस्याभावो व्यर्थम । अर्थाभावेऽव्ययीभावः । 'तृतीयासप्तम्योर्बहुलम्' इत्यम्भावाभावः । उक्तरीत्या स्तुत्यवलम्बनस्यार्थस्याभावे सति स्तुतिरनुचितेति चेन्मन्यसे तत्रोत्तरं ब्रूमः । अर्थस्तु, तुरवधारणे । गौणमन्नकरणत्वमत्र तृतीयार्थः स्तुत्यवलम्बनो भवत्येव । [2]विधिशेषत्वात् 'तेन ह्यन्नं क्रियत' इति स्तुतेः शूर्पविधिशेषत्वात् । विधावेव हि लक्षणा दुष्यति, 'न विधौ परः शब्दार्थः' इति न्यायात् । ततश्च गौणमन्नकरणत्वमादाय तेनेति स्तुतिरुपपद्यते । यथा तावल्लोके बलवानयं देवदत्तो यज्ञदत्तादीन्प्रसहत इति अतिशायने मतुबन्तो बलवच्छब्दः प्रकृष्टबले सिंहशार्दूलगजादौ मुख्यो[3] वर्तमानो यज्ञदत्तादीन्निकृष्टबलानपेक्ष्य देवदत्ते प्रयुज्यते, तद्वदिहाप्युत्कृष्टमन्नकरणमग्निसंयोगादिकमपेक्ष्य साधकतमत्वाभावेऽपि लाङ्गलादिकमपेक्ष्य प्रकृष्टमन्नसाधकत्वमवलम्ब्य तेनेति तृतीया प्रयुज्यते स्तोतुम् । वर्तमानापदेशोऽपि स्तुतौ न दुष्यति । प्रत्युत प्ररोचनामुपजनयन्सामञ्जस्यमश्नुते । न हि भूते भाविनि वा तादृशी प्रीतिर्यादृशी वर्तमाने । इयं गौः पूर्वस्मिन्प्रसवे बहुक्षीरासीदिति वा आगामिनि प्रसवे बहुक्षीरा भविष्यतीति वा उक्तेऽपीदानीं बहुक्षीरेतिवत्प्ररोचनातिशयस्यादर्शनात् । हेतुवादत्वे तु लटा अन्ननिष्पत्ताववर्तमानत्वं लक्षयित्वा भविष्यदन्ननिष्पत्तिकरणत्वस्य होमसाधनत्वे हेतुत्वमवलम्ब्य यद्यद्भविष्यदन्ननिष्पत्तिकरणं तेन तेन होतव्यमिति विधौ लक्षणा स्यात् । तद्वरं स्तुतौ लक्षणाश्रयणम् । अतो न हेतुवादः ॥

अभ्युपेत्याप्याह—

यदि च हेतुरवतिष्ठेत निर्देशात्सामान्यादिति चेदव्यवस्था विधीनां स्यात् ॥ २८ ॥

---

1. अन्यत्रेदं सूत्रं द्विधा विभज्य पठ्यते. 2. कुतः, विधि—क, घ. 3. मुख्ये—क, घ.

यद्यपि हेतुवादत्वमभ्युपगम्यते तथापि शूर्पमात्रे होमसाधनत्वं पर्यवस्येत् । कुतः, निर्देशात् तेनेति शूर्पगतस्यैवान्नकरणत्वस्य हेतुत्वनिर्देशात् । विशेषहेतुना च साध्यविशेष एवानुमीयते यथा तृणधूमात्तृणजन्माग्निः, तथा यतोऽयं बलवदुपध्मातोऽग्निरतस्तेन गृहं दग्धमित्युक्ते अग्निरेव बलवदुपध्मातो दहतीति गम्यते, न त्वनग्निरपि बलवदुपध्मातो दहतीति । नन्वन्नकरणत्वस्य शूर्पमात्रगतस्य होमसाधनत्वहेतुत्वकथनवैयर्थ्यादर्व्याद्यधिकार्थलाभाय सामान्यरूपेणान्नकरणत्वमात्रस्य हेतुत्वमिति चेद्भूषे, तत्र वदामः । अव्यवस्था विधीनां स्यात् । विधीनां विधेयानां दर्व्यादीनाम् अव्यवस्था अनवधारणं स्यात् । वस्तुमात्रस्य कयाचित्प्रणाड्या अन्ननिष्पत्तिकरणत्वाद्धोमसाधनत्वेन विधानं स्यादिति यावत् । तथा च 'करम्भपात्राणि जुहोति' इत्येतावतैव तत्सिद्धमित्यन्नकरणेन होतव्यमिति सामान्यविधिवैयर्थ्यम् । न च 'जुह्वा जुहोति' इति विहितजुहूनियमव्युदासात्तत्सार्थक्यमिति वाच्यम् । तर्हि करणेन होतव्यमित्येव सिद्धावन्नपदवैयर्थ्यात्, 'शूर्पेण जुहोति' इति वैयर्थ्याच्च । तस्मान्न हेतुवादोऽयम् । इति हेत्वधिकरणम् ॥

मन्त्राः किमुच्चारितमात्रा अविवक्षितार्था अदृष्टद्वारा क्रत्वङ्गतां भजन्ते, उतानुष्ठेयार्थप्रकाशनरूपदृष्टद्वारेति संशयः । तत्र पूर्वपक्षयति—

तदर्थशास्त्राद्वाक्यनियमाद्बुद्धशास्त्रादविद्यमानवचनादचेतनेऽर्थबन्धनादर्थविप्रतिषेधात्स्वाध्यायवदवचनादविज्ञेयादनित्यसंयोगान्मन्त्रानर्थक्यम् ॥ २९ ॥

'तदर्थशास्त्रवाक्यनियमबुद्धशास्त्राविद्यमानवचनाचेतनार्थबन्धनार्थविप्रतिषेधस्वाध्यायवदवचनाविज्ञेयानित्यसंयोगेभ्यो मन्त्रानर्थक्यम्' इति केचित्पठन्ति. भाष्ये 'तदर्थशास्त्रात्' इति सूत्रभङ्गस्तु व्याख्यासौकर्यायेति च वदन्ति । मन्त्रानर्थक्यमित्यावर्तते । एकं पूर्वपक्षमुख्ययुक्तिपरम् । तथा हि—नानुष्ठेयार्थप्रकाशकता मन्त्राणाम्; यतो मन्त्रानर्थक्यम् अनुष्ठेयार्थप्रकाशनार्थत्वे मन्त्राणां नित्यवदाम्नानानर्थक्यम्, विनियोजकब्राह्मणकल्पसूत्राद्युपायान्तरेणाप्यनुष्ठेयार्थप्रकाशनसिद्धेः । न च मन्त्रेणैवानुष्ठेयार्थः प्रतिपत्तव्य इत्युपायनियमलाभाय नित्यवत्तदाम्नानमिति वाच्यम् । उपायनियमस्य दृष्टप्रयोजनाभावात् अदृष्टकल्पनस्य चासंभवात् । मन्त्रोच्चारणजन्यार्थप्रकाशनाश्रयनियमादृष्टकल्पनापेक्षया मन्त्रोच्चारणादेव तत्कल्पनौचित्यात् । किंच, स्वव्यापारगोचरे पुरुषो नियुज्यते मन्त्रेणैवेत्युपायनियमश्च उपायान्तरव्यावृत्त्यात्मा न साक्षात्पुरुषव्यापारगोचरः । मन्त्रोच्चारणमेव च साक्षात्पुरुषव्यापारगोचरः । यत्र

४. मन्त्रलिङ्गाधिकरणम् ।

नियुज्यते तत्रैव फलाकाङ्क्षा भवतीत्युच्चारणादेवादृष्टं कल्पयितुमुचितम् । तस्मान्मन्त्रा अविवक्षितार्थाः उच्चारणमात्रेणादृष्टार्थाः । द्वितीयं मन्त्रानर्थक्यमित्येतत्तदर्थशास्त्रादिषु प्रत्येकं संबध्यते । ततश्च, तदर्थशास्त्रान्मन्त्रानर्थक्यं वाक्यनियमान्मन्त्रानर्थक्यमित्यादीनि नव वाक्यान्युक्तेऽर्थेऽभ्युच्चयपराणि । **तदर्थशास्त्रात् ।** मन्त्रानर्थक्यमिति संबध्यते । अर्थप्रकाशनरूपदृष्टप्रयोजनराहित्यं मन्त्राणाम् । कुतः, तदर्थशास्त्रात् मन्त्रप्रकाशितेऽर्थे मन्त्रविधायकशास्त्रात् । सन्ति हि अग्निचयने मन्त्रसमाम्नाये 'देवस्य त्वा' 'अश्विरसि' 'बभ्रिरसि' 'हस्त आधाय' इत्यादयः 'आददेऽङ्गिरःस्वन्' अन्ताश्चत्वारो मन्त्राः । अस्ति तेषां विनियोजकं शास्त्रम् 'चतुर्भिरभ्रिमादत्ते' इति । अभ्रिः कुद्दालविशेषः । मन्त्राणां विवक्षितार्थकत्वे अर्थप्रकाशनसामर्थ्यरूपलिङ्गादेव मन्त्रप्रकाश्ये अभ्रयादाने विनियोगस्य सिद्धत्वात्तद्विनियोजकमिदं शास्त्रमनर्थकं स्यात् । तथा तत्रैवास्ति मन्त्रः 'इमामगृभ्णन्रशनामृतस्य' इति । तस्य चेदं विनियोजकं शास्त्रम् 'इमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्ते' इति । अभिधीयते बध्यते अनयेत्यभिधानी रशना । मन्त्राणां विवक्षितार्थत्वे लिङ्गादेवाश्वरशनादानेऽस्यापि मन्त्रस्य विनियोगसिद्धेस्तद्विनियोजकमिदमनर्थकं स्यात् । न च गर्दभरशनापरिसंख्यानाय तदिति वाच्यम् । तर्हि 'अश्वाभिधानीमादत्ते' इत्यस्याश्वरशनाग्रहणरूपस्वार्थत्यागः गर्दभरशनाग्रहणनिवृत्तिरूपपरार्थस्वीकारः गर्दभरशनाग्रहणे प्राप्तस्य मन्त्रस्य बाधश्चेति त्रैदोष्यापत्तेः । तथा दार्शपूर्णमासिकमन्त्रसमाम्नाये पठितस्य 'उरु प्रथस्वोरु ते यज्ञपतिः प्रथताम्' इति मन्त्रस्य विनियोजकं शास्त्रं ब्राह्मणभागे पठ्यते 'उरुप्रथस्वेति पुरोडाशं प्रथयति यज्ञपतिमेव तत्प्रथयति' इति । तदिदं मन्त्राणां विवक्षितार्थत्वे लिङ्गादेव विनियोगसिद्धेरनर्थकं स्यात् । न च मन्त्रलिङ्गकल्पितविधेरयमर्थवाद इति वाच्यम् । ब्राह्मणभागे पठितस्यास्य वाक्यस्य मन्त्रसमाम्नायदेशकमन्त्रलिङ्गकल्पितविध्यपेक्षया भिन्नदेशत्वेन तदर्थवादत्वानुपपत्तेः । तस्मादविवक्षितार्था मन्त्राः । यद्यपि तदर्थशास्त्रविरोधो न सार्वत्रिकस्तथापि क्वचित्सत्त्वमुक्तन्यायेन लिङ्गमित्यदोषः । **वाक्यनियमात् ।** पदसमूहात्मकमन्त्रवाक्यस्य पदक्रमनियमादपि लिङ्गान्नार्थप्रकाशनार्थत्वं मन्त्राणाम्, व्युत्क्रमेण पाठेऽप्यर्थप्रकाशनसंभवात् । अदृष्टार्थत्वे तु यथाक्रममेव प्रयुक्ता अदृष्टमादधते, नान्यथेति क्रमनियमोऽर्थवान् । क्रमनियमसहकृतोच्चारणकमन्त्रजन्यमर्थज्ञानमदृष्टायेति कल्पनापेक्षया तदुच्चारणस्यैव अदृष्टार्थत्वकल्पना लघीयसी । यद्यपि पदक्रमनियमोऽपि न सार्वत्रिकः, एकपदात्मकेषु 'भूः' इत्यादिमन्त्रेषु तदसंभवात्, तथापि क्वचित्तत्सत्त्वमुक्तन्यायेन लिङ्गमित्यदोषः । **बुद्धशास्त्रात् ।** बुद्धस्य शास्त्रान्तरेण ज्ञातस्यैवार्थस्य विषये शासनात् संप्रेषणात् अविवक्षितार्था मन्त्राः । अस्ति हि सोमे आग्नीध्रं प्रति संप्रैषः 'अग्नीदग्नीन्विहर' इति । तत्र 'आग्नीध्राद्विष्णियान्विहरति' इत्यग्निविहरणं सप्रकारमुपदिष्टम् । तच्च [1]संप्रैषमात्रान्न ज्ञातुं

1. सोमे प्रैषमात्रात्—क.

शक्यते। बुद्धे च तस्मिन्किं तज्ज्ञापनार्थसंप्रैषेण। संप्रैषजन्यादर्थज्ञानाददृष्टकल्पनात्तदुच्चारणादेव तत्कल्पनं लघीयः। बुद्धशासनमपि काचित्कमेव। **अविद्यमानवचनात्।** 'चत्वारि शृङ्गा त्रयो अस्य पादाः' इत्यविद्यमानस्य चतुःशृङ्गत्वाद्युपेतवृषभस्य प्रतिपादनादप्रामाण्यप्रसङ्गादविवक्षितार्थत्वम्। इदमपि काचित्कमेव। **अचेतनार्थबन्धनात्।** 'अर्थ' याच्ञायाम्। अर्थनमर्थः प्रार्थना। भावे घञ्। 'शृणोत ग्रावाणः' इत्यादिमन्त्रेषु अचेतने ग्रावादौ श्रवणादिप्रार्थनस्य निबन्धनात् प्रतिपादनात् अविवक्षितार्था मन्त्राः। इदमपि काचित्कमेव। क्वचिद्भाष्यपुस्तकेषु 'अचेतने अर्थबन्धनात्' इति अचेतनपदं सप्तम्यन्तं विगृह्यैव पठ्यते। तथा पाठः 'तदर्थशास्त्राद्वाक्यनियमात्' इत्येवं विगृह्य सूत्रपाठस्यानुगुणः। 'अचेतनार्थबन्धनात्' इति क्वचित्समस्तपाठो दृश्यते। स तु 'तदर्थशास्त्रवाक्यानियम' इत्यादिसमस्तपाठस्य न विरुध्यते। **अर्थाविप्रतिषेधात्।** 'अदितिर्द्यौरदितिरन्तरिक्षम्' इत्यदितेर्द्युत्वान्तरिक्षत्वाद्यर्थस्य विरोधादविवक्षितार्थता। इदमपि काचित्कमेव। **स्वाध्यायवदवचनात्।** स्वाध्यायशब्देन तदध्ययनं लक्ष्यते। षष्ठ्यन्ताद्वतिः। वचनशब्देन पुनर्वचनं लक्ष्यते। अर्थप्रकाशनस्येति शेषः। अध्ययनकाले यावदक्षरानुपूर्व्यवधारणमध्ययनमुच्चारणाभ्यासात्मकं मन्त्राणां यथा, तद्वल्लौकिकावघातपेषणादिकर्मसु तत्तन्मन्त्रैरुच्चारितैरर्थप्रकाशनाभ्यासस्याभावादविवक्षितार्था मन्त्राः। नन्वुच्चारणाभ्यासात्मकाध्ययनवदर्थप्रकाशनाभ्यासस्य विधिरस्ति। अर्थप्रकाशनस्यावश्यकत्वे हि तदभ्यासोऽपि विधातव्यः स्यात्। अतो मन्त्राणामुच्चारणाभ्यासमात्रस्य विधेरुच्चारणमेव प्रयोजनवदित्यवगच्छामः। **अविज्ञेयात्।** 'सृण्येव जर्भरी तुर्फरीतू' इत्यादिमन्त्राणां केषांचिदर्थस्य विज्ञातव्यस्याभावान्नार्थप्रकाशकत्वम्। **अनित्यसंयोगात्।** 'नमो वयं वैश्रवणाय कुर्महे' इत्यादिमन्त्रेषु क्वचिन् अनित्यैः इदानींतनैः [1]विश्रवस्तदपत्यादिभिः वाच्यतया संयोगात् अविवक्षितार्थता। तथा च मन्त्राणां [2]रथघोषदुन्दुभिघोषादिवदङ्गत्वेऽपि न शब्दविधया प्रमितिजनकत्वमिति पूर्वः पक्षः।

अथ सिद्धान्तयति—

अविशिष्टस्तु वाक्यार्थः ॥ ३० ॥

तुः पूर्वपक्षव्यावृत्तौ। वाक्यतः प्रतीयमानः क्रियाकारकसंबन्धो वाक्यार्थः। स तावल्लोके वेदे च अविशिष्टः। लोके चार्थप्रत्यायनायैव वाक्यानि प्रयुज्यन्ते। तथा वेदेऽपि मन्त्रवाक्यानि प्रत्यायनार्थान्येव भवितुमर्हन्ति। अदृष्टार्थत्वे हि अदृष्टस्य स्वरूपं, तस्योच्चारणफलत्वम्,

1. वैश्रवण—क, ख, ग. 2. जुह्वादिवत्—क.

उच्चारणे च तज्जननसामर्थ्यं कल्पनीयम् । प्रत्यायनार्थत्वे तु प्रत्यायनस्य स्वरूपम् उच्चारणे तज्जनकत्वं प्रत्यायने उच्चारणफलत्वं च तज्जन्यत्वात्सिद्धमिति लाघवम् । अर्थज्ञानस्योपायान्तरेणापि संभवे मन्त्राणां नित्यवदाम्नानं तु तत एव प्रतिपत्तव्यमिति नियमार्थत्वान्नानर्थकम् । न चैवं सति नियमस्य दृष्टप्रयोजनाभावादृष्टकल्पने गौरवं तुल्यमिति वाच्यम् । फलमुखगौरवस्यादोषत्वात् । मन्त्राणामदृष्टार्थत्वप्रत्यायनार्थत्वविप्रतिपत्तौ ह्यदृष्टार्थत्वे गौरवं प्रत्यायनार्थत्वे च लाघवं युगपत्पर्यालोच्य लाघवानुगृहीतं प्रत्यायनार्थत्वमेव निश्चिनोति, गौरवदोषानुविद्धमदृष्टार्थत्वं तु परित्यजति । तदेवं मन्त्रोच्चारणफलत्वे प्रत्यायनस्य सिद्धे प्रत्यायनस्योपायान्तरतोऽपि सिद्धौ तन्नियमार्थत्वे स्थिते तन्नियमस्य कैमर्थ्याकाङ्क्षायामदृष्टार्थत्वे कल्प्यमाने गौरवमुन्मिषति । तच्च प्रत्यायनार्थतां न विरुणद्धि, [1]पूर्वप्रवृत्तलाघवानुगृहीतनिश्चयदशायामस्य गौरवस्यालब्धात्मकत्वात् । तथा च प्रत्यायनात्मकफलसिद्ध्यनन्तरोन्मेषकमिदं गौरवं न दोषावहम् । यथा चैतत्तथा 'स्थपतिर्निषादः स्याच्छब्दसामर्थ्यात्' इति षष्ठप्रथमान्याधिकरणे वक्ष्यते । यद्यपि प्रत्यायनाश्रयनियमो न पुरुषस्य साक्षाद्व्यापारगोचरः, तथापि दृष्टलाभानुरोधादुच्चारणादिप्रणाड्या पुरुषव्यापारगोचरस्यापि नियमस्याश्रयणं युज्यते ।

अथ तदर्थशास्त्रादिकं परिहरन्नभ्रयादाने तावदाह—

गुणार्थेन पुनः श्रुतिः ॥ ३१ ॥

अभ्रयादानमन्त्राणां चतुर्णां लिङ्गादेव विनियोगे सिद्धे 'तां चतुर्भिरादत्ते' इति पुनर्वचनं गुणार्थेन । 'निमित्तपर्यायप्रयोगे सर्वासां प्रायदर्शनम्' इति तृतीया । चतुष्ट्वसंख्यारूपगुणलाभलक्षणप्रयोजनायेत्यर्थः । पाठादेव चतुष्ट्वसिद्धौ चतुर्भिरिति वचनं समुच्चयसिद्ध्यर्थम्, अन्यथा विकल्पः स्यादिति द्वादशस्य तृतीये 'संख्याविहितेषु समुच्चयोऽसंनिपातित्वात्' इत्यधिकरणे व्यक्तं भविष्यति ।

'इत्यभ्राभिधानीमादत्ते' इत्यत्राह—

परिसंख्या ॥ ३२ ॥

मन्त्रेणादाने गर्दभरशनाव्यावृत्तिरनेन विधिना लभ्यत इत्यर्थः । न च त्रैदोष्यप्रसङ्गः, फलतः परिसंख्याभ्युपगमात् । तथा हि — मन्त्रलिङ्गं [2]तावद्दर्शनाद्वयसाधारणमन्त्रविधायकश्रुति-

1. पूर्व...ग्रहकृततन्नि—क, घ. 2. ताव...साधारणं—क, ग.

कल्पनामुखेन गर्दभरशनायामपि मन्त्रविनियोजकमिति वक्तव्यम् । तत्र यावद्गर्दभरशनायां लिङ्गान्मन्त्रः प्राप्नोति, ततः प्रागेव 'इत्यश्वाभिधानीमादत्ते' इति प्रत्यक्षं वाक्यं झटितिप्रवृत्तिकमश्वरशनायां मन्त्रं प्रापयति । ततश्च मन्त्रस्य निराकाङ्क्षत्वान्न गर्दभरशनायां लिङ्गात्प्राप्तिसंभवः । अतो न प्राप्तबाधः । अश्वरशनायामेव मन्त्रविधानाच्च न स्वार्थत्यागः । अश्वरशनायां विनियोगे सति तत एव मन्त्रस्य शान्ताकाङ्क्षतया गर्दभरशनायां तन्निवृत्तेरार्थिकत्वान्न परार्थग्रहणम् । न चैवं सत्यपूर्वविधित्वापात इति वाच्यम् । यस्य हि विधेः प्रवृत्तिरप्राप्तप्रापणफला सोऽयमपूर्वविधिः, यथा 'व्रीहीन्प्रोक्षति' इति । यस्य तु विधेः प्रवृत्तिरप्राप्तांशपूरणफला स नियमविधिः, यथा 'व्रीहीनवहन्ति' इति । एतदभावेऽपि पुरोडाशविध्याक्षेपादेव अवघातः प्राप्नोति । किंतु नखविदलनादिकमपि पक्षे प्राप्नुयात् । ततश्च नखविदलनादिप्राप्तिपक्षे अवघातस्याप्राप्तत्वात्तदप्राप्तांशपूरणरूपनियम एव विधिप्रवृत्तेः फलम् । न च नखविदलनादिनिवृत्तिरेव फलं किं न स्यादिति वाच्यम् । एवं हि वदन् प्रष्टव्यः, अप्राप्तांशपूरणरूपनियमः किं नावघातविधितात्पर्यगोचरः उत तद्गोचर इति । नाद्यः, तर्ह्यवघातस्य प्राप्तावप्युपायान्तरस्य निराकरणासंभवात् । न द्वितीयः, नियमस्य विधितात्पर्यगोचरत्वे अर्थादेव तदितरनिवृत्तेः सिद्धतया तस्या विधिफलत्वासंभवात् । यस्य तु विधेः प्रवृत्तिरन्यनिवृत्तिफला स परिसंख्याविधिः, यथा 'इत्यश्वाभिधानीमादत्ते' इति । एतद्विध्यभावेऽप्यश्वरशनादाने मन्त्रस्य लिङ्गादेव नित्यप्राप्तत्वात् न तत्प्राप्तिर्नियमो वा फलम् । किंतु गर्दभरशनादाने मन्त्रनिवृत्तिरेव फलत्वेनाश्रीयते । तदेवं फलतः परिसंख्यानान्न त्रैदोष्यप्रसङ्ग इत्यन्यत्र विस्तरः ।

'उरु प्रथस्व' इत्यत्राह—

अर्थवादो वा ॥ ३३ ॥

वाशब्दोऽवधारणे । लिङ्गादेव सिद्धे 'उरु प्रथस्वेति पुरोडाशं प्रथयति' इति पुनः श्रवणम् 'यज्ञपतिमेव तत्प्रथयति' इत्यर्थवादार्थत्वादर्थवाद एव ॥ न चास्य मन्त्रसमाम्नायदेशकमन्त्रलिङ्गकल्प्यविध्यपेक्षया भिन्नदेशत्वात्कथं तदर्थवादत्वमिति वाच्यम् । मन्त्रलिङ्गकल्प्यविधिशेषत्वासंभवेऽपि प्रथनविधिशेषत्वोपपत्तेः । अत्र हि 'पुरोडाशं प्रथयति' इत्यंशेन पुरोडाशप्रथनं विधीयते । तच्च प्रथनमेतन्मन्त्रकरणकत्वाद्यज्ञपतेर्यजमानस्य प्रजापशुवृद्धिसाधनमिति स्तोतुं मन्त्रस्य पुनरुपादानमिति नानर्थक्यम् ।

'वाक्यनियमात्' इत्यत्राह—

अविरुद्धं परम् ॥ ३४ ॥

परं तदर्थशास्त्रादित्यनन्तरोक्तं वाक्यनियमादित्येतत् मन्त्राणामर्थप्रत्यायनार्थत्वे अविरुद्धम्। न च वयं मन्त्रगतपदक्रमाददृष्टं निवारयामः। किं तर्हि, नियतपदक्रमकमन्त्रोच्चारणतो जायमानमर्थज्ञानमपि फलं दृष्टत्वान्नोपेक्षणीयमिति ब्रूमः। गौरवं तु फलमुखत्वान्न दुष्यति॥

'बुद्धशास्त्रात्' इत्यत्राह—

[1]संप्रैषकर्मगर्हानुपालम्भः संस्कारत्वात् ॥ ३५ ॥

ज्ञातविषयेऽपि 'अग्नीदग्नीन्विहर' इत्यत्र संप्रैषमन्त्रे पुनर्ज्ञापनरूपकर्मणः गर्हा निन्दा या अभिहिता सा अनुपालम्भः अदोषः। कुतः, संस्कारत्वात्, संस्क्रियते अतिशयविशेषवत्तया क्रियते अनुष्ठेयोऽर्थः अनेनेति संस्कारः; पुनर्ज्ञापनस्यादृष्टार्थत्वादिति यावत्। दृष्टसंभवे ह्यदृष्टकल्पना न युज्यते। न चात्र दृष्टं किंचिदुपलभामहे। तस्माददृष्टार्थः संप्रैषः॥

'अविद्यमानवचनात्' इत्यत्र 'अचेतनेऽर्थबन्धनात्' इत्यत्र चाह—

अभिधानेऽर्थवादः ॥ ३६ ॥

अभिधीयते अनेनेति अभिधानो मन्त्रः। तस्मिन्नविद्यमानवचनत्वेनोदाहृते 'चत्वारि शृङ्गा' इति मन्त्रे, अचेतने अर्थबन्धनत्वेनोदाहृते 'शृणोत ग्रावाणः' इति मन्त्रे च अर्थवादः गौणस्यार्थस्याभिधानम्॥ तथा हि—अस्य यज्ञस्य होत्रध्वर्युब्रह्मोद्गातारो महर्त्विजश्चत्वारि शृङ्गाणि। प्रातर्माध्यंदिनतृतीयसवनानि त्रयः पादाः। यजमानः पत्नी च द्वे शिरसी। गायत्र्यादिसप्तच्छन्दांसि सप्त हस्ताः। त्रिधा बद्धः त्रिभिर्वेदैर्विहितः अस्य यजमानस्य वृषभः कामानां वर्षिता रोरवीति स्तोत्रशस्त्रादिशब्दैर्गर्जति। सोऽयं यज्ञः महः महान् पाकयज्ञहविर्यज्ञसोमयज्ञभेदैर्विस्तृतः देवः द्योतमानः मर्त्यान् मनुष्यान् आविवेश अधिकारितया स्वीकृतवान्, इत्येवं रूपकेण यज्ञः स्तूयते 'चक्रवाकस्तनी हंसदन्ता शैवलकेशिनी। काशाम्बरा फेनहासा नदी कापि विराजते' इत्यादिवत्। 'शृणोत ग्रावाणः' इत्यत्रापि ग्रावाणोऽपि शृण्वन्ति, किमुत विद्वांस इति कर्मोत्साहनार्थं चैतन्यमारोप्य गुणवादेनापि दृष्टार्थत्वोपपत्तौ नोच्चारणमात्रादृष्टकल्पनोचिता। वार्तिकाभिमतदेवताचैतन्यपक्षे तु ग्रावशब्दस्तदभिमानिदेवताविशेषे गौण इति निर्बाधम्।

'अर्थविप्रतिषेधात्' इत्यत्राह—

गुणादविप्रतिषेधः स्यात् ॥ ३७ ॥

1. संप्रैषे कर्म &c.; संप्रैषकर्मणि &c.

'अदितिर्द्यौः' इत्यत्र अविप्रतिषेधः अविरोधः स्यात्, गुणवादात् 'त्वमेव माता च पिता त्वमेव' इत्यादिवत्स्तुत्यर्थमारोपितद्युत्वादिगुणकथनादित्यर्थः ॥

'स्वाध्यायवदवचनात्' इत्यत्राह—

विद्यावचनमसंयोगात् ॥ ३८ ॥

विद्यायाः अर्थप्रकाशनस्य अवचनम् अध्ययनवदनभ्यासः मन्त्राणामविवक्षितार्थत्वे लिङ्गं न भवति। कुतः, असंयोगात् तदानीं लौकिकावघातादिक्रियायाः संनिहितत्वेऽपि तस्या यज्ञसंयोगाभावात्। 'यज्ञकर्म प्रधानम्' इति नवमाद्याधिकरणन्यायेन यज्ञसंयुक्ताया एव अवघातादिक्रियाया मन्त्रप्रकाश्यत्वात् ॥

'अविज्ञेयात्' इत्यत्राह—

सतः परमविज्ञानम् ॥ ३९ ॥

परमित्यव्ययं युक्तमित्यर्थे 'खलः प्रमाद्यतु परं सज्जने तदसांप्रतम्' इति यथा। 'सृण्येव जर्भरी' इत्यादिमन्त्रेषु सतः विद्यमानस्यैवार्थस्य तज्ज्ञानोपायभूतनिगमनिरुक्तव्याकरणाद्यध्ययनाभावे सति युक्तमविज्ञानम्। नैतावता तदर्थस्यासत्यत्वं वक्तुं शक्यम्, 'न ह्येष स्थाणोरपराधो यदेनमन्धो न पश्यति' इति न्यायात् ॥ अधीतनिगमनिरुक्तव्याकरणादिकलापस्य सुलभो हि तत्रार्थावबोधः। तथा हि—'उभाउनूनन्तदिदर्थयेथे' इति सूक्तमाश्विनम्, 'अश्विनोः काममप्रा' इति सूक्तान्ते उपसंहारात्। तत्रेयमृगाम्नायते 'सृण्येव जर्भरी तुर्फरीतू नैतोशेव तुर्फरी फर्फरीका[1]। उदन्यजेव जेमना मदेरू ता मे जराय्वजरं मरायु' इति। सृणिरङ्कुशः। तत्र साधू सृण्या गजौ। प्रथमाद्विवचनस्य आकारश्छान्दसः। ताविव बलवन्तौ। जर्भरी। भृञो यङन्तात्पचाद्यच्। यङो लुक्। छान्दसोऽभ्यासस्य जकारो विभक्तेरीकारश्च। स्वानुग्राह्याणामतिशयेन भर्तारौ। तुर्फरीतू शत्रूणां हिंसितारौ। 'तुर्फ' हिंसायाम्। औणादिकं रूपम्। नैतोशेव। नितोशतिर्वधार्थकः। पचाद्यजन्तात्स्वार्थे अण्। प्रथमाद्विवचनस्याकारश्छान्दसः। योधाविव तुर्फरीतू इत्यन्वयः। तुर्फरी त्वरमाणौ। त्वरेरौणादिकं रूपम्। प्रथमाद्विवचनस्य ईकारश्छान्दसः। फर्फरीका शोभमानौ। फर्फेरौणादिकं रूपम्। प्रथमाद्विवचनस्याकारश्छान्दसः। उदन्यजा। उदन्या पिपासा चातकस्य विवक्षिता। तया च प्रावृट्कालो लक्ष्यते। प्रावृषि जातौ। विभक्तेराकारश्छान्दसः। जेमना जेमानौ उदकलाभेन पिपासाया जेतारौ। छान्दसं रूपम्। मदेरू मत्तौ चातकाविव स्थितौ। ता

1. पर्फरीका—इति ऋग्वेदपुस्तकेषु दृश्यते।

तौ । विभक्तेराकारश्छान्दसः । प्रसिद्धौ युवां, मे मम, जरायु जराधर्मकं मरायु मरणधर्मकं शरीरम् अजरं जरामरणरहितं कुरुतमिति ।

'अनित्यसंयोगात्' इत्यत्राह—

उक्तश्चानित्यसंयोगः ॥ ४० ॥

प्रतियुगमनुवर्तमाना वैश्रवणादयः प्रवाहनित्यतया नैव वेदस्य अनित्यतामापादयन्तीत्येवं प्रथमे पादे 'परं तु श्रुतिसामान्यमात्रम्' इत्यत्र अनित्यसंयोगः अदोषत्वेनोक्तः ॥

तदेवं मन्त्राणां विवक्षितार्थत्वे न्यायमुपन्यस्य बाधकानि च लिङ्गानि शिथिलीकृत्य साधकमपि लिङ्गमस्तीत्याह—

लिङ्गोपदेशश्च तदर्थवत्[1] ॥ ४१ ॥

चकार उक्तसमुच्चये। 'आग्नेय्यर्चाग्नीध्रमुपतिष्ठते' इत्यादौ आग्नेयीत्वादिविशेषणोपादानेन मन्त्राणामुपदेशोऽपि विधिरपि, तत् मन्त्रजातम् अर्थवत् विवक्षितार्थकमिति गमयति । अविवक्षितार्थकत्वे हि 'आग्नेय्या' इत्येवं देवतातद्धितनिर्देशोऽनुपपन्नः स्यात् । मन्त्रान्प्रति हि देवतात्वं तत्प्रतिपाद्यत्वमेव, न तु जातिविशेषः । तथा सत्यौषसं[2] सूक्तं पित्र्यं सूक्तमित्यादौ देवतातद्धितानुपपत्तेः ॥

मन्त्राणां विवक्षितार्थकत्वे लिङ्गान्तरमाह—

ऊहः ॥ ४२ ॥

चेत्यनुवर्तते । प्रकृतावाम्नातमन्त्रगतपदस्य विकृतावर्थान्तराभिधानाय तदुचितपदान्तरप्रक्षेप ऊहः । सोऽपि तावत्कचित्प्रतिषिध्यमानो मन्त्राणां विवक्षितार्थत्वे लिङ्गम् ॥ तथा हि— अस्ति ज्योतिष्टोमे अग्नीषोमीयपशौ अद्भिरनुमार्ष्टि कश्चित्प्रैषः 'दैव्याः शमितारः' इत्यादिः । तत्रैवं पठ्यते 'अन्वेनं माता मन्यतामनु पिता' इति । एनं संज्ञपनाय नीयमानं पशुं तस्य पिता अनुमन्यतां माता चानुमन्यतामित्यर्थः । तत्रेदमामनन्ति 'न माता वर्धते न पिता' इति । तत्र पशुमातापित्रोः शरीरस्य वृद्धिरशक्यत्वान्न निषेद्धुं शक्यते । अतस्तत्प्रतिपादकस्य मातृशब्दस्य पितृशब्द-

1. तदर्थत्वात्. 2. औषधं—क, ख, ग.

स्य च वृद्धिः प्रतिषेद्धव्या। तद्वृद्धिश्च द्विबहुपशुषु विकृतिषु प्रसक्तास्ति। सा च न वर्णान्तरोपजननात्, तथा सति पदान्तरत्वापातात्। नाप्युच्चैरुच्चारणात्. उच्चैस्त्वस्य नादधर्मत्वेन शब्दवृद्धावनुपयोगात्। अतो द्विबहुपशुषु विकृतिषु 'एनम्' इत्यस्य 'एनौ' 'एनान' इतिवत् मातृशब्दस्य पितृशब्दस्य च द्विवचनबहुवचनान्तत्वेन अर्थगताधिक्यद्वारा शब्दवृद्धिरूप ऊहः प्रसक्तः प्रतिषिध्यत इति वक्तव्यम्। प्रसक्तिश्च मातृशब्दस्य पितृशब्दस्य च प्रकृतौ विवक्षितार्थत्वे सत्येव घटते, नान्यथा। क्वचिदूहप्रतिषेधश्च सर्वेषां मन्त्राणां विवक्षितार्थत्वं गमयति। अधिकरणप्रयोजनपरं चेदं सूत्रम्। मन्त्राणां विवक्षितार्थत्वे सत्येव विकृतिषु तदर्थाभिधाननिबन्धन ऊहः सिध्यति, नान्यथेत्यर्थः। अत्र 'तस्माद्दधं नोहेत्' इत्यप्युदाहार्यम्।

लिङ्गान्तरमाह—

विधिशब्दाश्च ॥ ४३ ॥

चशब्द उक्तसमुच्चये। तदर्थवदित्यनुषज्यते। विधिः विधानं व्याख्यानं तदर्थाः शब्दा मन्त्रव्याख्यानाय प्रवृत्ता वाक्यशेषा अपि तत् मन्त्रजातं विवक्षितार्थमिति गमयन्ति। [1]दर्शपूर्णमासयोर्गार्हपत्योपस्थाने विनियुक्तोऽस्ति मन्त्रः 'अग्ने गृहपते' इत्यादिः। तत्र 'शतं हिमाः' इति पठ्यते। तदेतत्साकाङ्क्षम्। हिमा इति पदं च दुर्बोधार्थकम्। तदेतद्वाक्यशेषो व्याचष्टे 'शतं त्वा हेमन्तानिन्धिषीयेति वावैतदाह' इति। 'वाव' इति वाक्यालंकारे। हेमन्तानिति संवत्सरोपलक्षणम्। शतं संवत्सरांस्त्वां परिचरेयमिति मन्त्र आहेति तदर्थः। मन्त्राणामविवक्षितार्थत्वे तु तद्व्याख्यानासांगत्यं स्पष्टमेव। तस्माद्विवक्षितार्था मन्त्राः। एवं च मन्त्राणां श्रुतिलिङ्गादिप्रमाणप्राप्तक्रत्वङ्गभावानां व्यापारं विना स्वरूपेण क्रत्वङ्गत्वानुपपत्तेः व्यापाराकाङ्क्षायामुच्चारणमदृष्टार्थत्वादुपेक्ष्य अर्थाभिधानमेव शाब्दबोधरूपमनुष्ठेयार्थस्मरणमनुष्ठानरूपदृष्टप्रयोजनार्थत्वाद्व्यापारत्वेनाङ्गीक्रियते। तदेतत् 'अग्नये जुष्टं निर्वपामि' इत्यादिकरणमन्त्रेषु सूपपादम्। एवं च 'तां चतुर्भिरादत्ते' इत्यादितृतीयाविभक्तिरुपपन्ना भवति। यत्र तु स्वरसतो नानुष्ठेयक्रियावगतिः, अथ च विनियुज्यते 'इषे त्वोर्जे त्वेति शाखामाच्छिनत्ति' इत्यादिना; तत्रापि 'छिनद्मि' इत्यध्याहारेणानुष्ठेयक्रियाभिधानं संभावनीयम्। क्रियमाणानुवादिषु 'युवा सुवासाः' इत्यादिषु यूपपरिव्याणादिक्रियाया दीर्घकालव्यासक्तत्वेन कदाचिन्मध्ये 'परिवीरसि' इति परिव्याणमन्त्रजन्यस्मरणविच्छेदे प्रसक्ते सति तत्स्मृतिदार्ढ्यार्थं स्मारकापेक्षायामनुष्ठेयस्मृतिदार्ढ्यहेतुत्वेन अर्थाभिधानमर्थवत्। कर्मणः स्मारकानपेक्षायामपि मन्त्राकाङ्क्षयैव तदाकाङ्क्षोत्थापनान्न दोषः। अत एव 'युवा सुवासाः परिवीत आगादित्यन्वाह' इत्यादिविनियोगवचने आहेत्युपपद्यते। तस्य

1. तथाहि—दर्श...घ.

ब्रूआदेशत्वात्, [1]ब्रूत्रश्चाभिधानार्थत्वात्, 'ब्रूञ् व्यक्तायां वाचि' इति स्मरणात्, वचेश्च परिभाषणार्थत्वात्। परिभाषणं चाभिधानम्। 'अग्ने महा ँ असीत्याह' इत्यादिब्राह्मणेषु आहशब्दोपनिबन्धात्तथाविधमन्त्राणामप्यभिधानार्थता। तदुक्तं तन्त्रसारे 'इत्याहोपनिबन्धश्च मन्त्राणां दृश्यते विधिः। ब्रूआदेशश्चाहशब्दः सोऽभिधानाभिधायकः॥' इति। तत्र 'अग्नेरहं देवयज्ययान्नादो भूयासम्' इति हुतानुमन्त्रणादिमन्त्रेषु कृतस्य यागादेरकृतत्वशङ्काविच्छेदाय कृतत्वप्रत्यवेक्षार्थापेक्षितानुष्ठितकर्मस्मृतिदार्ढ्यहेतुत्वकल्पनादभिधानस्य दृष्टार्थता। यत्र तु 'यज्ञस्य घोषदसि' इत्यादिगार्हपत्याभिमन्त्रणादिमन्त्रेष्वर्थाभिधाने किंचिदपि न दृष्टमुपलभ्यते, तत्रादृष्टमेव कल्प्यते। नैतावतैषां[2] दृष्टार्थत्वहानिः, अर्थाभिधानमादाय तदुपपत्तेः। न च तेषामुच्चारितमात्राणां साक्षादेवादृष्टार्थत्वमस्तु, किमर्थाभिधानस्य द्वारत्वकल्पनयेति वाच्यम्। 'अनुमन्त्रयते' इत्यादिश्रुतिबलादेव तदर्थाभिधानस्यावश्यकत्वात्। अत एव 'मन्त्रमुच्चारयन्नेव मन्त्रार्थत्वेन संस्मरेत्। शेषिणं तन्मना भूत्वा स्यादेतदनुमन्त्रणम्॥ उद्देश्याभिमुखत्वे तु स्यात्तदेवाभिमन्त्रणम्। उपस्थितिस्तु बोधः स्याद्बोधान्तोच्चारणं जपः॥' इति तल्लक्षणमाहुः। ये तूपस्थानं समीपावस्थानमिति मन्यन्ते, ते 'इति गार्हपत्यमुपतिष्ठते' इत्यादिद्वितीयाविरोधादुपेक्ष्याः। इति मन्त्रेण गार्हपत्यं जानीयादित्यर्थः। स्तोत्रशस्त्रादिमन्त्राणामपि स्तौतिशंसतिशब्दाभ्यामभिधानार्थता। प्रगीतमन्त्रसाध्यगुणनिष्ठगुणाभिधानं स्तुतिः। अप्रगीतमन्त्रसाध्यगुणनिष्ठगुणाभिधानं शस्त्रमिति प्रसिद्धेः। यद्यपि स्तुतशस्त्राधिकरणे स्तोत्रशस्त्रयोरदृष्टार्थत्वं वक्ष्यते, तथापि तयोरभिधानात्मकयोरदृष्टार्थत्वेऽपि तन्मन्त्राणामभिधानरूपदृष्टार्थत्वं न विरुध्यते। हुंफडादिस्तोभानामपि कात्यायनादिकृतस्तोभभाष्यरीत्या अर्थाभिधानार्थता। अभिधानं तु [3]स्तोत्रशस्त्रादिवददृष्टार्थम्। यद्यपि नवमे स्तोभानामनर्थकत्वं वक्ष्यते, तथापि सामयोनिभूतया ऋचा एकवाक्यत्वाभावाभिप्रायकं तदित्यदोषः। तदेवं कृत्स्नस्य मन्त्रभागस्य विवक्षितार्थत्वं सिद्धम्। अत्रेदं प्रतिभाति। अस्मिन्नधिकरणे तदर्थशास्त्रादित्यादिपञ्चदशभिः सूत्रैर्मन्त्रा अर्थप्रत्यायका इत्येतावदवगतम्। मन्त्रार्थप्रतिपत्तिः मन्त्रप्रयोक्तुर्वा मन्त्रश्रोतुर्वेत्येतत्तु सूत्राक्षरतः स्पष्टं न निर्धारितम्। तत्रानुष्ठानहेतुभूतानुष्ठेयस्मरणार्थत्वं करणमन्त्राणां वदन्तो भाष्यवार्तिकादिकृतो मन्त्रप्रयोक्तुरेव मन्त्रजन्यं शाब्दबोधं मन्यन्ते। तत्तु वयं न मृष्यामहे, किंतु श्रोतुरेव मन्यामहे। शब्दोच्चारणस्य परं प्रत्येव शाब्दबोधजनकत्वस्वाभाव्यात्। न हि स्वस्मिन्नेव शाब्दबोधाय वाक्यप्रयोगोऽर्थवान्भवति, वक्तुस्तदर्थावबोधस्य शब्दप्रयोगात्पूर्वमवश्यं भावित्वात्। न ह्यबुद्धेऽर्थे वाक्यरचना युज्यते। सूत्रकारोऽपि 'अविशिष्टस्तु वाक्यार्थः' इति लौकिकस्य वैदिकस्य च वाक्यस्य अर्थावबोधं निर्विशेषं ब्रुवन् श्रोतुरेव मन्त्रजन्यं शाब्दबोधमभ्युपगच्छति। अन्यथा लोके श्रोतुः शाब्दबोधः, मन्त्रेषु तु उच्चारयितुरिति वैरूप्यापत्तेः।

1. ब्रूत्रश्च वचनार्थत्वात्—क. 2. नैतावता तेषां—क, घ. 3. स्तोत्रशस्त्रवत्—क, ग.

किंच श्रोतुरेव मन्त्रतः शाब्दबोध इत्ययमर्थो मन्त्रगतपदशक्त्यैव स्पष्टं लभ्यते। प्रायेण हि सर्वे मन्त्राः संबोध्यविषयाः। तथा हि—'इषे त्वोर्जे त्वा' इत्ययं मन्त्रः शाखाच्छेदने विनियुक्तः। तत्र साकाङ्क्षत्वात्त्वाशब्दस्य संबोध्यैकविषयत्वाद्विनियोगबलाच्च 'शाखे छिनद्मि' इत्यध्याहार्यम्। शाखे इति संबोधने प्रथमा 'संबोधने च' इति व्याकरणसूत्रेण विहिता। संबोधनं ज्ञापनम्। इषे त्वोर्जे त्वा छिनद्मीति शाखां प्रति ज्ञाप्योऽर्थः। मन्त्रं प्रयुञ्जानो ज्ञापयति। तज्ज्ञात्वा शाखा अनुजानाति। शाखाशब्देन हि तदभिमानिनी देवता अभेदेनोपचर्यते। ततश्च च्छेदनस्य तज्ज्ञापनस्य च तत्रान्वयो न विरुध्यते। 'अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम्' इति बादरायणसूत्रे तद्भाष्यादौ च स्पष्टमेतत्। 'विष्णो हव्यं रक्षस्व' इत्यादौ तु सूपपादमेतत्। ननु देवताविग्रहचैतन्यादिकं नवमे निराकरिष्यते। सत्यं निराकरिष्यत उत्सूत्रं भाष्यकृता, न तु सूत्रकृता। प्रत्युत सूत्रकारस्य देवताविग्रहादिकमभिमतं वार्तिकाभिमतं चेति [1]षाष्टतिर्यगधिकरणे प्रपञ्चयिष्यते। किंच स्तोत्रशस्त्रीया ऋचो देवतास्तुतिपराः स्तुत्यदेवताः प्रत्येव तदुणबोधिकाः। स्तुतिवाक्यानां स्तुत्यं प्रत्येव बोधकत्वस्य लोकसिद्धत्वात्। लोके हि स्तोता गद्यपद्यादिभिः स्तुत्यं स्तौति। स्तुत्यश्च तत्कृतं चमत्कारं जानानः प्रसीदति। वेदेऽपि तथा भाव्यम्। न च सामानि गातुः शस्त्राणि च शंसितुः अग्निवायुसूर्यादिस्तुत्यगुणबोधं स्तोत्रीयाः शस्त्रीयाश्च ऋचः शक्नुवन्ति कर्तुम, 'अग्न आयाहि वीतये' इत्यादिसंबोधनविभक्त्यनुपपत्तेः। किंच शस्त्रीयाणामृचां सांतत्यं विहितम 'संततमन्वाह' इति। पूर्वपूर्वस्या ऋच उत्तरमुत्तरमर्धर्चं प्रणवान्तमुक्त्वा अविरतमेवोत्तरोत्तरस्या ऋचः पूर्वपूर्वमर्धर्चमुक्त्वा विरमतीति सांतत्यलक्षणम्। न ह्येवं शंसितुः होतुः प्रत्यृचमर्थावबोधः कथमपि संभवति। तत्तद्गवसाने तत्तदर्थावबोधव्यापृतचित्तस्य उत्तरोत्तरस्या ऋचः सांतत्येन स्फुरणासंभवात्। तत्तत्स्तुत्यदेवताया एव प्रत्यृचमर्थावबोधे तु न किंचिद्विरुध्यते। किंच द्वादशस्य तृतीये 'मन्त्राणां करणार्थत्वान्मन्त्रान्तेन कर्मादिसंनिपातः स्यात्सर्वस्य वचनार्थत्वात्' इत्यधिकरणे करणमन्त्रेषु मन्त्रान्तेन कर्मादिसंनिपातः सिद्धान्तितः। मन्त्रार्थस्मरणस्य प्रयोक्तृगतस्यानुष्ठानहेतुत्वे च आदौ मन्त्रोच्चारणं ततोऽनुष्ठेयार्थस्मरणं ततोऽनुष्ठानमिति क्रमः स्यात्। ततश्चानुष्ठेयार्थस्मरणेन व्यवहितत्वात्कथं मन्त्रान्तेन कर्मादिसंनिपातो घटेत। मन्त्रबोध्यदेवताया एव मन्त्रतः शाब्दबोधाभ्युपगमे तु न कश्चिद्विरोधः। न चैवं सति करणमन्त्राणामदृष्टार्थत्वापत्तिः, देवतागतशाब्दबोधस्य मन्त्रजन्यस्यानुष्ठानहेतुत्वाभावादिति वाच्यम्। देवतागतं शाब्दबोधमादायैव दृष्टार्थत्वसंभवात्, जपानुमन्त्रणादिमन्त्रेषु कर्मसमवेतानभिधायिषु तथैवाभ्युपगतत्वाच्च। न च श्रोतृदेवतागतशाब्दबोधस्य कथं दृष्टत्वम्, देवतानामप्रत्यक्षत्वादिति वाच्यम्। तर्हि लोकेऽपि वाक्यस्य परप्रत्यायकतया दृष्टत्वानुपपत्तिः, परबुद्धेरप्रत्यक्षत्वात्। अनुमानादिना लोके परस्मिन् शाब्द-

1. षष्ठे तिर्यगधिकरणे—क, घ.

बोधस्य दृष्टत्वमिति चेत्, वेदेऽपि तुल्यम्; देवतासंबोधनादिलिङ्गात्तस्य तदुपपत्तेः। 'देवानां परिषूतमसीत्याह। यद्वा इदं किंच। तद्देवानां परिषूतम्। अथो यथा वस्यसे प्रतिप्रोच्याहेदं करिष्यामीति। एवमेव तदध्वर्युर्देवेभ्यः प्रतिप्रोच्य बर्हिर्दाति। आत्मनो हिंसायै', 'अग्नाविष्णू मावामवक्रमिषमित्याह। अग्निः पुरस्तात्। विष्णुर्यज्ञः पश्चात्। ताभ्यामेव प्रतिप्रोच्यात्याक्रामति', अग्निꣳ होतारमिह तꣳ हुवे इति देवेभ्य एव प्रतिप्रोच्य यज्ञेन यजते', 'यदाह। ब्रह्मन्नश्वं मेध्यं भन्त्स्यामि देवेभ्यः प्रजापतये तेन राध्यासमिति। ब्रह्म वै ब्रह्मा। ब्रह्मण एव देवेभ्यः प्रजापतये प्रतिप्रोच्याश्वं मेध्यं बध्नाति। न देवताभ्य आवृश्च्यते। वसीयान्भवति' इत्यादिवाक्यशेषा अप्यत्रानुकूलाः। इयांस्तु विशेषः। लोके वाक्यरचनस्य प्रयोक्तृपुरुषाधीनत्वादज्ञाते चार्थे वाक्यरचनायोगात्प्रयोक्तुरर्थज्ञानं नान्तरीयकमस्ति। न तु तत्प्रयोक्तृतात्पर्यविषयीभूतम्, [1]परप्रत्यायनेऽछयैव वाक्यप्रयोगात्। मन्त्राणां त्वपौरुषेयत्वेन नित्यसिद्धतया तत्प्रयोक्तुरर्थज्ञानं नावश्यकम्। तथा चाव्युत्पन्नस्यापि मन्त्रप्रयोगो न विरुध्यते। न हि वक्तुरर्थज्ञानमपि श्रोतुर्वाक्यार्थबोधे प्रयोजकम्। अव्युत्पन्नपुरुषशुकशारिकाद्युदीरितकालिदासादिरचितगद्यपद्येभ्यो व्युत्पन्नानां शाब्दबोधदर्शनात्। 'देवदत्त घटमानय' इत्यत्र संबोधने प्रथमा। संबोधनमभिमुखीकृत्य ज्ञापनम्। ज्ञानं श्रोतरि, ज्ञापनं प्रयोक्तरि। ततश्चाभिमुखीभूतदेवदत्तनिष्ठं यद्घटानयनज्ञानं तदनुकूलः प्रयोक्तृगतव्यापारो वाक्यार्थः। एवंविधबोधश्च संबोध्यस्य तदितरेषां श्रोतॄणां प्रयोक्तुश्च संभाव्यमानोऽपि न सर्वेषां कार्यकारी। संबोध्यगतं घटानयनज्ञानमेव कार्यकारि, अन्यथा देवदत्तेत्यस्य वैयर्थ्यात्। एवमत्रापि। न च च्छान्दोग्यब्राह्मणे 'यो ह वा अविदितार्षेयच्छन्दोदैवतब्राह्मणेन मन्त्रेण याजयति वाध्यापयति वा' इत्युपक्रम्य 'तस्मादेतानि मन्त्रे मन्त्रे विद्यात्' इति विधानात्प्रयोक्तुरप्यर्थज्ञानमावश्यकमिति वाच्यम्। न ह्यत्र देवताज्ञानं वाक्यार्थज्ञानरूपं विधेयम्, व्युत्पन्नस्य मन्त्रोच्चारणादेव तत्सिद्धेः; ऋषिच्छन्दोविषये तदसंभवाच्च। किंत्वस्य मन्त्रस्याग्निर्देवता इन्द्रो देवतेत्येवं व्युत्पन्नाव्युत्पन्नसाधारण्येन देवतापरिज्ञानमात्रमृषिच्छन्दोज्ञानवद्विवक्षितम्। तच्च कात्यायनादिप्रणीतसर्वानुक्रमणिकादिग्रन्थतो मन्त्रार्थज्ञानाभावेऽपि सुलभमेव। प्रयोक्तुर्मन्त्रार्थज्ञानस्यावश्यकत्वे देवताज्ञानविधिवैयर्थ्यादपि न प्रयोक्तुस्तदावश्यकमिति प्रतीमः। अत एव चोपनीयमानस्य वटोरुपनीतमात्रस्य च मन्त्रविधयः संगच्छन्ते। न हि तस्य मन्त्रार्थज्ञानं कथमपि संभाव्यते। अस्य मन्त्रस्येयं देवतेत्येतावन्मात्रं तु कथंचिदपि ग्राहयितुं शक्यते। ग्राहयन्ति च शिष्टाः। यथा 'गायत्र्या विश्वामित्र ऋषिः गायत्री च्छन्दः सविता देवता' इत्यादि। अत एव च सर्वाङ्गोपसंहरणाय प्रवृत्तेषु कल्पसूत्रेषु कापि मन्त्रार्थ-

1. परप्रत्यायनायैव—क, घ.

स्मरणमङ्गतया नोपनिबद्धम्। न च तेषु ऋषिच्छन्दोज्ञानस्याप्यनुपबन्धादङ्गत्वं न स्यादिति वाच्यम्। इष्टापत्तेः। न हि कर्मकाले प्रतिमन्त्रमृष्यादिज्ञानं तत्र विवक्षितम्, शस्त्रीयास्वृक्षु सांतत्येन शस्यमानासु तदसंभवात्। किंतु बहिर्भूतं याजयित्रध्यापयितृपुरुषयोग्यताविधायकं तत्। किंच संकर्षकाण्डे चतुर्थस्य तृतीये 'यस्यै देवतायै हविर्गृहीतं स्यात्तां ध्यायेद्वषट्करिष्यन्' इति वाक्यमुदाहृत्य इतिहासपुराणमन्त्रार्थवादप्रत्यायितदेवतारूपध्यानमत्र विवक्षितमिति पूर्वपक्षयित्वा आग्नेयमैन्द्रमित्यादौ देवताप्रतिपादकस्य अग्न्यादिशब्दस्य श्रवणात् तस्य च प्रथमोपस्थितस्य त्यागे प्रमाणाभावाच्छब्दे कार्यासंभवे सत्येवार्थे कार्यविज्ञानात् इह च शब्दे ध्यानसंभवादेवताशब्दस्यैव ध्यानमिति सिद्धान्तितम। तथायेन मन्त्रे मन्त्रे विद्यादित्यत्रापि देवताशब्दध्यानस्यैव विवक्षितत्वान्मन्त्रजन्यवाक्यार्थज्ञानरूपं तदिति दूरापास्तम्। न च मन्त्रजन्यशाब्दबोधस्य देवतागतस्यानुष्ठेयक्रियानुपयोगात्करणमन्त्रत्वव्यवहारोच्छेदः, 'इति शाखामाच्छिनत्ति' इत्यादावितिकरणावगतकरणत्वविरोधः, 'चतुर्भिरध्रिमादत्ते' इत्यादौ तृतीयाविरोधश्चेति वाच्यम्। प्रयोक्तुरर्थज्ञानाभ्युपगमेऽपि तुल्यत्वात्। 'इषे त्वा' इति मन्त्रो हि साकाङ्क्षः 'शाखे छिनद्मि' इत्यध्याहारेण शाखाच्छेदनप्रकाशकः। तदध्याहारश्च 'इति शाखामाच्छिनत्ति' इति विनियोजकवाक्यलभ्यः। एवं चादौ विनियोजकवाक्यत एव शाखाच्छेदनेऽवगते पुनर्मन्त्रतस्तत्स्मरणस्यादृष्टार्थत्वमवश्यमास्थेयम्। एवं च मन्त्रजन्यार्थस्मरणस्य अनुष्ठेयक्रियास्वरूपनिष्पत्तावनुपयोगात्कथं तद्द्वारा मन्त्राणां करणत्वसंभवः। तस्मादतिशयविशेषवत्त्वेन छेदनाद्युत्पत्तौ मन्त्राणां साधनतया तृतीयाश्रुत्यादेरविरोध उपपाद्यः। अन्यथा 'रथघोषेण [1]माहेन्द्रस्य स्तोत्रमुपाकरोति' इत्यादौ तृतीयायाः का गतिः। 'व्यृद्धं वा एतद्यज्ञस्य यदयजुष्केण क्रियते। इमामगृभ्णन्रशनामृतस्येत्यधिवदति यजुष्कृत्यै यज्ञस्य समृद्धयै। संभृत्या एव संभाराः कर्तव्यं यजुः यज्ञस्य समृद्धयै' इत्यादिवाक्यशेषा अप्यत्रानुकूलाः। न च मन्त्रजन्यशाब्दबोधस्य प्रयोक्तृगतत्वाभावे दृष्टोपकाराभावादूहोच्छेद इति वाच्यम्। न ह्यूहे शाब्दबोधस्य दृष्टार्थत्वमपि प्रयोजकम्, शाब्दबोधसामान्ये तस्य व्यापारात्। किंतु प्राकृतस्य वैकृतार्थाभिधानशक्त्यभावस्तत्र बीजम्। तथा च 'अग्नये वो जुष्टं प्रोक्षामि' इति प्राकृतस्याग्निदेवत्यव्रीहिप्रोक्षणमन्त्रस्य अग्निं प्रति व्रीहिप्रोक्षणज्ञापने समर्थस्य सौर्यैष्टौ सूर्यदेवत्यव्रीहिप्रोक्षणाभिधानेऽशक्त्या अग्निपदस्य स्थाने सूर्यपदं प्रक्षेप्यम्। 'न माता वर्धते न पिता। तस्माद्दधं नोहेत्' इत्यादृहदर्शनमत्रैव लिङ्गं भवति। अनुमन्त्रणादिमन्त्रा अपि तत्स्तुत्यदेवताया एव शाब्दबोधजनकाः, न तु प्रयोक्तुः। 'प्रस्थिता गा अनुमन्त्रयते—अभिसंधाय मन्त्रं जपति' 'स्फ्यमभिमन्त्रयते—अभिमृश्य मन्त्रं जपति, अभिमुखेनाभिसंधाय वा जपति' इति कल्पभाष्यकृतः। 'मन्त्रमुच्चारयन्नेव मन्त्रार्थत्वेन

1. माहेन्द्रस्तोत्रम्—क.

संस्मरेत् । शेषिणं तन्मना भूत्वा' इति लक्षणस्य प्रामाणिकत्वेऽपि संस्मरेदित्यनेन वाक्यार्थविधया मन्त्रजन्यज्ञानं न विवक्षितम् । किंतु मन्त्रार्थत्वप्रकारकमेव विवक्षितम् । तच्च विनियोगबलादव्युत्पन्नस्यापि सुलभम् । अत एव मन्त्रोच्चारणतदर्थस्मरणयोः [1]समानकालकत्वबोधकस्य 'उच्चारयन्नेव' इति शतुरुपपत्तिः । 'इति गार्हपत्यमुपतिष्ठते' इत्यस्य च इति मन्त्रेण गार्हपत्यमुपेत्य तद्गुणान्प्रख्यापयतीत्यर्थः । 'तदाहुर्नाग्निरुपस्थेयः कः श्रेयांसं सुप्तं बोधयिष्यति' इत्यादिवाक्यशेषश्चेह लिङ्गम् । 'उपस्थितिस्तु बोधः स्यात्' इत्यत्र च ण्यन्ताद्धि ज्ञापनमुच्यते । वस्तुतस्तु समीपं प्राप्यावस्थानमुपतिष्ठतेरर्थः । मन्त्रेण गार्हपत्यमुपेत्य तिष्ठतीत्यर्थः । अतस्तत्रापि मन्त्रार्थज्ञानं न प्रयोक्तुर्विवक्षितम् । तथा च कर्मकाले कल्पसूत्रादितो विनियोगमात्रं जानानस्य अर्थज्ञानशून्यस्यापि मन्त्रप्रयोगः सिद्धः । मन्त्रार्थज्ञानपूर्वकमनुष्ठाने त्वभ्युदयः । 'योऽर्थज्ञ इत्सकलं भद्रमश्नुते' इति श्रवणात् । 'स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थम्' इत्यादिनिन्दा तु नहिनिन्दान्यायेन ज्ञानप्रशंसार्थेति निरुक्ते यास्काचार्यैः स्पष्टमेवाभिहितम् । एतेन 'मन्त्रार्थज्ञो जपञ्जुह्वत्तथैवाध्यापयन्द्विजः । स्वर्गं लोकमवाप्नोति नरकं तु विपर्यये' इत्यादापि व्याख्यातम् ॥

इति प्रथमाध्याये द्वितीयः पादः ॥

1. समानकालार्थ—क.

तृतीयः पादः ॥

निर्मथ्य निगमसिन्धून्विविधन्यायाभिधानमन्थानैः ।
धर्मसुधामुद्धरते भूयो मुनये नमोऽस्तु जैमिनये ॥

प्रमाणाध्यायेऽस्मिन्प्रथमपादे साक्षाद्धर्मप्रमाणत्वादादौ विधिभागस्य प्रामाण्यं विचार्य द्वितीयपादे तदेकदेशभूतयोरर्थवादमन्त्रभागयोः प्रामाण्यं विशिष्य विचारितम् । इदानीं वेदमूलकस्मृतिपुराणेतिहासकल्पसूत्राचारादिप्रामाण्यं विचार्यते । यद्यपि नामधेयभागस्यापि वेदैकदेशत्वात्तद्विचारानन्तरमेव स्मृत्यादिविचारो युक्तः तथापि नामधेयभागस्याल्पत्वान्मन्त्रार्थवादमूलकस्मृतिपुराणवचसां बहुलत्वात्तत्प्रामाण्यविचारात्प्राङ्मन्त्रार्थवादमूलकस्मृत्यादिविचार एव [1]तदुपजीव्यकत्वाद्युज्यते । नामधेयभागस्तु न स्मृत्यादिमूलमिति वैषम्यम् ।

तत्राष्टकादिस्मृतिः प्रमाणं न वेति संशये, पूर्वपक्षयति—

धर्मस्य शब्दमूलत्वादशब्दमनपेक्ष्यं स्यात् ॥ १ ॥

स्मृतिवाक्यजातं धर्मप्रमाणतया अनादरणीयं स्यात् । कुतः । धर्मस्य शब्दमूलत्वात् धर्मस्य वेदैकप्रमाणकत्वात् स्मृतिवाक्यानां च पौरुषेयत्वात् । ननु तेषां वेदमूलकतया धर्मे प्रामाण्यमस्तु, तत्राह—अशब्दमिति । स्मृतिवाक्यजातं मूलभूतवेदवाक्यरहितम्, अतो वेदमूलकतयापि न तेषां प्रामाण्यसंभवः, तन्मूलभूतवेदवाक्यानां श्रावणान्यप्रत्यक्षागोचरत्वात्, श्रावणप्रत्यक्षस्य च अपठ्यमानेषु तेष्वप्रसरात्, पठ्यमानत्वे च स्मृतिप्रणयनवैयर्थ्यात् । स्मृतयस्तु न तल्लिङ्गं भवितुमर्हन्ति, तासां श्रुत्यविनाभावाभावात् । स्मृतयः प्रमाणमित्येवंविधागमोऽपि कृतकश्चेन्न विस्रम्भणीयः । नित्यस्तु नोपलभ्यते । उपमानं त्वदृष्टे दृष्टासदृशे चार्थे न प्रसर्तुमीष्टे । अर्थापत्तिरपि स्मर्तॄणां मन्वादीनां संभवद्भ्रमप्रमादकतया अप्रामाण्यस्याप्युपपत्तेः अन्यथानुपपत्त्यभावान्न संभवत्प्रसरा । अतः षष्ठप्रमाणगोचरत्वमेव स्मृतीनां धर्मे प्रामाण्यस्य ॥

१. स्मृतिप्रामाण्याधिकरणम् ।

इति प्राप्ते, सिद्धान्तयति—

---

1. तदुपजीवकत्वात्—क.

अपि वा कर्तृसामान्यात्प्रमाणमनुमानं स्यात् ॥ २ ॥

अपि वेति पूर्वपक्षव्यावृत्तौ । श्रुतिमूलकतया स्मृतिः प्रमाणं स्यात्, यतः स्मृतिमूलभूत-श्रुतावनुमापकं लिङ्गमस्ति स्मृतिरेव । ननु संभवद्भ्रमप्रमादमूलकत्वात्स्मृतेः कथं तथाविधश्रुत्यनुमापकता; तत्राह—कर्तृसामान्यादिति । 'धन्वन्निव प्रपा असि' 'स्थलयोदकं परिगृह्णन्ति' इत्यादि-मन्त्रार्थवादात्मकास्मदादिप्रत्यक्षवेदमूलकस्मृतिविहितकर्मसु अस्मदाद्यनुपलब्धवेदमूलकस्मृतिविहित-कर्मसु च तत्कर्तृणां सकलवैदिकशिष्टानां वेदमूलकतया दृढपरिगृहीतस्मृतिविहितत्वस्य समानत्वा-दित्यर्थः । न हि वेदमूलकतया सकलवैदिकशिष्टपरिग्रहणं स्मृतेर्भ्रान्त्यादिमूलकतया वेदमूलकत्वाभा-वे घटते । तथा च अष्टकादि कर्म वेदमूलकं भवितुमर्हति, वेदमूलकतया वैदिकदृढपरिगृहीतस्मृ-तिविहितत्वात्, अस्मदादिप्रत्यक्षवेदमूलकस्मृतिविहितप्रपादिवत् इति प्रयोगो बोध्यः । एवमितिहा-सपुराणाद्यप्युदाहार्यम् । इति स्मृत्यधिकरणम् ॥

'औदुम्बरीं स्पृष्ट्वोद्गायेत्' इति प्रत्यक्षश्रुतिविरुद्धा 'औदुम्बरी सर्वा वेष्टयितव्या' इति स्मृतिः प्रमाणमप्रमाणं वेति संशयः । प्रत्यक्षश्रुतिविरुद्धापि स्मृतिः प्रमाणम्, पूर्वाधिकरणन्यायेन

२. श्रुतिप्राबल्या-धिकरणम् ।

अनुमितवेदमूलकत्वात् । न ह्यनुमितेत्येवानुमिता श्रुतिर्दुर्बला प्रत्यक्षेत्येव प्रत्यक्षा प्रबला । बाधिताबाधितार्थकत्वमेव हि तत्र बीजम् । न चे-हान्यतरत्र तत्संभवः, उभयोरपि प्रत्यक्षानुमितयोः श्रुतित्वाविशेषात् । तथा च षोडशिग्र-हणाग्रहणबह्वीहियववच्च विकल्प इति प्राप्ते, सिद्धान्तयति—

विरोधे त्वनपेक्षं[1] स्यादसति ह्यनुमानम् ॥ ३ ॥

तुरष्टकादिस्मृतिवैषम्ये । प्रत्यक्षश्रुतिविरोधे सति अनपेक्षं मूलप्रमाणानपेक्षं श्रुतिवाक्य-मेव प्रमाणं स्यात् न तु स्मृतिवाक्यम्, तस्य मूलश्रुत्यपेक्षत्वात् तथाविधश्रुतौ च प्रमाणाभावात् । ननु स्मृत्या श्रुतिरनुमीयताम्; तत्राह—असति ह्यनुमानमिति । असति हि प्रत्यक्षविरोधे अनुमानमुदेति । अस्ति चात्र प्रत्यक्षश्रुतिविरोधः । तथा च वह्नावौष्ण्यप्रत्यक्षेणेव शैत्यानुमानस्य स्पर्शनश्रुतिप्रत्यक्षेण सर्ववेष्टनश्रुत्यनुमानस्य बाधिततया सर्ववेष्टनश्रुतेर्गगनकुसुमायमानत्वात्स्पर्शन-सर्ववेष्टनयोरभित्तिचित्रायितो विकल्पः । ग्रहणादिविषये तु तच्छास्त्रयोः प्रत्यक्षत्वाद्विकल्पो युक्तः ॥

इतोऽपि सर्ववेष्टनश्रुतिरप्रमाणमित्याह—

हेतुदर्शनाच्च ॥ ४ ॥

1. अनपेक्ष्यं ।

लोभादिना हेतुना सर्ववेष्टनस्मृतेः प्रवृत्तिसंभवादित्यर्थः । सर्ववेष्टनस्य महतैव वाससा साध्यत्वात्तद्ग्रहणलोभेन सर्ववेष्टनस्मृतिः प्रवृत्ता स्यात् । अतो लोभादिमूलिका एवंजातीयका स्मृतिरप्रमाणम् । चकारोऽभ्युच्चये । प्रत्यक्षश्रुतिविरोधे सति स्मृत्यनुमानस्यानुन्मेषे पूर्वसूत्रेण वर्णिते परिशेषादेव यथोचितं लोभादिमूलकत्वकल्पनस्य सिद्धेः ॥

अत एव वाधिकरणान्तरपरमस्तु । तथा हि—सन्ति ज्योतिष्टोमे वैसर्जनाख्या होमाः 'वैसर्जनानि जुहोति' इति । तत्र 'अध्वर्यु यजमानोऽन्वारभते यजमानं पत्नी पत्नीमितरे पुत्रभ्रातरोऽहतेन वाससा संप्रच्छन्ना भवन्ति' इति विहितं वासः प्रकृत्य स्मरन्ति 'वैसर्जनीयं वासोऽध्वर्युर्गृह्णाति' इति । तदिदं वैदिकपरिगृहीतत्वात्प्रत्यक्षश्रुतिविरोधाभावाच्च प्रमाणम् । न च सर्ववेष्टनादिस्मृतिवल्लोभादिमूलकल्पनसंभवः । तत्र हि प्रत्यक्षविरोधात्तथा कल्पनम् । न चात्र तद्विरोधोऽस्ति येन तथा कल्प्येत । संभावनामात्रेण च लोभादिमूलकत्वकल्पनायां दानविषयस्मृतिमात्रस्य प्रामाण्योच्छेदापत्तिः । अत एवंजातीयकं स्मरणं प्रमाणम् । इति प्राप्ते, सिद्धान्तयति—

३. दृष्टमूलकस्मृत्यप्रामाण्याधिकरणम् ।

हेतुदर्शनाच्च ॥ ४ ॥

चोऽप्यर्थे । प्रत्यक्षश्रुतिविरुद्धा स्मृतिरप्रमाणमित्युक्तम् । एषा स्मृतिस्तदविरुद्धापि न प्रमाणम् । कुतः । हेतुदर्शनात् । उक्तोऽर्थः । [1]प्रकीर्णकतया पठ्यमानत्वेन वैसर्जनस्मृतेर्लोभादिमूलकत्वकल्पनसंभवेऽपि मन्वादिप्रणीताष्टकादिसहपठिततया दानादिस्मृतीनां न लोभादिमूलकत्वावकाशः । ततश्च वस्त्रलोलुपेन केनचिदध्वर्युणा प्रवर्तितेयं स्मृतिरप्रमाणम् । तदेवं प्रत्यक्षश्रुतिविरुद्धं लोभादिमूलकमपि स्मरणमप्रमाणमिति भाष्यानुयायी पन्थाः ॥

तत्र प्रत्यक्षश्रुतिविरुद्धं स्मरणमप्रमाणमिति प्रथमाधिकरणमनुपपन्नम् । तथा हि—औष्ण्यशैत्ययोः स्वरूपेण परस्परविरोधित्वाद्ह्रदावौष्ण्यप्रत्यक्षेण शैत्यानुमानबाधो युज्यते । स्पर्शनश्रुतिप्रत्यक्षेण तु सर्ववेष्टनश्रुत्यनुमानस्य बाधो न संभवति, तयोः श्रुत्योः स्वरूपेण विरोधाभावात् । अर्थतो विरोधस्तु सर्ववेष्टनश्रुत्यनुमानोत्तरकालिकस्फूर्तिको न तदनुमानप्रवृत्तिं बाधितुं क्षमते, विरोधस्य तदानीमलब्धात्मकत्वात् । प्रवृत्ते तु तदनुमाने प्रत्यक्षानुमितश्रुत्योरुभयोरपि श्रुतित्वाविशेषात्सन्नप्यर्थतो विरोधो युगपदेव तदनुष्ठानद्वयं बाधते, स्पर्शनसर्ववेष्टनयोर्युगपत्कर्तुमशक्यत्वात् । कस्मिंश्चित्प्रयोगे स्पर्शनं प्रयोगान्तरे सर्ववेष्टनमित्येवं कालभेदेन

1. प्रकीर्णतया—ख.

तदुभयानुष्ठानं तु निर्बाधमेव, विरोधाभावात् । तथा च व्रीहियवादिशास्त्रवत्कालभेदेन स्पर्शनसर्ववेष्टनश्रुत्योरपि प्रामाण्यं निर्बाधमिति सर्वदा तदप्रामाण्यवर्णनमनुपपन्नम् । तथा द्वितीयाधिकरणमप्यनुपपन्नम, प्रकीर्णकस्मृतीनामपि सकलवैदिकशिष्टैर्धर्मबुद्धया तदर्थानुष्ठानस्याद्रियमाणतया दानादिस्मृतिवत्प्रामाण्यस्यावश्याङ्गीकार्यत्वादित्यादिदूषणान्युद्भाव्य सूत्रद्वयमिदमन्यथा योजितं वार्तिके । तद्यथा—प्रथमसूत्रे अनुष्ठाने इत्यध्याह्रियते । प्रमाणमिति पूर्वसूत्रादनुवर्तते । श्रुतिस्मृत्योर्विस्रम्भाविस्रम्भाभ्यामनुष्ठानविरोधे सति विस्रम्भानपेक्षं प्रत्यक्षश्रुतिवाक्यमेवानुष्ठाने प्रमाणम्; न तु स्मृतिः, तस्या मूलभूतश्रुत्यपेक्षत्वात् । मूलभूतश्रुतिप्रत्यक्षस्य च परकीयतया तद्विस्रम्भविषये मूलानुसंधानापेक्षत्वात् । विस्रम्भणीयस्वप्रत्यक्षश्रुतिवाक्ये असति स्मृतिमूलश्रुतिप्रत्यक्षस्य परकीयस्य विस्रम्भविषये अनुमानं मूलानुसंधानं क्लिष्टमपेक्ष्यते । स्वप्रत्यक्षस्य हि विस्रम्भणीयत्वात् तस्मिन्सत्यनुष्ठानप्रतीतिः स्वारसिकी । परकीयप्रत्यक्षस्य तु विस्रम्भमूलानुसंधानसापेक्षत्वात्तस्मिन्सति नैवम् । अस्ति चात्र विस्रम्भणीया स्वप्रत्यक्षा श्रुतिः । अतः सैवानुष्ठाने प्रमाणं यावत्स्मृतिमूलश्रुतिः प्रत्यक्षतो नोपलभ्यते । तदुपलम्भोत्तरं तु द्वयोरपि व्रीहियवादिश्रुतिवद्विकल्प आदर्तव्यः । ततश्च कदाचित्फलतः अप्रामाण्यं प्रत्यक्षश्रुतिविरुद्धस्मृतेरिति सिद्धम् । हेतुदर्शनादिति सूत्रमप्यत्रैवार्थे युक्त्यन्तरपरं योज्यम्—स्मर्तृणां सर्ववेष्टनश्रुतिप्रत्यक्षे सत्यपि न्यायाभासात्मकहेतुदर्शनसंभावनया विस्रम्भः प्रतिबध्यत इति ॥

तदेवं योजनायामनुष्ठानपदाध्याहारे गौरवं मत्वा वर्णकान्तरं वर्णितं वार्तिके । तद्यथा—यानि वैदिकैः शिष्टैरपरिगृहीतानि शाक्यादिनिबन्धनानि त्रयीविपरीतार्थानि अहिंसासत्यवचनशमदमदानादिप्रतिकञ्चुकच्छायाबहुलानि सांख्ययोगपाञ्चरात्रादीनि च धर्मशास्त्राभासानि तेषां प्रत्यक्षादिमूलकतया प्रामाण्यं निराकृतं तर्कपादे 'सत्संप्रयोगे पुरुषस्येन्द्रियाणाम्' इत्यादिसूत्रे वार्तिके । इदानीं संभावितवेदमूलकतया प्रामाण्यं तेषां निराकर्तुमधिकरणमिदमारभ्यते । मन्वादिस्मृतिवत्तेषामप्यस्ति वेदमूलकतया प्रामाण्यम् । न च तन्मूलश्रुतीनां मन्वाद्यदृष्टतया कथं तत्प्रामाण्यमिति वाच्यम् । मन्वादिदृष्टवेदचतुष्ट्याद्भिन्नप्रस्थानानामेव वेदानां तत्र मूलत्वसंभवात् । न च 'चत्वारो वेदाः' इति लोकवेदप्रसिद्धिविरोधः, प्रसिद्धेर्मन्वादिदृष्टमात्राभिप्रायकत्वात् । सर्वदा च प्रवाहनित्यतया मन्वादिस्वीकारान्नानित्यसंयोगः । अत एव 'यद्वै किंच मनुरवदत्' इत्यादि संगच्छते । अस्तु वा चत्वार एव वेदा इति; तथापि वेदमूलकत्वमेषां न विरुध्यते । ऋग्यजुःसामवेदेषु हि धर्मबोधकेषु असंख्येयाः शाखाः सन्ति । तत्र काश्चिदेव ऋषिभिर्दृष्टाः । नहि सर्वा अपि शाखाः पुरुषायुषेणापि कथमपि केनचिद्द्रष्टुं शक्याः, आनन्त्याच्छाखानामल्पत्वाच्च पुरुषायुषस्य । अत एव भरद्वाजस्य महानुभावस्यापि सर्ववेदाध्ययनाय[1] सगर्वं प्रवृत्तस्य कतिपयशाखाध्ययनमा-

1. अध्ययने—क, ग.

त्रेण जराप्रवृत्तिमनधीतानां च शाखानामानन्त्यादशक्याध्ययनत्वं च दर्शयति काठकश्रुतिः—"भरद्वाजो ह त्रिभिरायुर्भिर्ब्रह्मचर्यमुवास। त ँ ह जीर्ण ँ स्थविर ँ शयानमिन्द्र उपव्रज्योवाच, भरद्वाज यस्ते चतुर्थमायुर्दद्यां किमेनेन कुर्या इति। ब्रह्मचर्यमेवैनेन चरेयमिति होवाच। त ँ ह त्रीन्गिरिरूपानविज्ञातानिव दर्शयांचकार। तेषा ँ हैकैकस्मान्मुष्टिमाददे। स होवाच। भरद्वाजेत्यामन्त्र्य। वेदा वा एते। अनन्ता वै वेदाः। एतद्वा एतैस्त्रिभिरायुर्भिरन्ववोचथाः। अथ त इतरदननूक्तमेव" इति। अन्ववोचथाः अधीतवानसि। अननूक्तम् अनधीतम्। स्पष्टमन्यत्। तथा च मन्वाद्यदृष्टवेदमूलकत्वसंभवादेषामस्ति प्रामाण्यम्। यद्यपि वेदा अप्रमाणमित्यभ्युपगच्छद्भिः शाक्यादिभिस्तद्ग्रन्थानां वेदमूलकतया प्रामाण्यानङ्गीकारात्ते कथं वेदमूलकत्वमाशङ्केरन् तन्निराकरणाय वा किमर्थमधिकरणप्रवृत्तिः। तथापि न शाक्यादीनामियं शङ्का। किंतु वैदिकानामेव मध्ये केषांचिन्मन्दानामष्टकादिस्मृतिवत्तेषामपि वेदमूलकतया प्रामाण्यशङ्कया तत्परिग्रहः प्रसज्येतेति तामिमां शङ्कां मन्दविघ्न्यायेन निराकरोति— **विरोधे त्वनपेक्षं स्यादसति ह्यनुमानम्।** प्रमाणमित्यनुवर्तते। तुशब्दः शङ्काव्यावृत्तौ। शाक्यादिग्रन्थानां वैदिकशिष्टपरिगृहीतप्रत्यक्षश्रुतिविरोधे सति मूलान्तरानपेक्षं श्रुतिवाक्यजातमेव प्रमाणं न तु तद्विरुद्धशाक्यादिग्रन्थजातम्, पौरुषेयत्वात्। न च श्रुतिमूलकतया प्रामाण्यम्, मूलश्रुतौ प्रमाणाभावात्। ननु स्मृत्यैव श्रुतिरनुमीयताम्, तत्राह—असति ह्यनुमानमिति। असति हि प्रत्यक्षश्रुतिविरोधे मूलश्रुत्यनुमानमुदेतुमुत्सहेत। अयं भावः—वेदेषु दृढविस्रब्धमन्वादिस्मृतीनां तथाविधवैदिकदृढपरिग्रहान्यथानुपपत्त्या मूलश्रुतिकल्पकत्वं युज्यते। शाक्यादिग्रन्थेषु त्विदं विपरीतम्, वैदिकपरिग्रहाभावात् वेदविद्वेषिपरिग्रहाच्च। न च वैदिकपरिग्रहाभावेऽपि अहिंसादिकतिपयवैदिकार्थगन्धवासितत्वेन हेतुना मूलश्रुत्यनुमानं स्यादिति वाच्यम्। वेदविद्वेषिजनपरिग्रहेण वेदमूलकत्वव्यतिरेकस्य निश्चिततया हेत्वन्तरेणापि मूलश्रुत्यनुमानाप्रवृत्तेः। सांख्ययोगादिशास्त्रेषु वैदिकपरिग्रहो यदंशेऽस्त्युपासनादिविषये तदंशे प्रामाण्यमिष्टमेव। यदंशे तु प्रपञ्चसत्यत्वमिथ्यात्वद्वैताद्वैतादिविषये[1] विहितस्य [2]हिंसादोषास्तित्वादिविचारविषये च प्रत्यक्षश्रुतिविरोधोऽस्ति तदंशेऽप्रामाण्यमेव। पाञ्चरात्राद्यागमानां तु वैदिकविरुद्धवामागमप्रचुरत्वात्सर्वथैवाप्रामाण्यम्। 'भरद्वाजो ह त्रिभिः' इत्यादिः सावित्रार्थवादः। तत्रानन्तपदमेकविंशतिर्बाह्वृच्यमित्यादिशाखापरिमाणस्मृतिविस्मृतत्वपरमित्यदोषः। अत एव श्वेतकेतुं प्रकृत्य 'सर्वान्वेदानधीत्य' इति छान्दोग्यश्रुतिः संगच्छते। यदपि शाक्यादिनिबन्धनेषु पाञ्चरात्राद्यागमेषु च क्वचित्क्वचिद्वेदबोधितमेवाहिंसादिकमुपासनादिकं चोपनिबद्धं तदागमप्रचारसिद्ध्यर्थमेवोपनिबद्धमिति तदनुष्ठानं वैदिकानां न तन्मूलकतया, किंतु वेदमूलकतयैवेति। तदेवं

1. विचारविषये—क, ग. 2. हिंसादोषास्तित्वनास्तित्वादि—क, ग.

शाक्यादिग्रन्थानामविगीतवैदिकशिष्टपरिग्रहाभावाद्वेदविद्वेषिजनपरिग्रहाच्च न वेदमूलकतया प्रामाण्यम्। इतोऽपि तेषामप्रामाण्यमित्याह—हेतुदर्शनाच्च। असद्धेतुदर्शनाच्चेत्यर्थः। शाक्यादिभिर्हि स्वप्रतिपाद्यानि सर्वाणि हेतुभिरेव प्रायेणोपन्यस्यन्ते "अष्टका पितृदैवत्या इत्ययं प्रसृतो जनः। अन्नस्योपद्रवं पश्य मृतो हि किमशिष्यति। यदि भुक्तमिहान्येन देहमन्यस्य गच्छति। दद्यात्प्रवसतः श्राद्धं न तत्पथ्यशनं भवेत्। निहतस्य पशोर्यज्ञे स्वर्गप्राप्तिर्यदीष्यते। स्वपिता यजमानेन किं नु तेन न हन्यते। जीवस्यावरणं देहो देहस्यावरणं कुतः। यदि तस्यापि कार्यं स्यात्तस्यापि ह्यनवस्थितिः। मलभाण्डं शुचि भवेद्बहिः क्षालनतः कथम्। गव्यं पयश्चेत्पीयेत मांसैः किमपराध्यते" इत्यादिना। न च मन्वादयः स्वप्रतिपाद्ये सर्वत्र हेतूनुपन्यस्यन्ति। न चैवं हेतुमूलकतयैव शाक्यादिग्रन्थानां प्रामाण्यं किं न स्यादिति वाच्यम्। तदीयहेतूनामसद्धेतुत्वेनासाधकत्वात्। अतोऽपि शाक्यादिग्रन्थानामप्रामाण्यमिति स्थितम्। इति विरोधाधिकरणम्॥

प्रत्यक्षश्रुतिविरोधे स्मृतीनां स्वरूपेणैव अप्रामाण्यं भाष्यकारमते, वार्तिककारमते त्वननुष्ठानलक्षणमप्रामाण्यमिति स्थितम्। संप्रति स विरोधः कास्ति नास्तीति विचार्यते। इदं स्मरन्ति

४. पदार्थप्राबल्याधिकरणम्।

'क्षुतजृम्भणादिनिमित्ते आचान्तेन कर्म कर्तव्यम्' इति। तथा च कर्ममध्येऽपि निमित्ते सत्याचमनं प्राप्यते। तथा 'यज्ञोपवीतिना कर्तव्यम्' इति स्मरन्ति। तथा च कर्ममध्ये यज्ञोपवीतस्य स्रंसनच्छेदादौ पुनर्धारणं प्राप्यते। तथा 'दक्षिणाचारेण कर्तव्यम्' इति स्मरन्ति। दक्षिणेन हस्तेनाचरतीति दक्षिणाचारः। कर्तृविशेषणस्यापि लोहितोष्णीषादिवद्विधिः। तथा च कर्मणि सव्यहस्तो निवर्तते। तदेवंजातीयकानि स्मरणानि किं प्रत्यक्षश्रुत्या विरुध्यन्ते न वा विरुध्यन्त इति संशये सिद्धान्तमुपाक्षिप्य निराकुर्वन्पूर्वपक्षी प्रत्यवतिष्ठते—

[1]शिष्टाकोपेऽविरुद्धमिति चेन्न शास्त्रपरिमाणत्वात्॥ ५॥

अहिनकुलवन्न श्रुतिस्मृत्योः स्वरूपेण विरोधः। किंतु तदर्थानुष्ठानयोरन्यतरेणान्यतरस्य बाधादेव तयोर्विरोधः। कर्ममध्ये च स्मार्ताचमनाद्यनुष्ठाने सति न कस्यचिच्छ्रौतपदार्थस्य अन्वाधानादिकस्य बाधोऽस्ति। अबाधाच्च न श्रुतिविरोधः। तथा च शिष्टस्य श्रुतिविहितस्य अकोपे स्मार्तपदार्थैरनुष्ठीयमानैरबाधे सति श्रुत्या अविरुद्धं भवत्याचमनादिस्मरणम्। अविरोधाच्च तत्प्रमाणमिति सिद्धान्ती मन्येत चेत्, तन्न। कुतः। शास्त्रपरिमाणत्वात्। परिमीयते अवगम्यत इति परिमाणम्। कर्मणि ल्युट्। श्रुत्यवगतत्वादित्यर्थः। स्मार्ताचमनादिविरुद्धानां क्रमकालपरिमाणा-

1. इदं सूत्रं अन्यत्र द्विधा विभज्य पठ्यते।

नामिति शेषः । तत्र क्रमस्तावत् 'वेदं कृत्वा वेदिं कुर्यात्' इत्यादिश्रुतिगम्य इति निर्विवादम् । वेदो नाम शयानवत्सजान्वाद्याकृतिविशिष्टो दर्भमुष्टिविशेषः । वेदिस्तु संमार्जनखननोद्धननादिसंस्कारविशेषैः परिष्कृता भूमिः । कालस्तु त्रिविधः प्रधानसंनिकर्षलक्षणः, प्रयोगप्राशुभावलक्षणः, पूर्वाह्णादिलक्षणश्च । तत्र पूर्वाह्णादिकालः 'पूर्वाह्णो वै देवानाम्' इत्यादिश्रुतिगम्य इति निर्विवादम् । इतरौ तु प्रयोगविधिना सर्वाङ्गसहितप्रयोगानुष्ठापकेन एकस्मिन्क्षणेऽसंभवात्साहित्यनिर्वाहार्थमाक्षिप्तत्वात्प्रयोगविधिगम्यौ । परिमाणं नाम प्रयोज्यपदार्थेयत्तारूपं तत्पदार्थविधिसंघातावगतम् । तच्च किं कश्चित्पदार्थो विस्मृतः किं वा सर्वमनुष्ठितमिति संशयनिराकरणाय प्रयोगविधिरपेक्षमाणः स्वीकरोति । अतस्तदपि प्रयोगविधिगम्यम् । तत्र यदि वेदवेद्यनुष्ठानमध्ये स्मार्तं क्षुतादिनिमित्तमाचमनमनुष्ठीयेत तदा क्रमः प्रधानसंनिकर्षश्च विरुध्येत, आचमनेन व्यवधानात् । तथा अनुष्ठेयपदार्थाधिक्याच्छ्रौतः पूर्वाह्णादिकालः परिमाणं च विरुध्येत । एवं वेदवेद्यनुष्ठानमध्ये दैवाद्यज्ञोपवीतच्छेदनस्रंसनादिनिमित्ते सति तस्य यथापूर्वकरणे क्रियमाणे क्रमकालौ विरुध्येते । तथा दक्षिणहस्तेनैव कर्मकरणे प्रयोगप्राशुभावो विरुध्येत इत्येवं यथायथमूह्यम् । तथा च श्रुतिविरोधादाचमनादिस्मृतिरप्रमाणमिति पूर्वः पक्षः । अत्र भाष्यादौ व्याख्यासौकर्याय सूत्रमिदं छित्त्वा चेदन्तं पृथगुपात्तम् । 'तदर्थशास्त्रात्' इत्यादिवत् । चेदन्तस्य साकाङ्क्षत्वेन वाक्यत्वानुपपत्तेः सूत्रान्तरत्वासंभवात् । अत एव 'विकारशब्दान्नेति चेन्न प्राचुर्यात्' इत्यादिबादरायणसूत्रं चेदन्तेनाविभक्तमेव पठित्वा व्याचख्युर्भगवत्पादाः । एवमग्रेऽपि द्रष्टव्यम् ॥

सिद्धान्तयति—

अपि वा कारणाग्रहणे प्रयुक्तानि प्रतीयेरन् ॥ ६ ॥

अपि वेति पूर्वपक्षव्यावृत्तौ । विरोधकारणस्य अनुष्ठानबाधस्य अग्रहणे अदर्शने सति शिष्टैः प्रयुक्तानि आचमनादीनि श्रौतक्रमाद्यविरुद्धत्वेन प्रतीयेरन् । विरोधबीजस्याचमनादिभिः [1]क्रमादिबाधस्याभावान्न विरोधोऽत्रेत्यर्थः । तथा हि—क्रमस्तावत्तत्तत्पदार्थगोचरप्रातिस्विकविधिभिर्न संबध्यते, अनाकाङ्क्षितत्वात् । किंतु प्रयोगविधिना । स हि सर्वपदार्थाननुष्ठापयन्क्रममपेक्षते । प्रयोगविधिश्चोत्पत्तिविध्युत्पादितान्विनियुक्तांश्च पदार्थाननुष्ठापयन् तेषु सर्वेषु प्राप्तेष्वात्मानं लभत इति निर्विवादम् । ततश्च श्रौतेषु स्मार्तेषु च पदार्थेषु सर्वेषु प्रवृत्तेषु प्रयोगविधिः प्रवर्तते । तस्मिंश्च प्रवृत्ते तदपेक्षितः क्रमः प्रवर्तमानो न तैः पदार्थैर्विरुध्यते । न च प्रयोगविधिः श्रौतसकलपदार्थप्राप्त्यैव लब्धात्मको न जघन्यप्रमाणकस्मार्तपदार्थप्राप्तिमपेक्षत इति वाच्यम् । समाख्यादिदुर्बलप्र-

1. क्रमबाधाभावात्—ख, घ.

माणकानारभ्याधीतशाखान्तरविहितयावदङ्गकलापप्राप्त्युत्तरमपि प्रयोगविधिप्रवृत्तेः शाखान्तराद्यधिकरणे वार्तिकादिषु व्यवस्थापयिष्यमाणत्वात्। एवं च स्मार्तपदार्थप्राप्तिमपि प्रयोगविधिरपेक्षत इत्यभ्युपेयम्। तथा प्रयोगप्राशुभावरूपस्य प्रधानसंनिकर्षरूपस्य च कालस्य प्रयोगविधिलभ्यत्वादविप्रतिपन्नं प्रयोगाङ्गत्वम्। पूर्वाह्णादिकालस्य चाकाङ्क्षावशात्प्रयोगविधिनैवान्वयो न तु तत्तत्पदार्थविधिभिरिति तस्यापि प्रयोगाङ्गत्वमित्येकादशद्वितीयाद्याधिकरणे व्यवस्था भविष्यति। ततश्च त्रिविधस्यापि कालस्य प्रयोगाङ्गत्वात्सकलपदार्थप्राप्त्यपेक्षत्वं सिद्धम्। परिमाणस्यापि प्रयोगविधिलभ्यत्वात्सकलपदार्थप्राप्त्यपेक्षत्वमविवादम्। न चैवं स्मार्तानामपि पदार्थानामनुष्ठाने पूर्वाह्णाद्यतिक्रमापत्तिः, तदनतिक्रमस्यापि कथंचित्संपाद्यत्वात्। अन्यथा भिन्नस्कन्नहोमादौ का गतिः। ततश्च क्रमकालपरिमाणानां श्रौतस्मार्तसकलपदार्थप्रवृत्त्युत्तरकालप्रवृत्तिकत्वात्कथं तैर्विरोधः? अविरोधाच्च कर्ममध्ये क्षुतादिनिमित्ते आचमनादिस्मरणं प्रमाणम्। इति प्रथमं वर्णकम्॥

अत्र क्रमादेः पदार्थगुणस्य पदार्थापेक्षया दुर्बलतया प्रबलैः पदार्थैर्दुर्बलक्रमादिबाधेन शाखान्तरोपसंहारस्य शाखान्तराधिकरणे व्यवस्थापयिष्यमाणत्वात्तेनैव गतार्थमिदमित्यस्वरसाद्विरोधमभ्युपगम्य प्रकारान्तरेण संशयमुद्भाव्याधिकरणमिदमुत्प्रेक्षितमाकरे। तद्यथा—श्रौतानि क्रमकालपरिमाणानि प्रबलप्रमाणगम्यतया स्मार्ताचमनाद्यर्थापेक्षया प्रबलानि, स्वरूपेण तु दुर्बलानि पदार्थान्प्रति गुणभूतत्वात्। स्मार्तास्त्वाचमनादिपदार्था दुर्बलप्रमाणगम्यतया श्रौतक्रमाद्यपेक्षया दुर्बलत्वेऽपि पदार्थत्वात्स्वरूपेण प्रबलाः। तदेवं प्रमाणप्रमेयबलाबलविसंवादे किं प्रमाणबलं ज्याय उत प्रमेयबलमिति संशयः। तत्र सिद्धान्तमुपक्षिप्य पूर्वपक्षी प्रत्यवतिष्ठते—**शिष्टाकोपेऽविरुद्धमिति चेन्न शास्त्रपरिमाणत्वात्।** प्रमेयबलस्य ज्यायस्त्वादुर्बलप्रमाणगम्यस्याप्याचमनादिपदार्थस्य स्वरूपतो बलवत्तरस्य श्रौतैरपि क्रमादिभिर्विरोधो[1] न युज्यते। ततश्च शिष्टैः श्रुतिविहितैः क्रमादिभिः पदार्थगुणैः स्मार्ताचमनादिपदार्थस्य अकोपे अबाधे सति तत्स्मरणं श्रुतिप्रमाणेन अविरुद्धं प्रतीयते। बलवतैव हि विरोधः श्रुतिप्रमाणं चात्र दुर्बलमिति सिद्धान्ती मन्यसे चेत्, तन्न। कुतः। शास्त्रपरिमाणत्वात्, क्रमादीनां श्रुतिसिद्धत्वात्, श्रुतेश्च प्रबलप्रमाणत्वात्, प्रमेयबलापेक्षया च प्रमाणबलस्य ज्यायस्त्वात्। स्वरूपतो दुर्बलैरपि प्रबलतरप्रमाणश्रुतिगम्यैः क्रमादिभिराचमनादि बाध्यत इति न तत्स्मरणं प्रमाणम्। तथा हि— प्रमेयबलात्प्रमाणबलं ज्यायः, प्रमेयावगमस्य प्रमाणाधीनत्वात्। न चैवमपि प्रमेयबलापेक्षया प्रमाणबलस्य उपस्थित्यलाभात्कथं तस्य ज्यायस्त्वमिति वाच्यम्। श्रुतिस्मृतिलक्षणं हि प्रमाणं न चक्षुरादिवदनवगतमपि प्रमेयावगतिहेतुः, किंत्ववगतमेव। ततश्च प्रमेयावगमात्पूर्वमेव श्रुतिलक्षणप्रमाणावगमावश्यंभावेन तदवगमदशाया-

1. बाधो—क.

मेव तद्गतबलाबलावगमात् श्रुतिस्मृतिप्रमाणबलाबलं प्रमेयबलावगमात्पूर्वमेवावगम्यते। ततश्चासंजात-विरोधिप्रथमोपस्थितिकेन श्रुतिबलेन स्मृत्यबलेन च क्रमादिप्राबल्ये आचमनादिदौर्बल्ये च निर्णीते सत्याकाङ्क्षाशान्तेः, पश्चात्स्मार्तप्रमेयबलस्यानादरः फलति । तस्मादाचमनादिस्मरणमप्रमाणमिति पूर्वः पक्षः। सिद्धान्तयति—**अपि वा कारणाग्रहणे प्रयुक्तानि प्रतीयेरन्** । अपि वेति पूर्वपक्षव्यावृत्तौ । स्मार्तप्रमेयाचमनादिबाधे कारणस्य प्रमाणबलस्य स्मार्तप्रमेयाचमनाद्यवगमात्पूर्वम् अग्रहणे अनवगमे सति तस्य ज्यायस्त्वाभावात् कर्ममध्ये स्मर्तृभिः प्रयुक्तानि आचमनादीनि आदरणीयतया प्रतीयेरन्। तथा हि— श्रुतिस्मृतिप्रमाणयोर्न स्वरूपेणाहिनकुलवद्विरोधः, किंतु विरुद्धप्रमेयप्रमापकतयैव । ततश्च प्रथमं प्रमाणस्वरूपालोचनेऽपि प्रमेयस्वरूपालोचनं विना विरोधस्याप्रतीतेः प्रमेयस्वरूपालोचनानन्तरमेव विरोधप्रतिसंधानं वाच्यम् । तत्र प्रमेयस्वरूपावगमवेलायां तद्गतबलस्यावगततया तेनासंजातविरोधिप्रथमोपस्थितिकतया अधिकेन स्मृतिप्रमेयबलेन आचमनादीनां श्रौतक्रमादिभिरबाध्यत्वे प्रत्युत तद्बाधकत्वे तत्स्मरणस्य च प्रामाण्ये निश्चिते सति तत एवाकाङ्क्षाशान्तेस्तदुत्तरमवगम्यमानमपि प्रमाणबलमकिंचित्करमेव भवति । न चैवमाचमनादिभिः क्रमादिबाधे श्रुतेरत्यन्तबाधापत्तिरिति वाच्यम् । तस्याचमनादिनिमित्तोपनिपाताभावे सावकाशत्वात् । तस्मात्सत्यपि विरोधे बलवद्विरोधाभावाद्युक्तमाचमनादिस्मृतीनां प्रामाण्यम् । इति द्वितीयं वर्णकम् ॥

तदिदमप्यनुपपन्नम्, क्रमादीनामाचमनादीनां च विरोधाभावस्य स्फुटमनुपदमुपपादितत्वेनाभ्युपगम्य विरोधं पूर्वपक्षप्रवर्तनायोगात् । एवमन्यान्यपि दूषणानि भाष्योत्प्रेक्षिते शिष्टाकोपाधिकरणद्वयेऽस्मिन्नुद्भाव्य वार्तिककारः सूत्रद्वयमन्यथा व्याचष्ट । तत्राद्यं सूत्रं पूर्वाधिकरणचोद्यनिराकरणपरगुणसूत्रतया व्याचख्यौ । 'अपि वा कारण' इत्यादि द्वितीयसूत्रं चाधिकरणान्तरपरतयायोजयत् । यथा—'विरोधे त्वनपेक्षं स्यात्' इति सूत्रे शाक्यादिग्रन्थानां वेदवादविरोधादप्रामाण्यमुपक्षिप्तम् । तत्राक्षिप्य समाधत्ते—**शिष्टाकोपेऽविरुद्धमिति चेन्न शास्त्रपरिमाणत्वात्** । शाक्यादिग्रन्थेषु यः अंशः वेदवादैर्विरुध्यते तत्राप्रामाण्यमस्तु। शिष्टाकोपे शिष्टं वेदोपदिष्टं न कोपयति न बाधते यः तस्मिन्नंशे तु अहिंसासत्यवचनशमदयावैराग्यध्यानाभ्यासादिधर्मबोधके प्रामाण्यमविरुद्धम् । तत्र वैदिकशिष्टपरिग्रहस्य मुख्यस्य प्रामाण्यहेतोः सत्त्वेन मन्वादिस्मृतिवत्प्रामाण्यावश्यंभावात् इति चेत्, तन्न । कुतः । शास्त्रपरिमाणत्वात् । परिमाणेति कर्मणि ल्युट् । धर्मप्रतिपादकशास्त्राणां परिमितत्वात् । याज्ञवल्क्यादिभिर्हि[1] धर्मस्थानानि परिगणितानि 'पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः। वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश' इत्यादिना। न च तदन्तर्गताः शाक्यादिग्रन्थाः । अतस्तत्र अहिंसादिवादा अपि श्वशराहादिचर्मदृतिनिक्षिप्तक्षीरघृतादिवद्धर्मप्रमाण-

1. हि शिष्टैः—क, ग.

तया नादर्तव्याः। ततश्च शाक्यादिग्रन्थेषु निबद्धमप्यहिंसादिकं न ततो ज्ञातं सदनुष्ठितं श्रेयसे भवति, किंतु वेदतस्तन्मूलकस्मृत्यादितो वा परिगणितादेव प्रमाणात्। न चाहिंसादिविषये तेषां संवादादेव प्रामाण्यं किं न स्यादिति वाच्यम्। एवं सत्यधिगतार्थविषयतया शाक्यादिग्रन्थानां सुतरां प्रामाण्यानुपपत्तेः। अत एवेदानींतनसंग्रहवाक्यावगतमपि वेदाविरुद्धमनुष्ठितं न श्रेयसे भवति। तदाहुर्भट्टपादाः—'यथैवान्यायविज्ञाताद्वेदाल्लेख्यादिपूर्वकात्। श्रमेणाधिगताद्वापि धर्मज्ञानं न संमतम। तथातिक्रान्तवेदोक्तमर्यादाव्यवहारिणाम। संवादिष्वपि वाक्येषु नेष्यते धर्महेतुता' इति। एतेन वेदाविरुद्धेष्वपि पाञ्चरात्रादिभागेषु धर्मप्रामाण्यं दूरत एव निरस्तम्, पाञ्चरात्रादीनां परिगणितेषु धर्मस्थानेष्वनन्तर्भावात्। तथा च मन्वादिस्मरणम् 'या वेदबाह्याः स्मृतयो याश्च काश्च कुदृष्टयः। सर्वास्ता निष्फलाः प्रेत्य तमोनिष्ठा हि ताः स्मृताः' इत्यादि। वेदबाह्याः वेदेषु तन्मूलकस्मृत्यादिषु परिगणितेष्वनन्तर्भूताः। तथा च पौराणिकाः—'स्वतन्त्रा आगमाः सर्वे निर्मूलाः परिकीर्तिताः। पाञ्चरात्रादिमार्गाणां वेदमूलत्वमास्तिके। न हि स्वतन्त्रास्ते तेन भ्रान्तिमूला निरूपणे। तथापि योंशस्तन्त्रेषु वेदैस्तु न विरुध्यते। सोंऽशः प्रमाणमित्युक्तं केषांचिदधिकारिणाम्। तस्माद्वै वेदबाह्यानां रक्षणार्थाय पापिनाम्। विमोहनाय शास्त्राणि करिष्यावो वृषध्वज। पाञ्चरात्रादयो मार्गाः कुण्डादीनां हितावहाः' इत्यादि। तदेवं पाञ्चरात्रादीनां वैदिकान्प्रत्यननुष्ठापकत्वान्न धर्मे प्रामाण्यमित्यन्यत्र विस्तरः। इति विरोधाधिकरणशेषः॥

वसन्तोत्सवादिसदाचाराः प्रमाणमप्रमाणं वेति संशयः। तत्राचाराणां स्मृतिवदेव वैदिकपरिग्रहादेः प्रामाण्यहेतोः सत्त्वेऽपि स्मृतिवन्मन्वादिभिरनिबद्धत्वादप्रामाण्यम्। यदि हि वसन्तोत्सवादिमूलश्रुतयो मन्वादीनां प्रत्यक्षाः स्युस्तदा अष्टकादिवदेव निबध्येरन्। यदि तेषामप्यप्रत्यक्षास्तर्हि तत्सत्त्वे प्रमाणाभावः। 'आचारश्चैव साधूनाम्' इत्यादि सामान्यतो निबन्धनं तु श्रुतिसंवाद्याचारप्रामाण्यपरं भविष्यति। किंच श्रुतिस्मृतिविरुद्धस्याप्यर्थस्य शिष्टैः पूर्वैरिदानींतनैश्चाचरणान्न तदाचाराणां प्रामाण्यसंभवः। तथा हि—'प्रजापतिरुषसमभ्यैत्स्वां दुहितरम्' इति प्रजापतेः स्वदुहितृगमनम्, इन्द्रस्याहल्यागमनम्, नहुषस्य शचीवाञ्छा, वसिष्ठस्य पुत्रशोकार्दितस्यात्महत्योपक्रमः, पुरूरवस उर्वशीवियोगादात्महत्योपक्रमः, विश्वामित्रस्य चण्डालयाजनम्, भीष्मस्यानाश्रमिणोऽवस्थितिः, तस्य दाशरथेश्चापत्नीकस्य क्रतुहरणम्, धृतराष्ट्रस्यान्धस्य यागः, युधिष्ठिरस्यार्जुनभार्यापरिणयः, तस्यैवाचार्यविप्रद्रोणवधार्थमनृतभाषणम्, अर्जुनस्य मातुलदुहितृसुभद्रापरिणयः, व्यासस्य गृहीतब्रह्मचर्यस्य भ्रातृभार्ययोरम्बिकाम्बालिकयोर्विधवयोर्धृतराष्ट्रपाण्डूत्पादनम्, तस्यैव दास्यां विदुरोत्पादनम्, इदानींतनामप्याहिच्छत्रमथुरानिवासिब्राह्मणानां सुरापानम्, उदीच्यानां केसर्यश्वतरखरोष्ट्रोभयतोदत्क्रयविक्रयभार्यानुपनीतसहभोजनम्, दाक्षिणात्यानां मातुल-

दुहितृपरिणयः आसन्दीस्थभोजनादीनि च, एवं [1]प्रतिपुरुषजातिकुलावस्थितान्यधर्माचरणान्यनन्तानि। [2]ततश्च श्रुतिस्मृतिविरुद्धान्याचरतां वसन्तोत्सवाद्याचारविषये कथं प्रामाण्यम्। किंच सदाचारानुष्ठातारः शिष्टाः शिष्टानुष्ठिताश्च सदाचारा इत्यन्योन्याश्रयात्सदाचारस्वरूपमेव दुर्निरूपम्। तस्मान्न सदाचाराणां धर्मप्रामाण्यमिति प्राप्ते सिद्धान्तयति— **अपि वा कारणाग्रहणे प्रयुक्तानि प्रतीयेरन्।** अपि वेति पूर्वपक्षव्यावृत्तौ। आचारप्रामाण्यविरोधकारणस्य उक्तदोषसमूहस्य अग्रहणे। निमित्तसप्तम्येषा। अग्रहणाद्धेतोः शिष्टैः प्रयुक्तानि वसन्तोत्सवाद्याचरणानि प्रमाणतया प्रतीयेरन्, पूर्वपक्षोक्तदोषाभावात्। आचारस्य प्रामाण्यमविरुद्धमिति यावत्। तथा हि—यदुक्तं मन्वादिभिर्विशिष्यानिबद्धाः सदाचारा इति तन्न। मन्वादिभिर्हि लाघविकैर्मूलश्रुतीर्विशिष्य दृष्ट्वैव 'सदाचारः प्रमाणम्' इति सामान्यतो निबद्धम्। न चैतावता कश्चिद्विरोधः। यदपि सामान्यनिबन्धनं प्रत्यक्षश्रुतिसंवाद्याचारविषयं भविष्यतीति, तदपि न। तथा सति श्रुत्यैव तदवगमसंभवेन निबन्धनवैयर्थ्यात्, 'वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम्। आचारश्चैव साधूनाम्' इति पृथगुपादानवैयर्थ्यात्, चकारवैयर्थ्याच्च। यत्तु प्रजापत्यादेर्विरुद्धाचरणमुपन्यस्तं तत् 'प्रजानां पतिरादित्यः उषसं प्रातःसंध्याम् [3]आदित्यादुद्भूतत्वेन स्वां दुहितरम् उद्यन्नभ्यैत्[4]' इत्येवमर्थान्तरपरतया, अमनुष्यत्वेन शास्त्रीयविधिनिषेधाविषयत्वाद्वा तेजोविशेषाद्वा तेषां न दोषावहम्; इतरेषां तु दोषावहमेवेति नातिप्रसङ्गः। उक्तं च भट्टपादैः—'श्रुतिसामान्यमात्राद्वा न दोषोऽत्र भविष्यति। मनुष्यप्रतिषेधाद्वा तेजोबलवशेन वा। यथा वा न विरुद्धत्वं तथैतद्गमयिष्यते' इति। प्रजापतीन्द्रनहुषाद्याचरणेषूदाहृतेषु विशिष्य दोषोद्धारस्तु वार्तिकादावनुसंधेयः। प्रत्यक्षवेदादिविहितानुष्ठातृत्वेन च शिष्टत्वस्यान्यतः सिद्धेर्नान्योन्याश्रयः। अतः सदाचारोऽपि धर्मे प्रमाणम्। इति सदाचाराधिकरणम्॥

इदमामनन्ति 'यवमयश्चरुर्भवति' 'वाराही उपानहावुपमुञ्चते' 'वैतसे कटे प्राजापत्यान्संचिनोति' इति। तत्र यववराहवेतसशब्दान्केचित्प्रियंगुवायसजम्बूषु प्रयुञ्जते। अन्ये तु दीर्घशूकसूकरवञ्जुलेषु प्रयुञ्जते। तत्र किमुभयत्र यवादिशब्दा मुख्याः अतश्च विकल्पः, उत दीर्घशूकादिष्वेव मुख्या अन्यत्र गौणाः अतश्च दीर्घशूकादय एव ग्राह्याः इति संशये, पूर्वपक्षयति—

५. शास्त्रप्रसिद्धपदार्थप्रामाण्याधिकरणम्।

[5]तेष्वदर्शनाद्विरोधस्य समा विप्रतिपत्तिः स्यात्॥ ७॥

तेषु शब्दार्थेषु प्रियंग्वादिषु दीर्घशूकादिषु च विप्रतिपत्तिः विविधा शब्दस्य प्रतिपत्तिः

1. प्रतिपुरुषजातिकालावस्थितानि—ख, ग. 2. तथा च—ख. 3. आदित्योद्भूतत्वेन—क, घ. 4. अभ्येति—ख, क, ग. 5. तेष्वदर्शनाद्विरोधस्येत्ययमंशः पूर्वसूत्रशेष इति केचित्।

समा स्यात् । यवादिशब्दानामुभयत्राभिधायकता मुख्येति यावत् । कुतः, विरोधस्य उभयत्रापि अदर्शनात् ततश्च प्रयोगद्वयस्यापि तुल्यबलत्वात् उभयेषामपि शब्दार्थत्वाध्यवसायाद्विकल्पेन ग्रहणम् ॥

इति प्राप्ते, सिद्धान्तयति—

शास्त्रस्था वा तन्निमित्तत्वात् ॥ ८ ॥

वाशब्द एवार्थः पूर्वपक्षव्यावृत्तौ । शास्त्रस्था शास्त्रानुसारिण्येव विप्रतिपत्तिः विशिष्टा प्रतिपत्तिः दीर्घशूकाद्यभिधायकता बलीयसी । कुतः । तन्निमित्तत्वात् शास्त्रस्य तन्निश्चायकत्वात् । यवान्हि प्रकृत्य वाक्यशेषः श्रूयते 'यत्रान्या ओषधयो म्लायन्ते अथैते मोदमाना इवोत्तिष्ठन्ति' इति । अतो दीर्घशूका यवा निश्चीयन्ते, अन्यौषधिम्लानिकाले वसन्ते दीर्घशूकानामेव मोदमानत्वात् प्रियंगूणां च शारदानां वसन्ते रूपगन्धस्याप्यभावात् । 'वराहं गावोऽनुधावन्ति' इति वाक्यशेषाद्वराहशब्दस्य सूकरार्थत्वं निश्चिनुमः । गावो हि सूकरं वत्सबुद्ध्यानुधावन्ति, न तु वायसम् । 'अप्सुजो वेतसः' इति वाक्यशेषाच्च वेतसशब्दस्य जलवृक्षवञ्जुलवाचकत्वमवसीयते[1], जम्ब्वाः स्थलवृक्षत्वात् । अतोऽत्र दीर्घशूकादीनामेव ग्रहणम् । इति यववराहाधिकरणम् ॥

तदिमानि भाष्योदाहृतान्यनुदाहरणानि, प्रियंग्वादिषु यवादिशब्दानां लोके सर्वत्राप्रसिद्धेः, यवादिष्वेव च प्रसिद्धेः, 'संदिग्धे तु वाक्यशेषात्' इत्यधिकरणे वाक्यशेषतो निर्णयस्य वक्ष्यमाणत्वेन तेनैव गतार्थत्वाच्च इत्यादिदूषणान्युद्भाव्य वार्तिककारो विषयान्तरे सूत्रद्वयमिदं योजयामास । यथा— पील्वादिशब्दानार्या वृक्षादिषु प्रयुज्यते, म्लेच्छा हस्त्यादिषु । तत्र किमार्यम्लेच्छप्रसिद्ध्योस्तुल्यबलत्वम् उतार्यप्रसिद्धिर्बलीयसीति संशये पूर्वपक्षयति— **तेष्वदर्शनाद्विरोधस्य समा विप्रतिपत्तिः स्यात्** । तेषु वृक्षादिषु हस्त्यादिषु च पील्वादिशब्दानां विविधा प्रतिपत्तिः प्रतिपादकता बलतः समा स्यात् । कुतः । विरोधस्य अदर्शनात् आर्यव्यवहारसिद्धस्य वृक्षादेर्वा म्लेच्छव्यवहारसिद्धस्य हस्त्यादेर्वा शब्दार्थतया अध्यवसाने विरोधाभावात् । शास्त्रप्रमाणके हि धर्मे शास्त्रपथातिवर्तिम्लेच्छापेक्षया [2]शास्त्रपथवर्तिनामार्याणामस्ति बलीयस्त्वम् । शब्दार्थस्य तु लोकव्यवहारगम्यत्वात्तद्विषये आर्यम्लेच्छप्रसिद्ध्योस्तुल्यबलत्वमेव । तथा च 'पैलवो दण्डः' इत्यत्र गजदन्तमयो वा वृक्षविशेषप्रकृतिको वा दण्डो ग्राह्यः इति प्राप्ते, सिद्धान्तयति— **शास्त्रस्था वा तन्निमित्तत्वात्** । वा शब्दः पूर्वपक्षव्यावृत्तौ । व्यवहाराच्छब्दार्थनिर्णये शास्त्रस्थाः शास्त्रानुवर्तिनः शिष्टा एव

1. अवधार्यते—क, घ. 2. शास्त्रपथानतिवर्तिनाम्—ख.

बलीयांसः। कुतः। तन्निमित्तत्वात् तस्मिन्व्यवहाराच्छब्दार्थनिर्णये तेषामेव हेतुत्वात्। तथा हि—न तावदेकस्य शब्दस्योभयार्थत्वं युज्यते, अनेकशक्तिकल्पनाप्रसङ्गात्, तथा सति प्रयुक्ते शब्दे अन्यतरनिर्धारणाभावेन व्यवहारानुपपत्तेश्च, अष्टदोषदुष्टविकल्पापत्तेश्च। तथा हि; पीलुशब्दप्रयोगे सति यदा हस्ती गृह्यते तदा वृक्षार्थत्वग्राहकप्रमाणे प्राप्तप्रामाण्यपरित्यागः अप्राप्तप्रामाण्यस्वीकारश्चेति दोषद्वयम्, पुनः प्रयोगे यदा वृक्षो गृह्यते तदा वृक्षार्थत्वग्राहकप्रमाणे परित्यक्तप्रामाण्यस्वीकारः स्वीकृताप्रामाण्यपरित्यागश्चेति दोषद्वयम्, हस्त्यर्थत्वग्राहकप्रमाणे च प्राप्तप्रामाण्यपरित्यागः अप्राप्ताप्रामाण्यस्वीकारश्चेति दोषद्वयम्, ततस्तृतीयवारं प्रयोगे यदा हस्ती गृह्यते तदा हस्त्यर्थत्वग्राहकप्रमाणे स्वीकृताप्रामाण्यपरित्यागः परित्यक्तप्रामाण्यस्वीकारश्चेति दोषद्वयम्, तदेवं पर्यायक्रमेण एकैकस्मिन्प्रमाणे चत्वारो दोषा इत्यष्टदोषदुष्टता विकल्पस्य स्यात्। म्लेच्छप्रयोगस्तु गौण्या वृत्त्यैवोपपद्यते। तेषां तत्र मुख्यत्वाभिमानस्त्वन्धपरंपरया भविष्यति। यत्र हि कश्चिदङ्गुल्या किंचिन्निर्दिश्य हस्तिनि पीलुशब्दं प्रयुङ्क्ते तत्र श्रोता उन्नततत्त्वसादृश्येन असौ प्रयुक्त इति गौणार्थं प्रतिपद्यते। तटस्थस्तु तयोर्व्यवहारं पश्यन्मुख्यत्वं भ्राम्यति, स च मुख्यतया परानपि बोधयतीत्यन्धपरंपरया मुख्यत्वाभिमानानुवृत्तिसंभवात्। न चैवं [1]सत्यक्षादिशब्देष्वपि नानार्थत्वं न स्यादिति वाच्यम्। देवनरथावयवेन्द्रियादिषु तेषामार्यप्रयोगस्य निर्विशेषत्वेनागत्या तत्र तथा स्वीकारात्। पील्वादिशब्दास्तु म्लेच्छैरेव हस्त्यादिषु प्रयुज्यन्ते, न त्वार्यैः। न च विनिगमनाविरहाच्छब्दार्थनिर्णये म्लेच्छादीनामपि नियामकतेति वाच्यम्। अभिनिवेशानभिनिवेशयोरेव विनिगमकत्वात्। तथा हि—शिष्टास्तावच्छब्दैकसमधिगम्यं धर्मं लिप्सवः अधर्मं च परिजिहीर्षवः श्रुतिमिव तदर्थतत्त्वं च विविच्य पालयन्तस्तत्राभिनिविशन्ते। म्लेच्छास्तु दृष्टार्थव्यवहारस्य यथाकथंचित्संभवे सति प्रयोजनाभावान्न तत्राभिनिविशन्ते। ततश्च विप्लवसंभवान्न म्लेच्छप्रसिद्धया शब्दार्थतत्त्वनिर्णयः; किंत्वार्यप्रसिद्धयैव निर्दोषया बलीयस्या शब्दार्थतत्त्वनिर्णयः इति पील्वादिशब्दा वृक्षादिवाचका एव। अतः 'पैलवो दण्डः' इत्यत्र वृक्षविशेषप्रकृतिकदण्डस्यैव ग्रहणम्, न तु गजदन्तदण्डस्येति सिद्धम्। इत्यार्यम्लेच्छाधिकरणम्॥

विषयान्तरे चेदं सूत्रद्वयं योजितं वार्तिककृता। यथा—'मातुलस्य सुतामूढ्वा मातृगोत्रां तथैव च। समानप्रवरां चैव त्यक्त्वा चान्द्रायणं चरेत्' इति शातातपादिस्मृतिनिषिद्धमातुलसुतापरिणयाद्याचाराः प्रमाणमप्रमाणं वेति संशयः। तदर्थं च स्मृत्याचाराणां विरोधे तुल्यबलत्वम्, उत स्मृतय एव बलीयस्यः इति चिन्त्यते। तत्र पूर्वपक्षयति—तेष्वदर्शनाद्विरोधस्य समा विप्रतिपत्तिः स्यात्। तेषु स्मृत्याचारेषु विप्रतिपत्तिः विशिष्टा अधिका प्रतिपत्तिः विप्रतिपत्तिः महत्त्वबुद्धिः।

1. सति हर्यक्षादि—क.

बलवत्तेति यावत्। सा समा स्यात्। कुतः। विरोधस्यादर्शनात्। न ह्याचारात्स्मृतीरनुमाय ताभिः श्रुतिरनुमीयते, येन तेषां द्वयन्तरितप्रामाण्यकतया साक्षाच्छ्रुत्यनुमापिकाभ्य एकान्तरितप्रामाण्यकाभ्यः स्मृतिभ्यो बलवत्ता विरुध्यते। नैवमस्ति, प्रमाणाभावात्। धर्मबुद्ध्या शिष्टपरिग्रहस्य श्रुतिकल्पकतावीजस्य स्मृतिष्वाचारेषु चाविशिष्टत्वादिति प्राप्ते, सिद्धान्तयति— **शास्त्रस्था वा तन्निमित्तत्वात्**। वाशब्दः पूर्वपक्षव्यावृत्तौ। मन्वादिधर्मशास्त्रगतैव बलवत्ता, न त्वाचारगता। कुतः। तन्निमित्तत्वात् आचाराणां वेदमूलकत्वस्य स्मृतिकल्पनद्वारकत्वात्। तथा हि—आचारास्तावन्न नित्यानुमेयश्रुतिकल्पकाः, अन्धपरंपराप्रसङ्गात्। किंतु स्मृतिवदेव कस्यचित्प्रत्यक्षाः श्रुतीः कल्पयन्ति। न चेदानींतनानामाचरितॄणां प्रत्यक्षस्वस्वशाखागतवाक्यान्यप्युपसंहर्तुमर्थतश्च प्रतिपत्तुमसमर्थानां तद्विषयेऽपि स्मृतिकल्पसूत्राण्यपेक्षमाणानामितस्ततो विप्रकीर्णपरःसहस्रशाखागततदुपसंहारदुर्बोधानन्तश्रुतिवाक्येषु प्रत्यक्षस्य तदर्थानुभवस्य वा संभावनाप्यस्ति। अतोऽर्वाचीनाचारेभ्यः साक्षान्न श्रुतिकल्पनम्, बाधितत्वात्। किंतु महर्षिभिरेव तादृशश्रुतिवाक्यान्युपलभ्य स्मृत्वा शिष्याणामुपदिष्टम्। तैरन्येषामाचाराः प्रवर्तिताः। तान्दृष्ट्वान्येऽप्याचरन्तीत्येवं परंपरया इदानींतनपर्यन्तमाचाराः प्रवृत्ता इत्यास्थेयम्। ततश्चाचाराणां स्मृतिकल्पनामुखेनैव श्रुतिकल्पकत्वेन द्वयन्तरितप्रामाण्यकतया स्मृतिभ्यो दुर्बलत्वम्। किंच, आचारेषु कर्मस्वरूपमात्रमवगतम्। कर्तव्यता तु विमर्शपूर्वकं लोभादिकारणान्तरसम्भावनाविरहकृतेन धर्मतया शिष्टपरिग्रहेण कल्पयितव्या। तां च कल्पयित्वा पश्चान्मूलकल्पनमिति विप्रकर्षः। सनिबन्धनासु स्मृतिषु तु झटिति ग्रन्थत एव कर्तव्यतावगम्यते। मूलमात्रं तु कल्पनीयमिति संनिकर्षाद्बलवत्ता। किंच, कामादिहेत्वन्तरसंभवान्न मातुलसुतापरिणयनाद्याचाराणां श्रुतिकल्पकत्वसंभावनाकथापि। 'मातुलस्य सुतामूढ्वा' इत्यादिस्मृतिविरोधादपि न तेषां श्रुतिकल्पकता। न च, भाष्यकारीयविरोधाधिकरणभङ्गावसरे श्रुतिविरुद्धानामपि स्मृतीनां प्रामाण्यं व्यवस्थापितं वार्तिके; तद्वत्स्मृतिविरुद्धानामप्याचाराणां प्रामाण्यं किं न स्यादिति वाच्यम्। तत्र विकल्पेनोभयानुष्ठानसंभवात्प्रामाण्यम्, इह तु वस्तुनि विकल्पासंभवान्न प्रामाण्यमिति वैषम्यात्। मातुलसुताद्याचाराणां हि श्रुतिविहितत्वेन प्रत्यवायकरत्वाभावो वक्तव्यः। निषेधबलाच्चावश्यं प्रत्यवायकरत्वं वक्तव्यम्। न चैतदुभयमेकत्र संभवति, विरोधात्। तत ईदृशस्थले विधिप्रतिषेधाभ्यां विकल्पो नाभ्युपगन्तुं युक्तः। क्रत्वर्थषोडशिग्रहणाग्रहणविषये तु निषेधेन ग्रहणस्य क्रतूपकारकत्वाभावो न बोध्यते; किंतु ग्रहणाभावस्य क्रतूपकारकतामात्रं बोध्यते। ततश्च तत्र विधिनिषेधाभ्यामेकस्यैव वस्तुनो [1]विरुद्धस्वरूपद्वयानापादनात्संभवति विकल्पः। एवं स्पर्शनसर्ववेष्टनादिष्वपि श्रुतिस्मृतिविरुद्धेषु क्रत्वर्थेषु विकल्पः संभवतीति वैषम्यम्। अतः स्मृतिविरुद्धाचाराणामक्रत्वर्थानां न प्रामाण्यम्। इति स्मृत्याचारविरोधाधिकरणम्॥

---

1. विरुद्धस्वभाव—क, ग, घ.

इतोऽपि विषयान्तरे सूत्रद्वयमिदं योजितं वार्तिके । यथा—यत्र त्रिवृदादिशब्देषु लोकवेदयोः शब्दार्थविप्रतिपत्तिः तद्विषयमिदं सूत्रद्वयम् । त्रिवृच्छब्दो हि लोके त्रिभिर्वर्ततेते इति व्युत्पत्त्या 'त्रिवृद्रज्जुः' 'त्रिवृद्ग्रन्थिः' इत्यादौ त्रैगुण्यवाचितया प्रसिद्धः । वेदे तु क्वचिच्छाखायाम् 'त्रिवृद्बर्हिष्पवमानम्' इत्युक्त्वा 'उपास्मै गायतानरः' इति नवर्चानुक्रमणात् 'नवभिः स्तुवन्ति' इति शाखान्तरे श्रवणाच्च स्तोत्रीयानवकपरता प्रतीयते । चरुशब्दस्तु लोके स्थाल्यां प्रयुज्यते 'चरुमग्नावधिश्रित्य तण्डुलानावपति' 'चरुर्भिन्नः' इत्यादौ । वेदे तु 'आदित्यः पयसि चरुः प्रायणीयः' इति विधाय 'आज्यस्यैनं चरुमभिपूर्य चतुर आज्यभागान्यजति । पश्चां स्वस्ति पुरस्तादग्निं दक्षिणतः सोमं पश्चात्सवितारमुत्तरतो मध्येऽदितिमोदनेन' इति क्रमदेशादिविधिपरे वाक्ये सिद्धवदोदनानुवादादोदनपरता विज्ञायते । आज्यस्येति करणस्य शेषत्वविवक्षया षष्ठी । आश्वबालशब्दश्चाश्वपुच्छकेशसंघाते अवयवव्युत्पत्त्या लोके प्रयुज्यते । वेदे तु 'आश्वबालः प्रस्तरः' इत्यधिकृत्य 'यज्ञो वै देवेभ्योऽश्वो भूत्वापाक्रामत् । सोऽपः प्राविशत् स वालधौ गृहीतः । स वालान्मुक्त्वा विवेश । ते वालाः काशा अभवन्' इति वाक्यशेषश्रवणात् काशपरता प्रतीयते । 'ऐक्षवी विधृती' इत्यत्र ऐक्षवीशब्दस्यावयवव्युत्पत्त्या इक्ष्ववयवपत्रादिपरता लोकतोऽवगम्यते । वेदे तु वाक्यशेषात्काशमूलपरता । तादृशवाक्यशेषस्तु वार्तिकबलादेव क्वचिदुन्नेयः । तथा स्तोमशब्दः 'ब्राह्मणस्तोमः' इत्यादौ समुदायमात्रे प्रयुज्यते लोके । वेदे तु 'पञ्चदशः स्तोमो भवति' इत्यादिसामानाधिकरण्यनिर्देशात्स्तोत्रीयासंख्याकृतस्तुतिसंख्यापरता प्रतीयते । स्तुतेर्मानं स्तोमः । पञ्चदश संख्या अस्य पञ्चदशः । 'स्तोमे डविधिः पञ्चदशाद्यर्थः' इति डप्रत्ययः । तदेतेषु शब्देष्वर्थविप्रतिपत्तौ किं लोकवेदयोः साम्यम्, उत वेदो बलवानिति संशये, पूर्वपक्षयति— **तेष्वदर्शनाद्विरोधस्य समा विप्रतिपत्तिः स्यात्** । तेषु त्रिवृदादिशब्देषु लोकवेदतो विलक्षणतया जायमाना अर्थप्रतिपत्तिः समा तुल्यबला स्यात् । कुतः । विरोधस्य अदर्शनात् अदृष्टधर्मप्रमितौ स्मृत्याचारेभ्यो वेदस्य बलवत्त्वेऽपि दृष्टे शब्दार्थावधारणे अनादिवृद्धव्यवहाररूपाचारात् तथाविधवृद्धस्मरणाद्वा वेदस्याधिक्ये प्रमाणाभावेन उभयार्थत्वे विरोधस्यादर्शनादित्यर्थः । एतेन धर्मप्रमितौ वेदस्यान्तरङ्गतया तत्प्रसिद्धेः प्रबलत्वात्कथमयं पूर्वपक्ष इति निरस्तम् । न च सकृच्छ्रुतत्वात्कथमुभयार्थकत्वमिति वाच्यम् । अन्यतरनिर्धारकाभावेनानध्यवसाये अप्रामाण्यापत्त्या चानन्यगत्या सकृच्छ्रुतत्वेऽपि आवृत्त्या उभयार्थकत्वस्य वाच्यत्वात् । अतोऽत्र लौकिकवैदिकार्थग्रहणे विकल्पः । ततश्च 'त्रिवृद्बर्हिष्पवमानम्' इत्यलौकिकार्थग्रहणपक्षे बर्हिष्पवमानाख्यस्तोत्रं त्रिवारं कर्तव्यमिति वा स्तिभिर्ऋग्भिः कर्तव्यमिति वा लभ्यते । ऋगन्तरान्नानम् 'नवभिः स्तुवन्ति' इति वचनं च पाक्षिकतयोपपद्यते । चरुशब्देन तु स्थाली कृष्णलवत्प्रदेयत्वेन विधीयते, पयश्च दधिकरणतया । 'अदितिमोदनेन' इति वाक्यशेषश्च पाक्षिकानुवादः । एवमाश्वबालैक्षवीस्तोमशब्दार्थेषु च विकल्पः । अर्थवादश्च पाक्षिकानुवादः ।

इति प्राप्ते, सिद्धान्तयति— **शास्त्रस्था वा तन्निमित्तत्वात्** । वाशब्द एवार्थे । शास्त्रं वाक्यशेषः । तज्जन्यतया तत्र विद्यमाना स्तोत्रीयानवकाद्यवगतिरेवाश्रयणीया, न तु लोकानुसारिणी त्रैगुण्याद्यवगतिः । कुतः । तन्निमित्तत्वात्, वाक्यशेषस्य विधेयस्तुतिप्रयोजनकत्वात् । यदि ह्यत्र लौकिकोऽर्थ आश्रीयेत, तर्हि विधिस्तुत्योर्भिन्नविषयत्वेन विध्यविषये स्तुत्यानर्थक्यं प्रसज्येत । ततश्च 'आनर्थक्यप्रतिहतानां विपरीतं बलाबलम्' इति न्यायेन वाक्यशेषानुगुण एवात्रार्थनिर्णयः । यद्यपि, 'त्रिवृद्बृहिष्पवमानम्' इत्यत्र नार्थवादरूपो वाक्यशेषः, किंतु स्तोत्रीयानवकाम्नानम् 'नवभिः स्तुवन्ति' [1]इति वाक्यम्, तच्च स्तोत्रीयानवकविधानार्थमेव । तेन च 'त्रिवृद्बृहिष्पवमानम्' इति विधेरङ्गाङ्गित्वेनैकवाक्यता । सा च असत्यपि तयोर्विषयैक्ये संभवतीति कथमत्र वाक्यशेषान्निर्णय इति;—तथापि स्तोत्रीयानवकाम्नानस्य 'नवभिः स्तुवन्ति' इत्यस्य च तद्विधिमात्रार्थत्वे [2]विध्युद्देशे त्रिवृच्छब्दोऽनुपपन्नः स्यात्, स्तोत्रीयानवकगुणप्रापकेण नवर्चविधिना स्तोत्रे त्रैगुण्यविधेः ऋक्क्षयविधेश्च विरोधात् । अतो विध्युद्देशगतत्रिवृच्छब्दसहितं स्तोत्रीयानवकाम्नानं 'नवभिः स्तुवन्ति' इति वाक्यं च त्रिवृच्छब्दस्य स्तोत्रीयानवकपरताकथनपरमप्यध्यवसीयत इति वाक्यशेषादत्रापि निर्णयः[3] । न च 'संदिग्धे तु वाक्यशेषात्' इत्यनेन गतार्थमिदमधिकरणमिति वाच्यम् । इह हि वाक्यशेषप्रवृत्तेः[4] प्राक्कोऽन्तरोपस्थापकाभावाल्लोकतस्त्रैगुण्यादिकमेव निश्चितम् । 'अक्ताः शर्कराः' इत्यत्र तु विध्युद्देशस्य द्रवद्रव्यमात्रसाधारण्यात्प्राग्वाक्यशेषात्संदेहः । ततश्च वाक्यशेषस्य संदेहनिवर्तकत्वेऽपि प्रबलविपरीतनिश्चयनिवर्तकत्वं न संभवतीत्यधिकाशङ्कानिराकरणार्थमिदमधिकरणमिति न गतार्थता, वाक्यशेषानर्थक्यतस्तच्छङ्कापरिहारस्योपपादितत्वात् । यववराहाधिकरणे तु वाक्यशेषात्प्राक्संदेह एव, यवादिशब्दानां प्रियंग्वादिषु सार्वत्रिकप्रसिद्धेरभावात् । न तु विपरीतनिश्चयः । अतो भाष्यकारमते प्रागुक्तगतार्थत्वस्य नानुपपत्तिः । इति त्रिवृदधिकरणम् ॥

आर्यम्लेच्छप्रसिद्ध्योर्विरोधे म्लेच्छप्रसिद्धेरप्रामाण्यमिति स्थितम् । इदानीमविरोधे सति म्लेच्छप्रसिद्धेः प्रामाण्यसंभवः अस्ति न वेति विचार्यते । 'पिकमालभते' 'प्र नेमस्मिन्दृशे' 'सते हिरण्यं निधाय' इत्यादौ पिकादिशब्दाः श्रूयन्ते । तांश्चार्याः क्वापि न प्रयुञ्जते । म्लेच्छास्तु कोकिले, अर्धे, शतच्छिद्रदारुमये पात्रे, इत्यादौ प्रयुञ्जते । तत्र म्लेच्छानां शब्दार्थनिर्णये अभिनिवेशाभावात्तत्प्रसिद्धिरप्रमाणम् । न हि यथा शिष्टा धर्मलिप्सवः अधर्मभीरवः श्रुत्यर्थतत्त्वं विविच्य पालयन्तस्तत्राभिनिविशन्ते तथा म्लेच्छा दृष्टार्थव्यवहारस्य यथाकथंचित्संभवे सति प्रयोजनाभावात्तत्राभिनिविशन्ते । ततश्च विप्लवसंभवान्न म्लेच्छप्रसिद्ध्या शब्दार्थतत्त्वनिर्णयः । ततश्च निरुक्तव्याकरणादितो धातुप्रत्ययादिकल्पनया ३ र्थो निर्णेयः ।

---

1. इति वाक्यं च तत्र—ख. 2. विध्युद्देशगतत्रिवृत्सहित—क, घ. 3. एवं च न पाक्षिकानुवादत्वदोषः इति क, घ, ङ पुस्तकेषु अधिकतया दृश्यते । 4. प्रयुक्तेः—ख, ग.

इति प्राप्ते, सिद्धान्तयति—

चोदितं तु प्रतीयेताविरोधात्प्रमाणेन ॥ ९ ॥

तुशब्दः पूर्वपक्षव्यावृत्तौ । अपिशब्दोऽध्याहर्तव्यः । म्लेच्छप्रसिद्ध्या पिकादिशब्दवाच्यतया चोदितम् अवगतमपि कोकिलादिकं प्रमाणेन श्रुत्यादिना अविरोधात् आर्यैरपि प्रतीयेत आद्रियेत । पिकादिपदानि हि वेदेषु तदङ्गेषु च स्थितानि नित्यानि । तेषां च केनचिदर्थेन नित्येन भवितव्यम् । न च निरुक्तव्याकरणादितः प्रकृतिप्रत्ययादिकल्पनया तल्लाभः संभवति, प्रकृतिप्रत्ययादिकल्पनाया बहुप्रकारत्वसंभवेन ततो नियतस्य कस्यचिदर्थस्यालाभात् । 'स्रुग्येव जर्भरी' इत्यादौ तु अगत्या तदनुसरणम् । अस्ति चात्र गतिर्म्लेच्छप्रसिद्धिः । अतस्तयैवार्थनिर्णयः । तत्सिद्धमविरोधे म्लेच्छप्रसिद्धेरप्यस्ति प्रामाण्यम् । इति पिकनेमाधिकरणम् ॥

६. म्लेच्छप्रसिद्ध्यधिकरणम् ।

कल्पसूत्राणां तावद्वेदमूलकतया प्रामाण्यं स्मृत्यधिकरणे तुल्यन्यायतयावगतम् । तदाक्षिप्य समाधातुमिदमारभ्यते । कल्पसूत्राणि किं स्वतन्त्रतया प्रमाणम्, उत परतन्त्रतयेति संशयः । तदर्थं चेदं चिन्त्यते किमिमानि पौरुषेयाणि, उत अपौरुषेयाणीति । अपौरुषेयाणीति ब्रूमः । कल्पसूत्रतो हि जायमाना धर्मावगतिः स्वत एव प्रमाणतया ज्ञायते । पौरुषेयत्वे च पुरुषदोषादप्रामाण्यापत्तेर्ज्ञातं प्रामाण्यं व्याहन्येत । तस्मादपौरुषेयत्वं कल्पसूत्राणाम् । एवं च शाक्यादिग्रन्थानामप्यपौरुषेयत्वं साधितं भवति । किंच कल्पसूत्राणां वैदिकपरिग्रहाद्धर्मप्रामाण्यमविवादम् । तदेषामेवापौरुषेयतया नित्यत्वं कल्पनीयम् । न तु मूलभूतं वाक्यान्तरं कल्पयित्वा तस्यापौरुषेयतया नित्यत्वं कल्पयितुमुचितम्, गौरवात् । एतेन मन्वादिस्मृतीनामप्यपौरुषेयत्वमुपक्षिप्तं भवति । किंच 'मन्त्रब्राह्मणयोर्वेदनामधेयं षडङ्गमेके' इति स्मरणात्कल्पसूत्राणामपौरुषेयत्वं स्पष्टमेवावगतम् । एतेन शिक्षाव्याकरणादीनामप्यपौरुषेयत्वमुपक्षिप्तं भवति । किंच यानि वाक्यानीदानीं वेदेष्वध्यापकपरंपरया प्रत्यक्षाणि पठ्यमानानि 'प्राचीनवंशं करोति' इत्यादीनि तान्येव बहुलं कल्पसूत्रेषूपलभ्यन्ते । न हीदं पौरुषेयत्वे घटते, प्रत्यक्षवेदवाक्यनिबन्धनवैयर्थ्यात् । अतः शाखान्तरवदपौरुषेयत्वमेषां युक्तम् । न चैवं सति 'बोधायनीयम्' 'आपस्तम्बीयम्' इत्यादिसमाख्याविरोधः शङ्कनीयः । 'शाकलम्' 'बाष्कलम्' 'तैत्तिरीयम्' इतिवदुपपत्तेः । 'यश्चोऽधीते' इत्युपक्रम्य 'पुराणानि कल्पान्' इति कल्पानामप्यध्ययनविधिदर्शनाच्चापौरुषेयत्वम् । अन्यथा पौरुषेयतया अनित्यत्वे नित्यविधिविषयत्वं न घटेत । एतेन इतिहासादीनामप्यपौरुषेयत्वमुपक्षिप्तं भवति । तथा च अपौरुषेयत्वेन नित्यत्वादेषां स्वतन्त्रतया प्रामाण्यम् इति पूर्वपक्ष-

७. कल्पसूत्रास्वतःप्रामाण्याधिकरणम् ।

मुपक्षिप्य[1] निराकरोति—

[2]प्रयोगशास्त्रमिति चेन्नासन्नियमात् ॥ १० ॥

प्रयोगस्य क्रत्वनुष्ठानस्य बोधकं शास्त्रं प्रयोगशास्त्रं बोधायनापस्तम्बादिकल्पसूत्रजालं स्वतन्त्रतया प्रमाणमस्त्विति चेत्, तन्न। कुतः। असन्नियमात्, पूर्वमसद्भिः अविद्यमानैः जनिमद्भि. बोधायनादिभिः नियमात् निबन्धनात्। पौरुषेयत्वादित्यर्थः॥ 'बोधायनीयम्' 'आपस्तम्बीयम्' इत्यादिसमाख्याबलात्पौरुषेयाण्येव कल्पसूत्राणि। 'इति बोधायनकृते, इत्यापस्तम्बकृते, इति भरद्वाजकृते, इत्याश्वलायनकृते, सूत्रे प्रथमोऽध्यायः, प्रथमः पटलः' इत्येवं तेष्वेव ग्रन्थेषु कर्तृनिबन्धनेन तन्मूलकर्तृस्मृतिपरंपरायाः भ्रान्तिमूलकत्वस्य संभावयितुमशक्यत्वात्। ततश्च दृढकर्तृस्मरणात्समाख्या एताः कर्तृनिबन्धना एव, न प्रवचननिबन्धनाः। अतः पौरुषेयत्वादेषां न स्वतन्त्रतया प्रामाण्यम्, किंतु वेदमूलकतयैव। एतेन मन्वादिस्मृतिशिक्षादीनां शाक्यादिनिबन्धनानामपि स्वतन्त्रतया प्रामाण्यं निरस्तम्। तत्र वैदिकपरिग्रहवशात्स्मृत्यादीनां वेदमूलकतया प्रामाण्यं निर्बाधम्। शाक्यादिनिबन्धनानां तु वेदविद्वेषिजनप्रणीतपरिगृहीतानां वेदमूलकत्वासंभवादप्रामाण्यमेव परिशिष्यते। यत्तु प्रत्यक्षशाखागतवाक्यनिबन्धनानर्थक्यमुक्तम्, तन्न। श्रुतिलिङ्गादिप्रमाणदुर्बोधानन्तशाखागतवाक्यान्युपसंहृत्य सुबोधकैः शब्दैस्तदर्थप्रथनाय तदावश्यकत्वात्। यच्च कल्पानां नित्यब्रह्मयज्ञविधिविषयत्वान्यथानुपपत्त्या पौरुषेयत्वमनुपपन्नमिति, तन्न। 'पञ्चावत्तं जमदग्नीनाम्' 'बबरः प्रावाहणिरकामयत' इत्यादिवत्प्रवाहनित्यतया तदुपपत्तेस्तर्कपादे 'परं तु श्रुतिसामान्यमात्रम्' इत्यत्र, अर्थवादाधिकरणे 'अन्त्ययोर्यथोक्तम्' इत्यत्र, मन्त्राधिकरणे 'उक्तश्चानित्यसंयोगः' इत्यत्र च प्रपञ्चितत्वात्। यच्च 'षडङ्गमेके' इति वेदत्वं कल्पसूत्राणामिति, तन्न। तस्य स्वानभिमतपरमतोपन्यासमात्रत्वात्। न च मतान्तरे वेदत्वं स्वमते अवेदत्वं च युज्यते, वस्तुद्वैविध्यासंभवात् अङ्गशब्दविरोधाच्च।

अत्रैव युक्त्यन्तरमाह—

अवाक्यशेषात्[3] ॥ ११ ॥

वाक्यस्य विधिवाक्यस्य शेषः अर्थवादः, तस्य विध्यपेक्षितप्राशस्त्यसमर्पकत्वात्। तस्याभावात् अवाक्यशेषात्। अर्थाभावेऽव्ययीभावः। 'अपञ्चम्याः' इति पर्युदासादभावो न। वेदेषु हि वाक्यानि[4] सर्वाण्यर्थवादबहुलान्येव पठ्यन्ते। कल्पसूत्रेषु तु प्रायेण विधिवाक्यान्येव

1. उत्थाप्य--क, घ, ङ. 2. अन्यत्रेदं द्विधा विभज्य पठ्यते। 3. पाच्च। 4. विधिवाक्यानि—क, घ.

पठयन्ते । अर्थवादास्तु 'समुद्रो वा एष यदहोरात्रस्तस्यैते गाधे तीर्थे यत्संधी तस्मात्संधौ होतव्यम्' इत्यादयः क्वचिदेव पठ्यन्ते । अतो वैलक्षण्यान्न वेदत्वं कल्पसूत्राणाम्, किंतु वेदमूलकतयैव प्रामाण्यम् ॥

ननु वेदतया वेदमूलकतया वा कल्पसूत्राणां प्रामाण्ये कः फलभेद इत्याशङ्क्य प्रत्यक्षश्रुतिविरोधे अप्रामाण्यमेवैषां वेदमूलकत्वे फलतीत्याह—

सर्वत्र च [1]प्रयुक्तत्वात्संनिधानशास्त्राच्च ॥ १२ ॥

नेत्यनुवर्तते । निदानसूत्रे 'सर्वोऽपरपक्षः पूर्णमासस्य कालः सर्वः पूर्वपक्षो दर्शस्य' इति पूर्वपक्षापरपक्षतिथिषु सर्वत्रापि दर्शपूर्णमासयागत्रिकद्वयस्य प्रयुक्तत्वात् प्रयोगविधानात्, न तदंशे प्रमाणं कल्पसूत्रमिति शेषः । कुतः । संनिधानशास्त्रात्, संनिधाने दर्शपूर्णमासविधिसंनिधौ विद्यमानं प्रत्यक्षं श्रुतिवाक्यं संनिधानशास्त्रम् । 'अमावास्यायाममावास्यया यजेत पौर्णमास्यां पौर्णमास्या यजेत' इत्यादिप्रत्यक्षश्रुतिविरोधादिति यावत् । चकारो ह्यर्थो हेतौ,—यतो वेदमूलकतयैव कल्पसूत्राणि प्रमाणं न स्वतन्त्रतया, तानि च प्रत्यक्षश्रुतिविरोधे अप्रमाणमिति । द्वितीयश्चकारस्तु 'अविशेषादुभौ वा' इत्यादिविषयान्तरसमुच्चयार्थः ॥ अत्रेदं चिन्त्यम्—'सर्वोऽपरपक्षः पूर्णमासस्य सर्वः पूर्वपक्षो दर्शस्य' इति कल्पसूत्रम् 'अमावास्यायाममावास्यया यजेत' इत्यादिप्रत्यक्षश्रुतिविरोधादप्रमाणमित्यनुपपन्नम्, पूर्वपक्षापरपक्षयोरपि दर्शपूर्णमासकर्मकालत्वस्य प्रत्यक्षश्रुतिसिद्धत्वात् । एवं ह्युदाहरन्ति श्रुतिवाक्यं बोधायनापस्तम्बसत्याषाढभारद्वाजाः—'अथैकेषां वि वा एतस्य यज्ञश्छिद्यते । यस्य यज्ञे प्रततेऽन्तरेतामिष्टिं निर्वपन्ति । य एवासावाग्नेयोऽष्टाकपालः पौर्णमास्यां योऽमावास्यायां तमग्नये पथिकृते कुर्यात्तेनैव पुनः पन्थानमवैति न यज्ञं विच्छिनत्तीति विज्ञायते' इति । अस्यार्थः—'अग्नये पथिकृते पुरोडाशमष्टाकपालं निर्वपेद्यो दर्शपूर्णमासयाजी सन्नमावास्यां वा पौर्णमासीं वातिपादयेत्' इत्यादिना दर्शपूर्णमासयोः स्वकालातिक्रमे पाथिकृतीष्टिः प्रायश्चित्तत्वेन विहिता तैत्तिरीयादिशाखासु । तस्यास्तावदतिपन्नेन पूर्णमासेन दर्शेन च समानतन्त्रता शाखान्तरे विहिता । तन्निन्दापूर्वकं दार्शपूर्णमासिकाग्नेययागस्यैव पथिकृद्गुणकत्वं शाखान्तरे विधीयते 'यस्य यज्ञे' इत्यादिना । यस्य यजमानस्य दर्शपूर्णमासयोरन्यतरस्मिन्नतिपन्ने यज्ञे प्रतते कालान्तरे प्रक्रान्ते सति अन्तः मध्ये एतां पाथिकृतीमिष्टिं निर्वपन्ति कुर्वन्ति ऋत्विजः; एतस्य यजमानस्य उपक्रान्तो यज्ञो विच्छिद्यते विगुणः स्यात्; अतः योऽयमाग्नेययागः अमावास्यायां च पौर्णमास्यां चाच्युतो विहितः तम् अग्नये पथिकृते

1. प्रयोगात् ।

कुर्यात् । तेन पथिकृत्त्वगुणेन पन्थानं कालातिक्रमतः प्रच्युतं[1] स्वर्गस्य पन्थानं पुनरवैति प्राप्नोति । न चोपक्रान्तं यज्ञं विच्छिनत्ति न विगुणीकरोति इति अन्येषां शाखिनां श्रुतिवाक्यं विज्ञायते प्रत्यक्षं ज्ञायत इति । अत्र शाखान्तरे समानतन्त्रतानिन्दा नहिनिन्दान्यायेन पथिकृत्त्वगुणविधिप्रशंसार्थैव, न त्वेतन्निषेधार्था। समानतन्त्रता ह्येषा शाखान्तरे विद्यते वा न वा । न द्वितीयः, अप्रसक्तत्वेन तन्निषेधायोगात् । नाद्यः, शाखान्तरे विहितत्वेन नित्यवत्प्रतिषेधानुपपत्तेः । पाक्षिकनिषेधे च पक्षान्तरे तत्सत्त्वात्तन्निन्दानुपपत्तेः । न हि विहितत्वे निन्दा युज्यते । अतः प्रशंसार्थैव सा । तया च निन्दया समानतन्त्रतापि शाखान्तरेऽनुमीयते । अतो विकल्पः । तदाहुर्बोधायनादयः कल्पकाराः 'समानतन्त्रे वा मुख्यः कार्यः' इति । यदि च स्वकालातिक्रमे सति कालान्तरे अतिपन्नयोर्दर्शपूर्णमासयोरनुष्ठानमेव न स्यात्[2], तर्हीदं सर्वमभित्तिचित्रायितमेव स्यात् । अतो बोधायनादिबहुमुनिदृष्टश्रुत्यन्यथानुपपत्त्या कालान्तरेऽपि दर्शपूर्णमासयोः करणमनुमीयते । किंच, 'अथातोऽनुग्रहान्व्याख्यास्यामः' इत्युपक्रम्य 'सायं होमं वोपोदयं जुहुयात् । प्रातर्होमं वोपास्तमयं कालेन कालमनतिक्रम्य दर्शपूर्णमासयोरग्निहोत्रस्य च न स्कन्दते न व्यथत इति विज्ञायते' इति संक्षेपश्रुतिमुदाहृत्य तां व्याकुर्वन्नुदाहरणेषु विस्तारयामास बोधायनः । 'आ प्रातराहुतिकालात् सायमाहुतिकालो नातीयात्' इत्यादिना 'ओत्तरवसन्तज्योतिष्टोमस्य कालात्पूर्ववसन्तज्योतिष्टोमस्य कालो नातीयात्' इत्यन्तेन पूर्वस्य कर्मणः कालेनोत्तरस्य कर्मणः कालमनतिक्रम्य अन्तरालकाले दर्शपूर्णमासयोरग्निहोत्रस्य चकारात्तज्जातीयानामाग्रयणवैश्वदेववरुणप्रघाससाकमेधशुनासीरीयानिरूढपशुबन्धज्योतिष्टोमानां चानुष्ठानं शाखान्तरे विज्ञायत इत्यर्थः । अतः '[3]सर्वोऽपरपक्षः पूर्णमासस्य' इति कल्पसूत्रमिदं प्रत्यक्षश्रुतिविरोधादप्रामाण्ये कथमुदाहृतं भाष्यकृता । यच्च वार्तिकादिग्रन्थेषु—'अविशेषादुभौ वा' इति कात्यायनसूत्रे सर्वपुरोडाशानां [4]चतुर्धाकरणवचनम् 'आग्नेयं चतुर्धा करोति' इति प्रत्यक्षश्रुतिविरोधात् 'शेषस्तु गुणसंयुक्तः साधारणः प्रतीयेत' इति तृतीयाग्रपादीयान्याधिकरणपूर्वपक्षन्यायाभासमूलकमप्रमाणम्; तथा 'स कृताकृतः' इत्यापस्तम्बादिसूत्रे सवनीयपशौ पशुपुरोडाशविकल्पवचनं 'सवनीये च्छिद्रापिधानार्थत्वात्पुरोडाशो न स्यात्, अन्येषामेवमर्थत्वात्' इति द्वादशिकद्वितीयपादीयद्वितीयाधिकरणपूर्वपक्षमूलकमप्रमाणम्, 'वपया प्रातःसवने चरन्ति पुरोडाशेन माध्यंदिने सवने अङ्गैस्तृतीयसवने' इति प्रत्यक्षश्रुतिविरोधात्; तथा तीव्रसुति 'यावद्यूपं वेदिमुद्धन्ति' इत्यापस्तम्बादिसूत्रे वेदेर्यूपाङ्गत्ववचनम्, 'अर्धमन्तर्वेदि अर्धं बहिर्वेदि' इति प्रत्यक्षश्रुतिविरोधात्, 'तथा यूपस्य वेदिः' इति तार्तीयीकसप्तमपादीयाधिकरणपूर्वपक्षन्यायाभासमूलकमप्रमाणम्; तथा

1. स्वर्गपथात्प्रच्युतं—ख, ग, घ. 2. अननुष्ठानमेव स्यात्—क, ग, घ, ङ. 3. अथ—क. 4. चतुर्धाकरणम्—क, ख.

यूपैकादशिन्याम् 'जाघनीभिश्च पत्नीः संयाजयन्ति' इत्यापस्तम्बादिवचनं 'जाघन्या पत्नीः संयाजयन्ति' इति प्रत्यक्षश्रुतिविरोधात् 'द्रव्यविकारात्तु पूर्ववदर्थकर्म स्यात्' इति द्वादशिकचतुर्थपादीयाधिकरणपूर्वपक्षन्यायाभासमूलकमप्रमाणमित्यादि प्रपञ्चितम् । तदुद्धारस्तु तत्तदधिकरणे निरूपयिष्यते । तथा च किंचित्कल्पसूत्रवाक्यान्तरमुदाहरणान्तरमन्वेषणीयमित्यास्तां तावत् । इति कल्पसूत्राधिकरणम् ॥

सन्ति देशाचाराः प्राच्यानां होलाकादयः, दाक्षिणात्यानामाह्नीनैवुकादयः, प्रतीच्यानां गणपूजादयः, उदीच्यानामुद्वृषभादयः । ते किमाचारविशेषा यथादेशं व्यवतिष्ठन्ते उत सर्वे सर्वत्रेति संशयः । तत्र पूर्वपक्षयति—

८. होलाकाधिकरणम् ।

अनुमानव्यवस्थानात्तत्संयुक्तं प्रमाणं स्यात् ॥ १३ ॥

अनुमीयते श्रुतिरनेनेत्यनुमानं लिङ्गम् आचारः । तस्य व्यवस्थानात् देशभेदेन व्यवस्थितत्वात् तत्संयुक्तं देशभेदसंयुक्तमेव श्रुतिरूपं प्रमाणं मूलभूतं कल्पनीयं स्यात् ॥

सिद्धान्तयति—

अपि वा सर्वधर्मः स्यात्तन्न्यायत्वाद्विधानस्य ॥ १४ ॥

अपि वेति पूर्वपक्षव्यावृत्तौ । न देशविशेषेणाचाराणां व्यवस्था, किंतु सर्वधर्मः स्यात् सर्वे आचाराः सर्वेषां स्युः । कुतः । विधानस्य तन्न्यायत्वात् । विधीयते अनुमीयते यत्तद्विधानं मूलभूतश्रुतिवाक्यम्, तस्य तन्न्यायत्वात् । नीयते प्राप्यते अनेनेति न्यायः । सर्वधर्मत्वप्रापकत्वादित्यर्थः । कल्पिता मूलभूता हि श्रुतिः न प्राच्यत्वादिकर्तृविशेषणमादाय होलाकाद्यधिकारं व्यवस्थापयितुं शक्नोति । आकृतिव्यक्तिगुणसंस्थानक्रिया हि कर्तृपरिच्छेदिकाः । प्राच्यत्वादि च 'ब्राह्मणो बृहस्पतिसवेन यजेत' इत्यत्रेव न जातिः, नापि 'भार्गवो होता भवति' इत्यत्रेव व्यक्तिः, 'शुक्लो होता' इतिवच्च न गुणः, 'अन्यूनानतिरिक्ताङ्गा ऋत्विजः' इत्यत्रेव च नावयवसंनिवेशः, 'सोमयाजी संनयेत्' इत्यत्रेव क्रिया च न भवति ॥

ननु तर्हि एकद्वित्रिपञ्चशिखाचाराणामपि कुलभेदेन व्यवस्था न स्यादित्यत आह—

दर्शनाद्विनियोगस्य[1] ॥ १५ ॥

उपपत्तिरिति शेषः । विविधं व्यवस्थया नियुज्यत इति विनियोगः । 'यत्र बाणाः

1. विनियोगः स्यात् ।

संपतन्ति कुमारा विशिखा इव' 'यथार्षि शिखा निदधाति' इति शिखार्थवादस्मृतिदर्शनात्। 'पञ्चावत्तं जमदग्नीनाम्' इत्यवदानकल्पवद्गोत्रभेदेन व्यवस्थितस्य शिखाकल्पनस्योपपत्तिः, गोत्रभेदस्य व्यवस्थितत्वात्। न हि प्राच्यत्वादिकं व्यवस्थितम्, तद्व्यवस्थापकलिङ्गाभावात् ॥

ननु दाक्षिणात्यादौ बृहत्त्वश्यामत्वलोहिताक्षत्वादिलिङ्गमस्तीत्यत आह—

लिङ्गाभावाच्च नित्यस्य ॥ १६ ॥

नित्यस्य व्यवस्थितस्य कर्तुः यत् लिङ्गं व्यवस्थापकं तस्याभावात्। अदाक्षिणात्यादिष्वपि बृहत्त्वादिसत्त्वादिति भावः ॥

ननु प्राच्यादिसमाख्या कर्तारं विशिनष्टु। तत्राह—

आख्या हि देशसंयोगात् ॥ १७ ॥

प्राच्यत्वादिसमाख्यापि न कर्तृविशेषणम्। हि यतः देशविशेषसंयोगात्प्राच्यादिसमाख्या प्रवर्तते। न ह्येवंविधा समाख्या कर्तृविशेषणं भवितुमर्हति, देशसंयोगस्याव्यवस्थितत्वात् ॥

ननु प्राच्यादिसमाख्याया देशनिमित्तत्वे दक्षिणदेशादिगतेषु प्राच्यादिषु प्राच्यादिव्यवहारो न स्यात्। अतो निमित्तान्तरप्रयुक्तैव समाख्या वाच्या। सा कर्तृविशेषणं भवत्वित्याशङ्क्य परिहरति—

[1]न स्यादेशान्तरेष्विति चेत्स्याद्योगाख्या हि माथुरवत् ॥ १८ ॥

चेदन्तं व्याख्यातम्। दक्षिणदेशादिगतेष्वपि प्राच्यादिषु प्राच्यादिव्यवहारः संभवति। कुतः। हि यस्मात्कारणात् योगाख्या 'सोऽस्य निवासः' 'तत्र जातः' 'तत आगतः' इति व्याकरणसिद्धेषु योगेष्वन्यतमयोगयुक्ता प्राच्यादिसमाख्या देशान्तरगतेष्वपि न विरुद्धा देशसंयोगं न व्यभिचरति। माथुरवत् यथा मथुरानिवासनिमित्तः माथुरशब्दः तद्वत्। अतो देशविशेषप्रयुक्तैव प्राच्यादिसमाख्या। न त्वेषा कर्तृविशेषणमाचारान्व्यवस्थापयितुमीष्टे; यः प्राच्यो दक्षिणदेशादिगतः तस्य कथंचित् 'तत आगतः' इत्यादियोगसंभवेऽपि तत्पुत्रपौत्रप्रपौत्रादीनां कथमपि प्राच्यादिसमाख्याया असंभवेन तदाचारस्य दर्शनेन व्यभिचारात्। अतः प्राच्यत्वादिकं न कर्तृविशेषणमिति न तत आचारस्य व्यवस्था युज्यते।

1. अन्यत्रेदं द्विधा विभज्य पठ्यते।

ननु मास्तु प्राच्यत्वादिकं कर्तृविशेषणतया आचारव्यवस्थापकम्, कर्मधर्मतया तद्व्यवस्थापकमस्तु इति शङ्कते—

कर्मधर्मो वा प्रवणवत् ॥ १९ ॥

वाशब्दः शङ्कायाम्। प्राच्यदेशो होलाकादेः दक्षिणदेश आह्वीनैबुकादेः इत्येवं देशविशेषः कर्मधर्मः[1] तस्य तस्याचारस्य व्यवस्थितमङ्गम्, प्रवणवत् यथा 'प्राचीनप्रवणे वैश्वदेवेन यजेत' इति वैश्वदेवाङ्गं प्राचीनप्रवणो देशः तद्वत्। प्राचीनप्रवणः प्राचीनावनतः ॥

परिहरति—

तुल्यं तु कर्तृधर्मेण ॥ २० ॥

तुशब्दः शङ्कानिवृत्तौ। न प्रागादिदेशजातमाचारव्यवस्थापकमङ्गं भवितुमर्हति। तद्धि कर्तृधर्मेण श्यामत्वादिना तुल्यमव्यवस्थापकत्वे तन्निवासिभिस्तदनाचरणात् ततो निर्गतैश्चाचरणात्। तस्माद्धोलाकाद्याचारः सर्वधर्मः। इति होलाकाधिकरणम् ॥

एकस्मिन्नर्थे गोगावीगोण्यादिशब्दाः प्रयुज्यन्ते। ते किं सर्वे प्रयोक्तव्याः, उत व्याकरणानुगता एव प्रयोक्तव्या इति चिन्त्यते; तदर्थं च किमेते सर्वेऽपि साधवः, उत व्याकरणानुगता एवेति; तदर्थं च किं व्याकरणं प्रमाणमप्रमाणं वेति; तदर्थं च किं व्याकरणस्य मूलभूता श्रुतिः संभवति उत न वेति। तत्र पूर्वपक्षयति—

प्रयोगोत्पत्त्यशास्त्रत्वाच्छब्देषु न व्यवस्था स्यात् ॥ २१ ॥

अपशब्दपरिहारेण साधुशब्दानां प्रयोगस्य उत्पत्तिः व्यवस्थापनं यत्र सा प्रयोगोत्पत्तिः व्याकरणस्मृतिः। तस्या अशास्त्रत्वात् मूलभूतश्रुतिरहितत्वात् गोशब्द एव प्रयोज्यो न गाव्यादि-

१. साधुपदप्रयुक्त्यधिकरणम्।

शब्दा इति व्यवस्था न स्यात् ॥ व्याकरणस्मृतेरप्रामाण्ये हि सति गोगाव्यादिशब्दानां सर्वेषामविच्छिन्नपारंपर्यप्रयोगजत्वेन साधुत्वात्प्रयोज्यत्वं फलति। तथा हि— व्याकरणं तावत् 'साधूनेव प्रयुञ्जीत नासाधून्' इति प्रयोगनियमपरम्, गवादय एव साधवो न गाव्यादय इति साधुत्वस्वरूपनियमपरं च। तत्र नाद्यो नियमः संगच्छते। स हि किं शब्दप्रयोगस्य यत्कार्यं तदर्थः, उत शब्दप्रयोगाश्रितादृष्टार्थः। नाद्यः। शब्दप्र-

1. कर्मधर्मतया—ख ; कर्मधर्मतः—ग.

योगस्य हि कार्यमर्थप्रत्यायनम् । अर्थश्च असाधुभ्योऽपि गम्यते वा न वा । नाद्यः, असाधुभ्योऽप्यर्थप्रतीतौ साधूनेव प्रयुञ्जीतेति नियमानर्थक्यात् । न द्वितीयः, असाधुभ्योऽर्थप्रत्ययाभावेन तत्प्रयोगस्याप्रसक्तेस्तन्निवृत्त्यै साधुशब्दप्रयोगस्य नियमविधानानर्थक्यात् नियमफलस्यासाधुप्रयोगव्यावृत्तेः स्वतः सिद्धत्वात् । अथ असाधुभ्योऽप्यर्थस्य गम्यमानत्वेऽपि प्रयोगमाश्रित्य धर्माय साधुनियमः क्रियते तृप्त्यर्थभोजनाश्रितप्राङ्मुखत्वनियम इवेत्यस्तु पक्ष इति चेत्, मैवम् । व्याकरणप्रणेतृभिर्हि दृष्टार्थशब्दप्रयोगाश्रितसाधुनियमस्य धर्मार्थत्वं ज्ञात्वा तच्छास्त्रं प्रणेतव्यम् । तेषां तज्ज्ञानमेव न संभवति, मूलाभावात् । न हि तत्र लौकिकप्रमाणानि प्रत्यक्षानुमानोपमानानि क्रमन्ते, धर्माधर्मयोरलौकिकत्वात् । नापि श्रुतिस्तत्र मूलं भवितुमर्हति । वेदवाक्यानि हि किं तथाविधानि गवाश्वादिषु भेदेन कल्प्यन्ते, उत केनचित्साधारणधर्मेण सर्वान्धर्मान्क्रोडीकृत्य गवाश्वादिशब्दविषयमेकमेव श्रुतिवाक्यं कल्प्यते । आद्ये किं प्रतिपदं कल्पितानि वाक्यानि कस्यचित्प्रत्यक्षाणि वा नित्यानुमेयानि वा । नाद्यः, अपाठे प्रत्यक्षानुपपत्तेः पाठस्य च शब्दानामनन्तत्वेन प्रतिपदमसंभवात् । न द्वितीयः, अन्धपरंपरापातात् । न च प्रतिपदपाठो महानुभावानां केषांचित्संभाव्यत इति वाच्यम् । तस्य श्रुत्युदाहरणेन पातञ्जलभाष्ये निरस्तत्वात् । यथा—"अनभ्युपायः शब्दानां प्रतिपत्तौ प्रतिपदपाठः । एवं हि श्रूयते 'बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदविहितानां शब्दानां पारायणं प्रोवाच, नान्तं जगाम' इति । बृहस्पतिश्च वक्ता, इन्द्रश्चाध्येता, दिव्यं वर्षसहस्रमध्ययनकालः, न चान्तं जगाम, किं पुनरद्यत्वे गतायुषि प्रजायाम्" इत्यादि । अथ केनचित्सामान्यधर्मेण सर्वान्क्रोडीकृत्य गवाश्वादिविषयकमेकमेव श्रुतिवाक्यं कल्प्यते यथा 'साधूनेव प्रयुञ्जीत नासाधून्' इति पक्षोऽस्त्विति चेन्मैवम् । साधुत्वं हि जातिरुपाधिर्वा । नाद्यः । जातित्वे हि योग्यवृत्तिजातेर्योग्यत्वात्प्रत्यक्षेण गृह्येत । न द्वितीयः, निर्वक्तुमशक्यत्वात् । साधुत्वं हि वाचकत्वं वा, अनादित्वं वा, अदृष्टसाधनत्वं वा । नाद्यः । गाव्यादिष्वतिव्याप्तेः, तेषामपि प्रयोगप्रत्ययान्यथानुपपत्त्या वाचकत्वस्य लोकसिद्धत्वात् । न द्वितीयः । अनादित्वं हि नित्यशब्दार्थसंबन्धत्वम् । तच्च गाव्यादिष्वप्यविशिष्टम्, तत्रापि संबन्धकर्तुरस्मरणात् । न तृतीयः । अदृष्टसाधनत्वं हि वेदैकगम्यम् । तद्बोधकवाक्ये चोपलक्षणान्तराभावात्साधुत्वमेवोपलक्षणं वाच्यम् । तथा च 'अदृष्टसाधनभूताञ्शब्दानदृष्टार्थं प्रयुञ्जीत' इत्येवमुपलक्षणस्य प्रमेयस्य चैक्यादात्माश्रयापत्तिः । एतेन गवादय एव साधवो न गाव्यादयः इति द्वितीयोऽपि नियमो निरस्तः । अशास्त्रत्वादित्यस्य विगीतत्वादिना प्रामाण्यासंभवादित्यर्थः । विगीतत्वं परस्परविरोधः । पाणिनिकात्यायनपतञ्जलिप्रणीतसूत्रवार्तिकभाष्यसंदर्भो हि व्याकरणम्, 'त्रिमुनि व्याकरणम्' इति प्रसिद्धेः । सूत्रकारस्तावत् 'तुल्यास्यप्रयत्नं सवर्णम्' इति वदन् ऋकारलृकारयोः स्थानभेदात्सवर्णसंज्ञां नानुमन्यते । वार्तिकभाष्यकृतौ तु ऋकारलृकारयोः सावर्ण्यविधिरित्याहतुः । तथा 'अप्तृन्तृच्स्वसृन-

नृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तृणाम्' इति नप्त्रादिपरिगणनात् अन्यत्र पितरावित्यादौ दीर्घं नानुमन्यते सूत्रकृत्। भाष्यकारस्तु समर्थसूत्रे 'उद्गातारः' इति प्रायुङ्क्त। एवं परस्परविरोधाः परःसहस्रं सन्ति। निष्फलं चेदं शास्त्रम्[1], उक्तरीत्या निर्मूलत्वेनाप्रमाणतया ततः कस्यचिदपि फलस्यासंभवात्। वेदविरुद्धं चेदं व्याकरणम्। 'दृष्टं साम' इत्यधिकारे 'वामदेवाड्ड्यड्ड्यौ' इति वदन्पाणिनिः वामदेवेन दृष्टं साम वामदेव्यमिति मन्यते। वेदे तु 'वामं वा इदं देवेभ्योऽजनीति तस्माद्वामदेव्यम्' इति निरुच्यत इति विरोधः। पूर्वोत्तरविरुद्धं चेदं व्याकरणम्। पाणिनिर्हि 'चोः कुः' इति पदान्ते चवर्गस्य कवर्गं शास्ति। स एव च 'वृद्धिरादैच्' इत्याह—इत्यादि। ततश्च, 'निर्मूलत्वाद्विगीतत्वान्नैष्फल्याद्वेदबाधनात्। पूर्वापरविरोधाच्च नास्य प्रामाण्यसंभवः॥' तदेवं व्याकरणस्य वेदमूलकत्वासंभवादप्रामाण्ये 'साधुनेव प्रयुञ्जीत' इति नियमाभावादसाधुभ्योऽपि प्रयुक्तेभ्यः अर्थप्रत्ययस्य अनादिपारंपर्यसिद्धत्वात् गोगाव्यादिशब्दाः सर्वेऽपि प्रयोक्तव्या इति पूर्वः पक्षः।

सिद्धान्तयति—

शब्दे प्रयत्ननिष्पत्तेरपराधस्य भागित्वम्॥ २२॥

गाव्यादिशब्दे प्रयुज्यमाने अपराधस्य अयथोच्चारणस्य भागित्वम्, भागः भजनं प्रवृत्तिः, जनकतासंबन्धेन तद्वान्भागी, तस्य भावः तत्त्वम्। प्रवर्तकत्वमिति यावत्। कुतः। प्रयत्ननिष्पत्तेः प्रयत्नविशेषत एव शब्दस्वरूपस्य यथावदभिव्यक्तेः॥ तथा च शिक्षायाम्—'आत्मा बुद्ध्या समेत्यार्थान्मनो युङ्क्ते विवक्षया। मनः कायाग्निमाहन्ति स प्रेरयति मारुतम्। सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मारुतः। वर्णाञ्जनयते' इत्यादि। आत्मा अन्तःकरणं संस्काररूपेण स्वगतानर्थान् बुद्ध्या स्ववृत्त्या समेत्य एकबुद्धिविषयान्कृत्वा तद्बोधनेच्छया युक्तं मनः करोति। तन्मनः कायाग्निं जाठराग्निमभिहन्ति। सः अग्निः मारुतं प्रेरयति। सोदीर्णः। सः मारुतः। 'सोऽचि लोपे चेत्पादपूरणम्' इति सुलोपः। उदीर्णः ऊर्ध्वं प्रेरितः मूर्ध्न्यभिहतः परावृत्त्य वक्त्रं तालवादिस्थानं प्राप्य वर्णानभिव्यनक्तीति तदर्थः। एवं च शब्दप्रयोगेच्छोत्पन्नयत्नाभिहताग्निप्रेरितनाभिप्रदेशगतवायुर्वेगान्मूर्धानं गत्वा प्रतिनिवृत्तो वक्त्रं प्राप्य यत्नविशेषसहायः तालवादितत्तत्स्थानेषु जिह्वाग्रादिस्पर्शपूर्वकमभिहतो वर्णविशेषानभिव्यनक्तीति त एते आभ्यन्तरप्रयत्नाः। ततो यत्नविशेषैर्गलविवरविकासादीन करोति। त एते बाह्यप्रयत्नाः। एतैश्च प्रयत्नैर्वर्णा यथावदभिव्यज्यन्ते। एतत्प्रयत्नशैथिल्यमपशब्दान्प्रवर्तयतीत्यर्थः। अयं भावः—गवादिशब्दा एव साधवो

1. व्याकरणशास्त्रम्—क, घ.

न गाव्यादिशब्दा इति स्वरूपनियमः, साधूनेव प्रयुञ्जीत नासाधूनित्यदृष्टार्थः प्रयोगनियम इत्युभयविधोऽपि नियमो व्याकरणगम्यः। तत्र प्रयोगनियमे मन्वादिस्मृतिवत्प्रत्ययिततमपाणिन्यादिप्रणीतत्वान्मूलश्रुत्यनुमानं सुलभम्, प्रत्यक्षं च वाजसनेयशाखादिषु श्रूयते 'ब्राह्मणेन न म्लेच्छितवै' 'म्लेच्छो ह वा एष यदपशब्दः' इत्यादि। 'कृत्यार्थे' इत्यादिना कर्मणि तवैप्रत्ययः। प्रकृतिभूतम्लेच्छधातोर्विवरणम् 'म्लेच्छो ह वा एष यदपशब्दः' इति। ब्राह्मणेनापशब्दो न प्रयोज्य इत्यर्थः। तैत्तिरीयके च श्रूयते—'वाग्वै पराच्यव्याकृतावदत्ते देवा इन्द्रमब्रुवन्निमां नो वाचं व्याकुर्विति सोऽब्रवीद्वरं वृणै मह्यं चैवैष वायवे च सह गृह्याता इति तस्मादैन्द्रवायवः सह गृह्यते तामिन्द्रो मध्यतोऽवक्रम्य व्याकरोत्तस्मादियं व्याकृता वागुद्यते' इति। वाक् पराची एकरूपा अव्याकृता साध्वसाधुविवेचनशून्या अवदत् अभवत्। ते देवा इत्यादि स्पष्टम्। तां वाचम् इन्द्रः मध्यतः शरीरस्य मध्यम् उरःकण्ठादिकं प्रदेशम् अवक्रम्य व्याकरोत् साधुतया विभक्तवान्। तस्मादियं व्याकृता साधुतया विभक्ता उद्यते प्रयुज्यत इत्यर्थः। शाखान्तरीयं च वाक्यं पातञ्जलभाष्ये उदाहृतम्—'आहिताग्निरपशब्दं प्रयुज्य प्रायश्चित्तीयां सारस्वतीमिष्टिं निर्वपेत्' इति। एवमादिभिश्च प्रयोगनियमपरैर्वाक्यैरर्थप्रत्यायनरूपदृष्टार्थं शब्दप्रयोगमाश्रित्य 'एकः शब्दः सुष्ठु ज्ञातः सम्यक्प्रयुक्तः स्वर्गे लोके कामधुग्भवति' इति नियमोऽभ्युदयाय विधीयते, भोजनमाश्रित्य 'आयुष्यं प्राङ्मुखो भुङ्क्ते' इति नियमवत्। 'साधूनेव शब्दान्प्रयुञ्जीत, नासाधून्' इति वाक्याभ्यामेव समस्तसुशब्दापशब्दप्रयोगविधिप्रतिषेधसिद्धेर्नानन्तवाक्यकल्पनापत्तिः। साधुत्वासाधुत्वाभ्यामेव विधेयनिषेध्यसंग्रहान्नाननुगमः। अनादित्वे सत्यर्थप्रत्यायकत्वमेव साधुत्वम्। तद्विपर्ययश्चासाधुत्वम्। गाव्यादिष्वतिप्रसङ्गवारणाय सत्यन्तम्। हुंफडादिस्तोभेषु पादपूरणार्थतुहिचस्मेत्यादिषु चातिप्रसङ्गवारणाय विशेष्यम्। न चेदमाधुनिकीषु टिघुभादिसंज्ञासु[1] देवदत्तादिसंज्ञासु चाव्याप्तमिति वाच्यम्। 'व्यवहाराय नियमः संज्ञायाः संज्ञिनि क्वचित्। नित्य एव तु संबन्धो डित्थादिषु गवादिवत्' इति गोत्रसंज्ञासूत्रभाष्यकैयटसंमते पक्षे तासामप्यनादित्वात्। 'यास्वेताः स्वेच्छया संज्ञाः क्रियन्ते टिघुभादयः। अनपभ्रंशरूपत्वान्नास्त्यासामपशब्दता। हस्तचेष्टा यथा लोके तथा संकेतिता मताः। नासां प्रयोगेऽभ्युदयः प्रत्यवायोऽपि वा भवेत्' इति पक्षे तु तासामलक्ष्यत्वान्नाव्याप्तिः। आधुनिकसंज्ञानां साध्वसाधुबहिर्भावादेव 'रघुनाथः' इत्याधुनिकसंज्ञोपपत्तिः। अन्यथा 'पूर्वपदात्संज्ञायामगः' इति विहितस्य णत्वस्याकरणादसाधुत्वापत्तेः। [2]तदन्तर्भावपक्षेऽपि तत्र न णत्वम्। तथा सति संज्ञात्वभङ्गापत्तेः। णत्वेन चेत्संज्ञा रूढ्यर्थो गम्यते इति हि सूत्रार्थः। तदाहुरभियुक्ताः—'संज्ञाशब्दा अनादिप्रयुक्ता नियतानुपूर्वीका एव सिद्धाः। तत्रेदानीं कस्तद्विप-

1. आधुनिकटिघुभादिसंज्ञासु—क. 2. तदन्तर्भाव...इति हि सूत्रार्थः—घ पुस्तके न दृश्यते।

रीतं प्रयोक्तुमर्हति' इति । तदेतत् 'भृञोऽसंज्ञायाम्' इति सूत्रे भाष्यकैयटयोः स्पष्टम् । विस्तरस्तु शब्देन्दुशेखरादावनुसंधेय इत्यलमतिप्रसङ्गेन । प्रकृतमनुसरामः । न च गाव्यादिशब्दानामप्यनादिपरंपरया गवादिप्रत्यायकत्वात्तेषामपि साधुत्वापत्तिरिति वाच्यम । आदौ हि कदाचित्केनचित् गामानयेति प्रयोक्तव्ये करणापाटवादिना गावीमानयेत्युक्ते श्रोतृपुरुषेण गोशब्दं प्रयोक्तुमुद्यतस्य अशक्तिजोऽयं शब्द इति निश्चित्य सास्नादिमदर्थे आनीते व्युत्पित्सवस्तदुभयव्यवहारं पश्यन्तः अशक्तिजत्वमजानाना गावीशब्दस्यैव सास्नादिमदर्थे संज्ञासंज्ञिसंबन्धं व्युत्पद्य व्यवहरन्ति । तेभ्यश्च [1]शिक्षित्वा अन्येऽपीत्येवं प्रयोगप्रत्ययोः प्रयोक्तृपुरुषकरणापाटवादिरूपवाचकाशक्तिजतया मूलभूतगोशब्दोपस्थापनेनान्यथासिद्धत्वान्न गाव्यादिशब्दानामनादिवाचकत्वरूपं साधुत्वमध्यवसातुं शक्यते ।

ननु अशक्तिजत्वं वा कल्पनीयं वाचकत्वं वा । कोऽत्र विशेष इत्यत आह—

अन्यायश्चानेकशब्दत्वम् ॥ २३ ॥

चशब्द उक्तसमुच्चये । अनेकः शब्दो वाचको यस्य एकस्यार्थस्य सः अनेकशब्दः । तस्य भावस्तत्त्वम् । नीयत इति न्यायः । कर्मणि घञ् । 'घञबन्ताः पुंसि' इति नित्यपुंलिङ्गता । नञ्तत्पुरुषे 'परवल्लिङ्गम्—' इति पुंस्त्वम् । एकस्यानेकशब्दवाच्यत्वं युक्तं न भवतीति यावत् ॥ अदृष्टानेकशक्तिकल्पनापेक्षया प्रयोक्तृपुरुषाशक्तिजत्वस्यैव दृष्टस्य कल्पयितुमुचितत्वात् प्रयोगवेलायामदृष्टदोषदुष्टविकल्पापत्तेश्च । वाच्यवाचकयोरैककर्म्यावधारितस्य नियमस्य वाचकानेकत्वे बाधप्रसङ्गाच्च । तथा हि—गोशब्देन सास्नादिमानभिधीयते इत्याप्तवाक्याद्वाचकत्वग्रहदशायामभिधानक्रियाद्वारा तत्कर्मकरणयोर्वाच्यवाचकयोः 'अर्थैकत्वे द्रव्यगुणयोरैककर्म्यान्नियमः स्यात्' इति तार्तीयीकाधिकरणन्यायेन क्रयद्वारा एकहायन्यरुणिन्नोरिव नियमः परस्परान्वयरूपः संबन्धोऽवगतः । ततश्च गाव्यादेरपि सास्नादिमदर्थवाचकत्वस्वीकारे सास्नादिमत्कर्मकाभिधानक्रियायां गोशब्द एव करणमित्येवंरूपस्य नियमस्य व्युत्पत्तिकालावगतस्य बाधः स्यात् । तस्मादेकस्यैव वाचकता । इतरेषां तु पुरुषाशक्तिजतया वाचकशब्दोपस्थापकतैव, न वाचकता । हस्तपाणिकरादिशब्देषु त्वगत्यानेकशब्दत्वम् ।

ननु, अस्त्वेकस्य वाचकता इतरेषां त्वशक्तिजता । तथापि गवादिशब्दा एव वाचकाः साधवः, गाव्यादिशब्दास्त्वशक्तिजा इत्यत्र विनिगमकं किमित्यत आह—

1. शिक्षितत्वात् – क.

तत्र तत्त्वमभियोगविशेषात्स्यात् ॥ २४ ॥

तत्र गोगाव्यादिशब्देषु वाचकत्वावाचकत्वविसंवादे, तत्त्वं गवादिशब्दा एव वाचका न गाव्यादिशब्दा इति साध्वसाधुतत्त्वविवेचनम्, अभियोगविशेषात्स्यात् । व्याकरणशास्त्राभ्यासहेतुकं कूलंकषं ज्ञानमभियोगः । तत्कृतो विशेषः विविधलक्ष्यभेदपरिज्ञानम् । तस्मादभियोगविशेषात् निर्धारितं स्यात् ॥ गवादिशब्दा एव साधवो न गाव्यादिशब्दा इत्येवंरूपेषु साध्वसाधुस्वरूपनियमेषु व्याकरणस्मृतिरेव प्रमाणम् इत्युक्तं भवति । साधुस्वरूपनियमे च व्याकरणस्मृतेरन्या स्मृतिर्मूलम्, तस्याश्चान्येत्येवं स्मृतिपरंपरानुसंधेया । न चान्धपरंपरापातः । साधुत्वस्य [1]तत्तत्कालीनपुरुषगम्यत्वेन केवलानुमानगम्यत्वाभावात् । सर्वे हि स्वे स्वे काले गवादिशब्दान्प्रत्यक्षत उपलभन्ते । तत्र पूर्वतरवृद्धेभ्यो गवादिशब्दसत्तां गाव्यादीनां चासत्तामवधारयन्ति । सर्वकालमपि केचन वृद्धाः सन्तीति तत्प्रत्यक्षसंभवान्न कदाचिदपि प्रत्यक्षविच्छेदः । न चैतावता सर्वस्मिन्काले शब्दस्वरूपप्रत्यक्षमात्रसिद्धावपि साधुत्वस्य प्रत्यक्षतोऽसिद्धेर्नान्धपरंपरापरिहार इति वाच्यम् । न हि सर्वकालवर्तित्वादनादित्वमतिरिच्यते येन सर्वस्मिन्काले प्रत्यक्षतया सिद्धेषु साधुत्वं प्रत्यक्षतो न गृह्यते । सर्वकालवर्तित्वरूपानादित्वं च साधुत्वमभियुक्तस्मरणपरंपरया तत्तत्कालीनवृद्धप्रत्यक्षसधीचीनया सास्नादिमदर्थेषु गवादिशब्दानां स्वध्यवसानम् । गाव्यादिशब्देषु तु केवलप्रत्यक्षमात्रपरंपरा संभाव्येतापि । न च तन्मात्रेण साधुत्वनिश्चयः, अशक्तिजत्वस्यापि संभवात् । अतोऽभियुक्तस्मरणाभावान्न गाव्यादिशब्दानामनादित्वनिश्चय इति भवति वैषम्यम् ।

ननु गवादिशब्दोच्चारणाशक्तिर्गाव्यादिशब्दानामेव प्रयोगे निमित्तं न त्वन्येषाम् 'अय्या' 'अप्पा' इत्यादीनां प्रयोगे इत्यत्र किं विनिगमकमित्यत्राह—

तदशक्तिश्चानुरूपत्वात्[2] ॥ २५ ॥

चकार उक्तसमुच्चये । गवादिशब्दोच्चारणाशक्तिः गाव्यादिशब्दानामेव प्रयोगे निमित्तम्, न त्वन्येषाम्, 'अय्या' 'अप्पा' इत्यादीनाम् । कुतः । अनुरूपत्वात् । गाव्यादिशब्दा एव हि गाव्यादिशब्दस्वरूपमूलभूतगवादिशब्दस्मारणद्वारा अर्थं प्रत्याययन्ति, न तु तद्विजातीयाः । सारूप्यस्य स्मरणप्रयोजकत्वात् ॥

तदेतदृष्टान्तेन द्रढयति—

एकदेशाच्च विभक्तिव्यत्यये प्रत्ययः स्यात् ॥ २६ ॥

---

1. तत्तत्कालीनतत्तत्पुरुष—क, घ. 2. तदनुरूपत्वात् ।

चशब्दो व्युत्क्रमो विभक्तिव्यत्यये इत्यनन्तरं द्रष्टव्यः । व्याकरणशिक्षितेष्वेव शब्देषु विभक्तिविपर्यासेऽपि अर्थप्रत्ययो दृश्यते । यथा कुत इति पृष्टे 'अश्मकेभ्य आगच्छामि' इति वक्तव्ये 'अश्मकैरागच्छामि' इति मूर्खेणोक्ते श्रोतार एकदेशादश्मकशब्दात्प्रातिपदिकादुपलब्धात् 'अश्मकेभ्यः' इति शब्दस्मरणादर्थं प्रतियन्ति, तद्वद्गाव्यादिशब्दतोऽपि गवादिशब्दस्मृत्यार्थप्रत्ययो युक्तः स्यात् ॥ नापि 'तुल्यास्यप्रयत्नं सवर्णम्' 'ऋकारलकारयोः सावर्ण्यविधिः' इति परस्परविरोधादप्रमाणमिति । विरोधाद्विकल्पोपपत्तेः । एतेन 'उद्गातारः' इत्यादावपि विरोधः परिहृतः । 'यथोत्तरं मुनीनां प्रामाण्यम्' इति तु वैयाकरणसमयः । तथा सति परस्परविरोधे पूर्वपूर्वस्याप्रामाण्यमेव, सर्ववेष्टनस्मृतिवत् । अविरोधे तु प्रामाण्यमेव । एतेन 'वामदेवाड्ड्यड्ड्यौ' इत्यपि व्याख्यातम् । 'आदैच्' इति निर्देशादेव कुत्वशास्त्रं तद्व्यतिरिक्तविषयमिति न विरोधः । रक्षोहादिकमपि महाभाष्ये स्थितम् । तत्र दूषणभूषणानि वार्तिके भट्टाचार्यैः प्रपञ्चितानि तत एवानुसंधेयानि । तदेवं गवादिशब्दा एव साधवः, त एव प्रयोज्याः । गाव्यादिशब्दास्त्वशक्तिजत्वादसाधवः अप्रयोज्याः । उभयत्र च व्याकरणं प्रमाणमिति सिद्धम् । इति व्याकरणाधिकरणम् ॥

व्याकरणं प्रमाणं तदनुगता गवादिशब्दा एव वाचकाः साधवः प्रयोज्या इति स्थितम् । इदानीं वाचकप्रसङ्गाद्वाच्यांशनिर्धारणाय प्रवर्तिष्यमाणाकृत्यधिकरणोपोद्घातत्वेन लौकिकानां वैदिकानां च शब्दानां तदर्थानां चानन्यत्वं निर्णेतुं लोकवेदाधिकरणमारभ्यते ।

१०. लोकवेदाधिकरणम् ।

आकृत्यधिकरणे हि व्यक्तिः शब्दार्थ इति पूर्वपक्षः, सामान्यात्मा जातिरिति सिद्धान्तः । तत्र व्यक्तेः शब्दार्थत्वे आहवनीयशास्त्रं सकृच्छ्रुतमपि विनिगमनाविरहात्प्रतिव्यक्त्युपतिष्ठासया एकत्वे च तदनुपपत्त्या यावद्व्यक्ति भिन्नमेव सत्सर्वासु व्यक्तिषूपतिष्ठते । यथाहुर्वैयाकरणाः 'प्रतिलक्ष्यं शास्त्राणि भिद्यन्ते' इति । एवं च सामान्यविशेषशब्दयोरुभयोरपि व्यक्तिवाचित्वाविशेषेण सामान्यविशेषशास्त्रयोस्तुल्यबलत्वान्न बाध्यबाधकभावः । किंतु विकल्पः । आकृतेः शब्दार्थत्वे तु सामान्यशास्त्रेण होमत्वरूपव्यापकजातावभिहितायां तद्द्वारा यावत्सकलव्यक्त्युपस्थितिः, ततः प्रागेव विशेषशब्दाभिहितावान्तरजातिद्वारा तक्रकौण्डिन्यादिशब्दवद्विशेषशब्दस्य व्यक्तिविशेषवाचित्वाद्वा व्यक्तिविशेषप्रतीतिरिति शीघ्रप्रवृत्तेन विशेषशास्त्रेण मन्थरप्रवृत्तसामान्यशास्त्रस्य बाध इति फलभेदः । न ह्येवंफलकमिदमधिकरणं लोकवेदयोः पदपदार्थानामन्यत्वे लौकिकशब्दविषये तावदर्थवद्भवितुमर्हति । न हि 'ब्राह्मणेभ्यो दधि दीयतां तक्रं कौण्डिन्याय' इत्यादौ [1]पुंभिच्छानुसारिलौकिकवाक्यार्थनिर्णये धर्मानुपयुक्ते न्यायापेक्षास्ति, येन तत्रार्थवत्तदधिकरणं स्यात् । तथा वैदिकविषयेऽपि नार्थवद्भवितुमर्हति । लोकव्यवहारादेव हि वैदिकानामपि

1. इच्छानुसारि—क.

शब्दानामर्थनिर्णयेन भवितव्यम् । न चैतद्वैदिकानां लौकिकान्यत्वे घटते, तेषां लोकव्यवहारानुपातित्वेनोपायाभावात् । न च लोकव्यवहारानुपातित्वेऽपि यूपादिशब्दवदर्थनिर्णयोऽस्त्विति वाच्यम् । लोकसिद्धतक्षणादिसमभिव्याहारलक्षणोपायाद्धि यूपादिशब्दार्थनिर्णयः । तत्र समभिव्याहृततक्षणादिपदानामपि लौकिकान्यत्वे तादृशोपायाभावात्स कथं स्यात् । तस्माल्लौकिकवैदिकानामन्यत्वे अनारम्भणीयमेवेदमाकृत्यधिकरणं स्यात् । तदुभयेषामनन्यत्वे तु लोके कृतः शब्दार्थनिर्णयस्तत्रानुपयुक्तोऽपि वेदे उपयुक्तो भविष्यति इत्याकृत्यधिकरणोपोद्घातत्वेन लोकवेदयोः पदपदार्थानामन्यत्वानन्यत्वे विचार्येते । वर्णाभेदेऽपि नियतानियतस्वरादिभेदाल्लोकवेदयोः पदान्यत्वम् । वेदे हि नियतः स्वरः । लोके त्वनियतः । यद्यपि व्याकरणे स्वरविधौ छन्दोऽधिकाराभावाद्भाषायामपि स्वरनियम आवश्यकः; अत एव 'अल्युपोत्तमम्' इति स्वरविशेषं प्रकृत्य 'विभाषा भाषायाम्' इति लोके विकल्पविधानं संगच्छते, तथापि 'एकश्रुति' इत्यनुवृत्तौ 'विभाषाच्छन्दसि' इति लोके ऐकश्रुत्यस्य चातुःस्वर्येण विकल्पविधानान्न दोषः । अत्र हि 'अच्छन्दसि' इति च्छेदः । अत एव पस्पशाह्निकभाष्ये 'श्वेतो धावति' इति द्वयर्थं वाक्यमित्युक्तं संगच्छते । तत्र हि 'श्वा' इत्यन्तोदात्तम् 'ऊडिदम्' इत्यादिना । 'इतः' इत्यपि तथा । 'एकादेश उदात्तेनोदात्तः' इति एकार उदात्तः । तथा च 'श्वा इतः' इत्यर्थे एकाराकारावुदात्तौ । 'शुक्लः' इत्यर्थे तु घृतादित्वादन्तोदात्तत्वे अकार उदात्तः । 'अनुदात्तं पदमेकवर्जम्' इत्येकारोऽनुदात्तः । तथा च स्वरभेदात्सकृदुच्चारितस्य कथं द्वयर्थता स्यात् । अत एव च 'एकश्रुतिःस्वरसर्वनाम' इति 'दाण्डिनायन—' इति सूत्रे भाष्यं संगच्छते । यथा सर्वनामशब्दास्तेतदादयः सर्वपदस्थाने प्रयुज्यन्ते, एवं सर्वस्वरस्थाने एकश्रुतिः प्रयोक्तव्येत्यर्थः । 'विभाषा भाषायाम्' इत्यत्र भाषाग्रहणं तु चातुःस्वर्येण प्रक्रमे पाक्षिकानुदात्तलाभायेत्यन्यत्र विस्तरः । 'देवाः' इति लोके, 'देवासः' इति वर्णागमश्छन्दसि । 'आत्मना' इति लोके, 'त्मना देवेषु' इत्यादौ आकारलोपश्छन्दसि । 'उद्ग्राहः' 'निग्राहः' इति लोके, 'उद्ग्राभं च निग्राभं च' इति भकारविकारश्छन्दसि । तथा वेदवाक्यान्यध्याय एवोच्यन्ते, लौकिकानि त्वनध्यायेऽपि । तथा वेदवाक्यान्युपनीतत्रैवर्णिकैरेव प्रयुज्यन्ते, लौकिकानि तु तदन्यैरपि । तथा इमे लौकिका इमे वैदिका इति भेदेन व्यपदेशः । इत्येवं नियतस्वरादितद्विपर्ययतो लोकवेदयोः स्पष्टः पदभेदः । स्पष्टभेदकस्वरूपादिशब्दसाहचर्यादपि लोकवेदयोः पदभेदः । पदभेदादेव चार्थोऽपि भिद्यते । 'संज्ञा चोत्पत्तिसंयोगात्' इति त्रैतीयीकाधिकरणन्यायात्, 'उत्ताना वै देवगवा वहन्ति' इति वाक्यशेषे लोकविलक्षणार्थदर्शनाच्च । ये उत्ताना वहन्ति ते देवानां गोशब्दवाच्याः इत्येवं लोकविलक्षणवस्त्वन्तरस्यैवानेन गोशब्दवाच्यत्वप्रतिपादनेन वाच्यभेदावश्यंभावात् । त्रिवृच्चर्वाश्वबालादिशब्दानां च लोकतोऽर्थान्तरपरत्वं स्पष्टमुपपादितमनुपदमेव । अतो लोकवेदयोः पदपदार्थानामन्यत्वमिति प्राप्ते, सिद्धान्तयति—

प्रयोगचोदनाभावादर्थैकत्वमविभागात् ॥ २७ ॥

अर्थस्य शब्दरूपस्य अभिधेयरूपस्य च वस्तुनः एकत्वं लोकवेदयोरङ्गीकर्तव्यम्। कुतः। प्रयोगचोदनाभावात्। प्रयुज्यत इति प्रयोगः वाक्यम्। तस्य चोदना उच्चारणा। तस्याः भावात्[1], अभावात् इति च च्छेदः। लोकवेदयोः पदपदार्थानामन्यत्वे वैदिकपदानां लोकव्यवहाराननुपातित्वेन अगृहीतसंगतिकतया वेदवाक्यार्थबोधाय वाक्योच्चारणस्यासंभवात्, अनन्यत्वे तत्संभवाच्चेत्यर्थः। यदुक्तं नियतस्वरादिभेदात्पदान्यत्वम्, ततश्चार्थान्यत्वमिति तत्राह—अविभागादिति। वर्णानामभेदादित्यर्थः॥ तथा हि— य एव लौकिका वर्णास्त एवामी वेदेऽपीति लौकिकाभेदेन प्रत्यभिज्ञायन्ते वैदिका वर्णाः। वर्णात्मकं च पदं तदभेदान्न भिद्यते। तथा वर्णसमूहात्मकं वाक्यम्। तदेकत्वाच्चार्थैकत्वम्। [2]पदैकत्वाच्च संज्ञाधिकरणन्यायस्यात्राप्रवृत्तिः। ननु वर्णैक्येऽपि धर्मभेदात्पदभेदो दुर्वारः। उक्तं च—'पदावधारणोपायान्बहूनिच्छन्ति सूरयः। क्रमन्यूनातिरिक्तत्वस्वरवाक्यस्मृतिश्रुतीः' इति। जरा राजेत्यादिषु क्रमभेदादन्यत्वम्। ब्रह्म ब्राह्मण इत्यादिषु न्यूनातिरेकवशादन्यत्वम्। इन्द्रशत्रुरित्यादौ पूर्वपदप्रकृतिस्वरान्तोदात्तत्वाभ्यामन्यत्वम्। पदान्तरसमभिव्याहाररूपवाक्यादप्यन्यत्वम्। यथा 'पचते' इति पदं नामत्वेनाख्यातत्वेन च संभाव्यमानम् 'भोक्तुकामः पचते' 'पचते दक्षिणां देहि' इति समभिव्याहाराद्भेदेन निश्चीयते। व्याकरणस्मृतेरपि पदान्यत्वम्। 'अश्वस्त्वम्' इत्यत्र 'अश्वः' इति सुबन्तम् 'टुओश्वि गतिवृद्धयोः' इति धातूत्पन्नं तिङन्तमध्यमपुरुषैकवचनं च। प्रथमान्ताख्यातपदयोः सामानाधिकरण्यमिह श्रुतिः। 'यातः पुनरायाति' इत्यत्र 'आयाति' इत्याख्यातपदसामानाधिकरण्यात् 'यातः' इति प्रथमान्तं नाम, 'देवदत्तयज्ञदत्तौ यातः' इत्यत्र च द्विवचनान्तप्रातिपदिकसामानाधिकरण्यात् 'यातः' इत्याख्यातं निश्चीयते, [3]इत्यस्ति श्रुत्या पदभेदः। एवं च क्रमादिनियतानियतस्वरत्वादिधर्मभेदात्पदभेदः स्यादिति चेत्, नैष दोषः। पद्यते गम्यते अनेनेति व्युत्पत्त्या गमकं पदम्, तद्रूपस्य च न धर्ममात्रभेदाद्भेदः। किंतु अर्थप्रतीत्यौपयिकधर्मभेदादेव। जरा राजा, ब्रह्म ब्राह्मणः, इन्द्रशत्रुः इत्यादौ च क्रमादिभेदादर्थभेदो लोकसिद्धः। नैवं लोकवेदयोरर्थौपयिकधर्मभेदोऽस्ति। नियतस्वरत्वानियतस्वरत्वानध्यायवर्जनावर्जनलौकिकवैदिकव्यपदेशभेदानामर्थप्रतीतिविशेषौपयिकत्वासंभवात्। 'देवासः' 'त्मना' इत्यादावपि लौकिकेभ्यो न्यूनातिरेककृतस्वरूपभेदे सत्यपि अर्थप्रतीत्यौपयिकधर्मभेदाभावान्न पदभेदः। तेभ्योऽर्थभेदानवगमात् एकदेशन्यूनातिरेकमात्रेऽपि तदभेदप्रत्यभिज्ञानाच्च, चतुरङ्गुलषडङ्गुलवत्। यदुक्तं स्वरुयूपादिसाहचर्यात्सर्वेषामपि वैदिकपदानां लौकिकान्यत्वमिति, तन्न। न हि केषांचिल्लौकिकभेदमात्रेण सर्वेषां तथात्वम्, प्रमाणाभावात्। अन्यथा सर्वेषां वैदिकपदानां लौकि-

1. भावात्संभवात्—क, ख. 2 तदेकत्वात्—ख, ग. 3. इत्यत्र— ख, ग.

कान्यत्वे व्यवहारानुपातित्वाभावेन तेभ्योऽर्थावगम एव न स्यात्। यच्चोक्तम् 'उत्ताना वै देवगवा वहन्ति' इत्यर्थभेदज्ञापकमिति, तदपि न। तत्र ये उत्ताना वहन्तीत्युद्दिश्य गोशब्दवाच्यत्वं न विधातुं शक्यम्, उत्तानवहनस्याप्रसिद्धत्वात्। अतो वायुपुराणोक्तरीत्या त्रैलोक्यभ्रमणवशादेवा अपि कदाचिदिमं लोकमुपरि पश्यन्तीत्येतां दृष्टिमाश्रित्य एतेषामेव गवां दक्षिणात्वादिना देवसंबन्धिनामुत्तानवहनं स्तुत्यर्थमनुकीर्त्यत इति न तद्भेदे ज्ञापकम्। त्रिवृच्चर्वाश्ववालाद्यर्थभेदे सत्यपि सर्वेषां भेदस्तु स्वरूपादिभेदस्य तद्भेदनिरासेनैव निरस्तः। अतः सिद्धमेकत्वं लोकवेदयोः पदपदार्थानाम्। इति लोकवेदाधिकरणम्॥

तदेवं सिद्धे लोकवेदयोः पदपदार्थानन्यत्वे गवादिशब्दानधिकृत्येदं विचार्यते। किं व्यक्तिः शब्दार्थः, उत आकृतिविशिष्टा व्यक्तिः, अथवा आकृतिरेवेति। तत्र पूर्वपक्षयति—

प्रयोगचोदनाभावादर्थैकत्वमविभागात्॥ २८॥

व्यक्तिः शब्दार्थो नाकृतिः। कुतः। प्रयोगचोदनाभावात्, अभावादिति च च्छेदः। 'व्रीहीनवहन्ति' 'पशुं संज्ञपयन्ति' 'अश्वं नयन्ति' इत्यादिप्रयोगविधयो हि व्यक्तिवाचित्व एव संभवन्ति नाकृतिवाचित्वे, आकृतेरवहननाद्ययोग्यत्वात्। ननु सति संभवे आकृतिः शब्दार्थो भवतु 'गाः पश्य' इत्यादौ; 'व्रीहीनवहन्ति' इत्यादौ त्वसंभवे व्यक्तिः शब्दार्थ इत्यत आह—अर्थैकत्वमिति। एकस्य शब्दस्य एकार्थत्वमेव युक्तं न त्वनेकार्थत्वम्, अनेकशक्तिकल्पनाप्रसङ्गात्, प्रयुक्ते शब्दे अन्यतरनिर्धारणाभावेन व्यवहारानुपपत्तेश्च। अष्टदोषदुष्टविकल्पापत्तेश्च। 'गोशब्देन सास्नादिमानभिधीयते' इत्याप्तवाक्याद्वाच्यवाचकताग्रहदशायामभिधानक्रियाकरणकर्मणोः सास्नादिमद्व्यक्तिगोशब्दयोरभिधानक्रियाद्वारा 'ऐककर्म्याश्रियम: स्यात्' इति तार्तीयीकन्यायात्प्रथममवगतस्य संबन्धस्य नियमरूपस्य कदाचिद्व्यक्तिपरिहारेणाकृतिवाचित्वे बाधप्रसङ्गाच्च। ननु केवलव्यक्तेः शब्दार्थत्वे यस्यां व्यक्तौ गोशब्दशक्तिग्रहः ततोऽन्यत्र तत्प्रयोगो न स्यात्। न च गोत्वजात्या सर्वव्यक्तीः क्रोडीकृत्य शक्तिग्रहान्न दोष इति वाच्यम्। जातिर्हि शब्दादप्रतीयमाना न क्रोडीकर्तुं प्रभवति। केवलव्यक्तिवाचित्वे चाशब्दार्थत्वात्सा कथं शब्दात्प्रतीयेतेत्यत आह—अविभागादिति। तादात्म्यादविनाभावाच्च जातेः प्रतीतिः संभवतीत्यर्थः॥ शक्तिग्रहे च जातिरुपलक्षणं न तु विशेषणमिति तस्याः प्रतीतिमात्रेण शब्दार्थत्वं न शङ्कयम् 'योऽयं शुक्लवासाः स देवदत्तः' इतिवत्। तत्र हि उपलक्षणभूतं वासोऽनभिधायैव देवदत्तोऽभिधीयते। एवमत्राप्युपलक्षणमात्रत्वान्न जातिरभिधीयते। व्यक्तय एव केवला अभिधीयन्ते। एकोपलक्षणत्वादेव व्यक्तिवाचित्वे अनेकार्थत्वदोषोऽपि निरस्तः।

११. आकृत्यधिकरणम्।

अथवा किमेतावता श्रमेण । आकृतिविशिष्टा एव व्यक्तयोऽभिधीयन्ताम् । सूत्रं चैवं योजनीयम् । 'व्रीहीनवहन्ति' इत्यादिप्रयोगविध्यनुसाराद्व्यक्तीनामभिधेयता । आकृतिविशिष्टानामेव व्यक्तीनां शब्दार्थत्वादर्थैकत्वं न त्वनेकार्थता, आकृत्या व्यक्तीनामनुगमात् । आकृतेश्च व्यक्तितादात्म्यादविनाभावाद्वा प्रतीतिसत्त्वाद्विशेषणत्वं युज्यते । तथा च विशेषणभूतया क्रोडीकृतासु सर्वासु व्यक्तिषु शक्तिग्रहश्चोपपद्यते इति । तदेवं केवलव्यक्तीनां वा जातिविशिष्टानां वाभिधेयता, न तु केवलमाकृतेः ।

आकृतिमात्रवाचित्वे बाधकमाह—

अद्रव्यशब्दत्वात् ॥ २९ ॥

द्रव्यम् आश्रयव्यक्तिः । तद्वृत्तिधर्मवचनः शब्दः द्रव्यशब्दः । तस्य भावस्तत्त्वम् । एकार्थवृत्तित्वस्यासंभवादिति यावत् । 'षड्भावो देयाः, द्वादश देयाः' इत्यादौ षडादिशब्दानां गोशब्देन एकार्थवृत्तित्वलक्षणं सामानाधिकरण्यं गम्यते । तदेतदाकृतेरेव शब्दार्थत्वेऽनुपपन्नं स्यात्, गोशब्दस्य षडादिशब्दानां च जातिसंख्यावचनानां भिन्नार्थवृत्तित्वात् । व्यक्तिवचनत्वे तु तेषां तदुपपद्यते । विशिष्टव्यक्तिवाचित्वे तु विशेषणभेदे सत्यपि विशेष्याभेदात्तदुपपद्यते । अतो न केवलमाकृतिवाचिता ॥

आकृतिमात्रवाचित्वे बाधकान्तरमाह—

अन्यदर्शनाच्च ॥ ३० ॥

'यदि पशुरुपाकृतः पलायेतान्यं तद्वर्णं तद्वयसमालभेत' इत्यन्यशब्दो दृश्यते । यद्याकृतिरेव वाच्या, तर्ह्यन्यस्मिन्नालभ्यमानेऽपि सैवाकृतिरित्यन्यशब्दो नोपपद्येत । केवलव्यक्तिवाचित्वे तूपपद्यते । विशिष्टव्यक्तिवाचित्वेऽपि विशेष्यभेदमादाय तदुपपत्तिः । तस्मादपि नाकृतिरेव वाच्या ॥

इति प्राप्ते, सिद्धान्तयति—

आकृतिस्तु क्रियार्थत्वात् ॥ ३१ ॥

तुशब्दः पूर्वपक्षव्यावृत्तौ । आकृतिः गोत्वादिजातिः । सैव शब्दार्थः, न तु व्यक्तिः । कुतः । क्रियार्थत्वात् आकृतेर्वाच्यत्वे सत्येव 'श्येनचितं चिन्वीत' इत्यादिवाक्यानां श्येनसदृशाग्न्याख्यस्थण्डिलविशेषनिष्पादकचयनादिक्रियाप्रतिपादकत्वसंभवात्, व्यक्तेर्वाच्यत्वे तदसंभवात् ॥

तथा हि—चेः, किप्, इति चानुवृत्तौ 'कर्मण्यग्न्याख्यायाम्' इति सूत्रात्कर्मण्युपपदे चिनोतेरग्न्याख्यस्थण्डिलविशेषे कर्मण्येव वाच्ये किप्प्रत्ययो भवतीत्यर्थकात् श्येनशब्दे कर्मवाचके उपपदे चिनोतेः किप्। श्येनशब्दस्तत्सदृशे लाक्षणिकः। श्येन इव चीयते श्येनचित् अग्न्याख्यस्थण्डिलविशेषः। तं चिन्वीत चयनेन कुर्यात्। 'ज्योतिष्टोमेन यज्ञेन यजेत' 'टित्करणं करोति' इत्यादिवत्सामान्यविशेषभावेन कथंचित्पुनरुक्तिपरिहारः। श्येनसदृशमग्न्याख्यस्थण्डिलविशेषं चयनेन निष्पादयेदित्यर्थः। श्येनसादृश्यं च नैकया व्यक्त्या, तदन्वये शब्दार्थविलोपप्रसङ्गात्। नापि सर्वाभिर्व्यक्तिभिः; असंभवात्, अतीतानागतानां वर्तमानानां च व्यवहिताव्यवहितानां सकृदुच्चारितेन श्येनशब्देन युगपद्बुद्धयनारोहात्, सकृदुच्चरितस्य सकृदर्थप्रत्यायकत्वनियमात्, एकस्य पदस्यानेकार्थत्वापाताच्च। तथा चानन्तशक्तिकल्पनाद्युक्तदोषापातात्। न च जातेरुपलक्षणत्वान्न दोष इति वाच्यम्। एवमपि शक्त्यानन्त्यस्य तदवस्थत्वात्। तथा हि—देवनविभीतकरथावयवात्मकमक्षत्रयमेकापवरकस्थमधिकृत्य कश्चिदाह 'य एतेऽस्मिन्नपवरके [1]स्थितास्तेऽक्षशब्दवाच्याः[2]' इति। तत्र यद्यपि व्युत्पत्तिसमये अपवरकस्थितिरुपलक्षणमासीत्तथापि तदनादरेणान्यत्र स्थिता अपि व्यक्तीरक्षशब्दोऽयं स्वरूपेणैवाभिधत्ते इति भवति शक्तित्रयम्। एवमिहापि व्युत्पत्तिसमये जातेरुपलक्षणत्वेऽपि तामस्पृशन्नेव सर्वा अपि व्यक्तीः प्रातिस्विकतत्तत्स्वरूपेणैवाभिधत्ते इति शक्त्यानन्त्यं दुर्वारम्। अभिधानसमये जातिसंस्पर्शाभावेन शब्दान्निर्विकल्पकस्यैवापाताच्च। जात्यादिधर्मविशिष्टज्ञानं हि सविकल्पकम्। न चैतद्दोषपरिहारायाभिधानसमयेऽपि जातेरुपलक्षणत्वं स्वीक्रियत इति वाच्यम्। एवं तर्हि 'नागृहीतविशेषणा विशेष्यबुद्धिरुत्पद्यते' इति न्यायेन जात्यभिधानावश्यंभावे तत एव व्यक्तेः प्रतीतिसिद्धेः अभिधेयत्वासंभवात्। एतेन विशिष्टाभिधानमपि प्रत्युक्तम्। किंच 'गामानय' इत्युक्ते 'गोव्यक्तिषु का गौरानेया' इति भवति संशयः इति न व्यक्तीनामभिधेयता, शब्दस्य निश्चयजनकत्वात्। गोसामान्यरूपजातेस्तु गोशब्दान्निश्चयात्मिका बुद्धिर्भवतीति स्यात्तस्या अभिधेयता। एवं श्येनादिशब्देऽप्यूह्यम्। एवं च श्येनजातिसदृशाग्न्याख्यस्थण्डिलविशेषनिष्पादकचयनक्रियायामनुग्रहाय जातेरभिधेयता। जातिसादृश्यं च तदुपस्थितव्यक्तिद्वारा।

अथ जातिवाचित्वे उक्तबाधकान्यनूद्य निराकरोति—

न क्रिया स्यादिति [3]चेन्नार्थान्तरे विधानं न द्रव्यमिति चेत्तदर्थत्वात्प्रयोगस्याविभागः ॥ ३२ ॥

विधानमित्यनन्तरम् 'इति चेत्' इत्यनुषज्यते। न द्रव्यमित्यत्र तु तस्यानुषङ्गो न भवति,

1. अधुना स्थिताः—क, घ. 2. शब्दाभिधेयाः—क, ग, घ. 3. चेदर्थान्तरे।

वाक्यान्तरेण व्यवहितत्वात् । तथा च सूत्रकारो वक्ष्यति 'व्यवायान्नानुषज्यते' इति । अतस्तत्र 'इति चेत्' इति पृथगुपात्तम् । बाधकत्रयमप्येकेनैव हेतुना परिहियत इति युगपत्तदनुवादः । तदर्थत्वादित्यतः पूर्वं नेत्यध्याहारः । तथा च, न क्रिया स्यादिति चेन्न तदर्थत्वात्प्रयोगस्याविभागः, नार्थान्तरे विधानमिति चेन्न तदर्थत्वात्प्रयोगस्याविभागः, न द्रव्यमिति चेन्न तदर्थत्वात्प्रयोगस्याविभागः इति त्रीणि वाक्यानि संपन्नानि । तत्र प्रथमस्यायमर्थः—जातेर्वाच्यत्वे तत्र अवहननादिक्रिया न स्यादिति चेत्तन्न । कुतः । अवहननादिप्रयोगस्य तदर्थत्वात् व्यक्त्यर्थत्वेनैव बोधनात् । ननु तत्र व्रीह्यादिशब्दानामाकृतिवाचित्वे कथमवहननादेर्व्यक्त्यर्थता, तत्राह—अविभाग इति । न हि जातिर्नाम व्यक्तितः पृथग्भूता पदार्थान्तरं शब्दाद्गम्यते, किंतु व्यक्तितादात्म्यापन्नैव । एकमेव हि वस्तु विशेषात्मना सामान्यात्मना च गम्यते । तत्र शब्दतः सामान्यात्मनैव गम्यत इति सामान्यमेव शब्दार्थः । सामान्यात्मना प्रतीते विशेषवस्तुनि च क्रियासंबन्धो न विरुध्यते, सामान्यस्य विशेषानतिरेकात् । द्वितीयं तु वाक्यमेवं योजनीयम्— जातेर्वाच्यत्वे 'अन्यं तद्वर्णं तद्वयसम्' इत्यर्थान्तरे विधानं न स्यादिति चेत्तन्न, तदर्थत्वात् इत्यादि पूर्ववत् । जातिव्यक्त्योरनतिरेकात् व्यक्त्यभिप्रायेणान्यत्वमुपपद्यत इति भावः । तृतीयं त्वेवं योज्यम्—आकृतेर्वाच्यत्वे 'षड्गावो देयाः' इत्यादौ गवादिद्रव्यं षट्त्वाद्याश्रयतयोपदिश्यमानं युक्तं न स्यात् । 'न द्रव्यवचनम्' इति पाठे तु गवादिद्रव्याश्रयषट्त्वादिप्रतिपादनं न स्यादिति चेत्तन्न, तदर्थत्वादिति पूर्ववत् । यदा तु जातिव्यक्त्योर्भेद एवाश्रीयते, तदा जातौ प्रोक्षणादिबाधादेव लक्षणया तत्र व्यक्तिपरत्वम् । न तदर्थत्वादित्यादि त्वेवं योज्यम् । प्रयुज्यत इति प्रयोगः । प्रोक्षणादिसंयोगेन प्रयुज्यमानस्य गवादिपदस्य तदर्थत्वात् लक्षणया व्यक्तिवाचित्वान्नोक्तदोषत्रयम् । अविभागः जातिव्यक्त्योरविनाभावश्च लक्षणापादकः शक्यसंबन्धः इति । तत्र 'पशुना यजेत' 'अरुणया गवा क्रीणाति' इत्यादौ यत्र करणत्वश्रवणं तत्रामूर्तयोरपि जातिगुणयोर्द्रव्यपरिच्छेदद्वारा मुख्यमेव करणत्वम् । द्वारवदेव हि कारणं करणमित्युच्यते । 'स्थाल्यामपो गृह्णाति' इत्यादावधिकरणत्वमपि द्रव्यस्यैव; न जातेः, असंभवात् । तथा 'विप्राय गां ददाति' इत्यादौ संप्रदानत्वादिकमपि द्रव्यप्रतिग्रहीतृत्वादिलक्षणं जातेरमूर्तत्वान्न संभवतीति व्यक्तिपरतैव विप्रादिशब्दानामित्याद्यूह्यम् । इत्याकृत्यधिकरणम् ॥

इति प्रथमाध्याये तृतीयः पादः ॥

चतुर्थः पादः ॥

निर्मथ्य निगमसिन्धून्विविधन्यायाभिधानमन्थानैः ।
धर्मसुधामुद्धरते भूयो मुनये नमोऽस्तु जैमिनये ॥

प्रमाणाध्याये प्रथमपादे विध्यर्थवादमन्त्रनामधेयात्मकवेदस्य विध्यंशे प्रामाण्यं विचार्य, द्वितीये अर्थवादमन्त्राणां प्रामाण्यं विचार्य, विध्यर्थवादमन्त्रमूलकस्मृत्यादीनां तृतीये प्रामाण्यं विचार्य, चतुर्थपादेऽस्मिन्नामधेयभागस्य[1] प्रामाण्यं विचार्यते ॥

तदिह 'उद्भिदा यजेत' इत्याद्युदाहृत्य चिन्त्यते, किमत्रोद्भिदादिपदानां धर्मप्रामाण्यमस्ति, उत नेति। नेति ब्रूमः। तथा हि—विध्यर्थवादमन्त्रभागानां विधानस्तुतिप्रकाशनैर्धर्मे प्रामाण्यं व्यवस्थापितं प्राक् । तत्र नामधेयभागस्य किं विधिभागेऽन्तर्भावः, उतार्थवादभागे, आहोस्विन्मन्त्रभागे। आद्येऽपि नामधेयभागस्य विध्यन्तर्भावः किं साध्याभिधानात्, साधनाभिधानाद्वा, गुणविधानेनेतिकर्तव्यतान्तर्भावाद्वा, स्वरूपेणैव तदन्तर्भावाद्वा । नाद्यः, उद्भिदादिशब्दस्य फलेष्वप्रसिद्धत्वात् । न द्वितीयः, भावनायाः समानपदोपात्तधात्वर्थावरुद्धत्वेन तत्र साधनान्तरसमर्पकत्वासंभवात् । न च धात्वर्थ एव यागो नाम्ना परिच्छिद्यत इति वाच्यम्, प्रवृत्तिविशेषकरत्वाभावेन वैयर्थ्यात् । न तृतीयः, उद्भिदादिरूपस्य लोके गुणत्वेनाप्रसिद्धत्वात्, 'यागेन पशून्कुर्यात्' 'उद्भिदा यागं कुर्यात्' इति वाक्यभेदप्रसङ्गात्, उद्भिद्वता यागेनेत्यर्थे मत्वर्थलक्षणादोषाच्च। न चतुर्थः, जुह्वादिवदङ्गविधिविधेयत्वाभावेन नामस्वरूपस्य इतिकर्तव्यतान्तर्भावानुपपत्तेः । न हि 'जुह्वा जुहोति' इत्यादिवत् 'नाम्ना इदं कुर्यात्' इति विधिरस्ति । उद्भिदादिशब्दस्य नामत्वासंभवाच्च । न ह्युद्भिदादिशब्दो रूढया कर्मणि प्रसिद्धः । नापि योगेन, ऊर्ध्वविदारणसाधनखनित्रादावेव तस्य सत्त्वात् । नापि मुख्यद्वितीयः, उद्भिदादिनामधेयतः स्तुतेरनवगमात् । नापि मुख्यतृतीयः, वैदिकानां तत्र मन्त्रप्रसिद्धयभावात् । अतो नामधेयभागस्य न धर्मे प्रामाण्यमिति पूर्वः पक्षः ।

सिद्धान्तयति—

उक्तं समाम्नायैदमर्थ्यं तस्मात्सर्वं तदर्थं स्यात् ॥ १ ॥

1. नामधेयस्य—क, घ.

समाम्नायस्य समस्तस्य वेदस्य ऐदमर्थ्यम् अस्मै धर्मप्रमितिजननायायमिदमर्थः अर्थेन नित्यसमासः, तस्य भावः ऐदमर्थ्यम् । उक्तम् अध्ययनविधिवशादर्थवादाधिकरणे व्यवस्था-

१. उद्भिदादिशब्दानां यागनामतयाप्रामा- ण्याधिकरणम् ।

पितम् । तस्मात् तथा व्यवस्थापितत्वात् । उद्भिद्बलभिदादिसर्वनामधेयमपि तदर्थं धर्मप्रमितिजननार्थं स्यात् । ततश्चाध्ययनविधिपरिगृहीतस्य नामधेयभागस्यापि विध्येकवाक्यतया प्रामाण्येन भाव्यमित्येतावदिहाधिकरणे स्थितम् ॥ तदेतदर्थवादाधिकरणे विचारितमपि करिष्यमाणगुणविधिनामधेयविचाराय स्मार्यते । यदि हि उद्भिदादिपदानां प्रामाण्यमविचार्यैव गुणविधिनामधेयविचारः क्रियेत, तर्हि तद्विचारस्य स्वातन्त्र्यापत्त्या प्रमाणाध्यायासंगतिः स्यात् । नामधेयप्रामाण्यविचारपूर्वकमेव गुणविधिनामधेयविचारे तु विचारितनामधेयप्रामाण्यप्रतिष्ठार्थत्वाद्गुणविधिनामधेयविचारस्य नासांगत्यमिति फलति । अतोऽत्र नामधेयभागस्य व्यवस्थापितमपि धर्मप्रामाण्यमिहावश्यं स्मारणीयम् । तदेतत् 'उक्तम्' इत्यनेन ध्वनितम् । तस्य हि उक्तं न विस्मर्तव्यमित्यर्थः ।

तदेवं नामधेयभागस्य विध्येकवाक्यतया सिद्धे प्रामाण्ये 'उद्भिदा यजेत' इत्यत्र भवत्येषा चिन्ता, किमुद्भिच्छब्दो गुणविधिः, उत नामधेयमिति । गुणविधिरिति ब्रूमः । नामधेयत्वे हि यजिना यावती प्रवृत्तिः, तावत्येव नाम्नापि भवति न ततोऽतिशयितेति नाम्नो नैरर्थक्यं स्यात् । अतः उद्भिनत्ति ऊर्ध्वं विदारयतीति व्युत्पत्त्या उद्भिच्छब्दस्य खनित्रादिपरत्वमाश्रित्य प्रकृतज्योतिष्टोमयागानुवादेन खनित्रलक्षणगुणविधिरिति युक्तमाश्रयितुम् । प्रकृतो हि ज्योतिष्टोमयागः, ताण्डकब्राह्मणे ज्योतिष्टोमानन्तरमेव उद्भिदाद्याम्नानात् । यद्यपि, ताण्डके एकाहब्राह्मणे प्रथमेऽध्याये 'प्रजापतिर्वा इदमेक आसीत्' इत्यादिना ज्योतिष्टोमं प्रस्तुत्य, 'एष वाव प्रथमो यज्ञो यज्ञानाम्' इति तस्य प्राथम्यं विधाय, 'गौश्चाश्वतरश्च' इत्यादिना दक्षिणाविधानेनोपसंहृत्य, 'अथैष गौः अथैष आयुः' इत्यादिना गवायुर्विश्वजिदाद्येकत्रिकान्तान्क्रतूननुक्रम्य, द्वितीयाध्याये व्रात्यस्तोमादींश्चातुर्मास्यसोमान्तान्क्रतूननुक्रम्य, तृतीयेऽध्याये उपहव्यादीन्द्विरात्रान्तान्क्रतूननुक्रम्य, चतुर्थेऽध्याये 'अथैष राट्' इत्यादिना राड्विराडौपशदपुनःस्तोमचतुष्टोमान्क्रतूननुक्रम्य, सप्तमखण्डिकायाम् 'असुराणां वै बलः' इत्यादिना उद्भिद्बलभिदावनुक्रान्तौ । अतः उद्भिद्वाक्ये यजिना बहुव्यवहितस्य ज्योतिष्टोमस्य कथमनुवाद इति, तथापि गवायुरादीनामप्यत्रोदाहरणत्वान्न दोषः । नन्वेवमुद्भिच्छब्दस्य गुणविधित्वे तत्र यागस्य साध्यत्वेनान्वयात्पशुकामपदस्यानन्वयापत्तिरिति चेत्, तर्हि ज्योतिष्टोममाश्रित्य उद्भिद्गुणस्य फलाय विधिरस्तु । तत्र तृतीयानिर्देशात्करणभूतमुद्भित्फले विधीयते । तच्च कुत्र करणभूतमित्यपेक्षायां संनिधानात्प्रकृतयागं प्रतीति गम्यते । ततश्च ज्योतिष्टोमयागसाधनेन उद्भिदा पशूनभावयेदिति वचनव्यक्तिः संपद्यते । इति प्राप्ते, सिद्धान्तयति—

अपि वा नामधेयं स्याद्यदुत्पत्तावपूर्वमविधायकत्वात् ॥ २ ॥

अपि वेति पूर्वपक्षव्यावृत्तौ । उद्भिदेति न गुणविधिः, किंतु नामधेयं स्यात् । यत् यतः कारणात् । नामधेयत्वे सति, उत्पत्तौ 'उद्भिदा यजेत' इति विधिवाक्ये। अपूर्व ज्योतिष्टोमाद्यागान्तरं विधेयतया लभ्यते । गुणविधित्वे तु ज्योतिष्टोमयागोऽनूद्येतेति यागान्तरविधिर्न लभ्येत । एवं च नामधेयत्वे आनर्थक्यमिति निरस्तम् ।

२. उद्भिदादिशब्दानां यागनामधेयताधिकरणम् ।

ननु लोकवेदयोरुद्भिच्छब्दस्य कर्मणि कथंचिदप्यप्रसिद्धत्वेन नामधेयत्वासंभवाद्गुणविधानमेव युक्तमित्यत आह—अविधायकत्वादिति । सति नामत्वसंभवे गुणविधायकत्वासंभवादित्यर्थः । तथा हि— फलाय गुणविधौ धातोर्न विधेयसमर्पकत्वम्, धात्वर्थस्याविधेयत्वात् । नाप्युद्देश्यसमर्पकत्वम्, धात्वर्थोद्देशेन कस्यचिदविधानात् । अतो न धातोः स्वार्थमुच्चारणम् । किंतूद्भित्पशुसंबन्धविधानाय विधिप्रत्ययस्यावश्यकत्वे केवलस्य तस्य प्रयोगानर्हत्वात्तदर्थं धातूच्चारणमित्यत्यन्तपारार्थ्यं यजेः प्रसज्येत । विधायकप्रत्ययस्य समानपदोपात्तसंनिहितधात्वर्थमुल्लङ्घ्य पदान्तरोपात्तगुणविधायकत्वे विधिविधेययोर्विप्रकर्षश्चापद्येत । यद्यपि कर्मणि गुणविधिपक्षे धातोरुद्देश्यसमर्पकत्वेन विध्युपयोगान्नात्यन्तपारार्थ्यम्, तथापि विधिप्रत्ययस्य समानपदोपात्तधात्वर्थमुल्लङ्घ्य पदान्तरोपात्तगुणविधायकत्वात्स्यादेव किंचित्पारार्थ्यं विप्रकर्षः । पशुकामपदानर्थक्यं च दुर्वारमेव । न चैवं सति 'दध्नेन्द्रियकामस्य जुहुयात्' इत्यादौ फलाय गुणविधिः 'व्रीहिभिर्यजेत' इत्यादौ कर्मणि गुणविधिश्च न स्यादिति वाच्यम् । दधिव्रीह्यादिशब्दानां निरूढत्वेन कथंचिदपि धातुसामानाधिकरण्यासंभवेन तथाश्रयणेऽप्युद्भिच्छब्दस्य उद्भिनत्ति पशून्प्रकाशयतीति व्युत्पत्त्या यागवाचकस्य धातुसामानाधिकरण्येन नामधेयत्वसंभवेन गुणविधानासंभवात् । धातूनामनेकार्थत्वादुपसर्गवशाच्च उत्पूर्वकभिदेः प्रकाशनार्थत्वात्, 'उद्भिन्नविद्युद्बलयो घनस्ते' इत्यादिप्रयोगदर्शनाच्च । न च धातुपारार्थ्यादिदोषाभावादुद्भिद्वता यागेनेति गुणविशिष्टकर्मविधिः किं न स्यादिति वाच्यम्, मत्वर्थलक्षणादोषप्रसङ्गात् । 'सोमेन यजेत' इत्यादौ सोमादिशब्दानामर्थान्तरेऽत्यन्तरूढानां यागे कथंचिदप्यप्रसिद्धत्वादप्रसिद्धकल्पनातो वरं प्रसिद्धार्थद्वारेण लक्षणाश्रयणमित्यगत्या मत्वर्थलक्षणामाश्रित्य सोमवता यागेन समीहितं कुर्यादिति विशिष्टविधानमङ्गीकृतम् । इह त्ववयवद्वारेण कर्मणि प्रसिद्धेर्नामधेयत्वमेव युक्तम् । ननु अत्र किमुद्भित्त्वेन यागस्य बोधः, उत उद्भिन्नामकत्वेन । नाद्यः, उद्भित्त्वं हि न जातिः, लौकिकानुगतव्यवहाराभावात् । नापि पशूद्भेदनसाधनत्वम् । तर्हि पशूद्भेदनसाधनेन यागेन पशून्भावयेदित्यर्थपर्यवसानेन पौनरुक्त्यापातात् । न द्वितीयः, उद्भिन्नाम्नः उद्भिच्छब्दानभिहितत्वेन शाब्दबोधे प्रकारत्वानुपपत्तेः, शब्दोपस्थितस्यैवान्वयबोधविषयत्वनियमात् इति चेत्, सत्यम् । उद्भिन्नामकत्वेन यागस्य बोधः । उद्भित्पदं हि स्वेना-

नभिहितमपि प्रत्यक्षश्रुतत्वमात्रेण स्ववाच्यकर्मविशेषमन्यस्माद्व्यावर्तयद्विशेषणभावमनुभवति, शब्दोपस्थितस्यैवान्वयबोधविषयत्वनियमस्य संज्ञाशब्दव्यतिरिक्तविषयत्वात्। न चैवं सति पशूद्देदनसाधनत्वस्य शाब्दप्रतीतिविषयत्वाभावात्तदर्थकयोगाश्रयणवैयर्थ्यमिति वाच्यम्। उद्भिच्छब्दस्य योगेन खनित्रादिलक्षणगुणविध्यर्थत्वस्यैव प्रसक्तौ योगस्य कर्मण्यपि समानत्वान्न गुणविधित्वनिर्णायकतेति दर्शयितुं योगोपपादनोपपत्तेरित्यन्यत्र विस्तरः। न च नामधेयत्वे [1]उद्भिच्छब्दस्यानर्थक्यमिति वाच्यम्। कर्मभेदाख्यापनार्थत्वस्य[2] सूत्रे 'यदुत्पत्तावपूर्वम्' इत्यनेन दत्तोत्तरत्वात्। यथा चैतत्तथा द्वितीयस्य द्वितीये 'संज्ञा चोत्पत्तिसंयोगात्' इत्यत्र स्फुटीभविष्यति। वस्तुतस्तु ताण्डकतलवकारवाजसनेयकादिब्राह्मणेषु नाम्नामेवंजातीयकानां निर्वचनं बहुलमुपलभ्यते। तत्र ताण्डके तावत् 'यद्वै तद्देवाँ असुरानेभ्यो लोकेभ्योऽगोपयत्तदेव गोर्गोत्वम्' 'अथैष आयुरायुषा वै देवा असुरानयुवत यद्विश्वमजयत्तस्माद्विश्वजित्। स एतमभिजितमपश्यत्तेनानभिजितमभ्यजयत्' इत्यादि, तलवकारब्राह्मणे च 'वलभिदैव वलमभिदन्' 'उद्भिदा गा उदसृजन्त' 'यत्पृतनामजयंस्तत्पृतनाजितः पृतनाजित्त्वम्' 'यदुपाह्वयत तदुपहव्यस्योपहव्यत्वम्' इत्यादि, वाजसनेयके च 'स वै दक्षो नाम। तद्यदनेन सोऽयजत तस्माद्दाक्षायणयज्ञ इत्याख्या। तदुहैके वसिष्ठयज्ञ इत्याचक्षते। स वा एकेन नाम्ना वसिष्ठस्तमेनमन्वाचक्षते' इत्यादि, तैत्तिरीयके च 'तं वा एतं वाजपेय इत्याहुः। वाजाप्यो वा एषः। वाजं ह्येतेन देवा ऐप्सन्' 'यद्वृत्रहन्, तद्विघनस्य विघनत्वम्' इत्यादि। ततश्च यत्रैवं निर्वचनं नोपलभ्यते, तद्विषयेयमधिकरणप्रवृत्तिः। इत्युद्भिदधिकरणम्॥

'चित्रया यजेत पशुकामः' 'त्रिवृद्बर्हिष्पवमानम्' 'पञ्चदशान्याज्यानि' 'सप्तदशानि पृष्ठानि' इत्यत्र किं चित्राबर्हिष्पवमानाज्यपृष्ठशब्दा गुणविधयः, उत नामधेयानीति संशयः।

३. चित्रादिशब्दानां यागनामधेयताधिकरणम्।

तत्रोद्भिदादिशब्दस्य यौगिकस्य कर्मण्यपि संभवद्योगस्य कर्मनामधेयत्वं युज्यते। चित्रादिशब्दास्तु व्रीह्यादिशब्दवद्रूढ्यार्थान्तरवाचिनः कथं कर्मनामतां भजेरन्। अतो गुणविधय एवैते। तथा हि—'चित्रया यजेत' इत्यत्र स्त्रीत्वस्य प्राणिन्येव मुख्यत्वात्तदनुसारेण प्राणिद्रव्यकाग्नीषोमीयपशुयागविषयकत्वं वाक्यस्य गम्यते। न तु 'दधि मधु घृतमापो धानाः' इत्यादिवाक्यलब्धप्रकृतयागपरत्वं कर्मान्तरपरत्वं वा। ततश्च बहुरूपत्वलक्षणचित्रत्वं स्त्रीत्वं करणकारकमिति त्रीण्यग्नीषोमीययागानुवादेन विधीयन्ते। न चैवं सति विध्यावृत्तिलक्षणवाक्यभेदः स्यादिति वाच्यम्। चित्रत्वस्त्रीत्वविशिष्टकारकस्य पृथग्विधेयापारं विनैवैकपदोपादानतो लाभात्। न चैवमपि यागे चित्रत्वस्त्रीत्वविशिष्टकारकस्य फले यागस्य च विधानाद्वाक्यभेदो दुष्परिहर इति वाच्यम्। पशुयागं कुर्वतोऽवश्यं पश्वर्जनेच्छावत्त्वेन

1. उद्भित्पदस्य—क, ग, घ. 2. व्याख्यानार्थत्वस्य—क.

पशुकामपदस्य तदनुवादत्वोपपत्तेः। 'त्रिवृद्बर्हिष्पवमानम्' इत्यत्र च 'सदसो बर्हिर्व्यजनादिना त्रिगुणं वायुं संपादयेत्' इति गुणविधित्वं स्तुतावुपपाद्यम्। 'पञ्चदशान्याज्यानि' इत्यत्र च आज्यस्य संसर्गिद्रव्यस्य स्वतः संख्यायोगासंभवात्पञ्चदशपात्रनिहितत्वेन पञ्चदशपलादिपरिमितत्वेन वा संख्यायोगो भवति। आज्यस्य च स्वरूपेण स्तोत्राङ्गत्वासंभवात्संनिधानेन तद्वाच्यम्। तच्च संनिधापनं विना न संभवतीति पञ्चदशत्वसंख्याकान्याज्यानि स्तोत्रकाले संनिधापयेदिति पर्यवसानात्सुगमं गुणविधानम्। 'सप्तदशानि पृष्ठानि' इत्यत्रापि स्तोत्रकाले सप्तदश पुरुषाः स्वस्वपृष्ठानि प्रदर्शयेयुरिति स्तोत्रसाधनत्वमुपपाद्यम्। एषु च त्रिवृत्त्वादिविशिष्टपवमानादिविधानान्न वाक्यभेदः। एवं च 'बर्हिष्पवमानेन स्तुवते' 'आज्यैः स्तुवते' 'पृष्ठैः स्तुवते' इति वाक्येषु बर्हिष्पवमानादिपदं प्रदर्शितगुणवाक्यप्राप्तगुणानुवादकमेव, न तु नामधेयमिति प्राप्ते सिद्धान्तयति—

यस्मिन्गुणोपदेशः प्रधानतोऽभिसंबन्धः ॥ ३ ॥

नामधेयं स्यादित्यनुवर्तते। यस्मिन् 'चित्रया यजेत' इत्यादिवाक्ये गुणोपदेशः अनेकगुणविधानं संभाव्यते, तत्र वाक्यभेदप्रसङ्गेन तस्यायुक्तत्वान्नामधेयं स्यात्। गुणविधित्वे बाधकमुक्त्वा नामधेयत्वे साधकमाह—प्रधानतोऽभिसंबन्ध इति। प्रधानेन धात्वर्थेन अभिसंबन्धः सामानाधिकरण्यं यतः, यतश्च प्रधानेन धात्वर्थेन अभिसंबन्धः वाचकत्वम् अन्वाख्यानार्थवादतो गम्यत इत्यर्थः। तथाहि—'चित्रया यजेत' इत्यत्र गुणविधिरिति वदन्प्रष्टव्यः। किं पञ्चनुवादेन चित्रत्वस्त्रीत्वविधिः, उत यागानुवादेन तयोर्विधिः, उत पशुयागानुवादेन तदुभयविशिष्टकारकविधिः। नाद्यद्वितीयौ, वाक्यभेदप्रसङ्गात् अग्नीषोमीयपशौ केवललोहितत्वलोहितसारङ्गत्वकृष्णसारङ्गत्वविधिभिर्विरोधप्रसङ्गाच्च। विकल्पस्य चाष्टदोषदुष्टत्वात् अग्नीषोमीययागस्य उत्पत्तिशिष्टपुंस्त्वविशिष्टपशुलक्षणकारकावरुद्धत्वेन तत्र स्त्रीत्वादिविधानानुपपत्तेश्च। अत एव न तृतीयः। उत्पत्तिशिष्टकारकान्तरावरुद्धत्वादुभयविशिष्टकारकविधाने गौरवाच्च। पशुकामपदस्यानर्थक्यप्रसङ्गाच्च। न चायं द्रव्यार्जनाङ्गपशुकामानुवाद इति युक्तम्, तदनुवादत्वस्य स्वर्गकामाधिकरणे निराकरिष्यमाणत्वात्; अग्नीषोमीययागगुणविधित्वे 'दधि मधु घृतमापो धाना भवन्ति' इति प्रकृतदध्यादियागातिक्रमापत्तेश्च। अतश्चित्रापदस्य प्रकृतदध्यादिविचित्रद्रव्यकेष्टिनामधेयत्वमेव युक्तम्। 'त्रिवृद्बर्हिष्पवमानम्' इत्यत्रापि त्रिवृत्त्वबर्हिष्पवमानानामनेकपदोपात्तानां विशिष्टप्रतिपत्तिनियमाभावे सति विध्यन्वयस्यापेक्षितत्वेन त्रिवृद्बर्हिष्पवमानानां परस्परसंबन्धं विनैव स्वातन्त्र्येण विधिसंबन्धार्थं स्तवविधानेन वाक्यभेदापत्तेर्न गुणविधिः। अतो बर्हिष्पवमानशब्देन स्तोत्रमनूद्य त्रिवृत्त्वमात्रस्य विधिरिति वक्तव्यम्। तच्च 'बर्हिष्पवमानेन स्तुवते' इत्युत्पत्तिवाक्ये बर्हिष्पवमानशब्दस्य नामधेयत्वे सत्येव संगच्छते, नान्यथा। उत्पत्तिवाक्येऽस्मिन्बर्हिष्पवमानशब्दस्य नामधेयत्वाभावे हि

उत्पन्नं स्तोत्रं गुणवाक्यगतबहिष्पवमानशब्दः कथमनुवदितुं शक्नुयात्। एवम् 'पञ्चदशान्याज्यानि' 'सप्तदशानि पृष्ठानि' इत्यत्रापि 'आज्यैः स्तुवते' 'पृष्ठैः स्तुवते' इत्याज्यपृष्ठशब्दकत्वेन श्रुतानि स्तोत्राण्यनूद्य पञ्चदशत्वसप्तदशत्वयोर्विधानमूह्यम्। तदेवं चित्राबहिष्पवमानाज्यपृष्ठशब्दानां नामधेयत्वे 'चित्रया यजेत' 'बहिष्पवमानेन स्तुवते' 'आज्यैः स्तुवते' 'पृष्ठैः स्तुवते' इति तृतीयानिर्देशगम्यं भावनाकरणीभूतयजिस्तुतिसामानाधिकरण्यमप्यनुगृहीतं भवति। शक्नुवन्ति च चित्रादिशब्दाः कर्मण्यपि योगेन वर्तितुम्। तथाहि—चित्राशब्दस्तावद्दध्यादिविचित्रद्रव्यकत्वलक्षणयोगेन इष्टिविशेषे वर्तत इति प्राञ्चः। वस्तुतस्तु तैत्तिरीयके चित्रेष्टौ दध्यादिद्रव्याणि न श्रुतानि, किंतु 'अग्नये दात्रे पुरोडाशमष्टाकपालं निर्वपेत्' इत्युपक्रम्य 'दधि मधु घृतमापो धानाः' इत्यादिना इष्ट्यन्तर एव विहितानि। चित्राशब्दश्च तत्र प्रकारान्तरेण निरुक्तः 'यद्वा अस्यां विश्वं भूतमधिप्रजायते तेनेयं चित्रा' इति। चीयते द्विपाच्चतुष्पात्पशुलक्षणं सर्वं प्राणिजातमस्यामिष्टौ साध्यसाधनभावसंबन्धेन वर्तत इति व्युत्पत्त्येत्यर्थः। दध्यादिविचित्रद्रव्यकत्वयोगाश्रयणे तु शाखान्तरमन्वेषणीयम्। पवमानसोमदेवत्यमन्त्रसाध्यत्वात्सदसो बहिः क्रियमाणत्वाच्च बहिष्पवमानः स्तोत्रम्। यैर्देवा इमाँल्लोकानाजयंस्तान्याज्यानि स्तोत्राणि। आङ्पूर्वाज्जयतेरौणादिकं रूपम्। यद्वा आजिर्गन्तव्योऽवधिः काष्ठेति पर्यायः। येषु निमित्तेषु देवाः परस्परं कलहायमाना गिरिमेकं काष्ठां कृत्वा ये तामग्रे धावन्तः प्रतिपद्यन्ते तेषामिमानि स्तोत्राणीति समयं कृत्वा धावन्तः कतिपये देवाः प्रत्यपद्यन्त तान्याज्यानि। आजिमर्हन्तीत्यर्थे च्छान्दसो यः। एवं हि तलवकारब्राह्मणे 'त एतान्याज्यानि स्तोत्राण्यपश्यन्' इत्युपक्रम्य श्रूयते 'यदिमान् लोकानाजयन् तदाज्यानामाज्यत्वम्' इति, 'तेऽब्रुवन्, आजिमेषामयाम गिरिं काष्ठां कृत्वेति यदब्रुवन्नाजिमेषामयामेति तदेषां द्वितीयमाज्यत्वम्' इत्यादि। द्वितीयं निर्वचनमित्यर्थः। ताण्डकब्राह्मणे 'आपो वा ऋत्वियमार्च्छन् तासां वायुः पृष्ठे व्यवर्तत' इत्यार्तवयुक्तानामपां पृष्ठे वायोः स्पर्शनं निमित्तमुपक्रम्य वामदेव्यतो रथन्तरादिपृष्ठानामुत्पत्तिरनुक्रान्ता। ततश्च स्पर्शाज्जन्यत इति पृष्ठमिति व्युत्पाद्यम्। 'तिथपृष्ठ' इत्यादिना औणादिकस्थप्रत्ययः सकारलोपश्च। अतश्चित्रादिपदानि नामधेयानीति स्थितम्। इति चित्राज्याधिकरणम्॥

'अग्निहोत्रं जुहोति' 'आधारमाधारयति' इति श्रूयते। तत्राग्निहोत्रपदमाधारपदं च गुणविधिर्नामधेयं वेति संशयः। तत्र गुणविधायकत्वमुद्भिदादिपदानां यौगिकानां मत्वर्थलक्षणा-

४. अग्निहोत्रादिशब्दानां यागनामधेयताधिकरणम्।

दोषान्निराकृत्य कर्मणि योगेन संभवद्वृत्तिकत्वात्कर्मनामधेयत्वं साधितम्। तदेतदत्र विपरीतम्, मत्वर्थलक्षणाभावेन गुणविधित्वे बाधकाभावात्कर्मनामत्वे बाधकसत्त्वाच्च। तथाहि—हूयत इति होत्रं पयोदध्यादि द्रव्यम्। 'हुयामाश्वभसि' इत्यादिना त्रन्प्रत्ययः। अग्नये होत्रमस्मिन्निति बहुव्रीहिणैव मत्वर्थस्य लाभान्न

मत्वर्थलक्षणा। 'सप्तमीविशेषणे बहुव्रीहौ' इति ज्ञापकाद्व्यधिकरणपदो बहुव्रीहिः, 'कण्ठेकालः' 'उरसिलोमा' 'सच्छास्त्रजन्मा हि विवेकलाभः' इत्यादिवत्। ततश्चाग्न्युद्देश्यकपयोदध्यादिद्रव्यमानद्रव्यकहोमोऽवगतः। तत्राग्निहोत्रपदे होमो न विधेयः, जुहोतिनैव तल्लाभात्। नापि पयोदध्यादि द्रव्यम्, 'पयसा जुहोति' इत्यादिभिस्तल्लाभात्। अत उपसर्जनीभूतोऽप्यग्निरेव विधेय इति प्राञ्चः। वस्तुतस्तु होत्रशब्दो भावसाधनः। अग्नये होत्रं होमः अग्निहोत्रम्। यद्वा, हूयते यस्मिन्कर्मणि तद्धोत्रम्। अग्नये होत्रमग्निहोत्रम्। प्रकृतिविकारभाव एव चतुर्थीसमासविधावपि 'सुप्सुपा' इति समासः। 'लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमो यथा लौकिकवैदिकेषु' इति वार्तिकव्याख्यानावसरे 'धर्माय नियमो धर्मनियमः' इति पातञ्जलभाष्ये चतुर्थीसमासप्रदर्शनात् व्यक्तोक्तत्वाच्च कैयटादिभिः। ततश्च मत्वर्थलक्षणां विनैव गुणविधिसंभवः। बहुव्रीह्याश्रयणे तु 'बहुव्रीहौ प्रकृत्या पूर्वपदम्' इति बहुव्रीहिस्वरेण अग्निशब्दे इकारस्य उदात्तत्वे सतिशिष्टस्वरेण अवशिष्टानामचामनुदात्तत्वे ओकारस्य 'उदात्तादनुदात्तस्य स्वरितः' इति स्वरितत्वे रेफादकारस्य 'स्वरितात्संहितायामनुदात्तानाम्' इति प्रचयः स्यात्। 'सुप्सुपा' इति समासाश्रयणे तु 'समासस्य' इत्यन्तोदात्तं भवति। अन्तोदात्तमेव चाग्निहोत्रपदं प्रयुञ्जते तैत्तिरीयादय इत्यन्यदेतत्। प्रकृतमनुसरामः। अग्निहोत्रपदस्य नामधेयत्वे कर्मणो विधेयस्यारूपत्वं स्यात्। द्रव्यदेवते हि यागस्य रूपम्, देवतोद्देश्यकद्रव्यत्यागात्मकत्वाद्यागस्य। तत्र द्रव्यं यद्यपि 'पयसा जुहोति' इत्यादिभिः प्राप्तम्। देवता तु नामधेयत्वे सति न प्राप्नोतीत्यरूपत्वं कर्मणः प्रसज्येत। न च 'यदग्नये च प्रजापतये च सायं जुहोति, यत्सूर्याय च प्रजापतये च प्रातः' इति वाक्याभ्यां देवतालाभान्नारूपत्वमिति वाच्यम्। तयोर्हि वाक्ययोः किमग्न्यादयो गुणा[1] विधीयन्ते, उताग्निप्रजापत्योः सूर्यप्रजापत्योश्च समुच्चितयोर्विधिः, उत तयोः समुच्चयः, उताग्निसमुच्चितस्य सूर्यसमुच्चितस्य च प्रजापतेर्विधानम्, उत प्रजापतिमात्रविधानम्। नाद्यद्वितीयौ, वाक्यभेदात्। न तृतीयः, चशब्दार्थस्य समुच्चयस्य स्वातन्त्र्येणोपस्थित्यभावेन विशेष्यत्वानुपपत्तेः। न चतुर्थः, 'पञ्चदशान्याज्यानि' इत्यत्र संख्याविशिष्टाज्यानामिव समुच्चयविशिष्टप्रजापतेरपि विधानायोगात्। न पञ्चमः। प्रजापतिमात्रविधौ हि 'अग्नये' इत्यस्य 'सूर्याय' इत्यस्य च विधित्वासंभवादनुवादत्वं वक्तव्यम्। तच्च न संभवति, प्रापकाभवात्। न च 'अग्निर्ज्योतिः' 'सूर्यो ज्योतिः' इति मन्त्रवर्णतस्तत्प्राप्तिरिति वाच्यम्। प्रबलब्राह्मणगतचतुर्थ्युपात्तदेवतावरुद्धे कर्मणि दुर्बलमन्त्रवर्णतस्तद्विरुद्धदेवतानिवेशायोगात्। न च प्रजापतिदेवताके कर्मणि कथमग्निसूर्यप्रकाशनसमर्थयोर्मन्त्रयोर्निवेशसंभव इति वाच्यम्। 'वचनान्वयार्थमैन्द्री स्यात्' इति तार्तीयीकाधिकरणन्यायेन वाचनिकविनियोगबलेन प्रजापतिलक्षकतया तदुपपत्तेः, प्रजापतिमात्रविधौ 'यत्सूर्याय प्रजापतये'

1. गुणाश्चत्वारो—क, घ.

इति पुनर्विधानवैयर्थ्याच्च। न च 'यदग्नये च प्रजापतये च सायम्' इत्येवोच्यमाने प्रातर्होमे प्रजापतिदेवता न स्यात्, 'यत्सूर्याय' इत्युच्यमाने सायंहोमे न स्यादित्युभयोद्देशेन तद्विधिरिति वाच्यम्। योऽयं होमः स चेत्सायं तर्हि 'प्रजापतये' इति विशिष्टोद्देशे वाक्यभेदापातात्। ततश्च 'यदग्नये च' इत्यादिवाक्यद्वये अग्निसूर्यसायंप्रातर्विशिष्टकर्मान्तरविधिरिति वक्तव्यम्। एवं च ततः कथमग्निहोत्रवाक्यविहितकर्मणि देवतालाभः स्यात्। न च 'अग्निर्ज्योतिः' 'सूर्यो ज्योतिः' इति मन्त्रवर्णतस्तल्लाभसंभव इति शङ्कयम्। 'अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति सायं जुहोति' 'सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहेति प्रातः' इति मन्त्रविध्योः सायंप्रातःप्रत्यभिज्ञाबलेन 'यदग्नये च—' इति वाक्यद्वयविहितविशिष्टकर्मान्तरविषयत्वावगमेनाग्निहोत्रवाक्यविहिते कर्मणि ततो देवतालाभासंभवात्। तस्मादत्राग्निहोत्रशब्दस्य नामधेयत्वे कर्मणोऽरूपत्वापाताद्गुणविधानमेव युक्तम्। एवं चाग्निहोत्रमिति द्वितीयाप्युपपन्ना भवति। नामधेयत्वे हि भावनाकरणीभूतधात्वर्थवाचित्वात्तृतीया स्यात् 'उद्भिदा यजेत' इत्यादिवत्। गुणविधित्वे तु अग्नये होमं कुर्यादित्यर्थपर्यवसानात्सा न विरुध्यते। न च, कस्मिन्होमेऽयं देवताविधिः; न तावत् 'यदग्नये च—' इति विहिते कर्मणि, उत्पत्तिशिष्टदेवतान्तरावरुद्धत्वात्[1]; अत एव न दर्शपूर्णमासादिगतहोमेषु इति वाच्यम्। अविहितदेवताकेषु नारिष्टादिदर्वीहोमेष्वग्निदेवताविधिसंभवात्। न च मान्त्रवर्णिकदेवतान्तरावरोधात्तत्र[2] नाग्निविधिः संभवतीति वाच्यम्। मन्त्रवर्णप्रवृत्तेः प्रागेव झटिति प्रवृत्तेनाग्निहोत्रवाक्येन तत्राग्नेरेव निवेशाद्देवतान्तरपदानां च तत्सत्यमङ्गतानामैन्द्रीन्यायेनाग्निलक्षकत्वोपपत्तेः। वस्तुतस्तु यत्र दर्वीहोमेषु न देवताविधिः, न वा मन्त्राम्नानं तत्र गुणविधानं भविष्यति। अस्ति हि वाजसनेयके हव्यवाहकाण्डे सप्तमाध्यायान्ते 'दर्शपूर्णमासयोरुत्तममनूयाजमिष्ट्वा समानीय जुहोति' इति तादृशदर्वीहोमविधिः। औपभृतमाज्यं जुह्वां समानीय जुहोतीति तदर्थः। एवं चाग्निहोत्रमिति गुणविधिरेव, न तु नामधेयम्। 'यदग्नये च' इत्यादिवाक्यद्वयं तु विशिष्टकर्मान्तरविधायकम्। 'दध्ना जुहोति' इत्यादिस्तु तत्रैव गुणविधिः। 'सायं जुहोति' 'प्रातर्जुहोति' इति च तयोरेव विशिष्टकर्मणोर्विश्वजिन्न्यायकल्प्ये फले समुच्चयविधिः। अन्यथा 'यदग्नये च' इति 'यत्सूर्याय च' इति पृथग्विधिबलात्पृथगेव फलं कल्प्येत। 'अग्निहोत्रं जुहुयात्स्वर्गकामः' 'यावज्जीवमग्निहोत्रं जुहुयात्' इति च दर्वीहोमाश्रिताग्निदेवताफले निमित्ते च विधीयते, यावज्जीवानुष्ठितदर्वीहोमाश्रिताग्निना फलं कुर्यादिति। तदेवमग्निहोत्रपदं गुणविधिः, न तु नामधेयमिति स्थितम्। तथा क्षरणार्थकधृधातुतः कर्मणि घञन्ताधारशब्दोपात्तक्षरणसमर्थद्रव्यमाज्यपयोमध्वादि द्वितीयानिर्देशतः क्षरणक्रियासंस्कार्यतयावगम्यमानं प्रयोजनाकाङ्क्षालक्षणप्रकरणादर्शपूर्णमासार्थतामुपगतमाग्नेयादीनामुत्पत्तिशिष्टपुरोडाशाद्यवरुद्धत्वादुत्पत्तावद्रव्यकमुपांशुयाजाख्यं प्रधानमास्कन्दतीति तत्र गुणविधित्वम-

1. अवरोधात्—क, ग, घ. 2. देवतावरोधात्तत्र—क, घ.

ध्यवस्यामः । 'सर्वस्मै वा एतद्यज्ञाय गृह्यते यद्ध्रुवायामाज्यम्' इति त्वाज्यभागादिविषयं भविष्यति । ततश्चोपांशुयाजवाक्ये उपांशुयाजं विधाय पर्यवसिते सति उपांशुयाजमनूद्य प्रकरणकल्पितवाक्येन द्रव्यविधिः, क्षरणसंस्कृतेनाधारेण उपांशुयाजं कुर्यादिति । अतो वैयधिकरण्येनैव गुणस्य विधेयतया मतुप्प्रत्ययकल्पनाभावान्न मत्वर्थलक्षणावकाशः । यदि चोपांशुयाजवाक्यमेव प्रकरणसनाथं संस्कृताधारद्रव्यविशिष्टोपांशुयाजविधायकं तदापि न मत्वर्थलक्षणा, क्षरणसंस्कृताधारवता उपांशुयाजेन भावयेदिति मतुप्प्रत्ययायुक्तस्यैव वाक्यस्य प्रकरणेन कल्पनात् । न च, प्रकरणतो वाक्यकल्पनापेक्षया अस्मिन्नेव वाक्ये यागविधिर्युक्तः; ततश्चाधारपदं नामधेयमेव भविष्यतीति वाच्यम् । प्रत्यक्षयज्यश्रवणात् द्रव्यदेवतारूपालाभाच्च । 'चतुर्गृहीतं वा एतदभूत्तस्याधारमाधार्य' इति प्रयाजार्थचतुर्गृहीताज्यस्यैकदेशमाधारं क्षरणसमर्थमुद्दिश्य क्षारणं विधीयत इति न ततो द्रव्यलाभः । 'इत इन्द्र ऊर्ध्वोऽध्वर इत्याधारमाधारयति' इत्यनेन तु मन्त्रमात्रं क्षारणसंस्काराङ्गतया विधीयते, 'देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नये जुष्टं निर्वपामि' इति निर्वापे हस्ताभ्यामित्यन्तसावित्रमन्त्रवत् । न तु मान्त्रवर्णिकदेवताकल्पनं तद्बलेन वा यागकल्पनम्, गौरवात् । अस्तु वा देवताकल्पनं तद्बलाद्यागकल्पनं च । तथापि तन्नामधेयत्वमाधारपदस्य न संगच्छते, तथा सति यजेः करणत्वेन तद्वाचकनामधेयस्यास्य तृतीयान्तत्वापातात् । गुणविधित्वे तु आधारस्य संस्कार्यत्वाद्द्वितीया न विरुध्यते । अतः 'आधारमाधारयति' इत्यपि गुणविधिः । इति प्राप्ते, सिद्धान्तयति—

तत्प्रख्यं चान्यशास्त्रम् ॥ ४ ॥

'यस्मिन्गुणोपदेशः प्रधानतोऽभिसंबन्धः' इति 'नामधेयं स्यात्' इति चानुवर्तते । यस्मिन् 'अग्निहोत्रं जुहोति' इत्यादिवाक्ये अग्न्यादिगुणविधिः संभाव्यते तत्र नामधेयमेव स्यात् । कुतः । यतो नामधेयत्वे प्रधानतोऽभिसंबन्धः विधेयेन धात्वर्थेन विधिप्रत्ययस्य अभिसंबन्धः एकपदवृत्तित्वं लभ्यते । गुणविधित्वे तु विधेयस्य गुणस्य विधिप्रत्ययस्य च भिन्नपदवृत्तित्वं लभ्यते । तथा च गुणस्य विधेश्च संबन्धः पदद्वयसमभिव्याहारवाक्यगम्यः, न तु धात्वर्थविधिसंबन्धवच्छ्रुतिगम्यः । न हि समानपदवृत्तित्वलक्षणश्रुत्या धात्वर्थस्य विधिसंभवे वाक्येन गुणविधानं युक्तम् । यद्यप्याधारवाक्ये क्षरणसमर्थाज्यादिद्रव्योद्देशेन विधेयस्याधारणसंस्कारस्य विधिप्रत्ययस्य च समानपदवृत्तित्वान्नोक्तदोषः, तथापि प्रकरणपरिकल्पिते क्षारणसंस्कृताज्यादिद्रव्येणोपांशुयाजं कुर्यादिति वाक्ये आधारद्रव्यवता उपांशुयाजेन भावयेदिति वाक्ये वा विधिप्रत्ययस्य विधेयाज्यादिद्रव्यस्य च भिन्नपदवृत्तित्वाद्वाक्येन विधानं वाक्यार्थस्य विशिष्टस्य च विधानं दोषः । ननु नामधे-

यत्वे अरूपत्वं दोषः स्यादित्यत्र उत्तरम्— तत्प्रख्यं चान्यशास्त्रमिति। चशब्दो ह्यर्थः, उक्तसमुच्चयार्थो वा। तच्छब्देन 'गुणोपदेशः' इत्युपात्तो गुणः परामृश्यते। यागनामधेयत्वे यागस्य रूपलाभाय यो गुणो विधेयतयापेक्षितः, तं प्रचष्टे विधत्त इति तत्प्रख्यम्। 'आतश्चोपसर्गे' इति कः। विधित्सितस्याग्न्यादिगुणस्य विधायकमन्यच्छास्त्रमस्ति। अतस्तदग्निहोत्रादिपदमपि नामधेयं स्यादित्यर्थः। तथाहि— 'अग्निहोत्रं जुहोति' इत्यग्निहोत्रनामधेयकस्य होमस्य विधिः। 'अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति सायं जुहोति, सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहेति प्रातः' इति विहितमन्त्रवर्णतोऽग्निसूर्यदेवतालाभः। न च योऽयं होमः स चेत्सायमिति वाक्यभेदः शङ्क्यः, होमस्य प्रकरणत एवोपस्थित्या तदंशे शब्दस्य व्यापाराभावात्। 'यदग्नये च प्रजापतये च' इत्यादिवाक्यद्वये अग्निसमुच्चितः सूर्यसमुच्चितश्च प्रजापतिर्विधीयते। तत्र मन्त्रवर्णप्राप्ताग्निसूर्यांशे विधिव्यापाराभावान्न विशिष्टविधिगौरवम्। एवं चाग्निसूर्यानुवादेन प्रजापतिसमुच्चयविधिः[1] पर्यवस्यति। एतेन समुच्चयस्य चार्थस्य विशेष्यत्वाभावान्न विधेयत्वमिति निरस्तम्, तद्विधेरार्थिकत्वात्। 'सायं जुहोति' 'प्रातर्जुहोति' इति कालविधिः। सायंप्रातर्व्यवस्थितमन्त्रवर्णलब्धाग्निसूर्यानुवादेन प्रजापतिसमुच्चयो विधीयमानोऽपि तदनुवादेवतानुसारेण व्यवस्थयैव प्राप्नोतीति 'यदग्नये च' इति वाक्यद्वये सायं प्रातरित्यनुवादः। अग्निहोत्रमिति द्वितीया तु फलभावनाकरणस्यापि यागस्य 'नासाधितं करणम्' इति न्यायेनार्थाक्षिप्तसाध्यत्वाभिप्रायेति प्राञ्चः। अत्रेदं वक्तव्यम्— तैत्तिरीयकब्राह्मणे 'प्रजापतिरग्निमसृजत' इत्युपक्रम्य 'तं प्रजापतिरब्रवीज्जायस्वेति सोऽब्रवीत्किं भागधेयमभिजनिष्य इति। तुभ्यमेवेदꣳ हूयाता इत्यब्रवीत्। स एतद्भागधेयमभ्यजायत। यदग्निहोत्रम्। तस्मादग्निहोत्रमुच्यते। तद्धूयमानमादित्योऽब्रवीत्। मा हौषीः। उभयोर्वै नावेतदिति। सोऽग्निरब्रवीत्। कथं नौ होष्यन्तीति। सायमेव तुभ्यं जुहवन्। प्रातर्मह्यमित्यब्रवीत्। तस्मादग्नये सायꣳ हूयते। सूर्याय प्रातः' इति देवताविधिः, केवलाग्निसूर्ययोर्देवतयोर्विधानात्। मन्त्रवर्णप्राप्तो ज्योतिष्टोमगुणो नादर्तव्यः, आग्नेयादियागे 'अग्निर्मूर्धा दिवः' इत्यादियाज्यापुरोनुवाक्यागम्यगुणवत्। 'तूष्णीमुत्तरामाहुतिं जुहोति' 'यत्तूष्णीं तत्प्राजापत्यम्' इति द्वितीयाहुतिरङ्गत्वेन विधीयते, अग्निसूर्यहोमयोरेव प्राधान्यावगमात्। श्रूयते हि वाजसनेयके 'यामग्रे जुहोति सा तस्यै देवतायै यस्या अग्निहोत्रम् अथ या द्वितीया स्विष्टकृद्वाजनमेव सा' इति। एवं च 'यदग्नये च प्रजापतये च' इति वाक्यद्वयमपि यच्छब्दबलादनुवाद एव। एतेन 'चतस्रो गार्हपत्ये जुहोति चतस्रोऽन्वाहार्यपचने द्वे आहवनीये दश संपद्यन्ते दशाक्षरा विराड्विराजा यज्ञः संमितः' इति बह्वृचब्राह्मणे विराट्संपत्तिश्रवणाद्दशानामपि होमानां प्राधान्यमिति वदन्तो निरस्ताः। यदि हि विराट्संपत्तिरेव प्राधान्यप्रयोजिका, तर्हि वैश्वदेवे पर्वणि

1. विधौ—क, च.

'नव प्रयाजा इज्यन्ते, नवानूयाजाः, अष्टौ हवींष्षि, द्वावाघारौ, द्वावाज्यभागौ, त्रिंशत्संपद्यन्ते, त्रिंशदक्षरा विराट्' इति श्रवणात्प्रयाजादीनामपि प्राधान्यापत्तिः। अतः 'अग्निहोत्रं जुहोति' इत्यग्निहोत्रपदं पूर्वाहुतेरेव नामधेयम्। एकस्यैवाग्निहोत्रस्य 'सायं जुहोति' 'प्रातर्जुहोति' इत्यभ्यासविधिः। अतः प्रातर्होमस्य सूर्यदेवत्यत्वेऽपि सायंहोमस्याग्निदेवत्यत्वमात्रेण अग्निहोत्रशब्दस्योपपत्तिः। कदाचिदग्निदेवत्यत्वयोगेन समाख्यानोपपत्तेः, श्रवणादिनक्षत्रयोगाभावेऽपि श्रावणी पौर्णमासीत्यादिव्यपदेशवत्। आघारवाक्येऽपि श्रुत्या विधिसंभवे वाक्यतो विधानस्यायुक्तत्वान्न गुणविधित्वमित्युक्तमेव। आङ्पूर्वात् धृधातोर्भावघञन्तमाघारपदमुपसर्गवशाद्यागोत्तरक्षारणरूपहोमस्य नामधेयम्। यागोत्तरक्षारणमेव हि होमः। तथा च सूत्रकारो वक्ष्यति 'जुहोतिरासेचनाधिकः स्यात्' इति। 'प्राञ्चमाघारयति' 'संततमाघारयति' इत्यादिस्तु गुणविधिः। तथा च आघारसंज्ञकेन होमेनोपकुर्यादित्यर्थः। तत्र 'चतुर्गृहीतं वा एतदभूत्' इत्यत्र आघारपदेनाघारमनूद्य 'चतुर्गृहीतं वा एतदभूतस्य' इत्यंशेन द्रव्यविधिः। तस्येत्यवयवषष्ठी। यच्चतुर्गृहीतं प्रयाजार्थमाज्यमभूत्तस्यैकदेशेनाघाराख्यं कर्माभिनिर्वर्त्येत्यर्थः। एवं च एकमेवाघारणं लभ्यत इति लाघवम्। गुणविधित्वे तु 'चतुर्गृहीतं वा एतत्' इति जौहवाज्यस्याघारणम्, आघारवाक्येन उपांशुयाजाज्यस्याघारणमित्याघारणविधिद्वयकल्पनागौरवम्। तथा 'इत इन्द्र ऊर्ध्वोऽध्वरः' इति मन्त्रवर्णादेवतालाभः। न च निर्वापे सावित्रमन्त्रवन्न देवताकल्पकत्वमिति वाच्यम्, वैषम्यात्। निर्वापे तावत् 'यदाग्नेयोऽष्टाकपालः' इति वाक्यगतदेवतान्तरावरुद्धत्वान्न सावित्रांशस्य देवताकल्पकत्वम्। इह तु देवताकल्पकत्वे न किंचिद्बाधकमस्ति। तथा च 'सूक्तवाकेन प्रस्तरं प्रहरति' इति करणतया निर्दिष्टसूक्तवाकप्रतिपाद्याग्न्यादिदेवताकल्पनवदिहापि इतिकरणेन मन्त्रस्य करणतया विनियोगबलात्तत्प्रतिपाद्यस्येन्द्रस्यापि देवतात्वकल्पनं न विरुध्यते। न च नामधेयत्वे प्रयाजादिवदारादुपकारकत्वमेव स्यात्, न तु संस्कारकर्मत्वमिति वाच्यम्। 'यज्जुह्वां गृह्णाति प्रयाजेभ्यस्तत्' इति प्रयाजार्थतया विहितस्य चतुर्गृहीतस्य स्वतन्त्रकर्मणि विनियोगासंभवेन प्रयाजार्थाज्यसंस्कारत्वस्याप्यवश्यंभावात्। उपपद्यते च पीतशेषस्य पुनः पास्यमानस्य जलस्येव प्रयाजेषूपयोक्ष्यमाणस्याज्यस्य किंचित्क्षारणेन संस्कारः। एवं च प्रस्तरप्रहरणवत्स्विष्टकृद्वच्च यागरूपत्वं संस्कारकर्मत्वं च न विरुध्यते। न च संस्कारकर्मणां नाम्ना विधानं क्वापि न दृष्टमिति वाच्यम्। 'अंशुं गृह्णाति' 'अदाभ्यं गृह्णाति' इत्यादौ तथा दृष्टत्वात्। आघारमिति द्वितीया त्वग्निहोत्रमितिवदर्थाक्षिप्तसाध्यत्वाभिप्राया। तस्मादाघारपदमपि नामधेयमिति। प्रयोजनं पूर्वपक्षे अविहितदेवताकेषु दर्वीहोमेष्वग्निदेवतालाभः, उपांशुयाजाज्यस्य संस्कारलाभश्च। सिद्धान्ते तु दर्वीहोमेषु तथाविधेषु माध्यवर्णिकीभिः प्राकरणिकप्रधानदेवताभिरेव वा स्वरूपलाभः। तथा च नैरुक्ताः 'येऽन्येनादिष्टदेवता मन्त्रा यद्देवतः स यज्ञो यज्ञाङ्गं वा तद्देवता भवन्ति' इति। उपांशुयाजार्थस्याज्यस्य क्षारणसंस्काराभावः कर्मान्तरलाभश्चेत्याद्यूह्यम्। इति तत्प्रख्याधिकरणम्॥

'श्येनेनाभिचरन्यजेत' इत्यत्र गुणविधिर्नामधेयं वेति संशयः। तत्राभिचरणं शत्रुवधः। 'क्रियायाः' इति फलस्यापि हेतुत्वात् शतृप्रत्ययः 'अधीयानः श्वसिति' इतिवत्। यजिश्च प्रकृतज्योतिष्टोमपरः। तथा च ज्योतिष्टोमसाधनेन श्येनेन शत्रुवधं कुर्यादित्यर्थः। तथा च वैयधिकरण्यान्वयेन मत्वर्थलक्षणाभावात्पक्षिविशेष एवात्यन्तनिरूढत्वाच्च श्येनशब्दस्य कर्मणि कथंचिदप्यप्रसिद्धत्वान्नोद्भिदन्यायः। वाक्यभेदाभावाच्च न चित्राज्याधिकरणन्यायः। तत्प्रख्यशास्त्रान्तराभावाच्च न पूर्वाधिकरणन्यायः। श्येनगुणश्चायं काम्यत्वाद्गोदोहनगुणश्रमसमिव 'सोमेन यजेत' इत्युत्पत्तिशिष्टमपि सोमं बाधते। तथा चागत्या गुणविधिरिति प्राप्ते, सिद्धान्तयति—

५. श्येनादिशब्दानां यागनामधेयताधिकरणम्।

तद्व्यपदेशं च ॥ ५ ॥

'यस्मिन्गुणोपदेशः प्रधानतोऽभिसंबन्धः' इति 'नामधेयं स्यात्' इति चानुवर्तते। यस्मिन् श्येनवाक्ये गुणविधानमाशङ्क्यते तत्र श्येनपदं नामधेयमेव स्यात्, न तु गुणविधिः। यतः तद्व्यपदेशं वाक्यं प्रधानतोऽभिसंबन्धश्चास्ति तत इति योजना। तद्व्यपदेशमिति बहुव्रीहिः। तस्माद्विधेयत्वेनाभिमताच्छ्येनाद्व्यपदेशः भेदेनाभिधानं वस्तुतो विधेयकर्मणः यत्र तत् तद्व्यपदेशं वाक्यम् 'यथा वै श्येनो निपत्यादत्ते एवमयं द्विषन्तं भ्रातृव्यं निपत्यादत्ते यमभिचरति श्येनेन' इत्येवंरूपम्। अत्र च अयमिति निर्दिष्टस्य विधेयस्य प्रतीयमानं श्येनसादृश्यं श्येनगुणविधौ कथं घटेत। इदंशब्दो हि न तावद्यागपरः। न ह्यन्यस्य विधेयता अन्यस्य च स्तुतिरिति युक्तम्। न च 'अयम्' इति श्येनस्यैव निर्देशो युक्तः। स्वस्यैव स्वसादृश्यानुपपत्तेः। ननु तर्हि, श्येनविशिष्टकर्मविधानमेवास्तु, श्येनविशिष्टस्य यागस्य श्येनरूपविशेषणाद्भिन्नत्वेन सादृश्योपपत्तेः। न चैवं सति सामानाधिकरण्यनिर्वाहाय मत्वर्थलक्षणा स्यादिति वाच्यम्। कर्मण्यप्रसिद्धनामधेयत्वकल्पनापेक्षया प्रसिद्धार्थापरित्यागिन्या मत्वर्थलक्षणाया एव युक्तत्वात्। न च नामधेयत्वेऽपि यथा श्येनो मत्स्यादीन्निपत्यादत्ते एवमयमपि यज्ञो द्विषन्तं भ्रातृव्यं निपत्यादत्ते इति वाक्यशेषगम्येन निपत्यादानक्रियासादृश्येन गौण्या वृत्त्या श्येनशब्दस्य कर्मण्यपि प्रसिद्ध्या नाप्रसिद्धार्थकल्पनमिति वाच्यम्। एवं हि श्येनगतनिपत्यादानसदृशनिपत्यादानवत्त्वेन कर्मणः श्येनशब्देनोपस्थितिर्वाच्या। तथा सति श्येनशब्दोऽयं स्वमुख्यार्थश्येनगतनिपत्यादानं लक्षयित्वा तन्मुखेन तत्सदृशं निपत्यभ्रातृव्यादानमपि लक्षयित्वा तद्वन्तं यागमपि लक्षयेदित्यत्यन्तविप्रकृष्टार्थः स्यात्। तद्वरं साक्षान्मुख्यार्थसंबन्धिनि यागे मत्वर्थलक्षणाश्रयणम्। किंच गौणत्वे मुख्यार्थश्येनस्य भावनान्वयाच्छ्येनार्थपरित्यागः स्यात्। श्येनवता यागेनेति मत्वर्थलक्षणायां तु श्येनशब्दस्य तद्वल्लक्षकत्वे-

ऽपि विशेष्यांशस्य धातुनैव लाभाद्विशेषणीभूतमुख्यार्थश्येनपरत्वमेवेति भवेच्छ्रुत्यर्थानुग्रहः। तस्मादुणविशिष्टकर्मविधिरित्यत आह—प्रधानतोऽभिसंबन्ध इति। चशब्दोऽत्र संबद्ध्यते। यतस्तद्वयपदेशं वाक्यमस्ति अतो न गुणविधिः। यतश्च नामधेयत्वे प्रधानतः धात्वर्थेन केवलेन विधिप्रत्ययस्य संबन्धो लभ्यते। केवलस्य धात्वर्थस्य विधिर्लभ्यत इति यावत्। विशिष्टविधौ तु—श्येनविशिष्टस्य धात्वर्थस्य विधानं स्यात्। न चैतद्युक्तम्। तथाहि—श्येनविशिष्टस्य यागस्य पदद्वयसमभिव्याहारलक्षणवाक्यगम्यत्वाद्वाक्यार्थविधाने उपस्थितिगौरवम्। नामधेयत्वे तु यागस्य केवलस्य एकेनैव पदेन गम्यमानत्वादुपस्थितिलाघवम्। तथा विशिष्टविधौ विशेषणांशेऽपि विधिप्रत्ययस्य व्यापारो वाच्यः। तथा च तदंशे विधिप्रत्ययस्य विधेयस्य च समानपदवृत्तित्वलक्षणश्रुतिबाधः स्यात्। नामधेयत्वे तु धात्वर्थस्य समानपदोपात्तस्यैव विधानमिति श्रुत्यनुग्रहः। अतो विधिलाघवानुसरणादत्यन्तक्लिष्टामपि गौणीं वृत्तिं वाक्यशेषसिद्धामाश्रित्य श्येनशब्दस्य कर्मनामधेयत्वमेव युक्तमाश्रयितुम्। ननु केवलगुणविधौ तद्वयपदेशमित्यनेन सादृश्यप्रतिपादकवाक्यशेषविरोधोद्भावनमनुपपन्नम्, 'इन्दुरिन्दुरिव श्रीमान्' इत्यादिवदनन्वयालंकारोपपत्तेरिति चेन्न। अनन्वयालंकारस्य धर्मैक्ये धर्म्यैक्ये च प्रवृत्तेः। आहुश्चालंकारिकाः 'उपमानोपमेयत्वं यदेकस्यैव वस्तुनः। इन्दुरिन्दुरिव श्रीमानित्यादौ तदनन्वयः' इत्यादि। प्रकृते च श्येनात्पृथगेवायमिति धर्मिनिर्देशात् मत्स्याद्यादानभ्रातृव्यादानरूपधर्मभेदाच्च न तदवकाशः। एतेन 'धर्मार्थकामेषु समं प्रपेदे यथा तथैवावरजेषु वृत्तिम्' इत्यादाविव धर्मिभेदनिबन्धनोपमालंकारोऽपि प्रत्युक्तः, तस्यापि धर्मैक्यविषयत्वात्। तस्माच्छ्येनपदं नामधेयम्। एवम् 'संदंशेनाभिचरन्यजेत' 'यथा संदंशेन दुरादेयमादत्ते' इत्याद्यप्युदाहृतं भाष्यादौ। वस्तुतस्तु संदंशेनेत्यनुदाहरणम्। तथाहि—'जातिशब्दा इमे न शक्नुवन्ति यागमभिवदितुम्' इति भाष्यात् 'अत्यन्तरूढा इहोदाहरणम्' इति वार्तिकादिग्रन्थतश्च यौगिकानां क्रियानिमित्तानामिहानुदाहरणत्वमवगतम्। संदंशशब्दश्च संदश्यते पार्श्वद्वये निपीड्य दुरादेयं परिगृह्यते अनेनेति व्युत्पत्त्या तप्तायोगोलादीन्संदंशेन गृह्णातीत्यादौ दुरादेयादानसाधनविशेषे प्रसिद्धः, कर्मण्यपि दुरादेयशत्रुप्राणादानसाधने वर्तितुमर्हतीति उद्भिद्न्यायेनैव तस्य नामधेयत्वं सिद्धमिति कथमिह तदुदाहरणमित्यास्तां तावत्। इति तद्वयपदेशाधिकरणम्॥

तदेवम् 'अपि वा नामधेयं स्यात्' इत्यादिभिश्चतुर्भिः सूत्रैरुद्भिदादिपदानां नामधेयत्वं व्यवस्थापितम्। एभिरेव न्यायैरन्येषामपि सर्वेषां ज्योतिर्गौरायुर्वाजपेयोऽश्वमेध इषुर्वज्र इत्यादीनां यथायोगं नामधेयत्वं सिद्धम्। तत्र 'वाजपेयेन स्वाराज्यकामो यजेत' इत्यत्र वाजपेयपदस्य यौगिकस्योद्भिद्न्यायेन सिद्धमपि नामधेयत्वमाक्षिप्य समाधातुमिदमारभ्यते— वाजपेयपदं गुणविधिर्नामधेयं वेति

६ वाजपेयादिशब्दानां नामधेयताधिकरणम्।

संशयः। गुणविधिरिति ब्रूमः। न चोद्भिद्न्यायान्नामधेयत्वनिश्चयसंभवः। तत्र ह्यधिकरणे सामानाधिकरण्येनान्वये मत्वर्थलक्षणादोषः। वैयधिकरण्येनान्वये तु यागाश्रितेन गुणेन फलं कुर्यादिति फलाय गुणविधौ गुणेन यागं कुर्यादिति कर्मणि गुणविधौ च यजेरुद्देश्यविधेयसमर्पकत्वाभावात्समानपदोपात्तधात्वर्थं परित्यज्य भिन्नपदोपात्तगुणस्य विधानाच्च धातोः पारार्थ्यं विधिविधेययोर्विप्रकर्षश्च दोषः। कर्मणि गुणविधौ तु कर्मपदानन्वयश्चेति स्थितम्। तत्र कर्मणि गुणविधौ वैयधिकरण्येनैवान्वयाभ्युपगमान्नात्र मत्वर्थलक्षणा प्रसज्यते। नापि कर्मपदानन्वयः। न ह्यत्र केवलं कर्मणि गुणविधिः येन कर्मपदानन्वयः स्यात्। किंतु कर्मणोऽपि करणत्वेन फले विधानम्। न च वाक्यभेदः शङ्क्यः। वाजपेयेन यागं कुर्यात्, यागेन स्वाराज्यं कुर्यादिति विध्यावृत्तौ हि वाक्यभेदः प्रसज्यते। विध्यावृत्तिश्च यागस्य कर्मत्वेन करणत्वेन च पृथगुपस्थितौ सत्यां संभाव्यते। नात्र तथा पृथगुपस्थितिः, कर्मत्वकरणत्ववाचकशब्दाभावात्। यजेतेत्यत्र हि लिङा भावनोच्यते। यजिना यागः। तयोः संबन्धस्तु सामान्यरूपेणैव समभिव्याहाराद्गम्यते। तेन च संबन्धसामान्यरूपेण कर्मत्वकरणत्वयोः संभवति युगपदुपस्थितिः। तथा च यागं यागेन च कुर्यादिति यागस्य कर्मत्वकरणत्वाभ्यां युगपदेव भावनान्वयः। एकाप्येषा भावना विषयभेदाद्भिद्यते यागं कुर्याद्यागेन कुर्यादिति। न तु वस्तुतः। तत्र यागकर्मकांशे यजिद्वारा गुणसंबन्धं यागकरणकांशे फलसंबन्धं च युगपदेव भावना लभते वाजपेयगुणसाध्ययागेन स्वाराज्यं कुर्यादिति। अतो न विध्यावृत्तिलक्षणवाक्यभेदः। यजेरुद्देश्यविधेयसमर्पकत्वाच्च नात्यन्तपारार्थ्यम्। नापि विप्रकृष्टविधानम्, यागकरणकांशे समानपदोपात्तधात्वर्थस्यैव विधानात्। यागकर्मकांशेऽपि वाजपेयगुणस्य करणत्वेन तृतीयानिर्दिष्टस्य फलकरणे यागेऽन्वयो न संभवति, कारकाणां मिथः संबन्धाभावात्। नापि साक्षात्फलभावनायाम्, समानपदोपात्तयागरूपकरणान्तरावरुद्धत्वात्। अतो वाजपेयसाध्येन यागेन कुर्यादिति यजिद्वारा गुणस्य संबन्धो वाच्यः। ततश्च शाब्दमर्यादया वाजपेयसाध्यत्वेन रूपेण यागस्यैव फले विधानम्। कर्मणि गुणविधानं त्वार्थिकम्। तथा च समानपदोपात्तधात्वर्थस्यैव विधानान्न विप्रकृष्टविधानम्। किंच नामधेयत्वे सामानाधिकरण्यादेव करणत्वलाभात्तृतीया तदनुवादिन्यनर्थकप्राया। अतो वाजपेयशब्दो गुणविधिः। एवं च यवाग्वौषधद्रव्यकत्वात् 'वायव्यां यवागूं निर्वपेत्' इत्यादिवदैष्टिको विध्यन्तः प्रवर्तत इति पूर्वपक्षमुद्भाव्य निराकरोति—

नामधेये गुणश्रुतेः स्याद्विधानमिति चेत्तुल्यत्वात्क्रिययोर्न ॥ ६ ॥

प्राचीनैश्चतुर्भिरधिकरणैः सर्वत्र नामधेयत्वे विचारितेऽपि वाजपेयवाक्ये गुणविधिरेव स्यात्। कुतः। गुणश्रुतेः गुणात्तृतीयाश्रुतेः। गुणविधौ हि वैयधिकरण्येनान्वीयमानवाजपेयशब्दात्तृतीया वाजपेयलक्षणगुणगतं करणत्वं बोधयन्ती साफल्यमश्नुते। नामधेयत्वे तु यजिना वाजपे-

यशब्दस्य सामानाधिकरण्येनान्वयाद्यागगतं करणत्वमनुभाषमाणा भवेदनर्थकप्राया । अतस्तृतीयाश्रुत्या वैयधिकरण्येनैवान्वयलाभान्न मत्वर्थलक्षणादोषः । किंच गुणयोर्धर्मयोर्यागगतसाध्यत्वकरणत्वरूपयोः संबन्धसामान्यरूपेण यजिलिङ्समभिव्याहारतोऽवगमादित्यर्थः । ततश्चोक्तरीत्या धातोरत्यन्तपारार्थ्ये विप्रकृष्टविधानं कर्मपदानर्थक्यं वाक्यभेद इत्येते दोषा निरस्ताः । अतो गुणविधिः स्यात् इति चेत् तन्न । कुतः । क्रिययोस्तुल्यत्वात् गुणविधौ वाजपेयशब्दलभ्ययवाग्वादिद्रव्यकस्यास्य कर्मणो दर्शपूर्णमासकर्मणश्चौषधद्रव्यकत्वेन तुल्यत्वापातात् । ततश्च दार्शपूर्णमासिकविध्यन्तापत्तौ 'सप्तदशदीक्षो वाजपेयः' 'सप्तदशोपसत्को वाजपेयः' इति सोमाङ्गदीक्षोपसदनुवादेन संख्याविधानं नोपपद्येत । न च दीक्षोपसदोऽप्यपूर्वास्तत्र विधीयन्तामिति शङ्क्यम् । सप्तदशत्वस्य दीक्षोपसदां च विधाने वाक्यभेदापत्तेः ॥

अथ यदुक्तं साध्यत्वकरणत्वाभ्यां संबन्धसामान्यरूपेणोपस्थिताभ्यां यागस्य युगपदेकभावनायामन्वयाद्यागकर्मकयागकरणकोभयरूपायां तस्यां गुणफले युगपदेवान्वयं लभेते । ततश्च न वाक्यभेदधातुपारार्थ्यादिदोष इति । तत्राह—

[1]ऐकशब्द्ये परार्थवत् ॥ ७ ॥

शब्दनं शब्दः । भावे घञ् । एकः शब्द उच्चारणं यस्य यजेः स एकशब्दः । तस्य भावः ऐकशब्द्यम् । परार्थवदिति स्वार्थिको वतिः 'नित्यवदाम्नानम्' इतिवत् । यजेस्तावद्यागकरणकांशे स्वार्थमुच्चारणं स्वाभिधेययागविधानार्थत्वादित्युभयवादिसंप्रतिपन्नमेव । यागकर्मकांशे तु परार्थमपि तस्योच्चारणं स्यात्, स्वानभिधेयवाजपेयगुणविधानार्थत्वात् । स्वार्थं परार्थं च यजेरुच्चारणं स्यादिति यावत्, साध्यत्वेन करणत्वेन च यागस्य यजिनाभिधानादिति फलितम् । न चैतदैकशब्द्ये युज्यते । सकृदुच्चारिताद्यजेः साध्यत्वकरणत्वोभयरूपेण यागस्योपस्थितिर्न संभवतीति सूत्रस्य निर्गलितोऽर्थः ॥ तथाहि— संबन्धसामान्यरूपेणोपस्थितस्य यागस्य गुणफलाभ्यां न संबन्धयोग्यता । करणत्वेनोपस्थितस्यैव हि तस्य फलाकाङ्क्षा, साध्यत्वेनोपस्थितस्य च साधनाकाङ्क्षा । अतः साध्यत्वेन करणत्वेन च यागस्य भावनायामन्वयो वाच्यः । स च क्रमेण युगपद्वा । नाद्यः । यदि हि साध्यत्वेन यागस्य भावनायामन्वयो यागं कुर्यादिति तदा वाजपेयेनेति गुण एवान्वीयते, न तु फलम् । यदि च करणत्वेनान्वयः तदा यागेन स्वाराज्यं कुर्यादिति फलमेव यागेनान्वीयेत, न तु गुणः । उभयथाश्रयणे तु विध्यावृत्तिलक्षणो भवेद्वाक्यभेदः । न द्वितीयः, यस्मिन्नेव क्षणे यागस्य साध्यतया बोधस्तस्मिन्नेव क्षणे करणतया बोधस्यानुभवपराहतत्वात् । किंच गुणफलाभ्यां यागस्यान्वये सति न केवलं साध्यत्वसाधनत्ववैरूप्यकृत एव वाक्यभेदः, किंतु

1. एकशब्दे ।

विरुद्धत्रिकद्वयकृतोऽपि । तथाहि—यागस्य स्वाराज्यं प्रति साधनत्वे साध्यसिद्ध्यर्थत्वात्मकशेषत्वापरपर्यायं गुणत्वम्, तस्य च पारतन्त्र्यरूपत्वात्परार्थोत्पाद्यत्वलक्षणमुपादेयत्वम्, तस्य च विध्यधीनत्वाद्विधेयत्वम्, इति साधनत्वे गुणत्वोपादेयत्वविधेयत्वात्मकमेकं त्रिकम् । गुणं प्रति यागस्य साध्यत्वे च शेषित्वलक्षणं प्राधान्यम्, तस्य च कृत्युद्देश्यत्वं विनानुपपत्तेस्तदुद्देश्यत्वम्, अप्राप्तस्य चोद्देष्टुमशक्यत्वात्प्राप्तानुकीर्तनरूपमनुवाद्यत्वमित्यपरं त्रिकम् । [1]तदेवंविधत्रिकद्वयाक्रान्तो याग एकेन गुणतया प्रधानतया च उपादेयतया उद्देश्यतया च विधेयतया अनुवाद्यतया च वाक्यभेदमन्तरा कथं लभ्येत । अतो वाजपेयगुणस्य यागे यागस्य च स्वाराज्यफले विधिरित्ययुक्तम् । फलाय गुणविधौ केवलगुणविधौ च धातुपारार्थ्यादयो दोषा उक्ताः प्रसज्येरन् । विशिष्टविधौ च मत्वर्थलक्षणादोषः । तस्मात्कर्मनामधेयमेव वाजपेयशब्दः । तृतीयाविभक्तिश्च यागगतं करणत्वं बोधयति । न चार्थात्तदवगमः । ततः प्रागेवास्याः प्रवृत्तेः । अस्तु वा यागगतकरणत्वानुवादिन्येव सा, अगतेः, स्वाराज्यकरणत्वविशिष्टं केवलं च यागं प्रति केवलं च फलं प्रति वाजपेयगुणकरणत्वस्योक्तरीत्या निरस्तत्वात् । 'देवा वै यथादर्शं यज्ञानाहरन्त' इत्युपक्रम्य 'ते सहैव सर्वे वाजपेयमपश्यन्' इति प्रस्तुत्य 'स वा एष ब्राह्मणस्य चैव राजन्यस्य च यज्ञः तं वा एतं वाजपेय इत्याहुः' इति प्रवृत्तो वाक्यशेषोऽपि नामधेयत्व एवानुकूलः । तस्मान्नामधेयं वाजपेयशब्दः । एवमुद्भिदादिवाक्यमप्यत्रोदाहार्यम् । वाजपेयवाक्यमेव प्राचामनुरोधेनोदाहृतम् । यत्तु 'तुल्यत्वात्क्रियायोर्न' इति सोमाङ्गदीक्षोपसदादिलिङ्गोपन्यासाय तदुदाहरणमिति सोमनाथादयस्तन्न । तलवकारीयताण्डकादिब्राह्मणेषु उद्भिदादिष्वपि 'अथैष उद्भित्सप्तदशो भवति बृहत्सामा निषेधब्रह्मसामा' 'पञ्चदशो वलभिद्भवति रथन्तरसामा उत्सेधब्रह्मसामा' इत्यादिना स्तोत्रपरिमाणब्रह्मसामादिसोमाङ्गदर्शनात् । माध्यंदिनसवने ब्राह्मणाच्छंसिशस्त्राय गीयमानं साम ब्रह्मसाम । उत्सेधाख्यब्रह्मसामकः निषेधाख्यब्रह्मसामकः भवेदित्यर्थः । यदपि वदन्ति, वाजः अन्नं पेयं सुराग्रहविधिलब्धसुरारूपं यस्येति बहुव्रीह्याश्रयणेन तत्प्रख्यतया नामधेयत्वं वाजपेयस्येति तन्न । तथा सति बहुव्रीहिपूर्वपदप्रकृतिस्वरेणाद्युदात्तत्वापत्तेः, 'सप्तमीविशेषणे बहुव्रीहौ' इति पेयशब्दस्य पूर्वनिपातापत्तेश्च । जातिक्रियासमभिव्याहारे क्रियाशब्दस्य विशेषणताया एव तत्र व्यवस्थापितत्वात् । वस्तुतस्तु, पिबन्ति सोमं यस्मिन्सः पेयः । 'अचो यत्' इत्यधिकरणे यत्प्रत्ययः । 'ईद्यति' इतीत्त्वम् । ईकारस्य गुणः । वाजाय अन्नाय पेयः वाजपेय इति तादर्थ्यचतुर्थ्या 'सुप्सुपा' इति समासः, धर्माय नियमो धर्मनियम इतिवत् । कृदुत्तरपदप्रकृतिस्वरत्वेन 'यतोऽनावः' इत्याद्युदात्तत्वम् । वाजार्थं होमं हुतशेषं यत्र पिबन्ति स

1. तदेवं विरुद्धत्रिक—क, घ.

वाजपेय इति फलितम्। एवं हि तैत्तिरीयके श्रूयते— 'स वा एष ब्राह्मणस्य चैव राजन्यस्य च यज्ञः। तं वा एतं वाजपेय इत्याहुः। वाजाप्यो वा एषः। वाजं ह्येतेन देवा ऐप्सन्' इति, 'वाजं वा एषोऽवरुरुत्सते यो वाजपेयेन यजते' इति च। वाजः आप्यते अनेनेति वाजाप्यः। करणे कृत्यप्रत्ययः। तदाह वाजं ह्येतेनेति। ऐप्सन् प्राप्तुमैच्छन्। अवरुरुत्सते प्राप्तुमिच्छति। तथा च अन्नप्राप्तिफलको वाजपेय इति फलितम्। तदेतद्भट्टभास्करीये वेदभाष्ये स्पष्टम्। 'वाजपेयेनान्नाद्यकामो यजेत' इत्येव तलवकारीयम्। स्वाराज्यफलकत्वेऽपि कदाचिदन्नफलकत्वयोगेन प्रातर्होमादावग्निहोत्रादिशब्दवन्नामधेयत्वोपपत्तिः। यद्वा वाजाय अमृताय पेयः वाजपेयः। अन्नकाम इत्यत्रापि अन्नशब्दस्यामृतमेवार्थः। स्वाराज्यकाम इति पर्यवस्यति। परमार्थतस्तु वाजश्चासौ पेयश्चेति कर्मधारयसमासे पेयशब्दस्य पूर्वनिपातापत्तेः बहुव्रीहेश्चोक्तरीत्या निरस्तत्वेन विशिष्टविधिमाश्रित्य विशेषणे पर्यवसानस्याप्यलाभात् उक्तवाक्यशेषे प्रकारान्तरेण तन्निर्वचनेन नामधेयत्वसिद्धेः गुणविधिपूर्वपक्षस्यैवानुन्मेषादुदाहरणान्तरमेवात्रापि युक्ततरं पश्यन्तु। इति वाजपेयाधिकरणम्॥

नामधेयत्वं क्वचिदपवदितुमिदमारभ्यते। इदमामनन्ति 'आग्नेयोऽष्टाकपालोऽमावास्यायां च पौर्णमास्यां चाच्युतो भवति' इति। अग्नीषोमीयादियागो दर्शोच्यवते। ऐन्द्रादिः पूर्णमासाच्च्यवते। आग्नेयस्तु नोभयस्माच्च्यवत इत्यच्युतः। तत्राग्नेयशब्दो गुणविधिः कर्मनामधेयं वेति संशयः। नामधेयत्वमेव स्यात्। आग्नेयत्वस्याष्टानां कपालानाममावास्यापौर्णमासीकालयोरिति बहूनां गुणानां विधौ वाक्यभेदापत्तेः। न च विशिष्टविधौ न वाक्यभेद इति वाच्यम्, गौरवात्, बहुष्वपि विशेषणांशेषु गुणेषु विधिपर्यवसानस्य विध्यावृत्तिं विना असंभवेन वाक्यभेदस्य तदवस्थत्वाच्च। न च 'उद्भिदा यजेत' इत्यत्र नामार्हकर्मविशेषस्य यजिनोपात्तत्वात्तन्नामधेयमुद्भित्पदमिति युक्तम्; इह तु नामार्हकर्मविशेषानुपादानात्कथमाग्नेयपदं नामधेयमिति वाच्यम्। अष्टाकपाल इत्यनेनैव तल्लाभात्। तेन ह्यष्टाकपालद्रव्यककिंचिद्धात्वर्थविशिष्टभावना गम्यते। धात्वर्थानुरागमन्तरेण द्रव्यस्य तस्य भावनान्वयानुपपत्तेः। स च धात्वर्थः 'शिरो वा एतद्यज्ञस्य यदाग्नेयो हृदयमुपांशुयाजः पादावग्नीषोमीयः' इति वाक्यशेषे उपांशुयाजादिसमभिव्याहाराद्यागरूप उन्नीयते। न च प्रवृत्तिनिमित्तस्याग्निदेवतागुणस्यान्यतोऽप्राप्तेः कथं नामधेयत्वमिति वाच्यम्। 'अग्निर्मूर्धा भुवो यज्ञस्य' इति मन्त्रवर्णतस्तत्प्राप्तेः। अतोऽग्निहोत्रादिशब्दवत्कर्मनामधेयमाग्नेयशब्दः इति प्राप्ते, सिद्धान्तयति—

७. आग्नेयादीनामनामताधिकरणम्।

तद्गुणास्तु विधीयेरन्नविभागाद्विधानार्थे न चेदन्येन शिष्टाः॥ ८॥

तुशब्दोऽवधारणे। गुणशब्दसमभिव्याहृततच्छब्दः प्रधानभूतधात्वर्थं यागं परामृशति। स च गुणाश्च तद्गुणाः यागः अग्न्यादयश्च अत्रावश्यं विधीयेरन्, न तु नामधेयमाग्नेयश-

ष्टः। कुतः। न चेदन्येन शिष्टाः। चेच्छब्दो ह्यर्थे 'ईजाना बहुभिर्यज्ञैर्ब्राह्मणा वेदपारगाः। ज्ञास्यन्ति चेत्प्रमाणं स्युस्ते यान्ति परमां गतिम्' इति यथा। यतः अन्येन प्रमाणान्तरेण न शिष्टाः। 'शासु' अनुशिष्टौ। अनुशासनं विधानम्। न विहिताः यागे अग्न्यादयश्च गुणाः। अतः अग्निदेवतागुणयोगं निमित्तीकृत्य आग्नेयशब्दस्य नामधेयत्वमाश्रयितुं न युक्तम्। न च 'अग्निर्मूर्धा' इत्यादिमन्त्रवर्णतो देवताप्राप्तिसंभवः। तथाहि—अष्टाकपालभवनाक्षिप्तभावनायामष्टाकपालद्रव्यस्य धात्वर्थानुरागमन्तरेणान्वयासंभवाद्धात्वर्थः कश्चित्कल्प्यमानः पुरोडाशस्वरूपनिर्माणरूप एव पर्यवस्यति। स च स्वानुष्ठानाय मन्त्रानपेक्षमाणोऽपि 'मखस्य शिरोऽसि' इत्यादिपुरोडाशस्वरूपनिर्माणमन्त्रैः शान्ताकाङ्क्षत्वाद्देवतोद्देश्यकद्रव्यत्यागरूपयागत्वानिश्चयाच्च देवताप्रतिपादकमन्त्रानपेक्षतया तत्र मन्त्रान्वयासंभवेन कथं मन्त्रवर्णतो देवताप्राप्तिसंभवः। न च 'शिरो वा एतद्यज्ञस्य यदाग्नेयः' इति वाक्यशेषे उपांशुयाजसाहचर्याद्यागत्वनिश्चयसंभवः। तत्र हि वाक्यशेषे आग्नेयशब्दस्य कर्मनामधेयत्वे निश्चिते सत्याग्नेयशब्दाभिधेयस्य कर्मण उपांशुयाजसाहचर्याद्यागत्वनिश्चयः। यागत्वनिश्चये च मन्त्रवर्णिकदेवताप्राप्त्या आग्नेयशब्दस्य कर्मनामधेयत्वमित्यन्योन्याश्रयः प्रसज्यते। न च प्रथमं यागत्वनिश्चयेऽप्याघारवन्मन्त्रान्वयोऽप्यस्तिति वाच्यम्। वैषम्यात्। आघारे हि प्रथमं यागत्वानिश्चयेऽपि 'इत इन्द्र ऊर्ध्वोऽध्वर इत्याघारमाघारयति' इति विनियोगवचनबलान्मन्त्रान्वयः। नात्र तथा याज्यापुरोनुवाक्यायुगलस्याष्टाकपालद्रव्यव्यापारे विनियोजकं वचनमस्ति, येन तत्र मन्त्रोऽन्वीयेत। ततश्च मन्त्रवर्णतो देवतालाभासंभवादाग्नेयशब्देन देवताविधिरेव स्वीकर्तव्यः। ननु, अष्टत्वादिगुणानां यागस्य च विधानाद्वाक्यभेदः; न च विशिष्टविधानान्न दोष इति वाच्यम्, यज्यश्रवणेन तदसंभवात् इत्यत आह—अविभागाद्विधानार्थ इति। द्रव्यदेवतादिविशिष्टविधानपरेऽस्मिन्वाक्ये प्रत्यक्षयज्यश्रवणेऽपि अष्टाकपालद्रव्यस्याग्नेय इति तद्धितेन गम्यमानादग्निदेवतासंबन्धाद्यागः कल्प्यते। कुतः। अविभागात् द्रव्यदेवतासंबन्धस्य यागेनाविनाभावात् देवतात्वस्य त्यज्यमानद्रव्योद्देश्यतारूपत्वात्। ततश्च विशिष्टविधौ नानुपपत्तिः। तत्र विशेषणानामार्थिकानेकविधिविधेयत्वेऽपि श्रूयमाणविधेरावृत्त्यभावान्न वाक्यभेददोषः। विशेषणेष्वार्थिकविधिभेदनिबन्धनं च गौरवमगत्या स्वीकार्यम्। तस्माद्गुणविधिरेवाग्नेयशब्दः, न तु नामधेयम्। प्रयोजनमाग्नेयशब्दस्य नामधेयत्वे 'तस्मादप्यन्यदेवत्यामालभमान आग्नेयमष्टाकपालं पुरस्तान्निर्वपेत्' इत्यादिविकृतावग्न्यन्वाधानयाजमानमन्त्रे 'पौर्णमासं हविरिदमेषां मयि' इत्यत्र पौर्णमासमित्यस्य स्थाने आग्नेयमित्यूहः। गुणविधौ तु तदभावः। ऐष्टमित्येवोह्यम्। नामधेयत्वे याज्यानुवाक्यामन्त्रवर्णाद्धूयवदानमात्रस्यैवाग्निदेवतासंबन्धः, तावन्मात्रस्य याज्यान्ते क्रियमाणहोमसंबन्धात्। गुणविधौ तु कृत्स्नस्य पुरोडाशस्याग्निदेवतासंबन्धः सिध्यति। यथा चैतत्तथा निवीतपादे 'सर्वप्रदानं हविषस्तदर्थत्वात्' इत्यत्र व्यक्तं भविष्यति। इति तद्गुणाधिकरणम्॥

कर्मनामधेयप्रसङ्गाद्द्रव्यनामधेयेषु विचार्यते । 'बर्हिर्लुनाति' 'आज्यं निर्वपति' इत्यादौ बर्हिराज्यशब्दौ संस्कारनिमित्तौ जातिनिमित्तौ वेति संशयः । यूपाहवनीयादिशब्दवत्संस्कारनिमित्तौ स्यातां । तथाहि— नात्र बर्हिराज्योद्देशेन लवननिर्वपणादिविधिः; किंतु

८. बर्हिरादिशब्दानां जातिवाचितार्धिकरणम् ।

'वृक्षं छिनत्ति यूपं कर्तुम्' 'अग्निमादधात्याहवनीयं कर्तुम्' इत्यादिवत् लुनाति बर्हिः कर्तुम्, निर्वपत्याज्यं कर्तुमित्येवं संस्कारविधानम् । न च 'पालाशो यूपो भवति' 'अग्नीनादधीत' इत्यादिविधिपर्यालोचनया पलाशादिवृक्षस्याग्नेश्च कर्मतया लाभाद्वृक्षं छिनत्ति यूपीकर्तुमग्निमादधात्याहवनीयीकर्तुमिति संस्कारविधिर्युज्यते । इह तु बर्हिराज्यशब्दौ विना लवननिर्वपणकर्मसमर्पकस्य शब्दान्तरस्याभावात्कथं संस्कारविधिरिति वाच्यम् । 'दर्भैः स्तृणीत हरितैः' इति मन्त्रैर्दर्भाणाम् 'घृतं च वै मधु च प्रजापतिरासीत्' इत्यादिवाक्यशेषे घृतस्य च प्रस्तुतत्वेन कर्मत्वोपपत्तेः । अतो दर्भाल्लुनाति बर्हिः कर्तुम्, घृतं निर्वपत्याज्यं कर्तुमिति बर्हिराज्यात्मकसंस्कारविधानाद्बर्हिराज्यशब्दौ संस्कारनिमित्तौ । यद्यपि 'बर्हिरादाय गावो गताः' 'आज्यं वणिजो विक्रीणन्ति' इति लोके असंस्कृतेऽपि प्रयोगो दृश्यते, तथापि 'शास्त्रस्था वा तन्निमित्तत्वात्' इत्यनुपदमेव लोकप्रसिद्धयपेक्षया शास्त्रप्रसिद्धेर्बलवत्त्वस्य निर्णीतत्वेन याज्ञिकप्रसिद्ध्यनुसारेण संस्कारनिमित्तत्वमेवाश्रयितुं युक्तम् इति प्राप्ते, सिद्धान्तयति—

बर्हिराज्ययोरसंस्कारे शब्दलाभादतच्छब्दः[1] ॥ ९ ॥

संस्काराभावेऽपि बर्हिराज्यशब्दयोरस्ति वृत्तिः । कुतः । शब्दलाभात् असंस्कृतेऽपि 'बर्हिरादाय गावो गताः' 'आज्यं वणिजो विक्रीणन्ति' इति लोके बर्हिराज्यशब्दप्रयोगदर्शनात् । तस्मात् बर्हिःशब्दः आज्यशब्दश्च अतच्छब्दः संस्कारवाचको न भवति । न च शास्त्रप्रसिद्धेर्बलवत्त्वाल्लोकप्रसिद्धिबाधः शङ्क्यः । आश्वबालादिशब्दस्य हि काशादावश्वपुच्छादौ च याज्ञिकलौकिकप्रसिद्धयोर्विरोधाद्याज्ञिकप्रसिद्धेर्लौकिकप्रसिद्धिबाधनं युक्तम् । नेह तथा, याज्ञिकानामपि जातिविशेषं विना क्वापि प्रयोगाभावात् । न च जात्यवच्छिन्ने सर्वत्र याज्ञिकानां प्रयोगाभावादस्त्येव विरोध इति वाच्यम् । न हि यो यत्र शक्तः स तत्र सर्वैः प्रयोक्तव्य इति नियमोऽस्ति, आलस्यादिना प्रयोगाभावस्य सर्वत्र संभवेन क्वापि शब्दे तथा नियमासंभवात् । तस्माज्जातिनिमित्तावेव बर्हिराज्यशब्दौ । अत्र पुरोडाशाभिक्षाधानादिशब्दा अप्युदाहार्याः, 'पुरोडाशेन मे माता प्रहेलकं ददाति' 'आभिक्ष्णया बालकाः क्रीडन्ति' 'मासं गुडधानाः खादन्ति' इत्यादिप्रयोगदर्शनात् । प्रयोजनं संस्कारनिमित्तत्वे 'बर्हिषा यूपावटं स्तृणाति' 'आज्येन यूपमनक्ति' 'एककपालेन

1. शब्दः स्यात् ।

पुरोडाशेन प्रातरनुवाकमुपाकरोति' 'आमिक्षा वैश्यस्य व्रतं भवति' 'धानाभिर्हारियोजनं श्रीणाति' इत्यादौ संस्काराणां प्रवृत्तिः । जातिनिमित्तत्वे तु तदप्रवृत्तिः । इति बर्हिराज्याधिकरणम् ॥

'प्रोक्षणीरासादय' इत्यत्र 'प्रोक्षणीरुत्पुनाति' इत्याद्युत्पवनादिसंस्कारनिमित्तः प्रोक्षणीशब्दः, उत अप्त्वजातिनिमित्तः, किं वा यौगिकः क्रियानिमित्तः इति संशये 'प्रोक्षणीभिरुद्वेजिताः स्मः' इति संस्कारविहीनास्वप्स्वपि प्रोक्षणीशब्दस्य प्रयोगदर्शनाद्बर्हिराज्यादिशब्दवत्पूर्वाधिकरणन्यायेन जातिनिमित्तत्वं प्राप्तम् । न च प्रपूर्वात् 'उक्ष' सेचने इति धातोः करणे ल्युटि व्युत्पन्नस्यास्य प्रकृष्टसेचनसाधनतावाचकत्वस्य योगेनैव संभवाद्यौगिकत्वमेव न्याय्यमिति वाच्यम् । योगापेक्षया रूढेर्बलवत्त्वात् तत्तत्पदार्थशक्तपदसमूहरूपाद्वाक्याद्धि पदार्थसंसर्गरूपवाक्यार्थप्रतीतिस्तत्तत्पदशक्त्युपस्थापितमुख्यार्थरूपपदार्थनिबन्धनत्वाल्लाक्षणिकी । तथा अवयवद्वारेण पदार्थप्रतीतिरपि वाक्यार्थतुल्ययोगक्षेमत्वाल्लाक्षणिकी । समुदायप्रसिद्धिरूपया रूढ्या त्वर्थप्रतीतिः पदश्रवणमात्रनिबन्धनत्वाच्छौती । तस्मात्प्रोक्षणीशब्देनापि रूढ्या अप्त्वजात्यभिधानमिति प्राप्ते, सिद्धान्तयति—

९. प्रोक्षण्यादिशब्दानां यौगिकताधिकरणम् ।

प्रोक्षणीष्वर्थसंयोगात् ॥ १० ॥

स्त्रीलिङ्गबहुवचनान्तप्रोक्षणीशब्दे अवयवार्थसंयोगाद्योग एवाश्रयणीयः, न तु रूढिः । न च रथकारशब्दवद्रूढिरिति युज्यते, वैषम्यात् । कल्पतैव रूढिर्योगं बाधते । रथकारशब्दस्य च त्रैवर्णिकबहिर्भूतऋभुसौधन्वनसात्त्वतादिनामधेये जातिविशेषे 'ऋभूणां त्वा देवानां व्रतपते' इत्याधानमन्त्रवर्णात् 'सौधन्वना ऋभवः' इति मन्त्रे सामानाधिकरण्यनिर्देशाच्च रूढिः कल्पता योगं बाधत इति कृत्वा 'व्रात्यात्तु जायते वैश्यात्सुधन्वाचार्य एव च । कारूषश्च विजन्मा च मैत्रः सात्त्वत एव च' इति स्मृतिसिद्धजातिविशेषवाचित्वं युज्यते । अश्वकर्णादिशब्देषु त्ववयवार्थासंभवादेव रूढिराश्रीयते । न हि प्रोक्षणीशब्दे अप्त्वजातिरूढिसाधकं वचनमवयवार्थासंभवो वास्ति, येन रूढिर्योगं बाधेत । न च 'प्रोक्षणीभिरुद्वेजिताः स्मः' इति प्रयोगबलादेवाप्त्वजातौ रूढिः कल्प्या स्यादिति वाच्यम् । अवयवार्थयोगेनैव प्रयोगस्योपपन्नत्वेन तस्य रूढिकल्पकत्वानुपपत्तेः । न च योगाश्रयणे अर्थप्रतीतिर्लाक्षणिकी स्यादिति वाच्यम् । दृष्टमुख्यार्थसंबन्धरूपलक्षणाश्रयणापेक्षया अदृष्टसमुदायशक्तिकल्पनाया एव गरीयस्त्वात् । न च योगार्थसंभवेऽपि पङ्कजादिवद्योगरूढत्वमस्त्विति वाच्यम् , वैषम्यात् । पङ्कजनिकर्तृत्वरूपयोगार्थसंभवेऽपि पद्मत्वजातिं विहाय कुमुदादौ पङ्कजशब्दप्रयोगाभावेन तत्र योगरूढिराश्रीयते । प्रकृते तु 'आज्यं प्रोक्षणम्' इत्यप्त्वजात्यभावेऽपि प्रयोगदर्शनेन योगरूढ्यसंभवः । तथा च यत्र रूढिसाधकं प्रमाणमस्ति रथकारादिशब्दे, यत्र वा अव-

यवार्थो न संभाव्यते अश्वकर्णादिशब्दे तत्र केवला रूढिः। यत्र अवयवार्थे संभवत्यपि क्वचिदेव प्रयुज्यते न सर्वत्र यथा पङ्कजादिशब्दे तत्र योगरूढिरिति निष्कर्षः। प्रकृते चास्वजातौ प्रोक्षणीशब्दस्य न रूढिबोधकं शास्त्रमस्ति अवयवार्थश्च संभवति। अतो न केवलरूढिः। आज्येऽपि प्रयोगदर्शनान्न योगरूढिः। अतः केवलयौगिक एवायं प्रोक्षणीशब्दः क्रियानिमित्तः। न च घृतक्षीरादेरपि 'प्रोक्षणीरासादय' इत्यत्र प्रतीतिः शङ्क्या। स्त्रीलिङ्गबहुवचनाभ्याम् 'आपो वै रक्षोघ्नीः' इति वाक्यशेषोपात्तानामपामेव विशेष्यत्वेनोपस्थितेः। तदेतत्सूत्रे स्त्रीलिङ्गबहुवचनान्तप्रोक्षणीशब्दोपादानेन सूचितम्। प्रयोजनं संस्कारनिमित्तत्वे स्त्रीलिङ्गबहुवचनान्तस्यैव संस्कारवाचित्वात्सोमारौद्रचरौ 'आज्यं प्रोक्षणम्' इति विहिते आज्येऽपि प्रोक्षणीरित्यविकृत एव प्रयोज्यः। जातिनिमित्तत्वे आज्यत्वजातिप्रकाशनाय 'आज्यमासादय' इति प्रयोज्यम्। यौगिकत्वे तु 'प्रोक्षणमासादय' इति लिङ्गवचनोहेन प्रयोगः इति। यत्त्वत्र सोमनाथदीक्षिताः 'रथकारस्तु माहिष्यां करण्यां यस्य संभवः' इति स्मृत्या रथकारशब्दस्य रूढिमाचख्युस्तद्रथकाराधिकरणे 'सौधन्वनास्तु हीनत्वान्मन्त्रवर्णात्प्रतीयेरन्' इति सूत्रभाष्यवार्तिकतन्त्ररत्नादिग्रन्थविस्मरणविजृम्भितमेवेत्यास्तां तावत्। इति प्रोक्षण्यधिकरणम्॥

'निर्मन्थ्येनेष्टकाः पचन्ति' इत्यत्र किम् 'गायत्रं छन्दोऽनुप्रजायस्वेति त्रिः प्रदक्षिणमग्निं मन्थति' इत्यादिसंस्कारनिमित्तो निर्मन्थ्यशब्दः, उत अग्नित्वजातिनिमित्तः, किं वा योगनिमित्त इति

१०. निर्मन्थ्यशब्दस्य यौगिकताधिकरणम्।

संशये 'निर्मन्थ्यमानय ओदनं पक्ष्यामहे' इत्यसंस्कारेऽपि प्रयोगदर्शनाद्बर्हिराज्यादिशब्दवत्संस्कारनिमित्तत्वनिरासेन जातिनिमित्तत्वमेवावतिष्ठामहे। न च निष्पूर्वान्मन्थतेः 'ऋहलोर्ण्यत्' इति कर्मणि ण्यति निष्पन्नस्य निर्मन्थ्यशब्दस्यावयवार्थयोगेन मन्थनकर्मतावाचित्वसंभवात्प्रोक्षणीशब्दवद्यौगिकत्वमेव स्यादिति वाच्यम्, वैषम्यात्। प्रोक्षणीशब्दस्य ह्याप्सु सेचनसाधनत्वस्य सर्वदा सत्त्वाद्यौगिकत्वं युज्यते। [1]अरण्यस्थदण्डादिसाधारण्याय अनन्यथासिद्धनियतपूर्ववृत्तिजातीयत्वस्यैव कारणतात्वस्वीकारात्। प्रकृते तु मन्थनकर्मत्वं मन्थनजन्यनिष्पत्त्यवस्थालक्षणफलशालित्वम्। तच्च निष्पन्नावस्थायां न संभाव्यते। निष्पन्ने चाग्नौ निर्मन्थ्यशब्दं प्रयुञ्जते लोके। न च भूतपूर्वगत्या प्रयोगस्योपपत्तिसंभवः। व्यक्त्यैक्ये हि भूतपूर्वगतिः। अग्निस्तु प्रतिक्षणमधिकतुषकाष्ठादिव्यापनप्रयुक्तपरिमाणभेदाद्भिद्यते। ततश्च यस्यां व्यक्तौ निर्मन्थ्यशब्दः प्रयुज्यते न तस्यां भूतपूर्वगत्या मन्थनकर्मत्वमस्ति, निष्पत्त्यवस्थापन्नव्यक्तेर्निष्पन्नव्यक्तेश्च भिन्नत्वात्। अतो योगार्थाभावेऽपि प्रयोगदर्शनादश्वकर्णादिशब्दवद्बर्हिराज्यादिशब्दवच्च केवलाग्नित्वजातिनिमित्त एव निर्मन्थ्यशब्द इति प्राप्ते, सिद्धान्तयति—

1. वनस्थ—ख.

तथा निर्मन्थ्ये ॥ ११ ॥

यथा प्रोक्षणीशब्दोऽवयवार्थसंभवाद्यौगिकः तथा निर्मन्थ्यशब्दोऽपि [1]स्यात्। प्रतिक्षणं व्यक्तिभेदेऽपि मन्थनकर्माग्निसंतानस्यैकत्वेन व्यक्तीनामप्येकत्वमापाद्य भूतपूर्वगत्या निष्पन्नावस्थायामप्यवयवार्थयोगसत्त्वेन यौगिकत्वे बाधकाभावात्। न च विनिगमनाविरहः। यथाकथंचिदवयवयोगेनैवोपपत्तावत्यन्तादृष्टरूढिशक्तिकल्पनाया अयुक्तत्वात्। एतेन प्रोक्षण्यधिकरणेन गतार्थता निरस्ता, उक्तरीत्या अधिकशङ्कानिराकरणार्थत्वात्। प्रयोजनं संस्कारनिमित्तत्वे संस्काराणां प्राप्तिः, जातिनिमित्तत्वे अग्निमात्रस्य प्राप्तिः, यौगिकत्वे अचिरमन्थनजन्यस्यैवाग्नेः प्राप्तिः इति भाष्यकृतः। 'उपसर्गेण धात्वर्थो बलादन्यत्र नीयते' इति न्यायेन निरित्युपसर्गवशादचिरत्वलाभः। किंच 'इष्टकाः पचन्ति' इति पाकादेवाग्निविशेषे प्राप्ते लोहितोष्णीषादिवद्विशेषणपरो निर्मन्थ्यशब्दो मन्थनक्रियामेवाङ्गतया विदधदङ्गानां प्रधानदेशकालकर्तृकत्वनियमादचिरतां मन्थनस्य गमयति। तस्मादचिरमन्थनक्रियानिमित्तो निर्मन्थ्यशब्द इत्यास्तां तावत्। इति निर्मन्थ्याधिकरणम् ॥

११. वैश्वदेवादिशब्दानां नामधेयताधिकरणम्।

सन्ति चातुर्मास्यानि 'अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति' इति। तत्र सन्त्यष्टौ यागाः 'आग्नेयमष्टाकपालं निर्वपति, सौम्यं चरुम्, सावित्रं द्वादशकपालम्, सारस्वतं चरुम्, पौष्णं चरुम्, मारुतं सप्तकपालम्, वैश्वदेवीमामिक्षाम्, द्यावापृथिव्यमेककपालम्' इति। तत्संनिधाविदमाम्नायते 'वैश्वदेवेन यजेत' इति। तत्र वैश्वदेवशब्दो गुणविधिः कर्मनामधेयं वेति संशयः। तत्र देवतातद्धितस्य 'सूक्तहविषोरेवेष्यते' इति वार्तिककृता कात्यायनेन नियमितत्वेन वैश्वदेवशब्दस्य यागनामत्वासंभवात्प्रकृताष्टाकपालादिद्रव्याण्येव वैश्वदेवशब्देनाभिधीयन्ते। तत्र द्रव्याणामाग्नेयादिवाक्यैरेव प्राप्तत्वाग्निर्मन्थ्यशब्दे मन्थनवदुपसर्जनीभूतापि विश्वे देवा देवता विधीयते। न चाग्न्यादिदेवतावरुद्धेषु तेषु यागेषु देवतान्तरविधानं विरुद्धमिति वाच्यम्। अत एव विरोधाद्विकल्पोपपत्तेः। अतो वैश्वदेवशब्दो गुणविधिरिति पूर्वपक्षमुद्भाव्य निराकरोति—

वैश्वदेवे विकल्प इति चेन्न[2] प्रकरणात्प्रत्यक्षविधानाच्च न हि प्रकरणं द्रव्यस्य ॥ १२ ॥

वैश्वदेवशब्दे विश्वदेवलक्षणदेवतागुणो विधीयते। ततश्चाग्न्यादिभिस्तस्य गुणस्य विकल्पः स्यादिति चेत्, तन्न। कुतः। प्रकरणात् प्रत्यक्षविधानाच्च। वैश्वदेववाक्ये हि यजिना यागसामान्यं

1. निर्मन्थ्ये स्यात्—ख, ग. 2. न वा प्रकरणात्.

शब्दशक्त्या गम्यते । आग्नेयादिवाक्योत्पन्नप्रकृतयागीयद्रव्यपरत्वं तु तस्य प्रकरणाल्लभ्यमिति विश्वदेवलक्षणगुणः प्रकरणगम्यः । अग्न्यादयस्तु प्रकरणनिरपेक्षतया प्रत्यक्षशिष्टाः । चशब्दोऽनुक्तसमुच्चये । विश्वदेवगुणस्तावद्यागाननूद्य विधानादुत्पन्नशिष्टः । अग्न्यादयस्तूत्पत्तिशिष्टाः । अतो न विकल्पो युज्यते । कुतः । हि यस्मात्कारणात् प्रकरणम् उत्पन्नशिष्टप्रकरणानुगृहीतविश्वदेवगुणः द्रव्यस्य अष्टाकपालादिद्रव्यसंयोगेन उत्पत्तिवाक्येषु श्रुतस्य अग्न्यादिदेवतागुणस्य न पक्षे बाधकं भवितुमर्हति । उत्पन्न्युत्पन्नशिष्टयोर्गुणाधिकरणे श्रुतिप्रकरणयोश्च श्रुतिलिङ्गादिसूत्रे प्राबल्यदौर्बल्ये व्यवस्थापयिष्येते ।

गुणविधौ दोषान्तरमाह—

मिथश्चानर्थसंबन्धः ॥ १३ ॥

अयुक्तोऽर्थसंबन्धः अनर्थसंबन्धः । गुणविधावामिक्षायां विश्वदेवदेवताकत्वस्य 'वैश्वदेवीमामिक्षाम्' इत्युत्पत्तिवाक्यत एव प्राप्तत्वात्तद्व्यतिरिक्तेषु सप्तस्वेव हविःषु विश्वे देवा विधीयन्त इति वक्तव्यम् । तथा च एकस्यैव वैश्वदेवशब्दस्य विधित्वानुवादत्वयोरर्थयोः मिथः परस्परं संबन्धः स्यात् । न चैतद्युज्यते ॥

इतोऽपि गुणविधौ दोषान्तरमाह—

परार्थत्वाद्गुणानाम् ॥ १४ ॥

एकैवाहुतिः स्यादिति शेषः । 'याज्यायां वषट्करोति' 'वषट्कृते जुहोति' इति यागानुष्ठानं विहितम्, प्रक्षेपशिरस्कदेवतोद्देश्यकद्रव्यत्यागस्यैवाहुतिशब्दार्थत्वात् । तथा च सूत्रम् 'तदुक्ते श्रवणाज्जुहोतिरासेचनाधिकः स्यात्' इति । तस्य यागानुष्ठानं द्रव्यभेदेऽपि न भिद्यते, बहूनामपि द्रव्याणां युगपदेव त्यागे विरोधाभावात् । न च विरोधाभावेऽपि द्रव्यभेदादेव यागानुष्ठानभेदः शक्यते वक्तुम् । पुरोडाशादिद्रव्याणां यागं प्रति परार्थत्वेन गुणभूतानां स्वरूपेण प्रधानभूतयागानुष्ठानभेदप्रयोजकत्वानुपपत्तेः गुणावृत्त्या प्रधानावृत्तेरयुक्तत्वात् । देवताभेदस्तु परं तत्प्रयोजकः, देवताप्रकाशकयाज्यादीनां युगपत्प्रयोगासंभवात् । तथा च गुणविधिपक्षे अष्टानामपि यागानां विश्वदेवदेवताकत्वे सति संप्रतिपन्नदेवताकतया वाजपेयिकप्राजापत्यवपादिवत्पुरोडाशचर्वादीनामष्टानामपि हविषामेकैवाहुतिः स्यात् । तथा सति 'नव प्रयाजा इज्यन्ते, नवानूयाजाः, अष्टौ हवींषि, द्वावाघारौ, द्वावाज्यभागौ, त्रिंशदाहुतयः संपद्यन्ते' इत्याहुतीनां त्रिंशत्त्वसंपत्तेर्नित्यवदनुवादो विरुध्येत । यद्यपि तैत्तिरीयशाखायां वाक्यशेषे 'त्रिंशत्संपद्यन्ते' इत्येव दृश्यते नाहुतय

इति, तथापि भाष्यादिबलात्तथाविधवाक्यशेषः शाखान्तरे उन्नेयः। न च सूक्तहविषोरेव देवतातद्धितस्य कात्यायनेन वार्तिककृता नियमितत्वाद्वैश्वदेवशब्दस्य कथं यागनामत्वमिति वाच्यम्, तथाविधवार्तिकस्य पातञ्जलभाष्यादावदृष्टत्वेनोपेक्ष्यत्वात्। ननु नामत्वे वैश्वदेवशब्दस्य विधेयधात्वर्थपरिच्छेदकत्वेन विध्युपयोगो वक्तव्यः। वैश्वदेववाक्ये च धात्वर्थो न विधेयः। तथा सति तस्य प्रकृतयागेभ्यः कर्मान्तरत्वापत्तावष्टौ हवींषीति विरुध्येत, तद्धविषा सहाग्नेयादीनां नवत्वापातात्। यदि त्विह प्रकृता एव यागा यजिनानूद्यन्ते तर्हि विधेयपरिच्छेदकस्य नाम्न आनर्थक्यम्, विधेयस्य परिच्छेद्यस्यालाभात्। ततश्चागत्या विषमशिष्टविकल्पमङ्गीकृत्य प्रकृतकर्मगुणविधायकत्वमेव वैश्वदेववाक्यस्याभ्युपेयम्, 'आनर्थक्यप्रतिहतानां विपरीतं बलाबलम्' इति न्यायादिति चेत्, मैवम्। वैश्वदेववाक्ये हि सकृदुच्चारितेन यजिना तन्नाभिधानशक्तिमहिम्ना आग्नेयादियागाः समुदिताः केवलमनूद्यन्ते वैश्वदेवसंज्ञां बोधयितुम्। तथा च वैश्वदेवसंज्ञक आग्नेयादियागसमुदाय इत्यर्थः पर्यवस्यति। तथा च 'वसन्ते वैश्वदेवेन यजेत' 'पशुकामो वैश्वदेवेन यजेत' इत्यादौ समुदायस्यैव ग्रहणम्। अन्यथा उत्पत्तिवाक्यसिद्धवैश्वदेवत्वप्रत्यभिज्ञानादामिक्षायागस्यैव तत्र ग्रहणं स्यात्। न चाग्नेयादियागसमुदायस्य कथं वैश्वदेवशब्दो नामधेयं स्यात्, आमिक्षायागमात्रस्य विश्वदेवदेवत्यत्वादिति वाच्यम्। छत्रिन्यायेन वैश्वदेवावैश्वदेवेषु लक्षणया तदुपपत्तेः। नन्वेवं लक्षणाश्रयणमेव दोष इति चेत्तर्हि वैश्वदेवशब्दोऽयं न देवताद्धितान्तः येन लक्षणा शङ्क्येत, 'यद्विश्वे देवाः समयजन्त तद्वैश्वदेवस्य वैश्वदेवत्वम्' इति वाक्यशेषोपदर्शितया विश्वदेवकर्तृकत्वरूपसंबन्धविशेषे 'तस्येदम्' इत्याणि व्युत्पत्त्या योगवशेन श्रुत्यैव यागसमुदायनामत्वाभ्युपगमात्। न च वाक्यशेषदर्शितयोगेनैव नामत्वसिद्धेर्वैश्वदेववाक्यानर्थक्यं शङ्क्यम्। वाक्यशेषतो हि संज्ञामात्रमवगम्यते, न तु संज्ञिस्वरूपम्। तत्र प्रकरणादिना आग्नेयादीनामुपस्थितौ प्रत्येकमेव तेषां संज्ञा स्यात्, न तु समुदायस्य। सति त्वस्मिन्वैश्वदेववाक्ये यजिना सकृदुच्चारितेन तन्नाभिधानशक्त्या आग्नेयादियागसमुदायस्यैवोपस्थितिमुखेन भवति वैश्वदेवपदं समुदायनामधेयम्। एतेन 'गुणश्चापूर्वसंयोगः' इति सूत्रेण श्रुतिलिङ्गादिसूत्रेण च गतार्थता निरस्ता, उक्तानर्थक्यशङ्कापरिहारार्थत्वादित्यास्तां तावत्। इति वैश्वदेवाधिकरणम्॥

१२. वैश्वानरेऽष्टत्वार्थन्नादताधिकरणम्।

इदमाम्नायते 'वैश्वानरं द्वादशकपालं निर्वपेत्पुत्रे जाते, यदष्टाकपालो भवति गायत्रियैवैनं ब्रह्मवर्चसेन पुनाति, यन्नवकपालस्त्रिवृतैवास्मिन्तेजो दधाति, यद्दशकपालो विराजैवास्मिन्नन्नाद्यं दधाति, यदेकादशकपालस्त्रिष्टुभैवास्मिन्निन्द्रियं दधाति, यद्द्वादशकपालो जगत्यैवास्मिन्पशून्दधाति, यस्मिञ्जात एतामिष्टिं निर्वपति पूत एव तेजस्व्यन्नाद इन्द्रियावी पशुमान्भवति' इति। तत्र संशयः किमष्टाकपालादिशब्दाः

प्रकृतस्य वैश्वानरयागस्य नामधेयानि, उत गुणविधयः, अथवा फलेषु गुणविधयः, आहोस्विदर्थवादाः इति। तत्राग्निहोत्रवैश्वदेवादिशब्दवत्तत्प्रख्यन्यायेन द्वादशत्वान्तर्भूताष्टत्वाद्याश्रित्य नामधेयत्वमाशङ्क्य निराकुर्वन्गुणविधिपक्षमुत्थापयति—

पूर्ववन्तोऽविधानार्थास्तत्सामर्थ्यं समाम्नाये ॥ १५ ॥

अग्न्यादिगुणास्तावत् पूर्ववन्तः प्रापकशास्त्रवन्तः। मन्त्रवर्णादिभिः प्राप्ता इति यावत्। अतस्तेषाम् अविधानार्थाः अग्निहोत्रादिशब्दाः, किंतु तत्प्रख्यन्यायेन नामधेयानीति युक्तम्। इह तु समाम्नाये अष्टाकपालादिशब्दसमूहे तत्सामर्थ्यं गुणविधानसामर्थ्यं स्यात् न तु नामधेयत्वम्, अष्टाकपालादिशब्दानां यजिसामानाधिकरण्याभावात्तत्प्रख्याभावाच्च ॥ तथाहि— द्वादशसु कपालेषु संस्कृतः पुरोडाशो द्वादशकपालः। 'संस्कृतं भक्षाः' इत्यणप्रत्ययस्तद्धितः। तस्य 'द्विगोर्लुगनपत्ये' इति लुक्। स च समर्थपरिभाषया सामर्थ्ये सत्येव भवति। असापेक्षत्वलक्षणमेकार्थीभावलक्षणं च सामर्थ्यम्। ततश्च योऽयं द्वादशकपालेषु संस्कृतः पुरोडाशो नासावष्टाकपालशब्देन व्यपदेशमर्हति, तस्याष्टसु चतुर्षु च कपालेषु संस्कृतत्वेन तत्राष्टानां चतुःसापेक्षत्वेनासामर्थ्योत्तद्धितानुत्पत्तेः। किंच न्यूनाधिकसंख्याव्यवच्छेदकत्वं संख्याशब्दस्य स्वभावसिद्धमेव[1]। ततश्च 'द्वादशकपालं निर्वपेत्' इत्यत्र द्वादशत्वसंख्या न्यूनाधिकसंख्याव्यवच्छेदकत्वेन विधेया। तथा च कथमष्टत्वादीनां प्राप्तिः। अप्राप्तत्वाच्च तत्प्रख्याभावात्कथमष्टाकपालादिशब्दानां नामधेयत्वम्। तस्माद्गुणविधय एते विरोधाद्विकल्प्यन्ते। न च द्वादशत्वस्योत्पत्तिशिष्टत्वादष्टत्वादीनां चोत्पन्नशिष्टत्वाद्विषमशिष्टविकल्पापत्तिरिति वाच्यम्। सर्वेषामुत्पत्तिशिष्टत्वात्। अष्टाकपालादिशब्दा हि द्वितीयान्ततया विपरिणम्यन्ते। 'वैश्वानरं निर्वपेत्' इति तेषु संबध्यते 'वैश्वानरमष्टाकपालं नवकपालं दशकपालमेकादशकपालं द्वादशकपालं निर्वपेत्' इति। 'गायत्रियैवैनम्' इत्यादिः सर्वोऽप्यर्थवादः। ततश्च 'वैश्वानरं निर्वपेत्' इत्यादि 'पशुमान्भवति' इत्यन्तमेकं वाक्यं संपद्यते। ततश्च सर्वेषामुत्पत्तिशिष्टत्वान्न विषमशिष्टविकल्पदोषः। अथवा सर्वेऽप्युत्पन्नशिष्टाः। 'वैश्वानरं निर्वपेत्' इति प्रथमं देवतामात्रविशिष्टयागविधानम्। उत्पन्ने च तस्मिन्यागे एकदेवताकत्वेनाग्नेयविध्यन्तप्राप्तिणि चोदकप्राप्तकपालानुवादेनाष्टत्वादिविधयः। एवं च द्वितीयान्ततया विपरिणामो नाश्रयणीयः। भवतीत्यस्याप्यन्वयः सूपपादः। न चैवं सति 'वैश्वानरं द्वादशकपालम्' इति वाक्ये द्वादशकपालस्यापि श्रूयमाणत्वात्कथं देवताविशिष्टयागमात्रविधानमिति वाच्यम्। तत्र द्वादशकपालशब्दस्याष्टाकपालाद्युपलक्षणार्थत्वेनाविवक्षितार्थत्वात्। अतः सर्वेषामुत्पन्नशिष्टत्वान्न विषमशिष्टविकल्पो दोषः। तस्मात्कर्मणि गुणविधय एवैते।

1. स्वाभाविकमेव—क.

तमिमं कर्मणि गुणविधिपक्षं दूषयन्नर्थवादत्वसिद्धान्तमवलम्बते—

गुणस्य तु विधानार्थे तद्गुणाः प्रयोगे स्युरनर्थका न हि तं प्रत्यर्थवत्तास्ति ॥ १६ ॥

तुशब्दः [1]पूर्वपक्षव्यावृत्तौ। प्रयुज्यत इति प्रयोगः। कर्मणि घञ्। प्रयोगे अष्टाकपालादिसमाम्नाये अष्टत्वादिगुणस्य विधानार्थे सति, तद्गुणाः तस्मिन्नुत्पन्नवैश्वानरयागे चोदकप्राप्तकपालद्वारका गुणा अष्टत्वादयः अनर्थकाः निष्प्रयोजनकाः स्युः। कुतः। हि यस्मात्कारणात् तम् उत्पत्तिशिष्टद्वादशत्वगुणावरुद्धं यागं प्रति एषाम् अर्थवत्ता प्रयोजनवत्ता नास्ति, विषमशिष्टविकल्पासंभवात्। न ह्येते सर्वेऽप्युत्पत्तिशिष्टा इति शक्यते वक्तुम्, प्रथमान्तानां द्वितीयान्ततया विपरिणामापातात् भवतीत्यस्यानन्वयापाताच्च। नाप्युत्पन्नशिष्टाः, तथा सत्युत्पत्तिवाक्ये द्वादशकपालमित्यस्याविवक्षितार्थत्वापत्तेः। न चाष्टाकपालादिवाक्यान्यथानुपपत्त्या तस्याविवक्षितार्थत्वं कल्पयितुं युक्तम्, अष्टाकपालादिवाक्यानां विहितद्वादशकपालयागस्तुतिपरत्वेनाप्युपपत्तेः इति भावः॥

नन्वष्टत्वादीनामविहितत्वात्कथं तत्स्तुतिरित्याशङ्क्य निराकरोति—

[2]तच्छेषो नोपपद्यत इति चेदविभागाद्विधानार्थे स्तुत्यर्थेनोपपद्येरन् ॥ १७ ॥

तेषामष्टत्वादीनामविहितानां स्तावको वाक्यशेषः न उपपद्यते विहितस्तुतिपरत्वादर्थवादानाम् इति चेत् मैवम्, यतः विधानार्थे। कर्मणि ल्युट्। विधिविषयीभूते द्वादशकपाले यागे विषये स्तुत्या प्रयोजनेन अष्टाकपालादिवादा उपपद्येरन्। कुतः। अविभागात्। द्वादशसु ह्यष्टत्वादयः सन्त्यविभक्ताः। अतस्तत्स्तुत्या द्वादशकपालः स्तुतो भवति 'ईदृशोऽयं महाभागो द्वादशकपालः पुरोडाशः, यस्मिन्क्रियमाणे ब्रह्मवर्चसहेतुकपूतत्वादिफलसाधनभूता अष्टाकपालादयोऽपि भवन्ति; अतः प्रशस्तोऽयम्' इति। दृश्यते ह्यवयवस्तुत्या अवयविस्तुतिः 'सुन्दरं वदनम्' इत्यादौ। तस्मादर्थवादा एते।

ननु तथापि 'गायत्रियैवैनं ब्रह्मवर्चसेन पुनाति' इत्याद्यर्थवादादौदुम्बराधिकरणन्यायेनाष्टाकपालादिवाक्यानां विधित्वकल्पने उक्तरीत्या कर्मणि गुणविध्यसंभवेऽपि 'पूत एव तेजस्व्य-

---

1. पक्षव्यावृत्तौ—ख, ग, घ. 2. तच्छेषो नोपपद्यते—अविभागादित्यादि च सूत्रद्वयमन्यत्र.

न्नाद इन्द्रियावी पशुमान्भवति' इत्युपसंहारे संहत्य कीर्त्यमानानां 'गायत्रियैवैनं ब्रह्मवर्चसेन पुनाति' 'विराजैवास्मिन्नन्नाद्यं दधाति' इत्यादिभिर्मध्येऽपि प्रत्येकमुपात्तानां कामपदाभावेऽपि रात्रिसत्रन्यायेन क्रमेणाष्टाकपालादिफलत्वकल्पनया फलेभ्यो गुणविधयोऽमी स्युरित्याशङ्क्य निराकरोति—

[1]कारणं स्यादिति चेदानर्थक्यादकारणं कर्तुर्हि
कारणानि गुणार्थो हि विधीयते ॥ १८ ॥

उत्पत्तिवाक्योत्पन्नवैश्वानरयागप्रयोगे कपालान्याश्रित्य अष्टत्वाद्यनुष्ठाने पूतत्वादिरूपं कारणं फलं स्यात्। पूतत्वादिफलेभ्योऽष्टत्वादिगुणा विधीयन्तामिति यावत्। एवं च गोदोहनेन चमसस्येव काम्यैरष्टत्वादिभिरुत्पत्तिसिद्धस्यापि द्वादशत्वस्य बाधो युज्यत इति चेत्, पूतत्वादिकमष्टत्वादीनां अकारणं अनिमित्तं फलं न भवति। फलाय गुणविधानं न संभवतीति यावत्। कुतः। आनर्थक्यात् एकार्थकत्वाभावप्रसङ्गात्। उपक्रमोपसंहारमध्यपरामर्शैः 'वैश्वानरं द्वादशकपालं निर्वपेत्' इत्यारभ्य 'पशुमान्भवति' इत्यन्तमेकं वाक्यमवगतम्। 'पुत्रे जाते' इत्युपक्रान्ता हीष्टिः 'यस्मिञ्जात एतामिष्टिं निर्वपति पूत एव तेजस्व्यन्नाद इन्द्रियावी पशुमान्भवति' इत्युपसंहियते। तान्येव पूतत्वादीनि फलानि 'ब्रह्मवर्चसेन पुनाति, त्रिवृतैवास्मिन्तेजो दधाति, विराजैवास्मिन्नन्नाद्यं दधाति, त्रिष्टुभैवास्मिन्निन्द्रियं दधाति, जगत्यैवास्मिन्पशून्दधाति' इति ब्रह्मवर्चसादिहेतूपपादनाय मध्येऽपि परामृश्यन्ते। ततश्चेष्टिकर्तुरेव कारणानि पुत्रगतपूतत्वादिफलानि उपक्रमोपसंहारमध्यपरामर्शैरवगतानीति भवति सर्वमेकं वाक्यम्। तत्र पूतत्वादिफलेभ्यः अष्टत्वादिगुणेषु विधीयमानेषु बहुधा वाक्यभेदप्रसङ्गादेकवाक्यत्वं भज्येत। तस्मान्न फलेषु गुणविधिः। एतेन इष्टिफलत्वेन श्रुतेषु पूतत्वादिषु इष्टयङ्गकपालाश्रिताष्टत्वादिविधिरत्यन्तानुपपन्न इत्यपि सूचितम्। उक्तमर्थमुपसंहरति—गुणार्थो हीति। हि यस्मात् अष्टाकपालादिशब्दा न नामधेयानि, नापि कर्मणि गुणविधयः, नापि फलेषु गुणविधयः, अतः गुणार्थः गुणेन स्तुत्या अर्थः प्रयोजनं यस्य सः वैश्वानर एव यागः 'यदष्टाकपालो भवति' इत्यादयर्थवादप्ररोचितो विधीयत इति यावत्॥ इति वैश्वानराधिकरणम्॥

तदेवमष्टाकपालादिशब्दानां गुणविधित्वनिराकरणेनार्थवादत्वमवयवस्तुत्या व्यवस्थापितम्। इदानीमवयवस्तुत्यभावेऽपि प्रकारान्तरेण क्वचित्तद्व्यवस्थापनाय सूत्रमिदं प्रवृत्तम्—

[2]तत्सिद्धिर्जातिसारूप्यप्रशंसाभूमलिङ्गसमवाया
इति गुणाश्रयाः ॥ १९ ॥

---

1. अन्यत्रेदं सूत्रं द्विधा विभज्य पठ्यते—गुणार्थे विधीयन्ते इति च पाठान्तरम्. 2. अन्यत्रेदं विभज्य पठ्यते.

तत्र गुणाश्रयशब्दस्य तत्सिद्धयादिशब्देषु प्रत्येकं संबन्धे सति षड्वाक्यानि संपन्नानि क्रमेण व्याख्यास्यामः— 'यजमानः प्रस्तरः' इत्यत्र गुणविधिरर्थवादो वेति संशयः । नामधेय-

१३. यजमानशब्दस्य प्रस्तरादिस्तुत्यर्थत्वाधिकरणम् ।

त्वकोटिस्तु नामधेयपादसंगत्यर्थं वार्तिककारैरुत्प्रेक्षितापि भिन्नार्थत्वेन प्रसिद्धतया असंभवदुन्मेषत्वादुपेक्षिता । नामधेयपादसंगतिस्तु नामधेयत्वप्रतिपक्षतया प्रसक्तगुणविध्यर्थवादविचाररूपतया कथंचिद्वोध्या । तत्राष्टाकपालादिशब्दैरवयवद्वारा द्वादशकपालस्तुतिर्युज्यते । न च प्रस्तरावयववचनो यजमानशब्दः, प्रस्तरशब्दो वा यजमानावयववचनः । तथा च यजमानशब्दस्य प्रथमश्रुतस्यासंजातविरोधित्वेन लक्षणासहिष्णुत्वाभावेन जघन्यश्रुतस्यैव प्रस्तरशब्दस्य तत्कार्यकारित्वे लक्षणां स्वीकृत्य 'प्रस्तरे स्रुच आसादयति' इत्यादिप्रस्तरकार्यं स्रुग्धारणादिकं यजमानः कुर्यादिति गुणविधानमभ्युपेयम । एवं संभवति गुणविधौ निरर्थकप्रायमर्थवादत्वं नाभ्युपगन्तुं युक्तमिति प्राप्ते, सिद्धान्तयति— **तत्सिद्धिर्गुणाश्रयः** । यजमानस्यैव प्रस्तरकार्यकारित्वे प्रस्तरविधेरानर्थक्यम् । किंच, 'प्रस्तरमाहवनीये प्रहरति' इत्याहवनीये प्रस्तरप्रहरणमाम्नातम् । एवं च कर्माङ्गभूताहवनीयादिनिर्वर्तिकासु पवमानेष्टिष्वेव यजमानस्याहवनीये प्रहरणे सति तदुत्तरभाविसर्वकर्मविलोपः स्यात् । अतोऽगत्या यजमानशब्दस्य प्रस्तरस्तावकतया अर्थवादत्वमाश्रयितुं युक्तम । ननु यजमानशब्दस्य यागकर्तृवाचकस्य कथं प्रस्तरे वृत्तिरित्यत आह—गुणाश्रय इति । गुणः आश्रयः निमित्तं कार्यकारित्वगुणयोगेन यजमानशब्दस्य प्रस्तरे प्रवृत्तिरिति यावत् । साङ्गप्रधानस्य यजमानकार्यत्वेन प्रस्तरकार्यस्यापि यजमानकार्यतया प्रस्तरे यजमानकार्यकारित्वस्य सत्त्वात् । तथा च 'सिंहो माणवकः' इत्यत्र सिंहशब्दस्येव माणवके यजमानशब्दस्य गौण्या प्रस्तरे वृत्तिरिति फलितम् । ननु तथापि मुख्यार्थयजमानसंबन्धिकार्यकारित्वगुणसंबन्धेन लक्षितलक्षणयैव प्रस्तरस्योपस्थितिरुपपद्यते। अतो गौण्यात्मकं वृत्त्यन्तरं किमित्यङ्गीकर्तव्यमिति चेत्सत्यम । 'यजमानः प्रस्तरः' इति सामानाधिकरण्यनिर्वाहाय यजमानशब्दस्य प्रस्तरे वृत्तिरवश्यं वक्तव्या । सामानाधिकरण्यं हि एकविशेष्यकबोधजनकत्वम् । न ह्येतत्प्रस्तरेऽपि यजमानशब्दस्य व्यापाराभावे घटते । सा च वृत्तिर्न लक्षितलक्षणा । लक्षणायां हि मुख्यार्थसंबन्धित्वरूपेण लक्ष्यार्थस्य प्रतीतिः । इह तु मुख्यार्थयजमानगतकार्यकरत्वगुणयोगित्वमात्रेण प्रस्तरस्य प्रतीतिः । एवं च मुख्यार्थेन परंपरासंबन्धे विद्यमानेऽपि तद्रूपानादरेण गुणयोगित्वमात्रेण प्रतीतिसिद्धयर्थं गौणी वृत्तिरभ्युपगन्तव्या । तथा च यजमानवत्कर्तृकार्यनिर्वर्तकत्वात्प्रशस्तः प्रस्तर इति स्तुतिरुन्मीलनीया । एतेन गुणमुख्याधिकरणेन गतार्थत्वं निरस्तम् , गौणवृत्तिसंभवमात्रस्य तत्र प्रतिपादितत्वेऽपि उक्तरीत्या लक्षणाव्यावृत्तगौणवृत्तिस्वरूपव्युत्पादनार्थत्वात् । अर्थवादाधिकरणे 'गुणवादस्तु' 'रूपात्प्रायात्' इत्यादिगुणसूत्रेषु एतदधिकरणसिद्धामेव गौणीं वृत्तिमाश्रित्य 'आपो वै शान्ताः' 'स्तेनं मनः' इत्यादीनां स्तावकत्वं प्रतिपादितमिति

न पौनरुक्त्यम् । अन्नाभिधेयसदृशे वृत्तिर्गौणत्वमध्यारोपितार्थत्वं वेति विचारस्तु दुपट्टीकावार्तिकादावनुसंधेयः । इति तत्सिद्ध्यधिकरणम् ॥

१४. आग्नेयादिशब्दानां ब्राह्मणादिस्तुत्यर्थताधिकरणम् ।

'अग्निर्वै ब्राह्मणः' इत्यत्रापि पूर्ववदेव ब्राह्मणकार्ये अग्निर्विधीयत इति पूर्वः पक्षः । तथा सति 'ब्राह्मणानृत्विजो वृणीते' इति ऋत्विग्वरणादिविधिवैयर्थ्यान्मन्त्रोच्चारणानुपपत्तेश्चाग्निवद्धोमादिनिर्वर्तकत्वगुणयोगादग्निशब्देन ब्राह्मणः स्तूयते इति पूर्ववदेव सिद्धान्तः । तत्राग्निशब्दस्य ब्राह्मणे वृत्तौ गुणान्तरमपि निमित्तमाह— **जातिगुणाश्रयः** । जातिर्जननम् । 'प्रजापतिरकामयत प्रजायेयेति, स मुखतस्त्रिवृतं निरमिमीत, तमग्निर्देवतान्वसृज्यत, गायत्री च्छन्दो रथंतरꣳ साम ब्राह्मणो मनुष्याणामजः पशूनाम्' इति वाक्यशेषावगतमुखजातत्वं गुणस्य गौण्या वृत्त्या आश्रयः निमित्तमित्यर्थः । इति जात्यधिकरणम् ॥

१५. यूपादिशब्दानां यजमानस्तुत्यर्थताधिकरणम् ।

'यजमानो यूपः' इत्यत्रापि यूपकार्ये पशुनियोजनादौ यजमानस्य विधिरिति तथैव पूर्वः पक्षः । तथा सति यूपविधिवैयर्थ्याद्यजमानवत्क्रतुनिर्वर्तकत्वगुणयोगाद्यजमानशब्देन यूपः स्तूयत इति तथैव सिद्धान्तः । तत्र यजमानशब्दस्य यूपे वृत्तौ गुणान्तरमपि निमित्तमाह— **सारूप्यं गुणाश्रयः** । समानं रूपं सरूपम् । तदेव सारूप्यम् । चतुर्वर्णादित्वात्स्वार्थे ष्यञ्प्रत्ययः । साधारणधर्मः । ऊर्ध्वत्वं यजमानशब्दस्य यूपे गौण्या वृत्त्या निमित्तमित्यर्थः । यद्यपि तत्सिद्ध्युदाहरणे सर्वत्र 'यजमानः प्रस्तरः' इत्यादौ साधारणधर्म एव प्रवृत्तिनिमित्तं तथापि तत्र सारूप्यमचाक्षुषम्, इह तु चाक्षुषमूर्ध्वत्वमिति पृथगुक्तिः । इति सारूप्याधिकरणम् ॥

१६. अपश्वादिशब्दानां गवादिप्रशंसार्थत्वाधिकरणम् ।

'पशुशीर्षाण्युपदधाति' इत्युपक्रम्य 'पुरस्तात्प्रतीचीनमश्वस्योपदधाति पश्चात्प्रतीचीनमृषभस्यापशवो वा अन्ये गोअश्वेभ्यः पशवः' इति श्रूयते । तत्रापि गवाश्वव्यतिरिक्ता अजादयः पशवः अपशवः पशुकार्यकरा न भवन्तीति पशुकार्ये अजादिप्रतिषेधः क्रियत इति प्राप्ते, तथा सति लौकिके दोहनादौ प्रतिषेधस्य कर्तुमशक्यत्वाद्वैदिकालम्भनादिकार्ये विहितत्वादेव प्रतिषेधानुपपत्तेर्गौण्या वृत्त्या अपशव इत्यजादिपशुपरतया अर्थवादत्वमिति सिद्धान्तः । तत्र गुणयोगं दर्शयति—**प्रशंसा गुणाश्रयः** । प्राशस्त्यं गौण्या वृत्त्या निमित्तमित्यर्थः । तथाहि—अजादिपशुषु अपशुशब्दस्य घटादिवचनस्यानुपपत्तेः पशुशब्दस्य प्राशस्त्ये लक्षणा । तच्च प्राशस्त्यमर्थाद्गवाश्वगतमेव गम्यते । तच्च नव्या पशुदृश्यते । अप्राशस्त्यं च मुख्यस्य अपशुशब्दार्थस्य घटादेरजादिपशूनां च साधारणमिति तद्योगाद्व-

शुशब्दोऽजादिपशुषु वर्तते। तत्राजादिषु प्राशस्त्याभावकथनेन गवाश्वे प्रशंसातिशयो गम्यते उदितहोमनिन्दया अनुदितहोमप्रशंसावत्। तस्मादजादयः पशवोऽप्रशस्ताः, गवाश्वं तु प्रशस्तमिति तच्छीर्षोपधानं स्तूयते। न च प्राशस्त्याभावस्यैवात्र प्रवृत्तिनिमित्तत्वे प्रशंसा गुणाश्रयः इति सूत्रविरोधः इति वाच्यम्। प्रशंसाभावस्य निमित्तत्वे प्रतियोगिभूतप्रशंसाया अपि निमित्तत्वेन तद्विरोधात्। तस्मादपशव इत्यर्थवादः। इति प्रशंसाधिकरणम्॥

'सृष्टीरुपदधाति' इत्यत्र गुणविधिरर्थवादो वेति संशयः। तत्र सृष्टिप्रतिपादकः सृजिधातुः सृष्टिशब्देन विवक्षितः। स येषु विद्यते ते सृष्टिमन्तो मन्त्राः। ते यासामुपधानार्थास्ता इष्टकाः सृष्टयः। 'तद्वानासामुपधानो मन्त्र इतीष्टकासु लुक्च मतोः' इति सृष्टिमच्छब्दाद्यत्प्रत्यये मतुपो लुक्। यत्प्रत्ययस्य च्छान्दसो लोपः। सृजिमन्मन्त्रोपधेयेष्टका इत्यर्थः। तत्रेष्टकानां तदुपधानस्य चान्यतः प्राप्तेर्न विधिः। 'अग्निं चिन्वीत' इति हि चयनविधिः। चयनं संघातीकरणम्। तेन अग्न्याख्यं स्थण्डिलविशेषमुत्पादयेदित्यर्थः। 'इष्टकाभिरग्निं चिनुते' इति चयने इष्टकानां करणत्वेन विधिः। तत्र स्वरूपसतीनामिष्टकानां व्यापारविशेषं द्वारं विना करणत्वासंभवादुपधानमर्थादाक्षिप्यते। 'यदेता इष्टका उपदधाति' इत्यादौ द्वितीया तु 'अग्निहोत्रं जुहोति' इत्यादिवत् 'नासाधितं करणम्' इति न्यायेनार्थाक्षिप्तसाध्यत्वाभिप्राया। इष्टकाभिरुपधानद्वारा चयनं निष्पादयेदित्यर्थः। तथा च सृजिमन्तो मन्त्राः 'एकयास्तुवत प्रजा अधीयन्त प्रजापतिरधिपतिरासीत्' इत्यादयः सप्तदश मन्त्रा एव विशेषणभूता अपि लोहितोष्णीषादिवद्विधीयन्त इति पूर्वः पक्षः। सिद्धान्तस्तु, मन्त्रा अपि नात्र विधेयाः। तथाहि— चयनप्रकरणाधीतानाम् 'एकयास्तुवत' इत्यादिमन्त्राणां सामान्यतश्चयनार्थत्वेऽवगतेऽपि पाकदेशतःसमानयनोपधातृसमीपस्थापनादि कार्यं व्यवहितचयनसाधनत्वादुपेक्ष्य संनिहितसाधनमुपधानमेव प्रकाश्यत्वेन परिगृहीतवताम् 'सर्वास्विष्टकासु तया देवतमन्ततो दधाति' इति विधिना 'तया देवतयाङ्गिरस्व ध्रुवासीद' इत्यनेन एकवाक्यभावमुपगमितानामुपधानप्रकाशनसामर्थ्यमश्नुवतां सर्वोपधानार्थत्वस्य सृष्टिवाक्येन पुनर्विधाने परिसंख्यापत्त्या तदितरेषाम् 'व्युष्टीरुपदधाति' इत्यादिवाचनिकविनियोगरहितानां [1]प्रकरणाम्नातानाम् 'पृथिव्युदपुरमन्नेन विष्टा' इत्यादीनामानर्थक्यं स्यात्। इष्टकानां तदुपधानस्य च विधानं तु प्रागेव निराकृतम्। अतः 'सृष्टीरुपदधाति' इति कृत्स्नं वाक्यमनुवादः। स च 'यथासृष्टमेवावरुन्धे' इत्यर्थवादावलम्बनार्थत्वादर्थवादः। तत्र हि यतः सृष्टिमन्त्रैरुपदधाति अतः 'एकयास्तुवत' इत्यनुवाके येन क्रमेण ब्रह्मक्षत्रादिसृष्टिरनुक्रान्ता तेनैव क्रमेण तानि

१७. भूमाधिकरणे बाहुल्येन सृष्टिव्यपदेशाधिकरणम्।

1. प्रकरणाधीतानाम्—क, घ.

सर्वाणि यजमानः प्राप्नोतीति स्तुतिरुन्मीलति । तत्र 'एकयास्तुवत' इति सप्तदश मन्त्राः । तेषु प्रथमचतुर्दशषोडशान्तिमेषु 'एकयास्तुवत' 'सप्तविंशत्यास्तुवत' 'एकत्रिंशतास्तुवत' 'त्रयस्त्रिंशतास्तुवत' इति मन्त्रेषु सृजिशब्दाभावात्तेषु सृष्टिशब्दो गौणः । तत्र प्रवृत्तिनिमित्तमाह—**भूमा गुणाश्रयः** । भूमा बहुत्वम् । 'बहोर्लोपो भू च बहोः' इति इमनिच इकारलोपो बहुशब्दस्य भूभावश्च । बाहुल्यं गौण्या वृत्त्या निमित्तमित्यर्थः । तत्र त्रयोदशसु सृष्टिशब्दवाच्यास्विष्टकासु बाहुल्यमस्ति । तच्च सृष्टिबाहुल्यं सृष्टिरूपावयवद्वारा सृष्टयसृष्टिसमुदायेऽस्ति । समुदायद्वारा चासृष्टिष्वपीत्यसृष्टयोऽपि सृष्टिशब्देनोच्यन्ते । इयांस्तु विशेषः । यजमानशब्दो गौण्या वृत्त्या प्रस्तरपर एव, न तु यजमानपरोऽपि । सृष्टिशब्दस्तु भूमगुणयोगात्सृष्टयसृष्टिपर इति । न च सृष्टिमात्रपरत्वमेवास्त्विति वाच्यम् । 'यत्सप्तदशोपदधाति' इति वाक्यशेषबलेन सृष्टयसृष्टिपरतावगमात् । तादृशवाक्यशेषस्तु क्वचिच्छाखान्तर उन्नेयः । तस्मात् 'सृष्टीरुपदधाति' इति कृत्स्नं वाक्यमर्थवाद इति भाष्यानुयायी पन्थाः । केचित्तु, सृष्टीरुद्दिश्य उपधानं चयनविधितोऽर्थसिद्धमपि संस्कारतया विधीयते; तथा च प्रतिप्रधानं गुणावृत्तेर्न्याय्यत्वात्पृथगुपधानमिष्टकानां सिध्यति, अन्यथा समुदितरूपेणापि तासामुपधानं स्यादिति वदन्ति । तन्न, एकैकविधाभ्यासेन एकशतविधप्रभेदभिन्ने अग्नौ किंचिदधिकषडङ्गुलोत्सेधानामतिविस्तृतायतानामनेकपुरुषोद्धार्याणामेकेन कर्त्रा युगपदुपधानस्य कर्तुमशक्यतया पृथगुपधानस्यैवार्थसिद्धेः । एतेन सहायान्तरव्युदासार्थमिहोपधानविधिरिति निरस्तम्, असहायेन पृथगप्युपधानस्य कर्तुमशक्यत्वात् । यच्च आध्वर्यवकाण्डे विधानमन्तरेणाध्वर्युकर्तृकत्वसिद्ध्यनुपपत्तेरर्थप्राप्तस्याप्युपधानस्य पुनर्विधिरिति, तदपि न । 'इष्टका उपधास्यञ्श्वेतमश्वमभिमृशेत्' इत्याध्वर्यवकाण्डविहिताश्वाभिमर्शनसमानकर्तृकत्वावगमादेव तत्सिद्धेः । 'तावाल-भ्येष्टका उपदध्यात्' इत्युपधानविधिः । न चाश्वालम्भनोपधानयोः पौर्वापर्यमेवात्र विधीयत इति वाच्यम् । 'इष्टका उपधास्यञ्श्वेतमश्वमभिमृशेत्पुरीषमुपधास्यन्कृष्णम्' इत्येव तत्सिद्धेः । तथा चात्र पुनर्विधानं व्यर्थमेव । यदपि च कृत्स्नवाक्यस्यार्थवादत्वे संनिहितविध्यन्तराभावेन अर्थवादत्वमेव न निर्वहतीति, तदप्यापाततः । 'अर्थवादो वा' इति मन्त्राधिकरणगुणसूत्ररीत्या 'उरु प्रथस्वेति पुरोडाशं प्रथयति यज्ञपतिमेव तत्प्रथयति' इति प्रकरणपरिकल्पितविधिविहितभिन्नदेशमन्त्रस्तुतिवत्प्राकरणिकविधिविहितसृष्टिमन्त्राणामपि भिन्नदेशकानामेव कृत्स्नवाक्यस्य स्तावकत्वोपपत्तेः । अन्यथा 'न वा इदं दिवा न नक्तमासीदव्यावृत्तं ते देवा एता व्युष्टीरपश्यन् ता उपादधत ततो वा इदं व्यौच्छत्सैता उपधीयन्ते व्ये वास्मा उच्छत्यथो तम एवापहते' इत्युत्तरवाक्ये व्युष्टिविधिरहिते केवलार्थवादे का गतिरित्यास्तां तावत् । इति भूमाधिकरणम् ॥

'प्राणभृत उपदधाति' इत्यत्र मन्त्रेषु प्राणभृच्छब्दाभावेन 'तद्वानासामुपधानः—' इति व्युत्पत्त्यभावेऽपि प्राणशब्दं मन्त्रद्वारा बिभ्रतीति व्युत्पत्त्या प्राणशब्दकमन्त्रोपधेयेष्टका उपदधाती-

१८. लिङ्गसमवायन्याये प्राणभृदादिशब्दानां स्तुत्यर्थत्वाधिकरणम्।

त्यर्थः। तत्रेष्टकानां तदुपधानस्य चान्यतः प्राप्तत्वात् 'अयं पुरोभुवः' इत्यादयः प्राणभृतः पञ्चाशन्मन्त्रा विधीयन्त इति पूर्ववदेव पूर्वः पक्षः। लिङ्गप्रकरणाभ्यामेव प्राप्तत्वान्मन्त्रा अपि न विधेयाः। अतः प्राणवन्मन्त्रेष्टकोपधानेन 'रेतस्येव प्राणान्दधाति' इत्यर्थवादावलम्बनार्थः 'प्राणभृत उपदधाति' इत्यनुवादोऽर्थवाद एवेति पूर्ववदेव सिद्धान्तः। तत्र 'तस्य प्राणो भौवायनः' 'वसन्तः प्राणायनः' 'प्रजापतिगृहीतया त्वया प्राणं गृह्णामि प्रजाभ्यः' इति द्वितीयतृतीयदशममन्त्रेषु प्राणशब्दोऽस्तीति तदुपधेयास्तिस्र इष्टकाः प्राणभृतः, इतराः सप्तचत्वारिंशदिष्टका अप्राणभृतः। तत्र प्राणशब्दवतां मन्त्राणामल्पत्वान्न भूम्ना प्राणभृच्छब्दस्य प्राणभृदप्राणभृत्सु गौणी वृत्तिर्युज्यत इत्यतो निमित्तान्तरमाह—**लिङ्गसमवायो गुणाश्रयः**। लिङ्गं प्राणप्रतिपादनसामर्थ्यम्। तस्य समवायः संबन्धमात्रं गौण्या वृत्त्या निमित्तमित्यर्थः। तत्र प्राणभृन्मन्त्रसमुदाये प्राणप्रतिपादनसामर्थ्यं लिङ्गमस्ति। प्राणभृदप्राणभृत्समुदायेऽपि चैकदेशे पुष्पिते 'वनं पुष्पितम्' इतिवत्तदस्ति। तादृशसमुदायद्वारा प्राणभृत्त्वप्राणभृत्सु च मन्त्रेषु तद्द्वारा तदुपधेयेष्टकासु च तत्संबन्ध इति लिङ्गसमवायमात्रेण सर्वत्र प्राणभृच्छब्दप्रवृत्तिः। इति लिङ्गसमवायाधिकरणम् ॥

तदेवम् 'तत्सिद्धिर्जातिसारूप्यप्रशंसाभूमलिङ्गसमवाया इति गुणाश्रयाः' इति सूत्रं व्याख्यातम्। इतिशब्दस्तु प्रकारवचनः। तेन 'रूपात्प्रायात्' इत्यर्थवादगुणसूत्रनिर्दिष्टम् 'स्तेनं मनः' इत्यादौ प्रच्छन्नरूपादिकमपि संगृहीतं भवति ॥ इति तत्सिद्धिपेटिका ॥

अर्थवादानां स्तावकत्वेन प्रामाण्यमुक्तम्। इदानीं कचित्प्रकारान्तरेण तत्प्रामाण्यं प्रतिपादयितुं नामधेयापवादत्वेन प्रसक्तार्थवादप्रसङ्गादिदमारभ्यते। 'अक्ताः शर्करा उपदधाति, तेजो वै घृतम्' इत्यत्र किं घृततैलवसादीनामन्यतमेनाञ्जनं घृतेनैव वेति संशयः।

१९. वाक्यशेषेण संदिग्धार्थनिरूपणाधिकरणम्।

तत्र विधिः प्रधानम्, प्रेरणालक्षणशब्दभावनारूपत्वात्। अर्थवादस्त्वितिकर्तव्यतारूपस्तुतिसमर्पकत्वात्तदङ्गमित्यर्थवादाधिकरणे स्थितम्। न चाङ्गेन प्रधानस्य बाधः संभवति। अतः कथमर्थवादगतघृतशब्देन विध्यवगताञ्जनसामान्यस्य विशेषसंकोचरूपो बाधः। न च उपक्रमाधिकरणेऽर्थवादानुरोधेन ऋगादिशब्दस्य वेदपरत्वं वक्ष्यते तृतीयस्य तृतीये; तथेहापि किं न स्यादिति वाच्यम। तत्र विधेरुपसंहारगतस्यान्यथानयनेऽप्यत्रोपक्रमस्थस्यासंजातविरोधित्वेन स्वतःप्रबलस्य विधेरन्यथानयनस्यायुक्तत्वात्। न चैवमपि 'अधिकश्च गुणः साधारणे विरोधात्कांस्यभोजिवदमुख्येऽपि' इति द्वादशिकाधिकरणे गुणानुरोधेन प्रधाननयनस्य क्वचिद्व्यवस्थापयिष्यमाणतया प्रधानस्यापि विधेरङ्गभूतस्तुत्यनुरोधित्वमिति वाच्यम्, वैषम्यात्। यत्र हि गुणानुरोधित्वेऽपि प्रधानस्य न बाधः तत्रैव कांस्यभोजिन्यायः। इह तु गुणानुरोधित्वे

तैलादिविषये बाधः स्यादिति कथमत्र तन्न्यायः । न च, विधावञ्जनसाधनद्रव्यसामान्यमाक्षेपाङ्गम्यत इति वक्तव्यम् ; तच्च न संभवति, विधेः प्ररोचनार्थमर्थवादैकवाक्यत्वावश्यंभावेन प्ररोचनार्थमपेक्षितार्थवादादेवाञ्जनद्रव्यविशेषलाभे तदाक्षेपायोगादिति वाच्यम् । 'विधेरेव द्वे शक्ती कल्पयिष्यामः' इति न्यायेन विधित एव प्ररोचनासंभवेन विधेरवश्यमर्थवादानपेक्षत्वेन विधितः सामान्याक्षेपोपपत्तेः । यद्यङ्गं प्रधानेनावश्यं नापेक्ष्यते तादृशाङ्गानुसारेण प्रधानस्य न संकोचः । अत एव 'तास्वध्वर्यो इन्द्राय सोमं सोत' इत्यादिमन्त्रवर्णबलादैन्द्रप्रदानमात्रविषयतया सोमस्य न संकोचः । किंत्वैन्द्रानैन्द्रप्रदानसाधारण्यमेव । अनैन्द्रप्रदानेषु मन्त्रं विनाप्युपायान्तरतोऽनुष्ठेयस्मृतिसंभवेन मन्त्रस्यानैन्द्रप्रदानैर्नियमेनानपेक्षितत्वात् । अन्यथा तत्राप्यैन्द्रप्रदानविषयतया संकोचः स्यात् । न चैवमपि 'उपदधाति' इति वर्तमानापदेशतया स्फुटविध्यभावे औदुम्बराधिकरणन्यायेनार्थवादत एव विधिः कल्पनीय इति विधित्वसिद्धयर्थमर्थवादापेक्षेति वाच्यम् । 'वसन्ताय कपिञ्जलानालभते' 'ब्रह्मणे ब्राह्मणमालभते' इत्यादिनिरर्थवादवाक्येष्विवाप्राप्तार्थत्वादेव विधिकल्पनोपपत्तेः, शाखान्तरे 'शर्करा अक्ता उपदध्यात् तेजो घृतम्' इति प्रत्यक्षविधिश्रवणाच्च । तस्माद्घृततैलाद्यन्यतमेनाञ्जनम् । अर्थवादगतघृतशब्दस्तु विध्यनुसारेण च्छत्रिन्यायेन घृताघृतलक्षकः । इति प्राप्ते, सिद्धान्तयति—

संदिग्धे तु वाक्यशेषात् ॥ २० ॥

तुशब्दः पूर्वपक्षव्यावृत्तौ । अनिर्धारितार्थके विधौ वाक्यशेषान्निर्णय इत्यर्थः । तथाहि —यदि घृततैलादिसर्वविशेषाः प्रातिस्विकरूपेण विधिना बोधिताः स्युस्तदा एकविशेषघृतविषयेणार्थवादेन विधेः संकोचरूपो बाधः स्यात् । यदि च सामान्यं व्यासज्यवृत्ति सत्प्रत्येकपर्यवसन्नं न भवेत्तदापि तैलादिसामान्यविधेर्विशेषघृतविषयार्थवादेन बाधः स्यात् । नैतदुभयमप्यस्ति, विधेः सामान्यरूपेणाञ्जनयोग्यतैलादिद्रवद्रव्योपस्थापकत्वात्सामान्यस्य प्रत्येकं पर्यवसितत्वाच्च बाधाभावात् । न चैवमपि सामान्यरूपेण तैलादिविषयस्यापि विधेर्घृतमात्रे संकोचादवर्जनीयो बाध इति वाच्यम् । व्यवहाराय विध्यनुमतत्वेन तादृशसंकोचस्यादोषत्वात् । अवश्यं हि सामान्येनोपस्थितावपि यः कश्चिद्विशेष आदर्तव्यः, निर्विशेषसामान्येन व्यवहाराभावात् । न च घृतशब्दस्यापि नवपुराणगव्यमाहिषादिविशेषमनपेक्ष्य व्यवहारोपयोगित्ववत्सामान्यविधेरपि विशेषमनपेक्ष्य व्यवहारोपयोगित्वं किं न स्यादिति वाच्यम्, वैषम्यात् । घृतशब्दस्य हि नवपुराणादिविशेषनिर्धारकप्रमाणाभावाद्यं कंचिद्विशेषमाश्रित्य घृतत्वेन रूपेण व्यवहारोपयोगित्वं युज्यते । अञ्जनविधेस्तु विद्यते विशेषनिर्धारकं प्रमाणं घृतार्थवादः । तत्र घृतस्य स्तुतिबलादञ्जनसाधनत्वेनावश्यंभावे तत एव सामान्यविधेः पर्यवसानसंभवेन विधेरेव स्तुतिशक्तिं कल्पयित्वा स्तुतिरहिततैलादि-

विधानकल्पनं गौरवपरास्तम् । एवं च प्रत्यक्षस्तुतिसद्भावे विधेः स्तुतिकल्पनानुपपत्तेः 'अक्ताः—' इत्यत्र स्तुत्यर्थमवश्यापेक्षितार्थवादत एवाञ्जनक्रियापेक्षितसाधनलाभे क्रियया अञ्जनद्रव्यसामान्याक्षेपस्यैवात्राप्रतीतेर्विरोधशङ्काया एवानवकाशः । तस्मादर्थवादगतघृतशब्दानुसारेण सामान्यविधेर्घृतमात्रविषयत्वम् । 'संदिग्धेषु' इति केचित्पठन्ति । 'अक्ताः शर्करा उपदधाति, तेजो वै घृतम्' 'वाससा दीक्षयति, सौम्यं वै क्षौमं देवतया' 'ओषधीर्वपति' सप्त ग्राम्या ओषधयः सप्तारण्याः' इत्यादिविधिष्वर्थवादनिर्धारितविशेषार्थकेष्वित्यर्थः । इत्युक्ताधिकरणम् ॥

तदेवं विध्यर्थवादमन्त्रनामधेयात्मके वेदे अर्थवादावयवस्य क्वचित्स्तावकत्वादन्येनापि प्रकारेण सामान्यविधिनिर्धारकत्वेन प्रामाण्ये प्रतिपादिते विधिरूपावयवस्यापि क्वचिद्विधायकत्वाद-

२०. सामर्थ्येनाव्यवस्थितानां व्यवस्थाधिकरणम् ।

न्येनापि प्रकारेण प्रामाण्यं प्रतिपादयितुमिदमारभ्यते । इदमामनन्ति 'स्रुवेणावद्यति' 'हस्तेनावद्यति' 'स्वधितिनावद्यति' इति । तत्र संशयः—किं द्रवद्रव्याणि दधिपयआदीनि कठिनद्रव्याणि पुरोडाशादीनि मांसादीनि च स्रुवाद्यन्यतमेनाव्यवस्थयावदातव्यानि, उत स्रुवेण द्रवद्रव्याणि हस्तेन पुरोडाशादीनि स्वधितिना मांसादीनीत्यर्थतो व्यवस्थेति । तत्र 'अक्ताः शर्कराः—' इत्यत्रेवात्र व्यवस्थापकवाक्यशेषप्रमाणाभावादव्यवस्था । न चाशक्यार्थस्य विधानासंभवात्सामर्थ्यानुसारेण व्यवस्था सिध्यतीति वाच्यम् । लिङ्गाच्छ्रुतेर्बलीयस्त्वस्य तृतीये वक्ष्यमाणतया सामर्थ्यरूपलिङ्गानुसारेणावद्यतिश्रुतिसंकोचस्यायुक्तत्वात् । न चाशक्यार्थविधानानुपपत्तेः सामर्थ्यानुसरणसंभवः । मुख्यसामर्थ्याभावेऽपि सामान्यविषयश्रुत्यनुसारादेवैन्द्रीन्यायेन [1]गौणीं वृत्तिमाश्रित्य शक्यार्थविधानस्य कथंचिदुपपाद्यत्वात् । अस्ति हि हस्तादेर्मांसाद्यवदानेऽप्यायसादिसहायेन गौणं सामर्थ्यम् । तस्मात्स्रुवादीनामव्यवस्था ।

इति प्राप्ते, सिद्धान्तयति—

अर्थाद्वा कल्पनैकदेशत्वात् ॥ २१ ॥

वाशब्दोऽप्यर्थे । अवदाने स्रुवादिविधिषु पूर्ववद्वाक्यशेषाभावेऽपि अर्थात् सामर्थ्यादपि व्यवस्थाकल्पना भवति । कुतः । एकदेशत्वात् शक्तेर्विधिसहकारित्वेन तदेकदेशत्वादित्यर्थः । न च शक्त्या लिङ्गेन अवद्यतिश्रुतिसंकोचो न युज्यत इति वाच्यम् । अशक्यार्थे विधेरसंभवेन शक्त्या लिङ्गेनाप्यवद्यतिश्रुतेः संकोचस्यावश्यानुसरणीयत्वात् । न चावद्यतिश्रुतिबाधापत्त्या आयसादिसहायेन गौणसामर्थ्याश्रयणं युज्यते । एवं सति निरपेक्षसाधनत्वबोधकतृतीयाश्रुतिबाधापत्तेः । 'समर्थः पदविधिः' इति परिभाषया 'कर्तृकरणयोस्तृतीया' इति तृतीयाविधेर्नैरपेक्ष्यविषयत्वा-

1. गौणसामर्थ्यम्—क, ग, घ.

वगमात्पदत्वापादकविधिविधेयो निरपेक्षत्वरूपसामर्थ्यप्रतिपादक इति हि तदर्थः। तत्र स्रुवादिविधेः शक्त्यनुसरणे अवद्यतिश्रुतेः संकोचमात्रम्। अवद्यतिश्रुत्यनुसारेण गौणसामर्थ्याश्रयणे तु नैरपेक्ष्यप्रतिपादकतृतीयाश्रुतेरत्यन्तबाधः स्यात्। तस्मात्सामर्थ्यानुसारेण स्रुवादीनां व्यवस्था। वैयाकरणास्तु "समर्थसूत्रे एकार्थीभावलक्षणमेव सामर्थ्यं विवक्षितम्। लब्धपदसंज्ञकस्य कार्यं पदविधिरित्यनेन विवक्षितम्। विभक्तिविधौ तु न समर्थपरिभाषा प्रवर्तते। 'व्रीहिभिः' इत्यत्र हि व्रीहिरूपं करणमवगतम्। तत्र 'सर्वं विशेषणं सावधारणम्' इति न्यायेन विशेषणस्यान्ययोगव्यवच्छेदार्थकतया व्रीहिरूपविशेषणेन तदितरव्यावृत्त्या इतरनिरपेक्षत्वमार्थिकम्। औचित्याच्च सजातीयेतरनिवृत्तिः फलति। 'घृतेन भुङ्क्ते' इत्यादौ हि सजातीयतैलादेरेव व्यावृत्तिः प्रतीयते, न शाकादेरपि" इत्याहुः। सर्वथापि प्रकृते तृतीयया निरपेक्षसाधनं गम्यत इति निर्विवादम्। ननु वाजसनेयके 'वसोर्धारां जुहोत्याज्येन पञ्चगृहीतेनौदुम्बर्या स्रुचा सा यदेवैषा धाराग्निं प्राप्नुयादथैतद्यजुः प्रतिपद्यते षष्टिश्च वै त्रीणि च शतानि एषा वसोर्धारा षडथ पञ्चत्रिंशत्' इत्यादिना औदुम्बर्यां स्रुचि स्रुवेण पञ्चकृत्वोगृहीताज्यधारया एकाधिकचतुःशताहुतयः समाम्नाताः। तत्राङ्गुष्ठपर्ववृत्तबिलस्रुवतः पञ्चगृहीताज्यस्य एकाधिकचतुःशतहोमनिर्वर्तकत्वान्यथानुपपत्त्या स्रुवपरिमाणमधिकं कल्प्यते। तद्वदिहापि स्वधितेर्द्रव्यावदानसामर्थ्यसिद्ध्यर्थं बिलवत्त्वं स्रुवस्य बिलतो मांसावदानसामर्थ्यसिद्ध्यर्थं तीक्ष्णाग्रत्वं च कल्प्यतामिति चेन्न। अङ्गुष्ठपर्वबिलस्रुवेण पञ्चगृहीताज्यधारया वसोर्धाराहोमस्य श्रुतस्य निर्वाहाभावेन तत्र स्रुवस्य परिमाणाधिक्यकल्पनेऽपि कल्प्यसामर्थ्यस्यैव स्वधितेर्मांसावदानमात्रविनियोगकल्पनेन श्रुत्युपपत्त्या स्रुवादेस्तीक्ष्णाग्रत्वादिकल्पनाया गौरवग्रस्ताया अनाश्रयणीयत्वात्। अत एव 'आग्नेय्याग्नीध्रमुपतिष्ठते' इत्यत्र अप्रकृताग्नेयीग्रहणे तस्याः क्रतुसंबन्धस्यापि कल्पनीयतया कल्पनागौरवपरिहारार्थं ज्योतिष्टोमप्रकरणगताग्नेयीपरत्वमेवाङ्गीक्रियते। तस्मात्सामर्थ्यानुसारेण स्रुवादीनां व्यवस्थेत्यास्तां तावत्। इत्यर्थाद्वाधिकरणम्॥

इति श्रीमत्संततसंतन्यमानश्येनकूर्मगोडशाररथचक्राकाराद्यनेकगुणविराजमानमहाग्निविलसितप्रौढापरिमितमहाध्वरस्य श्रीशाहजिशरभजितुक्कोजिभोसलचोलमहीमहेन्द्रामात्यधुरंधरस्य श्रीमत आनन्दरायविद्वत्सार्वभौमस्य पञ्चपुरुषीपोष्येण तदध्वर्युणा बाल्य एव तद्दयानिर्वर्तितापरिमितमहाग्निविजृम्भितवाजपेयसर्वपृष्ठाप्तोर्यामादिवरिष्ठसोममखसंतर्पितशतमखप्रमुखबर्हिर्मुखेन श्रीमहादेववाजपेययाजिसुतेन अन्नपूर्णागर्भजातेन अपारपदवाक्यप्रमाणपारावारपारीणाग्रजन्मविश्वेश्वरवाजपेययाजितो लब्धविद्यावैशद्येन **वासु**-

देवदीक्षितविदुषा विरचितायां जैमिनिसूत्रव्याख्यायाम्

अध्वरमीमांसाकुतूहलवृत्तौ

प्रथमोऽध्यायः॥

॥ श्रीः ॥

अध्वरमीमांसा

॥ कुतूहलवृत्तिः ॥

द्वितीयोऽध्यायः ॥

निर्मथ्य निगमसिन्धून्विविधन्यायाभिधानमन्थानैः ।
धर्मसुधामुद्धरते भूयो मुनये नमोऽस्तु जैमिनये ॥

'अथातो धर्मजिज्ञासा' इति प्रमाणस्वरूपसाधनफलैर्धर्मो जिज्ञास्यत्वेन प्रतिज्ञातः । तत्र प्रथमाध्याये धर्मप्रमाणं निरूपितम् । तत्प्रमेयो धर्म इति सामान्यतो धर्मस्वरूपं च तत एवावगतम् । इदानीं द्वितीयेऽध्याये धात्वर्थभेदप्रयुक्तभावनाभेदादपूर्वं भिद्यत इत्येवं धर्मभेदविचारः प्रक्रम्यते ।

तत्र धात्वर्थभेदस्य भावनाभेदकत्वं धात्वर्थस्य भावनां प्रति करणत्वं विना न निर्वहतीति भावार्थाधिकरणं धर्मभेदविचारोपोद्घातत्वेनारप्स्यते । तत्र भावार्थाधिकरणप्रवृत्तेरेकस्मादपूर्वमिति निर्णयाधीनत्वात्तदुपोद्घातत्वेन प्रतिपदाधिकरणमारभ्यते । 'उद्भिदा यजेत पशुकामः' 'श्येनेनाभिचरन्यजेत' 'चित्रया यजेत पशुकामः' 'अग्निहोत्रं जुहुयात्स्वर्गकामः' 'यः कामयेत पशुमान्त्स्यामिति, स पञ्चहोतारं प्रयुञ्जीत' इत्यादि श्रूयते । अभिपूर्वकश्चरतिः शत्रुवधे वर्तते । फले हेतौ शतृप्रत्ययः । शत्रुवधार्थमिति यावत् । पञ्चहोता 'अग्निर्होता' इत्यादिमन्त्रः । तं प्रयुञ्जीत ब्रूयात् । एवंजातीयकेषु वाक्येषु 'उद्भिदा यजेत पशुकामः' इत्येवं क्रियापदानि द्रव्यगुणवचनानि नामपदानि च किं प्रत्येकं फलपदेन संबध्यन्ते ततश्च सर्वाणि पदान्यपूर्वकल्पनसमर्थार्थाभिधायकानि, उत तेष्वेकमेव पदं फलपदेन संबध्यते तदेव चापूर्वकल्पनसमर्थार्थाभिधाय-

कमिति संशयः । न चोद्भिदाद्यधिकरणेषूद्भिदादिपदानां द्रव्यगुणवाचकत्वनिराकरणपूर्वकं धात्वर्थनामधेयत्वस्य साधितत्वेन धात्वर्थातिरिक्तस्य कस्यापि फलसंबन्धाप्रसक्तेः कथमयं संशय इति वाच्यम् । तेषां ह्यधिकरणानां सिद्धं धात्वर्थस्य करणत्वमवलम्ब्यैव प्रवृत्तिः । न हि करणतृतीयान्तोद्भिदादिपदानां धात्वर्थनामधेयत्वं धात्वर्थस्य करणत्वाभावे घटेत । धात्वर्थस्य करणत्वं त्विदानीमसिद्धम् । एतदधिकरणोपजीव्यकाम्रिमभावार्थाधिकरणे हि तत्साधयिष्यते । एवं चोद्भिदादिपदानामिदानीं धात्वर्थनामधेयत्वस्यासिद्धेर्द्रव्यगुणवचनताया अपि संभावितत्वाद्भवत्ययं संशयः । तत्र फलस्य सर्वाभ्यर्हितत्वेन प्रधानत्वात्प्रधानसंबन्धलाभेन सर्वेषां फलपदेनैवान्वयो युज्यते । किंच सर्वेषां फलसंबन्धाभावे उपपदार्थानां द्रव्यगुणानां धात्वर्थे धात्वर्थस्य च फलेऽन्वयः स्यात् । ततश्च फलं प्रति धात्वर्थस्योपादेयत्वं विधेयत्वं गुणत्वं च, उपपदार्थान्प्रति चोद्देश्यत्वमनुवाद्यत्वं प्राधान्यं चेति विरुद्धत्रिकद्वयं प्रसज्येत । मत्वर्थलक्षणाश्रयणेन वाक्यभेदपरिहारे तु स एव दोषः । तस्मात्सर्वेषां फलपदसंबन्ध इति प्राप्ते, ब्रूमः । सर्वेषां फलसंबन्धे फलसंबन्धनिर्वाहाय कल्प्यमानमपूर्वं प्रतिपदार्थं कल्प्येतेति गौरवम्; एकस्यैव फलसंबन्धे तु एकमेवापूर्वं कल्प्यमिति लाघवम्; इत्येकमेव पदं फलपदेन संबध्यते । इतरत्तु पदं तत्रैव कथंचिद्विशेषणतयान्वेति । न चैवं सति विरुद्धत्रिकद्वयापातः शङ्क्यः । एकस्मादपूर्वमिति सिद्धे सति वक्ष्यमाणभावार्थाधिकरणन्यायेन धात्वर्थस्य करणत्वसंभवेनोद्भिदादीनां तन्नामतया अभेदेनैवान्वयाभ्युपगमात् । 'सोमेन' इत्यत्र तु गत्यभावान्मत्वर्थलक्षणा । तस्मादेकस्यैव फलपदसंबन्ध इत्येकस्मादेवापूर्वम् । इत्युत्सूत्रं प्रतिपदाधिकरणम् ॥

तदेवं प्रतिपदाधिकरणे एकस्मादपूर्वमिति सिद्धे किम् 'यजेत' इत्यादिक्रियापदं फलपदेन संबध्यते ततश्च धात्वर्थत एवापूर्वं कल्प्यते, उत उपपदं द्रव्यगुणवाचकं फलपदेन संबध्यते ततश्चोपपदार्थत एवापूर्वमिति संशये, सिद्धान्तेनोपक्रमते—

भावार्थाः कर्मशब्दास्तेभ्यः क्रिया प्रतीयेतैष ह्यर्थो विधीयते ॥ १ ॥

भावार्थाः प्रत्ययेन भावनाप्रतिपादकाः प्रकृत्या कर्मवचनाश्च 'यजेत' 'जुहुयात्' इत्यादयो ये, तेभ्य एव क्रिया कार्यमपूर्वं प्रतीयेत कल्प्येत । 'यजेत' इत्यादय एवापूर्वकल्पनासमर्थार्थ-

१. अपूर्वस्याख्यातप्रतिपाद्यत्वाधिकरणम् ।

प्रतिपादका इति यावत् । ननु द्रव्यगुणशब्दा एव तथाविधाः कुतो न स्युरित्यत आह—एष हीति । हि यस्मात्कारणात् एषः धात्वर्थ एव फलभावनाकरणत्वेन विधीयते नान्यः । अतः 'यजेत' इत्यादय एव शब्दास्तथाविधाः ॥

स्यादेतत्। 'उद्भिदा यजेत पशुकामः' इत्यादौ फलं साध्यरूपत्वात्सिद्धरूपं साधनमपेक्षते, न तु साध्यरूपम्। द्रव्यगुणावेव च सिद्धरूपत्वात्तदाकाङ्क्षां पूरयितुं शक्नुतः। यागादयो धात्वर्थास्तु स्वयं साध्यरूपत्वान्न साधनाकाङ्क्षां पूरयितुमीशते। तन्न स्वरूपसतोर्द्रव्यगुणयोर्व्यापारविशेषानुप्रवेशमन्तरेण फलसंबन्धानुपपत्तेरपेक्षितं व्यापारविशेषं यज्यादिधातवः समर्पयन्ति। ततश्च धात्वर्थविशेषितद्रव्यगुणत एवापूर्वमिति पूर्वपक्षमुद्भाव्य निराकरोति—

सर्वेषां भावोऽर्थ इति चेद्येषामुत्पत्तौ स्वे प्रयोगे रूपोपलब्धिस्तानि नामानि, तस्मात्तेभ्यः पराकाङ्क्षा भूतत्वात्स्वे प्रयोगे, येषां तूत्पत्तावर्थे स्वे प्रयोगो न विद्यते तान्याख्यातानि, तस्मा-[1]त्तेभ्यः क्रिया प्रतीयेताश्रितत्वात्प्रयोगस्य ॥ २ ॥

एकार्थपर्यवसायित्वादेकमपि सूत्रं व्याख्यासौकर्याय त्रेधा विभज्योपात्तं भाष्ये। सर्वेषामुपपदार्थानां द्रव्यगुणानामेव भावः। कर्मणि घञ्। भाव्यः कल्प्यः अर्थः अपूर्वम्। 'सर्वेषाम्' इति हेतुत्वस्य शेषत्वविवक्षायां षष्ठी। सर्वैरुपपदार्थैर्द्रव्यगुणैरेवापूर्वं कल्प्यम् उक्तयुक्तेः इति चेत्, तन्न। यतः येषां शब्दानां स्वे स्वकीये प्रयोगे प्रयुज्यन्ते शब्दा अत्रेति व्युत्पत्त्या अर्थे उत्पत्तौ उच्चारणदशायां रूपोपलब्धिः अभिधेयस्वरूपं विद्यते तानि नामानि द्रव्यगुणशब्दाः। तस्माद्धेतोः तेभ्यः तदर्थं द्रव्यगुणनिष्पत्त्यर्थं परस्य साधनस्य आकाङ्क्षा नेत्यध्याहार्यमिति केचित्। वस्तुतस्तु अकाङ्क्षा इति च्छेदः। काङ्क्षाया अभाव इत्यर्थः। कुतः। स्वे प्रयोगे भूतत्वात् स्वकीयशब्दप्रयोगकाले विद्यमानत्वात्। तस्मादित्यस्यैव विवरणमेतत्। येषां तु शब्दानां स्वे स्वकीये अर्थे उत्पत्तौ उच्चारणदशायां प्रयोगः [2]अर्थः न विद्यते। प्रयोगकाले अर्थो न विद्यत इति यावत्। तानि आख्यातानि 'यजेत' इत्यादितिङन्तानि। धात्वर्थानां साध्यरूपत्वात्तन्निष्पत्तौ साधनाकाङ्क्षास्तीति भावः। तस्माद्धेतोः तेभ्य एवाख्यातशब्देभ्यः क्रिया अपूर्वं प्रतीयेत कल्प्येत, न तु द्रव्यगुणशब्देभ्यः। द्रव्यगुणानां सिद्धरूपाणां धात्वर्थनिष्पाद्यत्वाभावेन तदर्थत्वे धात्वर्थानामदृष्टार्थत्वापत्तौ धात्वर्थेभ्यो द्रव्यगुणेभ्यश्च प्रत्येकमपूर्वकल्पनागौरवापत्तेः। धातुभ्य एवापूर्वकल्पनायां तु द्रव्यगुणानां तन्निष्पादकत्वेन दृष्टार्थत्वादपूर्वान्तरं न कल्प्यमिति लाघवम्। ननु द्रव्यगुणानां सिद्धरूपत्वेऽपि 'दध्नेन्द्रियकामस्य' इत्यादावाश्रयस्येवात्रापि धात्वर्थानामपि फलोद्देशप्रवृत्तकर्तृव्यापारविषयत्वरूपकरणत्वसंपादकतया अदृष्टार्थत्वसंभवान्नादृष्टद्वयकल्पनाप्रसक्तिरित्यस्वरसाद्धातूनामेवापूर्वक-

---

1. तेभ्यः प्रतीयेत. 2. प्रयोज्यः अर्थः—क.

ल्पकत्वे युक्त्यन्तरमाह— आश्रितत्वात्प्रयोगस्येति । प्रयुज्यमानधात्वर्थस्य भावनया सह एकं पदमाश्रितत्वादेकपदश्रुत्या धात्वर्थस्यैव भावनाकरणत्वादिति यावत् । तस्मादेव क्रिया अपूर्वं प्रतीयेतेत्यन्वयः ॥ अयं भावः । तृतीयाश्रुत्या उद्भिच्छ्येनादि करणम् इत्येतावन्मात्रमवगतम्, न तु भावनाकरणमिति । तत्तु 'यजेत' इत्यादिपदान्तरसमभिव्याहारलभ्यम् । 'यजेत' इत्यादिषु तु प्रकृत्यंशेन धात्वर्थः प्रत्ययांशेन भावना तदुभयसमभिव्याहारलक्षणपदश्रुत्या च धात्वर्थो भावनाकरणमित्यवगम्यते । ततश्च धात्वर्थकरणत्वं पदान्तरसमभिव्याहारमनपेक्ष्य प्रकृतिप्रत्ययसमभिव्याहारमात्रगम्यमिति तृतीयाश्रुत्यपेक्षया पदश्रुतिरिह प्रबलेति । न च साध्यरूपस्य धात्वर्थस्य कथं साधनत्वमिति वाच्यम् । वाक्यार्थज्ञानदशायां सिद्धत्वाभावेऽपि पश्चात्स्वसाधनतो निष्पन्नस्य तस्य साधनत्वोपपत्तेः । तस्माद्धात्वर्थस्यैव भावनाकरणत्वात्तत एवापूर्वमिति सिद्धम् । प्रयोजनं पूर्वपक्षे उद्भिच्छ्येनादिपदानां गुणविधित्वादुद्भिच्छ्येनादिद्रव्येण यष्टव्यम्, सिद्धान्ते तु धात्वर्थस्य करणत्वेन करणतृतीयान्तानामुद्भिच्छ्येनादिपदानां तन्नामधेयत्वात् 'अव्यक्तासु तु सोमस्य' इति न्यायात्सोमेन यष्टव्यम् । 'सोमेन यजेत' इत्यत्र च सोमापचारे प्रतिनिधिर्नोपादातव्यः पूर्वपक्षे; सोमस्यापूर्वार्थत्वेनादृष्टार्थत्वात्, अदृष्टार्थानां प्रतिनिध्यभावस्य तृतीये प्रतिनिधिपेटिकायां वक्ष्यमाणत्वात् । सिद्धान्ते तु सोमद्रव्यस्य धात्वर्थयागनिर्वर्तकत्वेन दृष्टार्थत्वादस्ति प्रतिनिधिरित्यादि यथायथमूह्यम् । स्यादेतत् । प्रत्ययवाच्यां फलभावनां प्रति धात्वर्थः करणमित्यनुपपन्नम्, धात्वर्थातिरिक्तभावनास्वरूपस्य दुर्निरूपत्वात् । तथाहि—किं कर्तृव्यापारो भावना, उत यत्नः, आहोस्वित्स्पन्दः, प्रयत्नस्पन्दान्यतरो वा । नाद्यः, कर्तृव्यापारस्याधिश्रयणादिनिचयस्य पचिधात्वर्थत्वेन तदतिरिक्तभावनानुपपत्तेः । न च विक्लित्तिरेव पचेरर्थ इति शङ्क्यम् । तथा सति कृष्णलानाम् 'घृते श्रपयति' इति पाकविधानानुपपत्तेः । एवं यज्यादावप्यूह्यम् । नन्वधिश्रयणादिकर्तृव्यापारस्य पचिधात्वर्थत्वेऽपि तदतिरिक्तस्य प्रयत्नस्य प्रत्ययवाच्यभावनात्वमिति द्वितीयः पक्षोऽस्त्विति चेत्, न। 'रथो गच्छति' इत्याद्यनुपपत्तेः; अचेतनस्य रथस्य प्रयत्नाभावात् । न च लक्षणया तन्निर्वाहः शङ्क्यः, 'देवदत्तो गच्छति' इत्याद्यपेक्षया प्रतीतिवैलक्षण्याभावात् । न तृतीयः, 'यतते' 'जानाति' इत्यादिष्वात्मकर्तृकेषु व्यभिचारात् आत्मनः स्पन्दाभावात् । न चतुर्थः, 'शब्दोऽभिदधाति' इत्यादौ व्यभिचारात् । न हि प्रयत्नः स्पन्दो वा शब्दस्यास्ति । तस्माद्धात्वर्थातिरिक्तभावनास्वरूपं दुर्निरूपमिति चेत्, नैष दोषः । 'यजते' 'पचति' इत्यादौ 'यागं करोति' 'पाकं करोति' इत्यादिविवरणात्, तथैवानुभवात्, 'यागः' 'पाकः' इत्यादौ तदुभयाभावादाख्यातप्रत्ययस्य करोतिसमानार्थत्वं वक्तव्यम् । करोतिश्च उत्पादनार्थः सकर्मकः । तच्च कर्मोत्पद्यमानमेव भवति, 'नित्यं न भवनं यस्य नित्यं चापि न भूतता । न तस्य क्रियमाणत्वं खपुष्पाकाशयोरिव ॥' इति न्यायात् । ततश्चोत्पद्यमानस्य वस्तुन उत्पत्त्यनुकूल उत्पादककर्तृव्यापारः करोतेरर्थः । भावयतेश्चायमेवार्थः, भवतेरु-

त्पत्त्यर्थकत्वात् प्रयोजकव्यापारे 'तत्प्रयोजको हेतुश्च' 'हेतुमति च' इति णिचोऽनुशासनात्। एवं च 'पचति' 'पाकं करोति' 'पाकं भावयति' इति च पर्यायाः। पचिधात्वर्थश्च विक्लित्तिरिति महाभाष्ये स्पष्टम्। तथा च तण्डुलरूपकर्मगतविक्लित्तिः पचिवाच्या। तत्प्रयोजको देवदत्तादिकर्तृव्यापारोऽधिश्रयणादिनिचयरूप आख्यातप्रत्ययवाच्यः। स एव च कर्तृव्यापारो भावभावनाशब्दाभ्यामुच्यते। एवम् 'यजते, यागं भावयति' 'जुहोति, होमं भावयति' 'ददाति, दानं भावयति' इत्याद्यूह्यम्। न च, करोतिर्नोत्पादनार्थको येन तत्समानार्थकतया आख्यातप्रत्ययस्य उत्पत्त्यनुकूलव्यापाररूपभावनावाचित्वं लभ्येत; नैवमस्ति, करोतेर्यत्नार्थकत्वात्; तथा च प्रयत्नरूपभावनावाचित्वमेवाख्यातप्रत्ययस्य वक्तुमुचितम्, इति वाच्यम्। 'स्तम्बकरिर्व्रीहिः' इत्यादावचेतनेऽपि प्रयुज्यमानस्य [1]कृञो यत्नार्थकत्वानुपपत्तेः, कृञो यत्नार्थकत्वे सति यतधातुवदकर्मकत्वापत्तेश्च। न चेष्टापत्तिः; 'करोति' इत्युक्ते 'किम्' इत्याकाङ्क्षायाः 'यतते' इत्युक्ते तदनाकाङ्क्षायाश्च सर्वानुभवसिद्धाया अपह्नवायोगात्, 'भोजनाय यतते' इतिवत् 'भोजनाय करोति' इत्यापत्तेश्च। एतेनोत्पद्यतिपर्यायत्वं करोतेर्निरस्तम्। तथा सत्यकर्मकत्वेन 'घटं करोति' इत्यनापत्तेः, घट उत्पद्यत इत्यर्थे 'घटः करोति' इत्यापत्तेश्च। तस्मादन्योत्पादानुकूलव्यापाररूपा भावनैव करोत्यर्थ इति तत्समानार्थकाख्यातप्रत्ययेनापि सैवोच्यत इत्यास्थेयम्। ननु अस्तु धात्वर्थातिरिक्ता भावना; तथापि तां प्रति धात्वर्थस्य 'पाकं करोति' इति कर्मत्वेन लोके विवरणात्कथमिह तस्य करणत्वं व्युत्पाद्यमिति चेत्, सत्यम्। धात्वर्थातिरिक्तकर्मपदासमभिव्याहारे 'पचति' इत्येवोक्ते 'पाकं करोति' 'ओदनं पचति' इत्युक्ते 'पाकेनौदनं करोति' इति च विवरणं लोके दृश्यते। तत्र यदा पाकस्य कर्मत्वेनान्वयस्तदा तदनुकूलाधिश्रयणादिव्यापारनिचयः अधिश्रयणत्वादिविशेषधर्मानादरेण पाकानुकूलो व्यापार इत्येवं सामान्यरूपेणाख्यातप्रत्ययवाच्यतां भजते। यदा तु 'ओदनं पचति' इत्यत्र पाकेनौदनं करोतीति करणत्वेन धात्वर्थस्यान्वयस्तदा पाकानुकूलव्यापारत्वेनाधिश्रयणादिनिचयो न प्रत्ययेनोच्यते, पाकस्य कर्मत्वाभावादोदनस्यैव कर्मत्वात्। किंत्वोदनोत्पत्त्यनुकूलव्यापारत्वेन सामान्यरूपेणैवाधिश्रयणत्वादिविशेषधर्मानादरेण स तद्वाच्यतां भजते। धात्वर्थस्तु पाकः प्रत्ययवाच्ये तस्मिन्व्यापारे करणं न त्वोदने, कारकाणां मिथः संबन्धायोगात्। यद्यप्यधिश्रयणादिनिचयेन पाको जायते न तु पाकेनाधिश्रयणादिनिचयः, तथापि पाकस्याधिश्रयणादिनिचयं प्रति साधकतमत्वरूपकरणत्वासंभवेऽपि फलोद्देशप्रवृत्तकर्तृव्यापारनिष्पाद्यत्वरूपं करणत्वं संभवतीति न दोषः। तत्र करणस्य कर्तृव्यापारेण निष्पत्तिर्द्वेधा, स्वरूपेणातिशयविशिष्टतया च। तत्र पाकस्याधिश्रयणादिनिचयेन स्वरूपेण निष्पत्तिः। 'कुठारेण वृक्षं छिनत्ति' इत्यत्र तु द्वैधीभावानुकूलोद्यमननिपातनादिव्यापारनिचयेन कुठारस्य द्वैधीभावसंपादकाभिघाताद्यतिशयविशिष्टतया निष्पत्तिः। एवं वेदेऽपि 'व्रीहिभि-

1. करोतेः—क, घ.

र्यजेत' इत्यत्र यागस्यैव कर्मत्वात्तदनुकूलव्यापारत्वसामान्यात्मना प्रयत्नसंकल्पादिस्तद्विशेषरूपानादरेण गम्यते । व्रीहयस्तु तत्र करणम् । 'यजेत स्वर्गकामः' इत्यत्र तु फलस्य कर्मत्वात्तदनुकूलव्यापारत्वसामान्यरूपेणाग्न्यन्वाधानादिसकलव्यापारनिचयस्तद्विशेषरूपानादरेण प्रत्ययेनाभिधीयते । तस्मिंश्च व्यापारे यागः करणम्, यागस्य दृष्टादृष्टार्थावघातप्रयाजादिकर्तृव्यापारेण स्वरूपेण स्वर्गसाधनतासंपादकातिशयविशेषविशिष्टतया चोत्पत्त्या फलोद्देशप्रवृत्तव्यापारनिष्पाद्यत्वात् । यदि तु 'साधकतमं करणम्' इति व्याकरणानुसाराज्जनकविशेषस्यैव करणत्वमित्याग्रहस्तदाप्येवमुपपाद्यम् । 'कुठारेण च्छिनत्ति' इत्यत्र द्वैधीभावानुकूलोद्यमननिपातनादिव्यापारो न कुठारं प्रति स्वरूपेण साध्यः, कुठारोऽपि न तत्र स्वरूपेण साधनम् । किंतु द्वैधीभावजननसामर्थ्यरूपाभिघातान्वयातिशयविशेषविशिष्टतया कुठार उद्यमननिपातनादिव्यापारनिचये द्वैधीभावानुकूलव्यापारत्वरूपापन्ने साधनम् । कुठारेऽभिघातान्वयातिशयविशिष्टे सत्येव ह्युद्यमनादिव्यापारो द्वैधीभावानुकूलव्यापारात्मना संपद्यते । ततश्च द्वैधीभावानुकूलव्यापारे उद्यमनादौ कुठारः करणमित्युक्ते 'सविशेषणे हि—' इति न्यायेन द्वैधीभावनिष्पत्तौ कुठारः करणमिति पर्यवस्यति । एवम् 'यजेत स्वर्गकामः' इत्यत्रापि दृष्टादृष्टोपकारविशिष्टयागस्यावघातप्रयाजादिकर्तृव्यापारे स्वर्गानुकूलव्यापारत्वरूपापन्ने साधनत्वम् 'सविशेषणे हि—' इति न्यायात्स्वर्गोत्पत्तौ पर्यवस्यति । तत्र प्रयत्नादिभिरार्थिकैर्लौकिकैः साधनैरवघातादिभिश्च वैदिकैः स्वरूपेण निष्पन्नोऽपि यागः अग्न्यन्वाधानप्रयाजादिभिर्व्यापारैस्तत्तद्रूपापन्नैः फलसाधनात्मना निष्पद्यत इति तेन रूपेण यागस्याग्न्यन्वाधानादिसाध्यता । अग्न्यन्वाधानादिव्यापारस्य च तत्तद्रूपेण तत्साधनता । ततश्च रूपभेदाद्यागस्य कर्तृव्यापारं प्रति साध्यत्वं साधनत्वं च न विरुध्यते । तथा कर्तृव्यापारस्यापि यागं प्रति। नन्वेवमप्यन्वाधानादिरूपव्यापारस्य 'अग्नीनन्वादधाति' 'व्रीहीनवहन्ति' 'व्रीहीन्प्रोक्षति' 'तण्डुलान्पिनष्टि' 'समिधो यजति' 'तनूनपातं यजति' 'विष्णुक्रमान्क्रमते' इत्यादितत्तद्धात्वभिहितत्वात्कथं यजेतेति प्रत्ययवाच्यत्वम् । किंच अन्वाधानादिव्यापारस्य 'किम्' 'केन' 'कथम्' इत्यंशत्रयविशिष्टभावनायां तृतीयाकाङ्क्षापूरकस्य भावनात्वमपि विरुद्धमिति चेत्, सत्यम् । 'अन्वादधाति' इत्यादिभिस्तत्तद्रूपेणाग्न्यन्वाधानादिव्यापारनिचयस्याभिहितत्वेऽप्यन्योत्पादव्यापारत्वेन सामान्यात्मना प्रत्ययवाच्यत्वमविरुद्धम् । एवमग्न्यन्वाधानादिव्यापारनिचयस्य तृतीयाकाङ्क्षापूरकत्वेन भावनांशत्वं सामान्यात्मना अंशित्वं चाविरुद्धम् । तत्र प्रत्ययेन सामान्यात्मना प्रतीतो व्यापारः कोऽसाविति विशिष्याकाङ्क्षितोऽग्न्यन्वाधानादिः कथं व्यापरितव्यमित्याकाङ्क्षितोऽग्न्यन्वाधानादिजन्यदृष्टादृष्टोपकारसंपादनरूप इति विवेकः । तत्सिद्धं धात्वर्थातिरिक्तं भावनास्वरूपम् । तत्र धात्वर्थः करणम्, तत एवापूर्वमिति 'यजेत' इत्याद्याख्यातशब्द एवापूर्वमाक्षिपतीति पार्थसारथिमतानुसारी पन्थाः । अत्र यद्वक्तव्यं तत्तृतीयस्य तृतीये प्रकरणाधिकरणे वक्ष्यामः । इति भावार्थाधिकरणम् ॥

धात्वर्थादेवापूर्वमिति स्थितम्। तत्रापूर्वं साधयितुमिदमारभ्यते। 'यजेत स्वर्गकामः' इत्यत्र यागस्वर्गातिरिक्तमपूर्वं नाम किंचिदस्ति न वेति संशयः। नास्त्यपूर्वम्, प्रमाणाभावात्।

२. अपूर्वस्यास्तित्वाधिकरणम्।

न ह्यत्र प्रत्यक्षं प्रमाणं क्रमते, रूपाद्यभावात्। अविनाभूतलिङ्गाभावाच्च नानुमानम्। आगमोऽपि नैवंविधोऽस्ति 'यागोऽपूर्वद्वारा स्वर्गं जनयति' इति। सादृश्याग्रहणाच्च नोपमानगन्धोऽपि। न च यागस्य क्षणिकस्य श्रुतकालान्तरभाविस्वर्गसाधनत्वान्यथानुपपत्त्या वस्त्वन्तरमपूर्वं नाम किंचित्कल्प्यत इति शक्यते वक्तुम्; कल्प्यमानस्य तस्य श्रुतसाधनत्वविरोधितया तदुपपादकत्वासंभवात्, साधनत्वबोधकशास्त्रेणाव्यवहितस्य बोधितत्वेन मध्ये वस्त्वन्तरस्वीकारे तद्विरोधात्, व्यवहितस्य कुलालपित्रादिवदन्यथासिद्धत्वेन साधनत्वव्याघातात्। न च, यागस्य स्वर्गजननशक्तिर्या सैवापूर्वमुच्यते। ततश्च शक्तेरवस्त्वन्तरतया साधनान्तरत्वाभावेनाव्यवधायकतया यागस्य साधनता न तया व्याहन्यते। अस्तु वा वस्त्वन्तरमपूर्वम्। तथापि व्यापारवत्त्वेन यागस्य साधनत्वं न तद्व्याहन्तुमीष्टे, 'नहि स्वाङ्गं स्वव्यवधायकम्' इति न्यायादिति वाच्यम्। शक्तिमति व्यापारवति च यागे क्षणिकत्वेन विनष्टे शक्तेर्व्यापारस्य चावस्थानायोगात्। कथं तर्हि क्षणिकस्य यागस्य कालान्तरभाविस्वर्गजनकत्वमिति चेन्न। शास्त्रप्रामाण्याद्विनष्टस्यापि यागस्य स्वर्गसाधनत्वकल्पनोपपत्तेः। शास्त्रप्रामाण्यात्सूक्ष्मरूपेणावस्थानं वा यागस्य कल्प्यताम्। अतो नापूर्वं वस्त्वन्तरम्। इति प्राप्ते, सिद्धान्तयति—

चोदना पुनरारम्भः ॥ ३ ॥

पुनःशब्दो यत इत्यर्थे। चोद्यत आक्षिप्यत इति चोदना अपूर्वम्। कर्मणि ल्युट्। अस्तीति शेषः। कुतः। यतः कर्मणा फलस्य आरम्भः उत्पत्तिः श्रूयते। तथाहि—शास्त्रप्रामाण्यात्कल्प्यमानमपि प्रमाणान्तरेणाविरुद्धमेव कल्प्यते। विनष्टस्य कार्यारम्भकत्वं च सर्वप्रमाणविरुद्धम्। न च पूर्वानुभवकृष्यध्ययनादीनामिव विनष्टस्यापि कार्यारम्भकत्वं किं न स्यादिति वाच्यम्। तेषां संस्कारविशेषनिष्पादनमुखेन तदुपपत्तेः। इह च तदनभ्युपगमात्। अभ्युपगमे च गतं विवादेन। एवं क्षणिकस्य यागस्य यावत्कार्यारम्भमवस्थानमपि सर्वप्रमाणविरुद्धं न कल्पयितुं शक्यम्, 'न ह्यागमाः सहस्रं घटं पटयितुमीशते' इति न्यायात्। कृतयागस्यात्मन एव फलमिति कल्पना त्वेकादशे 'कर्मण्यारम्भभाव्यत्वात्' इत्यधिकरणे 'सकृत्तु स्यात्कृतार्थत्वादङ्गवत्' इति गुणसूत्र उद्घाव्य निराकरिष्यते। न चापूर्वकल्पनायां यागस्य साधनत्वव्याघातः, स्वशक्त्यात्मनः स्वव्यापारात्मनो वा अपूर्वस्य यागे साधनत्वपरिपन्थित्वाभावात्। यद्यपि शक्तिमति व्यापारवति च यागे नष्टे तदवस्थानासंभवस्तथापि कार्यबलात्कल्प्यमाना शक्तिर्यथा कार्यं निर्वहति तथा कल्प्या। इह च शक्तिरात्मनिष्ठतयैव कार्यनिर्वाहिकेत्यात्मनिष्ठैव यागस्य शक्तिः कल्प्यते। एवं व्यापारोऽपि। तत्र हि समी-

हितसाध्योद्देशप्रवृत्तसाधनेन तत्सिद्धयर्थमन्तरासाध्यमानत्वमेवावान्तरव्यापारत्वम् । व्यापारिणः सत्त्वमपि न तत्र प्रयोजकम् । अन्यथा 'काष्ठैः पचति' इत्यत्र ज्वालायाः पूर्वानुभवादौ च संस्कारस्य व्यापारत्वानुपपत्तेः । तस्मादस्त्यपूर्वं वस्त्वन्तरम् । तदिदं श्रुतफलसाधनत्वान्यथानुपपत्त्या कल्पितमपूर्वमव्यवहितफलसाधनत्वात्परमापूर्वमिति वदन्ति । तत्रैकहविष्कायामिष्टौ तदुत्पत्तिप्रकारः कथ्यते । सर्वाङ्गोपकृतेन यागेन परमापूर्वमुत्पद्यते । अङ्गानि च कानिचिद्यागानुष्ठानस्य पुरस्तात्कानिचित्परस्ताच्चानुष्ठीयन्ते । यथानुष्ठितानि चाङ्गानि मिलितानि युगपदेव यागे उपकारं जनयन्तीत्येकादशे वक्ष्यते । अङ्गानां च सर्वेषां क्रियात्मकानां क्षणिकानां मेलनं साक्षादसंभवात्स्वस्वजन्यापूर्वमुखेन वक्तव्यमित्यङ्गापूर्वसिद्धिः । मिलितैरपि तैरङ्गापूर्वैर्मध्येऽनुष्ठितस्य यागस्योत्पन्नविनष्टत्वेन साक्षात्तस्मिन्नुपकारजननासंभवात्स्वजन्यापूर्वमुखेनैव तस्मिन्नुपकारजनकत्वं तेषामङ्गापूर्वाणां वाच्यमित्युत्पन्नमात्रादनुपकृतादेव यागात्किंचिदपूर्वमुत्पद्यत इति वक्तव्यम् । तदिदमुत्पत्त्यपूर्वमित्युच्यते । तन्मुखेन सर्वाङ्गापूर्वैरुपकृताद्यागात्परमापूर्वमिति । न चोत्पत्त्यपूर्वमेवाङ्गोपकृतं फलं साधयतु; किं परमापूर्वेणेति वाच्यम् । यागफलयोः साध्यसाधनभावे निर्धारिते हि कथंभावाकाङ्क्षा भवति, न त्वनिर्धारिते । तन्निर्धारणं च यागस्य नश्वरत्वेन द्वारकल्पनां विना न संभवतीति प्रथमं परमापूर्वमेव कल्प्यम्, न तूत्पत्त्यपूर्वम् । तत्त्वङ्गसाचिव्यनिर्वाहाय पश्चादेव कल्प्यमित्यपूर्वद्वयकल्पना आवश्यकी । एवमनेकहविष्कायामपीष्टौ यावन्तो यागास्तावन्त्युत्पत्त्यपूर्वाणीति विशेषः । तत्र प्रधानानां फलसाधनतानिर्वाहार्थं प्रथमं परमापूर्वमेकं सर्वप्रधानसाध्यं कल्प्यते, फलवाक्ये एकशब्दोपात्तानां प्रधानानामेकफलसाधनत्वस्यैकादशाद्याधिकरणे व्यवस्थापयिष्यमाणत्वात् । पश्चाच्चाङ्गसाहित्यसिद्धयर्थं प्रातिस्विकान्युत्पत्त्यपूर्वाणि कल्प्यन्ते । न च प्रधानानां साहित्यसिद्ध्यर्थं प्रथममुत्पत्त्यपूर्वाण्येव कल्प्यन्ताम्; ततश्च तैरेव फलसिद्धेः किं परमापूर्वेणेति वाच्यम् । फलाकाङ्क्षाया उत्कटत्वेन फलसाधनतानिर्वाहकतया प्रथमं परमापूर्वकल्पनाया एवोचितत्वात् । यदि च प्रतिप्रधानमपूर्वाणि प्रथमं कल्प्येरन् तर्हि तानि फलापूर्वाण्येव स्युः, न तु उत्पत्त्यपूर्वाणि । ततश्च सप्तमाद्ये वक्ष्यमाणन्यायेन धर्माणामपूर्वार्थतया प्रथमकल्पितापूर्वार्थत्वमेव स्यात् । ततश्चाङ्गोपकृतेभ्यो यागेभ्योऽपूर्वसिद्धयर्थं पुनरपि प्रतिप्रधानमुत्पत्त्यपूर्वाणि कल्प्येरन्निति गौरवं स्यात् । तस्मात्फलवाक्ये एकशब्दसंगृहीतैर्बहुभिरपि यागैः स्वस्वोत्पत्त्यपूर्वमुखेन परमापूर्वमेकमेव जन्यते । उत्पत्त्यपूर्वाण्येव तु प्रतिप्रधानं भिद्यन्ते । तदेवमुत्पत्त्यपूर्वं परमापूर्वं च सर्वत्र साधारणम् । दर्शपूर्णमासयोस्तु समुदायापूर्वद्वयमधिकम् । तथाहि—आग्नेयोऽष्टाकपालः पुरोडाशः, आज्यहविरुपांशुयाजः, अग्नीषोमीय एकादशकपालः पुरोडाश इति पौर्णमास्यां त्रीणि प्रधानानि । आग्नेयः पुरोडाशः, ऐन्द्रं दधि, ऐन्द्रं पय इत्यमावास्यायां त्रीणि प्रधानानि । तत्र 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इति फलवाक्ये सकृदुच्चरितेन यजिना तन्नामाभिधानशक्तिमहिम्ना समुदितानां षण्णां यागानामेक-

फलजनकतया एकप्रयोगोपनिपाते प्राप्ते प्रतित्रिकं प्रयोगभेदं विधातुमिदं वाक्यद्वयं प्रवृत्तम् 'पौर्णमास्यां पौर्णमास्या यजेत' 'अमावास्यायाममावास्यया यजेत' इति । तदेतदेकादश एव स्पष्टं भविष्यति । तत्र पृथक्करणविभक्तिनिर्देशात्परस्परनिरपेक्षस्यैकैकस्य त्रिकस्य करणत्वमवगम्यते । न च तत् फलापूर्वं प्रति वक्तुं शक्यम्, तत्र परस्परसाहित्यावश्यंभावात् । ततश्च निरपेक्षसाधनत्वेनावगताभ्यां त्रिकाभ्यां युगपत्फलापूर्वारम्भे नैरपेक्ष्यबाधप्रसङ्गेन तदादाय पृथक्करणश्रुतिनिर्वाहासंभवात् तदर्थं प्रतित्रिकमेकैकं समुदायापूर्वमङ्गीकर्तव्यमिति । एवं चातुर्मास्येषु 'वसन्ते वैश्वदेवेन यजेत' 'प्रावृषि वरुणप्रघासैः' 'शरदि साकमेधैः' 'ततो द्वयहे त्र्यहे चतुरहेऽर्धमासे मासि चतुर्षु वा मासेषु शुनासीरीयेण यजेत' इत्यत्र चत्वारि समुदायापूर्वाण्यधिकानीत्यादि यथायथमूह्यम् । नन्वेवमपि सर्वाङ्गोपकृतयागतः परमापूर्वमित्यनुपपन्नम्, संनिपत्योपकारकाणामवघातादीनामनुष्ठानसमये प्रधानापूर्वस्यैवासत्त्वेन तदुपकारस्यासंभवात्; न च प्रयाजादिवदपूर्वद्वारा तत्संभवः, अवघातादीनां दृष्टार्थतया अपूर्वाभावादिति चेत्, सत्यम् । संनिपत्योपकारकाण्यवघातादीनि नियमादृष्टरूपद्रव्यदेवतासंस्कारद्वारा शक्तिविशेषविशिष्टयागजननद्वारा तदुत्पत्त्यपूर्वनिष्पत्तौ तद्द्वारा फलापूर्वनिष्पत्तौ च व्याप्रियन्ते, तथाविधयागजन्योत्पत्त्यपूर्वस्यैव फलापूर्वजनकत्वात् । आरादुपकारकाणि तु साक्षादेवोत्पत्त्यपूर्वेभ्यः फलापूर्वनिष्पत्तौ व्याप्रियन्ते । न चैवं सति साक्षादुपकारजनने व्याप्रियमाणत्वादारादुपकारकाणां प्रयाजादीनामेवेत्थंभावाकाङ्क्षया स्वीकारः स्यात्; ततश्च तेषामेव विकृतावतिदेशः स्यान्नावघातादीनां संनिपत्योपकारकाणामिति वाच्यम् । 'कथं भावयेत्' इत्युपकारजननप्रकारमात्रं ह्यपेक्ष्यते, न तु साक्षादुपकारजननप्रकार एव । ततश्च सत्यप्यवान्तरभेदे सर्वेषामेवाङ्गानामित्थंभावाकाङ्क्षानिगृहीतत्वात्सर्वाङ्गोपसंहृतयागतः[1] परमापूर्वमिति युक्तम् । इत्यपूर्वाधिकरणम् ॥

धात्वर्थेभ्योऽपूर्वमिति भावार्थाधिकरणे स्थितम् । तदेतत्कचिदपवदितुमिदमारभ्यते । 'व्रीहीनवहन्ति' 'तण्डुलान्पिनष्टि' 'पिष्टानि संवपति' इत्यादिषु किमवघातादिभ्योऽपूर्वमस्ति न वेति संशयः । तदर्थं चेत्थं चिन्त्यते किमवघातार्था व्रीहयः, उत व्रीह्यर्थोऽवघात इति । यद्यवघातार्था व्रीहयस्तर्हि तत्साधनकावघातस्य दृष्टप्रयोजनाभावादस्त्यपूर्वम् । यदि तु व्रीह्यर्थोऽवघातस्तर्हि दृष्टवैतुष्यद्वारैव व्रीह्यर्थत्वादवघातस्य नास्त्यपूर्वमिति फलति । तत्रावघातार्था व्रीहय इत्येव युक्तम् । न च अग्निमाधिकरणे द्वितीयायाः साध्यत्वार्थकतया तत्सहितविधिबलाद्वितीयान्तार्थस्य शेषित्वमिति वक्ष्यते; तत्रायेनेहापि द्वितीयाश्रुत्या व्रीह्यर्थत्वमेवावघातस्य युक्तमिति वाच्यम् । अवघातस्य हि दृष्टवैतुष्यार्थत्वे तस्य लोकत एव प्राप्तत्वेन तत्साफल्यायावश्यं प्रकृतेऽपूर्वं कल्पनीयम् । तच्च यदि व्रीहिद्रव्यात्कल्प्येत तदा-

३. कर्मणां गुणप्रधानभावविभागाधिकरणम् ।

1. उपकृतयागतः—क, ग, घ.

वघातस्य व्रीह्यर्थत्वमदृष्टद्वारैव वाच्यम् । द्रव्यादपूर्वमिति वदता अवघातविशिष्टद्रव्यस्य [1]विधेयत्वेन वाच्यतया दृष्टद्वारा अवघातस्य द्रव्यार्थत्वे द्रव्यविशेषणतया अवघातविधिवैयर्थ्यापत्तेः । एवं च व्रीह्यर्थत्वे अवघातस्य द्रव्यादेकमदृष्टमवघातादेकमित्यदृष्टद्वयकल्पनाप्रसङ्गात् द्वितीयाश्रुत्यवगतमपि व्रीह्यर्थत्वं परित्यज्य 'सक्तून्जुहोति' इत्यत्रैव द्वितीयायास्तृतीयार्थलक्षकत्वाश्रयणेन अवघातार्थो व्रीहय इति युक्तमाश्रयितुम् । एवं पेषणादिवाक्येष्वप्यूह्यम् । इति प्राप्ते, सिद्धान्तयति—

तानि द्वैधं गुणप्रधानभूतानि ॥ ४ ॥

'येषां तूत्पत्तावर्थे' इति पूर्वसूत्रोपात्तान्याख्यातानि तच्छब्दः परामृशति । तान्याख्यातानि गुणप्रधानभूतानि गुणं प्रधानं च कर्म प्रकृत्यंशाभिधेयत्वेन प्राप्तानि द्वैधं द्वेधा । भवतेः प्राप्त्यर्थाच्चौरादिकात् 'गत्यर्थाकर्मक' इत्यादिना क्तप्रत्यये 'आ धृषाद्वा' इति णिजभावे रूपम् । 'द्वित्र्योश्च धमुञ्' इति विधार्थे द्वैधमिति रूपम् । अल्पाच्तरत्वाद्गुणशब्दस्य पूर्वनिपातः ॥

प्रधानभूतानि तावदर्शयति—

यैर्द्रव्यं न चिकीर्ष्यते तानि प्रधानभूतानि द्रव्यस्य गुणभूतत्वात् ॥ ५ ॥

'प्रयाजान्यजति' इत्यादिषु यैः यदभिधेयैः प्रयाजादिभिः तदीयमाज्यादिद्रव्यं दृष्टधर्मवत्तया न चिकीर्ष्यते नोत्पादयितुमिष्यते तानि आख्यातानि प्रधानभूतानि द्रव्यापेक्षया तत्साध्यत्वेन प्रधानभूतकर्मप्रतिपादकानि । कुत एतत् । द्रव्यस्य गुणभूतत्वात् आज्यादिद्रव्यस्य प्रयाजादिदृष्टकार्यनिर्वर्तकतया तद्गुणभावं प्राप्तत्वात्; द्रव्यार्थत्वे प्रयाजादीनां तददृष्टस्य द्रव्यादृष्टस्य च कल्पनापत्तेः ॥

गुणभूतानि दर्शयति—

यैस्तु द्रव्यं चिकीर्ष्यते गुणस्तत्र प्रतीयेत तस्य द्रव्यप्रधानत्वात् ॥ ६ ॥

तुशब्दः पूर्ववैषम्ये । 'व्रीहीनवहन्ति' इत्यादिषु यैः यदभिधेयैरवघातादिभिः व्रीह्यादिद्रव्यं वैतुष्यादिदृष्टधर्मवत्तया चिकीर्ष्यते उत्पादयितुमिष्यते, तत्र तेष्ववहन्त्यादिषु गुणः, जातावेकवचनम्, अवघातादि द्रव्यं प्रति गुणः तत्साधनतया प्रतीयेत । कुतः । तस्य अवघातादेः द्रव्यप्रधा-

1. विधेयतायाः- क, घ, ङ.

त्वात् दृष्टवैतुष्यद्वारा व्रीह्यादिद्रव्यार्थत्वात्॥ न च अवघातादेर्दृष्टवैतुष्यार्थत्वे द्रव्यादवघातादित्र्यापूर्वकल्पनागौरवमिति वाच्यम्। तदा ह्यदृष्टद्वयकल्पना यदि व्रीह्यादिद्रव्यमवघातादिविशिष्टमिह विधीयत इत्युच्यते। नैवमस्ति। क्रत्वर्थतया प्राप्तमेव व्रीह्यादिद्रव्यमुद्दिश्यावघातादिमात्रं विधीयते। अतो न द्रव्यादृष्टकल्पनाप्रसक्तिः। नाप्यवघातादेर्व्रीह्यादिद्रव्यार्थतानिर्वाहायापूर्वकल्पना, दृष्टवैतुष्यद्वारैव तत्संभवात्। एवं च सति नैकस्याप्यपूर्वस्य कल्पनाप्रसक्तिः। न चैवं सत्यवघातादेर्दृष्टवैतुष्यादिदृष्टार्थत्वस्य लोकत एव सिद्धत्वाद्विधिवैयर्थ्यमिति वाच्यम्, नखविदलनव्यावृत्त्यादिफलकनियमविधानार्थत्वात्। न चैवमपि नियमादृष्टस्य कल्पनीयत्वात्को विशेष इति वाच्यम्, व्रीह्यादिसाधनकावघातादिविधावपि सर्वे द्रव्यविधयो नियमविधय इति चातुर्थिकन्यायेन विशेषणभूतव्रीह्यादिद्रव्यविधेर्नियमार्थतया नियमादृष्टस्यावर्जनीयत्वात्। एवं च व्रीह्यादिसाधनकावघातादेर्दृष्टप्रयोजनाभावादपूर्वार्थतायामवघातादितो[1] व्रीह्यादिद्रव्याच्चापूर्वद्वयकल्पना स्यात्। व्रीह्याद्यर्थावघातादिविधौ तु नियमादृष्टमात्रकल्पनेति लाघवम्। न चैवं नियमादृष्टरूपापूर्वसद्भावान्नास्त्यपूर्वमिति कथमुच्यत इति वाच्यम्, नियमादृष्टस्य क्रियाफलानुनिष्पाद्यत्वेन तस्य फलत्वव्यवहारायोग्यत्वात्। अवघातादितोऽपूर्वं नास्तीत्यनेन फलत्वेनापूर्वाभावस्य विवक्षितत्वादिति दिक्। इति तानिद्वैधाधिकरणम्॥

४. संमार्जनादीनामप्रधानताधिकरणम्।

दर्शपूर्णमासयोः श्रूयते 'स्रुचः संमार्ष्टि' इति। किमयं स्रुचां संमार्गः प्रयाजादिवत्प्रधानकर्म, उत गुणकर्मेति संशयः। पूर्वस्मिन्नधिकरणे दृष्टोपकारकं गुणकर्म अदृष्टोपकारकं प्रधानकर्मेत्युक्तम्। प्रक्षाल्य दर्भेष्वासादितानां स्रुचां वेदाख्यदर्भमुष्टिविशेषाग्रैः संमार्गतो न कंचिद्दृष्टोपकारं पश्यामः। अतः प्रधानकर्मत्वमेव संमार्गस्य प्राप्तम्। यदि च गुणकर्म स्यात्तर्हि दृष्टोपकारकत्वस्य गुणकर्मलक्षणस्य तत्राव्याप्तिः स्यात्, दृष्टोपकाराभावात्। अदृष्टोपकारकत्वस्य प्रधानकर्मलक्षणस्यातिव्याप्तिश्च, अदृष्टोपकारकत्वात्। न च 'कर्तुरीप्सिततमं कर्म' 'कर्मणि द्वितीया' इति व्याकरणस्मृत्या साध्यत्वे विहितया द्वितीयया स्रुचामेव प्राधान्यावगतेः कथं संमार्गस्य प्रधानकर्मतेति वाच्यम्। न हि साध्यत्वं द्वितीयार्थ इति व्याकरणतो गम्यते, ईप्सिततमत्वस्यैव ततोऽवगतेः। व्यभिचाराच्च न साध्यत्वं द्वितीयार्थः। लोके हि तावत् 'बल्बजाञ्छिखण्डकान्कुरु' इत्यस्ति प्रयोगः। बल्बजैस्तृणविशेषैः शिखण्डकान्कुर्विति गम्यते। तत्र बल्बजानां सिद्धतया साध्यत्वाभावेऽपि द्वितीया दृश्यते। अतो व्यभिचाराच्च साध्यत्वं द्वितीयार्थः। प्रत्युत साधनत्वमेवाव्यभिचारादितीयार्थः, बल्बजानां शिखण्डकसाधनत्वात् 'सक्तूञ्जुहोति' इत्यत्र सक्तूनां च होमसाधनत्वात्। न च 'कटं करोति' 'घटं करोति' इत्यादौ कटादेरसिद्धस्य साधनत्वासंभवाद्व्यभिचारात्साधन-

1. अपूर्वार्थतयावघातादितो—क, घ.

त्वमपि न द्वितीयार्थ इति वाच्यम्। 'एवमाकारः कटादिः कर्तव्यः' इति बुद्धावुल्लेखानन्तरमेव तत्र कृतेरुत्पत्त्या बुद्धिस्थत्वेन तस्यापि साधनत्वसंभवात्। ततश्च स्रुगादिसाधनसंमार्गविधानाद्दृष्टोपकाराभावाच्च प्रधानकर्मत्वमेव संमार्गस्येति पूर्वपक्षयति—

धर्ममात्रे तु कर्म स्यादनिर्वृत्तेः प्रयाजवत् ॥ ७ ॥

तुशब्दोऽवधारणे। तथा मात्रशब्दोऽपि। 'मात्रं कात्स्न्र्येऽवधारणे' इत्यमरः। धर्मः अदृष्टार्थं कर्म। धर्म एव धर्ममात्रम्। मयूरव्यंसकादित्वात्समासः। अथवा 'संशयमात्रमेतत्' इत्यत्र महाभाष्ये मात्रशब्दः अताच्त्विकत्वे दृष्टः। अताच्त्विकत्वमप्रामाणिकत्वम्। इह तु प्रत्यक्षप्रमाणागोचरत्वरूपमदृष्टत्वं विवक्षितम्। अदृष्टो धर्मो धर्ममात्रम्। पूर्ववत्समासः। दृष्टोपकाररहितमदृष्टार्थं कर्म धर्ममात्रं केवलादृष्टार्थं कर्म, न तु स्विष्टकृद्वदुभयरूपमित्युक्तं भवति। तथाविधसंमार्गविधायकवाक्ये संमार्गः प्रयाजवत्प्रधानकर्म स्यात्, न तु गुणकर्म। कुतः। अनिर्वृत्तेः दृष्टस्योपकारस्य संमार्गादनुत्पत्तेः। एवम् 'व्रीहीन्प्रोक्षति' 'आज्यमुत्पुनाति' 'हविरभिमृशति' 'गार्हपत्यमुपतिष्ठते' इत्यादिष्वप्यूह्यम् ॥

सिद्धान्तयति—

तुल्यश्रुतित्वाद्वेतरैः सधर्म स्यात् ॥ ८ ॥

वाशब्द एवार्थे। संमार्गादितरैः अवघातादिभिः सधर्म स्यात्। समानः साधारणो धर्मः यस्य तत् सधर्म। 'धर्मादनिच्केवलात्' इत्यनिच् समासान्तः। गुणकर्मेत्युक्तं भवति। कुतः। तुल्यश्रुतित्वात्। तुल्या द्वितीया श्रुतिर्यस्य तत्तुल्यश्रुति, तस्य भावस्तत्त्वम्, तस्मात्तुल्यश्रुतित्वात् ॥ अयमाशयः। 'कर्तुरीप्सिततमं कर्म' इति सूत्रतो यद्यपि न साध्यत्वं द्वितीयार्थ इति लभ्यते, तथापि 'तथा युक्तं चानीप्सितम्' इति सूत्रात्तल्लाभः। यथा ईप्सिततमं साध्यरूपापन्नं सत् क्रियया युज्यते, तथा अनीप्सितमपि साध्यरूपेण क्रियायुक्तं कर्मसंज्ञं स्यात्। ईप्सितानीप्सितसाधारणं साध्यत्वमेव कर्मत्वम्, तत्र द्वितीयेत्युक्तं भवति। न चैवं सति साध्यं कर्मेत्येतावतैव सिद्धावीप्सितानीप्सितयोः पृथगुपादानमनर्थकमिति वाच्यम्। एवं सति 'अग्रेर्माणवकं वारयति' इत्यत्र माणवकस्य कर्मसंज्ञापवादेन 'वारणार्थानामीप्सितः' इत्यपादानत्वापत्तौ, 'पुष्पाणि स्पृहयति' इत्यत्र च पुष्पाणाम् 'स्पृहेरीप्सितः' इति संप्रदानत्वापत्तौ, तन्निवृत्तये प्रकृष्टेप्सितस्य कर्मसंज्ञाविधानाय 'कर्तुरीप्सिततमं कर्म' इत्यस्यावश्यकत्वे सति 'विषं भुङ्क्ते' 'ग्रामं गच्छंस्तृणं स्पृशति' इत्यादौ द्वेष्योपेक्ष्ययोरपि संग्रहार्थम् 'तथायुक्तं चानीप्सितम्' इत्यस्यापि आवश्यकत्वात्। न च

साध्यं कर्मेति पक्षेऽपि 'अक्षान्दीव्यति' इत्यत्र द्वितीयायाः साधनत्वे 'अधिशेते अधितिष्ठति अध्यास्ते वा वैकुण्ठं हरिः' इत्यत्र चाधिकरणत्वे लक्षणाया आवश्यकत्वादनीप्सितेऽपि लक्षणा किं न स्यादिति वाच्यम्। तत्साधारणप्रवृत्तिनिमित्तस्य केनापि वक्तुमशक्यत्वेन तत्रागत्या लक्षणास्वीकारेऽपि संभवन्मात्रविषयानुगमस्य त्यक्तुमनुचितत्वात्। दृष्टश्च लोके साध्यत्वे द्वितीयायाः प्रयोगः 'कटं करोति' इत्यादौ। न ह्यत्र साधनत्वं द्वितीयार्थ इति शक्यते वक्तुम्, असिद्धत्वात्। न च बुद्धिस्थत्वेन साधनत्वसंभवः। बुद्धिस्थत्वं हि बुद्धौ विषयत्वमात्रम्, न तु वस्तुसद्भावः। अतः कथं तन्मात्रेण सिद्धत्वनियतं साधनत्वं संभवति। तथा वेदेऽपि 'व्रीहीनवहन्ति' इत्यादौ वैतुष्यादिविशिष्टत्वेन साध्ये व्रीह्यादौ द्वितीया प्रयुज्यते। ततश्च प्रयोगानुगृहीतव्याकरणानुसारेण साध्यत्वमेव द्वितीयार्थ इत्यध्यवस्यामः। यदि च द्वितीयायाः साधनत्वमर्थः स्यात्तर्हि 'परशुना च्छिनत्ति' इत्यत्र परशुशब्दाद्वितीया स्यात्; करणत्वे तृतीयाविधानं चानर्थकं स्यात्। न च साध्यत्वोपलक्षितसाधनत्वं द्वितीयार्थ इति नोक्तदोषः, परशोस्तत्र सिद्धरूपत्वादिति वाच्यम्। लाघवेन साध्यत्वस्यैव द्वितीयावाच्यत्वोपपत्तेः। ननु द्वितीयायाः साध्यत्वार्थकत्वेऽपि स्रुगादीनां शेषित्वप्रत्यायकाभावात्कथं संमार्गादीनां गुणकर्मत्वम्, गुणकर्मत्वस्य पारार्थ्यलक्षणशेषत्वनियतत्वात्। पारार्थ्यं परोद्देशप्रवृत्तकृतिव्याप्यत्वम्। तच्च समीहितपुरुषव्यापारगोचरीभूतेन येन समीहितं साध्यते तत्त्वम्। समीहितपुरुषव्यापारोद्देश्यसमीहितत्वं च शेषित्वम्। न चैतत्साध्यत्वाभिधायिन्या द्वितीययोच्यत इति वक्तुं शक्यते। सत्यं न शेषित्वं द्वितीयायाः साक्षात्प्रतिपाद्यम्, किंतु विधित एव तद्गम्यम्। तत्र द्वितीयायाः साहायकमात्रम्। तच्च साध्यत्वाभिधायित्वेऽपि संभवति। प्रवर्तनालिका शब्दभावना हि विधिः। प्रवृत्तिहेतुर्व्यापारः प्रवर्तना। तथा च न समीहितसाधनादन्यत्र चेतनः प्रवर्तयितुं शक्यत इति विधिः स्वस्य प्रवर्तनात्वसिद्धयर्थं स्वभाव्याया अर्थभावनायाः कर्तृव्यापारात्मिकायाः समीहितभाव्यकत्वं गमयन्भावनाकरणत्वञ्च समीहितोद्देशप्रवृत्तकर्तृव्यापारगोचरत्वं गमयति। तत्र भाव्यं सामान्यात्मना भावनयावगतं तद्विशेषरूपेण तु स्रुगादिपदैरवगम्यत इति न तद्वैयर्थ्यम्। ततश्च समीहितत्वं साध्यत्वं चेति द्वयं शेषित्वबोधेऽपेक्षितम्। तत्र द्वितीयया साध्यत्वं विधिबलाच्च समीहितत्वं गम्यत इति द्वितीयासधीचीनाविधितः शेषित्वबोधः संभवति। ननु विधिना समीहितं बोध्यत इत्युक्तम्; स्रुगादीनां क्रतुसाधनत्वेन समीहितत्वस्य सिद्धत्वात्, स्वतश्च तेषामसमीहितत्वात्, स्रुगादिसमीहितमित्येवंरूपेण बोधने कर्मपदरहितसंमार्गविधेरसामर्थ्यादिति चेत्, नैष दोषः। यद्धि वस्तुतः समीहितं स्रुगादि तस्य संमार्जनादिक्रियोद्देश्यत्वमेव विधिना बोध्यते। एवं च क्रतुसाधनत्वेनेच्छाविषयस्यापि स्रुगादेरुद्देश्यत्वं विना परोद्देशप्रवृत्तकृतिव्याप्यत्वलक्षणपारार्थ्यं संमार्गादेर्न संभवतीति तत्सिद्धयर्थं विधिगम्यं समीहितत्वमुद्देश्यत्वपर्यन्तमाद्रियते, न त्विच्छाविषयत्वमात्रमिति न दोषः। यत्र तु साध्यत्ववाचिद्वितीया नास्ति

'यजेत स्वर्गकामः' इत्यादौ तत्र साध्यत्वमुद्देश्यत्वं च द्वयमपि विधित एवावगम्यत इति ध्येयम् । 'बल्बजाञ्छिखण्डकान्कुरु' इत्यादौ च बल्बजादीनां शिखण्डकाद्याकारेण साध्यत्वान्न व्यभिचारः ।

कथं तर्हि 'सक्तून्जुहोति' इत्यत्र द्वितीयानिर्वाह इत्याशङ्क्य निराकरोति—

द्रव्योपदेश इति चेन्न तदर्थत्वाल्लोकवत्तस्य च शेषभूतत्वात् ॥ ९ ॥

सक्तुद्रव्यस्य होमं प्रति साधनत्वेन गुणभूतस्य द्वितीयया उपदेशः कथमिति चेत्, तन्न । कुतः । तदर्थत्वात् । सक्तुद्रव्यस्य होमार्थत्वात होमं प्रति साधनत्वेन शेषतया भाव्यत्वाभावेन तस्य द्रव्यस्य तच्छेषित्वासंभवात् । यद्धि विधिव्यापारं विनैव पुरुषस्य समीहितं तस्य विधीयमानसाधनं प्रत्युद्देश्यत्वमात्रं विधिगम्यम् । न च सक्तुद्रव्यं प्रमाणान्तरेणाभिलषितं येन विधित उद्देश्यत्वसिद्धिमाश्रित्य भाव्यतयान्वीयेत । नैतदस्ति, सक्तुद्रव्यस्य भूतोपयोगित्वेन प्रतिपाद्यतया वा भाव्युपयोगित्वेन क्रतुसाधनतया वा अभिलषितत्वाभावात् । अतो भाव्यत्वेनान्वयासंभवेन साधनत्वेनैव सक्तुद्रव्यस्यान्वयो वाच्यः । द्वितीया च लक्षणया तत्र निर्वाह्या, आरोपितसाध्यत्वविवक्षया वा । अत एव 'विवक्षातः कारकाणि भवन्ति' इत्याश्रित्य 'स्थाली पचति' 'परशुश्छिनत्ति' इत्यादि साधितं महाभाष्यादौ । स्रुगादेस्तु क्रतुसाधनरूपेणाभिलषितस्य विधीयमानसंमार्गं प्रत्युद्देश्यत्वं विधिगम्यमवलम्ब्य संमार्गभावनायां समीहितभाव्याकाङ्क्षिण्यां भाव्यत्वेनान्वय उचितः । ननु स्रुगादेः साध्यत्वं न स्वरूपेण संभवति नाप्युपकारकत्वेन, अवहननादिजन्यवैतुष्यरूपोपकारवदिहोपकारानुपलब्धेः इत्यत आह—तस्य चेति । तस्य च स्रुगादेः शेषभूतत्वात् अदृष्टोपकारद्वारा साधकं संमार्गं प्राप्तत्वात् । अदृष्टोपकारविशिष्टत्वेन स्रुचां संमार्गसाध्यत्वादिति यावत् । अदृष्टोपकारास्तित्वे दृष्टान्तयति—लोकवदिति । यथा लोके नागरिकाणां राजतदमात्यादीनां ग्राममभ्यागतानां नीराजनरूपपर्यग्निकरणेनादृष्टोपकारः क्रियते तद्वत् । न च संमार्गस्य गुणकर्मत्वे प्रधानगुणकर्मलक्षणस्य तत्राव्याप्तिव्याप्ती स्यातामिति वाच्यम् । न हि 'यैर्द्रव्यं न चिकीर्ष्यते' इत्यादिना सूत्रभागेन प्रधानगुणकर्मणोर्लक्षणे उच्येते, अनपेक्षितार्थत्वप्रसङ्गात् । अपूर्वसद्भावासद्भावविषयविवेचनमेव हि तत्र क्रियते, दृष्टोपकारिष्वपूर्वं नास्ति तदन्यत्र त्वस्तीति तावन्मात्रस्यैव भावार्थाधिकरणापवादत्वेन प्रतिपित्सितत्वात् । तथा च दृष्टोपकारि गुणकर्मापूर्वानाधायकम्, अदृष्टोपकारि तु प्रधानकर्मापूर्वाधायकमिति तदर्थः पर्यवस्यतीति न दोषः । फलभावनाकरणयागादिसाधनद्रव्यगतदृष्टादृष्टान्यतरसंस्कारजनकं कर्म गुणकर्म, यथा अवघातादि संमार्गादि च । फलभावनाकरणयागादौ द्रव्यनैरपेक्ष्येण साक्षादपूर्वाधायकं कर्म प्रधानकर्मेति तु तल्लक्षणे बोध्ये ।

तस्मात्संमार्गादि गुणकर्मेति सिद्धम्। प्रयोजनं पूर्वपक्षे स्रुग्भिः साधनैर्यस्य कस्यचित्संमार्गः, 'वेदाग्रेण स्रुचः संमार्ष्टि' इति तु संमार्गान्तरम्; सिद्धान्ते त्वेकमित्यागूह्यम्। इति संमार्गाधिकरणम्॥

सन्ति ज्योतिष्टोमे स्तोत्राणि 'बहिष्पवमानेन स्तुवते' 'आज्यैः स्तुवते' 'माध्यंदिनेन पवमानेन स्तुवते' 'पृष्ठैः स्तुवते' 'आर्भवपवमानेन स्तुवते' 'यज्ञायज्ञीयेन स्तुवते' इति। सन्ति च शस्त्राणि 'आज्यं शंसति' 'प्रउगं शंसति' 'मरुत्वतीयं शंसति' 'निष्केवल्यं शंसति' वैश्वदेवं शंसति' 'आग्निमारुतं शंसति' इति होतुः षट् शस्त्राणि। तथा मैत्रावरुणब्राह्मणाच्छंस्यच्छावाकानामेकैकस्य द्वे द्वे इति षट् शस्त्राणि। प्रगीतमन्त्रसाध्यगुणिनिष्ठगुणाभिधानं स्तोत्रम्। अप्रगीतमन्त्रसाध्यगुणिनिष्ठगुणाभिधानं शस्त्रम्। अभिधानं शाब्दबोधः। वस्तुतस्तु गुणिनि गुणसंबन्धाभिधायकप्रगीतमन्त्रोच्चारणं स्तोत्रम्, अप्रगीततथाविधशब्दोच्चारणं शस्त्रम्। तदेतानि स्तोत्रशस्त्राणि च किं स्तुत्यदेवताप्रकाशनरूपसंस्कारार्थानि गुणकर्माणि, उत अदृष्टार्थत्वात्प्रधानकर्माणीति संशयः। तत्र पूर्वपक्षयति— ५. स्तोत्रादिप्राधान्याधिकरणम्।

स्तुतशस्त्रयोस्तु संस्कारो याज्यावद्देवताभिधानत्वात्॥ १०॥

स्तुतेति भावे क्तः। कर्तरि षष्ठी। स्तोत्रत्वेन शस्त्रत्वेन चानुगमाद्विवचनम्। शाब्दबोधविशेषात्मकस्तोत्रशस्त्रकर्तृकः प्राकट्यापरनामधेयज्ञाततात्मकः प्रकाशनरूपः संस्कारः कर्मसमवेते इन्द्रादौ स्यात्। कुतः। देवताभिधानत्वात् 'अभि त्वा शूर नोनुमः' इत्यादिमन्त्राणामिन्द्रादिदेवतागुणवर्णनपराणामपि मुख्यतात्पर्यविधया तद्देवताभिधायित्वात्[1]। गुणप्रकाशकानामप्येषां गुणिप्रकाशन एव तात्पर्यादिति यावत्। यथा 'अग्निर्मूर्धा दिवः' इत्यादियाज्यासु मूर्धत्वादिगुणप्रकाशने सत्यपि न तत्र तात्पर्यम्, किंतु गुणिप्रकाशन एव तात्पर्यम्; तद्वदिहापि गुणप्रकाशनमतन्त्रीकृत्य तन्मुखेन गुणिप्रकाशन एव तात्पर्यं दृष्टार्थत्वायाभ्युपेयम्। गुणसंबन्धकीर्तनमात्रेण स्तुतित्वं चोपपद्यते। तुशब्दोऽनन्तरोक्तसंमार्गादिवैषम्ये। संमार्गादि तावत्सुगादावपूर्वाधायकम्, स्तुतशस्त्रे तु देवतासु प्रकाशनरूपदृष्टसंस्काराधायके। तस्माद्गुणकर्मणी स्तोत्रशस्त्रे इति। अथवा स्तुतशस्त्रयोरिति विषयनिर्देशः। स्तुतं गुणगुणिसंबन्धाभिधायकप्रगीतशब्दोच्चारणम्। अप्रगीततथाविधशब्दोच्चारणं शस्त्रम्। स्तुतत्वेन शस्त्रत्वेन चानुगमाद्विवचनम्। 'बहिष्पवमानेन स्तुवते' इत्यादिवाक्ये 'आज्यं शंसति' इत्यादिवाक्ये चेति यावत्। संस्कारो [2]दृष्टः प्रकाशनरूपः इन्द्रादिषु गम्यत इति व्याख्येयम्। देवताभिधानत्वादिति तु पूर्ववद्व्याख्येयम्। युक्तं चैतत्। स्तौतिशंसत्योः शाब्दबोधप्रधानत्वे हि

1. अभिधायकत्वात्—क, घ. 2. दृष्टप्रयोजनरूपः—ख.

तत उत्पद्यमानस्य दृष्टसंस्कारस्येन्द्रादिदेवतास्वदर्शनेन पूर्वपक्षानुन्मेषः स्पष्ट एव। न च प्रकाशनमेव तत्र दृष्टसंस्कार इति वाच्यम्। तस्य शाब्दबोधादनन्यत्वेन तत उत्पत्त्यनुपपत्तेः। शाब्दबोधात्प्राकटयापरनामधेयज्ञाततारूप्यदृष्टसंस्कारो देवतासु स्यादिति व्याख्यानं तु क्लिष्टमेव, ज्ञानविषयतातिरिक्तज्ञाततायाः सर्वासंमतत्वात्। किंच स्तौतिशंसत्योः प्रगीताप्रगीतमन्त्रसाध्यबोधपरत्वं वदन्प्रष्टव्यः—शाब्दबोधः किं श्रोतृगतो विवक्षितः प्रयोक्तृगतो वेति। नाद्यः, 'जानाति' 'बुध्यते' इत्याद्याख्यातस्य धात्वर्थज्ञानाश्रय इव गुणवत्त्वबोधाश्रये श्रोतर्यपि 'स्तौति' 'शंसति' इति प्रयोगापत्तेः। न चेष्टापत्तिः, 'अयं राजानं स्तौति; राजा च तत्स्तुत्या हृष्यति' इति स्तोतृहृष्यद्व्यक्तिभेदानुभवविरोधात्। न द्वितीयः; श्रोतृगतगुणविषयज्ञानस्य प्रयोक्तरि सत्त्वेऽपि श्रोतरि तदभावेन तस्य तत्कृतहर्षासिद्धेः, 'अभि त्वा शूर नोनुमः' इत्यादिमन्त्राणां संबोधनविभक्त्या इन्द्रादिदेवतां प्रति गुणवत्त्वज्ञापनपराणां शाब्दमर्यादया प्रयोक्तरि शाब्दबोधजननाक्षमताया मन्त्राधिकरणे निरूपितत्वाच्च; 'वन्दिनो राजानं गद्यपद्यैः शुकवत्स्तुवन्ति' इति शाब्दबोधशून्यानामपि प्रयोक्तृणां स्तोतृत्वप्रसिद्धेश्च; 'स्वस्त्यस्तु सखि ते जिह्वे विद्यादातुरुमापतेः। स्तवमुच्चतरं ब्रूहि जयतामिव दुन्दुभिः' 'जिह्वा काकतिवीररुद्रनृपतेः स्तोत्राय संनह्यति' इत्यादीनां स्तुतेरुच्चारणप्रधानत्व एव सामञ्जस्याच्च। अत एवैतदधिकरणारम्भे 'गुणवचनं स्तवनं शंसनं च' इति भाष्यम्, 'गुणगुणिसंबन्धकीर्तनं च स्तुतिः' इति वार्तिकम्, 'शब्दोच्चारणमात्रस्य स्तुतित्वाव्यपदेशात्' इति तदनन्तरवार्तिकम्, 'अभिधानरहितशब्दोच्चारणायां स्तुतित्वं हीयते' इत्यर्थ इति न्यायसुधा च संगच्छते। अभिधानरहितशब्दोच्चारणस्य स्तुतित्वाभावोक्त्या अभिधानघटितशब्दोच्चारणं स्तुतिरिति लभ्यते। न चैवमुच्चारणस्य स्तुतित्वेऽपि 'कवतीषु स्तुवते' इति कथं कवतीनामृचां स्तुत्याधारता, उच्चारणस्य पुरुषनिष्ठत्वेनाक्षरनिष्ठत्वाभावादिति वाच्यम्। न हि केवलं शब्दोच्चारणमेव स्तुतिः। किंतु गुणगुणिसंबन्धाभिधायकशब्दोच्चारणमेव सा। तत्र विशेषणीभूतगुणगुणिसंबन्धाभिधानं च तत्प्रतीत्यनुकूलशब्दनिष्ठव्यापाररूपम्, 'शब्दोऽर्थमभिधत्ते' इति व्यवहारदर्शनात्। एवं च कवतीनामुच्चारणात्मकपुरुषव्यापाररूपविशेष्यांशाधारत्वाभावेऽपि विशेषणीभूतगुणगुणिसंबन्धाभिधानरूपशब्दनिष्ठव्यापाराधारत्वमादाय सप्तमी युज्यते प्रयोक्तुम्। उक्तं च वार्तिके 'गुणगुणिसंबन्धाभिधानक्रियाया अक्षरारूढत्वात्कवतीष्विति सप्तमी युज्यते' इति। विवृतं चेदं न्यायसुधायाम् 'गुणवत्त्वज्ञापनं स्तुतिः। ज्ञापनं च ज्ञानहेतुर्व्यापारः। स चाक्षराणामभिधानाख्यः, पुरुषस्याप्यभिधायकाक्षरोच्चारणाख्यः। तत्र पुंव्यापारेऽक्षराणामकर्तृत्वेनाधारत्वायोगेऽप्यभिधानाख्यव्यापारे विशेषणेऽक्षराणां कर्तृत्वेनाधारत्वात्तन्मुखेन पुंव्यापारोच्चारणाधारत्वं युक्तम्' इति। तस्माद्गुणगुणिसंबन्धबोधफलकप्रगीतशब्दोच्चारणं स्तुतिः। अप्रगीततदुच्चारणं शंसनम्। शाब्दबोधश्च श्रोतृनिष्ठ एव। इन्द्रादयश्चात्र श्रोतारः। तेषां च विग्रहादिपञ्चकं जैमिन्यभिमतमेवेति षष्ठे वक्ष्यते। एवं च शक्वीयाणा-

मृषामाद्यन्तवर्णसंधानं संगच्छते । शंसतेः प्रयोक्तृगतशाब्दबोधप्रधानत्वे हि पूर्वपूर्वस्या ऋचोऽर्थावबोधे व्याप्रतचित्तस्य प्रयोक्तुरुत्तरोत्तरस्या ऋचः सांतत्यानुपपत्तिरित्यादि मन्त्राधिकरणेऽवोचाम । तदेवमेतादृशे स्तुतशस्त्रे देवताप्रकाशनरूपदृष्टार्थे गुणकर्मणी ॥ इति प्राप्ते, सिद्धान्तयति—

अर्थेन त्वपकृष्येत देवतानामचोदनार्थस्य गुणभूतत्वात् ॥ ११ ॥

देवतानाम । इन्द्रादिपदम् तद्घटितमन्त्रकस्तुतशस्त्रयोर्विधानं देवतानामचोदना । सा अर्थेन इन्द्रादिप्रकाशनरूपप्रयोजनवशेन अपकृष्येत महेन्द्रग्रहयज्यादिसंनिधौ स्थिता स्वस्थानाच्च्यावयित्वा यत्रेन्द्रस्तत्रोत्कृष्येत पूषानुमन्त्रणवत् । कुतः । अर्थस्य गुणभूतत्वात् । निरूप्यनिरूपकभावे षष्ठी । इन्द्रादिदेवतारूपमर्थं प्रति तत्प्रकाशकमन्त्रस्तुतशस्त्रयोः शेषभूतत्वात् गुणानां च प्रधानानुसारित्वात् । प्रधानकर्मत्वे तु तयोः प्रयाजादिवददृष्टद्वारा क्रत्वर्थतया यागीयदेवतार्थत्वाभावान्नोत्कर्षः । अतो गुणकर्मत्वपक्षोऽनुपपन्न इति भावः ॥

अत्र पूर्वपक्षी प्रत्यवतिष्ठते—

वशावद्वा गुणार्थं स्यात् ॥ १२ ॥

वाशब्द उत्कर्षं निराचष्टे । न स्यादुत्कर्षः । कुतः । यतः 'माहेन्द्रं ग्रहं गृह्णाति' इत्यादिष्विन्द्रादय एव ग्रहयजिदेवताः । तत्र महत्त्वादिगुणकीर्तनार्थमेव महदादिपदम्, यथा 'राजा' 'महाराजः' इति । न हि राज्ञो महाराजोऽतिरिच्यते । अतोऽत्रैकदेशप्रकाशकः 'अभि त्वा शूर नोनुमः' इत्यादिमन्त्रो नासमवेतार्थकः वशावत् । 'सा वा एषा सर्वदेवत्या यदजा वशा वायव्यामालभेत' इत्यजावशाशब्दचोदिते कर्मणि 'छागाया वपाया मेदसोऽनुब्रूहि' इत्यादिनिगममन्त्रः समवेतो भवति, गुणस्याभेदकत्वात् । तद्वदिहापि । तथा चेन्द्रमहेन्द्रयोरभेदादिन्द्रप्रकाशनेऽपि महेन्द्रसंस्कारसंभवान्नोत्कर्ष इति भावः ॥

सिद्धान्ती परिहरति—

न श्रुतिसमवायित्वात्[1] ॥ १३ ॥

इन्द्रमहेन्द्रयोरभेदादनुत्कर्ष इति न, किंतु स्यादेवोत्कर्षः । कुतः । श्रुतिसमवायित्वात् । श्रुत्या विधिगतदेवतापदेनैव देवताया निगमानुवृत्त्या कर्मान्वयित्वात् । देवता हि न यत्किंचिच्छब्देन निगमेषु निर्देश्या, किंतु विधिवाक्यश्रुतशब्देनैवेति 'विधिशब्दस्य मन्त्रत्वे भावः स्यात्तेन

1. समवायत्वात्.

चोदना' इत्यत्र दशमे वक्ष्यते। तस्यायेन वस्तुत इन्द्रो महेन्द्रादभिन्नश्चेदपि महेन्द्रो निगमेषु महेन्द्रशब्देनैव निर्देश्य इतीन्द्रस्तुत्या महेन्द्रसंस्कारासंभवादुत्कर्षो भवेदित्यर्थः ॥

विधिगतशब्देनैव निगमेषु देवतोपलक्षणीयेत्यत्र युक्त्यन्तरमाह—

व्यपदेशभेदाच्च ॥ १४ ॥

'बहु दुग्धीन्द्राय देवेभ्यो हविः' इति 'बहु दुग्धि महेन्द्राय देवेभ्यो हविः' इति इन्द्रमहेन्द्रयोर्निर्देशभेदोऽस्ति। तत्र द्वेधा मन्त्रस्य तैत्तिरीयके पाठः। 'इन्द्राय देवेभ्यो हव्यम्' इत्यच्छिद्रमन्त्रसमाम्नाये। 'हविरिति वाचं विसृजते' इति ब्राह्मणे। विधिगतशब्देनैव निगमेषु देवतोपलक्षणमिति नियमाभावे ऐन्द्रयागे माहेन्द्रयागे चोभयोर्मन्त्रयोर्विकल्पः स्यात्। स चाष्टदोषदुष्टो नाश्रयितुमुचितः। उक्तनियमाश्रयणे तु मन्त्रयोस्तयोरैन्द्रमाहेन्द्रयागभेदेन व्यवस्थितत्वान्नायं दोषः। तस्मादिह स्यादुत्कर्षः ॥

उक्तनियमानाश्रयणे बाधकान्तरमाह—

गुणश्चानर्थकः स्यात् ॥ १५ ॥

विधिगतशब्दाच्छब्दान्तरेणापि निगमेषु देवतोपलक्षणे सति विधिवाक्ये गृह्यमाणो गुणः अनर्थक एव स्यात्, उक्तेऽनुक्ते च गुणे इन्द्रादेः कर्मसमवायसिद्धेः। उक्तनियमाश्रयणे तु विधिवाक्ये गुणग्रहणमर्थवत्।

उक्तनियमानाश्रयणे बाधकान्तरमाह—

तथा याज्यापुरोरुचोः ॥ १६ ॥

याज्यायाः पुरस्ताद्रोचते प्रकाशत इति पुरोरुक्पुरोनुवाक्या। पुरोरुक्च याज्या च याज्यापुरोरुचौ। अल्पाच्तरत्वाद्याज्याशब्दस्य पूर्वनिपातः। दर्शपूर्णमासयोः 'एन्द्रसानसिं रयिम्' 'प्रससाहिषे पुरुहूतशत्रून्' इत्यैन्द्रयाज्यानुवाक्ययोः 'महाꣳ इन्द्रो य ओजसा' 'भुवस्त्वमिन्द्र ब्रह्मणा महान्' इति माहेन्द्रयाज्यानुवाक्ययोश्च भेदेनाम्नानादपि तथा विधिगतशब्देनैव निगमेषु देवतोपलक्षणम्। अन्यथा द्वयोरपि युगलयोरुभयत्र विकल्पः स्यात्। तस्माद्विधिगतशब्देनैव देवतोपलक्षणमिति नियम आस्थेयः।

अथ यदुक्तम् 'वशावद्वा गुणार्थं स्यात्' इति तत्राह—

वशायामर्थसमवायात् ॥ १७ ॥

वशायाम् अजावशाशब्दचोदिते कर्मणि विधिगतवशाशब्दं परित्यज्य च्छागाशब्देन तदुपलक्षणं युक्तम् । कुतः । अर्थसमवायात् । वशाशब्दार्थे विशेषरूपे च्छागाशब्दस्य चोदकप्राप्तस्य सामान्यरूपेण समवायात् संभवात् । वशाशब्देन निगमेषु हविरुपलक्षणे चोदकबाधप्रसङ्गात् । इह तु माहेन्द्रविधिगतमहत्त्वगुणपरित्यागे बाधकं न किंचित्पश्यामः । तस्मान्माहेन्द्रमिन्द्रशब्दघटितमन्त्रकं स्तोत्रं शस्त्रं च प्रकाशयितुं न शक्नोतीत्युत्कर्षः स्यादेव । अतो न गुणकर्मत्वं स्तुतशस्त्रयोः, किंतु प्रधानकर्मतैव ॥

स्यादेतत् । गुणकर्मतैव स्तुतशस्त्रयोरस्तु । न चैवं सति माहेन्द्रग्रहयजिसंनिधावाम्नातैन्द्रमन्त्रकस्तोत्रशस्त्रयोरुत्कर्षः स्यादिति वाच्यम् । इष्टापत्तेः । न च क्रमसंनिध्योर्बाधः शङ्क्यः, ऐन्द्रमन्त्रस्य महेन्द्रप्रतिपादनासमर्थत्वेन यत्रेन्द्रस्तवोत्कर्षस्य सामर्थ्यरूपलिङ्गवशेन क्रमसंनिधी बाधित्वा अश्रयितुं युक्तत्वात् । लिङ्गस्य क्रमसंनिध्यपेक्षया बलवत्तायास्तृतीये श्रुतिलिङ्गादिसूत्रे निरूपयिष्यमाणत्वादिति पूर्वपक्षी प्रत्यवतिष्ठते—

[1]यत्रेति वार्थवत्त्वात्स्यात् ॥ १८ ॥

वाशब्दः प्रत्यवस्थितौ । यत्रशब्देन तदादिवाक्यं लक्ष्यते । यत्रेन्द्रस्तत्रैन्द्रमन्त्रकस्तुतशस्त्रयोरुत्कर्षोऽस्त्विति ब्रूमः । कुतः । अर्थवत्त्वात् ऐन्द्रमन्त्रकस्तुतशस्त्रयोर्माहेन्द्रग्रहयजेरन्यत्रैव यागीयदेवताप्रकाशनसमर्थत्वेन प्रयोजनवत्त्वात् । अतः स्तुतशस्त्रयोर्गुणकर्मत्वमेव स्यात् ॥

नन्वैन्द्रादिमन्त्राणां येषामन्यत्र प्रयोजनं संभाव्यते तेषामुत्कर्षः संभाव्यताम् । येषां तु मन्त्राणां न प्रकृतकर्मसमवेतदेवताप्रकाशनमन्यत्र च नास्ति प्रयोजनं तेषां कथमुत्कर्षसंभवः । अतस्तेषामदृष्टार्थत्वमेवानिच्छताप्यभ्युपेयम् । यथा आग्निमारुतशस्त्रे 'याम्याः शंसति' 'पित्र्याः शंसति' इत्यादिविहिताः 'कुषुम्भकसूक्तं शंसति' 'अक्षसूक्तं शंसति' 'मूषकसूक्तं शंसति' इत्यादिविहिताश्च, तेषामदृष्टार्थत्वे च तन्न्यायेन इतरेषामपि सर्वेषां स्तुतशस्त्राणामदृष्टार्थत्वेन प्रधानकर्मतैवोचितेति सिद्धान्ती शङ्कते—

[2]न त्वाम्नातेषु ॥ १९ ॥

तुशब्दोऽवधारणे । आग्निमारुतादावाम्नातेषु केषुचिद्याम्यादिमन्त्रेषु प्रकृतकर्मणोऽन्यत्र नैवार्थवत्त्वमस्ति । अतः प्रकृतकर्मण्येवादृष्टार्थत्वं वक्तव्यम् । तन्न्यायेन सर्वेषामपीत्यर्थः ॥

---

1. यत्रेति. 2. नेदं दृश्यते क्वचिदन्यत्र.

पूर्वपक्षी परिहरति—

दृश्यते ॥ २० ॥

याम्यादीनामुत्कृष्टानामन्यत्रार्थवत्त्वं दृश्यत इत्यर्थः । याम्यपित्र्यादिमन्त्राणां यमयज्ञमहापितृयज्ञादौ संभवत्यर्थवत्त्वम् । मण्डूकसूक्तस्य महाग्निचयनेऽर्थवत्त्वम्, तत्र 'मण्डूकेन विकर्षति' इति विधानात् । अक्षसूक्तस्य राजसूयेऽर्थवत्त्वम्, तत्र 'अक्षैर्दीव्यति' इति विधानात् । मूषकसूक्तस्य यूपैकादशिन्यामर्थवत्त्वम्, तत्र 'आखुस्ते पशुरिति ब्रूयात्' इति विधानात् । कुषुम्भकसूक्तादीनां तु वाचःस्तोमे आश्विनशस्त्रे चार्थवत्त्वम्, 'सर्वा ऋचः सर्वाणि यजूंषि सर्वाणि सामानि वाचःस्तोमे पारिप्लवं शंसति' इति विधानात् । पारिप्लवं यथेष्टम् । 'यस्याश्विने शस्यमाने सूर्यो नाविर्भवति, सर्वा अपि दाशतयीरनुब्रूयात्' इति विधानाच्च । ऋग्वेदशाकलसंहिता बाष्कलसंहिता च दशतयमित्युच्यते दशमण्डलात्मकत्वात् । तत्रत्या ऋचो दाशतय्यः । न चाश्विनशस्त्रे वाचःस्तोमे चोत्कृष्टानामप्यदृष्टार्थत्वमेव स्यादिति वाच्यम् । क्वचिददृष्टार्थत्वे सत्यपि सत्यां गतौ तथाश्रयितुमनुचितत्वात् । तस्मादैन्द्रादिमन्त्राणां प्रकृतमहेन्द्रादिग्रहदेवताप्रकाशनेऽसामर्थ्येऽप्यन्यत्रोत्कर्षेणार्थप्रकाशनार्थत्वसंभवाद्गुणकर्मणी स्तुतशस्त्रे इति प्राप्ते, सिद्धान्ती गुणकर्मत्वे मुख्यदोषं ब्रुवन्प्रधानकर्मत्वं समर्थयते—

अपि वा श्रुतिसंयोगात्प्रकरणे स्तौतिशंसती क्रियोत्पत्तिं विदध्याताम् ॥ २१ ॥

अपि वेति पक्षव्यावृत्तौ । न गुणकर्मणी स्तुतशस्त्रे । कुतः । श्रुतिसंयोगात् । न हि स्तौतिशंसती गुणाभिधानमात्रे वर्तेते, किंतु प्राधान्येन गुणाभिधाने । अत एव 'देवदत्तो वक्रकेशान्तः' इति वक्तारं स्तोतारं व्यवहरन्ति लोके, न तु 'वक्रकेशान्तं देवदत्तमानय' इति वक्तारमपि । अतो गुणिप्रकाशनार्थत्वे 'स्तौति' 'शंसति' इति श्रुतिबाधप्रसङ्गादिह दृष्टप्रयोजनमपि गुणिदेवताप्रकाशनं परित्यज्यादृष्टार्थत्वमेवाश्रयितुं युक्तम् । एवं च सति प्रकरणे प्रकृत एव कर्मणि । कर्मणि ल्युट् । स्तौतिशंसती स्तुतिशंसने क्रियोत्पत्तिं स्वकार्यमदृष्टोत्पत्तिं विदध्यातां साधयेताम्, बाधकाभावात् । गुणिदेवताप्रकाशनार्थत्वे तु स्तौतिशंसती यत्र गुणिनी देवता तत्रैव स्वकार्यमर्थप्रकाशनं साधयेताम् । ततश्च लिङ्गमनुगृह्येत । श्रुतिस्तु बाध्येत । क्रमसंनिधी च बाध्येयाताम् । अदृष्टार्थत्वे तु माहेन्द्रग्रहयजावपि ऐन्द्रमन्त्रकस्तुतशस्त्रयोः समावेशसंभवान्न लिङ्गक्रमसंनिधीनामपि बाधः । नापि श्रुतेः । तस्मात्प्रधानकर्मणी एव स्तुतशस्त्रे ॥

1. नेदं दृश्यते क्वचिदन्यत्र.

तत्र युक्त्यन्तरमाह—

शब्दपृथक्त्वाच्च ॥ २२ ॥

'द्वादशस्तोत्रशस्त्रोऽग्निष्टोमः' इति संख्याशब्देन स्तोत्रशस्त्रकर्मणां पार्थक्यमवगम्यते। तच्चैतत्तदृष्टार्थत्वे घटेत। प्रकाशनार्थत्वे च प्रकाशनस्यैकत्वान्न संख्योपपद्येत। विशेषाश्रयणे च प्रत्यृचं प्रतिपदमिति प्रसज्येत। अदृष्टार्थत्वे त्वपूर्वभेदमादाय संख्योपपत्तिः। अथवा अर्थप्रकाशनार्थत्वे उत्कर्षापत्त्या द्वादशशब्देनावगम्यं पृथक्त्वं भेदो नोपपद्येत इति व्याख्येयम् ॥

इतोऽपि स्तुतशस्त्रे प्रधानकर्मणी इत्याह—

अनर्थकं च तद्वचनम् ॥ २३ ॥

गुणकर्मत्वे अग्निष्टुति 'आग्नेया ग्रहा भवन्ति' इति ग्रहचोदनयैवाग्नेयीनामृचां प्रकाशनार्थत्वस्य सिद्धतया 'आग्नेयीषु स्तुवते' इति पुनर्वचनम् अनर्थकं स्यात्। अदृष्टार्थत्वे त्वनाग्नेयीनामपि प्रकृतितः प्राप्तौ तन्निवृत्त्यर्थं तदावश्यकम्।

इतोऽपि ते प्रधानकर्मणी इत्याह—

अन्यश्चार्थः प्रतीयते ॥ २४ ॥

'स्तुतमनुशंसति' इति 'संबद्धे वै स्तोत्रशस्त्रे' इति च स्तुतशस्त्रयोः पौर्वापर्यसंबन्धवचनादपि दृष्टादन्योऽर्थः प्रतीयते। प्रकाशनरूपदृष्टार्थत्वे तस्यैकत्वेनैकार्थत्वाद्विकल्पापत्तौ पौर्वापर्यसंबन्धानुपपत्तेः ॥

इतोऽपि ते प्रधानकर्मणी इत्याह—

अभिधानं च कर्मवत् ॥ २५ ॥

'अग्निहोत्रं जुहोति' 'समिधो यजति' 'तनूनपातं यजति' इत्यादिप्रधानकर्मणीव द्वितीयया ईप्सिततमत्वाभिधानं दृश्यते 'पृष्ठान्युपयन्ति' 'प्रउगं शंसति' 'निष्केवल्यं शंसति' इत्यादि। तदेतददृष्टार्थत्व एवोपपद्यते। अदृष्टार्थत्वे हि सति क्रतुफलं प्रत्यदृष्टमात्रद्वारा प्रत्यासन्नसाधनत्वादीप्सिततमत्वम्, दृष्टार्थत्वे तु द्रव्यदेवतादिप्रणाडिकया कर्मफलं प्रति व्यवहितसाधनत्वान्नेप्सिततमत्वम्। अतोऽपि प्रधानकर्मतैव ॥

इतोऽपि स्तुतशस्त्रे प्रधानकर्मणी इत्याह—

फलनिर्वृत्तिश्च[1] ॥ २६ ॥

'स्तुतस्य स्तुतमसि' 'शस्त्रस्य शस्त्रमसि' इति मन्त्रयोः 'इन्द्रियावन्तो वनामहे धुक्षीमहि प्रजामिषम्, सा मे सत्याशीर्देवेषु भूयाद्ब्रह्मवर्चसं मा गम्यात्' इति स्तुतशस्त्रे प्रति फलनिष्पत्तिः प्राप्यते। तदिदं स्तुतशस्त्रयोः प्रधानकर्मत्वे घटते। देवताप्रकाशनार्थत्वे तु देवतां प्रत्येव फलं प्राप्येत, 'न स्वामिनि स्थिते कश्चिद्दासान्प्रार्थयते फलम्' इति न्यायात्। तस्मात्प्रधानकर्मणी स्तुतशस्त्रे अदृष्टार्थे। प्रयोजनं पूर्वपक्षे उत्कर्षः, सिद्धान्ते त्वनुत्कर्ष इति स्पष्टमेव। प्रयोजनान्तरमपि दशमस्य चतुर्थे 'ग्रहाणां देवतान्यत्वे स्तुतशस्त्रयोः कर्मत्वादविकारः स्यात्' इत्यत्र वक्ष्यते ॥ इति स्तुतशस्त्राधिकरणम् ॥

'तानि द्वैधं गुणप्रधानभूतानि' इत्याख्यातानां द्वैविध्यमुक्तम्। तत्प्रसङ्गात्तृतीयमपि प्रकारान्तरमनुवादकत्वरूपं केषांचिदाख्यातानां निरूपयितुमिदमारभ्यते। सन्ति कानिचिदाख्या-

६. मन्त्राविधायकत्वाधिकरणम्।

तानि मन्त्रब्राह्मणगतानि यच्छब्दमध्यमोत्तमपुरुषयदिशब्दादियुक्तानि। 'देवांश्च याभिर्यजते ददाति च, ज्योगित्ताभिः सचते गोपतिः सह' इति काम्यपशुयाज्याकाण्डे गोदेवत्यपश्वर्थतया पठितो मन्त्रः। याभिर्गोभिर्देवान्यजति याश्च ददाति ताभिर्गोभिः गोपतिः यजमानः ज्योक् चिरं सचत इत् समवैत्येव इत्यर्थः। 'अग्नीदग्नीन्विहर' इति मन्त्रो ज्योतिष्टोमे प्रैषात्मकः। 'बर्हिर्देवसदनं दामि' इति दर्शपूर्णमासयोर्बर्हिर्लवनमन्त्रः। तत्रैव 'अग्नये जुष्टं निर्वपामि' इति निर्वापमन्त्रः। सन्ति च 'यस्योभयं हविरार्तिमार्च्छति ऐन्द्रं पञ्चशरावमोदनं निर्वपेत्' 'यद्याग्रयणेनानिष्ट्वा नवान्नं प्राश्नीयाद्वैश्वानरं द्वादशकपालं निर्वपेत्' इत्यादिवाक्यगतानि। आख्यातान्तरैकवाक्यतामुपगतानि सर्वाणीमानि विधायकान्यनुवादकानि वेति संशये, पूर्वपक्षयति—

विधिमन्त्रयोरैकार्थ्यमैकशब्द्यात्[2] ॥ २७ ॥

मन्त्रग्रहणमुपलक्षणम्। 'यजेत स्वर्गकामः' इत्यादिविधौ 'देवांश्च याभिः' इत्यादिमन्त्रे 'यस्योभयम्' इत्यादिब्राह्मणवाक्ये च श्रुतानामाख्यातानाम् ऐकार्थ्यं विधानार्थत्वमेव, न तु केषांचिद्विधायकत्वं केषांचिदनुवादकत्वमिति। कुतः। ऐकशब्द्यात् 'सोमेन यजेत' इत्यादौ 'देवांश्च याभिः' इत्यादौ च एक एवाख्यातशब्दः प्रत्यभिज्ञायते। तत्र कचिद्विधायकः कचिदनुवादक इति वैरूप्याश्रयणे प्रमाणं न किंचित्पश्यामः। न च प्रकृतयागाभेदप्रत्यभिज्ञानात्कथं यागान्तरविधि-

1. निर्वृत्तेश्च. 2. एकशब्दात्.

रिति वाच्यम् । सत्यपि प्रकृतकर्मणि शब्दान्तराभ्यासादिभिः कर्मान्तरत्वावगमसंभवात् । तस्माद्विधायकान्येवंजातीयकान्याख्यातानि ।

अथ सिद्धान्तयति—

अपि वा प्रयोगसामर्थ्यान्मन्त्रोऽभिधानवाची स्यात् ॥ २८ ॥

अपि वेति पूर्वपक्षव्यावृत्तौ । मन्त्रः मन्त्रादिगतः आख्यातशब्दः न विधायकः, किंत्वभिधानवाची । कर्मणि ल्युट् । विधायकाख्यातशब्दाभिहितस्य वाचकः अनुवादकः स्यात् । कुतः । प्रयोगसामर्थ्यात् । प्रयोगमध्ये प्रयोक्तृपुरुषस्यान्यस्य वा अनुष्ठेयार्थे बोधनीये 'देवांश्च याभिः' इत्यादिमन्त्राणाम् 'यस्योभयम्' इत्यादिब्राह्मणवाक्यानां च सामर्थ्यात् विधौ चासामर्थ्यात् । तथाहि— 'देवांश्च याभिर्यजते' इति मन्त्रे तावद्यच्छब्देन गोयागस्य गोदानस्य च सिद्धत्वावगमेन विधेयत्वानुपपत्त्या विधिशक्तिप्रतिबन्धः स्पष्ट एव । एवम् 'यस्योभयम्' इत्यादिब्राह्मणवाक्येष्वपि । अपर्यवसन्नत्वाच्च तत्र विधिशक्तिः प्रतिबध्यते । न हि 'देवांश्च याभिर्यजते' इति पर्यवसन्नं वाक्यम्, 'ज्योगित्ताभिः सचते' इत्यनेन साकाङ्क्षत्वात् । अत एवंजातीयका मन्त्राः प्रयोगमध्य एव प्रयोक्तृपुरुषस्यानुष्ठेयार्थस्मरणाय प्रभवेयुः, न तु विधानाय । 'अग्नीदग्नीन्विहर' 'बर्हिस्तृणाहि' इत्यादिमन्त्रास्तु प्रयोगमध्ये प्रयोक्तृपुरुषेण पुरुषान्तरे स्मारयितव्ये समर्था न तु विधाने, आमन्त्रणविभक्तेरभिमुखार्थप्रत्यायकत्वेन सर्वपुरुषसाधारणविधिप्रत्ययविरोधित्वात्। अनेनैव न्यायेन उत्तमपुरुषस्थलेऽपि विधिशक्तिप्रतिबन्धो द्रष्टव्यः । आत्मनि प्रेरणासंभवाच्च । 'यदि नवाग्नं प्राश्नीयात्' इत्यादिब्राह्मणवाक्यानामपि यदिशब्देन विधिशक्तिप्रतिबन्धाद्वैश्वानरेष्टयादिप्रयोगे निमित्तोपदर्शने सामर्थ्यम्, न तु विधाने । यत्र च विधिशक्तिप्रतिबन्धकं यच्छब्दादिकं नास्ति, तत्रैव आख्यातस्य शब्दान्तराभ्यासादिभिर्भेदकता । यच्छब्दादीनां विधिशक्तिप्रतिबन्धकत्वं च मानान्तरप्राप्तार्थत्व एव । अप्राप्तार्थत्वे तु न तेषां विधिशक्तिप्रतिबन्धकता । अन्यथा यदाग्नेयादिवाक्येषु का गतिः । उक्तं च न्यायसुधायाम् । 'सिद्धत्वद्योतनाद्वृक्त्राभिमुख्यासंभवाद्विधौ । आत्मनि प्रेरणाभावान्निमित्तत्वाभिधानतः । विधिशक्तिविहन्तृ स्याद्यच्छब्दादिचतुष्टयम् । प्राप्त्ययोगे तु तद्बाधात्कचित्स्यादविहन्तृता' इति । तद्बाधात् । तस्य यच्छब्दादिचतुष्टयस्य स्वार्थत्यागादित्यर्थः । इत्यास्तां तावत् । इति विधिमन्त्राधिकरणम् ॥

'विधिमन्त्रयोः' इति पूर्वाधिकरणे उपलक्षणतया गृहीतमन्त्रप्रसङ्गात्तल्लक्षणमभिधत्ते—

तच्चोदकेषु मन्त्राख्या ॥ २९ ॥

'अभिधानवाची स्यात्' इति पूर्वसूत्रोपात्तमभिधानं तच्छब्दः परामृशति। तस्य अभिधानस्य अनुष्ठेयार्थप्रकाशनस्य चोदकेषु प्रयोजकेषु वाक्येषु मन्त्रशब्दो वर्तते। तथा च अनुष्ठेया-

७. मन्त्रनिर्वचनाधिकरणम्।

र्थस्मारकवाक्यत्वं मन्त्रलक्षणमिति पर्यवस्यति। इदं च लक्षणमदृष्टार्थजपादिमन्त्रेष्वव्याप्तम्। 'वसन्ताय कपिञ्जलानालभते' इत्यादीनामप्राप्तार्थकतया विधायकत्वेनानुष्ठेयार्थस्मारकत्वाभावात्तेषु चाव्याप्तम्। अतः प्रायिकमिदं लक्षणमिति प्राञ्चः। वस्तुतस्तु विधिमन्त्रयोरित्यत्रोपात्तं विधिं तच्छब्दः परामृशति। सः 'यजेत स्वर्गकामः' इत्यादिप्रधानविधिः चोदकः प्रयोगविधिः[1] येषां तानि तच्चोदकानि वाक्यानि प्रयोगविधिगृहीतानि; तेषु मन्त्रशब्दो वर्तत इति व्याख्येयम्। प्रधानविधिरेव ह्यङ्गप्रयोगस्य विधायक इत्येकादशस्य द्वितीये 'अङ्गानि तु विधानत्वात्प्रधानेनोपदिश्येरन्' इत्यत्र वक्ष्यते। तथा च कर्माङ्गवाक्यत्वं मन्त्रलक्षणमिति पर्यवस्यति। न च कृत्स्नस्य वेदस्याध्ययनरूपकर्मार्थत्वान्मन्त्रत्वापत्तिरिति वाच्यम्। अध्ययनविधिर्हि द्वेधा अनारभ्यविधिर्ब्रह्मयज्ञविधिश्चेति। तत्राद्ये स्वाध्यायस्य प्राप्तत्वेन तदङ्गत्वाभावान्नातिव्याप्तिः। द्वितीये तु ब्रह्मयज्ञाध्ययनविधौ स्वाध्यायविधिसिद्धाध्ययनतो गृहीतस्य स्वाध्यायस्य पठनेन आर्थवादिकं पयःकुल्यादिकं फलं भावयेदित्यर्थः। तत्र स्वाध्यायस्य [2]पयःकुल्यादिफलार्थतया विधावपि न तदादाय कृत्स्नस्य वेदस्य मन्त्रत्वापत्तिः, प्रयोगकालीनोच्चारणद्वारा कर्माङ्गत्वस्य विवक्षितत्वात्। न चैवमपि 'ईशा वास्यमिदं सर्वम्' इत्याद्यौपनिषदमन्त्राणां कर्माङ्गत्वाभावादव्याप्तिरिति वाच्यम्। एवंजातीयकानामदृष्टविनियोगानामपि वाचःस्तोमादौ विनियोगसत्त्वेन कर्माङ्गत्वस्य सत्त्वात्। वाचःस्तोमाङ्गशब्दत्वं वा मन्त्रत्वम्, तत्र 'सर्वा ऋचः सर्वाणि यजूंषि सर्वाणि सामानि वाचःस्तोमे पारिप्लवं शंसति' इत्यादिविधानात्। एतेन कर्माङ्गशब्दत्वस्य मन्त्रलक्षणत्वे 'उशन्ह वै वाजश्रवसः सर्ववेदसं ददौ' इति नाचिकेतादिब्राह्मणस्यापि मन्त्रत्वापत्तिः, 'नाचिकेतमुपाख्यानम्' इत्युपक्रम्य 'प्रयतः श्राद्धकाले वा तदानन्त्याय कल्पते' इति श्राद्धे तदभिश्रावणादिविधानादिति निरस्तम्। तस्य वाचःस्तोमकर्माङ्गत्वाभावात्, ऋग्यजुःसाम्नामेव सर्वेषां तत्र विनियुक्तत्वात्। न चैवमपि दर्शपूर्णमासादिप्रयोगदशायां वाचःस्तोमाङ्गत्वाभावान्मन्त्रत्वं न स्यादिति वाच्यम्। वाचःस्तोमाङ्गशब्दत्वावच्छेदकधर्मवत्त्वस्य विवक्षितत्वात्। तदवच्छेदकधर्मश्च ऋक्त्वं यजुष्ट्वं सामत्वं च, ऋगादीनां वाचःस्तोमे ऋक्त्वादिधर्मपुरस्कारेणैव विधानात्। तेषां च वाचःस्तोमाङ्गतयानुगमः। एतेन ऋग्यजुःसामान्यतमत्वं मन्त्रत्वमिति निरस्तम्, अन्यतमत्वस्यान्यान्यत्वरूपत्वेन गुरुत्वात्। परमार्थतस्तु ऋग्यजुःसामान्यतमत्वमेव मन्त्रत्वम्। 'तच्चोदकेषु — ' इति सूत्रं तु वाचःस्तोमकर्माङ्गत्वरूपानुगमकधर्मप्रतिपादनमुखेन तत्परम्। ऋग्यजुःसामान्यतमत्वस्यैव मन्त्रलक्षणतया वेदतोऽवगमात्। अस्ति ह्यृगेषा 'अहे बुध्निय मन्त्रं

1. प्रयोगविधायकः—क, घ, ङ. 2. अक्षरग्रहणरूपाध्ययनकर्मार्थत्वेऽपि—क.

मे गोपाय, यमृषयस्त्रैविदा विदुः, ऋचः सामानि यजूंषि, सा हि श्रीरमृता सताम्' इति। एषा ऋगाधाने आवसथ्याग्नेरुपस्थाने विनियुक्ता। 'अहे अहिंसक, बुध्निय, बुध्नं हृदयम्, तत्र भव, सतां हृदय आवसथ्याग्ने, मे मम, मन्त्रं गोपाय रक्ष, यं मन्त्रम् ऋषयः मन्त्रदृशः, त्रैविदाः त्रीन्वेदान्विदन्तीति त्रिविदः, त एव त्रैविदाः, स्वार्थेऽण्, ऋक्सामयजुरात्मतया विदुः ज्ञातवन्तः, तं गोपायेत्यन्वयः। सा हि त्रयी सताम् अमृता फलतः अनश्वरा, श्रीः श्रयणीया' इति वेदभाष्यम्। तथा च ऋक्सामयजुरन्यतमत्वं मन्त्रत्वमिति स्थितम्। मन्त्रलक्षणप्रयोजनम् 'मन्त्रेषु कर्माणि कवयो यान्यपश्यन्' इत्यादौ लघूपायेन लक्ष्यावगम एव। इति मन्त्रलक्षणम्॥

मन्त्रब्राह्मणात्मकवेदे मन्त्रभागस्य लक्षणमुक्त्वा तत्प्रसङ्गाद्ब्राह्मणभागस्य लक्षणमाह—

शेषे ब्राह्मणशब्दः॥ ३०॥

मन्त्रभागावशिष्टवेदभागे ब्राह्मणशब्दो वाचकतया वर्तत इत्यर्थः। विधिपरो वेदभागो ब्राह्मणम्। अर्थवादानामपि विध्येकवाक्यत्वेन तत्रैवान्तर्भावः। 'ब्राह्मणावशिष्टवेदभागो मन्त्रः' इति याज्ञिकाः, यदाहुरापस्तम्बाचार्याः 'मन्त्रब्राह्मणयोर्वेदनामधेयम्' 'कर्मचोदना ब्राह्मणानि' 'ब्राह्मणशेषोऽर्थवादः' 'निन्दाप्रशंसापरकृतिः पुराकल्पश्च' 'अतोऽन्ये मन्त्राः' इति। लक्षणप्रयोजनं तु 'एतद्ब्राह्मणान्येव पञ्च हवींषि' 'एतदेव सावित्रे ब्राह्मणम्, अथो नाचिकेते' इत्यादौ लघूपायेन लक्ष्यावगमः। इति ब्राह्मणलक्षणम्॥

८. ब्राह्मणनिर्वचनाधिकरणम्।

कर्माङ्गशब्दत्वेनानुगतीकृतमृग्यजुःसामान्यतमत्वं मन्त्रलक्षणमुक्तम्। तत्राक्षिप्य समाधातुमिदमारभ्यते। अस्ति दर्शपूर्णमासयोर्होतुर्निगदः। 'अग्ने महाँ असि ब्राह्मण भारत, असावसौ' इति। तत्र 'असावसौ' इति स्थाने 'भार्गवच्यावनाप्रवानौर्वजामदग्न्य' इत्यादि प्रक्षिप्यते। सोऽयं प्रवर इत्युच्यते। अनेन हि यजमानगोत्रजत्वेन अग्निः देवतावाहने प्रक्रियते। तथा तत्रैव 'अग्नये जुष्टं निर्वपामि' इति मन्त्रे 'अग्नये' इत्येतत्सौर्येष्टौ 'सूर्याय' इत्यूह्यते। तथा तत्रैव 'असौ मानुषः' इति होतृवरणमन्त्रे 'असौ' इति स्थाने होतुर्नाम प्रक्षिप्यते। तदेतेषां प्रवरोहनामधेयानां वेदे प्रत्यक्षमनाम्नातानामपि मन्त्रमध्यपतितत्वेन मन्त्रेण सहैकार्थप्रतिपादकतया मन्त्रकार्यापूर्वीयदेवताप्रकाशकारितया च मन्त्रत्वमवश्यमास्थेयमित्याशङ्क्य निराकरोति—

९. ऊहाद्यमन्त्रताधिकरणम्।

अनाम्नातेष्वमन्त्रत्वमाम्नातेषु हि विभागः स्यात्[1]॥ ३१॥

वेदे प्रत्यक्षमनाम्नातेषु प्रवरादिष्वमन्त्रत्वं स्यात्। कुतः। हि यस्मात्कारणाद्वेदे प्रत्यक्षमा-

1. स्यादिति क्वचिन्नास्ति।

ज्ञातेष्वेव वाक्येषु मन्त्रब्राह्मणविभागः क्रियते। प्रवरादयस्तु 'असौ' इति परोक्षेण निर्दिष्टाः, न तु प्रत्यक्षेणेति न मन्त्रत्वं तेषाम्। मन्त्रैकवाक्यत्वं तु न मन्त्रत्वप्रयोजकम्, 'इषे त्वा' इत्यादावव्याप्तियमाणे 'छिनद्मि' इत्यादौ व्यभिचारात्। नापि मन्त्रकार्यकरत्वं तत्प्रयोजकम्, पृष्ठ्यषडहे रथघोषादौ व्यभिचारात्। 'असर्ज्यर्सर्जि' इत्यादिमन्त्रकार्ये स्तोत्रोपाकरणे रथघोषादेस्तत्र विधानात्। यत्तु 'असौ मानुषः' 'आशास्तेऽयं यजमानोऽसौ' इत्यादावदःशब्दस्य तत्तन्नामाज्ञानपर्यवसिततया मन्त्रत्वमेवंजातीयकानामिति कृत्वा सुब्रह्मण्यानिगदादावदःशब्दरहिते 'यजमानस्य तत्पूर्वेषामपरेषां च नाम गृह्णाति' इति विध्यन्तरबलान्निक्षिप्यमाणं नामधेयमेवोदाहरणमिति प्राञ्चः। तदयुक्तम्, प्रत्यक्षाज्ञानस्यैव मन्त्रत्वप्रयोजकत्वेन 'असौ' इति परोक्षनिर्दिष्टानां नाम्नामपि मन्त्रत्वाभावस्यैव युक्तत्वात्। अन्यथा प्रवरस्य 'अमुवत्' इति अदःशब्दनिर्दिष्टत्वेन मन्त्रत्वापत्तेः। 'यजमानस्य तत्पूर्वेषामपरेषां च नाम गृह्णाति' इति विधौ नामपदेन यजमानादिनाम्नामपि निर्दिष्टतया मन्त्रत्वापत्तेश्चेति दिक्। प्रयोजनं प्रवरोहनामधेयेषु 'यज्ञकर्मण्यजपन्यूङ्खसामसु' इति मन्त्रेषु विहितमैकश्रुत्यं मन्त्रभेषप्रायश्चित्तं च न भवति। इति मन्त्रलक्षणशेषः॥

'ऋचो यजूंषि सामानि मन्त्राः' इत्युक्तम्। तत्र ऋग्लक्षणमाह—

[1]तेषामृग्यत्रार्थवशेन पादव्यवस्था॥ ३२॥

तेषां मन्त्राणां मध्ये यत्र यस्मिन् 'अग्निमीळे पुरोहितम्' इत्यादिमन्त्रे पादव्यवस्था। अक्षरेयत्ताविशेषः पादः 'अष्टाक्षरा गायत्री' 'दशाक्षरा विराट्' 'एकादशाक्षरा त्रिष्टुप्' 'द्वादशाक्षरा जगती' इत्यादिप्रमाणगम्यः। तत्प्रयुक्ता 'त्रिपदा गायत्री' 'चतुष्पदा त्रिष्टुप्' इत्यादिच्छन्दोव्यवस्था, तन्नियमनम्—सा ऋक्प्रत्येतव्या। ननु 'अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम्, होतारं रत्नधातमम्' 'अग्निः पूर्वेभिर्ऋषिभिः' इत्यष्टाक्षरचतुष्पादत्वादनुष्टुप्छन्दस्का ऋक् कुतो न स्यादित्याशङ्क्याह—अर्थवशेनेति। अर्थैकत्वप्रयुक्ता पादव्यवस्था विवक्षिता। तथा च विशिष्टैकार्थप्रतिपादकत्वे सति पादबद्धमन्त्रत्वमृचो लक्षणमिति स्थितम्। इति ऋग्लक्षणम्॥

१०. ऋग्लक्षणाधिकरणम्।

सामानि लक्षयति—

११. सामलक्षणाधिकरणम्।

गीतिषु सामाख्या[2]॥ ३३॥

रथन्तरबृहद्वैरूपादिसंज्ञकगीतिषु सामशब्दो वाचकतया वर्तते। यद्यपि सामशब्दस्य गीतिवाचकत्वं सप्तमे सूत्रकारः प्रपञ्चयिष्यति तथापि ऋगादिभेदकथनप्रसङ्गादिहाप्युक्तम्। इति सामलक्षणम्॥

1. तेषामिति क्वचिन्नास्ति. 2. गीतिषु सामेति क्वचित्पाठः.

यजूंषि लक्षयति—

शेषे यजुःशब्दः ॥ ३४ ॥

ऋक्सामावशिष्टमन्त्रभागे वाचकतया यजुःशब्दो वर्तते। न चैवं सति 'युञ्जते मन उत युञ्जते धियः' 'इमामगृभ्णन्' इत्यादावृचि 'यजुरेव वदेत्' 'यजुष्कृत्यै यज्ञस्य समृद्ध्यै' इत्यादिब्राह्मणेषु कथं यजुःशब्दव्यवहार इति वाच्यम्। यजुर्वेदपठितत्वेन लक्षणया तदुपपत्तेः। ऋगादिलक्षणप्रयोजनं तु 'यत्स्वाध्यायमधीयीतैकामप्यृचं यजुः साम वा तद्ब्रह्मयज्ञः संतिष्ठते' इत्यादौ लघूपायेन लक्ष्यावगमः॥ इति यजुर्लक्षणम्॥

१२. यजुर्लक्षणाधिकरणम्।

अथ 'शेषे यजुःशब्दः' इत्यत्राक्षिप्य समाधातुमिदमारभ्यते। सन्ति निगदा नाम परसंबोधनार्था मन्त्राः 'अग्नीदग्नीन्विहर, बर्हिस्तृणाहि' 'प्रोक्षणीरासादय' इत्यादयः। ते किं यजुर्भ्यो भिद्यन्ते उत यजूंष्येवेति संशये पूर्वपक्षयति—

निगदो वा चतुर्थं स्याद्धर्मविशेषात् ॥ ३५ ॥

वाशब्दो नञर्थे। निगदो न यजुः। कुतः। धर्मविशेषात् 'उच्चैर्ऋचा क्रियते, उच्चैः साम्ना, उपांशु यजुषा, उच्चैर्निगदेन' इति निगदस्य यजुर्विलक्षणोच्चैस्त्वधर्मविशेषश्रवणात्, निगदस्य यजुष्ट्वे उपांशुत्वस्यैवौचित्यात्। ऋक्सामयोः कात्स्न्र्येन उच्चैस्त्वमिव यजुषोऽपि हि कात्स्न्र्येन उपांशुत्वमवगतम्। तस्मान्निगदाख्यमन्त्रजातं चतुर्थं स्यात्॥

१३. निगदानां यजुष्ट्वाधिकरणम्।

इतोऽपि निगदो न यजुरित्याह—

व्यपदेशाच्च ॥ ३६ ॥

इमानि यजूंषि, एते निगदा इति संज्ञाभेदादपि निगदो न यजुरित्यर्थः॥

सिद्धान्तयति—

यजूंषि वा तद्रूपत्वात् ॥ ३७ ॥

वाशब्द एवार्थे। यजूंष्येव निगदाः। कुतः। तद्रूपत्वात् ऋक्सामभिन्नत्वरूपयजुर्लक्षणवत्त्वात्॥

यदुक्तं निगदानां यजुष्ट्वे उपांशुत्वमेवोचितं न तूच्चैस्त्वमिति तत्राह—

वचनाद्धर्मविशेषः ॥ ३८ ॥

उच्यते अनेनेति वचनं सामर्थ्यम्। निगदानां संबोधनविभक्तिघटितानां परसंबोधनपराणां परप्रत्यायनरूपकार्यवशादुच्चैस्त्वरूपधर्मविशेष एव वक्तुमुचितः, न तूपांशुत्वम् ॥

ननु यत्र संबोधनविभक्तिर्नास्ति 'प्रोक्षणीरासादय' इत्यादौ तत्र कथं परसंबोधनार्थता । न च मध्यमपुरुषलोडुशात्संभव इति वाच्यम्। प्राप्तकालतायामपि लोटो विधानात्तदर्थकलोडादेशमध्यमपुरुषस्याविवक्षितार्थतायास्तृतीये 'प्रैषेषु च पराधिकारात्' इत्यत्र वक्ष्यमाणत्वाच्च । तत्राह—

अर्थाच्च ॥ ३९ ॥

आग्नीध्रादेः परस्य प्रोक्षण्यासादनादिस्मरणमपेक्षितमिति प्रैषार्थत्वे अपेक्षितदृष्टार्थत्वं लभ्यते । प्राप्तकालार्थत्वे तु अनपेक्षितमदृष्टार्थत्वं मध्यमपुरुषस्याविवक्षितार्थत्वं च स्यात्। एवं च दृष्टप्रयोजनवशात्संभवद्विवक्षितलोडर्थवशाच्च लोटो न प्राप्तकालार्थत्वम्, किंतु प्रैषार्थत्वमेवास्य वक्तव्यमिति सर्वेषां निगदानां परसंबोधनार्थत्वं सिद्धम्। चकारस्त्वनुक्तसमुच्चयार्थः। तथाहि—ननु 'उपांशु यजुषा' इति वाचनिकमुपांशुत्वं संबोधनविभक्तिसामर्थ्यरूपलिङ्गलब्धेन परसंबोधनरूपकार्येण कथं बाध्यताम्, लिङ्गेन प्रत्यक्षवचनस्य बाधायोगादित्यत आह—चेति । मन्त्रस्य ह्युपांशुत्वमङ्गम्, अर्थप्रत्यायनं कार्यं तु प्रधानम्। तस्य लिङ्गरूपदुर्बलप्रमाणगम्यत्वेऽपि स्वरूपतो बलवत्त्वेन बलवत्प्रमाणकस्यापि स्वरूपतो दुर्बलस्य उपांशुत्वस्य तेन बाधो युक्तः, प्रमाणबलात्प्रमेयबलज्यायस्त्वस्य स्मृतिपादे निरूपितत्वात् । किंच लिङ्गगम्यं परसंबोधनकार्यं निगदमात्रविषयम्। उपांशुत्ववचनं तु यजुरन्तरे सावकाशम्। ततश्च 'आनर्थक्यप्रतिहतानाम्—' इति न्यायेन लिङ्गस्यैव प्रबलतया तेनोपांशुत्वबाधो युज्यते। वस्तुतस्तु नोपांशुत्वस्य बाधः, उपांशुत्वस्य निगदेष्वप्राप्तेः । 'उपांशु यजुषा' इति हि नापूर्वविधिः, मन्त्रविधिबलेनैव तस्य कदाचित्प्राप्तत्वात्। ततश्च यत्रानियमेनोपांशुत्वं प्राप्यते तत्र नियममात्रम् 'उपांशु यजुषा' इत्यनेन क्रियते। निगदेषु च परसंबोधनार्थेषु न कदाचिदुपांशुत्वसंभव इति न तत्रोपांशुविधेर्व्यापारः। अतो न तद्बाधप्रसक्तिः। एवं च सामर्थ्याल्लिगदानामुच्चैस्त्वमेव वक्तुमुचितम्। न चैवं सति 'उच्चैर्निगदेन' इति वचनानर्थक्यम्। क्वचित्कार्यार्थमुच्चैस्त्वेऽपि यजुरन्तरे उपांशुत्वमेव युक्तमित्यौचित्येन 'उपांशु यजुषा' इति विहितस्तुत्यर्थं तदनुवादात् ॥

अथ यदुक्तम् 'व्यपदेशाच्च' इति तत्राह—

गुणार्थो व्यपदेशः ॥ ४० ॥

ब्राह्मणपरिव्राजकन्यायेन नितरां गद्यन्ते उच्चैरुच्चार्यन्त इति व्युत्पत्तिसिद्धगुणविशेषनिबन्धन एव यजुषामेव केषांचिन्निगदव्यपदेश इत्यर्थः ॥

अत्राशङ्क्य निराकरोति—

सर्वेषागिति चेन्नग्र्यपदेशात् ॥ ४१ ॥

यदि निगदानामुच्चैस्त्वनिबन्धनं निगदत्वं तर्हि ऋक्सामानामपि सर्वेषां तत्स्यादिति चेत्, न। कुतः। ऋग्व्यपदेशात् 'अयाज्या वै निगदाः' इति निगदान्निन्दित्वा 'ऋचो याज्या भवन्ति' इति पृथङ्निर्देशात्। न हि तदेव निन्द्यते विधीयते चेति युक्तम्। तस्माद्यजूंष्येव निगदाः। प्रयोजनं पूर्वपक्षे वाचःस्तोमे 'सर्वा ऋचः सर्वाणि यजूंषि सर्वाणि सामानि' इति पारिप्लवशंसने निगदानामप्राप्तिः, सिद्धान्ते तु तत्प्राप्तिरिति। केचित्तु यजुर्भ्रेषप्रायश्चित्तं वर्णयन्ति। तदयुक्तम्। 'यद्यृक्तो यज्ञ आर्तिर्भवति भूरिति चतुर्गृहीतमाज्यं गृहीत्वा गार्हपत्ये जुहुयादथ[1] यजुष्टो भुव इति दक्षिणाग्नावाग्नीध्रे सोमे' इति हि यजुर्भ्रेषप्रायश्चित्तम्। तदिदं निगदानां यजुष्ट्वाभावेऽपि यजुर्वेदविहितकर्माङ्गत्वमात्रेण तद्भेषे संभवति, तत्र ऋगादिपदानां वेदपरत्वात्। 'त्रयो वेदा अजायन्त, भूरित्यृग्वेदात् भुव इति यजुर्वेदात् स्वरिति सामवेदात्' इत्युपक्रमे 'ऋग्वेदेन ऋग्वेदं भिषज्यति यजुर्वेदेन यजुर्वेदं सामवेदेन सामवेदम्' इति उपसंहारे च वाजसनेयके तथा ऐतरेयकताण्डकतलवकारीयब्राह्मणेषू पक्रमे वेदानामेव श्रवणात्। तस्मादस्मदुक्तमेव प्रयोजनं साधु। इति निगदाधिकरणम्॥

ऋक्सामयजुरात्मकमन्त्रस्वरूपे निरूपिते प्रसङ्गात्तदवान्तरभेदे कथनीये ऋचां साम्नां चाध्येतृपरंपरासिद्धाद्विच्छिद्य पाठादेव तत्सिद्धेः प्रश्लिष्टपठितेषु यजुःषु कियदेकं यजुरिति जिज्ञासितं, तद्भेदं प्रस्तौति—

अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्यात् ॥ ४२ ॥

अर्थस्य क्रतूपकारलक्षणप्रयोजनस्य एकत्वाद्धेतोः एकं वाक्यं प्रत्येतव्यम्। वाक्यशब्देन प्रयोगे उच्चारणीयं यजुर्लक्ष्यते। न हि यजुर्भेदविचारे लौकिकवाक्यसाधारणमेकवाक्यलक्षणं संगतं भवति। ततश्च यावान्पदसमूहः प्रयुक्तो यागसाधनतामश्नुते तावदेकं यजुरित्युक्तं भवति। इज्यते अनेनेति यजुरिति व्युत्पत्तेरिति भावः। नैतावदेव यजुरेकत्वप्रयोजकम्। तथा सति 'भगो वां विभजतु' 'अर्यमा वां विभजतु' 'पूषा

१४. एकवाक्यत्वलक्षणाधिकरणम्।

1. जुहोथ—क, ख, ग, घ, ङ.

वां विभजतु' इति भिन्नेषु वाक्येषु पुरोडाशीयपिष्टविभागरूपैकार्थतया एकयजुष्ट्वापत्तेः । किंतु तथाविधं पदजातं यद्येकस्यापि पदस्य ततो विभागे सति साकाङ्क्षं स्यात् । तदेव भवेदेकं यजुः । एवं च यावत्पदजातं यजुर्लक्षणलक्षितं यागसाधनमथ च विभागे साकाङ्क्षं तावदेकं यजुरित्युक्तं भवति । न चैतावता प्रस्तुतयजुर्भेदे किमायातमिति वाच्यम् । यजुरेकत्वे कथिते ततोऽन्यद्यजुरन्तरमित्युक्तप्रायत्वात् । सूत्रे अर्थशब्दो नाभिधेयवाची, तथा सति विभागे साकाङ्क्षमित्यस्य वैयर्थ्यात्, 'भगो वां विभजतु' इत्यादीनां विशिष्टैकार्थप्रतिपादकत्वाभावेनातिव्याप्तिनिरासादिति वार्तिके प्रपञ्चितम् । विभागे साकाङ्क्षमेकं यजुरित्युक्ते 'ऋतषाड्ऋतधामाग्निर्गन्धर्वस्तस्यौषधयोऽप्सरस ऊर्जो नाम स इदं ब्रह्म क्षत्रं पातु ता इदं ब्रह्म क्षत्रं पान्तु तस्मै स्वाहा ताभ्यः स्वाहा' इत्यादिराष्ट्रभृद्धोममन्त्रेषु द्विस्वाहाकारमेकैकं यजुः स्यात्, विभागे साकाङ्क्षत्वात् । न चेष्टापत्तिः । वाजसनेयके 'राष्ट्रभृतो जुहोति' इति प्रस्तुत्य 'मिथुनानि जुहोति पुंसे पूर्वस्मै जुहोत्यथ स्त्रीभ्यो द्वादशैवाहुतयो भवन्ति' इति षड्भिर्मन्त्रयुगलैर्द्वादशाहुत्यवगमात् । अत एव संकर्षकाण्डे द्वितीयस्य चतुर्थे 'ऋतषाड्ऋतधामेति यथार्थविनिष्कर्षोऽर्थपृथक्त्वात्' इत्यधिकरणे 'ऋतषाड्ऋतधामाग्निर्गन्धर्वः स इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा तस्यौषधयोऽप्सरस ऊर्जो नाम ता इदं ब्रह्म क्षत्रं पान्तु ताभ्यः स्वाहा' इत्येवं पुंवाचकाः स्त्रीवाचकाश्च शब्दाः प्रतिहोमं विनिष्कृष्य प्रयोक्तव्याः, उत यथापाठमिति विचारः संगच्छते । न च एकयजुष्ट्वाभावे 'षड्भिर्जुहोति' इति विरोधः शङ्क्यः, तस्य पर्यायाभिप्रायत्वात् । 'तस्मै स्वाहा, ताभ्यः स्वाहा' इत्यतः प्राक्पठिताः 'ऋतषाड्ऋतधामा' 'स ऽहितो विश्वसामा' 'सुषुम्नः सूर्यरश्मिः' इत्यादयः पर्यायाः । ते च 'भुवनस्य पते' इत्यतः प्राक्षडेव भवन्ति । तदेतत्तत्रैवाग्निमाधिकरणे 'षड्भिर्जुहोतीति पर्यायवादो यथा सावित्राणि जुहोति' इत्यत्र प्रपञ्चयिष्यते । एतेन 'षड्भिर्जुहोति' इति तैत्तिरीयकमपि व्याख्यातम् । एवं च राष्ट्रभृन्मन्त्रेषु प्रतिस्वाहाकारं यजुर्भेदात्तत्र विभागे [1]साकाङ्क्षतायामप्येकयजुष्ट्वं मा भूदित्यर्थैकत्वादित्युक्तम् । [2]शस्त्रीयाणामृचामेकादृष्टार्थत्वाद्विभागे साकाङ्क्षत्वात्तत्राति-व्याप्तिवारणाय यजुर्लक्षणलक्षितमिति । उदाहरणं तु 'देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नये जुष्टं निर्वपामि' इत्यादियजुः । न च 'देवस्य' इत्यस्य विभागेऽपि 'त्वा सवितुः' इत्यादेर्निराकाङ्क्षतया कथं तेन सहैकयजुष्ट्वमिति वाच्यम् । न ह्यत्र विभज्यमानस्य विभागावधिभूतस्येत्युभयाकाङ्क्षैव विवक्षिता । अन्यतराकाङ्क्षाया विवक्षितत्वात् । ततश्च 'देवस्य' इत्यस्य 'त्वा सवितुः' इत्यादिसाकाङ्क्षत्वान्न दोषः । क्वचित् 'अग्ने हव्यं रक्षस्व' इत्यादावुभयाकाङ्क्षासत्त्वेऽप्यन्यतराकाङ्क्षाया अनपायात् 'देवस्य' इत्यस्य विभागे साकाङ्क्षतया आनर्थक्यात् 'त्वा सवितुः' इत्यादेरपि तेनाकाङ्क्षोत्थापनादुभयाकाङ्क्षयैव वा सर्वत्र निर्वाहः । न चैवमपि 'ऋतषाड्ऋतधामाग्निर्गन्धर्वस्तस्यौषधयोऽप्सरस ऊर्जो नाम स इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा' इति प्रथमहोममन्त्रे 'तस्यौ-

1. साकाङ्क्षतया—क, घ, ङ. 2. 'याज्यया यजति' इत्येकादृष्ट—ख, ग.

धयोऽप्सरस ऊर्जो नाम ता इदं ब्रह्म क्षत्रं पान्तु' इत्यंशस्य स्त्रीपरस्य तदितरांशस्य पुरुषपरस्य चान्यतराकाङ्क्षाया अप्यभावात्कथमेकयजुष्ट्वमिति वाच्यम्। इष्टापत्तेः। स्त्रीपरस्यांशस्य 'ताभ्यः स्वाहा' इत्युत्तरमन्त्रैकवाक्यतया तेनैवैकयजुष्ट्वात्। परं तु यथाम्नानमेवानन्वितोऽपि स्त्रीपरोंऽशः पूर्वमन्त्रे प्रयुज्यते अविरोधात्। पूर्वमन्त्रे प्रयुज्यमान एव प्रयुक्तस्य स्त्रीपरस्यांशस्योत्तरयजुष्याकाङ्क्षावशेनान्वयसंभवात्। लोके काव्येषु 'कान्तं पृच्छामहे तन्वि पुलकोत्कम्पकारिणम्। द्रुतमाधत्स्व नेत्रान्तं गतस्त्वेति प्रियस्तव' इत्यादौ पुंलिङ्गपदानां स्त्रीलिङ्गपदव्यवहितानामप्यन्वयदर्शनात् इति संकर्षकाण्डे देवस्वामिभाष्ये स्पष्टम्। अत्र भाष्ये वार्तिके च 'स्योनं ते सदनं करोमि, घृतस्य धारया सुशेवं कल्पयामि, तस्मिन्त्सीदामृते प्रतितिष्ठ, व्रीहीणां मेध सुमनस्यमानः' इति कृत्स्नस्यैकयजुष्ट्वं स्यात्। यजुर्भेदो न स्यात्। तन्निवृत्त्यर्थमर्थैकत्वादित्युपात्तम्। पूर्वभागस्य सदनकरणप्रकाशनमुत्तरभागस्य पुरोडाशप्रतिष्ठितत्वप्रकाशनमिति प्रयोजनभेदान्नातिप्रसङ्ग इत्युक्तम्। पार्थसारथिप्रभृतिभिश्च तदेवानुमोदितम्। तत्सर्वमापाततः। "स्योनं ते सदनं करोमीति हि ऋगेषा त्रिष्टुप्। पूर्वार्धर्चेन सदनकरणमुत्तरार्धर्चेन प्रतिष्ठापनम्" इत्येव वेदभाष्ये भट्टभास्करमिश्राः। यजुरेकत्वकथनप्रयोजनं तु 'यत्स्वाध्यायमधीयीतैकामप्यृचं यजुः साम वा तद्ब्रह्मयज्ञः संतिष्ठते' इत्यादौ यावदेकं यजुस्तावत्प्रयोक्तव्यम्, न तु तदेकदेश इति। तदेतत्सूत्रे यजुरित्येव वक्तव्ये वाक्यशब्दप्रयोगेण सूचितम्। वाक्यमित्यस्य हि प्रयोगसमये वचनार्हमित्यर्थः। इति यजुरेकत्वनिरूपणम्॥

'इषेत्वोर्जे त्वा' इति किमेकं यजुः, उत 'इषे त्वा' इत्येकं यजुः 'ऊर्जे त्वा' इति यजुरन्तरमिति संशयः। पूर्वं तावदेकप्रयोजनसमर्थं विभज्यमाने साकाङ्क्षपदजातमेकं यजुरित्युक्तम्।

१५. वाक्यभेदाधिकरणम्।

भवति चेदं तथाविधं पदचतुष्टयम्। न ह्यत्र निर्वापप्रोक्षणादिमन्त्रवन्निर्वापादिक्रियासमवेतप्रकाशनरूपदृष्टप्रयोजनभेदोऽस्ति, येन यजुर्भेदः स्यात्। न ह्यत्र क्रियापदमस्ति। तस्माददृष्टमेवात्र प्रयोजनम्। तच्च कल्प्यमानं लाघवादेकमेव कल्प्यत इति भवति पदचतुष्टयमेकार्थम्। तच्चादृष्टं चतुर्भिः पदैः समुदितैरेव कल्प्यते विनिगमनाविरहात्। अतः संहत्यकारित्वाद्विभज्यमाने साकाङ्क्षं च भवति। न च 'इषे त्वेति शाखामाच्छिनत्ति' 'ऊर्जे त्वेत्यनुमार्ष्टि' इति विनियोगबलाद्भिन्नमेवादृष्टं कल्प्यत इति वाच्यम्। तदा हि विनियोगभेदादृष्टं भिद्यते, यदि विनियोज्यमन्त्रभेदः सिद्धः स्यात्। इह तु विनियोज्यस्यैकमन्त्रत्वमेवादृष्टद्वयकल्पनाभीत्या निश्चितमिति पदचतुष्टयमेवादिप्रतीकग्रहणेन पूर्ववाक्यतः छेदने विधीयते, उत्तरवाक्येऽप्यन्तप्रतीकग्रहणेनानुमार्जने तदेवं पदचतुष्टयं विधीयते। 'आनः प्राण एतु परावत आन्तरिक्षादिवस्परि, आयुः पृथिव्या अध्यमृतमसि प्राणाय त्वा' इति मन्त्रस्य 'अमृतमसि प्राणाय त्वेति हिरण्यमभिव्यनिति' इत्यन्तप्रतीकग्रहणेनापि विनियोगदर्शनात्। आवृत्त्या चोभयत्र पदचतुष्टयस्य प्रयोगः।

एवं च पदचतुष्टयस्यैव च्छेदने विनियुक्तत्वादेकादृष्टार्थत्वम्। अतः पूर्वोक्तलक्षणलक्षितत्वात्पदचतुष्टयमेकं यजुः। इति प्राप्ते, सिद्धान्तयति—

समेषु वाक्यभेदः स्यात् ॥ ४३ ॥

'इषे त्वोर्जे त्वा' इत्येवंजातीयकेषु परस्परनिराकाङ्क्षत्वेन तुल्येषु वाक्यभेदः यजुर्भेदः स्यात्। तथाहि—एकादृष्टार्थत्वं पदचतुष्टयस्यासिद्धम्, विनियोज्यस्वरूपाज्ञाने विनियोगस्यैवासंभवेन प्रथमं विनियोज्यस्वरूपे पर्यालोच्यमाने त्वाशब्दद्वयबलेन परस्परनिरपेक्षतया भेदेनैव प्रतीयमानत्वेन विनियोगस्यापि भेदेनैव वाच्यतया तदनुसारेण परस्परनिरपेक्षतयैवादृष्टस्य कल्प्यमानस्य भेदेनैव कल्पयितुमुचितत्वात्। किंच 'आ नः प्राण एतु परावतः' इत्यस्य मन्त्रैक्यं लिङ्गवशेनावगतमिति मन्त्रान्तप्रतीकग्रहणेन विनियोगः कथंचिद्गुज्यते। नेह मन्त्रैक्यसाधकं लिङ्गमस्ति, किमुत तद्भेदसाधकं त्वाशब्दद्वयमस्ति। तस्मादनेकादृष्टार्थमेव पदचतुष्टयम्। वस्तुतस्तु नैवंजातीयकानामदृष्टार्थता, अर्थप्रकाशनरूपदृष्टार्थत्वात्। 'इति शाखामाच्छिनत्ति' इति इतिकरणादिना मन्त्राणां छेदनक्रियाकरणत्वावगतेः। न हि च्छेदनादिक्रियाकरणत्वं मन्त्राणां तत्प्रकाशनमन्तरेण संभवति। तथा च च्छेदनादिप्रकाशनचोदनान्यथानुपपत्त्या 'छिनद्मि' इत्यादि यथोचितमध्याहार्यम्। न चैवमपि च्छेदनं पदचतुष्टयेन प्रकाश्यताम्, एवमनुमार्जनमपीति दृष्टार्थत्वेऽपि न मन्त्रभेदः स्यादिति वाच्यम्। प्रथमावधृतनैरपेक्ष्यानुसारेण पृथगेव च्छेदनादिप्रकाशकत्वकल्पनस्य पूर्वमेवोपपादितत्वात्। एवम् 'आयुर्यज्ञेन कल्पताम्, प्राणो यज्ञेन कल्पताम्' इत्यादीनि दश वाक्यानि दश यजूंषि भवन्ति। 'क्लृप्तीर्यजमानं वाचयति' इत्यत्र हि क्लृप्तिशब्दो न मन्त्रपरः किंत्वर्थपरः। ततश्च बहुधा क्लृप्तिं वदन्तं यजमानं प्रेरयतीत्यध्वर्योर्व्यापारो विहितोऽर्थाद्यजमानकर्तृकबहुत्वविशिष्टक्लृप्तिवचनविधिं कल्पयति। कल्पितताद्दग्विधिनिर्वाहाय च 'आयुर्यज्ञेन कल्पताम्' इत्यादेरायुरादिविशिष्टक्लृप्तिप्रकाशनपरत्वमेव वक्तव्यम्। ततश्च प्रकाश्यमानायुरादिविशिष्टक्लृप्तिविशेषरूपार्थभेदाद्यजुर्भेदः। प्रयोजनं पूर्वपक्षे 'इषे त्वोर्जे त्वा' इति च्छेदने पदचतुष्टयं प्रयुज्यते, एवमनुमार्जनेऽपि। सिद्धान्ते तु 'इषे त्वा' इति च्छेदने 'ऊर्जे त्वा' इत्यनुमार्जने। क्लृप्तिवाक्येषु एकस्य श्रेषे कृत्स्नस्यावृत्तिः पूर्वपक्षे। सिद्धान्ते तु यस्य श्रेषस्तस्यैवेति। अत्र 'इषे त्वा' इत्यादिसाकाङ्क्षमन्त्रेषु योग्यपदाध्याहारेण 'इषे त्वा छिनद्मि' 'ऊर्जे त्वा अनुमार्ष्मि' इत्यादि प्रयोक्तव्यमिति केचित्। तदयुक्तम्, अध्याहृतस्य लौकिकशब्दस्य वैदिकमन्त्रानवयवत्वेन मन्त्रान्तकर्मादिसंनिपातविरोधात्। ऊहप्रवरनामधेयानां तु 'असौ मानुष इति होतुर्नाम गृह्णाति' 'आर्षेयं वृणीते' 'त्रीन्वृणीते' 'तस्माद्दधं नोहेत्' इत्यादिवेदानुमतत्वाल्लौकिकानामपि प्रयोग उचितः। नात्र तथा प्रमाणमस्ति। तस्मादाकाङ्क्षितशब्दानां मनसैव स्मरणम्, न तु प्रयोगः। अर्थाध्याहारपक्षे तु शब्दस्यापि न स्मरणम्।

अर्थमात्रमेव स्मर्तव्यमिति प्राचीनमतानुसारी पन्थाः। चेतनप्रतिपादकेषु मन्त्रेषु तत्स्तुत्यानां देवतानाम् अचेतनप्रतिपादकेषु तदभिमानिदेवतानां शाब्दबोधः, न तु प्रयोक्तुः इति मन्त्राधिकरणेऽवोचाम। ततश्च तत्तन्मन्त्रस्तुत्यदेवता एव शब्दाध्याहारेणार्थाध्याहारेण वा वाक्यार्थमधिगच्छन्तीति याज्ञिकानुसारी युक्तः पन्थाः। इति यजुर्भेदनिरूपणम् ॥

ज्योतिष्टोमे उपसद्धोममन्त्रा आम्नाताः 'या ते अग्नेऽयाशया तनूर्वर्षिष्ठा गह्वरेष्ठोग्रं वचो अपावधीं त्वेषं वचो अपावधीं स्वाहा, या ते अग्ने रजाशया, ह्राशया' इति। तत्र द्वितीयतृतीय-

१६. अनुषङ्गाधिकरणम्।

मन्त्रयोः साकाङ्क्षयोराकाङ्क्षापूरणसमर्थो लौकिकः शेषोऽध्याहर्तव्यः 'या ते[1] रजाशया प्रजा सास्मान्पातु' इत्येवंप्रकारेण, उत पूर्वमन्त्रावयवस्य तनूर्वर्षिष्ठेत्यादेरनुषङ्गेण शेषः पूरणीयः इति संशयः। यदि प्रकारान्तरेणाकाङ्क्षापूरणं न स्यात्तदा गत्यभावादेकत्र निबद्धस्यापि वैदिकस्य वाक्यशेषस्यानुषङ्ग आश्रीयेत। संभवति च लौकिकेनापि तत्पूरणम्। अतः पूर्वमन्त्रे निबद्धस्य तनूर्वर्षिष्ठेत्यादेरन्यत्रनयनरूपानुषङ्गो न युक्तः। अन्यत्रनयने च समाम्नायबहिर्भावाल्लौकिक एव स्यात्। तस्माल्लौकिक एव शेषोऽध्याहर्तव्यः। इति प्राप्ते, सिद्धान्तयति—

अनुषङ्गो वाक्यसमाप्तिः[2] सर्वेषु तुल्ययोगित्वात् ॥ ४४ ॥

अनुषज्यत इत्यनुषङ्गः 'तनूर्वर्षिष्ठा' इत्यादिवाक्यशेषः उत्तरयोरपि वाक्ययोः समापकः। समाप्तिरिति बाहुलकः करणे क्तिन्। कुतोऽनुषङ्गः। सर्वेषु तुल्ययोगित्वात्। प्रथमद्वितीयतृतीयमन्त्रेषु शेषस्य 'तनूर्वर्षिष्ठा' इत्यादेः संनिधानरूपसंबन्धस्य तुल्यत्वादित्यर्थः। यदि हि प्रथमस्यैवायं शेषः स्यात्तदान्यत्रनयनादवैदिकत्वं स्यात्। नैतदस्ति, त्रयाणामपि संनिधावाम्नातत्वात्। एतावदेव हि शब्दानामन्वये कारणम्, आकाङ्क्षा संनिधिर्योग्यत्वं च। संनिधिश्च बुद्धिविपरिवृत्तिमात्रम्। नोपरिष्टादनन्तरं च समाम्नायः साधकः। नापि पुरस्ताद्व्यवहितं च समाम्नायो बाधकः। किंतु अनन्वितपदान्तरव्यवधानं बाधकम्। तदभावः साधकः। अत्र च 'तनूर्वर्षिष्ठा' इत्यादिशेषस्य प्रथमद्वितीयाभ्यां न कथंचिदपि व्यवधानम्। तृतीयस्यापि वाक्यशेषेण संबन्धे द्वितीयं न व्यवधायकम्, द्वितीयस्यानुषज्यमानशेषसाकाङ्क्षतया अन्वितत्वेन अनन्वितपदत्वाभावात्। अनन्वितपदान्तरमेव हि बुद्धिविपरिवृत्तेर्बाधकम्, न त्वाकाङ्क्षितान्वितपदमपि। प्रथमेन संबद्धो द्वितीयस्याकाङ्क्षावेलायां बुद्धौ विपरिवर्तमानस्तेनापि संबध्यते। तत्संबन्धाच्च विपरिवृत्त्यभङ्गात्तृतीयेनापि संबन्द्धुं शक्नोति। तथा च बुद्धिविपरिवृत्तिरूपसंनिधानं त्रयाणामविशिष्टमिति सकृदाम्नातस्यापि शेषस्य सर्वार्थत्वाद्वैदिकेनैव शेषेण पूरणसंभवे लौकिकशेषाध्याहारो न युक्तः। ननु यत्र साकाङ्क्षाणां संनिधौ शेषः पठ्यते तत्रोक्त-

1. ते अग्ने...क, घ, ङ. 2. वाक्यपरिसमाप्तिः.

रीत्या भवत्वनुषङ्गः । यत्र तु 'चित्पतिस्त्वा पुनातु, वाक्पतिस्त्वा पुनातु, देवस्त्वा सविता पुनातु' इति परिपूर्णानां संनिधौ शेषः पठ्यते 'अच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिः' इति तत्र कथमनुषङ्गः स्यात्, आकाङ्क्षाविरहात् । न च 'अच्छिद्रेण पवित्रेण' इति शेषस्याकाङ्क्षावशात्पुनात्वित्यन्तानां त्रयाणामप्याकाङ्क्षोत्तिष्ठतीति वाच्यम् । संनिहितेन 'देवस्त्वा सविता पुनातु' इत्यन्तिमेनैवान्वयमासाद्य शान्ताकाङ्क्षस्य शेषस्य पूर्वयोरप्याकाङ्क्षोत्थापनाशक्तेरिति चेत्, सत्यं पुनात्वन्ताः शेषिणो निराकाङ्क्षाः । तथापि 'अच्छिद्रेण' इति शेषस्य तृतीयाश्रुतिभिर्युक्तस्य करणप्रकाशकस्य तत्करणकानुष्ठेयपवनक्रियाप्रकाशनद्वारा प्रकरणे निवेशो वक्तव्यः । सा च पवनक्रिया त्रिष्वपि मन्त्रेषु प्रकाश्यत इति प्रतिप्रधानं गुणावृत्तेर्न्याय्यत्वादनुषङ्गः पूर्वयोरपि सिद्धः । इत्यनुषङ्गाधिकरणम् ॥

अग्नीषोमीयपशोः समञ्जनमन्त्राः 'सं ते [1]वायुर्वातेन गच्छताम्, संयजत्रैरङ्गानि, संयज्ञपतिराशिषा' इति । हे पशो, ते तव वायुः प्राणः वायुना संगच्छतामिति प्रथमस्य मन्त्रस्य योजना । 'संयजत्रैरङ्गानि' इति द्वितीयो मन्त्रः । अङ्गानि हृदयादीनि यजत्रैः यागैः सम्, 'सृज्यन्ताम्' 'गच्छन्ताम्' 'पद्यन्ताम्' इत्यादिलौकिकं पदमध्याहर्तव्यम् । न त्वत्र 'गच्छताम्' इत्यनुषङ्गः संभवति, 'गच्छताम्' इत्येकवचनस्य 'अङ्गानि' इति बहुवचनान्तेन संबन्धायोग्यत्वात् । न च एकवचनस्यानुषङ्गायोग्यत्वेऽपि धातुमात्रस्यानुषङ्गोऽस्त्विति वाच्यम् । प्रकृतिप्रत्यययोरेकस्यासंबन्धे सत्यपरस्याप्यसंबन्धनियमेन धातुमात्रस्यानुषङ्गायोगात् । अतो द्वितीयमन्त्रे 'गच्छताम्' इत्यस्यानुषङ्गो न युज्यते । तृतीयमन्त्रे 'संयज्ञपतिराशिषा' इत्यत्र तु 'गच्छताम्' इत्यनुषज्यते न वेति संशयः । साकाङ्क्षत्वाद्योग्यत्वाच्चानुषज्यते । इति प्राप्ते, सिद्धान्तयति—

१७. व्यवेतानुषङ्गाधिकरणम् ।

व्यवायान्नानुषज्यते ॥ ४५ ॥

बुद्धिपरिवृत्तिरूपसंनिधानं ह्यनुषङ्गे बीजमुक्तम् । अत्र तु 'अङ्गानि' इत्यनेन 'गच्छताम्' इत्यन्वयायोग्येन व्यवधानाद्बुद्धिपरिवृत्तिभङ्गादसंनिधानात् 'सं यज्ञपतिराशिषा' इत्यत्रापि नानुषज्यते । न च 'गच्छताम्' इत्येकवचनान्तं बहुवचनान्ततया विपरिणतम् 'अङ्गानि' इत्यनेनाप्यन्वीयतामिति वाच्यम् । प्रकृतावूहाभावस्य नवमस्य तृतीये 'अपूर्वे त्वविकारोऽप्रदेशात्प्रतीयेत' इत्यधिकरणे व्यवस्थापयिष्यमाणत्वात् । तस्मात्तृतीयमन्त्रेऽपि नानुषङ्गः । इति व्यवायाधिकरणम् ॥

इति द्वितीयाध्याये प्रथमः पादः ॥

---

1. प्राणो वायुना...क.

द्वितीयः पादः ॥

निर्मथ्य निगमसिन्धून्विविधन्यायाभिधानमन्थानैः ।
धर्मसुधामुद्धरते भूयो मुनये नमोऽस्तु जैमिनये ॥

वृत्तमुपोद्घातप्रसक्तानुप्रसक्तम् । इदानीमध्यायार्थो भावनाभेदः प्रस्तूयते ।

सन्ति 'सोमेन यजेत' 'दाक्षिणानि जुहोति' 'हिरण्यमात्रेयाय ददाति' 'प्र उग शंसाति 'आज्यैः स्तुवते' इत्यादावाख्यातानि। तत्र किमेकैव भावना नानाधात्वर्थानुरक्ता विधीयते, उत तत्त

१. अङ्गापूर्वभेदाधिकरणम् ।

द्धात्वर्थानुरक्ता भिन्नैवेति संशयः। एकैवेति ब्रूमः। यदि हि प्रतिधात्वर्थं भावनाभेदः स्यात्तर्हि भावनाभेदादपूर्वमपि भेदेन कल्प्यं स्यात्। न हि भाव्यापूर्वभेदमन्तरेण भावना भिद्यते, क्रियाणां फलापवर्गत्वेन फलभेदमन्तरेण क्रियाभेदस्यासंभवात्। न च शब्दान्तरत्वेन भावनाभेदसिद्धावनेकापूर्वकल्पनागौरवमपि प्रामाणिकत्वान्न रिष्यतीति[1] वाच्यम्। न हि धातुभेदो भावनां भेत्तुमीष्टे, भावनाया धातुवाच्यत्वाभावात्। प्रत्ययेन हि भावनाभिधीयते। स च सर्वत्रैक एव। अतस्तदर्थस्य भावनाया न भेदः। किंच प्रत्ययार्थत्वाद्भावना प्रधानम्। धात्वर्थास्तु तत्र गुणभूताः। न च गुणभेदेन प्रधानभेदो युज्यते। न च भावनाया अपूर्वं प्रति गुणत्वेऽपि तद्भेदाद्यथा अपूर्वभेदः एवं गुणभूतधात्वर्थभेदादपि भावनाभेदः किं न स्यादिति वाच्यम्। वैषम्यात्। आख्याते न हि भावनायाः क्रियात्वेन प्रतिपादनात्तत्र कारकत्वमेव धात्वर्थस्य न त्वपूर्ववत्फलत्वम्। ततश्च फलापवर्गत्वात्क्रियाणां तद्भेदे फलभेद आवश्यकः न तु कारकभेदे क्रियाभेदः, अरुणमादिकारकभेदेऽपि क्रयभावनाया एकत्वात्। तस्मान्न धात्वर्थभेदो भावनाभेदप्रयोजकः। न च उत्पत्तिशिष्टैकधात्वर्थावरुद्धायां भावनायां धात्वन्तरान्वयासंभवान्नैक्यमिति वाच्यम्। फलवाक्ये हि धात्वर्थाविषया केवलभावना विधीयते। अन्यत्र तु तस्यां भावनायां धात्वर्था गुणा विधीयन्ते। तथा च फलवाक्यैकवाक्यतापन्नैः सर्वैर्वाक्यैर्मिलितैः सर्वधात्वर्थविशिष्टैका भावना विधीयते इत्यविरोधः। न चैवं सर्वेषामपि धात्वर्थानां भावनां प्रति करणत्वापत्तौ न किंचिदप्यङ्गं स्यात्। तथा च इतिकर्तव्यतांशस्यालाभाद्भावना निःस्वरूपा स्यादिति वाच्यम्। 'समिधो यजति' 'तनूनपातं यजति' 'आज्यभागौ यजति' इत्याद्यसकृच्छ्रुतपर्यायधात्वर्थानुरक्तभावनाभेदस्याग्निमाभ्यासाधिकरणे साध-

1. दुष्यति...क, घ, ङ.

यिष्यमाणतया तद्विधिभिरितिकर्तव्यतालाभात्सोमलताहरणगवादिदक्षिणाद्रव्यसंपादनाक्षेयोपकल्पनादिलौकिकेतिकर्तव्यताया अर्थादेव लाभाद्वा। तस्मादेकैव भावना विधीयते। इति प्राप्ते, सिद्धान्तयति—

शब्दान्तरे कर्मभेदः कृतानुबन्धत्वात्[1] ॥ १ ॥

शब्दान्तरे धातुभेदे श्रूयमाणे कर्मभेदः भावनाभेदः प्रतीयते। कुतः। कृतानुबन्धत्वात्। कृतः अनुबन्धः धात्वर्थेनावच्छेदः यस्य भावनारूपस्य कर्मणः तत्कृतानुबन्धम्। तस्य भावस्तत्त्वम्। तस्मात्। अवच्छेदकीभूतधात्वर्थभेदादिति यावत्॥ अयमाशयः। यद्यपि प्रत्यय एकः तथापि यत्किंचिद्धात्वर्थानुरक्त एव स प्रयुज्यते, न केवलः। एवं च यथा ज्ञानं ज्ञेयविषयरूपानुरञ्जकभेदाद्भिद्यते एवं भावनाया अप्यनुरञ्जकधात्वर्थाधीननिरूपणतया धात्वर्थभेदाद्भेदो न्याय्यः। न च अनेकविषयानुरक्तसमूहालम्बनवदभेदः किं न स्यादिति वाच्यम्। सर्वेषां हि विषयाणां युगपदिन्द्रियसंनिकर्षात्संभवत्येकज्ञानानुरागः। न ह्यत्र युगपन्नानाधात्वर्थानामेकभावनानुरागः संभवति, समुदितेभ्यो धातुभ्यः प्रत्ययस्य कस्यचिदश्रवणात्केवलस्य च अश्रवणात्। यदि हि केवलः प्रत्ययः श्रूयते केवलाश्च धातवः श्रूयेरंस्तदा भवेद्युगपदेव धात्वर्थानामेकभावनानुरागः क्रीणातिवत्। क्रीणातिर्हि सकृत्पृथक्छ्रूयते, अरुणिमादयश्च। [2]अतोऽरुणिमादिभिर्युगपत्क्रयभावना विशेष्यते। नैवमत्र केवलस्य प्रत्ययस्य प्रयोगोऽस्ति। न च फलवाक्ये धात्वर्थाविवक्षया केवलप्रत्ययश्रवणम्। अन्यत्र तु भावनामनूद्य धात्वर्थमात्रविधिरिति युज्यते वक्तुम्, विनिगमनाविरहात् सर्वेषां पदानामेकप्रसरत्वेन फलवाक्योत्पन्नां भावनां प्रत्ययेनानूद्य प्रकृत्यंशैर्धात्वर्थाः करणत्वेन विधीयन्त इति कल्पनाया अयुक्तत्वाच्च। यदि च समुदितेभ्यो धातुभ्य एक एव प्रत्ययः श्रूयेत तदापि भवेद्युगपदेव धात्वर्थानामेकभावनानुरागः, द्वंद्वोत्पन्नसुबर्थवत्। 'अग्नीषोमौ' इत्यादौ हि द्वंद्वाद्विभक्तिः श्रूयते न तु प्रत्येकम्, एकैकस्य [3]द्वंद्वत्वाभावात्। अतस्तत्र द्वित्वादिकं समुदितैरेव प्रातिपदिकार्थैर्विशेष्यते। प्रकृते तु न समुदितेभ्यो धातुभ्यः प्रत्ययस्य श्रवणमस्ति, प्रत्येकमेव तस्य श्रवणात्। तथा च प्रत्ययो यजिपरः श्रूयमाणः केवलयागकरणिकां भावनां श्रुत्या एकपदोपात्तत्वरूपया विधत्ते। होमदानादयस्त्वन्यधात्वर्थास्तस्यामेव भावनायां निविशमानाः पदान्तरं गतत्वाद्वाक्येन संनिधिरूपप्रकरणेन वा निवेश्येरन्। तथा च दुर्बलाभ्यां वाक्यप्रकरणाभ्यां प्रबलायाः श्रुतेर्बाधः स्यात्। न च सत्यपि श्रुतिप्राबल्ये एकस्य करणत्वेन इतरस्याङ्गत्वेन निवेशे विरोधाभावान्न बाध इति वाच्यम्। सर्वेषामेव भावनान्वये सति विनिगमनाविरहेण सर्वेषामपि करणत्वापत्तावेकस्य[4] करणत्वमितरस्य तदङ्गत्वमित्येकांशोपनिपातेन विरोधसत्त्वात्। न च समुच्चयसंभवान्न विरोध इति वाच्यम्।

---

1. कृतानुबन्धित्वात्. 2. अतोऽरुणादिभिः...ब, ङ. 3. द्वित्वाभावात्...ख. 4. करणत्वादेकस्य.

समुच्चये सति नैरपेक्ष्यविरोधात्, 'यजेत' इत्यादिप्रकृतिप्रत्ययाभ्यां धात्वर्थभावनयोर्निरपेक्षसाध्यसाधनभावावगमात्, 'समर्थः पदविधिः' इत्यस्य प्रत्ययविधावपि प्रवृत्तेरभ्युपगमात् । यथा चैतत्तथोक्तम् 'अर्थाद्वा कल्पनैकदेशत्वात्' इत्यत्र पूर्वाध्यायान्ते । न च यथा 'अग्नये दात्रे पुरोडाशमष्टाकपालम्' इत्यादौ पृथग्विभक्तिश्रवणेऽपि दातृत्वविशिष्टाग्निलक्षणदेवताकारकमेकम्, तद्वदिहापि किं न स्यादिति वाच्यम् । दातृशब्दात्परस्या विभक्तेर्विशेषणविभक्तित्वेन साधुत्वार्थतया तत्र सत्यपि पृथक्प्रत्ययश्रवणे विशिष्टैककारकविधिसंभवेऽपि प्रकृते विशेषणविशेष्यभावाभावेन पृथक्प्रत्ययश्रवणस्य विशिष्टैकभावनाविधिबाधकत्वात् । एवं च विशिष्टविध्यसंभवे सत्यनुरुध्यकधात्वर्थभेदाद्भावनाभेदः सिद्धः । प्रयोजनं पूर्वपक्षे यागदानहोमादीनां समप्राधान्यम् । सिद्धान्ते तु भावनाभेदात्सोमयागस्यैव प्राधान्यम्, दाक्षिणहोमादीनां तु 'फलवत्संनिधावफलं तदङ्गम्' इति न्यायेन तदङ्गत्वमिति । इति शब्दान्तराधिकरणम् ॥

'समिधो यजति' 'तनूनपातं यजति' 'इडो यजति' 'बर्हिर्यजति' 'स्वाहाकारं यजति' इति पञ्चकृत्वो यजतिपदं श्रुतम् । तत्किमेकां भावनां प्रतिपादयति, उत प्रतिपदं भेदेनेति

२. समिदाद्यपूर्वभेदाधिकरणम् ।

संशयः । एकामिति ब्रूमः । प्रत्ययांशैक्येऽपि प्रकृतिभूतधात्वर्थानुरुध्यकभेदात्प्रत्ययार्थोऽपि भावना भिद्यत इत्युक्तम् । इह तु प्रकृत्यर्थस्यापि यागस्यैकत्वात्कथं भावनाभेदः । न हि पुनःश्रवणमात्रेण शब्दस्यार्थो भिद्यते । तदेव हि पदं पुनः श्रूयते, अभेदेन प्रत्यभिज्ञानात् । न च शब्दस्य भेदं विना तदर्थभेदः प्रामाणिकः । तस्मान्नात्र भावनाभेदः । ननु, मास्त्वभ्यासात्कर्मभेदलाभः । समिदादिसंज्ञाभेदात्तु कर्मभेदः स्यात् । 'अथैष ज्योतिरथैष विश्वज्योतिः' इत्यादौ संज्ञाभेदात्कर्मभेदस्य 'संज्ञा चोत्पत्तिसंयोगात्' इत्यत्रानुपदमेव वक्ष्यमाणत्वादिति चेत्, नैष दोषः । समित्तनूनपादादिशब्दानां हि संज्ञात्वं वदन्प्रष्टव्यः, संज्ञात्वावगमात्पूर्वं कर्मभेदोऽवगतो न वेति । न द्वितीयः, तर्हि यागैकत्वे सति प्राथमिकसंज्ञावरुद्धे तस्मिन्याग तनूनपादादिसंज्ञान्तरनिवेशायोगेन तनूनपादादिशब्दानां संज्ञात्वस्यैवासिद्धेः । नाद्यः, संज्ञात्वावगमात्पूर्वं कर्मभेदग्राहकप्रमाणाभावात्पुनःश्रवणस्य च दृढतराभेदप्रत्यभिज्ञासिद्धयजिधात्वर्थैकत्व[1]-विरुद्धतद्भेदप्रयोजकत्वाभावात् । एवं च तनूनपादादिशब्दानां संज्ञात्वावगमे कर्मभेदः, कर्मभेदावगमे च सति तेषां संज्ञात्वमित्यन्योन्याश्रयः । 'अथैष ज्योतिरथैष विश्वज्योतिः' इत्यत्र तु यागशब्दाभावात्तत्र यागभेदावगमं विना संज्ञात्वावगमः स्पष्ट इति वक्ष्यते । 'उद्भिदा यजेत' इत्यादौ तु धातुपारार्थ्यविप्रकृष्टविधानादिदोषप्रसङ्गेन गुणविध्यसंभवादेव संज्ञात्वनिश्चय इति प्रागेव निरूपितम् । अतस्तत्रापि यागभेदावगमं विनैव संज्ञात्वावगम इति वैषम्यम् । न चैवमपि यजतिपदस्य पुनःश्रवणानर्थक्यं शङ्क्यम्, समिद्यागे तनूनपादादिदेवताविधानार्थत्वात् । न चैवमपि गुणाद्भेदः स्यात्,

1. धात्वेकत्वलब्धयागैकत्वविरुद्ध.

'गुणश्चापूर्वसंयोगे–' इत्यधिकरणे गुणस्यापि कर्मभेदकताया अनुपदमेव वक्ष्यमाणत्वादिति वाच्यम्। वैषम्यात्। गुणाधिकरणे श्रुत्पन्नशिष्टो गुण उत्पत्तिशिष्टगुणावरुद्धे कर्मणि निवेशमलभमानः कर्म भिनत्तीति वक्ष्यते। प्रकृते च समित्संज्ञके कर्मणि तनूनपादादिगुणा उत्पन्नशिष्टाः संभवन्निवेशाः कथं कर्म भिन्द्युर्दध्यादिवत्। 'अग्निहोत्रं जुहोति' इति द्रव्यासंयुक्तोत्पन्नकर्मानुवादेन विधीयमाना हि दध्यादय उत्पन्नशिष्टाः सन्तो न कर्म भिन्दन्ति। न च 'तनूनपादग्न आज्यस्य वेतु' इत्यादिमन्त्रवर्णादेव तनूनपादादिप्राप्तेस्तद्विधिरनर्थक इति वाच्यम्। एकस्यैव यागस्य मान्त्रवर्णिकदेवतावलम्बनेन तनूनपादाद्यनेकदेवताकत्वेन प्रशस्तो याग इत्येवं स्तुत्यर्थत्वेन सार्थक्यात्। यद्यपि स्तुत्यर्थं वाक्यमनर्थप्रायम्, तथापि दृढतराभेदप्रत्यभिज्ञाबलेन कर्मैकत्वस्य न्याय्यत्वेन तन्न दोषावहम्। न हि प्रमाणस्वरसात्प्रतीयमानं प्रयोजनानुसारेण परित्यक्तुमुचितम्। न च समिद्वाक्यमेव विधिरितरे स्तुत्यर्था इत्यत्र विनिगमनाविरह इति वाच्यम्। प्रथमश्रुतत्वेन समिद्वाक्यस्यैव विधायकतया चरमश्रुतत्वेनेतरेषां स्तुत्यर्थताया उचितत्वात्। तस्मादेको यागः। तदेकत्वाद्भावनैक्यम्। इति प्राप्ते, सिद्धान्तयति—

एकस्यैवं पुनःश्रुतिरविशेषादनर्थकं हि स्यात् ॥ २ ॥

'समिधो यजति' इत्यादौ एकस्य यजतेः पुनःश्रुतिरपि एवं शब्दान्तरवद्भेदिका। हि यस्मात्कारणात् भेदाभावे विधेः पुनःश्रवणम् अनर्थकं स्यात्। न च स्तुत्यर्थत्वेन सार्थक्यं शङ्क्यम्। अप्रवृत्तप्रवर्तनं हि विधिश्रुतेः स्वभावसिद्धम्। 'य एवं विद्वान्पौर्णमासीं यजते' इति विद्वद्वाक्यं तु रूपालाभाद्बलवद्बाधकादनुवादकमिति वक्ष्यते। न चात्र किंचिद्बाधकमुपलभामहे। अतः संभवन्त्यामप्रवृत्तप्रवर्तनात्मतायामनर्थकप्रायं स्तुत्यर्थत्वं न युक्तमाश्रयितुम्। अतः कर्मभेद एव युक्तः। न चेहापि दृढतरप्रत्यभिज्ञैव बाधिकेति वाच्यम्। प्रत्यभिज्ञा हि 'स एवायं यजतिः' इत्याकारा। तत्र 'यजतिः' इत्यंश एव यजतिश्रुत्या गम्यते, न 'सोऽयम्' इति तत्तांशः, 'सोऽयम्' इत्यभेदबुद्धेः पदान्तरसंनिधिकृतत्वात्। न हि संनिधिकृतप्रत्यभिज्ञया विधिश्रुतिकृतकर्मभेदस्य बाधः संभवति। तस्माद्विधिश्रुत्या कर्मभेदः। एतेन संनिधिकृतप्रत्यभिज्ञाया अबाधाय पुनःश्रवणं गुणविधानार्थमिति निरस्तम्। यागकरणिका हि भावना [1]प्रत्ययश्रुत्या विधीयत इति कर्मविधौ श्रुत्यनुग्रहः संनिधिकृताभेदप्रत्यभिज्ञाबाधात्संनिधिबाधश्च; गुणविधौ तु तनूनपादादिगुणस्योपपदार्थस्य वाक्येन विधानं संनिधिकृताभेदप्रत्यभिज्ञाया अबाधश्चेति संनिधिवाक्यप्रमाणयोरनुग्रहः श्रुतिबाधश्च। न चैतद्युज्यते, दुर्बलाभ्यां संनिधिवाक्याभ्यां श्रुतिबाधस्यायुक्तत्वात्। ननु 'दध्ना जुहोति' इत्यादौ संनिहितप्रत्यभिज्ञाबलादेव धात्वर्थभावनयोर्विधिबोधितत्वात्पदान्तरार्थस्य दध्यादेर्विधानमङ्गीकृतम्। तद्व-

1. प्रत्ययेन--ख.

दिह्यपि किं न स्यादित्यत आह—अविशेषादिति। दध्यादिवद्विधेयविशेषस्याभावादित्यर्थः। दध्यादेरविधाने दध्यादिपदानर्थक्यापत्त्या तद्विधानावश्यकत्वेऽनेकार्थविधानाशक्त्या कर्मानुवादकाङ्क्षायां संनिधिकृताभेदज्ञानं दध्यादिरनुमन्यते। नैवम् 'तनूनपातम्' इत्यादिपदं तद्विध्यभावेऽनर्थकम्, मन्त्रवर्णप्राप्तदेवतोपजीविनो[1] नामधेयतयार्थवत्त्वसंभवात्। एवं च श्रुत्यवगतं कर्मविधानं न बाधितव्यं भवति। अतो यागभेदाद्भावनाभेदस्तद्भेदाच्चापूर्वभेद इति सिद्धम्। अत्र ब्रूमः। 'समिधो यजति' इत्येव विधिः 'तनूनपातं यजति' इत्यादयोऽर्थवादा इति पूर्वपक्षस्य कथमुन्मेषः, 'पृथक्त्वनिवेशित्वात्संख्यया कर्मभेदः स्यात्' इति वक्ष्यमाणन्यायेन संख्यया कर्मभेदस्य निश्चितत्वात्। वाजसनेयके हि 'देवाश्च ह वा असुराश्चोभये प्राजापत्या अस्पर्धन्त' इत्युपक्रम्य 'ते देवा अर्चन्तः श्राम्यन्त एतान्प्रयाजान्ददृशुः। तैरयजन्त तैर्ऋतून्प्राजनयन्नृतुभ्यः संवत्सरं संवत्सरात्सपत्नानन्तरायन्। तस्मात्प्रयाजा नाम। प्रजया ह वै नामैतद्यत्प्रयाजा इत्याहुस्तस्मात्प्रयाजैर्यजते' 'ऋतवो वै प्रयाजास्तस्मात्पञ्च भवन्ति' इत्युपक्रम्य 'त आज्यहविषो भवन्ति यत्रैव तिष्ठन्प्रयाजेभ्य आश्रावयेत्तत एव नापक्रमेत् आश्राव्याह समिधो यजेति यज यजेत्येवोत्तरानाह; समिधो यजति, अथ तनूनपातं यजति, अथेडो यजति, अथ बर्हिर्यजति, अथ स्वाहेति यजति, वेतु व्यन्त्विति यजति उत्तमे प्रयाजे यावन्ति हवींषि भवन्ति स्वाहा स्वाहेत्येव तानि यजति, उत्तमं प्रयाजमिष्ट्वा हवींष्यभिधारयति, प्रथमे प्रयाज इष्टे ब्रूयादेको ममैका तस्येति, द्वितीये द्वौ मम द्वे तस्येति, तृतीये त्रयो मम तिस्रस्तस्येति, चतुर्थे चत्वारो मम चतस्रस्तस्येति, पञ्चमे पञ्च मम न तस्य किंचनेति', 'उत्तमान्प्रयाजानावाहयन्ति प्रथमान्यजन्ति' इत्यादि श्रूयते। तत्रोत्पत्तौ 'प्रयाजैः' इति बहुवचनेन संख्यया कर्मभेदस्यैवावगतत्वात्कर्मैक्यपक्षस्यानुन्मेष एव। कर्मैक्ये च यत्रैव तिष्ठन्प्रयाजेभ्य आश्रावयेत्तत एव नापक्रामेत्' 'यज यजेत्युत्तरान्' 'प्रथमे प्रयाज इष्टे उत्तमं प्रयाजमिष्ट्वा' इत्याद्यनुपपन्नं स्यात्, 'अथ तनूनपातं यजति' 'अथेडः' इति प्रतिपदमथशब्दाश्रासमञ्जसाः स्युः। तथा सिद्धान्ते समिदादिशब्दानां नामधेयत्वकथनमप्ययुक्तम्, आनर्थक्यात्। नाम्नां हि चत्वारि प्रयोजनानि भाष्यादौ दर्शितानि। तत्र संकल्पस्त्विग्वरणादौ 'अनेनाहं यक्ष्ये' इति लघूपायेनाख्यानमेकम्। न च समिदादियागानामङ्गभूतानां संकल्पो वा ऋत्विग्वरणं वास्ति। दर्शपूर्णमासावारप्स्यमाणोऽन्वारम्भणीयामिष्टिं निर्वपति' इति क्वचिदुणोपबन्धः फलम्। न चात्र समिदादिशब्दोपबन्धेन किंचिद्विधीयमानमस्ति। न च 'समिधः पुरस्ताद्यजति' 'तनूनपातं दक्षिणतः' इत्यादिगुणोपबन्धः फलमिति वाच्यम्। 'संप्रदानस्य च कर्मसंज्ञा वक्तव्या' इति व्याकरणबलेन 'अग्निं यजति' इत्यादिवद्वितीयायाः संप्रदानत्वार्थकतया समिदादिदेवतायै आहुतिमाहवनीयस्य पुरस्ताद्भागे जुहुयादित्येवमर्थपर्यवसानेनादोषात्। 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इति

1. उपजीवनेन...क, ग, घ, ङ.

फलोपबन्धः । न चाङ्गभूतानामेतेषां फलोपबन्धसंभवः। 'अथैष ज्योतिः' इत्यादौ कर्मभेदः फलम्। संख्यया चात्र कर्मभेदः सिद्धः । तथा च नामधेयत्वे प्रयोजनाभावाद्देवतालक्षणगुणविधानार्थत्वमेव । समिदादिशब्दानां च देवतानामत्वं संकर्षकाण्डादवगतम् । तत्र हि द्वितीयाध्यायस्य द्वितीयपादे 'तत्र देवतानामादेशो न विद्यतेऽनाम्नानात्' इति पूर्वपक्षसूत्रे 'यज' इति याज्याप्रैषे देवतानामधेयं नादेष्टव्यमिति पूर्वपक्षयित्वा; 'विद्यते वान्यार्थदर्शनेभ्यः' इति सूत्रेण 'यत्तनूनपातं यजेडो यजेति ब्रूयाज्जामि स्यात्' इति प्रयाजेषु देवतादेशस्य निन्दया तदितरत्र देवतादेशविधिरनुमीयत इति सिद्धान्तयित्वा; 'आम्नातः प्रयाजेषु देवतादेशस्तस्य प्रतिषेधोवचनमितरेषु' इति गुणसूत्रेण शाखान्तरे 'तनूनपातं यज' इत्यादिप्रत्यक्षविहितस्य देवतादेशस्य 'यत्तनूनपातं यजेडो यजेति ब्रूयात्' इति निन्दा, अतः प्रयाजेभ्योऽन्यत्र न देवतादेशः 'आश्राव्य ब्रूयादिन्द्रं यजेति' 'आश्राव्य ब्रूयान्मरुतो यजेति' इत्यादिवचनाभावे सति इत्याक्षिप्य; 'आम्नातो वैकेषां तद्दर्शयत्यमुष्मा अनुब्रूह्यमुं यजेति' इति सूत्रेण सर्वत्र याज्याप्रैषादौ देवतादेशः कर्तव्य इति शाखान्तरे प्रत्यक्षविहितम्, क्वचित् 'इन्द्रं यज' इत्यादिवचनं त्वनुवाद इति समाहितम् । न च 'समिधो अग्न आज्यस्य वियन्तु' इत्यादिमन्त्रवर्णत एव तत्प्राग्नेरानर्थक्यमिति वाच्यम् । हे अग्ने, समिधः आज्यं प्राप्नुवन्तु इत्येवमग्नेः शाब्दप्राधान्यान्मन्त्रस्तुत्यत्वलक्षणदेवतात्वम्, समिदादीनां तु हविर्भागित्वलक्षणं देवतात्वमित्युभयेषामपि देवतात्वेन 'यस्यै देवतायै हविर्गृहीतं स्यात्तां ध्यायेद्वषट्करिष्यन्' इति संकर्षकाण्डे वक्ष्यमाणदेवताशब्दध्यानादिकार्यमग्निशब्दस्य निवर्तयितुं समिदादिदेवताविधानस्यावश्यकत्वात् । न चैवं सति कौषीतकिब्राह्मणे 'देवासुरा एषु लोकेषु संयत्ता [1]आसंस्तेभ्योऽग्निरपाक्रामत्' इति प्रस्तुत्य 'स एतं वरं वव्रे प्रयाजान्मेऽनूयाजांश्च केवलानूर्जस्वन्तं हविषो दत्तभागं घृतं चापां पुरुषं चौषधीनामिति तस्मादाहुराग्नेयाः प्रयाजानूयाजाः' इत्यग्निदेवत्यत्वश्रवणविरोध इति वाच्यम् । अत एव विकल्पो पपत्तेः । वस्तुतस्तु 'समिधो यजति' इत्यादयो होतुर्याज्याविधय एवेत्युचितम्, 'आश्राव्याह समिधो यजेति यज यजेत्युत्तरान्' इत्यनन्तरम् 'समिधो यजति' इत्याम्नानात् । 'समिधो यज' इत्याध्वर्यवसंप्रैषानन्तरं होतुर्याज्यानुक्रमणस्यैव प्राप्तावसरत्वात् । 'समिधो यज' इति संप्रैषस्य हि 'होतः समिधो याज्यया प्रकाशय' इत्यर्थः, देवतोद्देश्यकद्रव्यत्यागे होतुर्नियोजनासंभवात् । 'समिधो यजति' इत्यादेरप्ययमेवार्थः । 'समिधः समिधो अग्न आज्यस्य वियन्तु' इत्यादियाज्या वदतीति पर्यवस्यति । न च 'आग्नेयाः प्रयाजाः' इति कौषीतकिब्राह्मणरीत्याग्निदेवत्यत्वे 'समिधो यज' इति संप्रैषानुपपत्तिरिति वाच्यम् । तत्राग्निशब्दस्य समिदादिनामकाग्निविशेषपरत्वेनाविरोधात्, संकर्षकाण्डे द्वितीयस्य द्वितीयपादाद्याधिकरणे 'स यत्रैतदध्वर्युराह समिधो यजेत्याग्नेयमेतद्रूपं [2]परोक्षमग्निं यजेत्येव तदाह' इत्यादिभाष्योदाहृतश्रुतेश्च । 'समिदादयोऽग्निविशेषाः प्रयाजदेवताः'

1. आसुः...क, ख, ग, घ. 2. आग्नेयमेव तद्रूपं...क, घ, ङ.

इत्युपक्रम्य भट्टभास्करीयवेदभाष्ये समिदादिशब्दानां तथैव व्याख्यातत्वाच्च । तद्यथा समिध्यन्ते येन भावाः । समिद्वासन्तिकोऽग्निः । तदा हि भावाः समुज्ज्वला भवन्ति । बहुत्वमविवक्षितम् । 'समिधो बर्हीरिव यजति' इति बहुत्वस्येवशब्देनापारमार्थिकत्वद्योतनात् । हे अग्ने आहवनीय समिन्नामा वासन्तिकोऽग्निः आज्यं प्राप्नोत्वित्यर्थः । [1]तनूं न पातयिता संशोषयिता ग्रैष्मोऽग्निः । तदा हि भावानां शोषो भवति । इषमन्नं करोति इट् वार्षिकोऽग्निः । 'तत्करोति' इति णिचि क्विपि रूपम् । तदा हि सस्यान्युद्भवन्ति । बहुत्वमविवक्षितम् । 'इडो बर्हीरिव यजति' इति ब्राह्मणम् । बृंहणाद्बर्हिः शारदोऽग्निः । तदा हि भावा बृंहन्ति । स्वाहाशब्देन दाहो लक्ष्यते । तं करोतीति स्वाहाकारः हैमन्तिकोऽग्निः । तदा खलु हिमाग्निना भावा दग्धाः अवसन्ना भवन्तीति । यद्वा समिदादिशब्दा उक्तव्युत्पत्त्या वसन्तादिपराः, 'वसन्तो वै समित्' 'ग्रीष्मो वै तनूनपात्' इत्यादिवाक्यशेषात् । तथा च हे अग्ने समिदादिशब्दवाच्यो वसन्तादिः आज्यं प्राप्नोतु, स वसन्तादिस्तुभ्यमपि दास्यतीत्यर्थः; अन्यथा 'अग्ने' इति संबोधनस्य वैयर्थ्यात् । अत एव वाजसनेयके 'ऋतवो ह वै यज्ञे देवेषु भागमीषिरे' इत्युपक्रम्य श्रूयते 'तान्होग्निरुपामन्त्रयांचक्रे । ते होचुः । कं भागमभ्ययामेति । स होवाच । प्रथमानेव वो यज्ञेन यजामहा इति । तथेति होचुः । वयं त्वान्वाभजामेति । यो नो अग्ने देवेषु भागमविद इति । स एषोऽग्निर्ऋतुष्वन्वाभक्तः समिधो अग्ने तनूनपादग्ने इडो अग्ने इति । तदग्निमन्तः सर्वे प्रयाजाः । अन्वाभक्तो ह वै तस्यां साधुकृत्यायाम्' इत्यादि । अतोऽग्निदेवत्यत्वप्रतिपादनपरकौषीतकिब्राह्मणस्यापि न विरोधः । तस्मात्समिदादिवाक्यानि याज्याविधिपराण्येव । अत एव 'देवा ह वै यज्ञं तन्वानाः' इत्युपक्रम्य 'तमेतस्मिन्नेवोत्तमे प्रयाजे स्वाहाकारेण सर्वं यज्ञं समस्थापयन् । स्वाहाग्निमिति तदाग्नेयमाज्यभागम् । स्वाहा सोममिति तत्सौम्यमाज्यभागम् । स्वाहाग्निमिति तदाग्नेयमष्टाकपालं पुरोडाशं योऽयमुभयत्राच्युतो भवति । अथ यथादेवतं स्वाहा देवा आज्यपा इति । तत्प्रयाजानूयाजानाह । जुषाणा अग्न आज्यस्य वियन्त्विति तत्स्विष्टकृतम् । तस्मादुत्तमे प्रयाजे यावन्ति हवींषि स्वाहा स्वाहेत्येव तानि यजन्ति' इति याज्याव्याख्यानपुरःसरमुत्तमप्रयाजमनूद्य इतिशब्देन तद्विधिः संगच्छते । कर्मविधिपरत्वे तु तदसंगतिः स्पष्टैव । तैत्तिरीयकेऽपि 'सत्यं प्रपद्ये' इति मन्त्रसमाम्नायस्य कृत्स्नप्रभस्य विनियोजकं ब्राह्मणम् 'देवा वै नर्चि' 'अयज्ञो वा एषः' 'अग्ने महाꣳ असीत्याह' 'त्रींस्तृचाननुब्रूयात्' 'निवीतं मनुष्याणाम्' 'समिधो यजति' 'चक्षुषी वा एते यज्ञस्य' 'मनुः पृथिव्या यज्ञियम्' 'पशवो वा इडा स्वयम्' 'अग्नीध आदधाति' 'देवा वै यज्ञस्य' इत्याम्नातम् । तस्मादितः पञ्चभिरनुवाकैः 'अग्निर्होता वेत्वग्निः' इति स्रुगादापननिगदान्ते मन्त्रसमाम्नाये विनियुक्ते तदनन्तरपठिताः 'समिधो अग्न आज्यस्य वियन्तु' इत्यादिमन्त्राः 'समिधो यजति' इत्यनुवाके

1. तनूनां न पातयिता संकोचयिता—क, ग, घ, ङ.

विनियोज्यन्त इत्युचितम् । 'चक्षुषी वा एते यज्ञस्य' इत्यनुवाके तदनन्तरमन्त्राणाम् 'अग्निर्वृत्राणि' इत्यादीनाम् 'ऋचमनूच्याज्यभागस्य जुषाणेन यजति' 'मूर्धन्वती पुरोनुवाक्या भवति' 'नियुत्वत्या यजति' 'पुरस्ताल्लक्ष्मा पुरोनुवाक्या भवति उपरिष्टाल्लक्ष्मा याज्या' इति विनियोगवचनाच्च । मध्ये 'आधारमाधारयति' 'अभिक्रामं जुहोति' इत्याद्याध्वर्यवाम्नानं तु प्रासङ्गिकम् । तथा बाह्यृच्ये कौषीतकब्राह्मणे हौत्रैकविधिपरे 'अथ पुरस्तात्सामिधेनीनां जपति' इति प्रस्तुत्य सामिधेन्यनुवाचनादिस्तुगादापनान्तमनुक्रम्य 'प्रयाजान्यजति । ते वै पञ्च भवन्ति । समिधो यजति, तनूनपातं यजति, इडो यजति, बर्हिर्यजति, स्वाहाकृतिमन्ततो यजति, उत्तमे प्रयाजे देवताः समावपति, पौर्णमास्यां वार्त्रघ्नावाज्यभागौ भवतोऽमावास्यायां वृधन्वन्तौ, अग्निं प्रथमं देवतानां यजति, अथ पौर्णमास्यामग्नीषोमौ यजति' इत्यादि । तस्मात्समिदादिवाक्यानि याज्याविधिपराण्येवेति वेदार्थज्ञानकुशला मीमांसकशिरोमणयो विदांकुर्वन्तु । अधिकरणस्योदाहरणं तु 'वाजप्रसवीयं जुहोति' 'राष्ट्रभृतो जुहोति' 'वातनामानि जुहोति' इत्याद्युदाहार्यम् । इत्यभ्यासाधिकरणम् ॥

३. आधाराद्याग्नेयादीनामङ्गानिभावाधिकरणम् ।

'यदाग्नेयोऽष्टाकपालोऽमावास्यायां च पौर्णमास्यां चाच्युतो भवति' 'ताभ्यामेतदग्नीषोमीयमेकादशकपालं पूर्णमासे प्रायच्छत्' 'उपांशुयाजमन्तरा यजति' 'तावब्रूतामग्नीषोमावाज्यस्यैव नावुपांशु पौर्णमास्यां यजन्' 'ऐन्द्रं दध्यमावास्यायाम्' 'ऐन्द्रं पयोऽमावास्यायाम्' इति कालसंयुक्तानि वाक्यानि श्रूयन्ते। तथा 'प्रयाजान्यजति' 'आज्यभागौ यजति' 'स्विष्टकृतं यजति' इत्यादीन्यकालसंयुक्तानि । तत्संनिधाविदमाम्नायते 'य एवं विद्वान्पौर्णमासीं यजते' 'य एवं विद्वानमावास्यां यजते' इति । तत्र संशयः, किमत्र यजती अपूर्वयोः कर्मणोः पौर्णमास्यमावास्यासंज्ञकयोर्विधातारौ, उताग्नेयादियागानां कालसंयुक्ततया श्रुतानां तादृशकालरूपप्रवृत्तिनिमित्तकाभ्यां पौर्णमास्यमावास्यापदाभ्यां विशेष्यमाणावनुवदितारविति। विधिपुनःश्रुत्या विधायकाविति ब्रूमः। न च द्रव्यदेवतयोरलाभात्कथं यागान्तरतेति वाच्यम् । 'सर्वस्मै वा एतद्यज्ञाय गृह्यते यद्ध्रुवायामाज्यम्' इति द्रव्यलाभात् 'वार्त्रघ्नी पूर्णमासेऽनूच्येते वृधन्वती अमावास्यायाम्' इति वाक्यविनियुक्तमन्त्रवर्णतो देवतालाभाच्च । 'अग्निर्वृत्राणि' 'त्वं सोमासि' इत्यृचौ वृत्रहननप्रकाशिके वार्त्रघ्न्यौ । 'अग्निः प्रत्नेन मन्मना' 'सोम गीर्भिष्ट्वा वयम्' इत्यृचौ वृद्धिप्रकाशकत्वाद्वृधन्वत्यौ । छान्दसं रूपम् । अनूच्येते पुरोनुवाक्ये क्रियेते । न च 'सर्वस्मै वा एतद्यज्ञाय गृह्यते' इति वाक्यस्य वैशब्दोपबन्धेन विधायकत्वासंभवात्, 'वार्त्रघ्नी पूर्णमासे' इति वाक्ययोश्च, मन्त्रसमाम्नाये अविशेषपठितस्य पुरोनुवाक्यायुगलद्वयस्याज्यभागयोः कालद्वयगतयोरव्यवस्थया प्राप्तौ, तयोर्व्यवस्थार्थत्वस्य तृतीयाद्ये 'मिथश्चानर्थ—' इत्यत्र वक्ष्यमाणत्वाच्च न ततो द्रव्यदेवतालाभ इति वाच्यम् । 'सर्वस्मै' इति स्पष्टतादर्ढ्यचतुर्थीबलेन विधायकत्वे सिद्धे वैशब्दस्य

यदाग्नेयादिवाक्ये यच्छब्दस्येव विधिशक्तिप्रतिबन्धकत्वाभावात् 'मिथश्चानर्थ—' इत्यधिकरणसिद्धान्तस्य एतदधिकरणपूर्वपक्षावसरेऽनुन्मेषाच्च। तत्र हि वार्त्रघ्नीवृधन्वतीवाक्ययोः आग्नेयादिषु मन्त्रविधायकत्वं न भवति, तेषाम् 'अग्निर्मूर्धा' इत्यादिपुरोनुवाक्यावरुद्धत्वात् केवलस्य सोमस्य देवतात्वाभावेन सोमदेवत्ययाज्यानुवाक्यायुगलस्य तेषु विध्यसंभवाच्च; नाप्याज्यभागयोर्मन्त्रविधायकत्वम्, तयोः क्रमादेव तत्प्राप्तेः; अत आज्यभागयोः पुरोनुवाक्याव्यवस्थापकत्वं तद्वाक्ययोरिति सिद्धान्तो भविष्यति। विद्वद्वाक्ययोर्विधायकत्वे च तद्विहितकर्मणोरेव मन्त्रविधानमिमे वाक्ये कर्तुं शक्नुतः, मन्त्रान्तरावरोधरूपबाधकाभावात्। न च संनिधानादाज्यभागयोरेव मन्त्रप्राप्तिरस्त्विति वाच्यम्। वाक्यतो विद्वद्वाक्यविहितकर्मणोर्मन्त्रविधिसंभवे दुर्बलसंनिधिवशेनाज्यभागार्थताया असंभवात्। एवं चेदानीमाज्यभागयोः पुरोनुवाक्यायुगलद्वयस्य प्राप्तेरेवाभावेन तद्व्यवस्थार्थत्वसिद्धान्तस्य कथमुन्मेषः। न च विद्वद्वाक्यविहिते एकैकस्मिन्कर्मणि पुरोनुवाक्यायुगलस्य कथं संनिवेश इति वाच्यम्। एकस्या ऋचः पुरोनुवाक्यात्वेन अन्यस्या याज्यात्वेन च समावेशोपपत्तेः। न च 'अनूच्येते' इति विरोधः शङ्क्यः, याज्याया अपि प्रैषानन्तरमुच्चारणीयत्वेन तदविरोधात्। न चैवं सति कथमाज्यभागयोर्मन्त्रदेवताप्राप्तिरिति वाच्यम्। 'जुषाणो अग्निराज्यस्य वेतु' 'जुषाणः सोम आज्यस्य हविषो वेतु' इत्यनयोराज्यभागाभ्यामन्यत्र विधानाभावेन तयोः संनिधिप्राप्ताज्यभागाङ्गत्वानपायात् तत एवाज्यदेवतयोर्लाभात्। [1]अनुवाक्याद्वयं च तयोरग्निदेवत्यं सोमदेवत्यं चागमयितव्यम्। अतो द्रव्यदेवतालाभसंभवाद्विद्वद्वाक्ये अपूर्वकर्मविधायके। अन्यथा तयोरानर्थक्याच्च। न च षण्णामपि यागानां समुदायद्वयसिद्ध्यर्थं, त्रिकभेदेन पौर्णमास्यमावास्यासंज्ञाद्वयसिद्ध्यर्थं वानुवादः, ततश्च 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इति फलवाक्येन कालसंयुक्तसमुदायद्वयस्य फलसंबन्धः सिध्यतीति वाच्यम्। पौर्णमास्यमावास्याशब्दयोः संज्ञात्वेऽपि फलवाक्यगतदर्शपूर्णमासशब्दयोः संज्ञात्वासिद्ध्या कालसंयुक्तानामेव फलसंबन्धस्यासिद्धेः। फलवाक्ये दर्शपूर्णमासशब्दयोर्न समुदायपरत्वम्, यजिसामानाधिकरण्यविरोधात्। न हि समुदायो यागाला भवति। किंतु समुदायिपरत्वमिति समुदायद्वयसिद्ध्यापि कालसंयुक्तानामेव फलसंबन्धस्यासिद्धेश्च। विद्वद्वाक्ययोरविधायकत्वे 'पौर्णमास्यां पौर्णमास्या यजेतामावास्यायाममावास्यया' इत्यानर्थक्याच्च। न हीमे वाक्ये आग्नेयादीनां कालविधायके भवतः, यदाग्नेयादिवाक्यैरेव तत्प्राप्तेः। न च यदाग्नेयादिवाक्यैः कालसंयोगावगमेऽपि षण्णामेकैकस्मिन्नेकस्मिन्वा पर्वणि प्रयोगः स्यात्तन्मा भूत्, किंत्वेकस्य त्रिकस्य पौर्णमास्यां सहप्रयोगः अन्यस्यामावास्यायामिति सहप्रयोगसिद्ध्यर्थे ते वाक्ये इति वाच्यम्। 'य इष्ट्या पशुना सोमेन वा यजेत सोऽमावास्यायां पौर्णमास्यां वा यजेत'

---

1. अनुवाक्याद्वयं च तयोरग्नीषोमदेवताकम् 'अग्नीषोमाविमं सुमे अग्नीषोमा हविषः प्रस्थितस्य' इत्यादिकमागमयितव्यम्। —क.

इति कालविधौ सत्यपि सर्वासामिष्टीनां सर्वेषां पशुबन्धानां सोमानां च यथा न सहप्रयोगः एवमिहापि सत्यपि कालविधौ सहप्रयोगासिद्धेः। विद्वद्वाक्ययोः कर्मान्तरविधायकत्वे तु तयोः कर्मणोः कालविधानेन 'पौर्णमास्यां पौर्णमास्या' इत्यादिवाक्ये सार्थके भवतः। न चैवं सति पौर्णमास्यमावास्याशब्दयोः संज्ञात्वे सति [1]ताभ्यां विद्वद्वाक्यविहितकर्मानुवादेन कालविधिः, कालविधौ च तयोस्तत्प्रख्यन्यायेन नामत्वमिति परस्पराश्रय इति वाच्यम्। प्रवृत्तिनिमित्तानिश्चयेऽपि सामानाधिकरण्यमात्रेण 'अथैष ज्योतिः' इत्यादिवत्संज्ञात्वनिश्चयसंभवेनान्योन्याश्रयानवकाशात्। अतो विद्वद्वाक्ये विधायके। एवं चाग्नेयादियागानां षण्णां विद्वद्वाक्यविहितयागयोः प्रयाजादीनां च सर्वेषां यागानां प्राधान्यं फलति, फलवाक्ये यजिना सर्वेषामपि विशेषेण परामर्शात्। न च तत्र 'दर्शपूर्णमासाभ्याम्' इति विशेषणादर्शपूर्णमासकालयुक्तश्रुतयागविशेषपरत्वं यजेः शङ्कयम्, कालसंयुक्तानां यागानां बहुत्वेन द्विवचनानुपपत्तेः। न च समुदायद्वयाभिप्रायं द्विवचनमिति वाच्यम्। [2]समुदायद्वयं हि किं फलवाक्यादन्यत्र सिद्धम्, उत फलवाक्य एव। नाद्यः, एकावगत्यनुप्रवेशेन हि कर्मणामेकसमुदायापत्तिः। एकावगतिश्चैकाभिधानप्रयुक्ता। न चात्रैकाभिधानमस्ति, विद्वद्वाक्यव्यतिरिक्तस्य कस्यचिद्वाक्यस्य समुदायद्वयलम्भकस्यादर्शनात्। विद्वद्वाक्ययोश्चैकैककर्मविधायकत्वाङ्गीकारात्। न द्वितीयः, फलवाक्यगतयजिना तन्त्राभिधानेन समुदायनिष्पत्त्यङ्गीकारे सर्वेषां समुदायस्यैकत्वेन द्विवचनानुपपत्तेः। न च दर्शपूर्णमासशब्देनैकैकस्य त्रिकस्य तन्त्राभिधानात्समुदायद्वयसिद्धिरिति वाच्यम्। 'दर्शपूर्णमासाभ्याम्' इति हि यजिविशेषणत्वात्तत्परतन्त्रम्। यजिश्च सकृच्छ्रुतत्वाद्युगपदेव सर्वान्यागान्परामृशति। न तु त्रीन्यागान्प्रथममभिधाय पश्चादन्यांस्त्रीन्यागानभिधातुमुत्सहते। न च युगपत्समुदायद्वयमेव तन्त्रेण कुतो नाभिधत्त इति वाच्यम्। समुदायद्वयस्य प्रागसिद्धेः। सिद्धावपि फलवाक्ये दर्शपूर्णमासपदं तदभिप्रायं न भवति, यजिसामानाधिकरण्यविरोधात्। न चैवं सर्वेषां प्राधान्येऽपि तन्त्राभिधानशक्त्या एकसमुदायनिष्पत्तौ तदभिप्रायमेकवचनमेव स्याद्राजसूयवत्, ततश्च द्विवचनानुपपत्तिस्तुल्येति वाच्यम्। न [3]हि तद्विवचनान्तम्, द्विवचनविभक्तिप्रतिरूपकाव्युत्पन्नप्रातिपदिकरूपत्वात्। एवं च दर्शपूर्णमासशब्दयोः कालनिमित्तत्वाभावेन तदसंयुक्तानामपि फलसंबन्धः। तस्माद्विद्वद्वाक्ये अपूर्वकर्मविधायके। इति प्राप्ते, सिद्धान्तयति—

प्रकरणं तु पौर्णमास्यां रूपावचनात् ॥ ३ ॥

तुरवधारणे। पौर्णमासीग्रहणमुपलक्षणम्। पौर्णमासीशब्दघटिते अमावास्याशब्दघटिते च विद्वद्वाक्ये प्रकरणं प्रकृतमेवाग्नेयादिकर्मजातमनूद्यते, न तु कर्मान्तरं विधीयते। कुतः। रूपावच-

1. ताभ्यां शब्दाभ्यां —क, ग, घ, ङ. 2. समुदायद्वयं हीदं फल—ग; समुदायद्वयं हि फल —क, घ, ङ. 3. हीदं द्विवचनान्तम्—क, घ, ङ.

नात्। द्रव्यदेवते यागस्य रूपम्, तस्य देवतोद्देश्यकद्रव्यत्यागात्मकत्वात्। तद्वचनस्य द्रव्यदेवता-प्रापकस्याभावात्॥ तथाहि—'सर्वस्मै वा एतत्—' इति वाक्यं वैशब्दोपबन्धान्न प्रौवाज्यस्य सर्वयज्ञार्थतापापकम्, 'प्रजापतिर्देवेभ्यो यज्ञान्व्यादिशत्, स आत्मन्नाज्यमधत्त, तं देवा अब्रुवन्नेव वाव यज्ञो यदाज्यमप्येव नोऽत्रास्त्विति, सोऽग्रवीद्यजान् व आज्यभागावुपस्तृणानभिघारयानिति, तस्माद्यजन्त्याज्यभागावुपस्तृणन्त्यभिघारयन्ति' इति प्राजापत्योपांशुयाजाज्यभागोपस्तरणाभिघार-णार्थत्वावगमाच्च। कथंचित्तस्य सर्वयज्ञार्थतासंभवेऽपि देवता न लभ्यते। न च वार्त्रघ्नीवृधन्वतीवा-क्यविनियुक्तमन्त्रवर्णतो देवतालाभः शङ्क्यः, तद्वाक्ययोर्लिङ्गक्रमाभ्यामाज्यभागयोरव्यवस्थाप्राप्तम-न्त्राणां लिङ्गक्रमाबाधेन व्यवस्थामात्रविधायकत्वे लाघवेन संभवति, विद्वद्वाक्यविहितकर्मणोरप्राप्तम-न्त्रविधायकत्वस्य गौरवपराहतस्य लिङ्गक्रमबाधस्य चायुक्तत्वात्। वार्त्रघ्न्योर्हि ऋचोः एका अग्नि-देवत्या अन्या सोमदेवत्या। तयोश्च विद्वद्वाक्यविहिते एकस्मिन्कर्मणि पुरोनुवाक्यात्वेन याज्यात्वेन च विनियोगो नावकल्पते। तद्धि कर्म अग्निदेवत्यं सोमदेवत्यमुभयदेवत्यं वा स्यात्। तत्राग्निदेव-त्यत्वे सोममन्त्रस्यानन्वयः। सोमदेवत्यत्वे अग्निमन्त्रस्यानन्वयः। उभयदेवत्यत्वे चोभयम-न्त्रानन्वय इति सर्वथा लिङ्गबाधः स्यात्। एवं वृधन्वत्योरपि। अतो न मन्त्रवर्णतो देव-तालाभसंभवः। ननु, अत्र किं पौर्णमास्याममावास्यायां काले यावाज्यभागौ तत्र वार्त्रघ्नयौ वृधन्वत्यौ इति विवक्षितम्, उत पौर्णमास्याममावास्यायां कर्मणि यावाज्यभागाविति। नाद्यः, आज्यभागयोराग्नेयादिवदुत्पत्तौ कालसंयोगाभावेन तयोस्तत्कालीनत्वेनानुवादासंभवात्। न द्वितीयः, समप्राधान्यमिति वदन्तं पूर्वपक्षिणं प्रति पौर्णमासीकर्माङ्गाज्यभागानुवादेन मन्त्रव्यवस्थाया वक्तुमशक्यत्वादिति चेन्न। आज्यभागयोः प्राधान्येऽपि य इष्ट्यादिवाक्येन पौर्णमास्यमावास्याकाल-प्राप्तिसंभवेन कालमुखेन व्यवस्थाया वक्तुं शक्यत्वात्। न चैवं सति पौर्णमास्यां दर्शविकारानुष्ठाने वार्त्रघ्नयौ स्यातां वृधन्वत्यौ च न स्याताम्, एवममावास्यायां पूर्णमासविकारानुष्ठाने वृधन्वत्यौ स्यातां वार्त्रघ्नयौ च न स्यातामिति चेन्न। इष्टापत्तेः। बोधायनादिसूत्रे कालमुखेनापि व्यवस्थाया दर्शितत्वात्। वस्तुतस्तु कर्ममुखेनैव व्यवस्था। परं त्वाज्यभागयोरपि प्रधानत्वात्पौर्णमास्यङ्गभूतावाज्यभागौ प्रति वार्त्रघ्नयोर्व्यवस्थाविधिर्न संभवतीति वदन्तं पूर्वपक्षिणं प्रति कालमुखेन व्यवस्थाविधिसंभवान्न त्वदभिमतसिद्धिरित्युच्यत इत्यदोषः। न च यागस्य देवतां विनानुपपत्तेर्देवता कल्प्यतां विश्वजिति स्वर्ग इवेति वाच्यम्। यागानुपपत्त्या अस्ति काचिद्देवतेति सामान्यतोऽवगमेऽपि विधिं विना इयम-स्य देवतेति अनुष्ठानौपयिकदेवताविशेषानवगमात्। तथा च रूपालाभेन विधायकत्वासंभवादगत्या विद्वद्वाक्ये आग्नेयादिप्रकृतयागानुवादके। तत्र पौर्णमासीवाक्येन पौर्णमासीकालसंयुक्तानां त्रयाणा-मनुवादः। अमावास्यावाक्येन च अमावास्याकालसंयुक्तानां त्रयाणामनुवादः। एकैकेन चानुवादे-नैकावगत्यनुप्रवेशादेकैकसमुदायापत्तिः। तदेकत्वात्पौर्णमासीममावास्यामित्येकवचनम्। ततश्च काल-

द्वययुक्तसमुदायद्वयसिद्धिः । तेन प्रसिद्धार्थकं दर्शपूर्णमासपदं फलवाक्ये यजिं शक्नोति विशेष्टुम् । ननु, विद्वद्वाक्ययोर्यजिभ्यां त्रयाणां कालसंयुक्तानामनुवाद इत्यनुपपन्नमविशेषात् । न च पौर्णमासी-ममावास्यामित्युपपदवशात्तत्तत्कालसंयुक्तमात्रपरत्वं यजत्योरिति वाच्यम् । एकवचनान्तपौर्णमास्य-मावास्याशब्दयोरनेकयागपरयजिसामानाधिकरण्यासंभवेन तद्वशेन व्यवस्थाया असंभवात् । ततश्च विद्वद्वाक्यस्थनाम्नोरेव यजिपरतन्त्रत्वावश्यंभावेन यजिद्वयस्य संनिहितसर्वयागानुवादस्वरसतया तद्व-शेन नाम्नोरपि सर्वप्रकृतयागनामत्वमेव स्यादिति चेन्न । 'य एवं विद्वान्पौर्णमासीं यजते यावदु-कथ्येनोपाप्नोति तावदुपाप्नोति' 'य एवं विद्वानमावास्यां यजते यावदतिरात्रेणोपाप्नोति तावदुपाप्नोति' इति विद्वद्वाक्यगतपौर्णमास्यमावास्याशब्दितयोर्व्यवस्थितफलार्थवादः श्रूयते । स च पौर्णमास्यमा-वास्याशब्दद्वयस्य व्यवस्थितार्थत्व एव घटते नान्यथेति तदुपपत्त्यर्थं तयोर्न सर्वप्रकृतनामत्वम्, किंतु कतिपयनामत्वमेव । तत्रापि तत्तत्कालयुक्तकर्मनामत्वमेव न्याय्यमिति तदनुसारेण तत्कालयो-गिष्वेव विद्वद्वाक्यस्थयजिप्रवृत्तेरवश्यवाच्यत्वात् । एवं च समुदायद्वयसिद्धौ तत्रोपपदस्य प्रसि-द्धत्वात्तदनुसारेण कांस्यभोजिन्यायेन कालसंयुक्तेष्वेव यजिप्रवृत्तेस्तेषामेव प्राधान्यम् । न च समुदायद्वयसिद्धावपि फलवाक्ये दर्शपूर्णमासपदं कथं तत्परम्, यजिसामानाधिकरण्यविरो-धादिति वाच्यम् । समुदायस्य यागत्वाभावेऽपि समुदायद्वारा लक्षणया समुदायिषु वृत्ति-संभवेन यजिसामानाधिकरण्योपपत्तेः । विद्वद्वाक्याभ्यां यजिकृततन्त्राभिधानलब्धसमुदायद्वयस्य पौर्णमास्यमावास्यापदाभ्यामनुवादबलतः पौर्णमास्यमावास्यारूपसंज्ञाकरणबलात् कालसंयुक्तानामेव प्रत्यभिज्ञाबलेनापि तेषामेव फलसंबन्धः । न च विद्वद्वाक्यतः पौर्णमास्यमावास्याशब्दयोः संज्ञात्वसिद्धावपि दर्शपूर्णमासशब्दयोस्तदसिद्धया कथं फलवाक्ये कालसंयुक्तानामेव परामर्श इति वाच्यम्, पौर्णमास्यमावास्याशब्दयोर्दर्शपूर्णमासशब्दयोश्च पर्यायत्वात् । यथा चैतत्तथा चतुर्थे वक्ष्यामः । न च विद्वद्वाक्ययोरपूर्वकर्मविधायकत्वाभावे 'पौर्णमास्यां पौर्णमास्या यजेत' इति व्यर्थं स्यादिति वाच्यम् । षण्णामपि यागानामेकैकस्मिन्नेकस्मिन्नेव वा पर्वणि प्रयोगप्राप्तावेकस्य त्रिकस्य पौर्णमास्यां प्रयोगः अन्यस्यामावास्यायामिति सहप्रयोगार्थत्वात् । न चैवं सति य इष्ट्यादिवाक्येन सर्वेषामिष्टिपशुसोमानां[1] सहप्रयोगः स्यादिति वाच्यम्, वैषम्यात् । फलवाक्ये फलं प्रति विवक्षित-साहित्यानामाग्नेयादीनां विनियोगात्फलार्थिनां युगपत्कर्तव्यतावगमेनान्योन्यानपेक्षैरेव तैः कालः संबध्यते । यथा चैतत्तथा एकादशस्य द्वितीयाद्याधिकरणे वक्ष्यामः ।

विद्वद्वाक्ययोरपूर्वकर्मविधायकत्वे बाधकान्तरमाह—

विशेषदर्शनाच्च पूर्वेषां समेषु ह्यप्रवृत्तिः स्यात् ॥ ४ ॥

1. पशुबन्धानाम्—क, ख, ग, घ, ङ.

चशब्द उक्तसमुच्चये। विद्वद्वाक्ये कर्मान्तरविधायके न भवतः। तथात्वे हि प्रयाजादीनामपि प्राधान्यं स्यात्। न चैतद्युज्यते। कुतः। हि यस्मात्कारणात् प्रधानतया समेषु प्रयाजाग्नेयादिषु सत्सु पूर्वेषां प्राकृतानां प्रयाजादीनां विकृतिषु प्रवृत्तिर्न स्यात्, अङ्गानामेवातिदेशस्य वक्ष्यमाणत्वात्। तच्चानिष्टम्। कुतः। विशेषदर्शनात् क्वचिद्विकृतौ प्रयाजाद्यनुवादेन विधेयविशेषस्य दर्शनात्। यथा 'यो ब्रह्मवर्चसकामः स्यात्तस्मा एतं सौर्यं चरुं निर्वपेत्' 'प्रयाजे प्रयाजे कृष्णलं जुहोति' इत्यादि। अतोऽपि विद्वद्वाक्ये न विधायके॥

ननु वार्त्रघ्न्यादिवाक्यतो रूपलाभाभावेऽपि [1]यदाग्नेयादिवाक्यैस्तल्लाभाद्विद्वद्वाक्ययोर्विधायकत्वमस्त्विति पूर्वपक्षी प्रत्यवतिष्ठते—

गुणस्तु श्रुतिसंयोगात्॥ ५॥

तुः प्रत्यवस्थाने। रूपालाभाद्विद्वद्वाक्ये न विधायके इति न युज्यते। यतः यदाग्नेयादिवाक्यैर्विद्वद्वाक्यविहितयागयोरन्यादिदेवतालक्षणः पुरोडाशादिद्रव्यलक्षणश्च गुणो विधीयते न तु यागः। कुतः। श्रुतिसंयोगात् विद्वद्वाक्यविहितौ हि यागौ प्रत्यक्षश्रुतिसंयुक्तौ। अतस्तदनुवादेन गुणविधाने सति यदाग्नेयादिवाक्येषु न कश्चिदश्रुतार्थः कल्प्यः। यागविधायकेषु तु तेषु द्रव्यदेवतासंबन्धाद्यागोऽनुमातव्यः स्यात्। अतो रूपलाभाद्विद्वद्वाक्ये विधायके स्याताम्। न च प्राप्तकर्मानुवादेनानेकगुणविधाने विध्यावृत्त्या वाक्यभेदप्रसङ्गः, विद्वद्वाक्यविहितयागानुवादेन गुणमात्रविधायकानामाग्नेयादिवाक्यानां विशिष्टविधित्वस्याप्यसंभवादिति वाच्यम्। गुणविधिस्थले हि गुणस्य सिद्धरूपतया स्वतो विधेयत्वाभावेन गुणविशिष्टभावनाया एव विधिसंबन्धः, न केवलं गुणस्य। ततश्च नात्र प्राप्तकर्मानुवादेन साक्षादनेकगुणविधिः। किंत्वनेकगुणविशिष्टभावनाविधिः। एवं च विशिष्टकर्मविधाविव विधेः सकृदेव व्यापार इति न विध्यावृत्तिरिति भावः।

सिद्धान्ती प्रत्याचष्टे—

चोदना वा गुणानां युगपच्छास्त्राच्चोदिते[2] हि तदर्थत्वात्तस्य तस्योपदिश्येत॥ ६॥

वाशब्द एवार्थे। यदाग्नेयादिवाक्यानि गुणविशिष्टयागचोदना एव, न तु विद्वद्वाक्यविहितयागानुवादेन गुणमात्रविधयः। कुतः। युगपच्छास्त्रात्। शास्त्रं शासनं विधानम्। युगपदनेकगुणानां विधानप्रसङ्गात्। तस्य च वाक्यभेदप्रसङ्गेनायुक्तत्वात्। ननु विशि-

---

1. यदाग्नेयादिवाक्यैस्तल्लाभसंभवात्—क, घ, ङ. 2. शासनाच्चोदिते.

ष्टभावनाविधानान्न वाक्यभेद इत्यत आह— चोदिते हीति। चोदिते प्राप्ते कर्मणि प्रत्ययस्य तत्तद्गुणविधानार्थत्वात् तस्य तस्य गुणस्य विधानार्थः प्रत्ययः पुनः पुनरुच्चार्येत। अयमाशयः। प्रवर्तनारूपशाब्दभावनात्मकविधेः प्रवृत्तिरूपार्थभावनागर्भतया तावद्गुणविशिष्टभावनागर्भतया प्रथमं प्रतीयमानोऽपि विधिर्भावनांशस्य विद्वद्वाक्यत एव प्राप्ततया तत्परत्वाभावेन विशेषणीभूतगुणपरः सन् गुणांशे पर्यवस्यति, यत्र विधेः पर्यवसानं तस्यैव विधेयत्वात्। भावनांशस्य विध्यन्वितततया प्रतीयमानत्वमात्रेण विधेयत्वे फलस्यापि विधेयत्वापातात्। ततश्चानेकगुणविधिस्वीकारे सर्वत्र विधेस्तात्पर्यात्सर्वत्र पर्यवसानं वाच्यम्। न च सकृच्छ्रुतस्य विधेरनेकत्र पर्यवसानं संभवतीति विध्यावृत्तिरवर्जनीया। न चैवं सति 'सोमेन यजेत' इति गुणविशिष्टविधिर्न स्यात्। तत्रापि विशेषणविधिपर्यवसानार्थमावृत्तिप्रसङ्गादिति वाच्यम्। वैषम्यात्। विशिष्टविधिस्थले विशेषणेन विना विशिष्टस्यासिद्धया अर्थापत्त्यैव विशेषणविधिसिद्धौ न श्रुतस्य विधेर्विशेषणे पृथक् पर्यवसानमपेक्षितम्, किंतु विशिष्ट एवेति न तत्रावृत्तिप्रसङ्गः। प्राप्तकर्मानुवादेन गुणविधिस्थले तु नैवमाक्षेपाद्विशेषणलाभः, भावनारूपस्य कर्मरूपस्य वा विशेष्यस्यान्यतः प्राप्ततया विधेर्विशिष्टपरत्वाभावात् केवलगुणपरत्वमेव वाच्यम्। तच्चैकस्येतरविशिष्टस्य विधिर्न संभवति, 'गुणानां च परार्थत्वात्—' इति न्यायेन तेषां परस्परवैशिष्ट्याभावात्। ततश्चैकेन विहितेनेतरस्यानाक्षेपात्प्रतिगुणं पृथगेव विधेस्तात्पर्यतः पर्यवसानं वाच्यमिति तत्र विध्यावृत्तिरनिवार्या। न चैवं सति 'पशुना यजेत' इत्यादावपि प्राप्तकर्मानुवादेन जातिलिङ्गसंख्याकारकाणां विधानं न स्यादिति वाच्यम्। वैषम्यात् 'पशुना' इत्यनेन हि क्रियान्वयात्प्रागेव प्रकृतिप्रत्ययाभ्यां जातिलिङ्गसंख्याविशेषितं [1]कारकमुपस्थितम्। तदुपस्थितौ च न विधेर्व्यापारः। कारकप्राधान्यं हि पशवेकत्वाधिकरणे वक्ष्यते। एवमभ्युदितेष्टौ 'ये क्षोदिष्ठास्तान्विष्णवे शिपिविष्टाय शृते चरुम्' इत्यादिभिन्नपदोपस्थानस्थले 'विष्णवे शिपिविष्टाय' इति सामानाधिकरण्येन शिपिभिः रश्मिभिः विष्ट इति योगानुगृहीतेन शिपिविष्टत्वविशिष्टो विष्णुः क्रियासंबन्धात्प्रागेवोपस्थितः 'प्र तत्ते अद्य शिपिविष्टनामार्यः शꣳसामि वयुनानि विद्वान्' इत्यादिमन्त्रतः 'यः पशोर्भूमा या पुष्टिस्तद्विष्णुः शिपिविष्टः' 'यज्ञो वै विष्णुः पशवः शिपिः' इत्यार्थवादतश्च प्रसिद्धमेव विष्णोः शिपिविष्टत्वम्। न तत्र विधेर्व्यापारः। अतस्तत्र तद्विशिष्टस्य विष्णोर्विधानं युज्यते। प्रकृते तु 'आग्नेयोऽष्टाकपालः' इत्यादिसामानाधिकरण्यबलेन शब्दतो विशिष्टार्थप्रतिपादनसंभवेऽपि विनैव विधिना वस्तुतः प्रसिद्धसंबन्धत्वाभावान्न विधिसंभवः। न ह्याग्नेयत्वाष्टाकपालत्वादीनां वैशिष्ट्यं प्रमाणान्तरेण सिद्धम्। अत्रैव तु विधाने भवेद्वाक्यभेदः। अत आग्नेयादिवाक्यानि न प्राप्तकर्मानुवादेन गुणविधय इत्यनेकगुणविशिष्टयागान्तरविधायकत्वमेषामभ्युपेयम्। ततश्च यदाग्नेयादिवाक्यतोऽपि [2]रूपालाभाद्विद्वद्वाक्ये न विधायके।

1. कारकमेकम्— क, घ, ङ. 2. रूपलाभाभावात्—क, घ, ङ.

इतोऽप्याग्नेयादिवाक्यानां न गुणविधित्वमित्याह—

व्यपदेशश्च तद्वत् ॥ ७ ॥

'उग्राणि ह वा एतानि हवींषि संभ्रियन्ते, आग्नेयः प्रथमः, ऐन्द्राग्न उत्तरः' इति पौर्वापर्यव्यपदेशोऽप्याग्नेयादिवाक्यानां विशिष्टयागविधायकत्वं प्रागुक्तवाक्यभेदवत्साधयति। विद्वद्वाक्यविहितकर्मानुवादेन गुणविधित्वे तु पौर्णमासीयागे आग्नेयपुरोडाशाग्नीषोमीयोपांशुयाजाग्नीषोमीयपुरोडाशानां विकल्पः स्यात्। अमावास्यायागेऽपि आग्नेयः पुरोडाशः, सोमयाजिन ऐन्द्रं दधि, ऐन्द्रं पयः, असोमयाजिन ऐन्द्राग्नः पुरोडाशः इत्येषां विकल्पः स्यात्। तथा सत्युदाहृतपौर्वापर्यानुवादो नोपपद्येत ॥

पूर्वपक्षद्वयेऽपि बाधकं लिङ्गमाह—

लिङ्गदर्शनाच्च ॥ ८ ॥

'चतुर्दश पौर्णमास्यामाहुतयो हूयन्ते, त्रयोदशामावास्यायाम्' इत्यस्ति वाक्यशेषः। पञ्च प्रयाजा द्वावाज्यभागौ स्विष्टकृन्नयोऽनूयाजाश्चेत्येकादशाहुतयः, आग्नेयोपांशुयाजाग्नीषोमीयाहुतस्तिस्र इति चतुर्दश पौर्णमास्याम्। अमावास्यायां तु ता एकादशाहुतयः, आग्नेयसांनाय्याहुती द्वे दधिपयसोरेकदेवताकत्वेन तदाहुतेरेकत्वात्, इति त्रयोदशेति तदर्थः। तदेतल्लिङ्गदर्शनमाग्नेयादिभ्यो विद्वद्वाक्ययोः कर्मान्तरपरत्वेऽधिकसंख्याकत्वापातात्तेषां गुणविधित्वे न्यूनसंख्याकत्वापातादसमञ्जसं स्यात्। तस्माद्विद्वद्वाक्ये प्रकृतयागसमुदायानुवादके। इति पौर्णमास्यधिकरणम् ॥

दर्शपूर्णमासयोः श्रूयते 'जामि वा एतद्यज्ञस्य क्रियते यदन्वञ्चौ पुरोडाशावुपांशुयाजमन्तरा यजति, विष्णुरुपांशु यष्टव्योऽजामित्वाय प्रजापतिरुपांशु यष्टव्योऽजामित्वायाग्नीषोमावुपांशु यष्टव्यावजामित्वाय' इति। अन्वञ्चौ अव्यवहितौ पुरोडाशसाध्यौ आग्नेयाग्नीषोमीययागौ यत्क्रियेते तदेतत् जामि आलस्यजनकम्, एकरूपत्वात्। अतस्तौ यागौ अन्तरा तदन्तरालकाले उपांशुयाजं यजतीत्यर्थः। तत्र 'उपांशुयाजमन्तरा यजति' इति विष्ण्वादिसंयुक्तानां यागानां समुदायानुवादः, उतापूर्वकर्मणो विधिरिति संशयः। तत्र पूर्वपक्षयति—

४. उपांशुयाजापूर्वताधिकरणम्।

पौर्णमासीवदुपांशुयाजः स्यात् ॥ ९ ॥

पौर्णमासीशब्दयुक्तविद्वद्वाक्यवदुपांशुयाजशब्दयुक्तम् 'उपांशुयाजमन्तरा यजति' इति

वाक्यमपि प्रकृतयागानुवादकं स्यात् न त्वपूर्वकर्मविधायकम्, रूपालाभात् ॥ यद्यपि प्रौवाज्यं लभ्यते द्रव्यं देवता तु न लभ्यते । न च 'इदं विष्णुः' 'त्रीणि पदा' 'प्रजापते न त्वत्' 'स वेद पुत्रः' 'अग्नीषोमा यो अद्य वाम्' 'आन्यं दिवो मातरिश्वा' इति वैष्णवप्राजापत्याग्नीषोमीययाज्यानुवाक्यायुगलानां पुरोडाशयागीययाज्यानुवाक्यायुगलयोरन्तरा[1] पाठात्तत एवास्ति देवतालाभ इति वाच्यम् । एतेषां त्रयाणामपि युगलानां लिङ्गक्रमाभ्यां विष्ण्वादिवाक्यविहितयागत्रय एव समावेशसंभवे सति अन्तरालवाक्यविहितकर्मणि अलब्धदेवते सामर्थ्यापरिज्ञानेन समावेशासंभवात् । न च विष्ण्वादिवाक्यजातमर्थवाद इति शङ्क्यम् । विध्यर्थकतव्यप्रत्ययश्रवणेन विष्ण्वादिदेवताकयागविधायकत्वस्यैव युक्तत्वात् । 'संप्रदानस्य च कर्मसंज्ञा वक्तव्या' इति संप्रदानस्यापि कर्मत्वेन 'विष्णुं यजति' इत्यादौ देवताया द्वितीयावत्कर्मणिविहितस्याप्युपपत्तेः । किंच उपक्रमोपन्यस्तजामित्वदोषाभावप्रतिपादनपरस्य 'अजामित्वाय' इत्यस्य विष्ण्वादिवाक्येष्वेव श्रवणात्तत्रैव विधिशक्तिरुत्तभ्यत इति प्रत्येकमेव विधिर्वाच्यः । अन्यथा त्रिष्वप्यजामित्वोक्तेरानर्थक्यात् । न च 'जामि वा एतत्' इति दोषस्य सकृच्छ्रवणादेकवाक्यत्वमेव न्याय्यमिति वाच्यम् । सकृच्छ्रुतस्यापि तस्य त्रिष्वपि तेष्वनुषङ्गेण तच्छेषत्वोपपत्तेः । अतो रूपालाभाद्वर्तमानापदेशाच्चान्तरालवाक्यं न विधायकम् । न चान्तरालकालविधायकं तदिति शङ्क्यम्, अजामित्वानुकीर्तनबलादेवान्तरालकाल एव विष्ण्वादियागविधेः पर्यवसानात् । तथा च कृत्स्नमेवान्तरालवाक्यं प्रकृतविष्ण्वादियागानुवादकम् । ततश्च 'तावब्रूतामग्नीषोमावाज्यस्यैव नावुपांशु पौर्णमास्यां यजन्' इति कालवाक्यस्थेन यजिना सर्वेषां ग्रहणं सिध्यति । अन्यथा 'नौ' इत्यग्नीषोमप्रतिपादकोपपदमहिम्ना अग्नीषोमीययागमात्रस्य स्यात् । सति तु समुदायानुवादे तद्बलात्समुदायीकृतानां त्रयाणामपि यागानामनुवादः, अग्नीषोमप्रतिपादकनौशब्दग्रहणं च त्रयाणामपि यागानामुपलक्षणार्थं स्यात् । ततश्च सर्वेषां कालविधौ ग्रहणे सति फलवाक्येन ग्रहणात्फलसंबन्धः सिध्यतीति पूर्वः पक्षः ।

सिद्धान्तयति—

चोदना वाप्रकृतत्वात् ॥ १० ॥

वाशब्द एवार्थे । 'उपांशुयाजमन्तरा यजति' इति अन्तरालकालसंयुक्तोपांशुगुणकयागविधिरेव, न तु प्रकृतविष्ण्वादियागानुवादः, अप्रकृतत्वात् विष्ण्वादिवाक्यानामर्थवादत्वेनाविधायकतया ततो विष्ण्वादियागानामनुपस्थितत्वात् ॥ तथाहि—उपक्रमे पुरोडाशयागयोरव्यवहितत्वनिमित्तकजामित्वदोषकीर्तनादन्तरालयुक्तया किंचित्कर्म विधेयमिति निश्चिततया तदनुसारेणान्तरालवाक्य-

1. युगलान्तरा—क, घ, ङ.

स्यैवान्तरालयुक्तकर्मविधायकत्वं स्वीकार्यम्; न तु स्वरसतो विधिसमर्थानामपि विष्ण्वादिवाक्यानाम्, अन्तरालयोगाभावात्। न ह्यन्तरालेऽविहितानामजामित्वेन प्रशंसा युज्यते। न च तेषु प्रत्येकमजामित्वप्रशंसावगमात्प्रत्येकमेव विधिर्युक्त इति वाच्यम्। उपक्रमे अव्यवधानप्रयुक्तजामितादोषकीर्तनेनाजामित्वप्रशंसाया अप्युपक्रमदशायामेवान्तरालयुक्तविधिविषयकताया निश्चितत्वेन विष्ण्वादिषु प्रशंसावगमस्यैवाभावात्। न चाजामित्वकीर्तनबलादेव विष्ण्वादिवाक्येष्वन्तरालकाललाभात्तेष्वपि विधिः संगच्छत इति वाच्यम्। विष्ण्वादिवाक्यैरन्तराललाभ आर्थिकः। अन्तरालवाक्येन तु तल्लाभः शाब्दः। न ह्युपक्रमस्थजामितादोषादवगतमन्तरालयुक्तं कर्म किमित्याकाङ्क्षाम् अन्तराशब्दघटितवाक्ये पूरयति, आर्थिकान्तरालप्राप्त्यनुगृहीतविष्ण्वादिवाक्यानां तत्पूरकता युज्यते। तस्मात् 'उपांशुयाजमन्तरा यजति' इत्युपांशुगुणको यागोऽन्तरालकाले विधीयते। विष्ण्वादिवाक्यं च मन्त्रवर्णप्राप्तविष्ण्वादिदेवतानुवादेनार्थवादः। एवं च जामित्वोपक्रमादजामित्वोपसंहाराच्चावगतमेकवाक्यत्वमप्यनुगृहीतं भवति। 'जामि वा एतद्यज्ञस्य' इत्यस्यानुषङ्गोऽपि नाश्रितो भवति। पुनः पुनरजामित्वसंकीर्तनं तु प्रशंसातिशयार्थमिति सिद्धमन्तरालवाक्यस्य विधायकत्वम्।

ननु अन्तरालवाक्ये उपांशुयाजशब्दस्य न गुणविधित्वम्, वाक्यभेदप्रसङ्गात्; नापि नामत्वम्, तत्प्रख्याद्यभावात्, इत्यत आह—

गुणोपबन्धात् ॥ ११ ॥

उपांशुयाजशब्देनोपांशुत्वगुणस्यैव उपबन्धात् विधानात् विशिष्टविधानाच्च न वाक्यभेद इति पार्थसारथिमतानुसारिणी व्याख्या, 'उपांशुत्वगुणको यागोऽन्तरालोपलक्षितकाले विधीयते' इति शास्त्रदीपिकायामभिधानात्। भाष्ये तु 'उपांशु पौर्णमास्यां यजन्' इति कालसंबन्धपरे वाक्ये उपांशुत्वगुणस्योपबन्धात्तन्निमित्तमुपांशुयाजनामधेयमिति व्याख्यातम्॥

ननु अन्तरावाक्यस्य विष्ण्वादियागसमुदायानुवादकत्वाभावे 'तावब्रूताम्—' इति कालपरे वाक्ये 'नौ' इत्यग्नीषोमप्रतिपादकोपपदमहिम्ना अग्नीषोमीयमात्रस्य ग्रहणं स्यात्, न तु वैष्णवप्राजापत्ययोः। ततश्च फलवाक्ये तयोरश्रवणात्प्राधान्यं न स्यात्, इत्यत आह—

[1]प्राये वचनाच्च ॥ १२ ॥

प्रधानभूताग्नेयाग्नीषोमीययागीययाज्यानुवाक्यायुगलयोर्मध्ये वैष्णवप्राजापत्याग्नीषोमीयवाज्यानुवाक्यायुगलानामाम्नानान्निविधस्याप्युपांशुयाजस्य प्राधान्यमवगम्यते। तद्बलादेव 'तावब्रूताम्—' इति कालपरे वाक्ये 'नौ' इत्यस्योपलक्षणार्थत्वं सिद्धमिति भावः। प्रयोजनं पूर्वपक्षे

1. प्रायवचनाच्च.

वैष्णवादियागास्त्रयोऽपि समुच्चयेनानुष्ठेयाः, सिद्धान्ते त्वेक एव विकल्पितविष्ण्वादिदेवताको याग इति दिक्। इत्युपांशुयाजाधिकरणम् ॥

'अग्निहोत्रं जुहोति' 'दध्ना जुहोति' 'पयसा जुहोति' 'यवाग्वा जुहोति' इत्यादि श्रुतम्, 'आघारमाघारयति' 'ऊर्ध्वमाघारयति' 'ऋजुमाघारयति' 'संततमाघारयति' इत्यादि

५. आघाराद्यपूर्वताधिकरणम्।

च। तत्र किम् 'अग्निहोत्रं जुहोति' इति दध्यादिवाक्यप्राप्तसमुदायानुवादः, 'आघारमाघारयति' इति च 'ऊर्ध्वमाघारयति' इत्यादिवाक्यप्राप्तानुवादः; उत 'अग्निहोत्रं जुहोति' इत्यपूर्वकर्मविधिः दध्यादिवाक्यानि तत्र गुणविधयः, 'आघारमाघारयति' इति चाघारविधिः ऊर्ध्वादिवाक्यानि तत्रैव गुणविधयः इति संशये, पूर्वपक्षयति—

आघाराग्निहोत्रमरूपत्वात् ॥ १३ ॥

आघारवाक्यमग्निहोत्रवाक्यं च न विधायकम्। कुतः। अरूपत्वात् विधेयरूपराहित्यात्। न ह्यत्र [1]सामान्यरूपं विधेयम्, तस्यानुष्ठानायोग्यत्वात्। नापि विशेषः, तस्य 'अयमसौ' इत्यनिश्चितत्वेन विधातुमशक्यत्वात् ॥

नन्वग्निहोत्रसंज्ञकमिदं कर्मेत्येवं संज्ञयैव विशेषावगमः संभवतीत्यत आह—

संज्ञोपबन्धात् ॥ १४ ॥

'अपि न विशेषावगमः' इति शेषः। विशेषरूपेण ज्ञातस्यैव संज्ञोपबन्धात्कर्मविशेषापरिज्ञाने कस्येयं संज्ञेत्यपरिज्ञानात्संज्ञयापि न विशेषावगमसंभवः। उद्भिदादिस्थले तु चोदकतो रूपलाभात्संभवति विशेषावगमः ॥

ननु दध्यादिवाक्ये गुणविधानाद्विशेषावगमः संभवतीत्यत आह—

अप्रकृतत्वाच्च ॥ १५ ॥

प्रकृते हि कर्मणि दध्यादिगुणविधिरिति वक्तव्यम्। तच्च न संभवति, कस्यचित्कर्मणः अप्रकृतत्वात्। न च अग्निहोत्रवाक्यतः कर्म प्रकृतमिति शङ्क्यम्। तथा सति दध्यादिवाक्यैर्गुणविधौ सति ततो विशेषावगमादग्निहोत्रवाक्यस्य कर्मविधायकत्वम्, तस्मिंश्च सति दध्यादिवाक्यैर्गुणविधानमित्यन्योन्याश्रयात्। चशब्दोऽनुक्तयुक्त्यन्तरसमुच्चयार्थः। तद्यथा— अग्निहोत्रवा-

1. धात्वर्थसामान्यं—क, घ, ङ.

क्रय विधायकत्वेऽपि तत्र दध्यादिवाक्यैर्गुणविधानं न संभवति, प्रवर्तनात्मकविधिना पुरुषव्यापारादन्यस्य विधातुमशक्यत्वात् । तथा च दध्यनुरक्तो व्यापारो विधेयः । स च होमात्मकोऽग्निहोत्रवाक्येनैव प्राप्त इति तस्य पुनर्विधानमनर्थकम् । न चोत्पन्नस्यापि कर्मणो यथा फलादौ पुनर्विधानं तद्वदिहाप्यग्निहोत्रवाक्योत्पन्नस्य कर्मणो गुणविशिष्टतया पुनर्विधिरस्त्विति वाच्यम् । विधिर्हि चतुर्धा— फलनिमित्तयोः कर्मविधिरधिकारविधिः, देशकालयोः कर्मविधिः प्रयोगविधिः, संस्कार्ये शेषतया कर्मविधिर्विनियोगविधिः, एतत्त्रितयभिन्नो विधिरुत्पत्तिविधिः इति । तत्र दध्यादिवाक्येषु गुणविशिष्टतया विधिस्वीकारेऽधिकारादिविधिक्रियानन्तर्भावेण परिशेषादुत्पत्तिविधिरेव वाच्यः । उत्पत्तिविधिभेदे च कर्मभेद आवश्यकः । एवं चेहापि कर्मभेदावश्यंभावादग्निहोत्रवाक्यविहितकर्मणो गुणविशिष्टतया पुनर्विधिः संभवति । अतो दध्यादेरन्यतोऽप्राप्तत्वेन मन्त्रवर्णप्राप्तविष्ण्वाद्यनुवादेन तद्वाक्यमिव स्तावकत्वासंभवेन दध्यादिवाक्यानां दध्यादिविशेषकर्मविधित्वे सति तद्विहितकर्मसमुदायानुवादकमग्निहोत्रवाक्यम् । तत्र यद्यपि दध्यादिवाक्येषु देवता न श्रूयते, 'यदग्नये च' इत्यादिवाक्येषु द्रव्यं न श्रूयते, मन्त्रविधिस्थले मान्त्रवर्णिकदेवतालाभसंभवेऽपि द्रव्यं न लभ्यते, एतेषां च सर्वेषां वाक्यानां तत्तद्गुणविशिष्टकर्मान्तरविधायकतया न क्वापि कर्मणि द्रव्यदेवतोभयलाभसंभवः; तथापि दध्यादिवाक्यैर्देवतोद्देशरहितं त्यागप्रक्षेपमात्रं विधीयते, 'यदग्नये च' इत्यादिवाक्येषु अग्न्यादेर्द्रव्यसंबन्धेऽसति मुख्यदेवतात्वासंभवादग्न्यादीनामुद्देशमात्रम्, चतुर्थ्यन्तशब्देन निर्देशलक्षणं विधीयते । मन्त्रविधिस्थलेऽपि मन्त्रस्योच्चारणमेव विधीयते । एतेषु च वाक्येषु जुहोतिस्तत्तद्विधेयत्यागप्रक्षेपादिषु लाक्षणिकः । तेषां च प्रक्षेपादीनां सर्वेषाम् 'अग्निहोत्रं जुहोति' इत्ययमनुवादः । तत्प्रयोजनम् 'अग्निहोत्रं जुहुयात्स्वर्गकामः' इति फलवाक्ये सर्वेषां ग्रहणम्, 'अग्निहोत्रम्' इत्येकत्वनिर्देशस्य समुदायीकरणं विनानुपपत्तेः । किंच समुदायानुवादाभावे 'यदग्नये च' इत्यादिवाक्यविहिताग्निसंबन्धिकर्मण एवोपपदवशात्फलवाक्ये ग्रहणं स्यात् । सति तदनुवादे तत्सामर्थ्यात्प्रकृतानां सर्वेषामग्निहोत्रशब्दो नामधेयमित्यवगमात्सर्वेषां फलसंबन्धसिद्धिः । एवमाधारवाक्येऽप्यूर्ध्वादिवाक्यविहितानामूर्ध्वत्वार्जवसांतत्यतन्त्रविशिष्टकर्मणां[1] समुदायानुवादः । ततश्च 'चतुर्गृहीतं वा एतदभूत्स्याधारमाधार्य' इति प्रयाजार्थाज्यरूपे संस्कार्ये आधारविनियोजकवाक्ये सर्वेषां ग्रहणं सिध्यति, 'आधारम्' इत्येकत्वनिर्देशस्य समुदायीकरणं विनानुपपत्तेः । तस्मादग्निहोत्रवाक्यमाधारवाक्यं च न विधायकमिति पूर्वः पक्षः । सिद्धान्तयति—

चोदना वा शब्दार्थस्य प्रयोगभूतत्वात्तत्संनिधेर्गुणार्थेन पुनःश्रुतिः ॥ १६ ॥

1. मन्त्र...—क, ख, ग, घ, ङ; मन्त्रादि...—च.

वाशब्द एवार्थे । अग्निहोत्रवाक्यमाधारवाक्यं च चोदना अपूर्वकर्मविधायकमेव, न तु प्रकृतकर्मणामनुवादः । कुतः । आधारयतिशब्दार्थस्य जुहोतिशब्दार्थस्य च प्रयोगमनुष्ठानं प्राप्तत्वात् । आधारहोमयोरनन्यप्राप्तत्वेनावश्यविधेयत्वादित्यर्थः । ननूर्ध्वादिवाक्यैर्दध्यादिवाक्यैश्च विशिष्टकर्मविधायकैः प्राप्तत्वादनन्यप्राप्तत्वं तयोरसिद्धमित्यत आह— गुणार्थेन पुनःश्रुतिरिति । 'निमित्तपर्यायप्रयोगे सर्वासां प्रायदर्शनम्' इति तृतीया चतुर्थ्यर्थे । ऊर्ध्वत्वादिदध्यादिगुणविधानप्रयोजनाय 'आधारयति' 'जुहोति' इति पुनःश्रुतिः अनुवाद इत्यर्थः । ननु संनिहितं धात्वर्थं परित्यज्य प्रत्ययः कथं गुणं विदध्यादित्यत आह— तत्संनिधेरिति । तस्य गुणस्य विशेष्यधात्वर्थानुप्रवेशेन प्रत्ययसंनिधानादित्यर्थः ॥ अयं भावः । 'सोमेन यजेत' इत्यादिषु वाक्यान्तरेण कर्मणोऽप्राप्तेरगत्या गौरवमप्यङ्गीकृत्य विशिष्टविधानमभ्युपगम्यते । इह त्वाधाराग्निहोत्रवाक्यतः प्राप्तकर्मानुवादेन गुणमात्रविधाने संभवति न विशिष्टविधित्वमूर्ध्वादिवाक्यानां न्याय्यमाश्रयितुम् । ततश्चाधाराग्निहोत्रवाक्ययोरप्राप्तार्थत्वाद्विधिपरत्वे निश्चिते तद्बलादेव सामान्यस्यायोग्यत्वात्तल्लक्षितो विशेष एव विधीयते । स च विशेषः 'अयमसौ' इति विशिष्यानवगतोऽप्यन्यत्राविहितोऽयं कश्चिद्धोमविशेष इत्येतावन्मात्रेणावगत इति कृत्वा विध्यर्हः । एवं च विशिष्य ज्ञानस्यानपेक्षितत्वान्न पूर्वपक्षोक्तान्योन्याश्रयावकाशः । तावन्मात्रावगमेनापि संज्ञोपबन्धोपपत्तेर्न संज्ञादुर्घटत्वं च । न च तस्यापि विशेषस्य रूपालाभादपर्यवसानमिति वाच्यम् । दध्यादिवाक्यतस्तल्लाभात् । न चाव्यापारत्वात्केवलस्य दध्यादिगुणस्य विधानं न संभवतीति वाच्यम् । होमादिव्यापारविशिष्टस्य तस्य विधातुं शक्यत्वात् । न चैवं सति गुणस्य साक्षाद्विधिविषयत्वाभावेन गुणविशिष्टकर्मविषयतया विधेः प्रतीयमानतया कर्मोत्पत्तिपरत्वापत्तौ कर्मभेदः स्यादिति वाच्यम् । कर्मणः प्राप्तत्वेन तत्स्वरूपज्ञाने विधेरतात्पर्यात् अप्राप्तगुणांश एव विधेस्तात्पर्यात् । विधितात्पर्यविषय एव हि विधेयः, न तु विधिसंबन्धितया प्रतीयमानमात्रम् । ततश्च दध्यादिवाक्यस्य कर्मोत्पत्तिविधित्वाभावेनाग्निहोत्रवाक्योत्पन्नकर्मणो दध्यादिवाक्ये दध्यादिगुणविशिष्टतया प्रतीयमानत्वेन न भेदप्रसक्तिः । एवमाधारवाक्येऽपि । तथा चाधारवाक्यमग्निहोत्रवाक्यं च प्रकृतकर्मलाभाभावाद्गुणालाभसद्भावाच्च विधिरेव, न तु समुदायानुवादः । प्रयोजनं पूर्वपक्षे दध्यादिवाक्यविधेयानां कर्मणां समुच्चयेनानुष्ठानम्; सिद्धान्ते त्वेकस्मिन्नेव कर्मणि दध्यादीनां विकल्पितत्वान्न समुच्चय इत्यादि । आधारादिवाक्ये तूर्ध्वत्वादिगुणेषु यस्य भ्रंशस्तद्गुणकस्य कर्मणः पुनरनुष्ठानं पूर्वपक्षे; सिद्धान्ते तु कर्मभेदाभावाद्गुणानुरोधेन प्रधानावृत्त्ययोगाद्गुणलोपप्रायश्चित्तमित्यादि । इत्याधाराग्निहोत्राधिकरणम् ॥

'अग्नीषोमीयं पशुमालभेत' इत्यत्रालभतिः किम् 'हृदयस्याग्रेऽवद्यत्यथ जिह्वाया अथ वक्षसः' इत्यादिविहितानां कर्मणां समुदायस्यानुवादः, उतापूर्वकर्मविधायक इति संशयः । तथा

६. पशुसोमापूर्वता-धिकरणम्। 'सोमेन यजेत' इति यजतिः 'ऐन्द्रवायवं गृह्णाति' 'मैत्रावरुणं गृह्णाति' इत्यादिविहितकर्मणां समुदायस्यानुवादः, उतापूर्वकर्मविधायक इति संशयः। तत्र दध्यादिवाक्येषु कर्मविध्यभावेनाग्निहोत्राधारवाक्ययोरनुवादकत्वासंभवेऽपि हृदयाद्यैन्द्रवायवादिवाक्येषु कर्मविध्यवश्यंभावेन आलभतियजत्योस्तदनुवादकत्वमेव युक्तम्। 'ऐन्द्रवायवम्' इति द्वितीयया गम्यमानं हि साध्यत्वमुत्पाद्यतया वा संस्कार्यतया वा। नाद्यः, देवतातद्धितान्तेन देवतासंबन्धिद्रव्यवाचिना ऐन्द्रवायवादिशब्देन प्रतीयमानस्य द्रव्यदेवतासंबन्धस्य यागैकघटनीयस्य ग्रहणेन त्यजयितुमशक्यतया 'ऐन्द्रवायवादिद्रव्यं ग्रहणेनोत्पादयेत्' इत्यर्थस्यायुक्तत्वात्। न द्वितीयः। अवहननादिसंस्कार्याणां व्रीह्यादीनाम् 'व्रीहिभिर्यजेत' इत्यादिशास्त्रान्तरेण सिद्धिवदैन्द्रवायवत्वादिविशिष्टद्रव्यस्यासिद्धत्वेन तदुद्दिश्य ग्रहणसंस्कारविधानायोगात्, सोमवाक्यस्य यागविधायकत्वे उत्पत्तिशिष्टसोमरूपलताद्रव्यस्य ग्रहणेन संस्कारानुपपत्तेश्च, धारादिवाक्यतो ग्रहणस्य रसविषयत्वावगमात्। एतेन 'ऐन्द्रवायवं ग्रहणेन भावयेत्' इत्यदृष्टार्थविधित्वमपि प्रत्युक्तम्, देवतासंबन्धानुपपत्त्या आरादुपकारकस्यापि ग्रहणस्य विध्यनुपपत्तेः। तस्मादैन्द्रवायवादिवाक्येषु द्रव्यदेवताभ्यां ग्रहणेन च विशिष्टयागा विधीयन्ते। न चैन्द्रवायवादिशब्दस्य 'तस्येदम्' इति संबन्धसामान्यविहिततद्धितान्तत्वमेवास्तु, तथा चेन्द्रवाय्वादिप्रकाशकमन्त्रेण क्रियमाणे ग्रहणे करणमन्त्रद्वारा इन्द्रवायुवैशिष्ट्यस्य ग्रहणद्वारा द्रव्ये च तद्वैशिष्ट्यस्योपपत्तेर्ग्रहणमात्रविधिसंभव इति वाच्यम्। सामान्यस्यानुष्ठानानौपयिकत्वेनानुष्ठानौपयिकसंबन्धविशेषाभिधायिदेवतातद्धितान्तत्वे संभवति 'तस्येदम्' इति संबन्धसामान्याभिधायितद्धितान्तत्वाश्रयणस्यायुक्तत्वात्[1], 'सास्य देवता' इत्यधिकारे 'द्यावापृथिवीशुनासीरमरुत्वदग्नीषोमबास्तोष्पतिगृहमेधाच्छ च' इति विशिष्यविहितदेवतातद्धितच्छप्रत्ययान्तेन 'मरुत्वतीयं गृह्णाति' इति वाक्यगतमरुत्वतीयशब्देन सहचरितानामैन्द्रवायवादिशब्दानां तदवैरूप्याय देवतातद्धितान्तत्वस्यैवाश्रयितुं युक्तत्वाच्च। एवं च प्रकृतानामैन्द्रवायवादियागानां सोमवाक्ये यजिः समुदायानुवादः; सोमशब्दोऽपि न विधिः। स हि गृह्णातिना अनियमेन प्राप्तस्य ग्राह्यद्रव्यस्य नियमविधिपरो वा प्रकृतिद्रव्यविधिपरो वा स्यात्। नाद्यः, तर्ह्यैन्द्रवायवादिवाक्यविहितयागेषु सोमलताद्रव्यस्य हविष्ट्वप्रसङ्गात्। न चेष्टापत्तिः शङ्क्या, 'अण्व्या धारया गृह्णाति' इति गुणवाक्यपर्यालोचनया धारासमर्थजलादिरूपद्रव्यविशेषस्य निश्चितत्वेन सोमलतालक्षणद्रव्यविधेरसंभवात्। न च सोमस्य रसीभावेनापि धारावाक्यस्योपपत्तेर्न स्वतःसिद्धजलादिद्रवद्रव्यस्य प्राप्तिरिति वाच्यम्। रसीभावे सत्युत्पत्तिशिष्टलतारूपस्य भङ्गापत्त्या तस्य हविष्ट्वालाभात्। अस्तु तर्हि रसभूतहविः प्रकृतित्वेन सोमद्रव्यस्य विधिः 'व्रीहिभिर्यजेत' इति पुरोडाशप्रकृतिभूतव्रीहिद्रव्यवदिति द्वितीयः पक्षः। न चेह विकृतिद्रव्यस्यानुपात्तत्वात्कथं प्रकृतिद्रव्यविधिरिति शङ्क्यम्। व्रीहिवाक्यवदेवोपपत्तेः। न हि पुरोडाशा-

1. सामान्यतद्धितान्तत्वा...क.

नुवादेन व्रीहिविधिः, 'व्रीहिभिः' इति कारकविभक्तेर्द्रव्यसंबन्धायोगात्पुरोडाशस्यानुपात्तत्वाच्च । किंतु यागं प्रति करणत्वेन विहिता व्रीहयः पुरोडाशावरुद्धे यागे साक्षात्करणत्वासंभवात्प्रकृतित्वेन करणीभवन्तीति प्रकृतिविधिः संपद्यते । एवमत्रापि यागं प्रति करणत्वेन विहितः सोमो धारासमर्थद्रवद्रव्यावरुद्धे यागे तत्प्रकृतिर्भवतीत्यर्थात्प्रकृतिविधिः संपद्यते । न च प्रकृतिनिरपेक्षजलसाधारणत्वाद्धारासमर्थद्रव्यस्य पुरोडाशवैलक्षण्यादिह कथमर्थादपि प्रकृतिविधिसंभव इति वाच्यम् । धारासमर्थद्रव्यं हि किंचिदपि यदि सर्वथा प्रकृतिसंबन्धानर्हमेव स्यात् तदा परं प्रकृतिविधिर्न संभवेत् । अर्हति च धारासमर्थद्रव्यं किंचिदिह प्रकृतिद्रव्येण संबन्द्धुम् । अतः सोमशब्देन प्रकृतिद्रव्यविधिः संगच्छत इति चेन्न । 'सोममभिषुणोति' 'अभिषुतस्य सोमस्य धारां स्रावयति' इत्यादिवाक्यैरेव धारासमर्थद्रव्यस्य सोमलताप्रकृतिकतया निर्ज्ञातत्वेन प्रकृतिविधेरानर्थक्यात् । अतः सोमशब्दोऽपि 'सोमं क्रीणाति' 'सोममभिषुणोति' इत्यादिवाक्यप्राप्तार्थानुवादीभवन् तत्प्रख्यन्यायेन नामधेयं भवति । न च ज्योतिष्टोमनाम्नः [1]सत्त्वाम्नामान्तरानर्थक्यम्, न्यायप्राप्तत्वेन नामान्तरस्यापरिहार्यत्वात् 'स एष यज्ञः पञ्चविधोऽग्निहोत्रं दर्शपूर्णमासौ चातुर्मास्यानि पशुः सोमः' 'स्वर्गकामः सोमेन यक्ष्य इति संकल्पयते' इत्यादिव्यवहारस्य ज्योतिष्टोमनाम्नान्यथासिद्धयभावेनानर्थक्याभावाच्च । तथा च कृत्स्नं सोमवाक्यमनुवादः । तत्र सोमशब्दस्य प्रयोजनमुक्तमेव । ऐन्द्रवायवादिवाक्यविहितानां यागानां समुदायानुवादकयजेस्तु प्रयोजनम् 'ज्योतिष्टोमेन स्वर्गकामो यजेत' इति फलवाक्ये सर्वेषां युगपद्ग्रहणात्समुच्चित्यानुष्ठानम् । सोमवाक्यस्य यागविधायकत्वे तु यागस्यैकत्वात्तदर्थानां देवतानां खादिरपालाशादियूपवद्विकल्पापत्तिः । एवं ग्रहणानामपि । तथा सति 'दशैतानध्वर्युः प्रातःसवने गृह्णाति' 'आश्विनो दशमो गृह्यते' 'तं तृतीयं जुहोति' इत्यादिवाक्ये दशशब्देन च प्रतीयमानः समुच्चयो मट्तीयप्रत्ययाभ्यां प्रतीयमानः क्रमश्च विरुध्येयाताम् । उपांश्वन्तर्यामावैन्द्रवायवमैत्रावरुणाश्विनाः शुक्रामन्थिनावाग्रयण उक्थ्यो ध्रुवश्चेति दश ग्रहाः । अंश्वदाभ्ययोरतिग्राह्याणां चानित्यत्वादिहाग्रहणम् । तेषां तैत्तिरीयशाखारीत्या ज्योतिष्टोमे समावेशेऽपि वाजसनेयिभिर्विकृतिसोमेष्वेवाम्नातत्वेन प्रकृतिसोमे तत्समावेशाभावात् । यद्यपि, उपांशुः प्रथमं हूयते ततोऽन्तर्यामः ततो वायव्यो ग्रह ऐन्द्रवायवश्चैकेनैव पात्रेण क्रमेण हूयेते ततो मैत्रावरुणस्तत आश्विन इति क्रमः; तत्रैन्द्रवायवमैत्रावरुणाश्विनेषूध्वर्युणा हूयमानेषु प्रतिनिग्राह्यास्त्रयो ग्रहा हूयन्ते ; तत्रोपांश्वन्तर्यामाववषट्कारहौमौ, इतरे सवषट्कारहोमाः; एवं चाश्विनो नवमो हूयत इति कथं तृतीयत्वमिति ; तथापि अध्वर्युकर्तृकसवषट्कारहोमाभिप्रायं पात्राभिप्रायं च तृतीयत्वं बोध्यम् । तस्मादैन्द्रवायवादिवाक्यविहितानां यागानां समुदायानुवादकं सोमवाक्यमिति स्थितम् । एवमग्नीषोमीयवाक्यमपि न यागविधायकम् । हृदयादिवाक्ये हि तावद्यज्यश्रवणादेवताभावाच्च कर्ममात्राण्यवगतानि । तेषु च कर्मसु पशुवाक्येन पशुप्रकृतिकहृदयादिद्रव्यं

1. सद्भावात्—क, ग, च; संभवात्—ङ.

लक्षणया पशुशब्देनानूद्य 'अग्नीषोमीयम्' इति देवता विधीयते । एवं च यथा आधारवाक्येन आधारसंज्ञककर्मण्यवगते चतुर्गृहीतवाक्यादाज्यद्रव्यलाभे 'इतइन्द्रऊर्ध्वोऽध्वरइत्याधारमाधारयति' इति मन्त्रविनियोगतो मान्त्रवर्णिकदेवतालाभे च सति तस्य यागरूपत्वाध्यवसानम्, तद्वद्धृदयादिवाक्यतो हृदयादिद्रव्यककर्ममात्रेष्ववगतेषु पशुवाक्येन देवतालाभात्तेषां यागरूपत्वमवधार्यते । अवद्यतिस्तु चोदकप्राप्तानुवादः । द्रव्यदेवतासंबन्धाच्च गम्यमानो यागो द्रव्यभेदाद्भेदेनैव गम्यते, एकेन पशुशब्देनानुवादतो लब्धस्यापि साहित्यस्य हृदयाद्युद्देश्यगतत्वेनाविवक्षितत्वात् । आलभतिस्तु स्पर्शनमुखेन तत्साध्यावदानसंस्कृतहृदयादियागोपलक्षकोऽनुवादः । यदि च पशुवाक्यं यागविधायकं स्यात्तर्हि हृदयादिवाक्यानां न संस्कारविधित्वं शक्यते वक्तुम्, उत्पत्तिशिष्टपशुजातीयद्रव्यविरोधात् । न च दर्शपूर्णमासजाघनीवत्सूनास्थहृदयादिग्रहणे सति नोत्पत्तिशिष्टद्रव्यविरोध इति वाच्यम् । एवं हि सति हृदयाद्यवदानेभ्यस्तावन्त्यदृष्टानि अग्नीषोमीययागाच्चैकमदृष्टमिति गौरवापत्तेः । पशुवाक्यस्य हृदयादिवाक्यप्राप्तकर्मानुवादेन देवताविधौ तु न पशुवाक्याददृष्टकल्पनम्, किंतु हृदयादिवाक्यत एवेति लाघवम् । तदेवं हृदयादिसाधनकर्मसु पशुवाक्यतोऽग्नीषोमदेवताविधाने सति पश्वाद्देवतासंबन्धाद्यागरूपाणि तानि कर्माणीति निर्धार्यत इति । अथवा हृदयादीनां पशुप्रभवत्वेन सांनाय्यसाम्यात्तदवदानं यागसाधनमिति निश्चये सति तत एव प्राप्तावदानसंबन्ध आलभतिना आर्थिकस्पर्शनमुखेनानूद्यते, यथा 'तस्मै भक्षं प्रयच्छेत्' इति यागीयद्रव्यप्रतिपत्त्यर्थभक्षसंयोगेन फलचमसस्य यागसाधनत्वेऽवगते तत एव प्राप्तो भक्षोऽनूद्यते तद्वत् । एवं च प्रथममेव हृदयादिवाक्यैर्यागा विधीयन्ते । तत्रैव च 'अग्नीषोमीयम्—' इति देवताविधिः । आलभतिः पूर्ववदेव यागानुवादकः । पशुशब्दोऽपि पूर्ववदेव हृदयाद्युपलक्षकः । तदेवमुभयथापि पशुवाक्येऽप्यालभतिरनुवादकः । अत एव 'एकादश वै पशोरवदानानि' 'हृदयस्याग्रेऽवद्यत्यथ जिह्वाया अथ वक्षसः' इत्यादिक्रमसमुच्चयाबुपपद्येते । पशुवाक्यस्य यागविधायकत्वे यागस्यैकत्वाद्धृदयादीनां विकल्पापत्त्या तदसंगतिः स्पष्टैव । इति प्राप्ते, सिद्धान्तयति—

द्रव्यसंयोगाच्चोदना पशुसोमयोः प्रकरणे ह्यनर्थको द्रव्यसंयोगो न हि तस्य गुणार्थेन ॥ १७ ॥

पशुसोमयोः पशुसोमवाक्ययोः चोदना पश्वग्नीषोमलक्षणद्रव्यदेवताविशिष्टस्य सोमविशिष्टस्य च यागस्य विधिः । कुतः । द्रव्यसंयोगात् एवं सत्येव पशुसोमद्रव्यश्रवणस्य प्रयोजनेन संयोगात् । हि यस्मात्कारणात् प्रकरणे प्रकृतहृदयाद्यैन्द्रवायवादिवाक्यविहिते कर्मजाते सति पशुसोमद्रव्यसंयोगोऽनर्थकः स्यात् । विद्वद्वाक्ययोर्हि पौर्णमास्यमावास्याशब्दौ तादृशकालसंयुक्ताग्नेयादियागानां

ताभ्यां प्रत्यभिज्ञानादनुवादकौ। इह तु हृदयादिरूपरसरूपद्रव्यककर्मजातस्य पशुसोमशब्दाभ्यामाकृतिविशेषवाचकाभ्यां संयुक्ते पशुसोमवाक्ये कथमनुवादकतया सार्थके स्याताम्। ननु पशुसोमशब्दयोर्गौण्या वृत्त्या तत्प्रकृतिकद्रव्यपरतया तदनुवादकत्वं संभवतीत्युक्तमत आह—न हीति। गुणः उपचारः। अर्थः वृत्तिः। गुणादागतोऽर्थो गुणार्थः गौणी वृत्तिः। तस्य हि पशुशब्दस्य सोमशब्दस्य च मुख्यार्थत्वे संभवति गौण्या वृत्त्या तद्विकृतिद्रव्यपरत्वं न युक्तमाश्रयितुमित्यर्थः। न च पशुवाक्यस्य पशुविशिष्टयागविधिपरत्वे उत्पत्तिशिष्टपशुनैव यागस्य कर्तव्यत्वाद्धृदयादिवाक्यानामानर्थक्यं स्यात्, उत्पत्तिशिष्टद्रव्यभङ्गापत्त्या तेषां गुणविधित्वस्यासंभवात्; अतः पशुवाक्ये पशुशब्दस्य लक्षणा दुर्वारेति वाच्यम्। यदि श्रुत्पत्तिशिष्टं पशोः करणत्वं हृदयादिवाक्यैर्गुणविधौ बाध्येत तदा परं हृदयादिवाक्यानामानर्थक्यं स्यात्। नैवमस्ति; हृदयादीनां यागसाधनत्वेऽपि पशुकरणत्वस्याबाधात्, हृदयादिप्रणाड्या पशोः करणत्वानपायात्, 'गोमयेन पचति' 'तुषपक्का भवन्ति' 'यागात्स्वर्गः' इत्यादौ लोकवेदयोर्व्यवधानेऽपि करणत्वदर्शनात्। तदेवं पशुवाक्यं पशुद्रव्यदेवताविशिष्टयागविधिः। हृदयादिवाक्यानि तु तत्रैव गुणविधयः। तत्रापि न प्राकृतावदानोद्देशेन हृदयादिविधयः, किंतु हृदयादिविशिष्टावदानान्तरविधय इति दशमे स्पष्टीभविष्यति। एवं च पशुद्रव्यस्यैकत्वात्तावदवदानसंस्कृतद्रव्यक एको याग इति लाघवम्। अन्यथा हृदयादिसाधनका बहवो यागा इति गौरवम्। एवं सोमवाक्यं सोमलताविशिष्टयागविधिः। 'ऐन्द्रवायवम्' इत्यादयो गुणविधयः। रसप्रणाड्या च सोमद्रव्यस्य यागसाधनत्वमभिषववाक्यादवधार्यते। ननु ऐन्द्रवायवादिवाक्यविहितयागेष्वेव सोमस्य हविष्ट्वेन विधानं किं न स्यात्; न च धारावाक्यान्यथानुपपत्त्या न सोमस्य हविष्ट्वविधिसंभव इति वाच्यम्, रसप्रणाड्या तदुपपत्तेरुक्तत्वादिति चेत्, न। 'ऐन्द्रवायवम्' इत्यादितद्धितस्य द्रव्यसामान्यवाचकस्य धारावाक्यसंनिहितधारासमर्थद्रवद्रव्यविशेषविषयतयैवोपपत्त्या ऐन्द्रवायवादिवाक्यत एव द्रव्यविशेषलाभे सति गृह्णातिना अनियमेन द्रव्याक्षेपासंभवेन द्रव्यनियमविध्यसंभवेन हविर्विधानासंभवात्। एतेनैन्द्रवायवादियागीयधाराद्रव्यप्रकृतित्वेन सोमस्य विधिः किं न स्यादित्यपि निरस्तम्, ऐन्द्रवायवादितद्धितस्य धारावाक्यप्राप्तप्रकृतिद्रव्यनिरपेक्षजलादिद्रवद्रव्येणैव शान्ताकाङ्क्षतया अवश्यं प्रकृतिद्रव्यापेक्षाभावेन प्रकृतिविध्यसंभवात्। एतेनैवाभिषवादिवाक्यतः सोमप्राप्तिमुपजीव्य सोमवाक्ये सोमशब्दस्य तत्प्रख्यन्यायेनैन्द्रवायवादियागनामधेयत्वं निरस्तम्, 'सोमेन यजेत' इत्याहृत्य सोमविधेः प्राक्सोमस्याप्राप्तत्वात्। न च धारावाक्यस्य सोमरसविषयत्वेन तद्वाक्यविहितसोमरसविषयत्वमैन्द्रवायवादितद्धितस्य भविष्यतीति ततः सोमद्रव्यस्य प्राप्तिरिति वाच्यम्। न हि धारावाक्यस्य सोमरसविषयत्वे किंचित्प्रमाणमस्ति, तद्वाक्ये सोमरसस्येत्यश्रवणात्। न च तत्र सोमरसस्येत्यश्रवणेऽप्यभिषवादिवाक्यसंनिधानात्तस्य सोमरसविषयत्वमस्तीति वाच्यम्। न हि तद्धितस्य सामान्यवाचिनो विशेषं विना पर्यवसानाभाववद्धाराशब्दस्यापर्यवसानमस्ति,

श्रुतमात्रेण पर्यवसानोपपत्तेः। न च 'व्रीहीन्प्रोक्षति' इत्यादिषु यथा प्रकृतग्रहणं तद्वद्धारावाक्येऽपि प्रकृतग्रहणं किं न स्यादिति वाच्यम्, वैषम्यात्। प्रोक्षणादिवाक्येषु लौकिकस्य संस्कारानुपपत्तेरपूर्वसाधनविशेषलक्षणया प्रकृतग्रहणं युक्तम्। धारावाक्ये तु ग्रहणोद्देशेन धारामात्रविधानं न प्रकृतापेक्षम्[1]। किंच सोमवाक्ये सोमद्रव्यस्याहृत्यविधानानङ्गीकारे सोमस्याप्राप्तत्वेन क्रयाभिषवादिवाक्यानां तत्संस्कारविधायकत्वासंभवेन 'सोमक्रयेण क्रतुमुपकुर्यात्' इत्यारादुपकारकक्रयाभिषवादिविधायकत्वापत्त्या क्रयाभिषवादीनां लौकिकसोमविषयतयाप्युपपन्नतया एकसोमविषयत्वानापत्त्या धारावाक्यस्य कथं क्रयाभिषवादिवाक्यसंनिहितसोमरसविषयता। न हि 'सोमं क्रीणाति' 'तं क्रीतं सोममभिषुणोति' 'तस्याभिषुतस्य सोमस्य धारां करोति' इत्येवं वचनान्युपलभामहे। न च क्रयादिवाक्यानामेकयागप्रकरण आम्नातत्वेन प्रकरणानुसारात्तद्वाक्येषु 'प्रकृतं सोमं क्रीणाति' 'प्रकृतं सोममभिषुणोति' इत्येवं प्रकरणविशेषितसोमस्य ग्रहणात्सर्वेषामेकविषयत्वमिति वाच्यम्। इतिकर्तव्यताकाङ्क्षालक्षणप्रकरणस्य विनियोगमात्रे व्याप्रियमाणस्य परविशेषणत्वासंभवात्। यथा चैतत्तथा सप्तमाद्ये स्पष्टं भविष्यति। न च प्रकरणस्याविशेषकत्वेऽपि 'सप्तमं पदमध्वर्युरञ्जलिना गृह्णाति' इत्यादौ संनिहितैकहायनीसंबन्धिपदादिवत्संनिधिवशाद्विशेषोऽस्त्विति वाच्यम्। नवमाद्यपादे 'द्रव्यसंख्याहेतुसमुदायं[2] वा श्रुतियोगात्' इत्यधिकरणे 'तुल्येषु नाधिकारः स्यात्' इति गुणसूत्रे तुल्येष्वेकत्र संनिधिरपरत्र विशेषको न स्याद्विनिगमनाविरहादिति वक्ष्यमाणत्वेन संनिधेरप्यत्राविशेषकत्वात्। पदवाक्ये तु पदस्यावयवत्वेन नित्यमवयविसापेक्षत्वेन तत्र संनिधेर्विशेषकत्वेऽपि धारादिवाक्येषु तथा नित्यापेक्षाभावेन वैषम्यम्। न चैन्द्रवायवादितद्धितस्य 'सास्य देवता' इति विहितस्य सर्वनामतुल्ययोगक्षेमतया 'तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा' इत्यत्र तच्छब्दवत्प्रकृतसोमपरामर्शकत्वं किं न स्यादिति वाच्यम्। 'सा वैश्वदेवी' इत्यत्र तच्छब्दस्य साकाङ्क्षस्य 'तप्ते पयसि—' इति प्रकृतपरामर्शित्वसंभवेऽप्यैन्द्रवायवादितद्धितस्य द्रव्यवाचकस्य प्रकृतिद्रव्यनिरपेक्षजलादिद्रव्यसमर्पकप्रकृतधारावाक्यत एव जलादिद्रव्यलाभेन शान्ताकाङ्क्षतया व्यवहिताभिषवादिवाक्योपस्थितसोमविषयत्वानुपपत्तेः, धारावाक्यस्य च सोमरसविषयतायाः प्रागेव निरस्तत्वात्। अतः सोमवाक्ये सोमशब्दस्तत्प्रख्यन्यायेन नामधेयमित्ययुक्तमिति तत्र सोमद्रव्यविशिष्टयागविधिरेवास्थेयः।

इतोऽपि न समुदायानुवाद इत्याह—

अचोदकाश्च संस्काराः ॥ १८ ॥

चशब्दो युक्त्यन्तरसमुच्चये। हृदयाद्यैन्द्रवायवादिशब्दसंदर्भाः अचोदकाः यागानां

1. विधानान्न प्रकृतापेक्षा—क, घ, ङ. 2. समवायं—क, ख, ग.

विधायका न भवन्ति, येन पशुसोमवाक्ये तदनुवादके स्याताम् । किंतु संस्काराः अवदानग्रहणविधायिन एवैते । अविहितेषु च यागेषु केषां समुदायोऽनूद्येत, अवदानग्रहणमात्रविधानेनैवोभयेषां वाक्यानामुपपत्तेः । संभवति हि 'हृदयादीन्यवदानेन यागयोग्यानि कुर्यात्' 'ऐन्द्रवायवादिग्रहणेन सोमरसं संस्कुर्यात्' इति। तत्र यागाव्यभिचरितावदानस्य देवताविशिष्टग्रहणस्य च यागमन्तरेणानुपपत्तेः यागापेक्षायाम् 'अग्नीषोमीयं पशुमालभेत' इति 'सोमेन यजेत' इति च वाक्यं सर्वत्र द्रव्यदेवतासंबन्धानुपपादयद्यागान्तरकल्पनं निरुणद्धि । न चैवं यागावश्यंभावेऽप्याग्नेयादिवाक्ये श्रुतस्य द्रव्यदेवतासंबन्धस्य निर्वाहकत्वेन तत्रैव यथा यागः कल्प्यते एवं हृदयाद्यैन्द्रवायवादिवाक्येष्वेव यागकल्पनास्तु; पशुसोमवाक्ये तु तदनुवादके एव; अन्यथा विद्वद्वाक्यमप्यनुवादकं न स्यात्; पशुसोमवाक्ययोर्हृदयाद्यैन्द्रवायवादिवाक्यापेक्षितयागविधायकत्ववत्तस्याप्याग्नेयवाक्यापेक्षितयागविधायकत्वसंभवादिति वाच्यम् । विशिष्टाभिधानेन पर्यवसितस्य हि वाक्यस्याकाङ्क्षाबलाद्वाक्यान्तरेण संबन्धः। आग्नेयादिवाक्ये च पुरुषव्यापाराश्रवणाद्विशिष्टभावनाभिधानमेव न पर्यवस्यति । अपर्यवसितस्य च न विद्वद्वाक्येनान्वय इति विशिष्टभावनाविधिपर्यवसानाय पुरुषव्यापाररूपो यागस्तत्रैव कल्प्यते । अतो विद्वद्वाक्यमनुवाद इति युक्तम् । इह त्ववदानग्रहणरूपपुंव्यापारश्रवणात्पर्यवसन्नमेवाभिधानम् । किंत्वभिधानानन्तरमवदानदेवतासंबन्धनिर्वाहकापेक्षामात्रमिति पशुसोमवाक्ये अपेक्षितविधानार्थे संपद्येते । एवं च श्रुतेनैव निर्वाहोपपत्तौ हृदयाद्यैन्द्रवायवादिवाक्येष्वश्रुतयागकल्पनं न भवतीति लाघवम् । तस्मात्पशुसोमवाक्ये यागविधायके ।

यदुक्तं सोमवाक्यस्य यागविधायकत्वे देवतानां ग्रहाणां च विकल्पापत्तौ क्रमसमुच्चयदर्शनं नोपपद्यत इति, तत्राह—

तद्भेदात्कर्मणोऽभ्यासो द्रव्यपृथक्त्वादनर्थकं हि
स्याद्भेदो [1]द्रव्यगुणभावात् ॥ १९ ॥

ऐन्द्रवायवादिवाक्येषु 'इन्द्रवायुभ्यामिदं दातव्यम्' 'मित्रावरुणाभ्यामिदं दातव्यम्' इत्येवं तत्तद्देवतोद्देशविशिष्टग्रहणानि श्रुतानि । तत्र प्रतिग्रहणं तत्तद्देवतोद्देशेनान्यदन्यददृष्टमुत्पद्यते । तथाविधग्रहणैश्च द्रव्यमुखेन प्रधानस्योपकार इति स्थितिः । तत्र कर्मणो ग्रहणस्य अभ्यासः पुनः पुनरनुष्ठानम् । ग्रहणानां समुच्चयः स्यादिति यावत् । कुतः । तद्भेदात् देवतासंयोगभेदात् । न हि तत्तद्देवतोद्देशजनितादृष्टसधीचीनग्रहणैर्जायमान उपकार एकदेवतासंयोगसधीचीनेनैकेन ग्रहणेन संभवति । अतो ग्रहणानां समुच्चयः । ननु तावद्देवतासंयुक्तादेकस्मादेव ग्रहणात्तथाविधोपकारः संभवतीत्यत आह—द्रव्यपृथक्त्वादिति। दशमुष्टिपरिमितसोमलतासंभूतस्यैकधनवसतीवर्युदकैः प्रभूतमभि-

1. द्रव्यगुणीभावात्.

वर्धितस्य रसद्रव्यस्य प्रादेशमात्रेषूर्ध्वपात्रेष्वल्पगर्तेषु स्थालीचमसेषु तत्तद्देवतासंयुक्तग्रहणसंस्कारस्य पृथक्त्वावश्यंभावात्। सकृद्ग्रहणे ह्यल्पस्यैव रसस्य किंचिद्देवतासंयुक्तग्रहणसंस्कारापत्तौ देवतान्तरश्रवणं परिशिष्टं च रसद्रव्यमनर्थकं स्यात्। ननु देवतासंकल्पस्य ग्रहणं प्रति गुणभूतत्वात्तदनुसारेण ग्रहणानामपि भेदाश्रयणमयुक्तमित्यत आह— भेद इति। प्रतिदेवतं ग्रहणभेद एव युक्तः। कुतः। द्रव्यगुणभावात्। देवतासंकल्पस्तावन्न केवलं ग्रहणार्थः, किंतु गृह्यमाणद्रव्यार्थः। ग्रहणमपि द्रव्यार्थमेव। एवं चोभयोरपि द्रव्यानुसारेण निवेशो युक्तः। कृत्स्नेन दशमुष्टिना सोमेन हि यागः श्रुतः ऐन्द्रवायवादिग्रहणं च श्रुतम्। यदि कृत्स्नस्य ग्रहणं कथंचित्सकृदेव स्यात् तर्हि यदेवेन्द्रवायुभ्यां संकल्पितं तदेव 'मित्रावरुणाभ्याम्' इति संकल्प्येत। न चैतद्युज्यते, 'ऐन्द्रवायवम्' इत्यादिनिरपेक्षतद्धितविरोधात्। यदि चैकदेशस्य ग्रहणं सकृदेव स्यात्तर्हि दशमुष्टिपरिमाणकात्स्न्यविरोधः। ग्रहणाभ्यासे तु द्रव्यस्य पृथक्कृतत्वात् 'ऐन्द्रवायवम्' इत्यादि युज्यते। परिमाणकात्स्न्यस्याप्यविरोधः। ततश्च यावद्देवतं ग्रहणाभ्यासः सिद्धः। तस्मिंश्चाभ्यस्यमाने देवतासबन्धानां यागं विनानुपपत्तेर्यागस्याप्यभ्यासः सिद्धः। तथा च 'आश्विनो दशमो गृह्यते तं तृतीयं जुहोति' इति क्रमसमुच्चयदर्शनमुपपन्नं भवति। हृदयादिविषये समुच्चयदर्शनं तु दशमे तत्समुच्चयस्य वक्ष्यमाणत्वात्तत एव व्यक्तमिति तदत्र सूत्रकृतोपेक्षितम्।

यच्चोक्तं सोमवाक्यस्य यागविधायकत्वे खादिरादिवद्देवतानां विकल्पः स्यादिति, तत्राह—

संस्कारस्तु न भिद्यते[1] परार्थत्वाद्द्रव्यस्य गुणभूतत्वात् ॥ २० ॥

खादिरादियूपेषु संस्कारः पशुनियोजनं प्रतियूपं न भिद्यते। नियोजने तेषां समुच्चयो न भवतीति यावत्। कुतः। परार्थत्वात् तेषां पशुनियोजनार्थत्वात्। पशुनियोजनस्य चैकेनैव निष्पन्नत्वेनेतरेषां तदनपेक्षितत्वात्। देवतासंयोगानां तु भिन्नभिन्नादृष्टकार्यकत्वात्समुच्चय इति वैषम्यम्। प्रयोजनं पूर्वपक्षे ऐन्द्रवायवादिवाक्यानां यागविधायकत्वे तेषां यागानां स्वार्थतया विनियुक्तदेवताकत्वाभावलक्षणाव्यक्तत्वाभावेन 'अव्यक्तासु तु सोमस्य' इति न्यायाप्रवृत्तिः; सिद्धान्ते तु तत्प्रवृत्तिः। पशूदाहरणे तु पूर्वपक्षे यागभेदाद्विकृतिष्वेकस्यैव यागस्येतिकर्तव्यताप्राप्तेर्हृदयादिष्वेकेन यागः; सिद्धान्ते सर्वैरित्यादि। इति पशुसोमाधिकरणम्॥

वृत्तोऽभ्यासप्रसङ्गः सापवादः। इदानीं संख्यया कर्मभेदः प्रस्तूयते। सांग्रहण्यां श्रूयते 'तिस्र आहुतीर्जुहोति' इति। तत्र किमेको होमो विधीयते, उत बहव इति संशयः। तत्राभ्या-

७. संख्याकृतकर्मभेदाधिकरणम्।

स्थले आख्यातस्य पुनःश्रुत्या कर्मभेदे सत्यपि संख्यास्थले तदभावान्न कर्मभेदः, सकृच्छ्रुतस्याख्यातस्यानेकत्र व्यापारायोगात्। ततश्च यथा

1. भिद्येत.

प्रयाजानां प्रकृतौ पञ्चसंख्याकत्वेन प्रज्ञातत्वात् तदविरोधाय पशौ श्रुतं प्रयाजैकादशत्वमभ्यासेन संपाद्यम्, तथेहापि स्वपदगताख्याततः प्रथमावगतकर्मैक्याविरोधाय पदान्तरावगता त्रित्वसंख्या अभ्यासेनैव संपाद्या। इति प्राप्ते, सिद्धान्तयति—

[1]पृथक्त्वनिवेशित्वात्संख्यया कर्मभेदः स्यात् ॥ २१ ॥

'तिस्र आहुतीः' इति पदान्तरगतयाप्युत्पत्तिशिष्टया कर्मसमानाधिकरणया संख्यया कर्मभेदः स्यात्। कुतः। पृथक्त्वनिवेशित्वात्। पृथक्त्वेन सहैव निवेष्टुं शीलमस्य पृथक्त्वनिवेशि तस्य भावः तस्मात्। 'शरदः कृतार्थता' 'पत्न्याः कर्तृत्वम्' इत्यादिवत्सामान्ये नपुंसकम्। द्वित्र्यादिसंख्यायाः पृथक्त्वैकार्थसमवायादित्यर्थः॥ यत्र श्रुत्पत्तिवाक्ये कर्मैक्यविरोधि पदान्तरं नास्ति तत्रैवाख्यातसकृच्छ्रुतेः कर्मैक्यप्रयोजकता; यथा 'सोमेन यजेत' इत्याख्यातस्याख्यातस्य न कर्मैकत्वमर्थः, किंतु भेदनियामकाभावे आख्यातस्य सकृच्छ्रुत्या अर्थात्तदैक्यसिद्धिः[2]। प्रकृते च 'तिस्रः' इति भेदनियामके सति सकृच्छ्रुतमेवाख्यातं भिन्नान्यपि कर्माणि युगपदेव विधत्त इति नाख्यातसकृच्छ्रवणादेकत्वसिद्धिः। न ह्याख्यातमात्रमेकं वाक्यं येन तन्मात्रजन्यप्रमायां विरोधिसंख्यान्तराभावादाख्यातं कर्मैक्यमवगमयितुं प्रभवेत्। ततश्चाख्यातमात्रस्य प्रामाण्याभावान्न ततः कर्मैकत्वसिद्धिः। प्रयाजेषु तु प्रकृतौ प्रज्ञातपञ्चसंख्याकेषु विकृतौ चोदकतः प्राप्तेषु तदबाधायैकादशत्वसंख्या तदभ्यासेनैव पूरयितुमुचिता। न चेह कर्मैकत्वं वाक्यान्तरावगतं येन तदविरोधायाभ्यासेन त्रित्वसंख्या पूर्येत। त्रित्वसंख्याविशिष्टतयैव हि होमविधानमत्र क्रियते। तस्मादत्र कर्मभेद इति वैषम्यम्। 'दर्भपुञ्जीलैः पावयति' इत्यादौ तु संख्यायाः कर्मसामानाधिकरण्याभावान्न भेदकत्वम्। प्रयोजनं पूर्वपक्षे अभ्यासे सत्यपि कर्मणो भेदाभावादेकमन्त्रत्वाच्च सकृदेव मन्त्रः प्रयोज्यः, सिद्धान्ते तु कर्मभेदात्प्रतिकर्म मन्त्र आवर्तनीय इति प्राञ्चः। तच्चिन्त्यम्। तैत्तिरीयके हि 'आमनमस्यामनस्य देवा इति तिस्र आहुतीर्जुहोति' इति श्रुतम्। त्रयश्च मन्त्राः पठिताः। न च तत्र द्विःस्वाहाकारपाठाद्दौ मन्त्राविति शङ्कयम्, प्रथमस्वाहान्तभागे द्वयोः प्रक्षिप्तपाठात्। 'आमनमस्यामनस्य देवा ये जाताः समनसः' इत्यादिः प्रथमः। 'आमनमस्यामनस्य देवा ये कुमाराः समनसः' इत्यादिर्द्वितीयः। तृतीयस्तु 'आमनमस्यामनस्य देवा याः स्त्रियः' इत्यादिः पृथगेव पठितः इति भट्टभास्करभाष्ये स्पष्टम्[3]। अतः कर्मैकत्वपक्षेऽपि प्रतिहोमप्रयोगमेकैकमन्त्रप्राप्तेर्मन्त्रस्यावृत्तेरप्रसक्तत्वात्पूर्वोत्तरपक्षयोर्न फलभेद इति। वस्तुतस्तु 'भुवनस्य पत इति रथमुखे पञ्चाहुतीर्जुहोति' इत्यत्र कर्मैकत्वे अभ्यासान्तरे[4] सति तत्संपत्त्यै न पुनः प्रयोगः। कर्मभेदे तु पञ्चानां मध्ये यस्यान्तरयस्तस्य प्रयोग इत्यादि बोध्यम्। 'भुवनस्य पत इत्यादि

1. पृथक्त्वनिवेशात्. 2. विधिः—क, च, ङ. 3. व्यक्तम्—क, ग, च, ङ. 4. अभ्यासान्तराये—ग.

पञ्चकृत्वो यजुर्वदेत्' इति बोधायनकात्यायनीयाः। अत्र 'द्वादश द्वादशानि जुहोति' इत्यप्युदाहृतं वार्तिके। द्वादशसंख्याकावयवकान्संघातान्द्वादशसंख्यायुक्ताञ्जुहोतीत्यर्थः। ततश्च चतुश्चत्वारिंशदधिकशतं होमाः संपन्नाः। तत्र 'अग्नाविष्णू सजोषसा' इत्यारभ्य 'अग्नं च मे' इत्यतः प्राक्पञ्चत्रिंशदधिकं शतं मन्त्राः सन्ति। तत्र संख्यासंपत्तये 'कूयवाश्च मे' इति मन्त्रस्य दशकृत्वोऽभ्यास इति तद्व्याख्यातारः। वस्तुतस्तु नेदमुदाहरणम्। उत्पत्तिवाक्यगता हि संख्या कर्मभेदिका। 'वसोर्धारां जुहोति' इत्युत्पत्तिवाक्यम्। तदुत्पन्नकर्मानुवादेन 'द्वादश द्वादशानि' इति श्रुता संख्या न्यूनं कर्म भिन्द्यात्; अन्यथा प्रयाजैकादशत्वादीनामपि कर्मभेदकत्वापत्तेः। अतः 'द्वादश द्वादशानि' इति संख्यासंपत्तिरभ्यासादेव शक्यते साधयितुम्। किंच 'द्वादश द्वादशानि जुहोति' 'अर्धेन्द्राणि जुहोति' 'यज्ञायुधानि जुहोति' इत्यादयः 'वसोर्धारां जुहोति' इत्युत्पन्नहोममन्त्रावयवान् 'द्वादश मासाः संवत्सरः संवत्सरेणैवास्मा अन्नमवरुन्द्धे' इत्याद्यर्थवादैः प्रशंसितुमनुवादा इति भवस्वामिभाष्ये भट्टभास्करभाष्ये च स्पष्टम्। अतः 'द्वादश द्वादशानि—' इति नोदाहरणमित्यास्तां तावत्॥ क्वचिद्द्रव्यगतापि संख्या कर्मभेदिका। तथाहि—वाजपेये श्रूयते 'सप्तदश प्राजापत्यान्पशूनालभते' इति। तत्र किं सप्तदशपशुद्रव्यक एको यागः, किं वा एकैकपशुद्रव्यकाः सप्तदश यागा इति संशयः। प्राजापत्यशब्दस्तावत् 'तद्धिताः' इत्यधिकारे 'सास्य देवता' इत्यर्थे 'दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः' इति विहिततद्धितसंज्ञकण्यप्रत्ययान्तः। तत्र यदि 'अस्य' 'अस्य' इति सप्तदशकृत्व उच्चार्य कृतैकशेषेण 'एषाम्' इति सर्वनाम्ना 'प्रजापतिर्देवतैषाम्' इति विगृह्य प्रजापतिशब्दात्सप्तदशसु तद्धितेषु कृतेषु तेषां केवलानामेकशेषे सति 'यः शिष्यते स लुप्तार्थाभिधायी' इति न्यायेन शिष्टस्यैकस्य तद्धितस्य सप्तदशसु वृत्त्या प्रथमं बहुत्वेनान्वितस्य पश्चात्प्रकृतिभूतप्रजापतिशब्देनान्वयः, तदा केवलद्रव्यभेदस्य हृदयादिद्रव्यभेदवद्यागभेदाप्रयोजकतया सप्तदशभिर्व्यासज्यैकेन प्रजापतिना संबद्धैर्द्रव्यैः कल्प्यमानो याग एक एव स्यात्। यदि तु 'प्रजापतिर्देवताश्च प्राजापत्यः', 'प्राजापत्यश्च प्राजापत्यश्च—' इति सप्तदशकृत्व उच्चार्य तद्धितान्तानामेकशेषः क्रियते, तदा शिष्टस्य प्राजापत्यशब्दस्य सप्तदशसु प्रजापतिविशिष्टद्रव्येषु वृत्त्या प्रथमं प्रकृत्यन्वितत्तद्धितार्थेषु तेषु विशिष्टरूपेषु पश्चाद्धुहुत्वान्वयः। ततश्च सप्तदशभिर्द्रव्यदेवतासंबन्धैः कल्प्या यागाः सप्तदशैव स्युरिति भवति संशयः। तत्र कृतैकशेषस्य तद्धितस्यैव पूर्वं बहुत्वेनान्वय इति युक्तम्। अस्ति हि केवलतद्धितानामेकशेषः 'गर्गाः' इत्यादौ। गर्गशब्दादेकस्माद्बहूनां यञामुत्पत्तेस्तद्धितमात्रैकशेषस्य 'सरूपाणाम्—' इति सूत्रे 'तद्राजस्य—' इति सूत्रे च भाष्यकैयटयोर्दर्शनात्। न च तद्धितार्थस्य प्रथमं बहुत्वान्वयेऽपि तद्धितस्य देवताविशिष्टद्रव्यवाचित्वेन द्रव्यदेवतासंबन्धभेदप्रसङ्गान्न यागैक्यसिद्धिरिति वाच्यम्। [1]तद्धितेन हि द्रव्यमात्रमभिधीयते। देवता तु

1. तद्धितो हि द्रव्यमात्रमभिधत्ते—क, घ, ङ.

तद्धितोपसंदानात्प्रकृत्यैव प्रतीयते। तथा च तद्धितार्थद्रव्यस्यैव बहुत्वान्वयान्न यागभेदः प्रसज्यते। न च तद्धितमात्रस्यैकशेषेऽपि तद्धितान्तादेव बहुवचनोत्पत्त्या तद्धितस्यैव प्रकृत्या प्रथममन्वयेन भाव्यमिति वाच्यम्। प्रथमं तद्धितार्थस्य प्रजापतिना देवतया अन्वयेऽपि विशेष्यमात्रस्यैव बहुत्वान्वयितया विशिष्टस्य तदन्वयाभावेन यागभेदासिद्धेः। प्राजापत्यशब्देन हि देवतासंबन्धोपसर्जनं द्रव्यमेव प्राधान्येनाभिधीयते। प्रधानत्वात्तस्यैव बहुत्वेनान्वयो युक्तः, न तु देवतासंबन्धस्योपसर्जनस्यापि। यदि च विशिष्टरूपस्य प्रतीतत्वमात्रेणोपसर्जनस्याप्यन्वयः स्यात्तर्हि 'द्वौ' 'त्रयः' इत्यत्रातिप्रसङ्गः। न हि तत्र द्वित्वविशिष्टस्य त्रित्वविशिष्टस्य च द्विवचनबहुवचनाभ्यामन्वयः; तथा सति 'द्वौ' इति चत्वारः प्रतीयेरन् 'त्रयः' इति नव। अतोऽत्र प्राजापत्यशब्दे विशेष्यभूतद्रव्यमात्रस्य प्रथमं बहुत्वेनान्वयो युज्यत इति न यागभेदः। न च अत्र यागैक्ये एकस्यैव पशोर्यागसाधनत्वं स्यान्नेतरेषाम्, प्रकृतौ 'अग्नीषोमीयं पशुम्' इत्येकत्वस्योपादेयगतत्वेन विवक्षिततया एकपशुनिष्पन्नानां हृदयाद्यवयवानां यागसाधनत्वेन इहाप्येकपशुनिष्पन्नानामेव तेषामवयवानां चोदकतः प्राप्तेः यागैक्ये चोदकस्यैकत्वेन पश्वन्तरेषु तत्प्राप्त्यभावादिति वाच्यम्। इह सप्तदशानां पशूनामुपदेशबलेन तदनुसारेण चोदकतः प्रतिपश्वेकादशावयवप्राप्तेर्वर्णनीयतया सर्वेषां यागसाधनत्वोपपत्तेः। न च सप्तदशपशूपदेशस्य कर्मभेदेऽप्युपपत्त्या न तद्बलेन चोदकस्यान्यथाभावो युक्त इति वाच्यम्। प्रकृतौ ह्येकादशावयवप्रकृतिभूतस्य पशोरेव यागसाधनतया एकादशावदानगणस्य पशुधर्मत्वेन साक्षाद्यागधर्मत्वाभावेनोपाकरणनियोजनादिपशुधर्मवदेकादशावदानगणस्य कर्मैक्येऽपि प्रतिपशुप्राप्तिसंभवेन सर्वेषां पशूनां यागसाधनत्वोपपत्तेः। किंच तद्धितान्तैकशेषेण कर्मभेदे सप्तदश कर्माणि तावन्ति चापूर्वाणि कल्प्यानि। तद्धितमात्रैकशेषे त्वेकमेव कर्म तदपूर्वं चेति लाघवम्। इति प्राप्ते, सिद्धान्तयति— **पृथक्त्वनिवेशित्वात्संख्यया कर्मभेदः स्यात्**। 'प्राजापत्यान्' इति कृततद्धितान्तैकशेषशब्दनिर्दिष्टसंख्यया प्रजापतिविशिष्टद्रव्यगतया यागभेदः स्यात्। कुतः। पृथक्त्वनिवेशित्वात् तस्याः पृथक्त्वैकार्थसमवायात्। प्रकृतौ तावत् 'एकादशावदानप्रकृतिभूतः पशुर्यागसाधनम्' इति नार्थः, पशोर्हविष्ट्वाभावात्; हृदयादीनामेव हविष्ट्वात् 'हृदयादिभिः पशुप्रकृतिकैर्यागः साधनीयः' इत्येवार्थः। तथा च हृदयादीनामुपाकरणादिवन्न पशुधर्मत्वम्, किंतु यागधर्मत्वमेव। ततश्च चोदकतो विकृतियागोऽप्येकपशुप्रकृतिकहृदयादिभिः साध्य इत्येतावन्मात्रमवगतमिति प्रकृते पशुभेदेऽपि कर्मैक्यादेक एव हृदयादिगणः प्राप्नोति। एवं च एकेन हृदयादिगणेन सर्वेषां पशूनां कथं यागसाधनत्वं शक्येत संपादयितुम्। न च प्रकृतौ पशावेकत्वस्य श्रौतत्वेऽप्यवदानगणे एकपशुनिष्पन्नत्वस्यार्थिकतया तस्यात्रातिदेशाभावेन एकस्य पशोर्हृदयावदानमन्यस्य जिह्वावदानमित्येवमवदानगणप्राप्त्या सर्वेषां यागसाधनत्वमुपपद्यत इति वाच्यम्। एवमप्येकादशानां पशूनां यागसाधनत्वनिर्वाहसंभवेऽपि तदितरेषां तन्निर्वाहासंभवात्। अतः सर्वेषां पशूना यागसाधनतया प्राजापत्यत्वनिर्वाहाय तद्धिता-

न्तानामेकशेषेण विशिष्टरूपेषु बहुत्वाश्रयणमेव युक्तम् । 'द्वौ' 'त्रयः' इत्यादौ तु शब्दशक्तिस्वाभाव्यात्प्रत्ययथयोः प्रकृत्यर्थानुवादकत्वम् । अत एव "प्रातिपदिकार्थसूत्रे संख्यापर्यायवचनग्रहणमुक्तार्थत्वेऽपि 'द्वौ' 'त्रयः' इत्यादौ विभक्तिविधानार्थम्" इति वैयाकरणाः । अनेकादृष्टकल्पना तु प्रामाणिकत्वान्निर्दोषा । प्रयोजनं—पूर्वपक्षे सर्वेषां पशूनां यागसाधनत्वस्य व्यासक्तया 'प्रजापतय एव ते पशवो न मम' इति त्यागानुष्ठानम्; सिद्धान्ते तु 'प्रजापतय इदम्' इति सप्तदशकृत्वः त्यागानुष्ठानमिति । याज्ञिकास्तु यागभेदेऽपि 'प्रजापतय इदम्' इति सकृदेव त्यजन्ति । सकृदुच्चारितस्यैव 'प्रजापतय इदम्' इत्यस्य तन्त्राभिधानशक्त्या युगपदेव प्रतिद्रव्यं देवतासंबन्धकरणस्य संभवादिति तदाशयः । अत एव चरुपुरोडाशीयविभागमन्त्रे 'इदमिन्द्राग्न्योर्वावापृथिव्योः' इत्यादौ 'इदंशब्दस्तन्त्रं स्यात्' इत्यापस्तम्बसत्याषाढभारद्वाजाः । संकर्षकाण्डेऽप्येवम् । 'एकामिव संस्तुयात्समानां देवतां समानार्थामव्यवहितां सकृन्निगमेषु' इत्याश्वलायनः । प्रयोजनान्तरमपि वार्तिकादौ व्यक्तम् । इति संख्याधिकरणम् ॥

८. संज्ञाकृतकर्मभेदाधिकरणम् ।

ज्योतिष्टोमं प्रकृत्य श्रूयते 'अथैष ज्योतिः' 'अथैष विश्वज्योतिः' 'अथैष सर्वज्योतिः' 'एतेन सहस्रदक्षिणेन यजेत' इति । तत्र किं प्रकृतमेव ज्योतिष्टोमं ज्योतिरादिशब्दैरनूद्य सहस्रदक्षिणाख्यो गुणो विधीयते, उत कर्मान्तराण्येव ज्योतिरादिनामकानि सहस्रदक्षिणाविशिष्टानि विधीयन्त इति संशयः । तत्र द्विज्यादिसंख्याया आश्रयभेदनियमाद्युक्तं कर्मभेदकत्वम्, न तु नाम्नामपि । 'दर्शपूर्णमासौ' 'साकंप्रस्थायीयः' 'दाक्षायणयज्ञः' इत्यादिनामभेदे सत्यपि कर्मभेदाभावात्, 'सूर्यः' 'दिवाकरः' 'भास्करः' इत्येवं सूर्यादेरेकस्याप्यनेकनामदर्शनात्, ज्योतिरादिशब्दानां प्रथमश्रुतैतच्छब्दानुसारित्वेन प्रकृते तेषामर्थान्तरप्रत्यायकत्वानुपपत्तेश्च । अतो ज्योतिरादिशब्दैः प्रकृतज्योतिष्टोमानुवादेन सहस्रदक्षिणागुणविधिः । संभवति हि ज्योतिरादिशब्दैर्ज्योतिष्टोमस्यानुवादः, तेषां तन्नामत्वात् । न च यजिसामानाधिकरण्याभावात्कथं तेषां यागनामत्वमिति वाच्यम् । 'अथैष ज्योतिः' इत्यत्र ज्योतिरादिशब्दनिर्दिष्टानाम् 'एतेन' इत्येतच्छब्देनापि ज्योतिरादिरूपेणैव प्रत्यायितत्वेन एतच्छब्दे यजिसामानाधिकरण्यस्य ज्योतिरादिशब्दानां यजिसामानाधिकरण्ये पर्यवसिततया तन्नामताया युक्तत्वात् । भवति हि 'त्रिवृत्पञ्चदशः सप्तदश एकविंशः, एतानि वा व तानि ज्योतींषि, य एतस्य स्तोमाः' इति त्रिवृदादिस्तोमपरत्वेनावगतो ज्योतिःशब्दस्तद्वतः क्रतोर्ज्योतिष्टोमस्य नाम । एवं विश्वानि ज्योतींषि सर्वाणि ज्योतींषि त्रिवृदादीनि यस्येति विश्वज्योतिःसर्वज्योतिःशब्दावपि । न चाथशब्दबलेन प्रकृतप्रत्यभिज्ञाविच्छेदात्तदनुवादत्वमयुक्तमिति वाच्यम्। न ह्यत्राथशब्दोऽधिकारे वर्तते येन प्रकृतबुद्धिविच्छेदः स्यात्। गुणविधेः प्रकृतकर्मापेक्षत्वपरोऽत्राथशब्दः, द्वादशशतदक्षिणापेक्षया पक्षान्तरपरिग्रहार्थो वा । एवं च ज्योतिरादि-

शब्दानां न प्रकृतहानिरप्रकृतप्रक्रियाकल्पनापि। तस्मात्प्रकृतज्योतिष्टोमानुवादेन गुणो विधीयते। तदेवं संभवति गुणविधिपरत्वे कर्मान्तराणि तदपूर्वाणि च न युज्यते कल्पयितुम्। इति प्राप्ते, सिद्धान्तयति—

संज्ञा चोत्पत्तिसंयोगात् ॥ २२ ॥

चशब्द उक्तसमुच्चये। संख्यावत्संज्ञापि स्वयं भिन्ना सती पृथक्त्वैकार्थसमवायात्कर्मभेदिका स्यात्। व्याकरणाधिकरणे हि 'अन्यायश्चानेकशब्दत्वम्' इति गुणसूत्रे एकस्यार्थस्यानेकशब्दत्वं निराकृतम्। ज्योतिष्टोमनामतः परस्परतश्च भिन्नानि नामान्यत्र श्रूयन्त इत्यर्थभेदो वाच्यः। न चैवं सति विद्वद्वाक्येऽपि पौर्णमास्यादिश्रवणात्कर्मान्तरं स्यादिति वाच्यम्। रूपलाभाभावेन बाधकेन तदसंभवात्। न चात्रार्थान्तरत्वे किंचिद्बाधकमुपलभामहे। ततश्च संज्ञाश्रुत्या अर्थान्तरावगमात्प्रकरणविच्छेदे सत्यर्थान्तरकलुषायां च बुद्धावुपनिपतत्[1] 'सहस्रदक्षिणेन यजेत' इति वाक्यं ज्योतिष्टोमं न गन्तुमुत्सहते। तथा च प्रकृते कर्मणि गुणविध्यसंभवान्न प्रकृतहान्यादिदोषः। न च ज्योतिरादिशब्दानां ज्योतिष्टोमनामैकदेशप्रत्यभिज्ञानान्नामत्वम्, 'वसन्ते वसन्ते ज्योतिषा यजेत' इत्यादौ केवलज्योतिःशब्दस्य ज्योतिष्टोमे प्रयोगदर्शनादिति वाच्यम्। न ह्यवयवसाम्यादेकार्थता युक्ता, अन्यथा 'शाला' 'माला', 'देवदत्तः' 'यज्ञदत्तः', इत्यादीनामप्येकार्थत्वापत्तेः। अतो ज्योतिरादिपदानि समुदायान्तराण्येव। 'वसन्ते वसन्ते ज्योतिषा—' इत्यत्र तु प्रकरणवशात् 'वसन्ते ज्योतिष्टोमेन' इति शाखान्तराच्च ज्योतिःशब्दो गौणः। किंच स्तिवृदादिषु ज्योतिःशब्दो वाक्यशेषादवगम्यमानो यस्य स वाक्यशेषः तत्रैव ज्योतिष्टोमवाक्ये ज्योतिःशब्दस्योपचाराद्वृत्तिमवगमयति, नान्यत्र। अन्यथा 'सिंहो माणवकः' इति क्वचित्सिंहशब्दः प्रमाणवशादुपचारेण माणवके वर्तमानः 'सिंहमालभेत' इत्यादौ माणवकमपि प्रत्याययेत्। अतो ज्योतिरादिशब्दानां निर्वचनान्तरमवलम्ब्य नामान्तरत्वमेवाश्रयितुं युक्तम्। न च कर्मान्तरत्वे 'अथैषः' इत्येतच्छब्दासामञ्जस्यम्, तस्य प्रकृतपरामर्शित्वादिति वाच्यम्। प्रागप्रस्तुतेऽपि 'एष देवदत्तः' इत्यादावेतच्छब्दतच्छब्दप्रयोगदर्शनात्तस्य[2] प्रस्तुतपरत्वनियमाभावात्। किंच ज्योतिष्टोमे सहस्रदक्षिणाविधानमप्यत्रानुपपन्नम्; तस्य द्वादशशतदक्षिणावरुद्धत्वात्, विकल्पस्य चाष्टदोषदुष्टत्वात्। न च दधिगोदोहनादिवन्नित्यगुणबाधेन फलाय गुणविधिरिति शङ्कयम्, एवमपि 'अथैष ज्योतिः' इत्याद्यानर्थक्यात्। न चानुवादतया सार्थक्यम्, 'एतेन' इत्यनेन धातुना च तत्सिद्धेः। ननु संज्ञायाः कर्मभेदकत्वे दाक्षायणादिसंज्ञाया अपि तथात्वं स्यादित्यत आह—उत्पत्तिसंयोगादिति। उत्पत्तिशिष्टैव संज्ञा कर्मभेदिका। दाक्षायणादिसंज्ञा तु उत्पन्नशिष्टगुणयोगनिबन्धनेत्यग्रिमपादे स्पष्टीभविष्यति।

1. उपनिपातात्. 2. दर्शनेन तस्य— क, घ, ङ.

सूर्यादित्यभास्करादिबहुनामत्वं तु सूर्यादेरेकत्वेन प्रमाणान्तरसिद्धत्वान्न भेदकम्। तदेवं संज्ञावशादत्र कर्मभेदः। अपूर्वान्तरकल्पनापि प्रामाणिकत्वान्निर्दोषा। न च संज्ञायाः शब्दान्तरत्वाच्छब्दान्तराधिकरणेन गतार्थता शङ्क्या। धात्वन्तररूपमेव हि शब्दान्तरं भावनानुरञ्जकव्यापाररूपेण स्वार्थमभिदधानं स्वार्थानुरक्तायां भावनायां धात्वन्तरानुरक्तभावनातो भेदं बोधयति। संज्ञा तु न भावनानुरञ्जकव्यापाररूपेण स्वार्थं वदति, तस्याः सिद्धरूपाभिधानस्वभावत्वात्। अतः संज्ञा धात्वर्थभेदमात्रे व्याप्रियते। तद्भेदाच्च भावनाभेद इति संज्ञाशब्दान्तरयोरस्ति भेद इत्यास्तां तावत्। प्रयोजनं तु पूर्वोत्तरपक्षयोः स्पष्टमेव। इति संज्ञाधिकरणम्॥

चातुर्मास्येषु वैश्वदेवपर्वणि 'वैश्वदेव्यामिक्षा' इति विश्वदेवदेवताकामिक्षाद्रव्यकयागं विधायाम्नायते 'वाजिभ्यो वाजिनम्' इति। तत्र दध्यानयनेन घनीभूतं तप्तं पयः 'आमिक्षा' इत्युच्यते। तदनुनिष्पन्नं तक्रवद्द्रवीभूतं द्रव्यम् 'वाजिनम्' इत्युच्यते। तत्र 'वाजिभ्यो वाजिनम्' इति किं पूर्वस्मिन्नेवामिक्षायागे 'वाजिनम्' इति वाजिनद्रव्यलक्षणगुणविधिः, उत वाजिदेवताकवाजिनद्रव्यकयागान्तरविधिरिति संशयः। 'वाजिनम्' 'वाजिनः'[1] इति उभयं द्रव्यदेवतं पूर्वकर्मणि विधीयत इति कोटिस्तु पौर्णमास्याधिकरणे 'गुणस्तु श्रुतिसंयोगात्' 'चोदना वा गुणानां युगपच्छास्त्रात्' इति सूत्राभ्यां प्रमाणान्तरप्राप्तकर्मण्यनेकगुणविधानस्य प्रसङ्गान्निराकृतत्वान्नोन्मेषमर्हति। तत्र 'वाजमन्नमामिक्षारूपमेषाम्' इत्यामिक्षासंबन्धिनो विश्वान्देवान् 'वाजिभ्यः' इत्यनूद्य तत्र वाजिनलक्षणगुणविधिः। इनिप्रत्ययस्य च मत्वर्थीयस्य सर्वनामार्थे विहितत्वात्सर्वनाम्नश्च सिद्धविषयकत्वात् अनुवादस्य सति संभवे संनिहितगामित्वाच्च 'वाजिभ्यः' इति संनिहितविश्वदेवमात्रस्यानुवादः, न तु पुरोडाशाद्यन्नवतामग्न्यादीनामपीति नातिप्रसङ्गः। न च वाजिशब्दस्य विश्वदेवपरत्वेऽपि न विश्वदेवत्वेन तेषां देवतात्वं किंतु वाजित्वेन, ततश्च स्तुतशस्त्राधिकरणगतेन्द्रमहेन्द्रन्यायेन देवताभेदान्नास्ति पूर्वकर्मसमवाय इति वाच्यम्। विश्वेदेवा हि पूर्वकर्मणि देवतात्वावच्छिन्नविश्वदेवत्वरूपेणोपस्थिताः 'वाजिभ्यः' इत्यनेनापि देवतात्वप्रयोजकविश्वदेवत्वरूपेणैव प्रत्यभिज्ञायन्त इति विश्वदेवत्वरूपेणैव वाजिनद्रव्यसंबन्धो न वाजित्वेन। तेषां च विश्वेषां देवानां वाजिनस्य च प्रतीयमानसंबन्धस्य यागं विनानुपपत्त्या यागापेक्षायां प्रकृतयागीयद्रव्यरूपामिक्षापरवाजिशब्दमहिम्नोपस्थितप्रकृतामिक्षायाग एव तन्निर्वाहकतया कल्प्यते, वाजिभ्यो विश्वदेवेभ्यो यजेतेति यत्तत्र वाजिनं द्रव्यमिति। तदेवं वाजिशब्दोपस्थितविश्वदेवदेवतामुखेन वाजिनद्रव्यं विहितं भवतीति नात्रेन्द्रमहेन्द्रन्यायावतारः। न चैवं सति वाजिशब्दस्य अश्वे रूढस्य विश्वदेवपरत्वे रूढिपरित्यागः स्यादिति वाच्यम्।

९. देवताभेदकृतकर्मभेदाधिकरणम्।

1. 'वाजिभ्यः'—ख, ग, घ, ङ.

प्रकृतकर्मणि गुणमात्रविधानलाघवलाभेन प्रकृतहान्यप्रकृतप्रक्रियाकल्पनापूर्वान्तरकल्पनाविशिष्टविधिगौरवभयेन च रूढिपरित्यागस्य युक्तत्वात् । न चोत्पत्तावामिक्षायुक्ततयैव पूर्वकर्मणोऽवगतत्वेन तस्य द्रव्यान्तराकाङ्क्षाविरहान्न तत्र वाजिनद्रव्यस्य निवेशसंभव इति वाच्यम्। न हि वाजिनवाक्येन पूर्वकर्मण आमिक्षायुक्तस्यानुवादः, येनोत्पत्तिशिष्टद्रव्यान्तरावरुद्धत्वाद्वाजिनगुणो न तत्र निवेशं लभेत । किंत्वामिक्षावाक्ये द्रव्यदेवतासंबन्धबलात् 'आमिक्षया यजेत' इत्येवं यजतिपदमेकं कल्पितम् । तेन च केवलयजतिपदेन कर्ममात्रमामिक्षारूपगुणसंबन्धान्निष्कृष्यानूद्यत इति तत्र वाजिनगुणो निवेष्टुमर्हति । न च 'यजेत' इत्यनेन स्वरूपमात्रानुवादसंभवेऽपि वस्तुतस्तस्य कर्मणो गुणान्तरावरुद्धत्वान्न वाजिनान्वयसंभव इति वाच्यम् । आकाङ्क्षा हि न वस्तुकृता, किंत्वभिधानकृता । अन्यथा पुरोडाशकपालादेः पुरोडाशसंबन्धान्निष्कृष्य स्वरूपमात्रेणाभिहितस्य तुषोपवापाद्यन्वयो न स्यात् । यागस्वरूपमात्रं चात्र यजिनाभिधीयत इति भवति तस्य द्रव्यान्तरसंबन्धाकाङ्क्षा । अतो यागस्वरूपमात्रे वाजिनद्रव्यस्यान्वयसंभवः । न चैवम् 'यजति' 'ददाति' इत्यत्र यागान्विताया अपि भावनाया निष्कृष्य स्वरूपेणाभिधाने सति तत्र दानान्वयसंभवादेकधात्वर्थान्वितभावनायां न धात्वर्थान्तरान्वयसंभव इति शब्दान्तराधिकरणोक्तविरोधः स्यादिति वाच्यम् । भावनायाः केवलेन प्रत्ययेनानुवादस्य कर्तुमशक्यतया प्रकृतियुक्तेनैव प्रत्ययेन तदनुवादस्य कर्तव्यत्वेन तत्र प्रकृत्यर्थानुरक्तायाः एव भावनाया अनुवाद्यतया स्वरूपमात्रेण तदनुवादसंभवेऽप्यत्र कल्पितयजतिना पदान्तरेण गुणविनिष्कृष्टमेव पूर्वकर्मावगम्यत इत्यविरोधात् । ततश्चामिक्षासंबन्धाद्विनिष्कृष्य यागस्वरूपानुवादेन वाजिनगुणविधानसंभवान्नास्त्युत्पत्त्युत्पन्नशिष्टयोर्विशेषः । न चामिक्षादेवतासंबन्धस्य तद्धितश्रुत्या गम्यमानस्य वाक्यगम्याद्वाजिनदेवतासंबन्धाद्बलीयस्त्वमिति वाच्यम् । तद्धितेन सामान्यरूपेणैव द्रव्यमभिधीयते । आमिक्षात्वेन त्वभिधानं पदान्तरेणैवेत्यामिक्षासंबन्धस्यापि वाक्यगम्यत्वात् । तथा चामिक्षावाजिनयोस्तुल्यबलत्वादेकस्मिन्नेव यागे विकल्पः । इति प्राप्ते, सिद्धान्तयति—

गुणश्चापूर्वसंयोगे वाक्ययोः समत्वात् ॥ २३ ॥

चशब्द उक्तसमुच्चये । संज्ञावत् गुणोऽपि अपूर्वसंयोगे पूर्वस्मिन्कर्मणि निवेशासंभवे सति स्वनिवेशक्षमकर्मान्तरोत्पत्तिपरतामवगमयन् कर्मभेदको भवति । कथं पूर्वकर्मणि निवेशासंभवः। वाक्ययोः समत्वात् मिथोऽनपेक्षत्वात् ॥ अनुवादकतया एकस्य वाक्यस्य इतरापेक्षायां हि पूर्वकर्मणि निवेशः स्यात्। न त्विह तथास्ति । पूर्वकर्मणः प्रबलगुणावरुद्धत्वेन तस्य गुणान्तरविधाने अनुवादासंभवात्, आमिक्षाया उत्पत्तिशिष्टत्वेन बलवत्त्वात्, वाजिनस्य चोत्पन्नशिष्टत्वेन दुर्बलत्वात् । न चामिक्षासंबन्धाद्विनिष्कृष्य यागमात्रानुवादेन वाजिनविधिरविरुद्ध इति वाच्यम् ।

अनुवादस्य पुरोवादसापेक्षत्वेन पुरोवादपर्यालोचनस्यावश्यकतया तस्मिन्पर्यालोच्यमाने गुणयुक्तस्यैव कर्मणो बुद्धौ विपरिवृत्त्या तदृशायां निष्कृष्याभिहितस्यापि कर्मणो गुणान्तराकाङ्क्षाविरहात्, एकगुणयुक्ततया बुद्धौ विपरिवृत्तेर्गुणान्तराकाङ्क्षाप्रतिबन्धात् । पुरोडाशकपाले त्वगत्या कथंचिन्निष्कृष्याभिधानेनाकाङ्क्षोत्थाप्यते । न त्विहागतिकत्वम्, विशिष्टकर्मान्तरविधिसंभवात् । किंच तद्धितान्तैकपदश्रुत्या चोदितत्वादामिक्षा प्रबला । वाजिनं तु पदान्तरगम्यत्वेन वाक्यप्रमाणगम्यत्वाद्दुर्बलम् । न चामिक्षात्वेन तदभिधानं पदान्तरकृतमिति वाच्यम् । सर्वनामार्थे विहिततद्धितस्य देवतासंबन्धोपसर्जनद्रव्यवाचिनः पदान्तरसंनिधाने सति तदुपस्थाप्यविशेष एव पर्यवसानेन तद्धितेनैवामिक्षाद्रव्यस्योपस्थिततया श्रौतत्वानपायात् । तदुक्तं वार्तिके 'आमिक्षां देवतायुक्तां वदत्येवैष तद्धितः । आमिक्षापदसांनिध्यात्तस्यैव विषयार्पणम्' इत्यादिना । मास्तु वा तद्धितस्य द्रव्यविशेषवाचित्वम् । तथापि चतुर्थ्यास्तद्धितो बलीयान् । तद्धितेन हि द्रव्यं प्रतीयते सामान्यरूपेण । अतो युज्यते द्रव्यस्य देवतायाः संबन्धस्य च तद्धितान्तपदात्प्रतीतिः । चतुर्थ्या तु न सामान्यरूपेणापि द्रव्यं प्रतीयते । अतस्तत्र दूरेतरां द्रव्यदेवतासंबन्धप्रतीतिः । सा तु पदान्तरादेवेति चतुर्थ्यास्तद्धितो बलीयान् । तदुक्तं वार्तिके 'यथेहान्यपदार्थोऽपि तद्धितेऽन्तर्गतः स्मृतः । न संप्रदानमस्येति चतुर्थ्यैवं प्रतीयते' इत्यादिना । तथा च आमिक्षावाजिनयोरतुल्यबलत्वेन एकस्मिन्नेव यागे विकल्पेनापि समावेशासंभवाद्वाजिनगुणः कर्मभेदकः । प्रयोजनं—पूर्वपक्षे वाजिनामिक्षयोरेकस्मिन्विश्वदेवदेवताके यागे विकल्पे[1] वाजिदेवताकं वाजिनद्रव्यकं यागान्तरं नास्ति; सिद्धान्ते तु विश्वदेवदेवताकामिक्षाद्रव्यकात्पूर्वयागाद्वाजिदेवताकवाजिनद्रव्यकं यागान्तरमिति स्पष्टमेव । वस्तुतस्तु 'अग्निर्वायुः सूर्यः, ते वै वाजिनः' इत्यादिवाक्यशेषतो वाजिशब्दस्य त्रिवृच्चर्वाश्ववालादिशब्दवत्पदार्थान्तरपरतया निश्चितत्वेन तस्य विश्वदेवपरत्वमुखेन तद्यागानुवादकतामवलम्ब्य कथं पूर्वपक्षप्रवृत्तिः । अत उदाहरणान्तरमन्वेषणीयम् । इति गुणाधिकरणम् ॥

'अग्निहोत्रं जुहोति' इत्येतत्संनिधौ 'दध्ना जुहोति' 'पयसा जुहोति' इत्यादि श्रुतम् । तत्र दध्यादिवाक्यानि किं कर्मान्तरपराणि उत गुणविधय इति संशयः । तत्र एकैकस्माद्वाक्यादेकैकस्य गुणस्योपस्थित्या सर्वेषां युगपदन्वयासंभवाद्यस्य प्रथममन्वयस्तदवरुद्धे पूर्वाधिकरणन्यायेनान्वयासंभवाद्दध्यादिगुणकानि कर्मान्तराणि । इति प्राप्ते, सिद्धान्तयति—

अगुणे तु कर्मशब्दे गुणस्तत्र प्रतीयेत ॥ २४ ॥

अगुणे गुणशब्दरहिते कर्मशब्दे अग्निहोत्रवाक्ये सति तत्र तदुत्पन्ने कर्मणि दध्यादिवाक्यैः

1. विकल्पो—क, ग घ, ङ.

गुणः प्रतीयेत विधीयेत। तुशब्दः पूर्वस्माद्वैषम्यद्योतनार्थः। अग्निहोत्रवाक्योत्पन्ननिर्गुणकर्मानुवादेन युगपद्दध्यादिगुणविधाने सति एकगुणविशिष्टतया कर्मणो बुद्धावपरिवृत्तेर्न पूर्वाधिकरणप्रवृत्तिः। एकान्वयानन्तरमपरान्वयनियमोऽप्यसिद्धः, सर्वेषां युगपदुपस्थितत्वेन युगपदेवान्वयात्। प्रयोजनं—पूर्वपक्षे एकैकदध्यादिविशिष्टाग्निहोत्रकर्मणामनुष्ठानम्, सिद्धान्ते तु एकस्यैव विकल्पितदध्यादिद्रव्यकस्येति। वस्तुतस्तु आधाराग्निहोत्राधिकरणे 'चोदना वा शब्दार्थस्य प्रयोगभूतत्वात्तत्संनिधेर्गुणार्थेन पुनः श्रुतिः' इति सूत्रादेवागुणकर्मसंनिधौ गुणश्रुतिर्गुणविधानार्थेत्यवगमादिदमधिकरणमनर्थकम्। एवं च गुणरहिते कर्मण्युत्पन्ने दध्यादिगुणविधिः संभवति, न त्वामिक्षागुणविशिष्टयागविधौ सति तत्र वाजिनगुणविधिः इति प्रत्युदाहरणपरमेवेदं सूत्रमिति केचित्। इति गुणाधिकरणापवादः॥

१०. द्रव्यविशेषानुक्तिकृतकर्मैक्याधिकरणम्।

'अग्निहोत्रं जुहोति' इति प्रकृत्य आमनन्ति, 'दध्नेन्द्रियकामस्य जुहुयात्' इति। किमिह दधिसाधनकमिन्द्रियफलकं कर्मान्तरं विधीयते, उताग्निहोत्रमाश्रित्य दधिगुणमात्रं फलाय विधीयत इति संशयः। तत्र पूर्वपक्षयति—

फलश्रुतेस्तु कर्म स्यात्फलस्य कर्मयोगित्वात्॥ २५॥

तुशब्दः पूर्वाधिकरणवैषम्ये। अग्निहोत्रादन्यदेव दधिविशिष्टमिन्द्रियफलकं होमकर्म स्यात्। कुतः। फलश्रुतेः इन्द्रियस्य फलस्य श्रवणात्। नन्वत्र दधिगुण एव फलाय विधीयताम्; तत्राह— फलस्य कर्मयोगित्वादिति। फलस्य धात्वर्थभाव्यत्वादित्यर्थः॥

११. दध्यादिद्रव्यसफलत्वाधिकरणम्।

फलभावनायां धात्वर्थस्यैव हि समानपदोपात्तस्य करणत्वम्, न तूपपदार्थस्येति प्रपञ्चितं भावार्थाधिकरणे। अतो नात्र दधिगुणः फलाय विधीयत इति शक्यते वक्तुम्। न च 'अगुणे तु कर्मशब्दे गुणस्तत्र प्रतीयेत' इति पूर्वसूत्रे निर्गुणकर्मसंनिधौ सगुणश्रुतेर्गुणविधानार्थत्वोक्तेर्नेह कर्मान्तरविधिरिति वाच्यम्। फलाय गुणविधिरिति हि वदन्प्रष्टव्यः— किं दधिगुणः फल एव विधीयते, उत होमेऽपि। नान्त्यः 'दध्ना फलं भावयेत्' 'दध्ना होमं भावयेत्' इति वाक्यभेदापत्तेः। नाद्यः, जुहोतेरानर्थक्यात्। न च 'दध्ना जुहोति' इति वाक्यप्राप्तदधिसंबन्धानुवादेन प्रकृतहोमस्यैव फलविधिरस्त्विति वाच्यम्। कर्मानुवादो ह्युत्पत्तिवाक्यमात्रमपेक्षते, न तु गुणवाक्यमपि। ततश्च दधिप्राप्त्यनन्तरं फलविधिरित्यत्र प्रमाणाभावेन कथं दधिवाक्यप्राप्तदधिसंबन्धानुवादेन होमस्य फले विधिः। अनेनैव वाक्येन दध्नः फले होमे च विधौ वाक्यभेदः। फलायैव तद्विधौ जुहोतेरानर्थक्यम्। न च होममाश्रित्य फलाय दधिविधानाय प्रकरणप्राप्तहोमानुवादकत्वान्न जुहोतेर्वैयर्थ्यं नापि वाक्यभेद इति वाच्यम्। प्रकरणेन हि होम एव प्राप्तो न तु होमसाधनत्वरूपतदा-

श्रितत्वमपि, 'दध्ना जुहोति' इति वाक्यप्रवृत्त्यनन्तरमेव इन्द्रियकामवाक्यप्रवृत्तौ प्रमाणाभावात्। ततश्च दधिहोमयोः प्रतीयमानक्रियाकारकसंबन्धस्यात्रानुवादासंभवात्तस्य सर्वथा परित्याग एव कृतः स्यात्। तथा च फलार्थतया होमसाधनत्वरूपहोमाश्रिततया च दधि विधेयमिति वाक्यभेदो दुर्वारः। अतः प्रकृतकर्मणि दधिगुणविधानासंभवात्ततोऽन्यो दधिविशिष्टो होमः फलाय विधीयते। इति प्राप्ते, सिद्धान्तयति—

अतुल्यत्वात्तु वाक्ययोर्गुणे तस्य प्रतीयेत ॥ २६ ॥

तुशब्दः पूर्वपक्षव्यावृत्तौ। न कर्मान्तरमिन्द्रियकामवाक्ये विधीयते, किंतु तस्य वाक्यस्य गुणविधौ सामर्थ्यं प्रतीयेत। कुतः। वाक्ययोः अतुल्यत्वात्। 'अग्निहोत्रं जुहुयात्स्वर्गकामः' इति वाक्यस्य फले धात्वर्थविधायकतया इन्द्रियकामवाक्यस्य च फले गुणविधायकतया वैलक्षण्यस्यावश्यकत्वात्॥ सर्वत्र हि भावनैव विधेया। तस्यां च फलवत्यां[1] धात्वर्थः करणीभवति, यत्रासौ न प्राप्तो विधेयान्तरं च नास्ति, यथा स्वर्गकामवाक्ये। इन्द्रियकामवाक्ये तु धात्वर्थस्य प्राप्तत्वाद्विधेयान्तरस्य दधिगुणस्य सद्भावाच्च धात्वर्थादुत्तारिता विधिशक्तिरुपपदार्थेऽपि गुणे विश्राम्यति। न चैकपदोपात्तत्वरूपश्रुतेर्बलीयस्त्वात्कर्मान्तरविधिरेव युक्त इति वाच्यम्। प्रकृतहानाप्रकृतकल्पनविशिष्टविधिगौरवमत्वर्थलक्षणादिबहुदोषप्रसङ्गेन श्रुतिमप्युल्लङ्घ्य उपपदार्थगुणविधानस्यैवाश्रयितुं युक्तत्वात्। न च 'दध्ना जुहोति' इति दध्नः प्राप्तत्वात्तद्विधानमनर्थकमिति वाच्यम्। ऋत्वर्थतया हि तेन वाक्येन दधिविधानम्। इन्द्रियकामवाक्येन तु फलार्थतया तद्विधानम्। तथा च वक्ष्यति चतुर्थस्य तृतीये 'एकस्य तूभयत्वे संयोगपृथक्त्वम्' इति। संनिधिरूपप्रकरणप्राप्तहोमानुवादेन होमाश्रितस्य दध्नो विधानाज्जुहोतेराश्रयतयान्वयः संभवति। न च होमाश्रितत्वं होमसाधनत्वमेव; दध्नो होमस्य च न साध्यसाधनभावः प्रकरणादवगतः येनाश्रयतया होमोऽनूद्येत; होमसाधनत्वरूपहोमाश्रितत्वस्याप्यनेनैव विधाने वाक्यभेद इति वाच्यम्। 'दध्ना' इति तृतीयाश्रुत्या हि कारकभूतं दधि फलोद्देशेन जुहोतिपरप्रत्ययेन विधीयते। तत्र च कारकस्य क्रियापेक्षत्वादपेक्षितक्रियासमर्पणार्थं, केवलस्य प्रत्ययस्य प्रयोगानर्हत्वात्तत्प्रयोगार्थं च यस्मिन्कस्मिंश्चित् धातौ प्रयोक्तव्ये जुहोतिः प्रयुज्यते, तदर्थस्य संनिहितत्वेनानुवादसंभवात्। न तु धात्वन्तरार्थस्य, तस्याप्राप्तत्वात्; तस्यापि विधाने वाक्यभेदापत्तेः। एवं च 'दध्ना' इति तृतीयया प्रतीयमानं कारकत्वं क्रियानिरूपितमिति क्रियाविशेषापेक्षायां संनिधानाद्धोमक्रियानिरूपितमित्यवगमात्क्रियाकारकभावेन दध्यन्वितो होमो जुहोतिनानूद्यते न तु विधीयत इति वाक्यभेदं विनैव संभवति जुहोत्यन्वयः। एकत्वादिविशिष्टपशोरिव दधिविशिष्टकारकविधानाच्च न वाक्यभेदः। यथा चैतत्तथा ग्रहैकत्वाधिकरणे स्फुटीभविष्यति। न च धात्वर्थस्य क्रियात्मकत्वाभावान्न जुहोतेः

1. फलवाक्यात्—क.

कारकान्वयः; एवं च 'दध्ना' इति तृतीयावगतं कारकत्वं न होमापेक्षं किंतु फलभावनापेक्षमेव; तथा च केवलदध्न एव फले विधानं न तु करणभूतस्येति नोक्तप्रकारेण जुहोत्यन्वय इति वाच्यम्। करणत्वस्य फलभावनापेक्षत्वेऽपि दध्नः सिद्धस्वभावस्य कर्तृव्यापारविषयत्वाभावेन फलभावनाकरणत्वस्य धात्वर्थमुखेनैव वक्तव्यताया आवश्यकत्वात्तदपेक्षस्यैव करणत्वस्य विभक्त्यभिधेयत्वात्। यद्यपि धात्वर्थो न कारकान्वययोग्यः, तथापि तत्कर्मकभावना योग्या। सा च प्रकरणादुपस्थिता। तन्निरूपितं करणत्वं विभक्त्यभिधेयं भावनामुखेन धात्वर्थं प्रति करणत्वे विश्राम्यति। न च तृतीयावगतकरणत्वस्य होमापेक्षत्वे फलभावनाकरणत्वं गुणस्य न स्यात्, तत्प्रत्यायकाभावादिति वाच्यम्। यागादिवद्गुणस्यापि समभिव्याहारत एव फलभावनाकरणत्वलाभसंभवात्। एवं च विधिव्यापारं विनैव संनिधिलक्षणप्रकरणेन तृतीयान्तपदश्रुत्या च 'होमे कारकभूतं दधि' इत्येतावतोऽर्थस्य सिद्धौ 'तदिन्द्रियकामस्य' इत्येतावन्मात्र एव विधेर्व्यापार इति न वाक्यभेदः। तस्मात्प्रकृतहोममाश्रित्य फलाय गुणविधिरिति स्थितम्। केचित्तु 'दधिहोमयोः क्रियाकारकभावेन संबन्धो लोकसिद्धः; ततश्च दधिहोमसंबन्धे विधिव्यापाराभावाद्धोमाश्रितदधिविधौ न वाक्यभेदः' इत्याहुः। तदयुक्तम्। लोकतो हि दधिहोमयोः क्रियाकारकभावस्तावत्स्वरूपेणैव सिद्धः, न तु कर्तव्यतयापि। तथा च सति फलार्थिनो नियमेन दधिहोमसंबन्धोपादानं न स्यात्। ततश्च तस्य कर्तव्यता फलसंबन्धश्च विधीयत इति वाक्यभेदः। न च होमाश्रितस्य दध्नः फले विधाने सति होमसंबन्धाभावे होमसंबन्धावस्थापन्नहोमाश्रितत्वासंपत्तेरर्थादेव तत्कर्तव्यतासिद्धौ तद्विधानाभावान्न वाक्यभेद इति वाच्यम्। एवं सति 'सोमेन यजेत' इत्यादावपि सोमयागयोः क्रियाकारकभावसंबन्धमादाय केवलयागविधेर्वक्तुं शक्यतया विशिष्टविधिमात्रोच्छेदापत्तेः इत्यास्तां तावत्। प्रयोजनं— पूर्वपक्षे नैयमिकाग्निहोत्रव्यतिरिक्तमनियतकालं दधिसाधनकं होमान्तरं सकृदेव दर्वीहोमत्वादपूर्वं क्रियते, सिद्धान्ते तु सायंप्रातरग्निहोत्रहोमे दधिप्रयोग इति दिक्। इतीन्द्रियकामाधिकरणम्॥

'त्रिवृदग्निष्टुदग्निष्टोमस्तस्य वायव्यास्वेकविंशमग्निष्टोमसाम कृत्वा ब्रह्मवर्चसकामो यजेत' इत्यग्निष्टुतं प्रकृत्य 'वारवन्तीयमग्निष्टोमसाम कार्यम्' इति च गुणं विधायेदमाम्नायते 'एतस्यैव रेवतीषु वारवन्तीयमग्निष्टोमसाम कृत्वा पशुकामो ज्योतिषा यजेत' इति। त्रिवृत् स्तोत्रीयानवकस्तोमकः अग्निष्टोमाख्यस्तोत्रेण संस्थाप्यः अग्निष्टुन्नामकः कश्चित्क्रतुः। तस्य क्रतोरग्निष्टोमसाम प्रकृतिवदेव 'यज्ञायज्ञा वो अग्नये' इत्याग्नेयीष्वृक्षु प्राप्तम् '[1]वायव्यासु' इत्यनेनापोद्यते। प्रकृतितो यद्यप्येकविंशस्तोमकमेव तत्प्राप्तं तथापि 'त्रिवृदग्निष्टोमः' इत्यनेन त्रिवृत्त्वेन तदपोदितमिति 'एकविंशम्' इत्यनेन प्रतिप्रसूयते।

१२. वारवन्तीयादीनां कर्मान्तरताधिकरणम्।

1. 'आग्नेयीभ्यो वायव्यासु'—ख, ग.

प्रकृतितो यज्ञायज्ञीयाख्यमग्निष्टोमसाम प्राप्तम् 'वारवन्तीयम्' इत्यनेनापोद्यते। वारवन्तीयं सामविशेषः। रेवतीषु रेशब्दघटितासु 'रेवतीर्न' इत्यादिषु ऋक्षु। अनेन वायव्या अपोद्यन्ते। तत्र 'एतस्यैव रेवतीषु—' इति वाक्ये पूर्वस्मिन्नेवाग्निष्टुत्क्रतौ रेवत्याधारवारवन्तीयगुणः पशुफलाय विधीयते, उत गुणविशिष्टं कर्मान्तरमिति संशयः। तत्र धात्वर्थस्य यागस्य 'ब्रह्मवर्चसकामो यजेत' इति पूर्ववाक्यगतयजिनैव प्राप्तत्वात्प्रकृतहानाप्रकृतकल्पनविशिष्टविधिगौरवदोषपाताच्च पूर्वाधिकरणन्यायेन पूर्वकर्मणि गुणविधानमेव युक्तमाश्रयितुम्। न च गुणसाध्यस्यैवाश्रयत्वात् यागस्य च द्रव्यदेवतासाधनकस्य सामसाध्यत्वाभावान्नाश्रयत्वसंभव इति वाच्यम्। तृतीयाद्यपादे 'आनर्थक्यात्तदङ्गेषु' इत्यधिकरणे 'सप्तदशारत्निर्वाजपेयस्य यूपः' इति सप्तदशारत्नित्वस्य वाजपेये साक्षादन्वयासंभवाद्वाजपेयाङ्गभूतपशुयागाङ्गयूपद्वारा अन्वय इति वक्ष्यमाणन्यायेन क्रत्वङ्गस्तोत्रनिष्पादनद्वारा यागसाधनत्वोपपत्तेः। न च रेवतीवारवन्तीयसंबन्धः तस्य च फलसंबन्ध इत्यनेकगुणविधाने वाक्यभेद इति वाच्यम्। न ह्यनेकार्थविधानमात्रेण वाक्यभेदः, तर्हि विशिष्टविधिमात्रोच्छेदापत्तेः। किंतु यत्रानेकार्थविधिव्यापारं विना विशेषणवैशिष्ट्यस्यासिद्धिस्तत्र विशेषणविशेष्यसंबन्धसिद्ध्यर्थं विशिष्टविधानार्थं च विधायकप्रत्ययस्य व्यापारभेदाद्विध्यावृत्त्या वाक्यभेदः, यथा पौर्णमास्यधिकरणे विद्वद्वाक्यविहितकर्मण्याग्नेयादिवाक्यैर्गुणविधिपक्षे। प्रकृते तु विधिव्यापारं विना कृत्वाशब्देनैव वारवन्तीयस्य रेवतीसंबन्धसिद्धया तत्र विधिव्यापाराभावेन कृत्वाशब्दान्तरपदसंदर्भेणोपस्थितस्य रेवत्याधारवारवन्तीयस्य फलसंबन्धमात्र एव विधेर्व्यापृियमाणतया विध्यावृत्त्यभावान्न वाक्यभेदः। अन्यथा 'त्रिवृदग्निष्टुत्' इत्यादिवाक्येऽपि वायव्यास्त्वेकविंशमितिगुणद्वयसंबन्धः तद्विशिष्टस्य च क्रतोः फले विधानमिति वाक्यभेदः स्यात्, तत्र कृत्वान्तसंदर्भेणोपस्थितस्य तावद्गुणविशिष्टस्य यागस्य फले विधानात्। वाक्यभेदपरिहारस्तु प्रकृतेऽपि तुल्यः। न च 'रेवत्याधारवारवन्तीयं पशुसाधनम्' इत्यस्य 'एतस्य यागस्य वारवन्तीयम्' इति [1]षष्ठ्यर्थस्यापि विधेयत्वाद्वाक्यभेदः शङ्क्यः, षष्ठ्यन्तैतच्छब्दस्य फलवता गुणेन यागस्य संनिधिलब्धाश्रयाश्रयिभावसंबन्धानुवादकत्वात्। तृतीयान्तैतच्छब्दस्तु विधेयगुणप्रतिपादकतया विधिशेषत्वान्नानुवादकः। न च विधेयगुणस्य वारवन्तीयशब्देनैव लाभात्तद्वैयर्थ्यमिति वाच्यम्। 'वारवन्तीयम्' इति द्वितीयान्तेन प्रधानतयोपस्थितस्य वारवन्तीयस्य फलभावनाकरणत्वान्वयायोग्यत्वेन तद्योग्यतासिद्ध्यर्थं तस्य तृतीयान्तैतच्छब्देन करणतया निर्देशावश्यंभावात्। अग्निष्टोमसामशब्दोऽप्यानर्थक्यन्यायप्राप्तस्तोत्रसंबन्धानुवादः। अतोऽग्निष्टोमाख्यस्तोत्रसाधनत्वविधानतोऽपि न वाक्यभेदप्रसक्तिः। न चाग्निष्टुति क्रतौ स्तोत्रान्तराणामपि सद्भावात्तेषामपि चोदकाद्विपरिवृत्त्यविशेषाद्विशिष्याग्निष्टोमस्तोत्रसंबन्धानुवादायोगात्स्तोत्रान्तरपरिसंख्यानाय सोऽवश्यं विधेयः। तथा च 'वारवन्तीयेन पशूत्कुर्यादग्निष्टोमस्तोत्रसंबन्धिना' इति वाक्यभेद इति वाच्यम्। चोदकतः स्तोत्रान्तरोपस्थितेः प्रागेव '[2]वारवन्तीयमग्निष्टोमसाम कार्यम्' इति क्रत्वर्थपू-

1. विशिष्टस्यापि. 2. 'वायव्यास्वग्निष्टोमसाम कार्यं वारवन्तीयं'— ख, ग.

र्वावाक्ये शब्देनोपस्थितस्याग्निष्टोमस्तोत्रस्यैव बुद्धौ विपरिवृत्त्या तस्यैवानुवादौचित्यात्। तस्मादग्निष्टोमस्तोत्रद्वारा प्रकृतयागमाश्रित्य रेवत्याधारवारवन्तीयगुणः पशुफलाय विधीयते। इति प्राप्ते, सिद्धान्तयति—

समेषु कर्मयुक्तं स्यात् ॥ २७ ॥

गीत्यादिक्रियात्मकेष्वाश्रयानपेक्षतया यागादिधात्वर्थतुल्येषु वारवन्तीयादिगुणेषु श्रुतेषु कर्मयुक्तं जन्यतया धात्वर्थयुक्तमेव फलं स्यात्, न तु गुणयुक्तम्। 'एतस्यैव रेवतीषु वारवन्तीयम्' इत्येवंजातीयकेषु वाक्येषु कर्मान्तरविधिरेव, न गुणविधिरिति यावत्। गीतिविशेषो हि वारवन्तीयसाम। उच्चारणक्रियाविशेष एव च गीतिर्नाम। एवंविधस्य च साम्नो यागादिवदाश्रयापेक्षाविरहात्कथं यागमाश्रित्य तद्विधानम्। समेष्वित्यस्य यागं प्रति कारकभावात्मकगुणभावमनापन्नेष्वित्यर्थः। यत्र हि प्रकृते कर्मणि फलार्थस्य गुणस्य कारकभावः संभवति तत्रैव गुणस्य फलाय विधिः, यथा 'दध्नेन्द्रियकामस्य' इति। इह तु वारवन्तीयसाम्नो गीतिविशेषात्मकस्य द्रव्यदेवतासाधनकयागं प्रति साधनत्वस्यासंभवात्कथं यागमाश्रित्य विधिः स्यात्॥ न चानर्थक्यतदङ्गन्यायेन क्रत्वङ्गभूतस्तोत्रनिर्वृत्तिद्वारा यागाश्रयत्वसंभव इति वाच्यम्। वैषम्यात्। सप्तदशारत्नित्वं हि वाजपेये साक्षादसंभवात्तदङ्गभूतयूपद्वारा वाजपेयाङ्गतामश्नुते। 'वाजपेयस्य' इति षष्ठ्या अङ्गद्वाराप्युपकारकत्वेऽपि संभवात्। वारवन्तीयं साम त्वङ्गभूतस्तोत्रद्वारा कथं यागकारकतामश्नुवीत, क्रियाकारकभावस्य साक्षात्संबन्धरूपत्वात्। न च पशुसोमाधिकरणे पशुसोमयोः प्रणाड्या यागकरणत्वं कथमुक्तमिति वाच्यम्। तत्र प्रकृतिविकृत्योरत्यन्तानतिरिक्ततया हृदयादिगणसोमरसात्मना साक्षादेव पशुसोमयोर्यागकारकत्वसंभवेऽप्यारादुपकारकस्य स्तोत्रस्य यागे कारकत्वासंभवात्। किंच वाजपेयाङ्गत्वेन चोदितं सप्तदशारत्नित्वं वाजपेयेऽसंभवात्तदङ्गयूपमुपसर्पतीति युक्तम्। वारवन्तीयं तु फले विधीयते न तु यागाङ्गतयेति कथमङ्गानि स्तोत्राण्युपसर्पेत्। नापि वारवन्तीयगुणस्य यागे आनर्थक्यम्, कर्मान्तरविधानेनार्थवत्त्वात्। उक्तं च वार्तिके 'तन्नामाङ्गेषु कल्प्येत यदङ्गत्वेन चोदितम्। प्राधान्यावस्थितं यत्तु तदङ्गं नोपसर्पति' इत्यादिना। ननु कारकतया वारवन्तीयगुणस्य यागाश्रितत्वासंभवेऽपि संबन्धान्तरेण तदस्तु, 'पशुकाम उक्थ्यं गृह्णीयात्' 'दाक्षायणयज्ञेन सुवर्गकामो यजेत' इत्यादौ संस्थावृत्त्यादिरूपगुणस्य प्रकृतयागे कारकत्वाभावेऽपि तत्संबन्धिप्रयोगपरिच्छेदकत्वमात्रेण तदाश्रितत्वदर्शनात्; साम्नश्च गीतिक्रियात्मकस्य कर्तृव्यापारविषयत्वार्थं दध्यादिवत्क्रियापेक्षाविरहेऽपि 'कृत्वा' इति क्त्वाप्रत्ययगम्यक्रियान्तरसमानकर्तृकत्वनिर्वाहाय क्रियान्तरापेक्षायां संनिधानलब्धयागो यजतिनानूद्यमानो विधीयमानवारवन्तीयसामगुणे आश्रयतयान्वेतुमर्हतीति चेत्, सत्यम्। यागस्याश्रयत्वसंभवेऽप्यग्निष्टोमपदवैयर्थ्यान्न गुणविधिः संभवति। अग्निष्टोमसामपदं हि नानुवादः।

आज्यपृष्ठादिबहुस्तोत्रेषु चोदकप्राप्तेषु सत्सु विशिष्याग्निष्टोमस्तोत्रसंबन्धानुवादे कारणाभावात्। न च क्रत्वर्थवारवन्तीयवाक्यतः शब्देनोपस्थितत्वादग्निष्टोमस्तोत्रस्यैवानुवाद उचित इति वाच्यम्। क्रत्वर्थवाक्येऽग्निष्टोमोपस्थितेर्गुणविधानार्थतया स्वस्य प्राधान्याभावेन तदुपस्थितेरनुवादत्वप्रयोजकत्वाभावात्। किंच रेवतीषु 'वारवन्तीयं कृत्वा पशून्भावयेत्' इति पशुभावनापेक्षयैव समानकर्तृकत्वसंभवान्न क्रियान्तरमपेक्ष्यत इति कथं यागस्य तत्राश्रयतयान्वयः। तस्माद्गुणविधौ यजत्यग्निष्टोमसामशब्दयोरनुवादत्वासंभवाद्विधानार्थत्वमेव वक्तव्यम्। तथा च 'वारवन्तीयेन पशून्कुर्यादग्निष्टोमसंबन्धिना' इति 'वारवन्तीयेन पशून्कुर्याद्यागसंबन्धिना' इति च वाक्यभेदः स्यादिति तयोरानर्थक्यं स्यात्। न च 'धातुसंबन्धे प्रत्ययाः' इत्यधिकृत्य 'समानकर्तृकयोः पूर्वकाले' इति विहितक्त्वाप्रत्ययस्य धात्वन्तरसमानकर्तृकत्वमेवार्थ इति प्रत्ययवाच्यपशुभावनायाः क्त्वाप्रत्ययापेक्षितत्वाभावेन प्रकृतिभूतयज्यर्थस्यैव तदपेक्षिततया आश्रयत्वेनान्वयसंभव इति वाच्यम्। 'धातुसंबन्धे' इत्यस्य 'क्रियासमभिहारे लोट्' इत्यादिसमनन्तरसूत्रेष्वनुवर्तमानत्वेन क्त्वाविधावनुवृत्तेस्तद्भाष्यवार्तिकादावदृष्टत्वेन चाप्रामाणिकतया क्त्वागम्यसमानकर्तृकत्वस्य प्रत्ययवाच्यभावनापेक्षिताया वक्तुं शक्यत्वात्। अत एवातीतकर्तृकप्राचीनग्रन्थविवरणपरग्रन्थे 'इति मनसि निधायाह' 'इत्यभिप्रेत्याह' 'इत्याशङ्क्याह' इत्यादौ क्त्वाप्रत्ययोपपत्तिः। तत्र हि 'आह' इत्यव्ययम् 'उवाच' इत्यर्थे विभक्तिप्रतिरूपकमिति वैयाकरणसमयः। तस्मात्कृत्वाशब्दोक्तभावनानिर्वाहितरेवतीवारवन्तीयनिरूपितक्रियाकारकभावसंबन्धविशेषितोऽपूर्वयागः पशुफलाय विधीयते। 'एतस्य' इति षष्ठ्यन्तस्य च प्रस्तूयमानकर्मानुवादपरत्वे आनर्थक्यात् 'एतद्धर्मकस्य' इत्येवं प्रकृताग्निष्टुद्धर्मातिदेशकतया, प्रकृतिभूताग्निष्टुति च वारवन्तीयसाम्नोऽग्निष्टोमस्तोत्रसाधनतया प्रकृतिवदिहापि तत्स्थानप्राप्तेरग्निष्टोमसामशब्दोऽनुवाद इति न तस्य विधेयकर्मविशेषकत्वम्। न चाग्निष्टुति वायव्याधारस्यैव वारवन्तीयस्याग्निष्टोमस्थानकत्वादिह कथं रेवत्याधारस्य तत्स्थानप्राप्तिरिति वाच्यम्। वारवन्तीयस्य ह्यग्निष्टोमे प्राप्तौ तदाधारभूतानामप्यग्निष्टोमस्तोत्रसंबन्धप्राप्त्या रेवत्याधारस्यापि वारवन्तीयस्याग्निष्टोमस्थानमुपपद्यते। एवं च वायव्यानां रेवतीभिः प्रत्याम्नानाद्वाधमात्रं, न तु तावता वारवन्तीयस्याग्निष्टोमस्तोत्रस्थानत्वस्याप्यभावः स्यात्। तृतीयान्तैतच्छब्दोऽपि प्रस्तूयमानपूर्वयागवचनः। एवं च 'रेवतीषु वारवन्तीयं कृत्वा पशुकामो यजेत' इत्येतावन्मात्रं विधेयमिति लाघवमेकवाक्यत्वं च लभ्यते। गुणविधौ तु यज्याद्यानर्थक्यं वाक्यभेदश्च। तस्माद्रेवतीवाक्येऽपूर्वकर्मविधिरित्यास्तां तावत्। प्रयोजनं— पूर्वपक्षे रेवत्याधारवारवन्तीयवति कर्मणि क्रतुफलं ब्रह्मवर्चसं गुणफलं पशुश्च लभ्यते, सिद्धान्ते तु पशुफलमेवेति स्पष्टमेव। इति रेवत्यधिकरणम्॥

अथ कर्मापूर्वभेदप्रसङ्गात्फलापूर्वभेदविचारः प्रस्तूयते। अस्ति ज्योतिष्टोमे ब्रह्मसामाख्यः

स्तोत्रविशेषः । तमाश्रित्य सौभरं नाम साम फलार्थतया विहितम् 'यो वृष्टिकामो योऽन्नाद्यकामो यः स्वर्गकामः स सौभरेण स्तुवीत' इति । तदेतत्फलत्रयसाधनतया विहितं सौभरं प्रकृत्यान्नायते 'हीषिति वृष्टिकामाय निधनं कुर्यात् ऊर्गित्यन्नाद्यकामाय, ऊ इति स्वर्गकामाय' इति । निधनमिति साम्नश्चरमभाग उच्यते । तत्र किं हीषादयो निधनविशेषाः सौभरफलतः फलान्तरार्थतया विधीयन्ते, एवं च यदा वृष्टिकामेन सौभरं प्रक्रान्तं तदेतरयोरपि निधनयोस्तत्फलकामनया प्रयोगः फलान्तरभूतवृष्टिकामनाविरहात्प्रथमनिधननिवृत्तिश्च 'वृष्टिकामः सौभरसाम्ना स्तोष्ये' 'वृष्टिकामो हीषिति निधनं सौभरसाम्नि करिष्ये' इति च पृथक्फलकामनं च; उत सौभरस्यैव तत्तत्फलं साधयतस्तत्तन्निधनं नियम्यते, एवं च वृष्टिफलके सौभरे हीषित्येव प्रयोक्तव्यम् एकैव वृष्टिः प्रार्थयितव्या । एवमन्नाद्यकामस्वर्गकामयोरपि द्रष्टव्यम् । इति संशये, पूर्वपक्षयति—

१३. सौभरनिधनयोः कामैक्याधिकरणम् ।

सौभरे पुरुषश्रुतेर्निधने कामसंयोगः ॥ २८ ॥

वृष्ट्यादिफलार्थतया श्रुते सौभरे साम्नि हीषादिनिधने अन्यः कामसंयोगः । काम्यन्त इति कामाः फलानि । सौभरसामफलेभ्यो वृष्ट्यादिभ्योऽन्यानि वृष्ट्यादिफलान्युद्दिश्य निधनविधिः, न तु वृष्ट्यादिफलके सौभरे साम्नि हीषादिव्यवस्थाविधिः । कुतः । पुरुषश्रुतेः वृष्टिकामादिशब्दैर्वृष्ट्याद्यभिलषितृपुरुषवाचिभिश्चतुर्थ्यन्तैर्वृष्ट्याद्यभिलषितृपुरुषशेषत्वं निधनानामवगम्यते । तच्छेषत्वं च तदभिलषितफलसाधनत्वमेव । अतः फलान्तरार्थतयैव निधनविधिः । व्यवस्थाविधौ तु वृष्टिकामाय यत्सौभरं तत्र हीषिति निधनं कुर्यात्, न निधनान्तरमित्येवं वृष्टिकामादिशब्दानां वृष्ट्यादिसाधनसौभरे लक्षणा स्यात् । एवं च ज्यायानपि नियमविधिर्लक्षणाप्रसङ्गान्न युज्यते । तस्मात्फलान्तरार्थतया निधनविधिः ॥

सिद्धान्तयति—

सर्वस्य वोक्तकामत्वात्तस्मिन्कामश्रुतिः स्यान्निधनार्था पुनःश्रुतिः ॥ २९ ॥

वाशब्दः पक्षव्यावृत्तौ । चतुर्थ्यन्तवृष्टिकामादिपदेषु वृष्ट्यादिशब्दो न फलान्तरपरः, किंतु सर्वस्य समस्तावयवकस्य सौभरस्य 'यो वृष्टिकामः' इत्यादिवाक्यान्तरैरुक्तकामत्वात् उक्तवृष्ट्यादिफलकतया तस्मिन्सौभरफल एव वृष्ट्यादिलक्षणे कामश्रुतिः । चतुर्थ्यन्तवृष्टिकामादिपदगतवृष्ट्यादिफलशब्दः प्रत्यभिज्ञापकः स्यात् । ततश्च वृष्ट्यादीनां सौभररूपसाधने निराकाङ्क्षतया न हीषादिनि-

धनान्वयसंभवः । न च प्रकृतफलानां साधनान्तरावरुद्धत्वात्प्रत्यभिज्ञाबाधेन फलान्तरपरत्वमेवास्त्विति वाच्यम् । हीषादिशब्दा हि किंचिदाश्रित्य फलेषु विधेयाः । न तावत्सौभरमाश्रयः, बह्ववयवव्याप्तस्यान्तिमावयवहीषादिना निर्वर्तयितुमशक्यत्वात् । नापि निधनमेवाश्रयो भवितुमर्हति, तन्मात्रस्याप्रकृतत्वात् भक्त्यन्तराणामपि सत्त्वात्तत्परिसंख्यानाय निधनविधौ 'हीषा वृष्टिं कुर्यान्निधनभूतेन' इति वाक्यभेदापत्तेः । ननु 'वृष्टिकामाय' इत्यादीनां सौभरफलपरत्वे वैयर्थ्यमत आह— निधनार्था पुनःश्रुतिरिति । पुनर्वृष्ट्यादिशब्दश्रवणं 'वृष्टिकामाय यत्सौभरम्' इत्येवं वृष्ट्यादिसाधनत्वसौभरानुवादेन निधनव्यवस्थाविधानार्थमित्यर्थः । अतो वृष्टिकामादिशब्दलक्षिते सौभरे हीषादिनिधननियम इत्येव युक्तम् । वाक्यभेदापेक्षया ज्यायस्त्वाल्लक्षणा न दुष्यति ॥ न च वृष्टिसाधनसौभरार्थतया 'हीष्' इति शब्दस्य नियमो निधनत्वेन विधेय इति वाक्यभेदस्तुल्य इति वाच्यम् । शाखाभेदेन हीषादिनिधनयुक्ततया पठिते सौभरे तन्नियममात्रस्यैव विधेयत्वेन वाक्यभेदानवकाशात् । न च वृष्ट्यादिसाधनसौभरस्योद्देश्यत्वे विशिष्टोद्देशदोषप्रसङ्गः शङ्क्यः । वृष्ट्यादिसाधनमेव ह्यत्रोद्देश्यम् । संनिधानाच्च तत्सौभरमिति लभ्यते । वस्तुतस्तु "वृष्टिकामाय यत्सौभरं तत्र निधनम् 'हीष्' इति कुर्यात्" इत्येवं नार्थः, येन वृष्टिकामादिशब्दाः सौभरे लाक्षणिकाः स्युः । किंतु 'यो वृष्टिकामः स सौभरेण स्तुवीत' इत्येवं वृष्टिकामाय यन्निधनं विहितं तत्र 'हीष्' इत्यादि कुर्यादित्यर्थः । न च 'यो वृष्टिकामः' इत्येवं सौभरस्यैव वृष्टिकामादिपुरुषशेषत्वरूपवृष्ट्यादिसाधनतावगमेन निधनस्य तदवयवस्य 'वृष्टिकामाय' इत्यादौ वृष्ट्यादिशब्दैरनुवादासंभव इति सौभरलक्षणा दुर्वारेति वाच्यम् । समस्तावयवकस्य सौभरस्य फलसाधनत्वेऽवगते सति तदवयवस्य निधनस्यापि वृष्ट्यादिसाधनतावगमेन लक्षणां विनैव [1]तदनुवादसंभवात् । तदेतत्सूत्रे 'सर्वस्य' इत्यनेन ध्वनितम् । तस्य हि समस्तावयवकस्य सौभरस्येत्यर्थः । इति सौभराधिकरणम् ॥

इति द्वितीयाध्याये द्वितीयः पादः ॥

1. तथानुवाद...क, ग, घ, ङ.

तृतीयः पादः ॥

निर्मथ्य निगमसिन्धून्विविधन्यायाभिधानमन्थानैः ।
धर्मसुधामुद्धरते भूयो मुनये नमोऽस्तु जैमिनये ॥

पूर्वस्मिन्पादे कर्मभेदः प्रतिपादितः । अस्मिन्पादे तदपवादः प्रतिपाद्यते ।

ज्योतिष्टोमे श्रूयते 'यदि रथंतरसामा सोमः स्यादैन्द्रवायवाग्रान्गृह्णीयात्'[1] 'यदि बृहत्सामा शुक्राग्रान्' इति । तत्र किं ज्योतिष्टोमात्कर्मान्तरं रथंतरसामेति बृहत्सामेति विधीयते, उत प्रकृत एव ज्योतिष्टोमे नैमित्तिक ऐन्द्रवायवाग्रतादिगुणविधिरिति संशये पूर्वपक्षयति—

गुणस्तु क्रतुसंयोगात्कर्मान्तरं प्रयोजयेत्संयोगस्याशेषभूतत्वात् ॥ १ ॥

तुः प्रत्यवस्थाने । रथंतरसामादिगुणः कर्मान्तरमाक्षिपेत् । कुतः[2] । क्रतुसंयोगात् रथंतरसामादिगुणस्य ज्योतिष्टोमात्क्रत्वन्तरेणैव संयोगात् प्रकृतकर्मणा च संयोगासंभवात् । कुतः ।

१. ग्रहाग्रताया ज्योतिष्टोमाङ्गताधिकरणम् ।

संयोगस्याशेषभूतत्वात् रथंतरादिसंयोगस्य क्रतुविशेषणत्वाभावात्[3] । 'रथंतरसामा' इति हि बहुव्रीहिसमासः 'समर्थः पदविधिः' इति सामर्थ्यापेक्षः । सामर्थ्यं च यदि कृत्स्ने क्रतौ रथंतरमेकमेव स्यात्तदा भवति । प्रकृते च ज्योतिष्टोमे रथंतरं साम न केवलमस्ति; किंतु गायत्रवामदेवादिसामान्तरसहितमेवेति सामान्तरसापेक्षत्वेनासामर्थ्यात्समासानुपपत्तेस्तद्गम्यं विशेषणत्वं रथंतरस्यानुपपन्नम् । न च पृष्ठस्तोत्रे सामान्तरानपेक्षत्वात्सामर्थ्यस्यानपाय इति वाच्यम् । तस्यात्रान्यपदार्थतयानुपात्तत्वात् । एवम् 'बृहत्सामा' इत्यत्रापि । तथा च प्रकृते कर्मण्यनुवाद्यतया निवेशमलभमानोऽयं गुणनिवेशयोग्यं कर्मान्तरपरत्वमस्य वाक्यस्य कल्पयतीत्यर्थः । न च कर्मान्तरपरत्वे तस्य संप्रति विधीयमानतया सिद्धधर्मनिमित्तत्वप्रतिपादकयदिशब्दानुपपत्तिरिति वाच्यम् । 'अथवैतर्ह्यल्पा पृथिव्यासीत्' इत्यादिवद्यदिशब्दस्यापि निपातत्वेनानर्थकत्वात् । यद्वा 'रोचते' इत्यध्याहारेण 'यदि रोचते तदा रथंतरसामानं

1. ऐन्द्रवायवाग्रान्ग्रहान्गृह्णीयात्—ख. 2. नास्ति ख, ग पुस्तकयोः. 3. संयोगस्य अशेषं कृत्स्नं क्रतुं प्राप्तत्वाभावात्—क, च.

क्रतुं कुर्यात्' इति योज्यम्। अथवा 'गृह्णीयात्' इति लिङः कामप्रवेदनार्थतया 'यद्यैन्द्रवायवाग्रान्ग्रहीतुमिच्छेत्तदा रथंतरसामानं क्रतुं कुर्यात्' इति व्याख्येयम्। अथवा 'स्यात्' इति हेतौ लिङ्। 'रथंतरसाम्ना क्रतुना हेतुना ऐन्द्रवायवाग्रान्गृह्णीयात्' इत्यर्थः। अपि वा 'गृह्णीयात्' इति लिङो हेतुमदर्थकत्वेन 'यदि ग्रहाग्रता हेतुमत्त्वेन विवक्षिता तदा तद्धेतू रथंतरसामा सोमः कार्यः' इति व्याख्येयम्। एवं बृहत्सामवाक्येऽपि योज्यम। [1]तस्माद्रथंतरबृहदन्यतरस्तोत्रकमैन्द्रवायवाग्रतादियुक्तं कर्मान्तरं विधेयम। इति पूर्वः पक्षः॥

सिद्धान्तयति—

एकस्य तु लिङ्गभेदात्प्रयोजनार्थमुच्येतैकत्वं गुणवाक्यत्वात्॥ २॥

तुशब्दः पूर्वपक्षव्यावृत्तौ। नात्र कर्मान्तरविधिः; किंतु एकस्यैव ज्योतिष्टोमस्य प्रकृतस्य लिङ्गभेदात् रथंतरादिनिमित्तभेदेन प्रयोजनार्थं ग्रहाग्रताविशेषविधानप्रयोजनार्थतया यदि रथन्तरेत्यादिवाक्यम् उच्येत प्रतीयेत। ननूक्तरीत्या कर्मान्तरत्वादेकत्वमेवासिद्धमित्यत आह—एकत्वमिति। यदिशब्दस्त्वारस्येन [2]ग्रहाग्रताविशेषणविधिपरत्वस्य वक्तव्यतया कर्मान्तरबुद्धौ निवृत्तायां तदेकत्वं विज्ञायत इत्यर्थः॥ यदिशब्दस्य हि प्रथमपक्षे आनर्थक्यमेव दोषः, द्वितीये अध्याहारः, तृतीये 'यदि गृह्णीयात्' इति व्यवहितान्वयः, चतुर्थे [3]पञ्चमे चासिद्धस्य हेतुत्वकल्पनाक्लेशः इति पञ्चानां[4] पक्षाणां दुष्टत्वात्स्वरसतः प्रकृतकर्मणो निमित्तत्वप्रतिपादकयदिशब्दबलात्प्रकरणाच्च प्रकृतस्यैव कर्मणः सोमशब्दः प्रतिपादको न तु कर्मान्तरस्य। न च सामान्तराणामपि सत्त्वात् 'रथंतरसामा' इति कथं ज्योतिष्टोमस्यानुवादसंभवः, सापेक्षत्वेनासामर्थ्यात्समासानुपपत्तेरिति वाच्यम्। अन्ययोगव्यावृत्त्यसंभवेऽप्ययोगव्यावृत्त्या विशेषणत्वोपपत्तौ सामर्थ्यसंभवेन समासोपपत्तेः। बृहद्रथंतरे हि सामनी ज्योतिष्टोमे वैकल्पिके। अतः पक्षे अयोगः प्राप्तः। तद्व्यावृत्त्या यदि रथंतरसामैव सोमः, नाविद्यमानरथंतर इति भवत्ययोगव्यवच्छेदः। स च सामान्तरसत्त्वेऽप्यविरुद्ध इति सामान्तरसापेक्षत्वाभावान्नासामर्थ्यम्। अस्तु वा सामान्तरमेव व्यवच्छेद्यम्। तथापि विरोधिनोर्बृहद्रथंतरयोः परस्परव्यवच्छेदेनैव विशेषणत्वम्, न तु सामान्तरव्यवच्छेदेनापि; विरोधनिबन्धनत्वाद्व्यवच्छेदस्य सामान्तरसत्त्वेऽपि तदपेक्षाविरहादस्ति सामर्थ्यम्। किंच 'उकथ्यो वै राजसामा' इत्यादिवदाशमिकन्यायेन 'रथंतरसामा' इति निर्देशस्य प्रष्टस्तोत्रमात्रपरता अवसीयते। तत्र च प्रष्टस्तोत्रे सामान्तराभावेन तदपेक्षाविरहात्सामर्थ्यमविरुद्धम्। न च बहुव्रीहिणा अन्यपदार्थप्रधानेन सोमस्यैव प्राधान्ये-

1. तस्मात्केवलरथन्तर...ख. घ, ङ. 2. विशेषगुणविधि...क. घ. च. 3. पञ्चमे च... नास्ति क, घ, ङ, च पुस्तकेषु. 4. चतुर्णा—क, घ, ङ, च.

नावगमात्कथं रथंतरस्य निमित्तत्वमिति वाच्यम्। बहुव्रीहिणा पदार्थप्रतीतिवेलायां विशेष्यतयावगतस्यापि क्रतोर्नित्यतया निमित्तत्वानर्हत्वात्तत्परित्यागेन, विशेषणस्यैव निमित्तत्वपर्यवसानात् वाक्यस्य निमित्ततात्पर्यकत्वेन तदनुसारेणायोग्यविशेष्यपरित्यागेन योग्यविशेषण एव तत्कल्पनस्य न्याय्यत्वात्। अत एव 'दध्ना जुहोति' इत्यत्र विशेष्यस्य होमस्य [1]प्राप्तत्वात्तत्परित्यागेन योग्यस्य दध्नो विशेषणतयापि प्रतीतस्य विधानमुपपन्नं भवति। न चैवं सति कर्मबहिरध्ययनादावपि रथंतरस्य सद्भावादतिप्रसङ्गः, प्रकृतक्रतुविशिष्टस्य तस्य निमित्तत्वे तु विशिष्टोद्देशदोष इति वाच्यम्। न ह्यत्र शब्देन प्रकृतक्रतुविशिष्टस्य रथंतरस्य निमित्तत्वं बोध्यते येन विशिष्टोद्देशदोषः स्यात्। संनिधानादेव हि क्रतुविशिष्टत्वेन रथंतरस्य बोधः, अनुवादस्य सति संभवे संनिहितगामित्वात्। तस्मात्प्रकृतज्योतिष्टोमे रथंतरादिनिमित्ते प्रहाप्रताविशेषगुणविधिः। इति रथंतरसामाधिकरणम्॥

अस्ति राजसूयः 'स्वाराज्यकामो राजा राजसूयेन यजेत' इति। तत्र सन्ति दिशामवेष्टयो नाम यागाः 'दिशामवेष्टयो भवन्ति' इति प्रकृत्य विहिताः 'आग्नेयमष्टाकपालं निर्वपति हिरण्यं दक्षिणा, ऐन्द्रमेकादशकपालमृषभो दक्षिणा, वैश्वदेवं चरुं पिशङ्गी पष्ठौही दक्षिणा, मैत्रावरुणीमामिक्षां वशा दक्षिणा, बार्हस्पत्यं चरुं शितिपृष्ठो दक्षिणा' इति। तत्रेदमाम्नायते 'यदि ब्राह्मणो यजेत बार्हस्पत्यं मध्ये निधायाहुतिमाहुतिं हुत्वाभिधारयेत्, यदि राजन्य ऐन्द्रम्, यदि वैश्यो वैश्वदेवम्' इति। आग्नेयादीनि चत्वारि हवींषि प्रतिदिशमासाद्य तेषां मध्ये बार्हस्पत्याद्यन्यतममासाद्य आग्नेयाद्येकैकं हविर्हुत्वा तस्य तस्य संस्रावेण मध्ये निहितं हविरभिधारयेदित्यर्थः। तत्र संशयः—किं प्रकृतराजसूयिकावेष्टियागेषु[2] ब्राह्मणादिवर्णविशेषं निमित्तीकृत्य 'मध्ये निधाय' इत्यादिगुणविधिः, उत ब्राह्मणादिविशिष्टप्रयोगान्तरविधिरिति। तत्र पूर्वाधिकरणन्यायेन 'यदि रथंतरसामा' इत्यादिवद्गुणविधिरिति ब्रूमः। न च [3]राजशब्दवाच्यक्षत्रियजात्यधिकृतराजसूयान्तर्गतावेष्टियागेषु कथं ब्राह्मणादिवर्णनिमित्ते गुणविधिसंभव इति वाच्यम्। राजशब्दो हि जनपदपरिपालनरूपराज्ययोगनिमित्तको ब्राह्मणादिष्वपि वर्तितुमर्हति, राजशब्दस्य ब्राह्मणादिष्वपि राज्ययोगनिमित्तमाक्षेणार्यम्लेच्छसाधारणसर्वलोकप्रसिद्धेः; न तु क्षत्रियत्वजातिनिमित्तो राजशब्दः, तत्प्रसिद्धेरनार्यमात्रेषु सत्त्वात् द्रविडदेशमात्रगतत्वात् आर्याणां क्षत्रियजातिमात्रे प्रयोगाभावेन विप्रतिपन्नत्वाच्च। न च बर्हिराज्याधिकरणन्यायेनानार्यव्यवहारादपि क्षत्रियजातिपरत्वं स्यादिति वाच्यम्। वैषम्यात्। बर्हिराज्यस्थले ह्यनार्यव्यवहारादपि जात्यर्थत्वम्, आर्यव्यवहारस्य जात्यव्यभिचारित्वात्। इह तु

२. अवेष्टेः क्त्वन्तताधिकारताधिकरणम्।

1. प्राप्तत्वाद्वाक्यतात्पर्यविषयादध्यन्वयायोग्यतया तत्परित्यागेन—क, घ, ङ, च. 2. राजसूयिकावेष्टिकयागेषु—क; राजसूयिकाग्नेयादियागेषु—ङ. 3. राजन् शब्दवाच्य—ङ.

ब्राह्मणादिष्वपि राजशब्दस्यार्थप्रयोगात्क्षत्रियत्वजातिव्यभिचाराच्च क्षत्रियजातिपरत्वम्। यद्यपि धर्मशास्त्रवशात्क्षत्रियस्यैव राज्ययोगो न तु ब्राह्मणादीनामपि, तथापि [1]प्रवृत्तिनिमित्ततायां शास्त्रमूलत्वस्यातन्त्रतया शास्त्रोल्लङ्घनेनापि यथाकथंचिद्राज्ययोगसद्भावमात्रेण ब्राह्मणादीनामपि राजशब्दवाच्यत्वमविरुद्धम्। न चैवमपि राज्ययोगाद्राजा राजयोगाद्राज्यमिति परस्पराश्रय इति वाच्यम्। राज्यशब्दस्य जनपदपरिपालनकर्मणि रूढत्वेन राजयोगानपेक्षत्वेनादोषात्। न च 'पत्यन्तपुरोहितादिभ्यो यक्' इति सूत्रेण राज्ञः कर्मेत्यर्थे यक्प्रत्यये राज्यशब्दव्युत्पत्तेर्व्याकरणस्मृतिसिद्धत्वात्प्रयोगरूपाचारात्स्मृतेर्बलीयस्त्वान्न रूढ्याश्रयणं युक्तमिति वाच्यम्। मन्वादिस्मृतेराचाराद्बलवत्त्वेऽपि प्रयोगमूलत्वाद्व्याकरणस्य तदपेक्षया प्रयोगरूपाचारस्य बलवत्त्वात्। ततश्च नकुलनखनक्षत्रादिशब्देष्विव व्याकरणं राज्यशब्देऽपि साधुत्वान्वाख्यानपरं व्याख्येयम्। यदिशब्दबलादपि राजशब्दो राज्ययोगनिमित्त इति अध्यवस्यामः। यदिशब्दौ हि ब्राह्मणवैश्यौ कर्तृत्वेन सिद्धावनुवदतः। न चैतद्राजशब्दस्य क्षत्रियजातिपरत्वे घटते, प्राप्त्यभावात्। तस्माद्ब्राह्मणादिनिमित्ते राजसूयान्तर्गतावेष्टियागेषु प्रकृतेषु मध्यनिधानादिगुणविधिः। इति प्राप्ते, सिद्धान्तयति—

अवेष्टौ यज्ञसंयोगात्क्रतुप्रधानमुच्यते ॥ ३ ॥

शाखान्तरे अवेष्टिशब्द एकवचनान्तोऽपि श्रुतः। तदभिप्रायमेकवचनम्। अवेष्टिविषयम् 'यदि ब्राह्मणः' इत्यादिवाक्यं क्रतुप्रधानं ब्राह्मणादिविशिष्टप्रयोगान्तरपरतया प्रतीयेत। कुतः। यज्ञसंयोगात् क्षत्रियस्यैव राजसूयेन संयोगात्॥ 'राजानमभिषेचयेत्' इति राज्ञः सतो जनपदपरिपालनरूपराज्ययोगफलकाभिषेचनविधानात्क्षत्रियमात्रपरत्वं राजशब्दस्य वेदादवसीयते। यदिशब्दस्तु निपातत्वात्पूर्वाधिकरणपूर्वपक्षोक्तप्रकारेण कथंचिन्नेयः। ब्राह्मणादिष्वप्यार्याणां राजशब्दप्रयोगस्तु प्रयोगरूपाचारत्वाद्राजशब्दात्कर्मणि यग्विधायकव्याकरणस्मरणेनाभिषेकविध्यनुगृहीतप्रामाण्यकेन क्षत्रियस्य प्रजापरिपालनमित्यादिधर्मशास्त्रेण च बाधाद्राजकर्मपरिपालनकारित्वनिबन्धनो गौणः। न च 'सोमोऽस्माकं ब्राह्मणानां राजा' 'इन्द्रो राजा जगतश्चर्षणीनाम्' इत्यादिवैदिकनिर्देशः पालनेऽपि दृश्यते। तथा 'क्षत्रियसमानशब्दाज्जनपदाख्तस्य राजन्यपत्यवत्प्रत्ययो भवति; पञ्चालानां राजा पाञ्चालः' इत्यादिव्याकरणवार्तिकमहाभाष्ययोरपि पालने राजशब्दप्रयोगो दृष्ट इति कथं जात्यर्थकत्वमिति वाच्यम्। श्रुतिव्याकरणयोरुभयत्र समानत्वेऽप्यनेकार्थत्वस्यान्याय्यत्वेन क्षत्रियत्वजातौ मुख्यत्वेन पालके गौणतया च तत्र राजशब्दस्य नेयत्वात्। न च विनिगमनाविरहः, सप्रतियोगिकपाल्यापेक्षया निष्प्रतियोगिकक्षत्रियत्वजातेर्लघुत्वस्यैव विनिगमकत्वात्। किंच जनपदपालनमात्रं

1. प्रवृत्तिनिमित्ततायाः शास्त्रमूलकत्वस्य—क, ग, घ, ङ, च.

राजपदप्रवृत्तिनिमित्तं स्वतन्त्रजनपदपालनं वा। नाद्यः, राज्ञा नियुक्ते जनपदाद्यधिकारिणि राजपदप्रयोगापत्तेः। न द्वितीयः, सार्वभौमेण [1]सम्राजा देशविशेषस्य राजभावेन नियुक्ते तदभावप्रसङ्गात्। तस्मात्क्षत्रियजातिरेव राजशब्दार्थः। ब्राह्मणादिषु तु 'पक्षिराजः' 'वृक्षराजः' इत्यादिवद्गौणः। तस्माद्ब्राह्मणादिविशिष्टप्रयोगान्तरविधिः। न च राजसूयान्तर्गतावेष्टिप्रयोगे ब्राह्मणाद्यप्राप्तावपि 'एतयान्नाद्यकामं याजयेत्' इति वाक्यान्तरविहितावेष्टिप्रयोगान्तरेऽन्नाद्यकामतया प्राप्तब्राह्मणादिनिमित्ते मध्यनिधानादिगुणविधिरेव किं न स्यादिति वाच्यम्। 'एतयान्नाद्यकामम्—' इत्यत्र हि ब्राह्मणादीनां कर्तृत्वं न श्रुतम्; किंत्वन्नाद्यकामस्य फलित्वेन श्रवणादाक्षेप्यम्। तदाक्षेपात्प्रागेव च स्वाराज्यकामवाक्ये अवेष्टिकर्तृत्वेनावगतक्षत्रियेणैव निराकाङ्क्षत्वान्न कर्तृतां प्रयोजयितुमन्नाद्यवाक्यं प्रभवति। यथालब्धाग्निविद्यत्रैवर्णिकलाभेन निराकाङ्क्षाः कर्मविधयो न शूद्रस्याग्निविद्ये प्रयोजयितुमीशते तद्वत्। ततश्च प्रकृतावेष्टेरेव प्रत्यभिज्ञातायाः 'यदि ब्राह्मणः' इत्यादिना ब्राह्मणादिविशिष्टप्रयोगान्तरविधिः। तस्यैव प्रयोगस्य फलापेक्षायामन्नाद्यकामवाक्येन फलसंबन्धः। भाष्यं तु [2]कर्मान्तरपरतया प्रतीयमानमपि प्रयोगान्तरपरतया नेयम्। न ह्यत्र 'यदि ब्राह्मणः' इत्यादिवाक्ये कर्मान्तरविधिः संभवति, प्रकृतावेष्टिप्रत्यभिज्ञाविरोधात्। एवं च यथा दर्शपूर्णमासयोरेको यावज्जीविकप्रयोगोऽन्यश्च काम्यप्रयोगः एवमवेष्टेरेकस्या एव क्रत्वर्थ एकः प्रयोगोऽन्यश्चान्नाद्यकामप्रयोगः। तत्रान्नाद्यकामप्रयोगे ब्राह्मणादिश्रवणस्य निमित्तार्थकत्वे प्रापकत्वे च नास्ति फलभेदः। राजसूयिकावेष्टिप्रयोगे तु स्वाराज्यवाक्ये राजशब्दस्य ब्राह्मणादिसाधारणत्वात्त्रयाणामपि वर्णानां कर्तृत्वं पूर्वपक्षे, सिद्धान्ते तु क्षत्रियस्यैवेति फलभेदः। यद्यपि स्वाराज्यवाक्य एव राजशब्दार्थनिरूपणं कर्तुं शक्यम्, तथाप्यध्यायसंगतये प्रयोगभेदव्युत्पादनायावेष्टिवाक्योदाहरणमिति दिक्। इत्यवेष्ट्यधिकरणम्॥

'वसन्ते ब्राह्मणोऽग्निमादधीत' 'ग्रीष्मे राजन्यः' 'शरदि वैश्यः' 'वर्षासु रथकारः' इत्यत्र किमाधाने कर्मणि ब्राह्मणादिनिमित्ते वसन्तादिविधिः, उत ब्राह्मणादिवसन्तादिविशिष्टमाधानं विधीयत इति संशयः। तत्र 'यदि ब्राह्मणो यजेत' इत्यादौ ब्राह्मणादीनामप्राप्ततया राजसूयिकावेष्टिप्रयोगे गुणविधौ निमित्तत्वासंभवेन तद्विशिष्टप्रयोगान्तरविधिसंभवेऽपि प्रकृते आहवनीयादिसापेक्षक्रतुविध्याक्षेपलभ्याधाने ब्राह्मणादीनां प्राप्तानां निमित्तत्वसंभवेनाधाने ब्राह्मणादिनिमित्ते वसन्तादिविधिर्युज्यते। नन्वाधानस्यान्यतोऽप्राप्तत्वात्कथं तस्मिन्ब्राह्मणादिश्रवणस्य निमित्तार्थत्वम्; न च क्रतुविधितस्तदाक्षेपः संभवति, आधानविधावाहवनीयादिशब्दश्रवणाभावेन तस्य क्रतुविध्यपेक्षिताहवनीयादिसाधकत्वे प्रमाणाभावादिति चेन्न। 'नक्तं गार्हपत्यमादधाति' 'अर्धोदिते सूर्य आहवनीयमादधाति' इत्यादिवाक्येष्वाधानस्याहवनीयादेश्च

३. आधानस्य विधेयत्वाधिकरणम्।

1. सम्राजाखण्डदेशविशेषस्य—घ, ङ. 2. कर्मान्तरतया—क, ख, ग, घ, ङ.

साध्यसाधनभावावगमात्। यद्यपि तानि वाक्यानि गुणविधायकान्येव न त्वाधानविधायकानि तथापि 'गार्हपत्यम्' इत्यादिद्वितीयया साध्यत्वानुवादिन्या आधानस्य तत्साधनत्वावगमसंभवः। यद्वा 'य एवं विद्वानग्निमाधत्ते' इति सामान्यतः सर्ववर्णानामाधानविधायकमिति प्राप्ताधाने ब्राह्मणादिनिमित्ते वसन्तादिविधिः। इति प्राप्ते, सिद्धान्तयति—

आधानेऽसर्वशेषत्वात् ॥ ४ ॥

आधाने विषये वसन्तादिवाक्यं ब्राह्मणादिवसन्तादिविशिष्टाधानप्रापकम्, न तु प्राप्ताधाने निमित्तसंयोगेन कालविशेषबोधकम्। कुतः। असर्वशेषत्वात् आधानस्य सर्वक्रत्वर्थतया विधेरश्रवणात्॥ आधानविधिसद्भावे हि 'आदधीत' इत्यात्मनेपदबलादाधानसाध्याग्नीनां कर्तृगामित्वप्रतीत्या स्वीयाधानसाध्यत्वं लभ्यते। आक्षेपपक्षे तु 'कृत्तिकास्वग्निमादधीत' 'वसन्ते ब्राह्मणोऽग्निमादधीत' इत्यादिगुणवाक्येष्वात्मनेपदस्यानुवादत्वेनाविवक्षिततया क्रतुविधिभिराधानमात्राक्षेपेऽपि तस्य स्वकर्तव्यत्वे प्रमाणाभावात्परानुष्ठिताधाननिष्पन्नाग्नीनां क्रयादिना संपादनं स्यादिति कथं नियमेन क्रतुविधिभिराधानस्य प्राप्तिः। एवं चाधानस्य तदुद्देशेन नैमित्तिकगुणस्य च विधौ वाक्यभेदप्रसङ्गाद्ब्राह्मणादिवसन्तादिविशिष्टाधानविधिः। तथा च वसन्तादियुक्तप्रत्यक्षविधौ जाग्रति 'य एवं विद्वानग्निमाधत्ते' इत्यस्य वर्तमानापदेशस्य विधित्वकल्पनक्लेशोऽपि नानुभवितव्यो भवति। न चैवमपि वसन्तादिवाक्येष्वाहवनीयादिशब्दाभावादाधानोत्पन्नाग्नीनां कथं क्रत्वर्थता स्यादिति वाच्यम्। वसन्तादिवाक्येष्वाहवनीयादिग्रहणाभावेऽपि 'नक्तं गार्हपत्यम्' इत्यादिगुणवाक्येषु गार्हपत्यादीनां द्वितीयया आधानसाध्यत्वानुवादबलेन वसन्तादिवाक्येऽग्निशब्दस्य गार्हपत्यादिपरत्वे पर्यवसानस्योक्तत्वादित्यन्यत्र विस्तरः। प्रयोजनं पूर्वपक्षे ब्राह्मणादिश्रवणस्य निमित्तार्थत्वाच्छूद्रस्याप्याधानम्; सिद्धान्ते तु ब्राह्मणादिवाक्यानामेव विधायकत्वाच्छूद्रस्य पृथगाधानविध्यभावान्नाधानमिति। न च ब्राह्मणादिश्रवणस्य निमित्तार्थत्वेऽपि शूद्रस्योपनयनाभावेन विद्याभावादेव नाधानमिति वाच्यम्। समानजातीयत्वेन 'वसन्ते ब्राह्मणमुपनयीत' इत्यादिवाक्यानामपि पूर्वपक्षे निमित्तार्थत्वेन शूद्रस्याप्युपनयनसत्त्वेन विद्यासत्त्वादिति दिक्। याज्ञिकास्तु ब्राह्मणादिश्रवणं निमित्तार्थमेवेति मन्यन्ते। युक्तं चैतत्। तथाहि—तैत्तिरीयके 'अग्नय आधातव्याः' इत्यस्याधानविधिः। तथा वाजसनेयकेऽपि संभरणकाण्डे द्वितीयाध्याये 'भ्रान्ति ह वा एतद्यज्ञम्' इति द्वितीयब्राह्मणे 'ते ह देवा अग्न्याधेयं ददृशुः' इत्युपक्रम्य 'अग्नीनादधीत' इत्याधानविधिः श्रूयते। षष्ठस्य तृतीये 'पुनराधेयमोदनवत्' 'द्रव्योत्पत्तेर्वोभयोः स्यात्' इत्यत्र भाष्यवार्तिकतन्त्ररत्नेषु च वक्ष्यते। ततश्चाधानस्य प्राप्तत्वान्न वसन्तादिवाक्येषु तस्य विधानं संभवति। अतो ब्राह्मणादिश्रवणमन्यतः प्राप्ते आधाने निमित्तसंयोगार्थमित्येव युक्तम्। किंच क्रतुविधीनां क्रयसंपादितान्यदीयाहवनीयादिभिरपि शान्ताकाङ्क्षत्वात्तैराधानस्य नाक्षेपसंभव इत्यप्ययुक्तम्,

'यदि वान्यस्याग्निषु यजेत यदि वान्योऽस्याग्निषु यजेत अग्नये पथिकृते पुरोडाशमष्टाकपालं निर्वपेत्' इति प्रायश्चित्तविधानादेवान्यदीयाग्नीनामप्राप्तेः अग्नित्यागे प्रायश्चित्तविधानाच्च। 'अहं त्वदस्मि मदसि त्वमेतत्, ममासि योनिस्तव योनिरस्मि, ममैव सन्वह हव्यान्यग्ने' इत्याधानोत्पन्नाग्न्युपस्थानमन्त्रवर्णेन 'अन्तर्वन्नीजन्यं जातवेदसम्, अध्वराणां जनयथः पुरोगाम्, आरोहतं दशतं शकरीर्मम, ऋतेनाग्न आयुषा वर्चसा सह, ज्योग्जीवन्त उत्तरामुत्तरां समाम्, दर्शमहं पूर्णमासं यक्षं यथा यजै' इत्यरण्यादानमन्त्रवर्णेन चात्मीयाग्नीनामेव ऋत्वर्थतावगमाच्च। किंच यद्यस्मिन्नेवाधिकरणेऽन्यदीयाग्नीनां क्रतुषु व्युदासः क्रियेत, तर्हि षष्ठस्य षष्ठे 'विहारस्य प्रभुत्वादनग्नीनामपि स्यात्' इत्यधिकरणस्यानुन्मेषः स्यात्। तत्र हि सत्रेष्वनाहिताग्नीनामप्यन्यदीयाग्निभिरधिकारं पूर्वपक्षयित्वा स्वीयाधाननिष्पन्नाग्निसाध्यत्वात्कर्मणामन्यदीयाग्निभिस्तस्य नाधिकार इति सिद्धान्तयिष्यते। [1]अस्मिन्नधिकरणेऽन्यदीयाग्नीनां क्रतुषु व्युदासे निश्चिते सति तादृशपूर्वपक्षो न कथंचिदुन्मेषमर्हति। तस्मादत्र ब्राह्मणादिग्रहणं निमित्तार्थमित्येव युक्तम्। पूर्वपक्षसिद्धान्तावपि विपर्ययेण प्रवर्तनीयौ। प्राप्त आधाने वसन्तादिवाक्यानि गुणविधायकान्येव, 'अग्नीनादधीत' इत्यविशेषेण विहितस्य तस्य सर्ववर्णसाधारणत्वादिति सूत्रयोजनापि सूपपादा। न चैवं शूद्रस्याप्याधानं शङ्कयम्; 'अध्वराणां जनयथः पुरोगाम्' 'दर्शमहं पूर्णमासं यक्षं यथा यजै' इत्यादिमन्त्रवर्णत आधानस्य यज्ञार्थत्वावगमात्, 'तस्माच्छूद्रो यज्ञेऽनवक्लृप्तः' इति तस्य यज्ञनिषेधात्, शूद्रस्याध्ययनविध्यभावात्, 'न स्त्रीशूद्रौ वेदमधीयाताम्' इति तस्य विद्याप्रतिषेधाच्चेति षष्ठेऽपशूद्राधिकरणे स्पष्टं भविष्यतीत्यास्तां तावत्। वृत्तमधिकरणम्॥

दर्शपूर्णमासौ प्रकृत्यामनन्ति 'दाक्षायणयज्ञेन सुवर्गकामो यजेत' 'साकंप्रस्थायीयेन यजेत पशुकामः' 'संक्रमयज्ञेन प्रजाकामः' इति। तत्र कर्मान्तरविधिर्गुणविधिर्वेति संशये पूर्वपक्षयति—

अयनेषु चोदनान्तरं संज्ञोपबन्धात् ॥ ५ ॥

अयनेष्विति दाक्षायणशब्दैकदेशग्रहणम्। छत्रिन्यायेन साकंप्रस्थायीयाद्युपलक्षणमिति बहुवचनोपपत्तिः। दाक्षायणयज्ञादिवाक्येषु चोदनान्तरम्। चोद्यते विधीयत इति कर्मणि ल्युट्।

४. दाक्षायणादीनां वसन्तादिवाक्येष्वाधानमिवात्र कर्मान्तरं विधेयमिति यावत्। कुतः। संज्ञोगुणताधिकरणम्। पबन्धात् संज्ञान्तरोपबन्धबलात्। एकस्य चानेकसंज्ञानर्थक्येन प्रकृतकर्मणि संज्ञान्तरसमावेशासंभवात् 'अथैष ज्योतिः' इत्यादाविव कर्मान्तरविधानमेव युक्तम्।

1. तस्मिन्नधिकरणे—ख, ग.

अभ्यासादपि कर्मभेद इत्याह—

अगुणा च कर्मचोदना ॥ ६ ॥

'दाक्षायणयज्ञेन यजेत' इत्यादिचोदना अगुणा गुणोपबन्धरहिता, दाक्षायणादिशब्दस्य कस्मिंश्चिद्गुणेऽप्रसिद्धत्वात् । अतः 'दध्नेन्द्रियकामस्य—' इत्यत्रेव फलाय गुणविधानासंभवात्कर्मचोदनैषा पुनर्विधानम् । ततश्चाभ्यासात्कर्मभेद इत्युक्तं भवति ॥

ननु प्रकृतकर्मणि फलविधानमेवास्त्वित्यत आह—

समाप्तं च फले वाक्यम् ॥ ७ ॥

दाक्षायणादिवाक्यं स्वर्गादिफले समाप्तम् । न हि कर्मोद्देशेन व्रीह्यादिवत्फलस्य विधानं संभवति । तस्मिन्नुत्पादनीये उपायोपदेश एव पर्यवसन्नं भवति, तस्यानुपादेयत्वात् । ततश्च भावार्थाधिकरणे धात्वर्थस्यैव फलकरणताया निश्चितत्वाद्गुणस्य तत्र विधातुमशक्यत्वात्परिशेषादवश्यं कर्म विधातव्यमिति सिद्धः कर्मभेदः ॥ इति प्राप्ते, सिद्धान्तयति—

विकारो वा प्रकरणात् ॥ ८ ॥

वाशब्द एवार्थे । दर्शपूर्णमासकर्मणि विकारः अवस्थाविशेषः अत्र फलाय विधीयते, न तु कर्मान्तरम् । दर्शपूर्णमासयोरवस्थारूपाद्विकारात्फलं न कर्मान्तरादित्युक्तं भवति । कुतः । प्रकरणात् कर्मान्तरत्वे प्रकरणविच्छेदप्रसङ्गात् ॥ अयमाशयः । लोकतः प्रसिद्धभावेऽपि 'द्वे पौर्णमास्यौ द्वे अमावास्ये यजेत' इति वाक्यात् 'सह कुम्भीभिरभिक्रामं जुहोति' इति वाक्याच्च पौर्णमास्यमावास्यावृत्तिलक्षणः कुम्भीभिः सहप्रस्थानलक्षणश्च गुणः प्रसिद्धः । ततश्च दक्षस्योत्साहिनो यजमानस्येमे दाक्षा ये ऋत्विजः तेषामयनमावृत्तिः, तत्कर्तृकद्विःप्रयोग इति यावत् । अभेदविवक्षया च यज्ञसामानाधिकरण्यम्; साकंप्रस्थायः सहप्रस्थानम्, तत्संबन्धी साकंप्रस्थायीय इति चावयव-व्युत्पत्त्या वाक्यान्तरप्रसिद्धावृत्तिसहप्रस्थानलक्षणगुणविशिष्टवचनदाक्षायणयज्ञादिशब्देन 'लोहितोष्णीषा ऋत्विजः—' इत्यत्रेवोपसर्जनगुणस्य विधानं नानुपपन्नम् । एवं च 'दध्नेन्द्रियकामस्य—' इत्यत्रेवात्र फलाय गुणविधिरेव, न तूद्भिदादिवत्कर्मान्तरम् ।

दाक्षायणयज्ञविषये इतोऽप्येवमित्याह—

लिङ्गदर्शनाच्च ॥ ९ ॥

'त्रिंशतं वर्षाणि दर्शपूर्णमासाभ्यां यजेत यदि दाक्षायणयज्ञी स्यात् पञ्चदश वा वर्षाणि यजेत तर्ह्येवं संपद्यते' इति त्रिंशतं वर्षाणि दर्शपूर्णमासयाजिनो यावती दर्शपूर्णमासप्रयोगसंख्या तावत्संख्याकदर्शपूर्णमासप्रयोगसंपत्तिं पञ्चदशवार्षिकदाक्षायणयज्ञिनो दर्शयति। तदेतत्कर्मान्तरत्वे विरुध्यते। न हि दाक्षायणयज्ञस्य कर्मान्तरत्वे तदीयपञ्चदशवर्षसंपन्नसंख्यया त्रिंशद्वर्षलब्धसंख्याकदर्शपूर्णमासप्रयोगसंपत्तिवर्णनमुपपद्यते। अतोऽपि न कर्मान्तरम् ॥

यदुक्तं संज्ञाभेदात्कर्मभेद इति तत्राह—

गुणात्संज्ञोपबन्धः ॥ १० ॥

दर्शपूर्णमासयोरुत्पन्नयोरावृत्त्यादिगुणनिबन्धना संज्ञेयम्। उत्पत्तिशिष्टैव च संज्ञा कर्मभेदिका, प्रकृतकर्मण्यसंभवन्ती च। न चेयमुत्पत्तिशिष्टा नापि प्रकृतकर्मण्यसंभवन्ती, 'अथैष ज्योतिः' इत्यादिवत्प्रकरणविच्छेदेन प्रक्रमस्याभावात् स्वाश्रितगुणवाचित्वेन प्रकृतकर्मणि संभवाच्च ॥

यदुक्तं फलाय कर्मविधान एव फलविधेः पर्यवसानात्तत्र[1] कर्मण एव भावार्थाधिकरणन्यायेन फलाय विध्यवश्यंभावाद्गुणस्याविधेयत्वात्कर्मभेद इति, तत्राह—

समाप्तिरविशिष्टा ॥ ११ ॥

यथा कर्मणः फलमिति भावार्थाधिकरणे साधितं तथैव 'फलश्रुतेस्तु कर्म स्यात्फलस्य कर्मयोगित्वात्' 'अतुल्यत्वात्तु वाक्ययोर्गुणे तस्य प्रतीयेत' इतीन्द्रियकामाधिकरणे गुणादपि फलस्य साधितत्वेन फलाय गुणविधानेऽपि फलविधेः पर्यवसानस्याविशिष्टत्वान्न कर्मणः पुनर्विधानमत्रेति भावः। अतो गुणविधिः ॥ अत्र 'अयनेषु' इति बहुवचनोपपत्तये संक्रमवाक्यमप्युदाहृतं भाष्ये। तद्यत्रकचिच्छाखायामन्वेषणीयम्। तत्रैव च संक्रमशब्दस्य गुणविशेषपरत्वे वाक्यशेषश्चान्वेषणीयः। प्रयोजनं पूर्वपक्षे दाक्षायणयज्ञं कुर्वाणेन दर्शपूर्णमासावपि कर्तव्यौ, सिद्धान्ते तु न कर्तव्याविति। तदेतदपरे न क्षमन्ते। न हि दर्शपूर्णमासयोः संनिधौ दाक्षायणयज्ञादिविधिः, येन तत्र गुणविधानं स्यात्। कौषीतकब्राह्मणे हि तृतीयेऽध्याये दर्शपूर्णमासावनुक्रम्य चतुर्थेऽध्याये 'अनुनिर्वाप्यया वै देवाः' इत्यादिना पूर्णमासे दर्शे च संस्थिते वैमृधमादित्यं च यागं विधाय 'अथातोऽभ्युदितायाः' इत्यादिनाभ्युदितेष्टिं विधाय 'अथातोऽभ्युदृष्टायाः' इत्यादिनाभ्युदृष्टेष्टिं च विधाय 'अथातो दाक्षायणयज्ञस्य दाक्षायणयज्ञेनैष्यन्फाल्गुन्यां पौर्णमास्यां प्रयुङ्क्ते' इत्यादिना दाक्षायणयज्ञमनुक्रम्य

1. पर्यवसानादत्र—क, घ, ङ.

'अथातः साकंप्रस्थायीयस्य' 'अथातो मन्थधनस्य' 'अथातस्तुरायणस्य' 'अथात आग्रयणस्य' 'अथातश्चातुर्मास्यानाम्' इत्यादिना बहूनि कर्माण्यनुक्रान्तानि। तत्राथशब्देन प्रकरणविच्छेदात् 'अथैष ज्योतिः' इत्यादिवदुत्पत्तिशिष्टसंज्ञान्तरकत्वात्प्रकृतकर्मणि संज्ञान्तरस्य समावेशासंभवाच्च कर्मान्तरत्वमेव युक्तम्। नापि दाक्षायणशब्दो दर्शपूर्णमासयोरावृत्तिगुणयोगाद्वर्तितुमर्हति। न हि दक्षस्येमे दाक्षा ऋत्विजः, तत्कर्तृकमयनमावृत्तिरित्यवयवव्युत्पादनमुचितं येन वाक्यान्तरप्रसिद्धगुणपरत्वं स्यात्। 'दक्षो ह वै पार्वतिरेतेन यज्ञेनेष्ट्वा सर्वान्कामानवाप' 'स वै दक्षो नाम तद्यदनेन स्रोऽयजत तस्माद्दाक्षायणयज्ञ इत्याख्या' इति कौषीतकवाजसनेयकयोरन्यथैव निर्वचनावगतेः। किंच दाक्षायणशब्दस्यावृत्तिगुणपरत्वे तन्मात्रस्य फलाय विधानापत्तौ 'पौर्णमास्यामैन्द्रं सांनाय्यम्' 'मैत्रावरुण्यामिक्षयामावास्यायां यजेत' इत्यादिगुणानां फलार्थत्वानुपपत्तिः। अतो दाक्षायणशब्दस्य गुणविधिपरत्वासंभवात्कर्मान्तरत्वमेव युक्तम्। एवं शतपथब्राह्मणेऽपि हव्यवाहकाण्डे दर्शपूर्णमासावनुक्रम्य संभरणकाण्डे आधानं पुनराधानमग्निहोत्रं चानुक्रम्य दाक्षायणयज्ञोऽनुक्रान्तः। तथा च प्रकरणविच्छेदात्कर्मान्तरत्वमेव युक्तम्। यद्यपि तैत्तिरीयादिशाखायां दर्शपूर्णमासप्रकरणे दाक्षायणादिवाक्यं श्रुतम्, तथापि दाक्षायणादिशब्दस्य गुणपरत्वमुक्तरीत्यानुपपन्नमिति कर्मान्तरत्वमेव युक्तम्। अधिकरणं तु गवामयनप्रकरणस्थोत्सर्गिणामयनादिविषयं योज्यमित्यास्तां तावत्। इति दाक्षायणयज्ञाधिकरणम्॥

दर्शपूर्णमासयोः श्रूयते 'ईषामालभते' 'चतुरो मुष्टीन्निर्वपति' इति। ईषा शकटावयवदारुविशेषः। आलम्भनं स्पर्शनम्। निर्वपणं पृथक्करणम्। मुष्टीन् मुष्टिपरिमितान्व्रीहीन्। तथा कस्यचिदपि प्रकरणमनारभ्य श्रूयते 'वायव्यं श्वेतमालभेत भूतिकामः' 'सौर्य चरुं निर्वपेद्ब्रह्मवर्चसकामः' इति। किमत्र वायव्यवाक्ये सौर्यवाक्ये च दार्शपूर्णमासिकालम्भनिर्वापानुवादेन श्वेतत्वं चरुश्च गुणो विधीयते, उत कर्मान्तरभूतौ भूतिब्रह्मवर्चसफलौ वायुसूर्यदेवत्यश्वेतत्वचरुगुणकावालम्भनिर्वापौ यावदुक्तौ विधीयेते, किं वा उक्तगुणफलविशिष्टौ यागौ विधीयेते इति संशये पूर्वपक्षयति—

'५. द्रव्यदेवतायुक्तानां यागान्तरता-धिकरणम्।

संस्कारश्चाप्रकरणेऽकर्मशब्दत्वात्॥ १२॥

चशब्दो वैषम्ये। दर्शपूर्णमासप्रकरणपठितेषु दाक्षायणादिवाक्येषु कर्मणः संनिहितत्वात्तदाश्रित्य फलाय गुणविधिरिति युक्तम्। इह तु अप्रकरणे कस्यचिदपि प्रकरणमनारभ्य श्रुते वायव्यादिवाक्ये प्रकरणादाश्रयालाभे सति फलाय गुणविध्यसंभवादीषासंस्कार आलम्भो व्रीहियवसंस्कारो निर्वापश्च श्वेतत्वचरुलक्षणगुणविधानायानूद्येते, न तु गुणफलविशिष्टमपूर्वमालम्भनं निर्वपणं च विधीयते। कुतः। अकर्मशब्दत्वात् वायव्यादिवाक्ये आलभातिनिर्वपत्योरपूर्वालम्भनिर्वाप-

कर्मशब्दत्वाभावात् । विशिष्टविधानापेक्षया गुणविधानायानुवादत्वस्यैव युक्तत्वादिति भावः । अकर्मशब्दत्वादित्यस्य वायव्यादिवाक्ये आलभतिनिर्वपत्योर्यागवाचकत्वाभावादित्यप्यर्थः । ततश्च यागविधिरत्यन्ताप्रसक्त इति भावः ॥ न च प्राप्तालम्भनिर्वापानुवादेन वायुसूर्यदेवतयोः श्वेतत्वचरुगुणयोश्च विधाने वाक्यभेद इति वाच्यम् । न हि 'वायव्यम्' 'सौर्यम्' इति च देवताविधिः; किंतु 'सर्वे ओषधिवनस्पतयोऽन्नं प्राणभृतोऽन्नादाः' इति श्रुतौ प्राणभृतां वनस्पतिभोक्तृत्वावगमात्तेन संबन्धेन वनस्पतिसंबन्धिनि प्राणे वायौ देवतात्वोपचारेण ईषायामेव वायव्यशब्दोऽनुवादः । 'सौर्यम्' इति च आग्नेयपुरोडाशीयश्रीहियवद्रव्यस्य तेजोदेवत्यत्वसामान्यादनुवाद इति न वाक्यभेदः । अतो दार्शपूर्णमासिकालम्भनिर्वापावनूद्य गुणविधिः । न च दर्शपूर्णमासकर्मणः पुरोडाशाज्यदधिपयोद्रव्यावरुद्धत्वात्तत्र चरुविधानमनुपपन्नमिति वाच्यम् । अत एवानुपपत्त्या चरुशब्दो लक्षणया स्थालीवचनम्, सप्तम्यर्थे च द्वितीया । स्थाल्यां निर्वपेदित्यर्थः । न च 'शूर्पे निर्वपति' इति विरोधः, शूर्पे स्थाल्यामित्यविरोधात् । न च केवलगुणविधौ फलपदानन्वयः, गुणसंबन्धस्य फलसंबन्धस्य च विधौ वाक्यभेदात् अनारभ्याम्नातत्वेन प्रकरणादाश्रयलाभाभावेन फलाय गुणविध्यनुपपत्तेश्चेति वाच्यम् । भूतिब्रह्मवर्चसपदयोः 'सर्वेभ्यः कामेभ्यो दर्शपूर्णमासौ' इति सर्वकामार्थदर्शपूर्णमासफलैकदेशानुवादत्वात् । तस्माद्दार्शपूर्णमासिकालम्भनिर्वापानुवादेन श्वेतत्वचरुगुणविधिः ।

तमिमं पूर्वपक्षं निराकुर्वन्पूर्वपक्षान्तरमुद्भावयति—

यावदुक्तं वा कर्मणः श्रुतिमूलत्वात् ॥ १३ ॥

वाशब्दः पूर्वपक्षव्यावृत्तौ । दार्शपूर्णमासिकालम्भनिर्वापानुवादेन केवलगुणविधिरित्ययुक्तम् । किंत्वालम्भानन्तरं निर्वपणान्तरं च गुणफलविशिष्टं विधीयते । फलपदयोर्नित्यवच्छ्रुतयोर्देवतापदयोश्च संभवत्प्रयोजनकयोः पाक्षिकानर्थकानुवादत्वस्यान्याय्यत्वात् । किंच लोकेऽप्यालम्भनिर्वापयोः सत्त्वाद्दार्शपूर्णमासिकयोरेव तयोः कथं प्रतीतिः । न चानारभ्याधीतत्वेन प्रकृतिगामित्वात्प्रतीतिरिति वाच्यम् । अव्यभिचरितक्रतुसंबन्धिष्वेवानारभ्याधीतानां प्रकृतिगामित्वाभ्युपगमात्; अन्यथा 'तस्मात्सुवर्णं हिरण्यं भार्यम्' इत्यादिविधेरपि प्रकृतिगामित्वापातात् । एतेन वैदिककर्मत्वसामान्याद्वैदिककर्मसंबन्ध्यालम्भाद्यनुवादेन गुणविधिरित्यपि निरस्तम्, हिरण्यभरणादिष्वतिप्रसङ्गात् । ननु गुणफलविशिष्टालम्भनं निर्वपणं च कर्मान्तरं चेल्किंप्रकृतिकं तदित्यत आह— यावदुक्तमिति । दर्विहोमादिवदपूर्वमिदम् । ततश्च यत्किंचिच्छ्रुतद्रव्यं वायवे संकल्प्य भूतिकामेन स्प्रष्टव्यम्, चरुश्च सूर्याय संकल्प्य ब्रह्मवर्चसकामेन निर्वपतव्य इति लभ्यते । ननु द्रव्यदेवतासंबन्धाद्यागः कुतोऽत्र न कल्प्यत इत्यत आह— कर्मणः श्रुतिमूलत्वादिति । कर्मणो यागस्य शब्दैकगम्यत्वाद्द्रव्यदेवतासंबन्धमात्रेण

कल्पयितुमशक्यत्वादित्यर्थः। न चैवम् 'आग्नेयोऽष्टाकपालो भवति' इत्यत्र कथं यागकल्पनमिति वाच्यम्। वैषम्यात्। आग्नेयादिवाक्ये हि पुरुषव्यापारं विना विध्यनुपपत्तेः पुरुषव्यापारापेक्षायां पदान्तरार्थद्रव्यदेवतासंबन्धोपस्थितयागरूप एव कल्पयितुं न्याय्य इत्यश्रुतस्यापि यागस्य विधिर्युज्यते। इह त्वालम्भनिर्वापयोः पुरुषव्यापारयोः श्रुतत्वात्तत एव विध्युपपत्तेरश्रुतयागविधिर्नाभ्युपेयः। तस्माद्यावदुक्तावालम्भनिर्वापौ गुणफलविशिष्टौ वायव्यसौर्यवाक्ययोर्विधीयेते इति पूर्वः पक्षः॥

सिद्धान्तयति—

[1]यजिस्तु द्रव्यफलभोक्तृसंयोगादेतेषां कर्मसंबन्धात्॥ १४॥

तुशब्दोऽवधारणे। द्रव्यग्रहणं देवताया अप्युपलक्षणम्। वायव्यादिवाक्ये यजिरेव विधीयते, नालम्भनादि। कुतः। द्रव्यफलभोक्तृसंयोगात्। 'वायव्यम्' इत्यादितद्धितान्तशब्देन द्रव्यदेवतासंबन्धस्य 'भूतिकामः' इत्यादिपदेन फलसंबन्धस्य तत्कामभोक्तृसंबन्धस्य च अवगमादित्यर्थः। ननु द्रव्यदेवतादिसंबन्धानां कथं यागकल्पकत्वमित्यत आह— एतेषामिति। द्रव्यदेवताफलभोक्तृणां कर्मणा यागेन अविनाभावात्॥ 'वायव्यम्' इति देवतातद्धितेन हि देवतात्वेन वायुसंबन्धो द्रव्यस्य प्रतीतः। त्यज्यमानहविरुद्देश्यत्वं च देवतात्वम्। तच्च सूर्याद्युद्देशेन द्रव्यत्यागादेव भवति, नान्यथा। एवं च वायव्यादिवाक्येषु श्रुतप्राय एव याग इति भवति तद्विधिः। तत्र द्रव्यदेवतासंयोग एव यागस्याक्षेपकः। फलसंयोगो भोक्तृसंयोगश्च फलस्य तत्कामनायाश्चाभावे स्वकीयद्रव्यं यजमानः किमिति त्यजेदिति यागस्य निर्वाहकतयोपात्त इति न तत्राभिनिवेष्टव्यम्। अत्र 'आलभेत' 'निर्वपेत्' इति धात्वर्थो न विवक्षितः। 'श्वेतद्रव्यकवायुदेवताकयागेन भूतिं कुर्यात्' 'चरुद्रव्यकसूर्यदेवताकयागेन ब्रह्मवर्चसं कुर्यात्' इत्यर्थः। धातुभ्यां तु चोदकादर्थाद्वा प्राप्तं स्पर्शनं पृथक्करणं चानूद्यते। न चास्मिन्पक्ष आलभतेर्निर्वपतेश्चानर्थक्यम्, पूर्वपक्षे तु देवतापदस्येति को विशेष इति वाच्यम्। विधिप्रत्ययथोगार्थं धातूपादानस्यावश्यंभावेन सार्थक्यात्।

इतोऽप्येवमित्याह—

लिङ्गदर्शनाच्च॥ १५॥

'सोमारौद्रं चरुं निर्वपेत्' इति प्रकृत्य 'परिश्रिते याजयेत्' इति परिश्रयणविधिपरे वाक्ये यागानुवाददर्शनादपि लिङ्गाद्द्रव्यदेवतासंबन्धस्य यागाक्षेपकत्वमनुमिमीमहे इति। वृत्तमिदमधिकरणम्॥

'पयसाग्निहोत्रं जुहोति' इति विहितस्य पयसो दोहनविषये 'वत्समालभेत' 'वत्समुपसृजति' 'प्राचीमावृत्य गां दोग्धि' 'दुह्यमानां गामनुमन्त्रयते' इत्यादि श्रुतम्। उपसृजति

1. यजतिस्तु.

मातृसमीपं प्रापयति। तत्र 'वत्समालभेत' इति किं यागविधिः उत संस्पर्शनमात्रविधिरिति संशयः। तत्र 'वायव्यं श्वेतमालभेत' इत्यत्रैव यागविधिरिति ब्रूमः। न च देवतासंयोगाभावात्कथमिह यागविधिरिति वाच्यम्। वत्सालम्भोऽयं यजिमत्कर्म भवितुमर्हति, प्राणिद्रव्यकालम्भत्वात्, वायव्यवाक्यावगतालम्भवदित्यनुमानेन यागविधित्वाध्यवसाये सति प्राणिद्रव्यकत्वसामान्येनाग्नीषोमीयविध्यन्तप्राप्त्या देवतालाभस्योपपादयितुं शक्यत्वादिति प्राप्ते, सिद्धान्तयति—

६. वत्सालम्भादीनां संस्कारताधिकरणम्।

विशये प्रायदर्शनात् ॥ १६ ॥

यागविधिर्वा स्पर्शनमात्रविधिर्वेति संशये स्पर्शनमात्रविधिरित्येव युक्तम्। कुतः। प्रायदर्शनात् प्रायेषु बहुषु उपसर्जनावर्तनानुमन्त्रणादियावदुक्तकर्मस्वालम्भनस्य पाठात्, सामान्यतोदृष्टानुमानस्य च वैदिकार्थागोचरत्वात्, 'अध्वर्युमालभेत' इत्यादौ प्राणिद्रव्यकर्मत्वेऽपि स्पर्शनमात्राभिधानेन व्यभिचाराच्चात्रालभतेः स्पर्शनमात्रार्थकत्वम्। न चैवं सति 'वत्समुपसृजति' इत्युपसर्जनविधानादेवार्थसिद्धत्वादालम्भनविधिर्व्यर्थ इति वाच्यम्। न ह्यत्र स्पर्शनमात्रं विधीयते येन तद्वैयर्थ्यं स्यात्; किंतु चाटूकरणात्मकस्पर्शनविशेषलक्षणसंस्कारः। स च नावश्यं प्राप्तः। गोप्रस्रवनातिशये चोपयुज्यत इति न वैयर्थ्यम् ॥

इतोऽप्येवमित्याह—

अर्थवादोपपत्तेश्च ॥ १७ ॥

'वत्सनिकान्ता हि पशवः' इति धेनुप्रस्रवनार्थवत्सोपचारात्मकालम्भविधेरर्थवादः। वत्सा नितरां कान्ताः प्रिया येषामिति विग्रहः। स चायमर्थवादो वत्सस्पर्शनमात्रविधावेवोपपद्यते न तु यागविधौ, यागे सति तस्य संज्ञपनप्रसङ्गात्। तथा च यस्मादसौ मातुः प्रियो वत्सस्तस्मात्संज्ञपनार्थमालभ्य इत्यसंगतं स्यात्; मारणे अप्रीतिप्रसङ्गात्। चाटूकरणात्मकस्पर्शनविधौ तु वत्सप्रिया माता चाटूकृतेन वत्सेन संयुज्यमाना स्नेहात्प्रस्नविष्यतीत्युपपद्यते। तस्मादत्र स्पर्शनमात्रविधिः, न यागविधिः। प्रयोजनं पूर्वपक्षे अग्निहोत्राङ्गतयाग्नीषोमदेवताकवत्सद्रव्यकयागोऽनुष्ठेयः, सिद्धान्ते तु वत्सचाटूकरणमात्रमिति। वृत्तमधिकरणम् ॥

अग्नौ श्रूयते 'चरुमुपदधाति' 'बृहस्पतेर्वा एतदन्नं यन्नीवाराः' इति। तत्र किं चरोरुपधानमात्रं यावदुक्तं विधीयते, उतोपधानयुक्तो यागो विधीयत इति संशयः। तत्र 'वत्समालभेत' इत्यत्र देवतासंयोगाभावेन यागविध्यसंभवेऽपि प्रकृते वाक्यशेषतो देवतालाभाद्यागविधिरस्तु। यद्यपि वाक्यशेषे देवतात्वेन बृहस्पतेश्चरुसंबन्धो न

७. नैवारचरोराधानार्थताधिकरणम्।

श्रुतः, तथापि 'बृहस्पतेरन्नम्' इति संबन्धश्रवणादेवतात्वं कल्प्यते। यदि हि नैवारचरौ बृहस्पतिर्देवता न भवेत्तदा कथं बृहस्पतेर्नीवारा अन्नं भवेयुः। तैत्तिरीयके 'बार्हस्पत्यो भवति' इति तद्धितेनापि स्पष्टमेव चरोर्देवतासंबन्धः श्रुतः। किंच उपधानमात्रविधौ चरोरुपधानसंस्कृतस्य भूतभाव्युपयोगाभावेन संस्कार्यत्वरूपकर्मत्वासंभवाद्वितीयाश्रुतिरनुपपन्ना स्यात्। यागविधिपक्षे तु तस्य यागस्यैकदेवताकत्वौषधद्रव्यकत्वादिसामान्येनाग्नेयविध्यन्तप्राप्तौ चोदकप्राप्तस्विष्टकृदादिप्रतिपत्तिबाधेनोपधानं चरोः प्रतिपत्तित्वेन विधीयत इति न द्वितीयानुपपत्तिः। तस्मादुपधानप्रतिपत्तिकर्मयुक्तो बृहस्पतिदेवत्यचरुद्रव्यकयागो विधीयते इति प्राप्ते, सिद्धान्तयति—

संयुक्तस्त्वर्थशब्देन तदर्थः श्रुतिसंयोगात् ॥ १८ ॥

अर्थः कार्यमुपधानम्। तद्वाचकशब्देन उपदधातिना चरुः [1]संयुक्तः। अतः सः तदर्थः उपधानरूपकार्यार्थ एव भवति। उपधानसंस्कार्यस्यापि चरोरुपधानार्थत्वमार्थिकसाधनत्वाभिप्रायम्[2], चरोरुपधानमात्रस्यैव श्रवणात् ॥ तन्मात्रं यावदुक्तं विधीयते, न तु याग इत्युक्तं भवति। ननु वाक्यशेषतो देवतावगमे सति यागः कुतो न कल्प्यत इत्यत आह—श्रुतिसंयोगादिति। वाक्यशेषे तावन्नीवारेष्वेव बृहस्पतिः श्रुतः, न चरौ। स च स्वरूपेणैव, न तु देवतात्वेन। तत्र यदि विध्युद्देशस्य देवताकाङ्क्षा स्यात्तदा तद्गुलान्नीवारशब्दस्य तद्विकारलक्षणामाश्रित्याश्रुतश्चरुसंबन्धो देवतात्वं च बृहस्पतेः कल्प्यते। इह च विध्युद्देशस्योपधानमात्रविधायकत्वेनोपपन्नतया न देवतापेक्षास्ति, चरोरुपधानस्य च देवताविरहात्। अतः कथं वाक्यशेषाच्चरोर्देवतासंबन्धलाभः। चरूपधानं तु प्रकरणादन्यदङ्गम्। तदङ्गत्वं चाहवनीयाधारस्थण्डिलनिष्पत्त्यर्थतया वाच्यम्। उपधानस्य स्थण्डिलनिष्पत्त्यर्थत्वमुपधेयचरुद्वारैव, न साक्षात्। ततश्चोपधानलक्षणसंस्कारविधिबलादेवोपधेयस्य चरोरप्युपधानसाध्यस्थण्डिलनिष्पत्तौ विनियोगकल्पनादुपधानविधेयमर्थः संपद्यते 'उपधानसंस्कृतेन चरुणा स्थण्डिलं निष्पादयेत्' इति। एवं च अनेनैव वचनेन चरोरपि विनियोगात्संस्कार्यत्वं संभवतीति द्वितीयाप्युपपद्यते। 'बार्हस्पत्यो भवति' इति वाक्यमपि प्राग्दीव्यतीयेष्वर्थेष्वपत्यादिषु विहितण्यप्रत्ययान्तत्वेन विशिष्य देवतार्थत्वे विध्युद्देशाकाङ्क्षालक्षणप्रमाणाभावाद्यथाकथंचिन्नीयमानमपि न दुष्यति। तस्मादुपधानमात्रविधिरिति। वृत्तमिदमधिकरणम् ॥

'त्वाष्ट्रं पाल्वीवतमालभेत' इति प्रकृत्यामनन्ति 'पर्यग्निकृतं पाल्वीवतमुत्सृजति' इति। तत्र संशयः किमिह यागान्तरविधिः, उत त्वाष्ट्रवाक्यविहिते कर्मणि पर्यग्निकरणान्ताङ्गकलापविधि-

1. संयुक्तः तदर्थः अतः—क. 2. अभिप्रायगर्भम्—ख.

रिति। तत्र 'चरुमुपदधाति' इत्यत्र 'बृहस्पतेर्वा एतदन्नम्' इति वाक्यशेषस्य देवतासमर्पकत्वाभावेन

८. पाल्लीवतस्य पर्यग्नि-करणगुणकत्वाधिकरणम्।

यागान्तरविध्यसंभवेऽपि प्रकृते विधावेव 'पाल्लीवतम्' इति तद्धितान्तेन देवता-संबन्धावगमाद्यागान्तरविधिः संभवति। 'उत्सृजति' इति प्रत्ययप्रतिपाद्य-विधेर्हि 'पाल्लीवतम्' इत्यत्रैव संनिधानादन्वयः, न तु 'पर्यग्निकृतम्' इत्यत्र। ततश्च वायव्यवाक्यवद्रव्यदेवतासंबन्धाक्षिप्तयागविधिः। प्रकृत्यंश उत्पूर्वकमृजिधातुर्यागविधिबलादुत्सर्गस्य प्राप्तेः प्रत्ययानुग्रहमात्रार्थः। पर्यग्निकृतशब्दश्च चोदकप्राप्तपर्यग्निकरणानुवादः। एवं च 'पाल्लीवतयागेन कुर्यात्' इत्येव वाक्यार्थ इति न वाक्यभेदः। न च त्वाष्ट्रवाक्ये पाल्लीवतशब्दादुपस्थितस्यैव यागस्य पर्यग्निकृतवाक्ये पाल्लीवतशब्देन प्रत्यभिज्ञानात्कथं यागान्तरविधिरिति वाच्यम्। त्वाष्ट्रवाक्ये हि पत्नीवांस्त्वष्टा देवतात्वेन निर्दिश्यते, अन्यथा त्वष्टृपदवैयर्थ्यात्। पर्यग्निकृतवाक्ये तु पत्नीवानेव निर्दिश्यत इति कथं तेन त्वाष्ट्रवाक्यविहितयागप्रत्यभिज्ञासंभवः। किंच, त्वाष्ट्रवाक्यविहिते कर्मणि पर्यग्निकृतवाक्येन किं विधीयते; किं पर्यग्निकरणम्, उतोत्सर्गः, अथवा पर्यग्निकृत्वोत्सृजतीति क्रमः, किं वा पर्यग्निकरणान्ताङ्गकलापः। नाद्यः, चोदकत एव पर्यग्निकरणस्य प्राप्तत्वात्। न द्वितीयः, देवतोद्देश्यकद्रव्यत्यागात्मकयागविधायकत्वाष्ट्रवाक्यादेव यागरूपस्योत्सर्गस्य सिद्धत्वात्पर्यग्निकृतशब्दवैयर्थ्याच्च पर्यग्निकरणविशिष्टपाल्लीवतोद्देशेनोत्सर्गविधौ च विशिष्टस्यैवोद्देश्यत्वापत्त्या वाक्यभेदात्। न तृतीयः, पर्यग्निकृत्वोत्सृजतीति क्रमस्यापि चोदकत एव प्राप्तेः। न चतुर्थः, पर्यग्निकरणान्ताङ्गकलापस्यापि चोदकत एव प्राप्तेः। उत्तराङ्गपरिसंख्याने च त्रैदोष्यापत्तेः। एवं च पूर्वकर्मणि विधेयालाभादपि 'गुणश्चापूर्वसंयोगे' इति गुणाधिकरणन्यायेन यागान्तरविधिपरमेव पर्यग्निकृतवाक्यमिति प्राप्ते, सिद्धान्तयति—

पाल्लीवते तु पूर्ववत्त्वादपच्छेदः[1] ॥ १९ ॥

तुशब्दः पूर्वपक्षव्यावृत्तौ। पाल्लीवते 'पर्यग्निकृतं पाल्लीवतम्' इति वाक्ये कर्मान्तरविधिर्न भवति, किंतु पूर्ववत्त्वात् प्रत्यभिज्ञायमानपूर्वकर्मवत्त्वात्। पूर्वकर्मण्येव पर्यग्निकरणान्ताङ्गकलापविधानेनोत्तराङ्गानामपच्छेदः निवृत्तिर्भवति॥ अयमाशयः। त्वाष्ट्रवाक्ये तावत् 'त्वाष्ट्रम्' 'पाल्लीवतम्' इति च तद्धितान्तपदं प्रत्येकमेव देवतात्वं गमयति, न त्वत्राग्नीषोमीयादिवत्समासोत्पन्नेनैकेन तद्धितेन त्वष्टुः पत्नीवतश्च देवतात्वावगमः, येन व्यासक्तं देवतात्वं स्यात्। न च प्रत्येकं देवतात्वे विकल्पः स्यादिति वाच्यम्। एकेनैव वाक्येन युगपदुभयोर्विहितत्वेन एकक्रियावशीकृततया अन्योन्यनियमलाभात्। न हि व्रीहियवादिविधाविवात्र वाक्यभेदोऽस्ति। ततश्च यथा देवदत्तयज्ञ-

1. पूर्वत्वादवच्छेदः।

दत्तयोर्माता देवदत्तमातेति यज्ञदत्तमातेति च पृथग्व्यपदिश्यते एवं त्वाष्ट्रपत्नीवतोर्याग: 'पात्नीवत:' इत्यपि पृथग्व्यपदेशमर्हतीति पर्यग्निकृतवाक्ये पात्नीवतशब्देन त्वाष्ट्रवाक्यविहितयागप्रत्यभिज्ञानसंभवान्न कर्मान्तरविधानं युक्तमाश्रयितुम। ततश्च 'पात्नीवतम' इत्यस्यानुवादत्वात 'उत्सृजति' इति विधिप्रत्ययस्य 'पर्यग्निकृतम्' इत्यत्रैवान्वयः। तथा च 'पात्नीवतम' इत्यनेन उत्सृजिना च प्रकृत्यंशेन पात्नीवतयागमनूद्य प्रत्ययांशेन पर्यग्निकरणान्ताङ्गकलापश्चोदकप्राप्तोऽप्युत्तराङ्गपरिसंख्यानाय विधीयते। अप्राप्तपरिसंख्यात्वाच्च न त्वैदोष्यम्। चोदकप्रवृत्तेः प्रागेव हि पर्यग्निकरणान्ताङ्गकलापविधिः प्रवर्तते। ततश्च तेनैव पर्यग्निकरणान्ताङ्गकलापेन शान्ताकाङ्क्षत्वात्पात्नीवतयागोऽयं नातिदेशमपेक्षते। यथा गृह्यमेधीययागः 'आज्यभागौ यजति' इति चोदकात्प्रागेव प्रवृत्तविधिना कल्पाज्यभागाभ्यां निराकाङ्क्षो नातिदेशमपेक्षते तद्वत्। एवं चोत्तराङ्गकलापस्यार्थादेवाप्राप्तेस्तन्निवृत्तौ विधेर्व्यापाराभावान्न त्वैदोष्यम। न चैवमपि पर्यग्निकरणमात्रविधिरेव स्यात् न तु तदन्ताङ्गकलापविधिः 'शंय्वन्ता प्रायणीया संतिष्ठते' इत्यादिवदन्तशब्दाभावादिति वाच्यम। अन्तशब्दाभावेऽपि पर्यग्निकृतशब्दबलादेव तदन्ताङ्गानां प्रतीतेः। पर्यग्निकृतशब्दो हि भूतकालार्थकक्तप्रत्ययान्तः कर्मसाधनः प्राकृतपर्यग्निकरणावस्थापन्नतावचनः। न हि पूर्वाङ्गेष्वकृतेष्वियमवस्था संपद्यत इति तदन्ततालाभः। न च पात्नीवतविशिष्टोत्सर्गानुवादेन तदन्ताङ्गकलापविधौ विशिष्टोद्देशाद्वाक्यभेदः, उत्सर्गमात्रानुवादेन तद्विधावतिप्रसङ्ग इति वाच्यम। उत्सृजतिमात्रस्यैवोद्देश्यसमर्पकत्वे विशिष्टोद्देशदोषानवकाशात्, संनिधानाच्च प्रकृतस्यैवोद्देश इति नातिप्रसङ्गः। यद्यपि नवमोपान्त्याधिकरणे 'पर्यग्निकृतानारण्यानुत्सृजति' इत्यत्र प्रज्ञाते[1] प्रकृतकर्मणि पर्यग्निकरणान्ताङ्गकलापविधिः सिद्धान्तयिष्यते, तथापि प्रत्यभिज्ञास्ति नास्तीत्यधिकविचारार्थमिदमधिकरणमित्यपौनरुक्त्यमिति। वृत्तमधिकरणम्॥

'योऽदाभ्यं गृहीत्वा सोमाय यजते' इति 'योंशुं गृह्णाति' इति चानारभ्य श्रुतम। तत्र संशयः किं ज्योतिष्टोमे ग्रहणविधिर्यागान्तरविधिर्वेति। तत्र 'पर्यग्निकृतं पात्नीवतम—' इति वाक्ये पात्नीवतशब्देन पूर्वकर्मणः प्रत्यभिज्ञानात्तत्र गुणविधावप्यनारभ्याधीतत्वेनात्र प्रत्यभिज्ञाविरहाद्यागान्तरविधिरेव स्यात्। किंच संकल्पाद्युपयोगाभावेनांश्वदाभ्यशब्दयोर्ग्रहणसंस्कारनामधेयत्वानर्हतया ग्रहणव्यतिरिक्तमेवंसंज्ञकं यागान्तरमेव वाक्यद्वयेऽपि विधेयम्। यद्यप्यदाभ्यवाक्ये 'यजते' इत्येव श्रुतं न तु रूपम् अंशुवाक्ये तु 'गृह्णाति' इत्येव श्रुतं न तु यजिरपि, तथापि ज्योतिष्टोमे 'ऐन्द्रवायवं गृह्णाति' इत्यादाविव गृह्णातिशब्ददर्शनादंशुवाक्येऽपि विधेयं कर्म ज्योतिष्टोमप्रकृतिकमिति निश्चिते सति

९. अदाभ्यादीनां ग्रहनामताधिकरणम्।

1. प्रतिज्ञाते—ग.

तदीयद्रव्यदेवतालाभाद्यागत्वाध्यवसायः । यथा आधारवाक्ये आधारसंज्ञककर्ममात्रे विहिते 'इत इन्द्र ऊर्ध्वो अध्वरः' इति मन्त्रवर्णात् 'चतुर्गृहीतं वा एतत्' इति वाक्यशेषाच्च द्रव्यदेवतालाभाद्यागत्वाध्यवसायः, तद्वदेव अदाभ्यवाक्येऽपि 'यजते' इति सामान्यरूपेण देवतावगमेऽपि इन्द्रवायुत्वादिविशेषाध्यवसायः । गृह्णातिस्तु चोदकप्राप्तानुवादः । तस्मादंशुदाभ्यसंज्ञकयागान्तरयोर्विधिरिति प्राप्ते, सिद्धान्तयति—

अद्रव्यत्वात्केवले कर्मशेषः स्यात् ॥ २० ॥

द्रव्यशब्देन द्रव्यदेवतासंबन्धो लक्ष्यते । केवले अरूपे गृह्णातौ श्रूयमाणे कर्मणः ज्योतिष्टोमस्य अङ्गभूतं ग्रहणं विधेयं स्यात् । अदाभ्यनामकोंशुनामकश्च ग्रहणसंस्कार एवात्र विधीयते, न तु यागान्तरविधानमित्युक्तं भवति । कुतः कैवल्यम् । अद्रव्यत्वात् द्रव्यदेवताराहित्यात् ॥ अयमाशयः । संस्कारकर्मणो नामानर्हत्वे द्वयोरपि यागविधिर्भवेत् । न तु तदस्ति, सामानाधिकरण्यतः प्रतीयमानस्य ग्रहणसंस्कारनामधेयत्वस्य दृष्टप्रयोजनाभावमात्रेण परित्यक्तुमनुचितत्वात् तन्नामकतया ज्ञानमभ्युदयकारीति कल्पयितुं शक्यत्वात् अंशुवाक्ये यजेरश्रुतत्वेन अदाभ्यवाक्ये यजेर्व्यवहितत्वेन तन्नामधेयत्वासंभवाच्च । तस्मादंशुदाभ्यनामकग्रहणसंस्कारावेवात्र विधीयेते, न तु यागान्तरे । एवं चांशुवाक्ये प्रथमं तत्संज्ञककर्ममात्रविधौ तस्य च ज्योतिष्टोमविकृतित्वकल्पनया ततो रूपलाभे सति पश्चाद्यागत्वाध्यवसायः, अदाभ्यवाक्येऽपि प्रथमं सामान्येन देवतात्वावगमे पश्चात्तद्विशेषाध्यवसाय इति क्लेशोऽपि नानुभवितव्यो भवति । आधारवाक्ये तु मन्त्रवर्णाद्वाक्यशेषाच्च द्रव्यदेवतालाभाद्युक्तं यागरूपत्वम् । न च ग्राह्यविशेषापरिज्ञानात्प्रयोजनाभावाच्च ग्रहणविधिरप्यनुपपन्न इति वाच्यम् । ज्योतिष्टोमाव्यभिचरितगृह्णातिशब्दोपस्थितज्योतिष्टोमाङ्गत्वे सति तत्रापि संनिपातित्वे सत्यारादुपकारकत्वस्यान्याय्यतया संनिपातित्वस्य च सोमसंस्कारद्वारैव वक्तव्यत्वेन संस्कार्यसोमाख्यग्राह्यद्रव्यलाभात्कतूपकारलक्षणप्रयोजनलाभाच्च । ननु 'आज्यं गृह्णाति' 'चतुर्जुह्वां गृह्णाति' इति दर्शपूर्णमासयोरपि गृह्णातेर्दर्शनान्न ततो ज्योतिष्टोमाङ्गतालाभ इति वाच्यम् । तैत्तिरीयके षष्ठकाण्डे षष्ठप्रपाठके 'देवा वै यद्यज्ञेऽकुर्वत' 'देवा वै प्रबाहुग्रहानगृह्णत' इत्यनुवाकयोः ज्योतिष्टोमप्रकरणगतयोः पुनरान्नातत्वेन ज्योतिष्टोमाङ्गतासंभवाददाभ्यवाक्ये 'यजते' इति यजिः प्रकरणप्राप्तज्योतिष्टोमस्यानुवादः । एवं च यजिना प्रकृतयागमनूद्य तदुत्तरप्रत्ययेन रेवतीवारवन्तीयपूर्वपक्षन्यायेन गृहीत्वाशब्दार्थसंक्रान्तविधिशक्तिना ग्रहणसंस्कारविधिरिति स्थितम् । अत्रेदं वक्तव्यम् । तैत्तिरीयक अदाभ्यमधिकृत्य 'उपनद्धस्य गृह्णाति' 'अनभिषुतस्य गृह्णाति' इति द्रव्यं श्रुतम् । 'योऽदाभ्यं गृहीत्वा सोमाय यजते' इत्यत्र सोमस्य देवतात्वं चतुर्थ्यावगतमिति द्रव्यदेवतासंबन्धाच्चिप्रयागविधिः संभवति । तथांशुविधिमधिकृत्य तैत्तिरीयके 'सकृदभिषुतञ्च गृह्णाति' इति

द्रव्यं श्रुतम्। तथा वामदेव्यमिति साम। 'तद्वा अस्यायतनं मनसा गायमानो गृह्णाति' इति विहितवामदेव्यसामाधारभूतया 'कया नश्चित्रः' इत्यृचा प्राजापत्यया 'उपयाम गृहीतोऽसि प्रजापतये त्वेति गृह्णाति' 'प्रजापतये त्वा स्वाहेति जुहोति' इत्यादिबोधायनादिपठितमन्त्रवर्णेन च देवता लभ्यत इति तत्रापि यागविधिरेव युक्तः। तथा च प्रस्तरप्रहरणवत्स्विष्टकृद्वदाधारवच्चांश्वदाभ्ययोरपि ग्रहणसंस्काररूपत्वं यागरूपत्वं च युक्तम्। अधिकरणस्य तु 'यत्पृश्नयो गृह्यन्ते' इत्यनारभ्य श्रुतं तैत्तिरीयकवाक्यं विषयः। तत्रापि 'प्रातःसवनिकाभिषवाय होतृचमसीयाभिरद्भिः उपसिक्तं संतृप्नं राजानं दशया व्यूह्याभिमृशति वायुरसि प्राणो नामेति दशभिः' इति द्रव्यदेवतासंबन्धलाभो न शङ्क्यः। न ह्यत्र देवता चोद्यते, तद्धितचतुर्थ्योरभावात्। मन्त्रवर्णस्तु न स्वतो देवतां विधातुं क्षमः; किंतु यत्र यजतिजुहोत्यादिशब्दतो देवतोद्देश्यकद्रव्यत्यागात्मकयागावगमस्तत्रैव देवताविशेषकल्पनाय प्रभवति। तत्र हि सामान्यरूपेणावगताया अपि देवताया विशिष्यावगम आकाङ्क्ष्यते। तत्र तद्धितचतुर्थ्योः सत्त्वे तत एवावगमः। तदुभयाभावे तु मन्त्रवर्णात्तदवगमः। न ह्यत्र यजतिः श्रूयते, जुहोतिर्वा अन्यो वा यागवचनः कश्चिच्छब्दः। तस्मान्नात्र मन्त्रवर्णतो देवतालाभः। तदेतत् 'पुरोडाशकपालेन तुषानपास्यति' इति कात्यायनसूत्रव्याख्यावसरे कर्कभाष्ये व्यक्तमुपपादितम्। आघारशब्दस्तु क्षारणशिरस्कयागात्मकहोमे वर्तत इति तत्प्रख्याधिकरणेऽवोचाम। अतस्तत्र मान्त्रवर्णिकदेवतालाभ इति युक्तम्। अत एव शतपथब्राह्मणे 'तं वा एतमग्निमैन्धिषत, तस्मिन्नेते प्रथमे आहुती जुहोति' इत्युपक्रम्य 'स्रुवेण तमाघारयति' 'स्रुचा तमाघारयति' इत्यादि श्रुतम्। अत एव च पूर्वाघारे स्वाहाकारनिषेधोऽपि तत्र श्रूयमाणोऽर्थवान्भवति, क्षारणमात्रविधौ देवतोद्देश्यकद्रव्यत्यागात्मकयागाभावेन स्वाहाकारस्याप्राप्त्या तत्प्रतिषेधानर्थक्यात् 'स्वाहा देवहविर्दाने' इति कोशाद्यनुसारेण स्वाहाशब्दस्य यागविषयकत्वावगमात्। आघारं प्रकृत्य 'इत इन्द्र इति जुहोति' इत्येव कात्यायनः। न चैवं सत्याघारशब्देन प्रथममाघारसंज्ञककर्ममात्रेऽवगते वाक्यशेषमन्त्रवर्णाभ्यां देवतावगतौ सत्यां पश्चात्तस्य यागत्वाध्यवसाय इति कथं वार्तिकोद्घोषः, होमत्वेनैव तस्य प्रथममवगमादिति वाच्यम्। आघारपदेन कश्चिद्धोमविशेष इत्येतावन्मात्रावगमे सति [1]तस्य विशेषस्य चतुर्गृहीताज्यैकदेशत्वेनेन्द्रत्वेन च द्रव्यदेवताज्ञानाभावे पर्यवसानाभावाद्वाक्यशेषमन्त्रवर्णाभ्यां तथा पर्यवसानमित्यभिप्रायकत्वात्। यथा चैतत्तथा आधाराग्निहोत्राधिकरणे निरूपितमस्माभिः। तस्मात् 'यत्पृश्नयो गृह्यन्ते' इति वाक्यमिहोदाहरणम्। 'संतृप्नं राजानम' इत्यव्यभिचरित-[2]ज्यौतिष्टौमिकाङ्गसंवलनाज्ज्योतिष्टोमाङ्गता पृश्निग्रहाणाम्। एवम् 'प्राणग्रहान्गृह्णाति' इत्यप्युदाहरणम्। तत्र हि 'संतृप्तस्य राज्ञो नवनवांशूनयंपुरोभुव इति प्राणभृन्मन्त्रैः प्रतिदिशं व्यूह्य प्राचीदिशामित्यपानभृन्मन्त्रैः प्रत्यूहति' इति प्रयोगः। तत्र 'प्रायणीये चोदनीये च गृह्यन्ते' 'दशमेऽहन्गृह्यन्ते'

1. तस्य चतुर्गृहीत...—क. 2. ज्योतिष्टोम—क, ग, ङ.

इति च वचनात्प्राणप्रहाणां द्वादशाहिकप्रायणीयादिसुत्याविशेषार्थता । 'ज्योतिष्टोमे वा गृह्यादगदो हैव भवति' इति शाखान्तरम् । बोधायनादिसूत्रेऽप्येवमित्यास्तां तावत् । इत्यंश्वदाभ्याधिकरणम् ॥

'य एवं विद्वानग्निं चिनुते' इत्यत्र किं यावदुक्तमग्निसंस्कारात्मकं चयनं विधीयते, उताग्निसंज्ञकयागान्तरं विधीयते, किं वा ज्योतिष्टोमादौ गुणविधिरिति संशये, पूर्वपक्षयति—

अग्निस्तु लिङ्गदर्शनात्क्रतुशब्दः प्रतीयेत ॥ २१ ॥

तुशब्दः अंश्वदाभ्ययोर्वैषम्यं द्योतयन्प्रथमतृतीयौ पक्षौ निराचष्टे । अंश्वदाभ्ययोरनारभ्यपठितयोरपि प्रकरणे पुनःपाठाज्ज्योतिष्टोमाङ्गता । न चेदं वाक्यं ज्योतिष्टोमप्रकरणे पठ्यते ।

१०. अग्निचयनस्य संस्कारता-धिकरणम् ।

अतो न तत्र गुणविधिः । वैयर्थ्याच्च न स्वतन्त्रसंस्कारविधिः । न च 'ऋग्भ्योत्येव' इत्यार्थवादिकफलश्रवणात्स्वातन्त्र्यं शङ्क्यम्, फलवत्त्वे संस्कारकर्मत्वस्यैवानुपपत्तेः । तदेवं तुशब्देन प्रथमतृतीयपक्षौ निराकृत्य द्वितीयपक्षमवलम्बते—अग्निः क्रतुशब्द इति । अग्निः अग्निशब्दः क्रतुशब्दः यागवाचकः प्रतीयेत, 'अग्निं चिनुते' इत्यस्य हि अग्निसंज्ञकयागं कुर्यादित्यर्थः । एवं च 'अग्निं चिनुते' इत्यस्य चयनविधायकत्वाभावात् 'इष्टकाभिरग्निं चिनोति' इति वाक्यमिष्टकाविशिष्टचयनविधायकं संपद्यते । तच्च प्रकरणात् 'अग्निं चिनुते' इति वाक्यविहितयागाङ्गमिति तद्वाक्यप्राप्तचयनस्य चिञ्धातुरनुवादः । ननु यजिरत्र न श्रूयते । तथा च यजिसामानाधिकरण्याभावादग्निशब्दस्य कथं यागनामत्वमित्यत आह—लिङ्गदर्शनादिति । 'अग्नेः स्तोत्रम् अग्नेः शस्त्रं, षडुपसदोऽग्नेः' इति ज्योतिष्टोमयागाङ्गस्तोत्रशस्त्रादिदर्शनादग्नेर्यागात्मकत्वमध्यवसीयते । किंच 'अथातोऽग्निमग्निष्टोमेनानुयजन्ति तमुक्थ्येन तं षोडशिना तमतिरात्रेण तं द्विरात्रेण' इत्यादीनि 'तमेकादशरात्रेण' इत्यन्तानि चतुर्दश वाक्यानि श्रुतानि । 'तमुक्थ्येन' इत्यादिषु 'अनुयजन्ति' इत्यनुषज्यते । तत्राद्यानि चत्वारि वाक्यान्यग्निनामकस्य यागस्य संस्थाविधिपराणि । 'अग्निं यजन्तीति यत्तदग्निष्टोमसंस्थेन' इत्यादिवचनव्यक्तिः । 'तं द्विरात्रेण' इत्यादीनि तु तस्यैव यागस्य कालविधिपराणि । 'अग्निं यजन्तीति यत्तद्विरात्रेण द्वाभ्यां रात्रिभ्याम्' इत्यादिवचनव्यक्तिः । एतेषु सर्वेषु वाक्येषु 'अग्निं यजन्ति' इत्यनुवादेऽग्निशब्दस्य सामानाधिकरण्यादुत्पत्तावग्निशब्दस्य यागनामत्वाध्यवसायः । 'अग्निम्' इति द्वितीया तु 'अग्निहोत्रम्' इत्यादिवदुपपाद्या । आहवनीयाद्यग्निसाध्यत्वादग्निशब्दश्च तत्प्रख्यन्यायेन नामधेयत्वम् । अनुशब्दश्च 'एष वा व प्रथमो यज्ञो यज्ञानां य एतेनानिष्ट्वाथान्येन यजेत' इत्यादिवाक्यावगताग्निष्टोमानन्तर्यस्यानुवादकः । तस्मादग्न्याख्ययागविधिः ॥

इति प्राप्ते, सिद्धान्तयति—

द्रव्यं वा स्याच्चोदनायास्तदर्थत्वात् ॥ २२ ॥

वाशब्द एवार्थे। 'अग्निं चिनुते' इत्यत्र अग्निशब्दस्य द्रव्यं ज्वलनात्मकमेवाभिधेयं स्यान्न तु यागः, अग्निशब्दस्य ज्वलनेऽत्यन्तरूढस्य यागवचनताया अयुक्तत्वात्। अत उद्भिदादिवद्यौगिकत्वाभावाच्चित्राग्निहोत्रश्येनादिवद्वाक्यभेदतत्प्रख्यतद्व्यपदेशत्वाभावाच्च न यागनामधेयत्वमग्निशब्दस्य युक्तमाश्रयितुम्। नन्वाहवनीयादिप्राप्त्या तत्प्रख्यन्यायेनाग्निशब्दस्य यागनामत्वमुक्तमिति तत्राह— चोदनायास्तदर्थत्वादिति। 'अग्निं चिनुते' इत्यादिवाक्यस्य ज्वलनरूपद्रव्यार्थत्वात्॥ न हि 'अग्निं चिनुते' इति वाक्ये अग्निविधिरिष्यते, येनाहवनीयादिप्रापकशास्त्रादेव विधित्सितगुणप्राप्त्या नामत्वं स्यात्। किंतु प्रसिद्धाग्निशब्दवाच्यज्वलनानुवादेन तस्य चयनसंस्कारो विधीयते। 'चयनेन स्थण्डिलं निष्पाद्य तत्राग्निस्थापनमुखेन क्रतुमुपकुर्यात्' इति। अतो नात्र तत्प्रख्यन्यायावतारः। तथा च यागविधेरभावात् 'अग्निष्टोमेनानुयजन्ति' इत्यादिवाक्यानि न संस्थादिविधिपराणि, किंतु तस्यैव चयनसंस्कारस्य तथाविधक्रतुसंबन्धविधिपराणि। न च तेषु वाक्येषु केवलाग्निशब्दश्रवणात्कथं ततः संस्कारस्य क्रतुसंबन्धविधिरिति वाच्यम्। एषु हि वाक्येष्वग्निशब्दः प्रकरणाच्चयनसंस्कृते ज्वलने वर्तते। 'अनुर्लक्षणे' इत्यनोः कर्मप्रवचनीयत्वाद्द्वितीया। लक्षणत्वं च तत्र हेतुत्वम्। 'परापि हेतौतृतीया बाध्यते' इति वैयाकरणाः। तथा च 'स्थण्डिलनिष्पत्तिप्रणाडिकया चयनसंस्कृतेनाग्निनाग्निष्टोमादीन्कुर्यात्' इति फलितमिति चयनसंस्कारस्य क्रतुसंबन्धलाभः। एवं चाग्निष्टोमादिवाक्येष्वग्निशब्दस्य यजिसामानाधिकरण्यमप्युक्तं निरस्तम्, अग्निशब्दस्य वैयधिकरण्येनैवान्वयस्योपपादितत्वात्। तस्माज्ज्योतिष्टोमादिषु गुणविधिः॥

लिङ्गदर्शनं विघटयति—

[1]तत्संयोगात्क्रतुस्तदाख्यः स्यात्तेन धर्मविधानानि ॥ २३ ॥

'अग्नेः स्तोत्रम्' इत्यादिवाक्येषु क्रतुः यागः तदाख्यः अग्निशब्दप्रतिपाद्यः स्यात्। कुतः। तत्संयोगात् तेन मुख्यविधया अग्निशब्दार्थेन ज्वलनेन चयनसंस्कृतेन संयोगात्। प्रणाडिकया तत्राग्निशब्दः क्रतुलक्षक इति यावत्। तेन कारणेन तस्य अग्निसंयुक्तक्रतोरेव तानि वाक्यानि षष्ठ्युपसत्कत्वादिधर्मविधायकानि संपद्यन्ते, तत्रागत्या अग्निशब्दः क्रतुलक्षकः। इह तूक्तरीत्या सत्यां गतौ ज्वलनवचनत्वमेव युक्तम्। 'अग्निं प्रोक्षति' 'अग्निमधिरोहति' इत्यादौ त्वग्निशब्दो ज्वलनाधारे लाक्षणिकः। 'ब्रह्मवादिनो वदन्ति, यन्मृदा चाद्भिश्चाग्निश्चीयतेऽथ कस्मादग्निरुच्यत इति, यच्छन्दोभिश्चिनोति, अग्नयो वै छन्दांसि, तस्मादग्निरुच्यते' इत्यादिवाक्यशेषास्तु तत्र तात्पर्यग्राहका इत्यन्यदेतत् इति। वृत्तमधिकरणम्॥

---

1. क्रतुसंयोगात्.

वृत्तो गुणविचारः। इदानीं प्रकरणान्तरं प्रस्तूयते। कुण्डपायिनामयनं प्रकृत्य ताण्डकब्राह्मणे श्रूयते 'ते मासं दीक्षिता भवन्ति, ते मासि सोमं क्रीणन्ति, तेषां द्वादशोपसदः, उपसद्भिश्चरित्वा सोममुपनह्य मासमग्निहोत्रं जुह्वति, मासं दर्शपूर्णमासाभ्यां यजन्ते, मासं वैश्वदेवेन, मासं वरुणप्रघासैः, मासं साकमेधैः, मासं शुनासीरीयेण' इत्यादि। तत्र 'मासमग्निहोत्रं जुह्वति' इत्यादिषु वाक्येषु संशयः किं नित्याग्निहोत्रादिषु मासगुणविधिः, उत कर्मान्तरविधिरिति। तत्राग्निहोत्रादिकर्मणः 'अग्निहोत्रं जुहोति' इत्यादिवाक्यप्राप्तत्वेनाविधेयत्वात्तदनुवादेन मासविधिः। न च नैयमिकाग्निहोत्रादिकर्मणोऽसंनिहितत्वेनानुपस्थितत्वात्कथं तत्र मासगुणविधिरिति वाच्यम्। असंनिहितस्यापि नाम्नोपस्थितिसंभवात्। न च मासस्य पुरुषकृत्या संपादयितुमशक्यत्वेनानुपादेयस्य कथं विधिरिति वाच्यम्। न ह्यत्र कर्मोद्देशेन मासो विधीयते, किंतु 'यो मासस्तत्राग्निहोत्रादि कुर्यात्' इत्येव मासोद्देशेन कर्मविधिः। तस्य च विधेरप्राप्तपक्षपातितया कर्मोद्देशेन मासविधौ पर्यवसानम्। एवं च मासस्यैव विधेयत्वात्कर्मणो विधानाभावान्न कर्मभेदः। विहितस्य विधानमेव हि कर्मभेदप्रयोजकमित्युक्तं शब्दान्तराधिकरणे; न तु यथाकथंचित्पुनरुपादानमात्रम्। तस्माद्नित्याग्निहोत्राद्यनुवादेन मासगुणविधिरिति प्राप्ते, सिद्धान्तयति—

मासान्निहोत्रादिकर्मणां कर्मान्तरत्वम्

प्रकरणान्तरे प्रयोजनान्यत्वम् ॥ २४ ॥

नित्यस्याग्निहोत्रादिकर्मणः प्रकरणादन्यत्कुण्डपायिनामयनस्य प्रकरणं प्रकरणान्तरम्। तत्र पठ्यमाने मासाग्निहोत्रादिवाक्ये प्रयोजनान्यत्वम्। प्रयुज्यते अनुष्ठीयत इति प्रयोजनं कर्म। तस्य अन्यत्वम्, अप्रकृताभिधानात्कर्मान्तरत्वमित्यर्थः। असंनिहितत्वादग्निहोत्रादिशब्दैर्नैयमिकाग्निहोत्रादिकर्मण उपस्थित्यभावेन तदनुवादेन मासगुणविध्यसंभवात् मासविशिष्टमग्निहोत्रादिसंज्ञकं कर्मान्तरमेव मासाग्निहोत्रादिवाक्येषु विधेयमित्युक्तं भवति। न चासंनिहितस्याप्यग्निहोत्रादिकर्मणो नाम्नोपस्थितिसंभवात्तदनुवादेन मासगुणविधिसंभव इति वाच्यम्। एवं सति प्राप्तकर्मण्यनेकगुणविधौ वाक्यभेदप्रसङ्गात्। यदि हि केवलो मासगुणः श्रूयेत तदा भवेत्तस्य विधिः। 'उपसद्भिश्चरित्वा मासमग्निहोत्रं जुह्वति' इत्यादि श्रूयते। न चाग्निहोत्रादिकर्मण्युपसदः संभवन्ति। अत उपसदस्तदानन्तर्यं मासश्चेति त्रयं विधेयमिति भवेद्वाक्यभेदः। तथा च नाम्नोपस्थितमपि नित्याग्निहोत्रादिकर्म परित्यज्य कर्मान्तरमेवैषु वाक्येषु विधेयम्। न च 'उपसद्भिश्चरित्वा—' इत्यस्य [1]'तेषां द्वादशोपसदः, सोममुपनह्य मासमग्निहोत्रं जुह्वति' इति पाठप्राप्तोपसदानन्तर्यानुवादकतयोपपत्तेर्वाक्यभेदाप्रसङ्गादस्तु प्रसिद्धाग्निहोत्रकर्मणि गुणविधिरिति वाच्यम्। पाठो ह्याकाङ्क्षितमेव क्रमं प्रापयितुमीष्टे न

1. तेषां द्वादशोपसदः समुपनह्य सोमं मासमग्निहोत्रं जुह्वति— क, ख, ग, घ, ङ.

त्वनाकाङ्क्षितमपि। एकप्रयोगवचनपरिगृहीताङ्गानामेव हि क्रमाकाङ्क्षा भवति, तेषामित्थंभावाकाङ्क्षया युगपदुपनिपातात्। न च प्रसिद्धाग्निहोत्रादिकर्मणः कुण्डपायिनामयनस्य चाङ्गाङ्गिभावोऽस्ति, येन तेषाम् 'कुण्डपायिनामयनमुपयन्ति' इत्येकप्रयोगवचनपरिगृहीतत्वात्क्रम आकाङ्क्ष्येत। 'दीक्षितो न ददाति न जुहोति न पचति' इति सोमक्रतुमध्ये पुरुषार्थहोमप्रतिषेधेन प्रसिद्धाग्निहोत्रादिकर्मणस्तत्रैवोपनिपाताभावाच्च। एवं च काम्येष्टीनामिवात्र पाठस्य क्रमप्रापकत्वासंभवेन 'उपसद्भिश्चरित्वा—' इत्यस्य पाठप्राप्तक्रमानुवादकत्वानुपपत्त्योपसदस्तदानन्तर्यं मासश्चेति त्रयमपि विधेयमिति स्वीकार्यमिति भवेदेव वाक्यभेदः। एतेन 'दीक्षितो न जुहोति' इति प्रतिषिद्धस्य प्रसिद्धाग्निहोत्रादिकर्मणः प्रतिप्रसवरूपेण वा सत्रैकदेशत्वेन वा विधिरिति प्रत्युक्तम्, उक्तरीत्या प्राप्तकर्मण्यनेकगुणविधानासंभवेन प्रतिप्रसवार्थागात् सत्रसंबन्धस्योपसदादीनां च प्रसिद्धकर्मणि विधौ वाक्यभेदापत्त्या सत्रैकदेशत्वेन विध्यनुपपत्तेश्च। तस्मादत्र कर्मान्तरविधानमिति भाष्यानुसारी पन्थाः। तमिमं प्रकारं भङ्क्त्वा प्रकारान्तरमुत्प्रेक्षितं वार्तिके। तद्यथा—अप्रकृताभिधानात्मकं प्रकरणान्तरं न पृथक्शब्दान्तरादिवत्कर्मभेदकोपाधिः, प्रसिद्धाग्निहोत्रादिकर्मण्यसंभवत उपसदादिगुणादेव कर्मभेदसिद्धेः। ननु, अत्राप्रकृताभिधानापरपर्यायात्प्रकरणान्तरादेव कर्मभेदो न तु गुणात्; अप्रकृताभिधानं हि प्रागनवगताग्निहोत्रादिकर्माभिधानम्; तच्च प्रसिद्धाग्निहोत्रादिकर्मण्यसंभवत उपसदादिगुणादध्यवसीयते; तथा च कर्मभेदावगमकप्रकरणान्तरस्यात्मलाभं उपक्षीणत्वाद्गुणस्य नात्र कर्मभेदकत्वम् इति चेन्न। एवं सति 'वाजिभ्यो वाजिनम्' इत्यत्राप्यप्रकृताभिधानादेव कर्मभेदापत्तौ गुणस्य कर्मभेदकत्वानुपपत्तिप्रसङ्गात्, पूर्वकर्मासंयोगिनो वाजिनगुणस्याप्रकृताभिधानस्वरूपलाभ एवोपक्षीणत्वात्। किं बहुना, शब्दान्तराभ्याससंज्ञानामपि विधेरप्रकृतविषयत्वबोधन एवोपयोगः। अप्रकृताभिधानाच्च कर्मभेद इति वक्तुं शक्यतया सर्वत्र प्रकरणान्तरमेव भेदकं स्यात्। शब्दान्तरादीनां शेषाणां प्रकरणान्तरेण शेषिणा अविनाभावात्। न हि शब्दान्तरादीनां परस्परपरिहारेणेव प्रकरणान्तरपरिहारेण क्वचिद्वर्तनं संभवति। तथा च तैः सह प्रकरणान्तरस्य कथं पृथक्परिगणनं स्यात्। न हि प्रधानस्योपसर्जनभूतैः सह परिगणनमुचितम्। किंच 'उपसद्भिश्चरित्वा—' इत्यस्य संनिहिताग्निहोत्रवाक्यान्वयेन शान्ताकाङ्क्षत्वात् निराकाङ्क्षत्वाच्च दर्शपूर्णमासादिवाक्यानां न तेषु तस्यान्वयः। एवं च दर्शपूर्णमासादिवाक्येपूपसदां तदानन्तर्यस्य चाविधानान्मासमात्रस्यैव गुणस्य विधानाद्वाक्यभेदाभावेन नाम्नोपस्थितस्य प्रसिद्धदर्शपूर्णमासादिकर्मणः परित्यागाभिधानं प्रकरणान्तरं तत्र नास्तीति कर्मभेदो न स्यात्। तस्मादत्र वाक्यभेदप्रयुक्तमप्रकृताभिधानं न कर्मभेदप्रयोजकम्। किंतु शब्दान्तरादिवदप्रकृताभिधानापादकं किंचिन्निरूपणीयम्। तत्तु प्रकरणविच्छेदापरपर्यायं पूर्वकर्मासंनिधानमेव। तथाहि। विच्छिन्नप्रकरणं कर्म द्वेधा उपादेययुक्तमनुपादेययुक्तं च। तत्र 'यदाहवनीये जुहूति' इत्यादावुपादेयस्थले आहवनीयादिगुणस्य होमे प्रसक्ते संपादयितुं शक्यत्वेनोपादेयतया

होमोद्देशेन विधानसंभवेन विशिष्टविधिगौरवभीत्या कर्मण उद्देश्यत्वावश्यंभावे दूरस्थस्यापि होमस्य सिद्धवन्निर्देशबलेनाभिध्यानादिना कथंचिद्बुद्धौ विपरिवृत्तिं संपाद्य 'यो होमः स आहवनीये' इत्येवं गुणविधिसंभवः। अनुपादेयगुणस्तु पञ्चधा 'देशः कालो निमित्तं च फलं संस्कार्यमेव च। इति मीमांसकाः प्राहुरनुपादेयपञ्चकम्' इति। तदिह मासस्याग्निहोत्रादिकर्मणि प्रसक्ते संपादयितुमशक्यतया दध्यादिवदानयनादिक्रियाविशिष्टत्वेनाननुष्ठेयतया चानुपादेयस्याग्निहोत्रादिकर्मोद्देशेन पर्यवसानगत्यापि विधानासंभवेन 'यो मासस्तत्राग्निहोत्रादि कुर्यात्' इत्येवं मासानुवादेनाग्निहोत्रादिकर्मण एव भावार्थाधिकरणन्यायेन विधेयतया विहितस्य विधानान्यथानुपपत्तेः प्राप्तवन्निर्देशाभावेन परप्रकरणपाठेन च पूर्वकर्मप्रत्यभिज्ञाविरहाच्च सिध्यति कर्मभेदः। 'पौर्णमास्यां यजेत' 'सायं जुहोति' 'प्रातर्जुहोति' इत्यादौ कालोद्देशेन कर्मविधावपि न कर्मान्तरत्वमिति 'संनिधौ त्वविभागात्' इत्यधिकरणेऽनुपदमेव वक्ष्यामः। तत्र, मासस्यानुपादेयत्वेऽपि तत्र कर्मणोऽनुष्ठेयतामात्रेण कथंचिद्विधिसंस्पर्शात् परोद्देशप्रवृत्तकृतिव्याप्यत्वलक्षणपारार्थ्यात्मकशेषत्वरूपमङ्गत्वमुपपाद्यम्। ननु, मासाग्निहोत्रादिवाक्येषु प्रसिद्धाग्निहोत्रादिकर्मणः संनिधिकृतप्रत्यभिज्ञाविरहेऽपि नामधेयकृता तत्प्रत्यभिज्ञास्ति; न च नाम्ना तद्विपरिवृत्तावपि तत्रानुपादेयस्य सिद्ध्यसंभवाद्विपरिवृत्तिरप्रयोजिकेति वाच्यम्; प्रसिद्धाग्निहोत्रादिकर्मणि मासविध्यसंभवेऽपि तस्यैव कर्मणो नाम्ना विपरिवर्तमानस्य कुण्डपायिनामयनैकदेशत्वेन विधिसंभवादिति चेन्न। प्रसिद्धाग्निहोत्रादिकर्मणः कुण्डपायिनामयनैकदेशत्वेन विधानेऽप्यग्निहोत्रादिशब्दस्य धात्वर्थमात्रनामधेयतया तेन भावनाया उपस्थित्यभावेन तद्भेदस्यापरिहार्यत्वात्। किंच 'मासं जुहुति' इत्याख्यातवर्तिना धातुना स्वरसतो लिङ्गसंख्यान्वयानर्हसाध्यत्वरूपेण कर्मान्तरमभिधीयत इत्यग्निहोत्रादिनाम्नापि साध्यरूपेणैव तदभिधेयम्, नाम्न आख्यातपरतन्त्रत्वात्। अतः कथं मासाग्निहोत्रादिवाक्ये अग्निहोत्रादिनाम्ना प्रसिद्धस्य कर्मण उपस्थितिः। अस्तु वात्र नाम्ना सिद्धरूपेणोपस्थितिः; तथाप्याख्यातेन साध्यत्वेन प्रतीतस्य प्रसिद्धहोमस्य कथं तेनोपस्थितिः। न च नाम्ना तद्रूपोपस्थित्यभावेऽपि नैयमिकाग्निहोत्रादिशब्दो यद्रूपवाचकस्तद्रूपविपरिवृत्तिरस्त्विति वाच्यम्। विध्यर्थं हि प्रसिद्धाग्निहोत्रादिकर्मणो विपरिवृत्तिरिहोच्यते। विधिश्च सिद्धरूपस्य नाम्नोपस्थाप्यस्य न संभवति, भावार्थाधिकरणे धात्वर्थविधिविषयाकारसमर्पणं धातुनैव न तु नाम्नेति प्रतिपादनात्। ततश्च सिद्धरूपस्य नाम्ना विपरिवृत्तिरिहानुपयुक्तैवेति न प्रसिद्धाग्निहोत्रादिकर्मणः कुण्डपायिनामयनैकदेशत्वेन विधिसंभवः। एवं च विध्यनर्हानुपादेयगुणश्रवणेन कर्मणो विधेयतया सिद्धवन्निर्देशाभावेन तद्विपरिवृत्त्यभावात्मके पूर्वकर्मासंनिधानापरपर्याये प्रकरणान्तरे सति मासाग्निहोत्रादिविधेरप्रकृतविषयतया प्रयोजनान्यत्वं कर्मभेदः सिध्यतीति सूत्रयोजना। न चैवमप्यनुपादेयगुणनिबन्धनत्वात्कर्मभेदस्य गुणात्कर्मभेद एव पर्यवस्यतीति वाच्यम्। विधीयमानो हि गुणः पूर्वकर्मण्यसंभवन्कर्म भिनत्ति। न चात्र मासगुणो विधानमर्हति, अनुपादेयत्वात्। एवम् 'सरस्वत्या दक्षिणे तीरे आग्नेयोऽष्टाकपा-

लः पुरोडाशः' इत्यादिदेशसंयुक्ते 'सत्रायागूर्य विश्वजिता यजेत' इत्यादिनिमित्तसंयुक्ते च वाक्ये द्रष्टव्यम्। प्रयोजनं—पूर्वपक्षे प्रसिद्धाग्निहोत्रादिषु यावज्जीवादिकालैर्मासस्य विकल्पः, कुण्डपायिनामयनेऽग्निहोत्राद्यननुष्ठानं च; सिद्धान्ते तु तदुभयाभाव इत्याद्यूह्यम्। विस्तरस्तूत्तरावचो वार्तिकादावनुसंधेयः इति। प्रकरणान्तराधिकरणम्॥

तदेवं देशकालनिमित्तफलसंस्कार्येष्वनुपादेयेषु देशकालनिमित्तानां कर्मभेदकत्वं प्रतिपादितम्। इदानीं फलसंस्कार्ययोः कर्मभेदकत्वं प्रतिपादयितुमिदमारभ्यते। अनारभ्य किंचिच्छ्रूयते

१२. आग्नेयादिकाम्ये- 'आग्नेयमष्टाकपालं निर्वपेद्रुक्कामः' 'अग्नीषोमीयमेकादशकपालं निर्वपेद्ब्रष्टथधिकरणम्। ह्मवर्चसकामः' 'ऐन्द्राग्नमेकादशकपालं निर्वपेत्प्रजाकामः' इति। रुक् तेजः। तत्कामो रुक्कामः। तथा अश्वमेधे श्रूयते 'त्रैधातवीया दीक्षणीया' इति। दीक्षणीयाकार्ययजमानसंस्कारकारिणीत्यर्थः। तत्र संशयः, किं प्रकृतेष्वाग्नेयादिषु रुगादिफलं कामयितव्यमिति विधीयते काम्यत्रैधातवीयया संस्कार्योऽश्वमेधयजमान इति च, उत फले संस्कार्ये च कर्मान्तरविधिरिति। तत्र कालदेशनिमित्तानां सिद्धानामेव ग्रहणादनुपादेयत्वं युक्तम्; फलसंस्कार्ययोस्तु पुरुषप्रयत्नसंपाद्यतयोपादेयत्वमेव, कामनामुखेन फलस्यापि पुरुषप्रवृत्तिविषयत्वसंभवात्। शक्यते च दर्शपूर्णमासस्थेनापि रुगादिफलं कामयितुम्, काम्यत्रैधातवीयाप्रयोगेणाप्यश्वमेधयजमानः संस्कर्तुम्। अतः फलसंस्कार्ययोरुपादेयत्वादिह न कर्मान्तरत्वमिति प्राप्ते, सिद्धान्तयति—

फलं [2]चाकर्मसंनिधौ॥ २५॥

चशब्दः संस्कार्यं समुच्चिनोति। प्रकृताग्नेयादिकर्मणः काम्यत्रैधातवीयाकर्मणश्च प्रकरणादन्यत्र श्रूयमाणं फलं संस्कार्यं चानुपादेयत्वात्कर्मभेदकमेव॥ अयमाशयः। कामनामुखेन फलस्य प्रवृत्तिविषयत्वस्वीकारे विधिबलात्कामना संपाद्या स्यात्। न च विधितः कामना संपाद्यते, किंतु [1]स्वरससिद्धैव सा। ततश्च स्वारसिककामनामुखेन फलस्य विध्यधीनप्रवृत्तिविषयत्वासंभवेनोपादेयत्वासंभवादुद्देश्यत्वमेवेति तदुद्देशेन कर्मैव विधेयम्। न चोद्देश्यत्वेऽपि फलस्य कालदेशयोरिवाग्निमाधिकरणे वक्ष्यमाणरीत्या विधेयत्वं किं न स्यादिति वाच्यम्। देशकालयोः सिद्धवत्कारूपोद्देश्यत्ववतोः कर्मणोऽनुष्ठेयतया तयोरपि तद्विशिष्टत्वेषेण विध्यधीनप्रवृत्तिविषयतया विधेयत्वोपपत्तावपि फलस्य स्वारसिकप्रवृत्तिविषयत्वलक्षणप्रयोजनत्वरूपेणोद्देश्यस्य विधेयत्वे विधीयमानप्रवृत्तिविषयत्वापत्त्या स्वारसिकप्रवृत्तिविषयत्वरूपप्रयोजनत्वव्याघातात्। एवं संस्कार्यस्यापि विध्यन्तरसिद्धस्य फलवदुद्देश्यतया तद्वदेव प्रधानत्वात्तद्व्याघातप्रसङ्गान्न विधेयत्वम्। एतेन निमित्तस्यापि विधेयत्वं

1. स्वतः सिद्धैव सा—क; स्वरसतः सिद्धैव सा—ङ. 2. च कर्मसंनिधौ.

व्याख्यातम्, तस्य विधेयत्वेऽङ्गत्वापत्त्या निमित्तत्वव्याघातात्। यत्स्वयमनङ्गभूतमेव कर्मप्रवृत्तिं लक्षयति तदेव हि कर्मणो निमित्तमित्युच्यते। तस्मादत्रापि कर्मभेद इत्यास्तां तावत्। प्रयोजनं—पूर्वपक्षे रुगादिफलार्थं न पृथक्प्रयोगः, किंतु गुणफलवद्दर्शपूर्णमासप्रयोगेणैव तत्सिद्धिः; सिद्धान्ते तु कर्मान्तरत्वात्पृथक्प्रयोगः इति। वृत्तमधिकरणम्॥

अथ देशकालनिमित्तफलसंस्कार्याणां संनिधौ प्रत्युदाहरणानि प्रदर्शयितुमारभ्यते। दर्शपूर्णमासयोर्देशकालनिमित्तफलपराणि श्रूयन्ते 'समे दर्शपूर्णमासाभ्यां यजेत' 'पौर्णमास्यां पौर्णमास्या यजेत' 'यावज्जीवं दर्शपूर्णमासाभ्यां यजेत' 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इति, तथा 'स्विष्टकृतं यजति' इति विहितस्विष्टकृद्यागस्य संस्कार्यपरम् 'शेषात्स्विष्टकृते समवद्यति' इति। तत्र संशयः किं देशाद्यनुपादेयसंबन्धात्कर्मभेदः, उत प्रकृतमेव कर्म देशादिषु विधीयत इति। अनुपादेयसंबन्धवशात्पूर्ववत्कर्मान्तरत्वं देशादेरुद्देश्यत्वेन कर्मणो विधेयत्वावश्यंभावात्। न हि कर्मणो देशादेश्चेत्युभयोरप्युद्देश्यत्वसंभवः। अतः कर्मणोऽवश्यं विधेयत्वाद्विहितस्य च विधानायोगाद्भवति कर्मभेदः। एवं च कर्मभेदेऽनुपादेयसंबन्ध एव प्रयोजको न त्वसंनिधानमपीति प्राप्ते, सिद्धान्तयति—

१३. अवेष्टेरग्न्याद्यफलकत्वाधिकरणम्।

संनिधौ त्वविभागात्फलार्थे न पुनःश्रुतिः॥ २६॥

तुशब्दः पूर्वपक्षव्यावृत्तौ। संनिधौ दर्शपूर्णमासादिकर्मसंनिधौ पठ्यमानेषु समादिवाक्येषु न कर्मान्यत्वम्। कुतः। अविभागात् प्रकृतकर्मात्मकतया प्रत्यभिज्ञानात्। कर्मसंनिधौ सति तस्मिन्नेव कर्मणि बुद्धौ विपरिवर्तमाने धातोरसंनिधिस्थल इव स्वरसतः कर्मान्तरप्रतिपादकत्वाभावे सति, प्रकृतकर्मात्मकतयैव प्रत्यभिज्ञाबलान्न कर्मभेद इत्युक्तं भवति। न चानुपादेयस्य देशकालादेर्विध्यनर्हत्वे कर्मण एव विधानावश्यंभावेन विहितस्य विधानानुपपत्त्या विधिसमभिव्याहारेण धातोः कर्मान्तरपरत्वमेव स्वरसतो वाच्यमिति कथं प्रकृतकर्मणः प्रत्यभिज्ञानमिति वाच्यम्। समादिवाक्येषु हि देशादेरनुपादेयस्य विध्यनर्हतयोद्देश्यत्वात्कर्मण उपादेयत्वमेव लभ्यते एकस्योद्देश्यत्वेऽन्यस्योपादेयत्वनियमात्, न तु विधेयत्वमपि। न चोपादेयस्य विधेयत्वनियमोऽस्ति। प्राधान्येन निर्देश्यत्वं ह्युद्देश्यत्वम्, पारतन्त्र्येण निर्देश्यत्वं चोपादेयत्वम्। अप्राप्तबोधनं विधिः, प्राप्तबोधनमनुवादः। एवं चोपादेयमपि देशादौ कर्म प्राप्तमेव संनिधिवशात्तादूप्येण प्रत्यभिज्ञायत इत्यनुवाद्यम्। अतः कर्मणः पुनर्विधानाभावान्न कर्मभेदः। न च कर्मणोऽनुवाद्यत्वादेशादीनां चोद्देश्यत्वात्कस्यापि विधियोग्यस्याभावात्समादिवाक्यमनर्थकमेव स्यादिति वाच्यम्। देशादेः कर्मसंबन्धविधानार्थत्वात्। देशादेर्हि न फलवत्त्वारसिकप्रवृत्तिविषयत्वलक्षणप्रयोजनत्वरूपेण प्राधान्येनोद्देश्यत्वम्, किंतु निर्देशगतस्वातन्त्र्य-

मात्रेण । ततश्च दध्यादेरानयनादिक्रियाविशिष्टतया[1] यथानुष्ठेयत्वं तथा देशादेर्नानुष्ठेयत्वमिति तावन्मात्रेण तस्य [2]स्वतन्त्रनिर्देशे सत्यपि फलवत्स्वारसिकप्रवृत्तिविषयत्वरूपप्रयोजनत्वात्मकोद्देश्यत्वस्य विधेयत्वविरोधिनोऽभावेन संबन्धमुखेन विधिसंभवान्न समादिवाक्यवैयर्थ्यम् । नन्वेवमपि देशकालयोरेव विधेयत्वं लभ्यते, निमित्तफलसंस्कार्याणां तु निमित्तत्वादिव्याघातप्रसङ्गेन विधेयत्वाभावस्य पूर्वस्मिन्नधिकरणे प्रतिपादिततया निमित्तादिवाक्येषु कर्मण एव विधानस्य वाच्यतया कर्मभेदः स्यादित्यत आह— फलार्थे न पुनःश्रुतिरिति । फलग्रहणमुपलक्षणम् । फलनिमित्तसंस्कार्यवाक्येषु यदाग्नेयादिवाक्योत्पन्नानां कर्मणाम् 'स्विष्टकृतं यजति' इत्युत्पन्नस्य च फलादिसंबन्धप्रतिपादनार्थं पुनःश्रवणं तन्न कर्मभेदं प्रयोजयितुं क्षमते, उत्पत्तिविधिभेदस्यैव कर्मभेदप्रयोजकत्वात् । अप्रवृत्तकर्मस्वरूपप्रवर्तनं श्रुत्पत्तिः । न चैकस्य कर्मणोऽनेकवाक्यतोऽप्रवृत्तप्रवर्तनं संभवतीत्युत्पत्तिविधिभेदः शक्नोति कर्म भेत्तुम् । निमित्तादिवाक्यं तु उत्पत्तिवाक्यतः कर्तव्यत्वमात्रेणावगतानां कस्मिन्निमित्ते [3]कस्मिन्फले किं संस्कार्यमिति विधिविशेषापेक्षाणां कर्मणां निमित्तसंयोगादिप्रतिपादनाय पुनर्विधानपरत्वादुत्पन्नविधिरिति न कर्मभेदः । एतेन देशकालवाक्ययोः कर्मविधिस्वीकारेऽप्युत्पन्नकर्मणः प्रयोगविधानार्थत्वान्नात्रापि कर्मभेदप्रसक्तिरित्यप्युक्तं भवति । यथा चैतत्तथैकादशस्य द्वितीयाधे स्फुटीभविष्यति । इयांस्तु विशेषः— निमित्तादिवाक्येषु कर्मणो विधेयत्वमेव; देशकालवाक्ययोस्तु कर्मस्वरूपोत्पत्तिविषयेऽनुवाद्यत्वम्, प्रयोगविषये विधेयत्वम्; विषयभेदाच्च न तयोर्विरोध इति । [4]न चैवं सति मासाग्निहोत्रादिवाक्यमपि प्रयोगविधिः न तु उत्पत्तिविधिरिति तत्रापि कर्मभेदो न स्यादिति वाच्यम्। तस्य प्रयोगविधित्वेऽप्युत्पत्तिविधित्वस्यापि सत्त्वात् प्रयोगस्योत्पत्त्यपेक्षत्वेन संनिहितोत्पत्त्यभावे प्रयोगविधेरेव उत्पत्तावपि व्यापारात्; यथा आग्नेयादिवाक्यं द्रव्यदेवतासंबन्धं तदपेक्षितं यागं च विधत्ते तद्वत् । समादिवाक्यं तु प्रयोगविधिसंनिहितानेयादिवाक्यैरुत्पत्तेर्लाभान्न तत्र व्याप्रियते; यथा ऐन्द्रवायवादिवाक्यानि 'सोमेन यजेत' इति संनिहितयागलाभान्न यागविधावपि व्याप्रियन्ते तद्वत् । प्रयोजनं पूर्वपक्षे समादिवाक्येषु कर्मान्तरविधौ प्रतिवाक्यमेकं कर्म, सिद्धान्ते तु सर्वत्रैकमेवेति स्पष्टमेवेति । वृत्तमधिकरणम् ॥

तैत्तिरीयके द्वितीयकाण्डे दर्शपूर्णमासब्राह्मणे षष्ठप्रपाठके 'प्रजापतिर्देवेभ्यो यज्ञान्व्यादिशत्' इत्यनुवाके 'अङ्गिरसो वा इत उत्तमाः सुवर्गं लोकमायन' इत्युपक्रम्य 'यदाग्नेयोऽष्टाकपालोऽमावास्यायां च पौर्णमास्यां चाच्युतो भवति' इति कालद्वयसंयुक्तमेकं वाक्यं श्रुतम् । सांनाय्यं पौर्णमास्यां नास्ति । अग्नीषोमीयपुरोडाशोऽमावास्यायां नास्ति । आग्नेयः पुरोडाश उभयस्मादपि

1. क्रियाविषयतया —ख. 2. स्वातन्त्र्यनिर्देशे—ख, ग. 3. कस्मै फलाय—क, ग.
4. न चैवमपि—ख.

कालान्न च्यवत इत्यच्युतः। तथा तत्रैव ब्राह्मणे पञ्चमप्रपाठके 'इन्द्रं वृत्रं जघ्निवांसम्' इत्यनुवाके

१४. आग्नेयद्विरुक्तेः स्तुत्यर्थता-धिकरणम्।

'यदाग्नेयोऽष्टाकपालोऽमावास्यायां भवति' इत्येककालसंयुक्तं वाक्यान्तरं श्रुतम्। तत्र संशयः, किं कालद्वययुक्तविहिताग्नेययागाद्यागान्तरं विधीयते, उत स एव यागोऽनूद्यत इति। तत्र पूर्वपक्षयति—

आग्नेयस्तूक्तहेतुत्वादभ्यासेन प्रतीयेत ॥ २७ ॥

तुशब्दः पूर्वाधिकरणसिद्धान्तोपमर्देन प्रवृत्तिं सूचयति। अनन्यार्था पुनःश्रुतिः कर्मभेदिका, निमित्तादिवाक्येषु च पुनःश्रुतिर्निमित्तसंयोगादिप्रापणार्थेति न कर्मभेदिकेति युक्तम्। इह तु पुनःश्रुतिरनन्यार्था। ततश्च 'एकस्यैव पुनःश्रुतिरविशेषादनर्थकं हि स्यात्' इत्यभ्यासाधिकरणन्यायेन कर्मभेदः सिध्यति। न चैककालयुक्तवाक्यमनुवादः, विनिगमनाविरहात्। ननु, कालद्वययुक्तवाक्यस्य नानुवादकत्वमवकल्पते; एककालसंयुक्तवाक्यविहिताग्नेययागानुवादकत्वं हि तस्य वक्तव्यम्; तच्च न भवति, उत्पत्तिशिष्टामावास्यायुक्तकर्मणः कालद्वयसंयुक्ततयानुवादानुपपत्तेः; न च तस्य पौर्णमासीकालविषये विधित्वमिति वक्तुं शक्यम्, उत्पत्तिशिष्टामावास्याविरोधात्; अत एककालयुक्तवाक्यमेवानुवादः, कालद्वययुक्तवाक्यं तु विधिरित्यस्ति विनिगमकमिति चेत्। कालद्वययुक्तवाक्ये हि नैक एवाग्नेययागः येन एककालयुक्तवाक्योत्पन्नाग्नेययागस्य कालद्वययुक्तवाक्यमनुवादकं न भवेत्। यागद्वयं हि तत्र कालभेदात्प्रतीयते। तत्र चैककालवाक्योत्पन्नामावास्याकालयुक्त आग्नेययागोऽनूद्यते; पौर्णमासीकालयुक्ताग्नेययागान्तरं च विधीयत इति विशेषाभावेनान्यतरवाक्यस्यानुवादत्वनिर्धारणाभावादुभयोरपि विधायकत्वे [1]पुनर्विधानात्कर्मभेदः। ततश्चाग्नेययागस्यामावास्यायाम अभ्यासः आवृत्तिः प्रतीयेत। अमावास्यायां द्विराग्नेयः प्रयुज्यत इति यावत्।

तमिमं पूर्वपक्षं प्रौढिवादेन निराकरोति—

अविभागात्तु [2]कर्मणो द्विरुक्तो न विधीयेत ॥ २८ ॥

तुशब्द उक्तनिरासे। समिदादिवाक्येषु प्रत्यक्षयजिपुनःश्रवणात् भेदकत्वम्। इह तु द्रव्यदेवतासंबन्धाद्यागोऽनुमातव्यः। प्रत्यक्षश्रुतं च द्रव्यदेवतं वाक्यद्वयेऽपि न भिद्यते। कुतः। अविभागात् एकत्वेन प्रत्यभिज्ञानात्। अतो द्विःपठितेन वाक्येनान्यतरेणाग्नेयो यागो विधीयेत। उभयोर्वाक्ययोरमावास्याकालयुक्तकर्मविधायकत्वे विकल्पः। एकं वाक्यमेकं पुरुषं प्रत्यमावास्यायुक्तकर्मणो विधायकम्, अन्यद्वान्यं प्रति तस्यैव विधायकमिति यावत्। अथवा विनिगमनाविरहा-

1. सति पुनः—क. 2. कर्मणा द्विरुक्तेर्न विधीयते.

द्वाक्यद्वयेनाप्येकमेव कर्म युगपद्विधीयत इति व्याख्येयम् । न चान्यतरवाक्यस्यानर्थक्यं शङ्क्यम्, कर्मभेदाश्रयणापेक्षया आनर्थक्याश्रयणस्याभ्यर्हितत्वात् । यद्यपि वेदे [1]मात्रामात्रस्याप्यानर्थक्याभ्युपगमो न युक्तः, तथापि प्रौढिवादोऽयम् ।

परमार्थतः सिद्धान्तमाह—

अन्यार्था वा पुनःश्रुतिः ॥ २९ ॥

वाशब्दोऽर्धाङ्गीकारे । 'अविभागात्कर्मणः' इति कर्मैकत्वमुक्तमङ्गीकुर्मः, 'द्विरुक्तेन तु विधीयेत' इत्यानर्थक्यमुक्तं नाङ्गीकुर्मः । ननु पुनःश्रवणस्य का गतिरित्यत आह— अन्यार्थेति । अमावास्यायां केवलाग्निदेवत्योऽष्टाकपालः प्रशस्तः किमुतेन्द्रसहिताग्निदेवत्य एकादशकपाल इत्यैन्द्राग्नप्रशंसापरमेककालसंयुक्तवाक्ये आग्नेययागस्य पुनःश्रवणम्, 'स एतमैन्द्राग्नमेकादशकपालममावास्यायामपश्यत्' इत्युपक्रमात् । एवं चैन्द्राग्नविध्येकवाक्यतया तत्प्रशंसार्थं केवलामावास्यावाक्यमेवानुवाद इति विशेषग्रहणाद्विधिपुनःश्रवणाभावाच्च नाभ्यासन्यायावतारः । तस्मादमावास्यायामपि सकृदेवाग्नेययागस्य प्रयोग इति सिद्धम् ॥

इति द्वितीयाध्याये तृतीयः पादः ॥



1. मात्राभ्यासस्यापि—ख.

चतुर्थः पादः ॥

निर्मथ्य निगमसिन्धून्विविधन्यायाभिधानमन्थानैः ।
धर्मसुधामुद्धरते भूयो मुनये नमोऽस्तु जैमिनये ॥

तदेवं कर्मभेदे विचारिते तत्प्रसङ्गात्प्रयोगभेदोऽस्मिन्पादे प्राधान्येनाभिधीयते ।

'यावज्जीवमग्निहोत्रं जुहोति' 'यावज्जीवं दर्शपूर्णमासाभ्यां यजेत' इत्यत्र किम् 'अग्निहोत्रं जुहुयात्स्वर्गकामः' 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इति विहितकाम्यप्रयोगस्यैकस्य यावज्जीवकालमभ्यासो विधीयते, उत जीवने निमित्ते अग्निहोत्रस्य दर्शपूर्णमासयोश्च बहूनां प्रयोगाणां स्वर्गकामवाक्यविहितादन्येषां विधिरिति संशये, पूर्वपक्षयति—

१. यावज्जीविकाग्निहोत्रा धिकरणम् ।

यावज्जीविकोऽभ्यासः कर्मधर्मः प्रकरणात् ॥ १ ॥

कर्मशब्दः प्रयोगवाची । स्वर्गकामवाक्यविहितोऽयं काम्यः प्रयोगः । तस्य धर्मः शेषभूतः कालः, यावज्जीविकः यावज्जीववाक्यगम्यो भवति । काम्यप्रयोगाङ्गतया यावज्जीवकालो विधीयते, न तु जीवने निमित्ते प्रयोगान्तरविधिरिति यावत् । कुतः । प्रकरणात् । एवं हि प्रकरणमनुगृहीतं भवति । यद्यपि प्रकृतकर्मण एव जीवने निमित्ते विधानात्पक्षान्तरेऽपि न प्रकरणबाधः, तथापि प्रकरणमत्र नाधिकाररूपं विवक्षितम्, किंत्वितर्थभावाकाङ्क्षालक्षणं विवक्षितम् । तच्च कर्म धर्ममपेक्षमाणं जीवने निमित्ते पुरुषार्थतया प्रयोगान्तरविधौ बाधितं स्यात् । ननु काम्यप्रयोगस्यैकस्य यावज्जीवकाले कर्तुमशक्यत्वात्प्रयोगबहुत्वमापतितमित्यत आह— अभ्यास इति । यावज्जीवकालविधौ हि तत्सामर्थ्यादेकस्यैव काम्यप्रयोगस्याभ्यासः पर्यवस्यति, यथा 'सोमेन यजेत' इत्युत्पन्नस्यैव यागस्य ऐन्द्रवायवादिवाक्येषु ग्रहणसंस्कारविधिपरेषु द्रव्यदेवतासंबन्धभेदादभ्यासस्तद्वत् । तस्माद्यावज्जीवकालकोऽभ्यस्तरूप एक एव काम्यप्रयोग इति फलतीति पूर्वः पक्षः ॥

सिद्धान्तयति—

कर्तुर्वा श्रुतिसंयोगात् ॥ २ ॥

वाशब्द एवार्थे। 'धर्मः' इत्यनुवर्तते। एकस्यैव काम्यप्रयोगस्य यावज्जीवकालमभ्यासो नात्र विधीयते; किंतु जीवने निमित्ते नियमेन भिन्नः प्रयोगः पुरुषधर्मतया विधीयते। कुतः। श्रुतिसंयोगात् एवं सत्येव यावज्जीवपदस्य यजेश्च मुख्यवृत्तिकत्वसंभवात्॥ कर्मधर्मत्वे हि 'यावति विन्दजीवोः' इति सूत्रविहितणमुल्प्रत्ययान्तस्य 'अव्ययकृतो भावे भवन्ति' इति जीवनक्रियावाचिनः काले लक्षणा स्यात्; एकस्या यागक्रियाया यावज्जीवकालसंबन्धानुपपत्त्या यजिनाप्यभ्यासो लक्षणीयः स्यात्। न च यथा 'पौर्णमास्यां पौर्णमास्या यजेत' इति विहितकालैकदेशे सकृदनुष्ठानेनापि शास्त्रार्थसिद्धिः, तथा यावज्जीवकालैकदेशे सकृदनुष्ठानेनापि शास्त्रार्थसिद्धिसंभवान्नाभ्यासलक्षणेति वाच्यम्। अपौर्णमासीव्यावृत्त्यर्था चोदनेति युक्ता तत्र सकृदनुष्ठानेन शास्त्रार्थसिद्धिः। इह तु चोदना अजीवनकालव्यावृत्त्यर्था न भवति, तदा कर्मणोऽनुष्ठानस्याप्रसक्तेः। किंतु समस्तजीवनकालग्रहणार्थैव चोदनेत्यभ्यासलक्षणा दुर्वारा। तत्र 'यावति विन्दजीवोः' इति णमुल्विधायकं सूत्रम्। तत्र 'समानकर्तृकयोः पूर्वकाले' इत्यनुवर्तते 'णमुल्' इति च। यावत्युपपदे समानकर्तृकयोः क्रिययोर्मध्ये पूर्वकालिकक्रियावृत्तेर्विन्दतेर्जीवतेश्च णमुल्स्यादित्यर्थः। जीवतेश्च प्राणधारणमर्थः। प्राण उच्छ्वासः नासाबहिर्निर्गतो वायुविशेषः। तस्य धारणं नासिकया अन्तराकर्षणम्। 'अव्ययकृतो भावे—' इति वचनाण्णमुलन्तस्यापि जीवनक्रिया अर्थः। पौर्वापर्यं समानकर्तृकत्वं च द्योत्यम्। यावच्छब्दो जीवनं सामस्त्येन विशिनष्टि। तच्च जीवनम् 'समानकर्तृकयोः' इति क्रियान्तरसंबन्धे विहितेन णमुल्प्रत्ययेन होमाद्यन्वयितया प्रतीयते। स च संबन्धो यदि जीवनस्य होमादिक्रियायाश्चाङ्गाङ्गिभावादिः स्यात् तर्हि सर्वेष्वपि जीवनेष्ववश्यं होतव्यमित्यर्थस्यासिद्धेर्यावच्छब्दार्थस्य प्राप्त्यभावादनुवादो नावकल्पेत। नापि विधातुं शक्यते, जीवनानामयुगपत्कालकत्वेन तत्सामस्त्यस्य कर्मणि विधानासंभवात्। ततश्च यथा भावलक्षणे विहिता सप्तमी भावं प्रति लक्षणत्वं निमित्तत्वे सति घटते नान्यथेत्यर्थान्निमित्तत्वेऽवतिष्ठते, तथा यावच्छब्दबलादेव संबन्धसामान्यवाची णमुल्प्रत्ययो निमित्तनैमित्तिकभावेऽवतिष्ठत इति जीवनस्य तावन्निमित्तत्वम्। एवं च जीवने निमित्तेऽग्निहोत्रं प्रयोक्तव्यं दर्शपूर्णमासौ प्रयोक्तव्यावित्यर्थः सिद्धः। नैमित्तिकश्चायं प्रयोगः 'धर्मेण पापमपनुदति' इति श्रुतपापक्षयार्थः। 'अकुर्वन्विहितं कर्म निन्दितं च समाचरन्। प्रसजंश्चेन्द्रियार्थेषु नरः पतनमृच्छति' 'विहितस्याननुष्ठानान्निन्दितस्य च सेवनात्। अनिग्रहाच्चेन्द्रियाणां नरः पतनमृच्छति' इति स्मृतिसिद्धस्याकरणप्रयुक्तप्रत्यवायस्य परिहारस्त्वानुषङ्गिकः। नरकेषु पतत्यनेनेति पतनं पापम्। ऋच्छति प्राप्नोति। अत्र विहिताकरणजन्यप्रत्यवायप्रागभावपरिपालनं नित्यकर्मणां फलमिति केचित्। तन्न। प्रत्यवायो हि न कर्ममात्रातिक्रमात्; किंतु विहितकर्मातिक्रमात्, 'अकुर्वन्विहितं कर्म—' इति वचनात्। ततश्च सिद्धे विधौ विहितकर्मातिक्रमात्प्रत्यवायावगमः, अवगतस्य प्रत्यवायस्य परिहाराय च विधिरित्यन्योन्या-

श्रयः। अतः पापक्षय एव फलम्। तच्च पापमिह जन्मनि जन्मान्तरे च संचितम्, 'पूर्वा संध्यां जपंस्तिष्ठेन्नैशमेनो व्यपोहति' 'कषाये कर्मभिः पक्वे' 'धर्मेण पापमपनुदति' इत्यादिश्रुतिस्मृतिभ्यः। न च निमित्तोद्देशेन पापक्षयरूपफलोद्देशेन च कथं कर्मविधिः, वाक्यभेदप्रसङ्गादिति वाच्यम्। न ह्येकमेव वाक्यं निमित्ते फले च कर्म विधत्ते, किंतु यावज्जीववाक्यं निमित्ते कर्म विधत्ते, अन्यच्च श्रुतार्थापत्तिकल्पितं वाक्यं फले विधत्त इत्यदोषः। न चैवमप्युद्देश्यद्वय एकस्य विधिर्विरुध्यत इति वाच्यम्। न हि द्वयोरेकरूपमुद्देश्यत्वमस्ति। निमित्तस्य हि [1]सिद्धवत्काररूपमुद्देश्यत्वम्, पापक्षयस्य तु स्वारसिकप्रवृत्तिविषयत्वात्मकप्रयोजनत्वरूपम्। न ह्येवंविधयोरुद्देश्ययोः फलनिमित्तयोरेकत्र विरोधोऽस्ति। यदि हि निमित्तमपि फलवत्कर्मजन्यं स्यात् तदा द्वयोरप्येकप्रकारसंबन्धाद्विरोधः स्यात्। प्रत्युत निमित्ते कर्म क्रियमाणं किं प्रयोजनमिति सुतरामपेक्षते, निमित्तेऽवश्यकर्तव्यताया नैष्फल्ये सत्यनुपपत्तेः। अतश्च निमित्तबलेनापेक्ष्यमाणं फलं कथं तेन विरुद्धं स्यात्। ननु, निमित्तत्वमुपलक्षणत्वं ज्ञापकत्वं व्याप्यत्वरूपम्; व्याप्तिश्च यदा यदा जीवनं तदा तदा कर्मेत्येवंरूपा, अन्यथा कर्मणि कदाचिज्जीवनसंबन्धस्यावर्जनीयत्वेन तत्प्रतिपादनानर्थक्यात्; तथा च व्याप्त्या निमित्ते कर्मण आवश्यकत्वरूपनियमोऽर्थाद्गम्यते, अनावश्यकत्वे निमित्ते सत्यपि कदाचित्कर्मणोऽकरणे निमित्तत्वव्याघातात्; एवं च तस्य फलार्थत्वे फलेच्छायामसत्यामननुष्ठाने सति निमित्तत्वं व्याहन्येत, इति चेत्। न हि काम्यत्वनैमित्तिकत्वयोः स्वरूपेण विरोधोऽस्ति। फलेच्छायाः कादाचित्कत्वमेव हि तद्विरोधे बीजम्। प्रकृते च न पापक्षयस्य [2]कदाचित्कस्यचिदप्यनिच्छास्ति, दुःखाधायकपापनिवृत्तेः सर्वदाभिलषणीयत्वात्। न च येन पापं नैवार्चर्यते तस्य न तदिच्छेति वक्तुं शक्यम्, इह जन्मन्यनाचरणेऽप्यनादिजन्मान्तरप्रवाहार्जितपापराशिक्षयेच्छाया अवर्जनीयत्वात्। न च ब्रह्मलोकान्तविरक्तस्य मुमुक्षोर्न तदिच्छेति वाच्यम्। मुमुक्षुणापि पापक्षयस्यावश्यमभिलषणीयत्वात्। न ह्येतज्जन्मनि जन्मान्तरेषु चार्जितेषु नरकप्रापकेषु सत्सु मोक्षः [3]संभवतीति भवति पापक्षयः [4]फलम्, [5]विरक्तस्य कर्मानधिकारात्, 'यदहरेव विरजेत्तदहरेव प्रव्रजेत्' इति श्रुतेः 'तावत्कर्माणि कुर्वीत न निर्विद्येत यावता' इत्यादिस्मृतेश्च। तत्र क्रिमिकीटभावाद्याधायकं पापान्तरं प्रत्यवायरूपं नित्यकर्माकरणादुत्पद्यत इति श्रुतिस्मृतिभ्यो गम्यते। तत्र ज्ञानकर्ममार्गपरिभ्रष्टानधिकृत्य 'य एतौ पन्थानौ न विदुस्ते कीटपतङ्गाः' इत्यादिः श्रुतिः 'एतद्यो न विजानाति मार्गद्वितयमात्मनः। दंदशूकः पतङ्गो वा कीटो वा जायते ध्रुवम्। अकुर्वन्विहितं कर्म' इत्यादिस्मृतिश्च। तत्परिहारो नित्यकर्मणामानुषङ्गिकं फलमिति षष्ठस्य तृतीये सर्वशक्त्यधिकरणे

1. सिद्धवत्कारनिर्देशरूपम्—क, घ, ङ. 2. कादाचित्कस्य क्वचिदपि—क, ख, ग, घ. 3. संभवतीति पापक्षयः—क, घ, ङ. 4. फलविरक्तस्य—ख, ग. 5. विरक्तस्येत्यादिः स्मृतेश्चेत्यन्तो ग्रन्थः ङ पुस्तके नास्ति.

टुप्टीकावार्तिकतन्त्ररत्नयोः स्पष्टम्। एवं च जीवने निमित्ते कर्मणः पापक्षयार्थतया विधौ नियमोऽप्यर्थसिद्धः। 'कर्तृधर्मो नियमश्रोद्यते' इति भाष्यादिग्रन्थस्याप्ययमेवाशयः। जीवनं च सायंप्रातः पौर्णमास्यादिकालावच्छिन्नं निमित्तमिति षष्ठस्य द्वितीये 'तेषामौत्पत्तिकत्वात्—' इत्यधिकरणे स्पष्टीभविष्यतीत्यास्तां तावत्।

इतोऽपि कर्तृधर्म इत्याह—

लिङ्गदर्शनाच्च कर्मधर्मे[1] हि प्रक्रमेण नियम्येत
[2]तत्तानर्थकमन्यत्स्यात् ॥ ३ ॥

'अग्नये पथिकृते पुरोडाशमष्टाकपालं निर्वपेद्यो दर्शपूर्णमासयाजी सन्नमावास्यां वा पौर्णमासीं वातिपादयेत्' इति दर्शपूर्णमासयोः स्वकालातिक्रमे प्रायश्चित्तस्य पाथिकृतेष्टेर्विधानादपि लिङ्गान्न कर्मधर्मः। यः दर्शपूर्णमासयाजी। 'करणे यजः' इति भूते णिनिः। ताभ्यामिष्टवान्सन्नमावास्यां पौर्णमासीं वा कर्म अतिपादयेत् स्वकालात्प्रच्यावयेत् सः पाथिकृतीमिष्टिं कुर्यादिति तदर्थः। कथमिदं लिङ्गदर्शनमित्यत आह—कर्मधर्मे हीति। काम्यप्रयोगस्य शेषतया यावज्जीवनकाले विधीयमाने प्रक्रमेण प्रक्रान्तेन यावज्जीवनकालेन काम्यप्रयोगो नियम्येत। 'यम उपरमे'। समाप्येत। एवं च कर्मधर्मपक्षे यावज्जीवमभ्यस्तरूपस्यैकस्य प्रयोगस्य फलार्थतया मध्ये समाप्त्यभावेन जीवनदशायां न कोऽपि दर्शपूर्णमासाभ्यामिष्टवान्भवतीति यावज्जीवनकालोत्तरमेव दर्शपूर्णमासयाजीति वक्तव्यम्। यथा ऐन्द्रवायवादियज्यभ्यासे कृत्स्ने निर्वृत्ते सति सोमयाजीति तद्वत्। तथाविधस्य च दर्शपूर्णमासयाजिनस्तत्र तस्मिञ्जीवने समाप्ते सति अन्यत् स्वकालातिक्रमप्रायश्चित्ततया पाथिकृतेष्टिविधानम् अनर्थकम् असंगतार्थकं स्यात्। यावज्जीवनकालेन समाप्तदर्शपूर्णमासकर्मणो दर्शपूर्णमासयाजिनो दर्शपूर्णमासातिपत्तिर्हि स्वकालातिक्रमात्मा न यावज्जीवनकालमध्ये वक्तुं शक्या, तदा दर्शपूर्णमासकर्मणः समाप्त्यभावात्; नापि जीवनोत्तरकाले, तस्य स्वकालत्वाभावात् तदानीं कर्तुर्यजमानस्याभावेन प्रायश्चित्तविध्यसांगत्याच्च। कर्तृधर्मत्वे च यावज्जीवनकालो न कर्माङ्गम्। पौर्णमास्यादिकालावच्छिन्नजीवनभेदाच्च नैमित्तिकः प्रयोगो भिद्यत इति प्रतिमासं दर्शपूर्णमासप्रयोगस्य समाप्तत्वाज्जीवदशायामेव[3] दर्शपूर्णमासयाजीति व्यपदेशः संभवतीति तं प्रति प्रयोगस्य पौर्णमास्यादिस्वकालातिपत्तावुत्तरकाले प्रायश्चित्तविधानं समञ्जसं भवति॥

इतोऽप्येवमित्याह—

[4]व्यपवर्गं च दर्शयति कालश्चेत्कर्मभेदः स्यात् ॥ ४ ॥

---

1. धर्मो हि. 2. तत्तानुष्ठेयम्. 3. जीवदशायामेव— क, ख, ग, घ. 4. अपवर्गम्.

'दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेत' इति सोमात्प्राग्दर्शपूर्णमासयोः समाप्तिं दर्शयति। यदि हि यावज्जीवनकालः कर्मशेषः स्यात्तर्हि दर्शपूर्णमासप्रयोगमध्य एव सोमः कर्तव्य इति प्रक्रान्तस्य दर्शपूर्णमासकर्मणः भेदः नाशः स्यात्, 'वि वा एतस्य [1]यज्ञश्छिद्यते यस्य यज्ञे प्रततेऽन्यत्तन्त्रं प्रतायतेऽन्तरन्यामिष्टिं निर्वपन्ति' इत्यादिदर्शनात्। न हि दर्शपूर्णमासप्रयोगं समाप्य सोमोऽनुष्ठातुं शक्यते, यावज्जीवनकालेनैव तस्य समाप्यत्वात्तदुत्तरं च यजमानस्याभावात्। कर्तृधर्मत्वे तु प्रतिमासं दर्शपूर्णमासप्रयोगस्य समाप्तत्वान्नायं दोषो भवति॥

इतोऽप्येवमित्याह—

अनित्यत्वात्तु नैवं स्यात्॥ ५॥

तुशब्दश्चार्थेऽन्वाचये। यदि च यावज्जीवनकालः कर्मधर्मः स्यात्तर्हि 'जरामर्यं वा एतत्सत्रं यदग्निहोत्रं दर्शपूर्णमासौ च जरया ह वा एष एताभ्यां निर्मुच्यते मृत्युना च' इत्येवमग्निहोत्रस्य दर्शपूर्णमासयोश्च जरामर्यत्ववचनं जरामरणमोचनार्थत्ववचनं च संगतार्थकं न स्यात्। जरया वयोहान्या मर्यं समाप्यं न तु स्वेच्छयेति जरामर्यम् अवश्यानुष्ठेयम्। 'ह' 'वै' इति निपातावधारणे। एषः अग्निहोत्रस्य दर्शपूर्णमासयोश्च कर्ता जरया मृत्युना चावश्यं मुच्यते इति तदर्थः। कर्मधर्मे हि वचनमिदं विरुध्यते। कुतः। अनित्यत्वात्। काम्यप्रयोगधर्मे हि यावज्जीवनकाले विधीयमाने नित्यप्रयोगस्यालाभात् काम्यप्रयोगस्य चानित्यत्वादवश्यानुष्ठेयत्वरूपजरामर्यत्ववचनविरोधः, काम्यप्रयोगस्यानित्यस्वर्गमात्रार्थत्वेन जरामरणनिवृत्तिफलकत्ववचनविरोधश्च। अनित्यत्वादित्यस्य नित्याभिलषणीयफलरहितत्वादित्यप्यर्थः। सिद्धान्ते तु नैमित्तिकप्रयोगस्य पापक्षयार्थत्वाच्छरीरारम्भकपापाभावाज्जरामरणनिवृत्त्यर्थत्वमुपपद्यते। न च 'सर्वेभ्यः कामेभ्यो दर्शपूर्णमासौ' इत्यादिवाक्याज्जरामरणनिवृत्तिफलकत्वस्यापि सत्त्वेन तदनुवाद उपपद्यत इति वाच्यम्। एवं सति 'ह वै' इति निर्धारणानुपपत्तेः। 'जरामरणनिर्मोचनावधारणवचनं नियमपक्ष उपपद्यते' इति भाष्यस्याप्ययमेवाशयः॥

इतोऽप्येवमित्याह—

विरोधश्चापि पूर्ववत्॥ ६॥

यावज्जीवनकालाभ्यासे कर्मधर्मतया विधीयमाने स विकृतिष्वप्यतिदिश्येत। तथा सति वैमृधं प्रकृत्य 'यदि निर्वपेदन्वेव निर्वपेत्' इति वचनं व्यर्थं सद्विरुध्येत; 'प्रजापतिः पुरुषमसृजत'

1. यज्ञ ऋध्यते—ख, ग.

इत्युपक्रम्य तैत्तिरीयकेऽग्निहोत्रदर्शपूर्णमासपशुबन्धादीनां केषांचिदेव नित्यतया परिगणनं च विरुध्येत। तथा च विरोधोऽयमपि पूर्ववत् जरामरणनिर्मोकवत् कर्तृधर्मो यावज्जीविकः प्रयोगनियम इत्यवगमयति। तस्य च पुरुषार्थस्य नातिदेश इति वक्ष्यतेऽष्टमस्याद्ये 'कर्मणस्त्वप्रवृत्तित्वात्फलनियमकर्तृसमुदायस्यानन्वयस्तद्बन्धनत्वात्' इत्यत्र ॥

नन्वेवमग्निहोत्रस्य दर्शपूर्णमासयोश्च नित्यत्वसिद्धावपि ज्योतिष्टोमादिषु का गतिः, तत्र यावज्जीववाक्याभावादित्यत आह—

[1]कर्तुस्तु धर्मनियमात्कालशास्त्रं [2]निमित्तार्थं स्यात् ॥ ७ ॥

तुशब्दः शङ्कानिवृत्तौ। नेयं शङ्का। कुतः। कर्तुः धर्मनियमात् 'स्वर्गकामो ज्योतिष्टोमेन यजेत' इति विहितकाम्यप्रयोगादन्यस्य प्रयोगस्य ज्योतिष्टोमादौ पुरुषार्थतया नियमेन विधानात्। कुतः। यतः 'वसन्ते वसन्ते ज्योतिषा यजेत' इति कालशास्त्रं वीप्सायुक्तं वसन्तस्य निमित्ततावोधनार्थं भवति। न चेदं वाक्यं काम्यप्रयोगविषयं भवितुमर्हति, 'वसन्ते ज्योतिषा यजेत' इत्येतावतैव तत्सिद्धौ वीप्सावैयर्थ्यात् यावत्कामं वसन्तस्याङ्गतायास्तावतैव सिद्धेः। अतो नैयमिकप्रयोगपरमेव वीप्सायुक्तं वसन्तवाक्यम्। तस्य हि प्रयोगस्य वीप्सावशाद्यावद्वसन्तं प्रयोगः सिद्धः। वीप्सा हि व्याप्तिः। सा च 'यदा वसन्तस्तदा ज्योतिष्टोमप्रयोगः' इत्येवंरूपा वसन्तस्य निमित्तत्व एव संभवति नान्यथेति तस्य निमित्तत्वे वीप्सायुक्तवसन्तशास्त्रं पर्यवस्यति। एवं च सप्तमी निमित्तार्था 'भिन्ने जुहोति' इत्यादिवत् द्विर्वचनं तात्पर्यग्राहकमिति सिद्धो ज्योतिष्टोमस्य नैमित्तिकः प्रयोगः। एवमाप्रयणादिनित्यकर्मस्वप्यूह्यम्। प्रयोजनं—पूर्वपक्षे कामनावत एवाग्निहोत्रादिकर्मणः प्रयोगः, सोऽपि यावज्जीवमभ्यस्त एव कामायावकल्पते; सिद्धान्ते तु कामनारहितस्यापि पापक्षयार्थः प्रयोगो नियतः, काम्यस्तु प्रयोगः सकृत्कृत एव फलाय कल्पत इति। वृत्तं यावज्जीवाधिकरणम् ॥

तदेवमुक्तेषु षट्सु भेदकारणेषु शब्दान्तराभ्याससंख्यासंज्ञागुणप्रकरणान्तरेषु कानिचिदधिकानि भेदकारणानि शाखान्तरविहितकर्मस्वाशङ्क्य निराकर्तुमिदमारभ्यते। सन्ति शाखाभेदाः

२. सर्वशाखाप्रत्ययैककर्मताधिकरणम्। दिनम्' 'कालापम' इत्यादयः। तत्र किं प्रतिशाखं कर्म भिद्यते, उत एकमेवेति संशये पूर्वपक्षयति— 'काठकम्' 'शाकलम्' 'पैप्पलादम्' तैत्तिरीयम्' 'काण्वम्' 'माध्यं-

1. कर्तुस्तु नियमात् 2. निमित्तम्.

नामरूपधर्मविशेषपुनरुक्तिनिन्दाशक्तिसमाप्तिवचन-प्रायश्चित्तान्यार्थदर्शनाच्छाखान्तरे[1] कर्मभेदः स्यात् ॥ ८ ॥

विशेषशब्दो नामादिषु त्रिषु संबध्यते । शाखाविशेषेषु विहितस्य कर्मणो नामविशेषादिना भेदः स्यात् । तथाहि— 'काठकाग्निहोत्रम्' 'कालापाग्निहोत्रम्' इत्यादिसंज्ञाभेदादग्निहोत्रादिकर्म भिद्यते । रूपशब्देन गुण उच्यते । 'वपया प्रचर्याग्नीषोमीयमेकादशकपालम्' इत्येकस्यां शाखायाम् 'द्वादशकपालम्' इत्यन्यस्यामिति गुणभेदः । धर्मविशेषः अध्ययनधर्मभेदः । कारीरेष्टिमन्वब्राह्मणम् 'मारुतमसि' इत्याद्यधीयानास्तैत्तिरीयास्तावद्बोधायनसूत्रानुसारिणः 'भूमौ भोजनम्' इत्याद्याचरन्ति; बोधायनीयेभ्योऽन्ये तु स्वशाखागतमिदमेवाधीयाना न तदाचरन्ति । तमिमं धर्मविशेषमेकैव कारीरेष्टिः केषांचिदाकाङ्क्षति नेतरेषामिति न संभवति । अतः कर्मभेदः । यद्यपि गुणपर्याय एवायं धर्मविशेषः, तथापि हविर्धर्मोऽन्तरङ्गो गुणः पूर्वमुपात्तः । अयं तु इतिकर्तव्यतास्थानीयो बहिरङ्ग इत्यपौनरुक्त्यम् । पुनरुक्तिरभ्यासः । एकमेवाग्निहोत्रादिकर्म सर्वत्र शाखास्वाम्नायत इति पुनरुक्त्या कर्म भिद्यते । यदि हि सर्वशाखास्वेकं कर्म तर्ह्येकस्यां शाखायां विहितस्य शाखान्तरे पुनर्वचनमनर्थकं स्यात । अतः कर्मभेदः । एवमुदितहोमप्रस्तावे क्वचिच्छाखायामनुदितहोमो निन्द्यते 'प्रातः प्रातरनृतं ते वदन्ति पुरोदयाज्जुह्वति येऽग्निहोत्रम् । दिवा कीर्त्यमदिवा कीर्तयन्तः सूर्यो ज्योतिर्न तदा ज्योतिरेषाम्' इति । अनुदिते सूर्ये 'सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहा' इत्यभिधानमनृतं संपद्यत इत्यर्थः । अन्यस्यां तु शाखायामनुदितहोमप्रस्तावे उदितहोमो निन्द्यते 'यदुदिते सूर्ये प्रातर्जुहुयात्, यथातिथये प्रदुताय शून्यायावसथायाहार्यं हरन्ति, तादृगेव तत्' इति । अस्यार्थः— 'अग्निं वा वादित्यः सायं प्रविशति' 'उद्यन्तं वा वादित्यमग्निरनुसमारोहति' इति पूर्वमुक्तम् । अतो यजमानस्य गृहे सूर्योऽग्निं प्रविष्टो रात्रौ वसति । उदयानन्तरमग्निं विहाय गच्छति । ततश्च यथा अतिथये प्रद्रुताय वैमुख्येन गृहात्प्रस्थिताय आहार्यम् उपहर्तव्यमन्नम् । 'शून्याय' 'आवसथाय' इति चतुर्थ्यौ सप्तम्यर्थे । अतिथिवर्जिते शून्ये गृहे हरन्ति, तादृगेव तद्भवति, यदुदिते हूयत इति । सेयमुदितानुदितहोमनिन्दा कर्मभेद एवोपपद्यते, न तु तदेकत्वे । तस्मात्कर्मभेदः । तथा अनन्तासु शाखास्वनन्तानामङ्गानामुपदिष्टानामेकस्मिन्कर्मण्युपसंहारस्यानुष्ठानस्य चाशक्यत्वात् अशक्यार्थोपदेशकतया अप्रामाण्यापातादपि कर्मभेदः । तथा मैत्रायणीयशाखायामग्निचयनमन्त्रसमाम्नाये अन्वारोहा नाम स्थण्डिलारोहणमन्त्रविशेषा अन्ते पठ्यन्ते । क्वचिच्छाखायां न ते मन्त्राः सन्ति । तत्राध्येतारो याज्ञिकाश्चेत्थं

1. शाखान्तरेषु.

व्यपदिशन्ति— अन्वारोहेषु मैत्रायणीयानामग्निः समाप्यते, इतरेषां त्वन्यत्र समाप्यते नान्वारोहेष्विति। तदेतत्कर्मभेद एवोपपद्यते। न ह्येकस्यैवाग्निकर्मण उभयत्र समाप्तिवचनमुपपद्यते। तस्मादपि कर्मभेदः। तथा 'यस्याग्निहोत्रमहुतं सूर्योऽभ्युदियात्' इत्यादिनोदितहोमे प्रायश्चित्तं विहितम्, तथा अनुदितहोमेऽपि। तदिदं प्रायश्चित्तविधानं कर्मैकत्वे सति नोपपद्यत इति कर्मभेदः। एतेन पूर्वोदाहृतनिन्दावाक्ययोर्विकल्पपरत्वमपि प्रत्युक्तं भवति। विकल्पे सति ह्युभयथाप्यवैगुण्यात्प्रायश्चित्तद्वयविधानमप्यनर्थकं स्यात्। दृश्यते चोभयथा प्रायश्चित्तविधानाद्वैगुण्यम्। न चैतत्कर्मैकत्व उपपद्यत इति कर्मभेदः। एवं च निन्दयाप्यपौनरुक्त्यं वेदितव्यम्, वैकल्पिकत्वशङ्कानिराकरणार्थत्वात्। तथा अन्यार्थदर्शनादपि भवति कर्मभेदः। अन्यद्विधातुं प्रवृत्तेषु वाक्येषु अन्यस्मिन्नर्थे लिङ्गदर्शनमन्यार्थदर्शनम्। तच्चात्र पञ्चविधं परिहारसूत्रवशादुदाह्रियते। क्वचिच्छाखायां द्वादशाहसत्रे श्रूयते 'यदि पुरा दिदीक्षाणा एतमेव बृहत्सामानमुपेयुरुपेतं ह्येषां रथंतरम् अथ यद्यदिदीक्षाणा रथंतरसामानमुपेयुः' इति। यदि पुरा पूर्वं दिदीक्षाणा दीक्षितवन्तः कृतप्रथमसोमाः स्युः तदा एतमेवातिरात्रं बृहत्सामानमुपेयुः। हि यस्मात्कारणात् प्रथमसोमे रथंतरमेभिः प्रयुक्तम्। यदि तु अदिदीक्षाणाः अकृतप्रथमसोमास्तदा रथंतरसामानमुपेयुः, 'न रथंतरसामानमकृत्वा बृहत्सामानमाहरेत्' इति नियमादित्यर्थः। तदिदमनिष्टप्रथमसोमानामपि द्वादशाहसत्रवचनं प्रतिशाखं कर्मभेदमवगमयति। न हि कर्मैकत्वे सत्येतदुपपद्यते, ताण्डकशाखायाम् 'एष वा व प्रथमो यज्ञो यज्ञानाम्' इति ज्योतिष्टोमस्य सर्वयज्ञेभ्यः प्राथम्यविधानात् कर्मैकत्वे सर्वशाखासु ज्योतिष्टोमप्राथम्यनियमात्। प्रतिशाखं कर्मभेदे तु ताण्डकवचनेन तच्छाखास्थज्योतिष्टोमस्य प्राथम्यनियमे सत्यपि एतच्छाखास्थज्योतिष्टोमस्य तदनियमान्न विरोध इति कर्मभेदः। तथा तैत्तिरीयके यूपैकादशिनीविषये श्रूयते 'यत्पक्षसंमितां मिनुयात्कनीया꣡ꣳसं यज्ञक्रतुमुपेयात्पापीयस्यस्यात्मनः प्रजा स्यात्, वेदिसंमितां मिनोति ज्याया꣡ꣳसमेव यज्ञक्रतुमुपैति नास्यात्मनः पापीयसी प्रजा भवति' इति। अस्यार्थः— प्रकृतिभूतोऽग्निस्तावत्पक्ष्याकृतिकः, 'वयसां वा एष प्रतिमया चीयते' 'व्याममात्रौ पक्षौ च पुच्छं च भवति' 'अरत्निना पक्षौ द्राघीया꣡ꣳसौ भवतः' इत्यादिश्रवणात्। व्याममात्रौ पुरुषमात्रौ, 'पञ्चारत्निः पुरुषो व्यामश्च' इति बोधायनादयः। यदि पक्षसंमितां पक्षायामप्रमाणां यूपैकादशिनीं मिनुयादवटेषु निखन्यात्। पक्षायामप्रमाणं समशो दशधा विभज्य मध्ये अग्निष्ठयूपं पार्श्वयोः पञ्च पञ्चेत्येकादशयूपावलिं मिनुयादिति यावत्। यद्वा पक्षाभ्यां यावन्तं प्रदेशमग्निर्व्याप्नोति तावत्प्रमाणां मिनुयात्। अग्नेस्तिर्यक्प्रमाणं शतधा विभज्य मध्ये एकं पार्श्वयोः पञ्च पञ्चेत्येकादशयूपावलिं मिनुयात्। तदा कनीयांसं स्वल्पतरं यज्ञक्रतुं प्राप्नुयात्। किंच अस्य पक्षसंमितां यूपैकादशिनीं कुर्वाणस्य यजमानस्य प्रजा पुत्रपौत्रादिः पापीयसी दरिद्रतमा स्यात्। अतो वेदि-

1. पक्षसंमिताया वेदिसंमितायाश्च—घ, ङ.

संमितां मिनोति । आग्निकवेदिपूर्वार्धतिर्यक्प्रमाणं समशो दशधा विभज्य मध्ये एकं यूपं पार्श्वयोः पञ्च पञ्चेत्येकादशयूपावलिं निखनति । एवं सति 'ज्यायांसमेव' इत्यादि स्पष्टम् । तदियं पक्षसंमितां यूपैकादशिनीं कदाचित्प्राप्तां निन्दित्वा वेदिसंमितायाः स्तुतिः प्रतिशाखं कर्मभेदमवगमयति । कर्मैकत्वे ह्येतदनुपपन्नं स्यात् । शाखान्तरे हि यूपैकादशिनीमधिकृत्य श्रूयते 'रथाक्षान्तराला यूपावटा भवन्ति' इति । 'अक्षश्चतुःशतम्' इति श्रुतिः । चतुरधिकं शतमङ्गुलय इत्यर्थः । [1]पक्षसंमितायां वेदिसंमितायां च यूपावटान्तरालप्रमाणं त्वल्पतरम् । एवं च शाखान्तरे यूपैकादशिन्यां रथाक्षान्तरालवचने जाग्रति वेदिसंमितायाः अप्राप्तत्वात्स्तुतिः कथमुपपद्येत । न चौदुम्बराधिकरणन्यायेन स्तुत्या तद्विधानमनुमीयत इति वाच्यम् । विरोधिनि रथाक्षान्तरालवचने प्रत्यक्षे जाग्रति तदनुमानानुन्मेषात् । सत्यपि तदुन्मेषे पक्षसंमितानिन्दाया अनुपपत्तेः । निन्दया हि न पक्षसंमितायाविधिः प्रकल्पयितुं शक्यते नापि तन्निषेधः, रथाक्षान्तरालवचने सति तत्र पक्षसंमितायाः अप्रसक्तेः । प्रतिशाखं कर्मभेदे तु रथाक्षान्तरालवचनं तच्छाखास्थयूपैकादशिनीविषयत्वाच्छाखान्तरे स्तुत्या वेदिसंमितावविधिकल्पनं न विरुणद्धि । नापि कदाचित्प्राप्तायाः पक्षसंमितायाः अप्रसक्तिमासञ्जयति यतस्तन्निन्दा नोपपद्येत । तस्मादपि कर्मभेदः । तथा क्वचिच्छाखायां ज्योतिष्टोमातिरात्रे श्रूयते 'द्वे संस्तुतानां[1] विराजोऽतिरिच्येते' इति, शाखान्तरे 'तिस्रः संस्तुतानां विराजोऽतिरिच्यन्ते' इति । सम्यक् स्तुतं स्तुतिः यासु ताः [2]संस्तुताः स्तोत्रीया ऋचः । विराडिति एकमनेकं वा दशकं दशविंशतित्रिंशदादिरूपमुच्यते, 'दशाक्षरा विराट्' इति दर्शनात् । तदिदं प्रतिशाखं कर्मभेद एवोपपद्यते । न ह्येकस्मिन्कर्मणि द्वयोस्तिसृणां चातिरेकः संभवति । तस्मात्कर्मभेदः । तथा सारस्वते सत्रे श्रूयते 'ये पुरोडाशिनस्त उपवसन्ति' 'ये सांनाय्यिनस्ते वत्सान्धारयन्ति' इति । ये यजमानाः पुरोडाशिनः अनिष्टप्रथमसोमतया ऐन्द्राग्नपुरोडाशकदर्शेष्टिमन्तः, 'नासोमयाजी संनयेत्' 'ऐन्द्राग्न एकादशकपालोऽमावास्यायामसंनयतः' इति तेषां तद्विधानात्, ते पुरोडाशिन उपवसन्ति । असंनयत उपवसथदिने वत्सापाकरणादि यत्कर्तव्यम् 'ग्राम्येभ्य उपवसति' इत्यन्तं तन्न कुर्वन्ति । ये तु यजमाना इष्टप्रथमसोमाः सांनाय्यिनः, 'सोमयाजी संनयेत्' इति तेषां तद्विधानात्; ते वत्सान्धारयन्ति अपाकुर्वन्ति मातृसकाशं न गमयन्ति दोहाय । तदेवमनिष्टप्रथमसोमानामपि सारस्वतसत्रदर्शनं प्रतिशाखं कर्मभेदमवगमयति । कर्मैकत्वे हि ताण्डके ज्योतिष्टोमप्राथम्यवचनेन इष्टप्रथमसोमानामेव सारस्वतसत्राधिकारे सति सर्वेषां सांनाय्यित्वात् 'ये पुरोडाशिनः' इति नावकल्पेत । यद्यपि 'ये पुरा दिदीक्षाणाः' इत्यन्यार्थदर्शनेन गतार्थमिदम्, तथापि प्रकरणान्तरेण परिहारस्य वक्ष्यमाणत्वात्पृथगुपादानम् । तथा उपहव्ये 'अग्निष्टोमो रथंतर-

1. संस्कृतानां—क. 2. संस्कृताः—क.

सामा, अश्वः श्यावो दक्षिणा' इत्येकस्यां शाखायाम्, 'उपहव्य उक्थ्यो बृहत्सामा, अश्वः श्वेतो दक्षिणा' इत्यन्यस्याम्। उपहव्यो नाम सोमयागविशेषः। अत्र शाखाद्वयविहितस्योपहव्यस्यैकत्वे बृहद्रथंतरपृष्ठयोर्विकल्पः स्यात्। तस्य च प्रकृतित एव प्राप्तत्वात्पुनर्विधानमनर्थकम्। कर्मभेदे तु प्रकृतिप्राप्तविकल्पस्य तत्तच्छाखास्थोपहव्ये व्यवस्थासिद्ध्यर्थं पुनर्वचनमिति प्रतिशाखं कर्मभेद एव युक्तः॥

सिद्धान्तयति—

एकं वा संयोगरूपचोदनाख्याविशेषात् ॥ ९ ॥

वाशब्द एवार्थे। सर्वास्वपि शाखास्वेकमेव कर्म प्रत्येतव्यम्, न तु कर्मभेदः। कुतः। संयोगरूपचोदनाख्याविशेषात् 'स्वर्गकामो ज्योतिष्टोमेन' इति फलसंयोगस्य सोमरसेन्द्रवाय्वादिद्रव्यदेवतास्वरूपस्य 'यजेत' इति धात्वर्थानुरक्तभावनात्मिकायाश्चोदनाया ज्योतिष्टोमादिसमाख्यायाश्च सर्वत्राविशेषात्॥ तदेभिः कारणैः प्रत्यभिज्ञानात्सर्वासु शाखास्वेकमेव कर्म, यथा ताण्डके पञ्चविंशब्राह्मणे षड्विंशब्राह्मणे च ज्योतिष्टोमद्वादशाहौ पुनराम्नातौ न भिद्येते यथा वा तैत्तिरीयके प्रथमकाण्डेऽष्टमप्रश्ने प्रथमाष्टके च षष्ठसप्तमाष्टमप्रश्नेषु 'अनुमत्यै पुरोडाशमष्टाकपालं निर्वपति' इत्यादिना आनुमतादिकर्माणि राजसूयिकान्यनुक्रान्तानि न भिद्यन्ते तद्वत्। न च प्रकरणान्तरवच्छाखान्तरेषु परस्परासंनिधानं भेदहेतुरिति वाच्यम्। असंनिधानं हि तदानीं बुद्धावपरिवर्तनम्। तच्च प्रतियोग्यनुयोगिनोर्ज्ञातयोरेव भेदबुद्धिं जनयितुमीष्टे। येन हि प्रदेशान्तरे किंचित्कर्म गृहीतं भवति स एव तत्सदृशमन्यत्रोपलभमानस्ततोऽन्यदिति शक्नोत्यध्यवसातुम्। शाखान्तरे पुनरन्यशाखागतज्योतिष्टोमाद्यनवबोधादपूर्ववदुच्यमानेषु न भेदबुद्धिर्जायते। न च योऽनेकशाखाध्यायी तस्य प्रतिशाखं कर्मभेदबुद्धिः स्यादिति वाच्यम्। एकस्यानेकशाखाध्ययनाभावात्। स्वाध्यायत्वं हि प्रतिव्यक्ति गोत्वादिवत्प्रतिशाखं समवैति। ततश्च 'अधीतेन स्वाध्यायेनेष्टं भावयेत्' इत्यर्थपर्यवसन्नस्वाध्यायविधौ स्वाध्यायस्योपादेयतया तद्गतैकत्वस्य पश्वेकत्ववत् पित्रादिपरंपरागतत्वरूपस्वत्वस्य समासान्तर्गतस्याश्वाभिधान्यामश्ववच्च विवक्षितत्वादेकशाखाध्यायिना शाखान्तराध्ययनं नावश्यमनुसर्तव्यम्। न चैवं वेदान्तरस्याप्यध्ययनं न प्रसज्यत इति वाच्यम्। 'वेदानधीत्य वेदौ वा' इत्यादिवचनान्तरेण तदुपपत्तेः। किंच यजुर्वेदे समाम्नातद्रव्यदेवतारूपयुक्तज्योतिष्टोमादिकर्मण[1] ऋग्वेदे याज्यानुवाक्यादिगुणमात्रं सामवेदे च स्तोत्रादिगुणमात्रं विधीयते। अतः साकाङ्क्षत्वाद्वेदान्तराणामतुल्यकार्यत्वात्समुच्चयो युज्यते। शाखान्तरेषु तु नैवं संभवति। सर्वासु ह्यध्वर्युशाखासु दर्शपूर्णमासज्योतिष्टोमादीनि द्रव्य-

1. ज्योतिष्टोमादिकर्मणि—क.

देवतारूपवन्ति तान्येवान्योन्यनिरपेक्षाणि विधीयन्त इति शाखान्तराणां तुल्यकार्यत्वाद्विकल्पः। अतो नैकस्यानेकशाखाध्ययनसंभवः। उक्तं च वार्तिके 'स्वाध्यायग्रहणेनैका शाखा हि परिगृह्यते। एकार्थानां विकल्पश्च कर्मैकत्वे भविष्यति' इति। तदिदं सूत्रकार एवानुपदं वक्ष्यति। तदेवं भेदकारणाभावादभेदप्रत्यभिज्ञानाच्च सर्वशाखास्वेकं कर्मेति सिद्धम्।

अथ पूर्वपक्षोक्तहेतून्प्रतिक्षिपन्नाम्ना कर्मभेदं तावन्निराचष्टे—

न नाम्ना स्यादचोदनाभिधानत्वात् ॥ १० ॥

न नाम्ना कर्मभेदः स्यात्। कुतः। अचोदनाभिधानत्वात्, चोदना कर्मोत्पत्तिवाक्यम्, तद्गतमभिधानं नामधेयं चोदनाभिधानम्, अतद्रूपत्वात्काठकादिनाम्न इत्यर्थः। 'संज्ञा चोत्पत्तिसंयोगात्' इत्यधिकरणे उत्पत्तिवाक्यगता संज्ञा कर्म भिनत्तीत्युक्तम्। काठकादिसंज्ञाश्च नोत्पत्तिगता इति न ततः कर्मभेदः प्रसज्यते। यद्वा, चोद्यत इति चोदना कर्म, तदभिधानत्वाभावात्काठकादिशब्दस्येत्यर्थः। ग्रन्थनाम्न एव सतोऽस्य लक्षणया कर्मणि प्रयोगः। न च वैपरीत्यं शङ्क्यम्, काठकादिशब्दस्याग्निहोत्र इव दर्शपूर्णमासादिकर्मस्वपि प्रयोगदर्शनेनानेकार्थशक्त्यापातात् अग्निहोत्रमात्रवाचकत्वे कर्मान्तरेषु लक्षितलक्षणापाताच्च ॥

इतोऽपि काठकादिसंज्ञाया न कर्मभेदकत्वमित्याह—

सर्वेषां चैककर्म्य[1] स्यात् ॥ ११ ॥

चशब्दोऽन्वाचये। सर्वेषामप्यग्निहोत्रदर्शपूर्णमासादिकर्मणां काठकादिसंज्ञाया अविशिष्टत्वेन भेदहेतोः संज्ञाभेदस्याभावेन भेदो न स्यात् ॥

इतोऽप्येवमित्याह—

कृतकं चाभिधानम् ॥ १२ ॥

चशब्द उक्तसमुच्चये। 'तेन प्रोक्तम्' इति तद्धितप्रत्ययान्तकाठकादिनामधेयं प्रवचननिमित्तत्वात् कृतकम् इदानींतनम्। कर्माणि त्वनादिवेदसिद्धत्वादनादीनि। न हि तानीदानींतनसंज्ञावशाद्भेदमर्हन्ति। न हि प्रवचनात् प्राङ्न भेदः पश्चाद्भेद इति युज्यते। तस्मादपि न काठकादिनाम्ना कर्मभेदः ॥

रूपभेदं प्रत्याह—

1. सर्वेषां चैककर्म्यात्.

एकत्वेऽपि परम् ॥ १३ ॥

परं नामानन्तरोक्तं कपालसंख्यात्मकरूपान्यत्वं कर्मण एकत्वेऽपि वचनाद्व्रीहियवादिवद्विकल्पेनोपपद्यते । न चोत्पत्तिशिष्टत्वात्कथं विकल्प इति वाच्यम् । उभयोरपि संख्ययोरुत्पत्तिशिष्टत्वाविशेषात् ॥

धर्मविशेषं प्रत्याह—

विद्यायां धर्मशास्त्रम् ॥ १४ ॥

भूमिभोजनादिव्रतादेशकं धर्मशास्त्रं विद्यायां कारीरीष्टिमन्त्रब्राह्मणाध्ययनविषये प्रवृत्तम् । अतोऽध्ययनाङ्गमेव तत् न तु कर्मधर्मः, श्रुत्यादिषट्प्रमाणागोचरत्वात् । अतो न ततः कर्मभेदः ॥

पुनरुक्तिं प्रत्याह—

आग्नेयवत्पुनर्वचनम् ॥ १५ ॥

'यदाग्नेयोऽष्टाकपालोऽमावास्यायां भवति' [1]इति पुनर्वचनमैन्द्राग्नस्तुत्यर्थत्वेनानन्यगतिकत्वाभावान्न कर्मभेदकमित्युक्तं पूर्वपादान्ते । एवं शाखान्तरे विहितस्य सेतिकर्तव्यताकस्य ज्योतिष्टोमादिकर्मणः शाखान्तरे पुनर्वचनं न कर्म भिनत्तीत्यर्थः ॥

नन्वत्र विधेयान्तराभावान्नार्थवादत्वमिति पुनर्वचनं कर्म भिन्द्यादित्यस्वरसादुक्तं परिहारमुपेक्ष्य पुनर्वचनमेवात्र नेत्याह—

[2]अद्विर्वचनं वा [3]श्रुतिसंयोगाविशेषात् ॥ १६ ॥

वाशब्द एवार्थे । पुनर्वचनं तावत्पुनःश्रवणसंयुक्तमेव कर्मभेदमवगमयति, न स्वरूपसत् । शाखान्तरेषु च पुनर्वचनं नैव तथाविधं भवितुमर्हति, एकस्य पुरुषस्यानेकशाखाश्रवणाभावान् । ननु मेधाविनस्तत्संभव इत्यत आह—श्रुतिसंयोगाविशेषादिति । शाखान्तरश्रवणसंयोगस्यैकशाखाश्रवणसंयोगाद्विशेषाभावादित्यर्थः । कठो हि काठकमग्निहोत्रं श्रुत्वा तैत्तिरीयकमग्निहोत्रं शृण्वन्नपि स्वशाखयैव प्रतिपन्नत्वात्तैत्तिरीयान्प्रत्येव बोधकमिदं तैत्तिरीयशाखागतमग्निहोत्रवाक्यमिति कल्पयन्न पुनःश्रुतिं मन्यते । एवं तैत्तिरीयादिरपि काठकादिवचनं न पुनःश्रुतिं मन्यते इति सर्वोऽपि जनः शाखान्तरं शृण्वन्नप्यश्रुतमेव मन्यते इत्यपौनरुक्त्यम् ॥

नन्वेकस्यानेकशाखाश्रवणाभावः कुत इत्यत आह—

1. इति पूर्ववचनम्—क, ख, ग, घ, ङ, च. 2. द्विर्वचनं—क, ख, ग, घ, ङ, च. 3. अश्रुति...

वाक्यासमवायात् ॥ १७ ॥

स्वाध्यायविधेरुक्तरीत्या एकशाखाध्ययनविधिपरत्वादेकस्यानेकशाखाध्ययनाभावादेकस्मिन्पुरुषे शाखान्तरवाक्यस्यासमवायान्न तच्छ्रवणसंभव इत्यपुनर्वचनमित्यर्थः । इदं तु सूत्रं भाष्ये परिभ्रष्टमिति वार्तिककृतः ॥

नन्वेकस्या एव शाखाया अध्ययनविधौ शाखान्तरानर्थक्यमिति तदध्ययनमपि प्राप्तमिति पौनरुक्त्यं दुर्वारमित्यत आह—

अर्थासंनिधेश्च ॥ १८ ॥

चशब्द उक्तसमुच्चये । एकमेव पुरुषं प्रत्यनेकशाखागतस्यार्थस्यासंनिधेः पुरुषविशेषान्प्रत्येव संनिधेर्न शाखान्तराणामानर्थक्यमित्यर्थः । यथा एकशाखागतं कर्म पुरुषान्तरेषु पुनःश्रूयमाणमपि प्रतिपत्तृभेदान्न पुनरुक्तम्, एवं शाखान्तरेष्वपीति भावः ॥

इतोऽपि न पौनरुक्त्यमित्याह—

न चैकं प्रति शिष्यते ॥ १९ ॥

चशब्द उक्तसमुच्चये । अग्निहोत्रादिकर्म प्रतिशाखं नैकमेव पुरुषं प्रति शिष्यते, 'शासु अनुशिष्टौ', विधीयते; [1]किंत्वर्थिमात्रं प्रति सर्वशाखासु विधीयमानमेकमेकं पुरुषमुपतिष्ठते । तत्र एकस्यानेकशाखाश्रवणात्पुनर्वचनतः प्रतिशाखं कर्मभेदे एकार्थत्वात्समुच्चयानुपपत्तौ विकल्प आश्रयितव्यः स्यात् । तद्वरं प्रत्यभिज्ञानतः कर्मैक्ये सति शाखानामेव पुरुषव्यवस्थया तदाश्रयणमित्येकस्यानेकशाखाध्ययनाभावादपुनरुक्तता ॥

इतोऽपि न पुनरुक्तिरित्याह—

समाप्तिवच्च संप्रेक्षा ॥ २० ॥

चशब्द उक्तसमुच्चये । स्वार्थिको वतिः 'नित्यवदाम्नातम्' इत्यादिवत् । मैत्रायणीयास्तावदन्वारोहमन्त्रान्तेऽग्नेः समाप्तिं व्यपदिशन्ति 'अत्रास्माकमग्निः समाप्यते' इति । एकस्यानेकशाखाश्रवणतः प्रतिशाखं कर्मभेदे सति यावदेव येषां समाम्नातं तावदेव तेषां समाप्यत इत्यत्र

1. किंत्वर्थमात्रं—क, ख, ग, घ, ङ.

'अस्माकम्' इति न ब्रूयुः। तथा चैकस्यैवाग्नेरत्रास्माकं समाम्निरन्येषामन्यत्रेत्युक्तिसामञ्जस्यात् एकस्यानेकशाखाश्रवणतः पुनरुक्तौ च तदनुपपत्तेः पुरुषव्यवस्थयैव तदाश्रयणं युक्तमिति न पुनरुक्तिः॥

तदेवं षड्भिः सूत्रैः पुनरुक्तिं परिहृत्य निन्दादित्रयं प्रत्याह—

एकत्वेऽपि पराणि[1] ॥ २१ ॥

पुनरुक्त्यनन्तरमनुक्रान्तानि निन्दाशक्तिसमाम्निवचनानि कर्मैकत्वेऽप्युपपद्यन्ते। तथाहि—'उदिते जुहोति' 'अनुदिते जुहोति' इत्यग्निहोत्रकालौ विधीयेते। तत्रैकनिन्दा अन्यं स्तोतुं प्रवृत्तेत्यविरोधः। न च विकल्पाश्रयणप्रसङ्गात्कर्मभेदाश्रयणमेव युक्तमिति वाच्यम्। प्रतिशाखं भिन्नयोरपि कर्मणोः फलं प्रति विकल्पाश्रयणस्याविशिष्टत्वात्। अशक्तिस्तु [2]एकशाखागतानेकब्राह्मणविहिताङ्गकलापोपसंहारेऽप्यविशिष्टा। यो ह्येकशाखागताङ्गकलापविधीनुपसंहर्तुं शक्नुयाच्छक्रोत्यसौ सर्वास्वपि शाखास्वङ्गविधीनुपसंहर्तुम्। न हि सर्वासु शाखासु सर्वेऽङ्गविधय उपसंहर्तव्या येनाशक्यता स्यात्, स्वाध्यायाध्ययनतः सर्वास्वपीतरशाखास्वधिकविधीनामेवोपसंहार्यत्वात्। अधिकविधयश्चैकशाखातोऽपि हीनपरिमाणा एव भवन्तीति नाशक्यता। सत्यामपि शक्तौ शाखान्तरगताधिकविधीनामुपसंहार ऐच्छिक एव न त्वावश्यकः, शाखान्तराध्ययनानित्यत्वस्य प्रतिपादितत्वात्, क्वचिच्छाखासु तेषामनाम्नानबलाच्च; अन्यथा अङ्गान्तरविधीनामिवाधिकविधीनामपि सर्वशाखास्वाम्नानापत्तेः। मैत्रायणीयानामन्वारोहेषु समाम्निवचनं च तच्छाखाविहिताङ्गकलापसमाम्यभिप्रायेणेति सूत्रकार एव स्पष्टमुपपादयिष्यति॥

अथ यदुक्तमुदितहोमेऽनुदितहोमे च प्रायश्चित्तविधानमुभयथाप्यवैगुण्यादनर्थकमिति तत्परिहर्तुमनुभाषते—

प्रायश्चित्तं निमित्तेन ॥ २२ ॥

अनुदितकालमतिक्रम्योदितहोमे उदितकालमप्राप्यानुदितहोमे च प्रायश्चित्तविधानं कर्मभेदमवगमयतीति यदुक्तं तत्परिहर्तव्यमित्यर्थः॥

परिहरति—

प्रक्रमाद्वा नियोगेन ॥ २३ ॥

वाशब्द एवार्थे। नियोगेन वैकल्पिकानां पदार्थानां प्रयोगादावेकतरानिर्धारणेनैव प्रयोगस्य

1. निन्दाशक्तिसमाम्निवचनानि इत्यधिकमन्यत्र दृश्यते. 2. एकशाखागतानेकविधिविहित—क, घ, ङ.

प्रक्रमादुदिते होष्यामीति निर्धार्य प्रक्रान्तेऽग्निहोत्रप्रयोगे उदयात्प्रागेवानुष्ठिते सति दोषः। एवमनुदिते होष्यामीति प्रक्रम्योदितहोमप्रयोगेऽपि। अत उभयथापि प्रायश्चित्तविधानं कर्मैकत्वेऽप्युपपद्यते। अत्रोदितानुदितकालयोरन्यतरकालं प्रति प्रयोगमादौ निर्धार्य प्रयोगप्रक्रमः न तु सर्वप्रयोगादावेव सकृत्तन्निर्धारणम्, 'यदि वैमृधं निर्वपेदन्वेव निर्वपेत्' इतिवदत्र वचनाभावात्। प्रत्युत वाजसनेयके चातुर्मास्येषु साकमेधपर्वणि 'आनीकवते क्रैडिने च साकं सूर्येणोद्यता निर्वपति' इति सूर्योदयकालिके कर्मणि प्रातरग्निहोत्रपूर्वोत्तरकालिकत्वयोरैच्छिकविकल्पानुवादो दृश्यते 'अथ प्रातरहुते हुते वाग्निहोत्रे इतरथा कामयेत' इति। कल्पकाराणामप्ययमेवार्थोऽनुमतः। आपस्तम्बसत्याषाढकात्यायनादौ हि दाक्षायणयज्ञस्य दर्शपूर्णमासाभ्यामादिविकल्प उक्तः 'सोऽयं दर्शपूर्णमासयोः प्रक्रमे विकल्पोऽनेन दर्शपूर्णमासाभ्यां वा यजेत' इत्यादिना। तथा वैमृधविषयेऽपि 'तस्य यथाकामी प्रक्रमे प्रक्रमात्तु नियम्यते' इत्यादिना आदिविकल्प उक्तः। धूर्तस्वामिभाष्ये च 'पुनः पुनः प्रक्रमनियमवचनाद्यत्र प्रक्रमनियमवचनं तत्रैव प्रक्रमनियमो नान्यत्र; तेनाग्निहोत्रादौ द्रव्यकालादीनां न प्रक्रमनियमः' इत्युक्तम् 'होमकालः संकल्पयितव्यः कर्मादौ' इति च। तस्मादुदितानुदितकालयोर्न प्रक्रमनियमः। यत्तु 'यत्र शास्त्रगतिर्भिन्ना सर्वकर्मसु भारत। उदितेऽनुदिते चैव होमभेदो यथा भवेत्। तस्मिन्कुलक्रमायातमाचारं त्वाचरेद्बुधः। स गरीयान्महाबाहो सर्वशास्त्रोदितादपि' इति सुमन्तुवचनं दाक्षिणात्यस्मृतिनिबन्धन उदाहृतं तत्प्राचीननिबन्धनेषु काप्यदर्शनादुपेक्ष्यम्; स्वकुलाचारप्राशस्त्यपरं वा, 'स गरीयान्' इति लिङ्गादित्यन्यदेतत्॥

'एकत्वेऽपि पराणि' इति सूत्रे 'पराणि' इति बहुवचनेन सामान्यतः परिहार्यत्वेनोपक्षिप्तं, सिंहावलोकनन्यायेन तदुपपादयति—

समाप्तिः पूर्ववत्त्वाद्यथाज्ञाते प्रतीयेत ॥ २४ ॥

मैत्रायणीयानामन्वारोहेष्वग्निसमाप्तिवचनं यथाज्ञाते यावत्पदार्थजातं तच्छाखायामाम्नातं तद्विषयतया प्रतीयेत। कुतः। पूर्ववत्त्वात् शब्दप्रयोगस्य तात्पर्यपूर्वकत्वात्। तात्पर्यं चात्र समाप्तिवचनस्याग्नावसमाप्ते प्रयुज्यमानस्य तच्छाखाविहितपदार्थजातसमाप्तिपरत्वमिति[1] निश्चिनुम इति कर्मैकत्वेऽपि न विरोधः, आध्वर्यवे प्रयोगे समाप्ते 'ज्योतिष्टोमः समाप्तः' इति यथा। 'समाप्तिवच्च संप्रेक्षा' इत्यत्र कर्मैकत्वे लिङ्गमुपपादितम्, इह तु कर्मैकत्वे विरोधः परिहृत इत्यपौनरुक्त्यम्॥

यदुक्तम् 'यद्यदिदीक्षाणाः—' इत्यनिष्टप्रथमसोमानां द्वादशाहे दर्शनं प्रतिशाखं ज्योतिष्टोमभेदमवगमयति, कर्मैकत्वे ताण्डकावगतज्योतिष्टोमप्राथम्यविरोधात्; कर्मभेदे तु ताण्डकावगत-

1. परत्वं— क, घ, ङ.

ज्योतिष्टोमप्राथम्यवचनस्यैतच्छाखास्थज्योतिष्टोमविषयत्वाभावान्न विरोध इति तत्राह—

लिङ्गमविशिष्टं सर्वशेषत्वान्न हि तत्र कर्मचोदना तस्माद्द्वादशाहस्याहारव्यपदेशः स्यात् ॥ २५ ॥

यदेतत्कर्मभेदे लिङ्गत्वेनोपन्यस्तं द्वादशाहेऽनिष्टप्रथमसोमदर्शनं तत्कर्मैकत्वेऽप्यविशिष्टम्। कुतः। सर्वशेषत्वात् ताण्डकगतज्योतिष्टोमप्राथम्यवचनस्य सर्वशाखास्थज्योतिष्टोमविषयत्वात्। हि यस्मात्कारणात् तत्र ताण्डके ज्योतिष्टोमकर्मणः न चोदना उत्पत्तिर्नास्ति, येन [1]तत्रत्यज्योतिष्टोममात्रविषयं प्राथम्यवचनं स्यात्। तस्मात् कर्मभेदपक्षेऽप्यनिष्टप्रथमसोमानां द्वादशाहे दर्शनस्य विरोधात् 'यदग्निदीक्षाणाः—' इति वाक्ये अग्निदीक्षाणशब्दे द्वादशाहस्य आहारव्यपदेशः अनुष्ठानस्य व्यपदेशः स्यात्। 'द्वादशाहेनाग्निदीक्षाणाः' इति व्याख्येयमिति यावत्। तथा च नैतत्कर्मभेदे लिङ्गमिति भावः॥

एवं प्रथममन्यार्थदर्शनं परिहृत्य द्वितीयं निराचष्टे—

द्रव्ये [2]वा अचोदितत्वाद्विधीनामव्यवस्था स्यान्निर्देशाद्ध्रुवतिष्ठेत तस्मान्नित्यानुवादः स्यात् ॥ २६ ॥

वाशब्दः संभावनायाम्। कर्मैकत्वे सति द्रव्ये अग्नौ वेदिसंमिताया अचोदितत्वात्पक्षसंमितावेदिसंमितारथाक्षान्तरालविधीनां क्रमेणार्थिकस्तुतिकल्प्यश्रौतानां तत्तच्छाखिनः प्रति अव्यवस्था व्यवस्थाया अभावः स्यात् संभाव्येत। ततश्च रथाक्षान्तरालवाक्येन [3]पक्षसंमितावेदिसंमितयोर्बाधे सति पक्षसंमिता कथं निन्द्येत; कथं वा स्तुत्या वेदिसंमिताविधिरुन्नीयेत। नैवमस्ति, वेदिसंमिताया अग्नौ श्रुतत्वेन तस्या रथाक्षान्तरालवाक्येनानारभ्याधीतेन सामान्यविषयेण बाधायोगात्। ननु रथाक्षान्तरालवाक्यस्य कावकाश इत्यत आह—निर्देशादिति। अनग्निचित्ये सर्वस्तोमादिकृतौ यूपैकादशिनीनिर्देशाद्रथाक्षान्तरालवाक्यं तत्र व्यवतिष्ठेत। ततश्च साग्निचित्यानग्निचित्यक्रतुभेदेन यूपैकादशिन्यामेकस्यामेव वेदिसंमितात्वस्य रथाक्षान्तरालत्वस्य चोपपत्तेर्न विरोधः। नन्वेवमपि पक्षसंमितानिन्दायाः का गतिरित्यत आह—तस्मादिति। वेदिसंमितारथाक्षान्तरालयोर्विहितत्वात्पक्षसंमिताया नित्यानुवादः 'नान्तरिक्षे न दिव्यग्निश्चेतव्यः' इतिवत्। कात्यायनस्त्वाह 'यूपैकादशिनी चेद्रथाक्षान्तराला

1. तत्र ज्योति... —क, ख, ग, घ, ङ, च. 2. च. 3. पक्षसंमितावेदिसंमिता च बाधिता सती कथं निन्द्येत— ख, ग. पक्षसंमिता वेदिसंमिता सति कथं निन्द्येत— क, घ, ङ, च. [उभावपीमौ पाठावस्वरसाविति पाठान्तरं प्रकल्प्य योजितम्]

यूपावटाः स्युः, वेदिपूर्वार्धे समं विभज्य पक्षसंमितां वाग्नौ' इति । पक्षसंमितविधिः शाखान्तरे दृष्ट इति तदभिप्रायः ॥

तृतीयमन्यार्थदर्शनं प्रत्याह—

विहितप्रतिषेधात्पक्षेऽतिरेकः स्यात् ॥ २७ ॥

'अतिरात्रे षोडशिनं गृह्णाति' इति विहितं षोडशिग्रहणम् 'नातिरात्रे षोडशिनं गृह्णाति' इति प्रतिषिध्यते । तत्र ग्रहणपक्षे चत्वारि शतानि त्रिषष्टिश्च स्तोत्रीया इति तिसृणां दशकादतिरेकः, अग्रहणपक्षे चत्वारि शतानि द्विचत्वारिंशच्च स्तोत्रीया इति द्वयोरतिरेक इति न विरोधः ॥

चतुर्थं प्रत्याह—

सारस्वते विप्रतिषेधाद्यदेति स्यात् ॥ २८ ॥

सारस्वतसत्रस्य ज्योतिष्टोमपूर्वकत्वात्कृतसोमस्य च दर्शे सांनाय्यविधानात्तत्र 'ये पुरोडाशिनः' इत्यैन्द्राग्नपुरोडाशकदर्शेष्टिमतां दर्शनं विरुद्धमिति यच्छब्दो यदेति व्याख्येयं स्यात् । एवं च यदा पौर्णमास्यां पुरोडाशिनस्तदोपवसन्ति यदामावास्यायां सांनाय्यिनस्तदा वत्सानपाकुर्वन्तीत्यर्थलाभान्न कर्मैक्येऽपि विरोधः ॥

पञ्चमं निराकर्तुमनुवदति—

[1]हव्येऽप्रतिप्रसवः ॥ २९ ॥

अनर्थकः प्रतिप्रसवः अप्रतिप्रसवः हव्ये उपहव्ये रथंतरबृहत्साम्नोः शाखाद्वयविहितयोः प्रकृतितः प्राप्तत्वात्पुनर्विधानमनर्थकम् । कर्मभेदे तु तत्तच्छाखास्थोपहव्ये व्यवस्थया तत्तत्सिद्ध्यर्थं पुनर्वचनमिति यदुक्तं तत्परिहर्तव्यमित्यर्थः ॥

परिहरति—

गुणार्था वा पुनःश्रुतिः ॥ ३० ॥

वाशब्दः शङ्कानिवृत्तौ । नात्र शाखाद्वये रथंतरबृहत्सामनी विधीयेते, येन कर्मैकत्वे पुनर्विधानमनर्थकं स्यात् । किंतु प्रकृतितो विकल्पेन प्राप्तयोस्तयोः पुनःश्रुतिः गुणार्था संस्थादक्षिणागुण-

1. उपहव्येप्रतिप्रसवः,

विधानार्था । यदि रथंतरसामा तदा अग्निष्टोमसंस्थः, तत्राश्वः श्यावश्च दक्षिणा; यदि बृहत्सामा तदोक्थ्यसंस्थः, तत्राश्वः श्वेतश्च दक्षिणेति न विरोधः ॥

तदेवं कर्मभेदसाधकानि लिङ्गानि निरस्य कर्मैक्यसाधकं लिङ्गं दर्शयति—

प्रत्ययं चापि दर्शयति ॥ ३१ ॥

चापीति निपातसमुदाय उक्तसमुच्चये । सर्वास्वपि शाखास्वेकस्यैव प्रत्ययं विधानं दर्शयति वेदः । मैत्रायणीयशाखायां प्रयाजा नोत्पन्नाः । तत्र शाखान्तरोत्पन्नान्प्रयाजानधिकृत्य धर्मो विधीयते 'ऋतवो वै प्रयाजाः समानत्र तिष्ठता होतव्याः' इति । समानत्र एकत्र । तथा क्वचिच्छाखायाम् 'कुटरुरसि' इत्यश्मादानमन्त्रो नाम्नातः । तत्र 'कुक्कुटोऽसीत्यश्मानमादत्ते कुटरुरसीति वा' इति मन्त्रोऽश्मादाने विनियुज्यते । तदेतत्सर्वशाखास्वेकं कर्मेति दर्शयति । तस्मात्सर्वशाखाप्रत्ययमेकं कर्म ॥

अत्र शङ्कते—

अपि वा श्रुतिसंयोगाद्विधिपृथक्त्वमेकैकस्यां[1] शाखायां व्यवतिष्ठेत ॥ ३२ ॥

अपि वेति निपातसमुदायो नेत्यर्थे । न कर्मैक्यम् । किं तर्हि । एकैकस्यां शाखायां प्रतिशाखं विधीयमानानां कर्मणां पृथक्त्वं भिन्नत्वं व्यवतिष्ठेत निश्चितं भवेत् । कुतः । श्रुतिसंयोगात् क्रमकालपरिमाणानां प्रतिशाखं श्रुतिबोधितत्वात् । कर्मैक्ये च शाखान्तरविध्युपसंहारे सति तेषां बाधः स्यात् । 'क्रमसंयोगात्' इति पाठान्तरम् । तत्र क्रमग्रहणं कालपरिमाणयोरप्युपलक्षणम् ॥

परिहरति—

विरोधिना त्वसंयोगादैककर्म्ये तत्संयोगाद्विधीनां[2] सर्वप्रत्ययः ॥ ३३ ॥

तुर्नेत्यर्थे विधीनामित्यत्रान्वेति । सर्वशाखास्वैककर्म्ये सत्यप्येकशाखागतानां विधीनां विधीयमानपदार्थानां क्रमकालपरिमाणं न शाखान्तरगतेन पदार्थजातेन बाध्यते । कुतः । विरो-

1. ...एकस्यां. 2. विरोधिनां तु...सर्वकर्मप्रत्ययः स्यात् .

धिना असंयोगात् । न हि क्रमकालपरिमाणं शाखान्तरीयपदार्थैर्विरुध्यते, क्रमकालपरिमाणस्य पदार्थान्प्रति गुणत्वात् । प्रत्युत तदेव तैः प्राधान्याद्बाध्येत । तथा च तत्संयोगात् शाखान्तरीय-पदार्थानां समावेशसंभवात् सर्वप्रत्ययः सर्वासु शाखासु कर्मैकत्वप्रत्ययः प्रामाणिकः, न तु कर्मभेदः । ननु शिष्टाकोपाधिकरणे आचमनादयः स्मार्तपदार्थाः श्रौतक्रमकालपरिमाणैर्न बाध्यन्त इति व्यवस्थापितम्; तत्र स्मार्ता अपि चेन्न बाधिताः किमिति श्रौतास्तैर्बाधिष्यन्त इति तेनैव गतार्थमिति चेत्सत्यम् । अत्रैव स विचारः सूत्रकृता कण्ठरवेण कृत इति शिष्टाकोपाधिकरणं विषयान्तर एव योजितं वार्तिके । तदेवं सर्वशाखासु तदेवेदमिति प्रत्यभिज्ञानाद्भेदकस्य शब्दान्त-रादीनामन्यतमस्याभावात्सर्वशाखाप्रत्ययमेकं कर्म । तदुक्तम् 'तस्मात्तदेवेति मतेर्न कर्म भिन्नं कथंचित्प्रतिशाखमिष्टम् । न कारणं सप्रममस्ति चान्यदेवं यथोक्तैव तु भेदसिद्धिः ॥' इति ॥

इति श्रीमत्सततसत्यमानस्येनकूर्मपोडशाररथचक्राकाराधनेकगुणविराजमानमहाग्निविलसितप्रौढापरिमि-तमहाध्वरस्य श्रीशाहजिशरभजितुक्कोजिभोसलचोलमहीमहेन्द्रामात्यधुरन्धरस्य श्रीमत आनन्दराय-विद्वत्सार्वभौमस्य पञ्चपुरुषीपोष्येण तदध्वर्युणा बाल्य एव तद्व्यानिर्वर्तितापरिमितमहाग्नि-विजृम्भितवाजपेयसर्वपृष्ठाप्तोर्यामादिवरिष्ठसोममन्त्रसंतर्पितशतमखप्रमुखबर्हिर्मुखेन श्री-महादेवाजपेययाजिसुतेन अन्नपूर्णागर्भजातेन अपारपदवाक्यप्रमाणपार-वारपारीणाग्रजन्मविश्वेश्वराजपेययाजितो लब्धविद्यावैशद्येन **वासु-देवदीक्षितविदुषा** विरचितायां जैमिनिसूत्रव्याख्यायाम्

अध्वरमीमांसाकुतूहलवृत्तौ

द्वितीयोऽध्यायः ॥

॥ श्रीः ॥

अध्वरमीमांसा

॥ कुतूहलवृत्तिः ॥

तृतीयोऽध्यायः ॥

निर्मथ्य निगमांसिन्धून्विविधन्यायाभिधानमन्थानैः ।
धर्मसुधामुद्धरते भूयो मुनये नमोऽस्तु जैमिनये ॥

हेतुहेतुमद्भावसंगतिं सूचयन्वृत्तकथनपूर्वकं वर्तिष्यमाणं प्रतिजानीते---

अथातः शेषलक्षणम् ॥ १ ॥

अथ कर्मभेदकथनानन्तरम् अतः कर्मभेदकथनस्य वर्तिष्यमाणशेषशेषिभावविचारहेतोर्वृत्तत्वात् शेषलक्षणं शेषशेषिभावनिरूपणं क्रियते[1], असिद्धे कर्मभेदे शेषशेषिभावविचारस्याभित्ति-

१ शेषलक्षणप्रतिज्ञाधिकरणम् ।

चित्रायितत्वात् । सूत्रे शेषग्रहणं भावप्रधानं शेषित्वस्याप्युपलक्षणम्, तस्याप्यवश्यविज्ञेयतया शेषशेषिभावस्यैवाध्यायार्थत्वौचित्यात् । एकस्मिन्गृहीतेऽन्यदपि नान्तरीयकतया गृहीतप्रायमित्यन्यतरदेवोपात्तम् । तत्रापि 'शेषोऽस्यास्तीति शेषी' इति 'मतुबर्थविज्ञानस्य शेषत्वज्ञानाधीनत्वाच्छेषत्वमेवोपात्तम् । आरम्भार्थो वाथशब्दः शेषलक्षणमधिकृतं वेदितव्यमिति । न च दर्शपूर्णमासयोः सोमयागस्य च सत्यपि भेदे शेषशेषित्वस्याभावाद्धेतुस्य शेषशेषित्वहेतुत्वाभावात्कथं तन्निरूपणयोर्हेतुहेतुमद्भाव इति वाच्यम् । न हि कारणे सत्यवश्यं कार्यसत्त्व-

1. आरभ्यते– क, घ, ङ. 2. मतुबर्थ इज्ञानस्य– ख, ग.

नियमः, वर्षादौ कारणे सति कदाचित्सस्यादिकार्यस्यादर्शनात्; असति कारणे कार्याभावस्तु नियत इति भेदासत्त्वे शेषशेषित्वस्याभावदर्शनाद्भवति भेदः शेषशेषिभावहेतुः। न चैवमपि 'सोमेन यजेत' 'व्रीहीनवहन्ति' इत्यादिषु द्रव्यकर्मणोः शेषशेषिभावस्य कर्मभेदं विनापि दर्शनात्कथं भेदशेषलक्षणयोर्हेतुहेतुमद्भाव इति वाच्यम्। न ह्यस्मिन्नध्याये द्रव्यकर्मणोरेव परस्परं शेषशेषित्वं निरूप्यम्, किंतु प्रयाजाग्नेयादीनां कर्मणामपि। तेषां च शेषशेषित्वस्य कर्मभेदाधीनतया भेदनिरूपणं विना कृत्स्नस्य शेषशेषित्वस्य निरूपयितुमशक्यत्वादस्ति हेतुहेतुमद्भावः। शेषलक्षणमित्यनेन शेषस्वरूपं शेषशब्दप्रवृत्तिनिमित्तं शेषस्य शेषिणा सहान्वयबोधस्य विनियोगापरनामधेयस्य प्रकारो विनियोजकानि श्रुत्यादिप्रमाणानि तेषां च बलाबलं विरोधश्च क्वचित्क्वचित्र न विरोध इत्येतत्सर्वं श्रुत्यर्थाभ्यां प्रतिज्ञातमिति वेदितव्यम्। तेन श्रुत्यादिनिरूपणस्यासांगत्यं निरस्तमित्यास्तां तावत्॥

ननु किमिदं शेषत्वमविनाभावो वा प्रयोज्यत्वं वा अधिकविहितत्वं वा विध्यन्तविहितत्वं वा उपकारकत्वं वा पारार्थ्यं वा। नाद्यः; बीजाद्यविनाभूतस्याङ्कुरादेर्बीजादिशेषत्वापत्तेः, 'येन विना यन्न भवति स तस्य शेषः' इति विवक्षायामपि सव्येतरविषाणयो रूपरसादीनामाग्नेयाग्नीषोमीयादियागानां च परस्परं शेषत्वापत्तेः। नापि 'यो येन प्रयुज्यते स तस्य शेषः' इति द्वितीयः पक्षः; तुषावापाद्यप्रयोज्येषु पुरोडाशकपालादिष्वव्याप्तेः, 'पुरोडाशकपालेन तुषानुपवपति' 'वारुण्या निष्कासेन तुषैश्चावभृथमवयन्ति' इत्यादिना तेषां तुषावापादिशेषत्वविज्ञानात्। नापि 'यद्यस्मादधिकं विधीयते स तस्य शेषः' इति तृतीयः पक्षः; प्रधानापेक्षया अङ्गानां प्रत्येकमाधिक्याभावेनासंभवात्, अङ्गसमुदायस्य तत्सत्त्वेऽपि प्रत्येकमङ्गानां शेषत्वानुपपत्तेः, क्वचिदङ्गानामल्पीयस्त्वेन प्रधानानां भूयस्त्वेनाव्याप्त्यतिव्याप्त्यापत्तेश्च। नापि चतुर्थः; प्रधानविध्यपेक्षया पूर्वविहितानां शेषत्वानुपपत्तेः, पूर्वपूर्वविहिताङ्गं प्रत्युत्तरोत्तरविहिताङ्गस्य शेषत्वापत्तेश्च। नापि पञ्चमः, अङ्गानुष्ठानस्य प्रधानप्रयुक्तत्वेन प्रधानानामङ्गेष्वनुष्ठानलक्षणोपकारहेतुतया तेषामपि शेषत्वापत्तेः। नापि षष्ठः; पारार्थ्यं हि न परोत्पादकत्वम्, तथा सति प्रयाजादीनामाग्नेयादियागानुत्पादकत्वेन तच्छेषत्वानापातात्; अतः परोपकारकत्वमेव पारार्थ्यं वाच्यमित्युक्तदोषतादवस्थ्यम्। एवं च शेषत्वं दुर्वचमित्यत आह—

२. शेषलक्षणाधिकरणम्।

शेषः परार्थत्वात्॥ २॥

शेषशब्दो भावप्रधानः। शेषत्वं परार्थत्वादन्यदविनाभावादिकं न भवति, किंतु परार्थत्वमेव शेषत्वमित्यर्थः। परोद्देशप्रवृत्तपुरुषव्यापारगोचरत्वं पारार्थ्यम्। ततश्च प्रधानस्याङ्गोद्देशप्रवृत्त्यगोचरत्वान्नातिव्याप्तिः, कर्तुर्यागाद्युद्देशप्रवृत्तसन्नीभावादिव्यापाराविषयत्वात्कालस्य च प्रतीक्षणव्यापारवि-

षयत्वादेशस्य च प्राप्त्यनुकूलव्यापारविषयत्वाद्यागशेषत्वम्। फलस्य च पुरुषेण स्वोपभोग्यतयोत्पाद्यत्वात्पुरुषशेषत्वम्। न चैतादृशं पाराऽर्थ्यं श्रुत्याद्यगम्यत्वात्कथं शेषलक्षणं भवेदिति वाच्यम्। केवलश्रुत्यादिभिः पाराऽर्थ्यस्यानभिधानेऽपि विधिसहकृतैस्तस्य बोधितत्वात्। विधिर्हि शब्दभावना चेतनप्रवर्तनारूपा। सा च फलोद्देश्यकव्यापारे चेतनं प्रवर्तयितुं शक्नोति [1]नानुद्दिष्टफल इत्यर्थाद्विधिविषयस्य फलोद्देशव्यापारविषयत्वं गमयति। तत्र 'सोमेन यजेत' इत्यादौ प्रवर्तनात्मको विधिः साक्षादर्थभावनात्मकपुरुषव्यापारं विषयीकरोति तद्विशेषणतया धात्वर्थं तद्विशेषणतया सोमादीनपि, विधेर्विशिष्टविषयत्वाद्धात्वर्थस्य पदश्रुत्या भावनाविशेषणत्वस्य सोमादीनां च तृतीयाश्रुत्यादिना धात्वर्थविशेषणत्वस्यावगमात्। एवं च श्रुत्यादिना तत्तत्पदार्थविशेषणत्वमुखेन पाराऽर्थ्यबोधकविधौ साहाय्याचरणाद्भवति श्रुत्यादिगम्यं पाराऽर्थ्यं शेषलक्षणम्। परार्थत्वाच्छेष इत्युच्यते इत्यपि सूत्रं व्याख्येयम्। ततश्च शेषलक्षणं शेषपदप्रवृत्तिनिमित्तं चास्मिन्सूत्रे श्रुत्यैव निरूपितं भवति। केचित्तु श्रुत्या प्रवृत्तिनिमित्तं कथितम्, अर्थात्तु शेषस्वरूपमित्याहुः॥

उक्तं शेषत्वं क्वचिदेव नियतमित्याह—

द्रव्यगुणसंस्कारेषु बादरिः॥ ३॥

व्रीह्यादीनि द्रव्याणि, आरुण्यादयो गुणाः, अवघादिक्रियाः संस्काराः। एतेषु पुरोडाशा-

३. शेषलक्ष्याधिकरणम्। दिनिर्वृत्त्या यागं प्रति शेषत्वमेव विद्यते न तु फलपुरुषकर्मस्विव शेषत्वं शेषित्वं चेत्युभयरूपत्वमिति बादरिराचार्यो मन्यते; तद्युक्तमित्यर्थः॥

तदिदं बादरिमतं परिष्कुर्वन्कर्मणां तावदुभयरूपत्वमुपपादयति—

कर्माण्यपि जैमिनिः फलार्थत्वात्॥ ४॥

पुरुषं फलं च प्रति कर्माणि आग्नेयादियागरूपाणि शेषतया शेषितयापि जैमिनिर्मन्यते। तत्र व्रीह्यादिवत्पुरुषस्य यागनिर्वर्तकत्वेन शेषत्वात्तं प्रति यागानां प्राधान्यं यागानां [2]फलार्थतया यागशेषिभूतफलं प्रति पुरुषस्य प्रधानतया पुरुषं प्रति तेषां गुणत्वं च विद्यते। शेषिभूतं फलं प्रत्येव यागानां शेषत्वे हि तच्छेषिणं पुरुषं प्रति तेषां सुतरां शेषत्वमिति पुरुषं प्रति सिद्धं यागानामुभयरूपत्वम्। तदेवं यागानां फलशेषिणं पुरुषं प्रति प्राधान्ये सति पुरुषशेषभूतं फलमपि प्रति प्राधान्यम्, स्वशेषिणं प्रत्येव प्रधानत्वे शेषभूतं स्वं प्रति सुतरां प्राधान्यस्य वक्तव्यत्वात्। तदेवं फलं प्रत्यपि यागानामुभयरूपत्वम्॥

1. नानिर्दिष्ट— क, घ, ङ. 2. परार्थतया— ख, ग.

अथ फलस्य यागान्प्रत्युभयरूपत्वमुपपादयति—

फलं च पुरुषार्थत्वात् ॥ ५ ॥

यागान्पुरुषं च प्रति फलमप्युभयरूपतया जैमिनिर्मन्यते । कुतः । पुरुषार्थत्वात्। फलस्य हि यागनिष्पाद्यतया प्राधान्याद्यागसाधनं पुरुषमपि प्रति प्राधान्यम्, शेषिणं प्रति प्रधानत्वे तच्छेषमपि प्रति प्राधान्यावश्यंभावात् । पुरुषं प्रति फलस्योपभोग्यत्वेन गुणस्य स्वशेषिपुरुषं प्रत्यनुष्ठेयत्वेन शेषिभूतं यागं प्रत्यपि गुणत्वम्, यागशेषपुरुषशेषस्य सुतरां यागशेषत्वात् पुरुषोपभोग्यत्वात्फलं तच्छेषः; अनुष्ठेयतया पुरुषशेषियागं प्रति [1]शेषित्वात्पुरुषं प्रति प्रधानं च ॥

तदेवं फलस्य यागं पुरुषं च प्रत्युभयरूपत्वं निरूप्य पुरुषस्य तन्निरूपयति—

पुरुषश्च कर्मार्थत्वात् ॥ ६ ॥

पुरुषोऽपि यागं फलं च प्रत्युभयरूप इति जैमिनिर्मन्यते । कुतः । कर्मार्थत्वात् । पुरुषस्य फलं प्रति भोक्तृत्वेन प्राधान्यात्तत्साधनं यागमपि प्रति प्राधान्यम्, यागशेषिभूतं फलं प्रति प्रधानस्य पुरुषस्य तच्छेषभूतं यागं प्रत्यपि प्राधान्यावश्यंभावात्, शेष्यपेक्षया प्रधानस्य सुतरां तच्छेषापेक्षया प्रधानत्वात् । यागं प्रति पुरुषस्य शेषत्वाद्यागसाध्यं फलं प्रत्यपि शेषत्वम् । तथा च कर्मफलपुरुषेषु शेषत्वं शेषित्वं च, द्रव्यगुणसंस्कारेषु तु शेषत्वमेवेति स्थितम् । तदुक्तं वार्तिके 'द्रव्यादेर्यत्र शेषत्वं तत्र नैवास्ति शेषिता । फलयागनराणां तु द्वयाकारत्वं परस्परम् ॥' इति ।

तदेवं वृत्तिकारानुसारेण सूत्रचतुष्टयमिदं व्याख्यातम् । भाष्ये त्वन्यथा व्याख्यातम् । तद्यथा— **द्रव्यगुणसंस्कारेषु बादरिः** । व्रीह्यादिद्रव्यं तावत्पुरोडाशादिकार्यं निर्वर्तयति; गुणस्त्वरुणादिः क्रयादिक्रियासाधनं गवादिद्रव्यं परिच्छिनत्ति । अवघातादिसंस्कारोऽपि यागसाधनपुरोडाशादिनिर्वृत्तये चोदितस्य व्रीह्यादिद्रव्यस्य स्वरूपेणायोग्यतया वैतुष्यादिमुखेन तद्योग्यत्वमापादयति । यागस्तूत्पन्नविनष्टो न स्वर्गादिफलं साधयितुमीष्टे । न च 'यजेत स्वर्गकामः' इत्यादिवाक्यस्य का गतिरिति वाच्यम् । तत्र हि यागकर्तव्यतामात्रमुच्यते । स्वर्गादिशब्दाश्च स्रक्चन्दनादिपरतया साधनानुवादतयाप्युपपन्नाः । न च भावार्थाधिकरणे धात्वर्थस्य करणत्वमुक्तमिति वाच्यम्। उक्तस्यापि तस्य षष्ठे स्वर्गकामाधिकरणे समानपदश्रुत्या धात्वर्थस्यैव फलत्वं न तु स्वर्गादेरित्याक्षिप्य साध्यिष्यमाणत्वात् । ततश्च स्वर्गकामाधिकरणन्यायेन भाव्यत्वात्प्रत्युत्यनन्तरमेव भावार्थाधिकरणप्रवृत्तिरिति नेदानीं तद्विरोधशङ्कावकाशः । तस्मान्न यागस्य शेषत्वम् । फलं तु यागं प्रति साध्यमानत्वात्प्रधानम्। फलभोक्तृत्वात्पुरुषोऽपि प्रधानम्। तस्माद्द्रव्यगुणसंस्कारेष्वेव शेषत्वं न तु कर्मफलपुरुषेष्विति

1. शेषत्वात्—क, ख, ग, घ, ङ. 2. अन्यत्र क्वचिदिदं सूत्रमेव न दृश्यते.

बादरिर्मन्यते। तदेतन्निराकरोति—**कर्माण्यपि जैमिनिः फलार्थत्वात्** इति। कर्माण्यपि फलशेषतया जैमिनिर्मन्यते। कुतः। फलार्थत्वात्। स्वर्गकामाधिकरणसिद्धान्ते धात्वर्थस्य भाव्यताया निराकरिष्यमाणत्वेन भावार्थाधिकरणन्यायेन करणत्वे सति फलार्थताया अक्षतेः। सिद्धे च तस्य फलकरणत्वेऽपूर्वं तन्निर्वाहकमाश्रीयत इति नश्वरस्यापि [1]फलार्थत्वमुपपद्यते। अतः कर्मणामप्यस्ति फलं प्रति शेषता। स्वर्गकामाधिकरणस्य प्रपञ्चार्थश्चायमारम्भः। फलस्यापि शेषत्वमस्तीत्याह— **फलं च पुरुषार्थत्वात्** इति। फलं च पुरुषं प्रति शेषः। कुतः। पुरुषार्थत्वात्। फलस्य हि कामपदात्पुरुषार्थत्वं गम्यते। 'स्वर्गो मे स्यात्' इति हि कामयते न तु 'स्वर्गं आत्मानं लभताम्' इति। अतः फलं भोग्यं पुरुषो भोक्ता भवति। भोग्यं च भोक्तारं प्रति शेषभूतम्। तस्मात्फलस्यापि शेषत्वम्। पुरुषस्य तदाह—**पुरुषश्च कर्मार्थत्वात्** इति। पुरुषश्च शेषभूतः। कुतः। कर्मार्थत्वात्। कर्मनिर्वर्तकत्वात्। न च कर्तुः कर्मार्थत्वं न श्रुत्यादिगम्यमिति वाच्यम्। 'यजेत' इत्याख्यातेन क्रियावाचकेन तदाश्रयस्य कर्तुराक्षेपादेव गुणतया लाभात्, 'यजमानेन संमितौदुम्बरी भवति' इत्यादौ तृतीयाश्रुत्यादिना [2]कर्तुर्विहितत्वाच्च। तस्मात्पुरुषोऽपि कर्मशेष इति। विस्तरस्त्वन्यत्र ज्ञेयः॥

तदेवं शेषस्वरूपेऽवगमिते प्राप्तावसरस्तद्विनियोगविचारः प्रस्तूयते। आ बलाबलविचारात्तद्विनियोगविचारः। शेषस्य शेषिणासहान्वयबोधनं विनियोग इत्युच्यते। तत्र विनियोजकेषु श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यात्मकेषु षट्सु प्रमाणेषु श्रुतेः प्राबल्यादस्मिन्पादे श्रुतिविनियोगप्रकारः [3]प्राधान्येनाभिधीयते। श्रुतिर्नाम कर्मत्वकरणत्वादिकारकविभक्तिः प्रत्यक्षश्रवणं वाचकताशक्तिश्च। सन्ति तावत् 'व्रीहीनवहन्ति' 'तण्डुलान्पिनष्टि' इत्यादय औषधसंयोगेन श्रुता धर्माः, 'आज्यमुत्पुनाति' 'विलापयति' इत्यादय आज्यसंयुक्ताः, 'वत्सानपाकरोति' 'सायंदोहं दोहयति' 'कुम्भ्यामासिञ्चति' इत्यादयः सांनाय्यसंयुक्ताः। ते किं सर्व औषधादीनां सर्वेषामपि शेषभूताः, उत यथासंयोगं व्यवस्थया शेषभूता इति संशयः। तत्र सिद्धान्तेनोपक्रमते—

४ अवहननादीनां व्यवस्थितविषयताधिकरणम्।

तेषामर्थेन संबन्धः॥ ७॥

तेषाम् अवघातादीनाम् अर्थेन यागसाधनपुरोडाशादिविध्यपेक्षितवैतुष्यादिप्रयोजनवशेन व्यवस्थया संबन्धः समावेश इत्यर्थः॥

तत्र पूर्वपक्षी प्रत्यवतिष्ठते—

1. यागस्य फलार्थत्वम्—ङ. 2. विहितत्वात्—ख, ग. 3. प्राधान्यात्—ख.

विहितस्तु सर्वधर्मः स्यात्संयोगतोऽविशेषात्प्रकरणाविशेषाच्च ॥ ८ ॥

तुर्नार्थः । अवघातादिधर्मस्तावन्न व्रीह्यादिषु स्वरूपोद्देशेन विधीयते, तस्य तत्रानर्थक्यात् । [1]किंत्वपूर्वसाधनरूपोद्देशेनैवेति नवमाद्याधिकरणे वक्ष्यते । अपूर्वं च 'यजेत स्वर्गकामः' इति श्रुतफलकरणत्वान्यथानुपपत्त्या [2]कल्प्यमानमाग्नेयादियागानां समुदितानामेकफलसाधनत्वादेकमेव कल्प्यते । तदपूर्वसाधनरूपोद्देशेन विहितोऽवघातादिः सर्वेषामेव तेषामव्यवस्थया धर्मः स्यात्, न तु श्रुतस्यैव । कुतः । संयोगतः अविशेषात् एकापूर्वसंयोगस्य सर्वत्राविशिष्टत्वात् । नन्वाग्नेयादियागानामुत्पन्नविनष्टानां क्रमिकाणां साहित्येन प्राच्योदीच्याङ्गोपकृतानां फलजनकत्वनिर्वाहायावान्तरापूर्वावश्यंभावे सति अवघातादीनां तत्तदपूर्वसाधनेषु व्यवस्थयैव समावेशः सिध्यतीत्याशङ्कायामपि संयोगतोऽविशेषात् इत्येवोत्तरम् । संयोगतः संयोगे धर्माणां संबन्धे अविशेषात् अविशेषकत्वात् । अवान्तरापूर्वाणां सत्त्वेऽपि यागस्वरूपवदेव तेषां निष्फलत्वेन धर्मप्रयोजकशक्तिर्नास्तीति फलापूर्वमेव प्रधानत्वाच्च प्रयोजकमवधार्यते । अस्तु वावान्तरापूर्वाणां धर्मप्रयोजकत्वम्, तथापि न धर्मव्यवस्थासिद्धिः । कुतः । प्रकरणाविशेषात् प्रकरणगतापूर्वसाधनमात्रोद्देशेन धर्मा विधीयमानाः प्रकरणगतत्वाविशेषात्सकलावान्तरापूर्वसाधनोद्देशेन विज्ञायन्ते । ननु व्रीह्यादिपदमेव धर्मव्यवस्थापकम्, अन्यथा तद्वैयर्थ्यादित्यत आह—चेति । व्रीहित्वादेर्लक्षणामात्रौपयिकत्वेनानियामकत्वादित्यर्थः । व्रीह्यादिपदं हि स्वाभिधेयव्रीहित्वाद्येकार्थसमवेतमपूर्वसाधनत्वं गमयति; न तु तत् स्वार्थव्रीहित्वादिपरम्, येन तद्धर्मेनियामकं स्यात् । न च वैतुष्यादिप्रयोजनवशाद्व्यवस्था धर्माणामिति वाच्यम् । दृष्टप्रयोजनाभावेऽदृष्टप्रयोजनस्य कल्पयितुं शक्यत्वात् । तस्मादप्रकृतापूर्वसाधनं वर्जयित्वा सर्वत्र सर्वे धर्माः संबध्यन्त इति ॥

तदेवं पूर्वपक्षिणोत्प्रेक्षितं सिद्धान्ती निराचष्टे—

अर्थलोपादकर्म स्यात् ॥ ९ ॥

अवघातादीनामाज्यादौ अकर्म अकरणं स्यात् । कुतः । अर्थलोपात् । अर्थस्यावघातादिकार्यस्य वैतुष्यादिलक्षणस्य लोपात् असंभवात् ।

नन्ववघातादीनामाज्यादौ विधिवशाददृष्टं प्रयोजनं कल्प्यत इत्यत आह—

फलं तु सह चेष्टया शब्दार्थोऽभावाद्विप्रयोगे स्यात् ॥ १० ॥

1. किं त्वपूर्वसाधनस्वरूपो—क. 2. कल्प्यम्—ख.

तुशब्दो वैषम्ये । दृष्टस्य फलस्य विप्रयोगे अनुपलब्धौ सत्यां तस्याभावनिश्चयात् शब्दार्थः [1]विधिबलकल्प्योऽर्थः अदृष्टोपकारः स्यात् । न त्विह तथा। किंत्ववघातादीनां चेष्टया अनुष्ठानेन सहितं तदव्यवहितोत्तरकालकं फलं वैतुष्यादि दृष्टकार्यमुपलभ्यते । यद्वा चेष्टया अवघातादिक्रियया सह श्रुतेषु व्रीह्यादिषु वैतुष्यादि दृष्टकार्यमुपलभ्यते । अथवा 'सक्षीरा गौः' इत्यादिवत्सहशब्दो विद्यमानतायाम् । चेष्टया अवघातादिक्रियया उत्पाद्यं वैतुष्यादि दृष्टकार्यं विद्यते । दृष्टे संभवति च नादृष्टकल्पना युज्यते। न चावघातादीनां व्रीह्यादिषु दृष्टकार्यसंभवेन तत्रादृष्टकल्पनाभावेऽप्याज्यादौ तदभावाददृष्टोपकार एव कल्प्यत इति वाच्यम् । क्वचिदपि दृष्टसंभवे तत एव विधिचारितार्थ्येनार्थापत्तेरनुन्मेषे सत्यन्यत्रादृष्टकल्पनानुदयात्। नाप्यत्र कृष्णलेष्विव पाकस्य आज्यादिष्वप्यवघातादीनामाहत्य विधानमस्ति, येन तत्सामर्थ्याददृष्टोपकारः कल्प्येत । यदुक्तमवान्तरापूर्वाणि निष्फलत्वान्न धर्मप्रयोजकानीति तन्न, परमापूर्वसिद्धयौपयिकत्वेन तेषामपि फलवत्त्वात् । नन्वेवमपि प्रकरणाविशेषात्सकलावान्तरापूर्वाणां धर्मप्रयोजकत्वं स्यादित्याशङ्कायामप्येतदेव सूत्रमुत्तरम् । विप्रयोगे अवान्तरापूर्वस्याभावे सति परमापूर्वस्य च धर्मस्य व्यवस्थापकत्वाभावात्, शब्दार्थो व्रीह्यादिशब्दस्य आज्यादिरप्यर्थः, स्यात् संभाव्येत, परमापूर्वसाधनत्वाविशेषात्। नैवमस्ति । किंतु चेष्टया अवघातादिक्रियया सह श्रुतेषु व्रीह्यादिषु तण्डुलपिष्टादिप्रणाड्या तत्तद्यागजन्यमवान्तरापूर्वं नाम फलमस्ति । परमापूर्वसिद्धयौपयिकत्वादपि तस्य फलत्वव्यपदेशः । तस्मिंश्चावान्तरापूर्वे यागः साक्षात्साधनम्, तद्द्वारा परमापूर्वं प्रति । ततश्च व्रीहिशब्दोऽयं तण्डुलादिप्रणाड्या व्रीहिसाध्ययागद्वारेणापूर्वमुपस्थापयन्प्रथमातिक्रमे कारणाभावात्प्रधानभूतमपि परमापूर्वमुपेक्ष्य [2]प्रत्यासन्ने स्वीयावान्तरापूर्व एव [3]निपातितो न परमापूर्वं कर्मान्तरापूर्वं वापेक्षते । ततश्च 'व्रीहीनवहन्ति' इत्यत्र [4]तण्डुलसाध्ययागीयापूर्वसाधनमवहन्तीति गम्यते, व्रीहित्वस्यापि तत्र निवेशे यवेषु तत्प्रवृत्त्यनापत्तेः । न चैवं सति स्रुवादीनामप्यवघातापत्तिरिति वाच्यम् । प्रदेयतया तादृशसाधनत्वस्य विवक्षितत्वात् । न च वाक्यभेदः शङ्क्यः, एकेनैव व्रीहिपदेनाग्नेयाग्नीषोमीयैन्द्राग्नोत्पत्त्यपूर्वजनकयागनिष्ठकार्यतानिरूपितप्रदेयद्रव्यप्रकृतिभूततण्डुलरूपव्यापारकसाधनताश्रयत्वस्योद्देश्यतावच्छेदकत्वेन लक्षणया विवक्षितत्वात् । अन्यथा 'अश्वाभिधानीम्' इत्यादौ का गतिः । एतेनापूर्वत्रयस्यैकानुगमकाभावाद्वाक्यभेद इत्यपि प्रत्युक्तम् । व्रीहित्वपुरोडाशत्वाद्यनिवेशाच्च यवादिषु चर्वादिप्रकृतिद्रव्येष्वप्यवघातः प्रवर्तते । एवम् 'तण्डुलान्पिनष्टि' इत्यत्र तण्डुलरूपव्यापारपदस्थाने पिष्टरूपव्यापारपदं देयम् । एवमन्यत्राप्युद्देश्यतावच्छेदकं यथायथमूह्यम् । तस्मादवघातादिधर्माणां दृष्टकार्यानुरोधेन व्यवस्थयैव प्रवृत्तिरित्यास्तां तावत् । इति व्यवस्थाधिकरणम् ॥

1. विधिबलात्कल्प्यः—ङ. 2. प्रत्यासक्ते स्वीयापूर्वे—ङ. 3. निपतितः—क, ग, घ, ङ. 4. इत्यनेन—क, ग, घ, ङ.

दर्शपूर्णमासयोः श्रूयते 'स्फयश्च कपालानि चाग्निहोत्रहवणी च शूर्पं च कृष्णाजिनं च शम्या चोलूखलं च मुसलं च दृषच्चोपला चैतानि वै दश यज्ञायुधानि' इति। यज्ञसाधनानीत्यर्थः।

५. स्फ्यादीनां संयोगानुसारेण व्यवस्थितत्वाधिकरणम्।

इदं च श्रूयते— 'स्फ्येन वेदिमुद्धन्ति' 'कपालेषु श्रपयति' 'अग्निहोत्रहवण्या निर्वपति' 'शूर्पेण परापुनाति' 'कृष्णाजिने उलूखलमवधाय मुसलेनावहन्ति' 'शम्यायां दृषदमत्याधाय उपलया पिनष्टि' इति। तत्र किं स्फ्यादिभिर्यत्कर्तुं शक्यते तत्र सर्वत्र तेषां शेषत्वम्, उत श्रुतोद्धननादिकार्यवशेन व्यवस्थेति संशयः। तत्र शक्यसर्वकार्यार्थत्वेऽप्यवघातादीनामिव दृष्टार्थतालाभस्याविशेषात् 'यज्ञायुधानि' इति सामान्यश्रुतयागीयपरमापूर्वसाधनत्वस्योत्पत्तिशिष्टपुरोडाशाद्यवरुद्धयागं प्रति साक्षादसंभवत आनर्थक्यतदङ्गन्यायेन तदङ्गभूतोद्धननादिमुखेनावतरतः सर्वकार्यमुखेन निवेशसंभवाद्ब्रीह्यादिवदवान्तरापूर्वाभावाच्च स्फ्यादीनां सर्वार्थत्वमेव युक्तम्। 'स्फ्येन वेदिमुद्धन्ति' इत्यादिवाक्यजातं तु 'यज्ञायुधानि' इति प्राप्तत्वाद्वैश्वानराधिकरणन्यायेनावयुत्यानुवाद इति प्राप्ते, सिद्धान्तयति—

द्रव्यं चोत्पत्तिसंयोगात्तदर्थमेव चोद्येत ॥ ११ ॥

चशब्द उक्तसमुच्चये। द्रव्यं स्फ्यादिकमप्यवघातादिवद्यत्कार्यसंयोगेन श्रुतं तदर्थमेव चोद्येत प्रतीयेत। कुतः। उत्पत्तिसंयोगात् 'स्फ्येनोद्धन्ति' इत्यादिविधिवाक्येषु स्फ्यादीनामुद्धननादिकार्यविशेषसंयोगश्रवणात्। 'यज्ञायुधानि' इत्यस्य विधायकत्वे हि स्फ्यादिवाक्यानां बहूनामानर्थक्यं स्यात्। न चानुवादतया सार्थक्यम्, उद्धननादिकार्यस्यान्येनापि संभवेन ततः स्फ्यादेर्नित्यप्राप्त्यभावात् पाक्षिकानुवादत्वे च नित्यवच्छ्रवणविरोधात्। वरं च बह्वानर्थक्यादेकानर्थक्यम्। आख्याताभावाद्वैशब्दाच्च न विधायकं यज्ञायुधवाक्यम्। तस्मादुद्धननादिवाक्यान्येव विधायकानि। एवं च सति नातीवानर्थकं यज्ञायुधवाक्यमपि, 'यज्ञायुधानि संभरति' इति विधेयपात्रासादनं स्तोतुमनुवादतया सार्थक्यात्। ततश्च स्फ्यादीनां श्रुतोद्धननादिकार्यवशेन व्यवस्थयैव शेषत्वमिति दिक्। इति वृत्तमधिकरणम्॥

६. अरुणाधिकरणम्।

ज्योतिष्टोमे श्रूयते 'अरुणया पिङ्गाक्ष्यैकहायन्या सोमं क्रीणाति' इति। तत्र किमरुणयेत्येतत्क्रीणातौ नान्वेति नाप्येकहायन्यां किंतु प्राकरणिके सर्वस्मिन्सोमादिद्रव्ये 'यत्सोमादिव्यक्त्या प्रकृतं कार्यं साधनीयं तदरुणया साधयेत्' इति, किं वा क्रीणातिना संबध्य तत्साधनीभूतायामेकहायन्यां निविशत इति संशयः। तत्र श्रुत उद्धननादिकार्ये स्फ्यादीनामन्वययोग्यत्वेन तन्मात्रार्थत्वसंभवेऽपि प्रकृत आरुण्यस्यामूर्तत्वेन क्रयं प्रति करणत्वासंभवेन 'तेषामर्थेन संबन्धः' इत्यधिकरणे 'विहितस्तु सर्वधर्मः स्यात्संयोगतोऽविशेषा-

त्रकरणाविशेषाच्च' इति पूर्वपक्षसूत्रोक्तन्यायेन प्रकृतापूर्वसाधनद्रव्यमात्रे निवेशो युज्यते। न च कारकाणां क्रियान्वयित्वनियमात्प्रकृतसोमादिद्रव्ये 'अरुणया' इति करणकारकस्य कथं निवेशः, सोमादिद्रव्यवाचकशब्दस्येहानुपादानाच्च; न हि तदुपादानादृते सोमादिद्रव्यमनूद्यारुण्यस्य विधिः संभवति, प्रकरणस्य साक्षाद्विनियोजकत्वाभावादिति वाच्यम्। अरुणाशब्दो ह्यारुण्यगुणविशिष्टद्रव्ये वर्तते। स्त्रीलिङ्गनिर्देशात्, 'गुणवचनानामाश्रयतो लिङ्गवचनानि' इति गुणोपसर्जनद्रव्यवाचिनां विशेष्यलिङ्गत्वविधानात्, 'गुणवचनानाम्' इत्यस्य केवलगुणवाचिशब्दपरत्वे वचनग्रहणानर्थक्यात्, 'गुणानाम्' इत्येतावतैव 'स्वं रूपं शब्दस्य—' इति गुणवाचकशब्दलाभात्। न च 'स्वं रूपं शब्दस्याशब्दसंज्ञा' इति गुणशब्दस्यैव स्वरूपेण ग्रहणनिवृत्तये वचनग्रहणमिति वाच्यम्। 'गुणानाम्' इति बहुवचनेन तल्लाभात्, 'जले शुक्लः' इत्यादौ शुक्लादिशब्दानां केवलगुणवचनानामप्याश्रयलिङ्गत्वापत्तेश्च; 'गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वति' इति कोशे शुक्लादिशब्दानां केवलगुणपरत्वे पुंलिङ्गतायास्तद्विशिष्टद्रव्यपरत्वे विशेष्यलिङ्गतायाश्चाभिधानाच्च। तस्मादारुण्यगुणविशिष्टपरोऽरुणाशब्दः। तृतीया करणत्वे वर्तते। तत्र विशेष्यं द्रव्यं करणभूतमनूद्य विशेषणभूत आरुण्यगुणः परिच्छेदकतया विधीयते, न तु करणतया, येन द्रव्यसंबन्धो नोपपद्येत। प्रकृत्या च द्रव्यस्य विशेष्यतयोपादानान्न तदनुपादानम्। न च पदस्यैकप्रसरत्वात् एकदेशेन प्रत्ययेन करणतया प्रकृत्या च विशेष्यतया द्रव्यमनूद्य प्रकृत्यैव विशेषणभूतारुण्यस्य कथं विधिरिति वाच्यम्। 'आज्यानां च सर्वसंयोगात्' इत्यग्निमपञ्चमपादे 'वषट्काराच्च भक्षयेत्' इत्यधिकरणे हि 'वषट्कर्तुः प्रथमभक्षः' इत्यत्र समासवशेन प्राथम्यभक्षयोरेकोपस्थितिविषयत्वात्प्रथमभक्षशब्दे एकदेशेन भक्षमनूद्यैकदेशेन प्राथम्यं न विधातुं शक्यत इति वक्ष्यते। इह त्वरुणाशब्देऽजहत्स्वार्थलक्षणया प्रवृत्ते गुणगुणिनोः शक्तिलक्षणाभ्यां भिन्नोपस्थितिविषयत्वान्नैकप्रसरत्वकृतो दोषः। न चारुणाशब्दस्यारुणगुणकद्रव्यपरत्वे तस्य द्रव्यस्य क्रय एव करणतया विधिसंभवात्कथं वाक्यतो विभज्य 'अरुणया' इत्यस्य प्रकृतसोमादिद्रव्योद्देशेनारुण्यविधायकत्वसंभव इति वाच्यम्। श्रौतैकहायन्यवरुद्धे क्रये लाक्षणिकद्रव्यान्तरविधानासंभवात्। एकहायनीद्रव्यं हि श्रुत्या प्रतिपाद्यते; अरुणगुणकद्रव्यं तु लक्षणया। ततश्च श्रौतस्य शीघ्रप्रवृत्तिकस्यैकहायनीद्रव्यस्य लाक्षणिकमन्दप्रवृत्तिकारुणद्रव्यान्वयात्प्रागेव क्रयेऽन्वये सति तदवरुद्धे क्रये पश्चादरुणद्रव्यस्यान्वयासंभवः। यथा पदश्रुत्या प्रथमतो धात्वर्थस्य करणत्वेनान्वये तदवरुद्धायां भावनायामुपपदार्थस्य पश्चान्न करणत्वेनान्वयस्तद्वत्। न च द्रव्यान्तरविध्यसंभवेऽपि यथा पिङ्गाक्षीशब्देनैकहायनीशब्देन चैकमेव द्रव्यं विधीयते तथारुणाशब्देनापि तदेव विधीयतामिति वाच्यम्। वैषम्यात्। पिङ्गाक्ष्येकहायनीशब्दयोर्हि श्रुतिवृत्तत्वाविशेषेण युगपत्प्रवृत्तेर्विनिगमनाविरहात्ताभ्यामेकद्रव्यविधानं संभवति। अरुणाशब्दस्तु न तद्विधातुमर्हति, श्रुतिवृत्ताभ्यां पिङ्गाक्ष्येकहायनीशब्दाभ्यां प्रथमतो विहितस्य पुनर्विधानासंभवात्। तत्रापि पिङ्गाक्ष्येकहायनीशब्दयोर्द्रव्ये श्रुतिवृत्तत्वं बहुश्री-

हिसमासवशादध्यवसीयत, बहुव्रीहेरन्यपदार्थशक्तेरग्रिमपाद इन्द्रपीताधिकरणे व्यवस्थापयिष्यमाणत्वात्। न चारुणाशब्दस्यापि गुणिनि शक्तिरेवास्तु, तथा च पिङ्गाक्ष्येकहायनीशब्दयोरिव तस्यापि क्रीणातावेव युगपदन्वयसंभव इति वाच्यम्। अरुणाशब्दो हि गुणे सत्येव द्रव्ये प्रयुज्यते नासतीत्यन्वयव्यतिरेकाभ्याम् आकृत्यधिकरणव्युत्पाद्येन 'नागृहीतविशेषणा विशेष्ये बुद्धिरुत्पद्यते' इति न्यायेन च केवलगुणवाचको लक्षणया द्रव्येऽपि प्रयुज्यते। एवं नीलादिशब्दोऽपि। न च 'रूपो घटः' इत्यादिप्रयोगः स्यादिति वाच्यम्। रूपरसगन्धस्पर्शानां स्वाभाव्यादेव द्रव्ये लक्षणयापि प्रयोगाभावात्। उक्तं च वार्तिके 'अन्वयव्यतिरेकाभ्यां यं कदाचिन्न मुञ्चति। स एव तस्य वाच्योऽर्थो गुणं चैष न मुञ्चति॥' इति 'निरूढा लक्षणाः काश्चित्सामर्थ्यादभिधानवत्। क्रियन्ते सांप्रतं काश्चित्काश्चिन्नैव त्वशक्तितः॥ तस्माद्यथैव शब्दानां शक्तिभेदोऽभिधां प्रति। प्रत्येतव्यस्तथार्थानां लक्ष्यार्थान्तरगोचरः॥' इत्यादि। न च वाक्यभेदं विनैवारुणाशब्द एकहायन्यामेव गुणविधिरित्यभ्युपगम्यतामिति वाच्यम। एकस्मिन्नेव वाक्ये क्रये पिङ्गाक्ष्येकहायन्याः तस्यां चारुण्यस्य विधौ वाजपेयाधिकरणोक्तरीत्या विरुद्धत्रिकद्वयापत्तौ विध्यावृत्तिलक्षणवाक्यभेदापत्तेः। वरं च प्रधानभूतस्य विधेरावृत्त्यपेक्षया वाक्यभङ्गाश्रयणम्। तस्मादारुण्यस्य प्रकृतसर्वद्रव्येषु समावेशः। ततश्च सर्वाणि करणान्यरुणीकर्तव्यानीति प्राप्ते, सिद्धान्तयति—

अर्थैकत्वे द्रव्यगुणयोरैककर्म्यान्नियमः स्यात्॥ १२॥

द्रव्यगुणयोः एकहायनीद्रव्यस्य आरुण्यगुणस्य च नियमः परस्परान्वयमुखेनैकस्यामेव क्रयभावनायामन्वयः, न त्वेकहायन्याः क्रयभावनायाम् आरुण्यस्य तु द्रव्यान्तरेष्वन्वयमुखेन तत्तद्भावनासु। कुतः। ऐककर्म्यात्, एकं कर्म क्रियापदं यस्मिन्पदजाते तदेककर्म, तस्य भाव ऐककर्म्यम्, तस्मात्। अरुणादिवाक्ये एकस्या एव क्रयभावनायाः श्रवणादिति यावत्। नन्वारुण्यस्यामूर्तत्वात्कथं क्रये करणतयान्वयः, कथं वैकहायन्याम, कारकाणां मिथः संबन्धायोगात्; न चारुण्यस्य परिच्छेदकतया तत्रान्वयसंभवः, तृतीयाश्रुतिविरोधात्; न हि तृतीयायाः परिच्छेदकतायां शक्तिरस्ति; विरुद्धत्रिकद्वयापाताच्च; तस्माद्धाक्यं भङ्क्त्वा आरुण्यस्य द्रव्यान्तरेष्वन्वयमुखेन तत्तद्भावनास्वेव निवेशो युक्त इत्यत आह—अर्थैकत्व इति। धात्वर्थस्यैकत्वे सत्येकवाक्यभङ्गाश्रयणस्यायुक्तत्वादित्यर्थः। तथाहि—'अरुणया' इत्यत्र स्त्रीप्रत्ययान्तया प्रकृत्या तावल्लक्षणया तद्गुणविशिष्टद्रव्यं गम्यते। तत्र गम्यमानमपि [1]द्रव्यांशं लाक्षणिकत्वादुपेक्ष्य तृतीया श्रौतं गुणमेव क्रयं प्रति करणतयाभिधत्ते। वस्तुतस्तु अरुणशब्दो द्रव्यमलक्षयन्केवलगुणे वर्तते, मुख्ये संभवति लक्षणाश्र-

1. द्रव्यार्थं - ख.

यणस्यासंभवात्। न चैवं सति 'गुणवचनानामाश्रयतो लिङ्गवचनानि' इति गुणोपसर्जनद्रव्यप्रतिपादकानामेव शुक्लादिशब्दानामाश्रयलिङ्गत्वाभिधानात् 'अरुणया' इति स्त्रीलिङ्गनिर्देशोऽनुपपन्न इति वाच्यम्। गुणोपसर्जनद्रव्यप्रतिपादनयोग्यानां परिच्छेद्यमुखेन क्रियान्वयिनां परिच्छेद्यद्रव्यलिङ्गसंबन्ध इति हि तदर्थः। भवति च 'अरुणाश्वः' इत्यादावरुणशब्दोऽवश्यं तद्गुणकद्रव्यवचन इति तस्येह केवलगुणवचनत्वेऽपि परिच्छेद्यैकहायनीद्वारा लिङ्गान्वयः। रूपादिशब्दानां तु मतुबादि विना कदापि द्रव्ये प्रयोगाभावान्न परिच्छेद्यलिङ्गत्वमिति 'घटो रूपः' इत्यादिप्रयोगस्याप्रसक्तिः। 'जले शुक्लोऽस्ति' इत्यत्र परिच्छेद्यमुखेन क्रियानन्वयिनः शुक्लादिशब्दा न गुणिलिङ्गकाः; परिच्छेद्यमुखेन क्रियान्वयिनस्तु गुणिलिङ्गकाः; यथा 'शुक्लां गामानय' इत्यादावित्यर्थः। तत्सिद्धमरुणाशब्दस्य स्त्रीप्रत्ययान्तस्यापि केवलगुणवचनत्वम्। तृतीया च तदारुण्यं करणतयाभिधत्ते। सा चाभिदधाना आरुण्यगुणस्यामूर्तत्वात्साक्षात्क्रियासाधनताशक्तिमपश्यन्ती गुणस्य स्वाभाविकीं द्रव्यपरिच्छेदकताशक्तिं पर्यालोच्य परिच्छेद्यमुखेनैव क्रियासाधनत्वे विश्राम्यति। शक्नोति चारुण्यगुण एकहायनीं परिच्छेत्तुम्। इतरव्यावृत्ततया द्रव्यस्य प्रतीतिविशेषो हि परिच्छेदः। तथा चारुणगुणपरिच्छिन्नपिङ्गाक्ष्येकहायनीद्रव्यकरणककक्रयभावना वाक्यार्थः। तदेवमेकवाक्यत्वे सति तृतीयया गम्यमानं करणत्वं श्रौतप्रकृत्यर्थारुण्यगतं विधेयतयाश्रितं भवति। वाक्यभङ्गे तु 'अरुणया' इति तृतीया लाक्षणिकप्रकृत्यर्थद्रव्यगतकरणत्वानुवादिनी स्यात्। वाक्यभङ्गश्च संभवत्येकवाक्यत्वे युज्यते नाश्रयितुम्। न चैकहायनीपरिच्छेदकतयैवारुण्यस्य कुतः क्रये निवेशः. यत्किंचिद्द्रव्यद्वारापि क्रयसाधनत्वोपपत्तेरिति वाच्यम्। परिच्छेदकापेक्षाया एकहायन्या एकवाक्यगतेन गुणेन, परिच्छेद्यापेक्षस्य च गुणस्य स्ववाक्यगतयैकहायन्याकाङ्क्षाशान्तिसंभवे गुणान्तरेण द्रव्यान्तरेण च तच्छान्तिवर्णनस्यायुक्तत्वेनारुण्यैकहायन्योः परस्परान्वयनियमस्यावश्यकत्वात्। एतदभिप्रायेणैव सूत्रे नियमपदमुपात्तम्। अन्यथा 'ऐककर्म्यादन्वयः स्यात्' इत्येवावक्ष्यत्। न चैकार्थत्वाद्द्रव्यगुणयोर्व्रीहियववद्विकल्पः स्यादिति वाच्यम्। न ह्येकार्थत्वमात्रं विकल्पे बीजम्, द्वारैक्ये सत्येव तस्य तत्प्रयोजकत्वात्। अन्यथा पुरोडाशे कार्ये कपालशूर्पोलूखलमुसलादीनामपि विकल्पापत्तेः। अस्ति हि व्रीहीणां यवानां च यागे कार्ये द्वारमेकं पुरोडाशनिष्पादनरूपम्। प्रकृते च द्रव्यस्य विक्रेतुरानतिसंपादनद्वारा गुणस्य च द्रव्यपरिच्छेदद्वारा क्रयसाधनत्वादुभयोर्भिन्नद्वारत्वान्न विकल्पः। नन्वेवमपि 'अरुणया क्रीणाति' 'अरुणयैकहायन्या' इत्येवं न युगपदुभयत्रारुणापदस्यान्वयसंभवः, सकृच्छ्रुतस्यैकस्य पदस्य युगपदुभयान्वययोगात्; नापि पर्यायेणोभयत्रान्वयः, एकस्माद्वाक्यात्सकृच्छ्रुतात्क्रमिकार्थद्वयबोधासंभवादिति चेन्नैष दोषः। न ह्यारुण्यस्यैकहायन्यां निवेशः शाब्दः, किंत्वार्थिकः। प्रथमं हि तावदारुण्यगुणैकहायनीद्रव्योभयकरणकायां [1]क्रयभावनायां [2]शब्दमर्यादयावगतायामारुण्यस्य साक्षात्क्रयसाधनत्वशक्त्यभावं पर्यालोच्यैक-

1. करणिकायां—घ, ङ. 2. शाब्दमर्यादया—क, घ, ङ.

हायनीद्रव्यपरिच्छेदमुखेन क्रियासाधनत्वमर्थान्निवेशयति । तथा चारुण्यस्यैकहायन्यां पार्ष्टिकान्वयस्यार्थिकत्वान्न विरुद्धत्रिकद्वयदोषोऽपि । न चैवमप्यारुण्यस्य कथमेकहायन्यामेव निवेशः, 'अजया क्रीणाति' 'हिरण्येन क्रीणाति' 'धेन्वा क्रीणाति' 'ऋषभेण क्रीणाति' 'अनड्वाहा क्रीणाति' 'मिथुनाभ्यां क्रीणाति' 'वाससा क्रीणाति' इत्यजादीनामपि क्रयसाधनत्वेन तेष्वप्यारुण्यस्य निवेशसंभवादिति वाच्यम् । आरुण्यस्य स्ववाक्योपात्तक्रयं प्रति साधनभूतायामेकहायन्यामेव निवेशसंभवे सति क्रयान्तरसाधनेष्वजादिषु निवेशायोगात् । न च अजादिवाक्यानां न क्रयान्तरविधायकत्वम्, किंतु वाक्यान्तरविहितक्रयानुवादेनाजादिसाधनविधायकत्वमेवेति वाच्यम् । न हि क्रयविधायकं वाक्यान्तरमस्ति, येन तदनुवादेनाजादिसाधनं विधीयेत । न चारुणाजाहिरण्यादिवाक्येष्वेकमेव क्रयविधायकम् अन्यानि तु वाक्यानि तत्र गुणविधय इति वाच्यम् । तथा सति क्रयस्यांत्पत्तिशिष्टद्रव्यावरुद्धत्वेन तत्र वाक्यान्तरेण द्रव्यान्तरविधानायोगात् । तस्माद्विनिगमनाविरहेण प्रतिवाक्यं तत्तद्द्रव्यविशिष्टक्रयविधय इति विहितस्य पुनर्विधानात्सिद्धः क्रयभेदः । ततश्चारुण्यस्य स्ववाक्योपात्तक्रयसाधनैकहायन्यामेव निवेशः न तु क्रयान्तरसाधनाजादिद्रव्येष्विति भट्टमतानुयायी पन्थाः । अत्रेदं वक्तव्यम् । वाजसनेयशाखायाम् 'तस्मात्सोमं क्रीणाति' इति द्रव्यसंयोगेन विना सोमक्रयस्योत्पत्तिवाक्यं श्रुतम् । तदुत्पन्ने च क्रयेऽरुणादिवाक्यानि च गुणविधय एव संपद्यन्ते । ततश्च कुतः प्रतिवाक्यं क्रयस्य विधिः, कुतस्तरां तस्य पुनर्विधानम्; कुतस्तमां तस्य भेदः । अशक्यत्वाच्च । न ह्येकस्यैव सोमद्रव्यस्यैकेनैव क्रयेण निवृत्तपरस्वत्वस्य प्राप्तात्मस्वत्वस्य पुनः क्रयः संभवति; स्वद्रव्यस्य परस्वत्वापादनेन परद्रव्यस्यात्मस्वत्वापादने द्रव्यविनिमये क्रीणातेर्वृत्तेः, क्रयभेदाभ्युपगमे 'क्रयणेषु तु विकल्पः स्यादेकार्थत्वात्' 'समुच्चयो वा प्रयोगे द्रव्यसमवायात्' इति द्वादशिकचतुर्थपादीयाधिकरणस्यानुन्मेषप्रसङ्गाच्च । तत्र हि क्रयसाधनेष्वजादिद्रव्येषु विकल्पः स्यात्, एकक्रयार्थत्वादिति पूर्वपक्षयित्वा, सोमक्रयस्य प्रयोगे अनुष्ठाने द्रव्याणां समवायस्योपपत्तेः समुच्चय एव; विक्रेतुर्ह्यानतिरत्र संपाद्या; सा च बहुभिः सूपपादा; अतः कार्यप्रधानत्वात्पदार्थानां सौकर्यमालोच्य द्रव्यविधीनां सापेक्षत्वकल्पनात्समुच्चय इति सिद्धान्तयिष्यते । क्रयाणामनेकत्वे तु अजादीनामेकार्थत्वाभावात्पूर्वपक्षस्यैवानुन्मेषात्तदसंगतिः स्पष्टैव । यत्तु तन्त्ररत्नादौ द्रव्यासंयुक्तक्रयोत्पत्तिवाक्यानुपलम्भोपन्यासेन क्रयभेदं प्रसाध्य क्रयाणामेव विकल्पसमुच्चयविचारपरतया तत्सूत्रद्वयं व्याख्यातम्, तदप्युक्तयुक्त्यैव परास्तम् । द्रव्यविकल्पसमुच्चयपरतयैव भाष्ये व्याख्यातत्वाच्च, प्राभाकरैरनुमोदितत्वाच्च, सूत्रे क्रयणेष्वित्यनेन द्रव्याणामेवोपादानाच्च, क्रयणशब्दस्य करणल्युडन्तत्वात्; भावसाधनत्वे हि क्रयेष्वित्येवावक्ष्यत् । द्रव्यसमवायादित्यनेन स्पष्टमेव द्रव्यसमुच्चयवचनाच्च । 'क्रयपरिक्रयसंस्कारेषु द्रव्यसमुच्चयः' इत्यापस्तम्बसत्याषाढभारद्वाजकात्यायनादयः । किंच 'गवा ते क्रीणानि' 'अजया ते क्रीणानि'

'हिरण्येन ते क्रीणानि' इत्येवमादिमन्त्रेणैकैकस्मिन्द्रव्ये सोमविक्रयिणं प्रति प्रापिते अन्त्यवर्जं प्रतिद्रव्यं प्रतिवचनं सोमविक्रयिणो विहितम् 'भूयो वा अतः सोमो राजार्हतीति सर्वेषु पणनेषु सोमविक्रयी प्रत्याहासंपदः' इति। आ संपदः कृत्स्नमूल्यसंपत्तिपर्यन्तम्। [1]अन्तिमद्रव्यसंपत्तेः प्रागित्युक्तं भवति। एवं च एकैकेन द्रव्येणैकैकः क्रयः इत्यनुपपन्नमित्येकहायन्यजादिवाक्येषु वाक्यान्तरोत्पन्नैकक्रयानुवादेन गुणविधिरित्येव युक्तम्। न चैवं सत्यरुणावाक्ये प्राप्तक्रयानुवादेनानेकगुणविधाने वाक्यभेद इति वाच्यम्। अभ्युदयेष्ट्यधिकरणे हि 'ये मध्यमाः स्युस्तानग्नये दात्रे पुरोडाशमष्टाकपालं कुर्यात्' इत्यादिवाक्येषु प्रकृतद्रव्योद्देशेनाग्न्यादिदेवतानां दातृत्वादिगुणानां च विधौ वाक्यभेदमाशङ्क्याग्निदात्रादिशब्दानां विशिष्टैकार्थप्रतिपादकतया विशिष्टमेवैकैकमग्न्यादिदेवताकारकं विधीयत इति न वाक्यभेद इति समाहितम्। तथाप्यारुण्यविशिष्टैकहायनीविधानान्न वाक्यभेदः। न च तत्र सामानाधिकरण्याद्विशिष्टार्थप्रतिपादकत्वं युक्तम्, इह त्वरुणैकहायनीपदयोः सामानाधिकरण्यबाधात्कथं विशिष्टैकार्थप्रतिपादकत्वमिति [2]पृथग्विध एव क्रियान्वयः स्यादिति वाक्यभेदो दुर्वार इति वाच्यम्। अत्रापि सामानाधिकरण्यस्य सत्त्वात्। तथाहि— 'गुणवचनेभ्यो मतुपो लुगिष्टः' इति मतुपो लुग्विधानात् शुक्लादिशब्दानां द्रव्ये लाक्षणिकत्वे तद्वैयर्थ्यादुक्तन्यायेन च केवलगुणवाचकानां द्रव्ये शक्त्यनुपपत्तेर्निरूढलक्षणैव तेषामभ्युपगन्तव्या। उक्तं च वार्तिके 'मतुल्लोपश्चात्यन्तलक्षणावशादन्वाख्यायते' इति 'इह केषुचिदर्थेष्वभिधानवदेव लक्षणाप्यनादिकालप्रवृत्तिकत्वेन निरूढा, यथा शुक्लादिषु' इति च। निरूढलक्षणा च निरूढशक्तितुल्ययोगक्षेमत्वान्न मुख्यार्थे तात्पर्यानुपपत्तिप्रतिसंधानमपेक्षते। ततश्चारुणाशब्दस्य पिङ्गाक्ष्येकहायनीशब्दयोरिव द्रव्ये श्रुतिवृत्तत्वतुल्ययोगक्षेमतया सामानाधिकरण्यसत्त्वेन विशिष्टैकार्थप्रतिपादकतया युगपदेव क्रीणातावन्वयान्न वाक्यभेदः। न चारुणापदे विशेष्यापेक्षया प्रथमोपस्थितत्वादारुण्यस्यैव करणतयोपस्थितिरिति वाच्यम्। क्रयं प्रत्ययोग्यत्वेन तथोपस्थितेरसंभवात्। न च साक्षात्करणत्वस्यायोग्यत्वेऽप्येकहायनीद्वारा तत्करणत्वसंभव इति वाच्यम्। व्याघातात्। करणत्वं हि साधकतमत्वम्। तच्च साक्षात्साधनत्वमेव। न ह्येतत्परंपरया साधकत्वे कथमपि घटते। नापि व्यापारवत्कारणत्वमपि करणत्वमारुण्यस्य संभवति। तज्जन्यस्तज्जन्यजनको हि व्यापारः। स चैकहायनी वा तत्परिच्छेदो वा। नाद्यः, तस्या आरुण्यजन्यत्वाभावादेकहायनीकार्यक्रयजनकत्वाभावाच्च आरुण्यस्य क्रयजननायोग्यत्वात्। न द्वितीयः, द्रव्यपरिच्छेदस्य क्रयं प्रति जनकत्वस्य साक्षादसंभवात्। न च द्रव्यद्वारा परिच्छेदस्य क्रयजनकत्वमिति वाच्यम्। द्रव्यस्य गुणकृतपरिच्छेदजन्यत्वाभावात्। अनरुणद्रव्याद्व्यावृत्ततया एकहायन्याः [3]प्रतीतिरेव ह्यारुण्यकृतः परिच्छेद इत्युच्यते। न च गुणतः परिच्छेदाद्द्रव्ये सामर्थ्यविशेष उत्पद्यते, तद्द्वारा परिच्छेदस्य क्रयजनकत्वं तादृशपरिच्छेदद्वारा चारुण्यस्य क्रयं प्रति साधनत्वात्करणत्वसंभव इति

1. अभिमतद्रव्यसंपत्तेः—क. 2. पृथगेव—ङ, घ. 3. प्रतीतिरेवेहारुण्य—घ. ङ.

वाच्यम् । आरुण्यगुणतः परिच्छेदादेकहायन्यां जायमानः सामर्थ्यविशेषो हि न दृष्टरूपः, अनरुणाया अप्येकहायन्याः क्रयनिष्पत्तिक्षमत्वात् । यद्यदृष्टरूपस्तर्ह्यदृष्टद्वारारुण्यस्य क्रयसाधनत्वमायाति । तद्वरमरुणाशब्दस्य निरूढलक्षणयापि द्रव्यपरत्वमेव स्वीकृत्य गुणविशिष्टैकहायन्या एव क्रये करणतया विधानम् । किंच परिच्छेदस्येहानुपादानात्कथं तद्द्वारारुण्यस्य क्रये करणतयान्वयः । अध्याहारे च गौरवम् । न चाक्षेपात्तल्लाभः । न ह्येकहायनी परिच्छेदमाक्षिपति, आरुण्यगुणेनापरिच्छिन्नाया अपि क्रयनिष्पत्तिक्षमत्वात् । नाप्यारुण्यात्तदाक्षेपः । आरुण्यं हि द्रव्यपरिच्छेदं विनापि क्वचित्क्रियायामन्वेति, यथा 'घटेऽरुणोऽस्ति' इत्यादौ । अतो न तस्य स्वरूपेण क्रियान्वये द्रव्यपरिच्छेदापेक्षा, किंतु साधनत्वरूपेण क्रियान्वय एव तदपेक्षा । ततश्च क्रयसाधनत्वे आरुण्यस्यावगते तदन्यथानुपपत्त्या परिच्छेदलाभः, लब्धे च परिच्छेदे क्रयसाधनत्वावगमः इत्यन्योन्याश्रयः । किंच गुणस्य द्रव्यपरिच्छेदमुखेन साधनतया क्रियान्वये 'नीलमुत्पलमानय' इत्यत्र 'नीलेन' इति तृतीया स्यात्, नीलगुणस्योत्पलरूपकर्मकारकपरिच्छेदमुखेनानयनक्रियायां साधनत्वात् । किंच गुणगुणिनोः परस्परानपेक्षमेव प्रथमं क्रियान्वयितया परस्परान्वयसामर्थ्याभावात् 'नीलोत्पलमानय' 'नीलघटेन जलमाहर' इत्यत्र समासानुपपत्तिः । न च पार्ष्टिकपरस्परान्वयात्सामर्थ्यमुपपाद्यम्, तस्यैव दुर्वचत्वात् । न हि पार्ष्टिकः परस्परान्वयबोधः शाब्दः, सकृदुच्चारितस्य गुणशब्दस्य क्रियायां द्रव्ये च पर्यायेणान्वयासंभवात्; शब्दबुद्धिकर्मणां विरम्यव्यापाराभावात् । न च प्रथमं शाब्दमर्यादया गुणगुणिनोः क्रियान्वयेऽवगते पश्चात्तयोः परिच्छेदकपरिच्छेद्याकाङ्क्षावशात्परस्परान्वयानुसंधानं मानसिकं कल्प्यत इति वाच्यम् । गुणगुणिनोः परस्परान्वयो हि समासप्रयोजकः, तथाविधशब्दयोरेव समासविधानात् । तद्वाचकनीलघटशब्दयोस्तु श्रूयमाणयोः क्रियान्वितत्वान्न परस्परमन्वयः । अतः कल्पितयोस्तयोः पार्ष्टिकान्वयाच्छ्रूयमाणयोरपि सामर्थ्यं वक्तव्यम् । तत्र किं गुणगुणिवाचकयोः शब्दयोर्विभक्त्यन्तयोरेव कल्पनम्, उत विभक्तिरहितयोः, किं वा समस्तयोः । नाद्यः, विभक्त्यन्तयोः कारकविशिष्टप्रतिपादकयोस्तयोर्मिथःसंबन्धायोगात् । न द्वितीयः, विभक्तिरहितयोः प्रयोगानर्हत्वात्समासानुपयुक्तत्वाच्च । 'सुप्सुपा' इत्यधिकृत्य विहितस्य कर्मधारयसमासस्य नीलघटशब्दयोरसुबन्तयोरनुपपत्तेः । न तृतीयः, समस्तपदानुसंधानेन परस्परान्वयरूपं सामर्थ्यं ज्ञेयम्, सामर्थ्यज्ञानाधीनश्च समास इत्यन्योन्याश्रयात् । अपि च सर्वत्र तादृशबोधद्वयकल्पने तदनुरोधेन कार्यकारणभावद्वयकल्पने पुनःकल्पितशब्दान्तरानुसंधानकल्पने च महद्गौरवमित्यरुणाशब्दस्यापि शक्तितुल्यनिरूढलक्षणया गुणविशिष्टपरत्वं स्वीकृत्य क्रयानुवादेन विशिष्टकारकस्य विधानान्न कोऽपि दोषः । न चारुणाशब्दस्य गुणविशिष्टपरत्वे कथमेतदधिकरणप्रवृत्तिरिति वाच्यम् । तत्प्रवृत्तेरपि सूपपादत्वात् । तथाहि—अरुणाशब्दस्य गुणविशिष्टे द्रव्ये लाक्षणिकत्वमात्रावलम्बेन पूर्वपक्षप्रवृत्तिः पूर्ववदेवोपपाद्या । शक्तितुल्यलक्षणासाधनेन सिद्धान्तप्रवृत्तिः । सूत्रं त्वेवं योज्यम् ।

ऐककर्म्यात् क्रियापदस्यैकत्वात् अर्थैकत्वे एकवाक्यत्वे सति वाक्यभङ्गो न न्याय्यः। अतो द्रव्यगुणयोर्द्रव्यप्रधानस्यैकहायनीशब्दस्य गुणोपसर्जनारुणाशब्दस्य च, नियमः सामानाधिकरण्येन विशिष्टैकार्थप्रतिपादकयोः क्रयेऽन्वयः, स्यादिति दिक्। सोऽयं प्राभाकरवैयाकरणयाज्ञिकानुमतः पन्थाः। इत्यरुणाधिकरणम् ॥

तदेवम् 'तेषामर्थेन संबन्धः' इत्यादिभिस्त्रिभिरधिकरणैः संस्कार्यद्रव्यगुणानां श्रुतशेषिसंयोगेन व्यवस्थाभिहिता। इदानीं तावत्संयोगः किं विवक्षितविशेषणकेन शेषिणा, उत अविवक्षितविशेषणकेनेति विचारः प्रस्तूयते। ज्योतिष्टोमे श्रूयते 'दशापवित्रेण ग्रहं संमार्ष्टि' इति। अनूतो वस्त्राग्रभागो दशा। तन्मुक्तवस्त्रखण्डविशेषो दशापवित्रम्। सोमरसो गृह्यतेऽस्मिन्निति ग्रहः पात्रविशेषः। तत्र किमेकस्य ग्रहस्य संमार्गः, किं वा सर्वेषामिति संशये पूर्वपक्षयति—

एकत्वयुक्तमेकस्य श्रुतिसंयोगात् ॥ १३ ॥

एकस्य ग्रहव्यक्तिविशेषस्य संमार्जनं भवति न द्वितीयादीनाम्। कुतः। श्रुतिसंयोगात् एकवचनश्रवणेन संयोगात्। ननु श्रुतमप्येकत्वमविवक्षितम्, अन्यथा 'ग्रहं संमृज्यात्; तं चैकम्' इति वाक्यभेदापत्तेरित्यत आह—एकत्वयुक्तमिति। संमार्जनं हि विवक्षितैकत्वसमभिव्याहृतम्, अविवक्षायां प्रमाणाभावात्। 'पशुना यजेत' इत्यत्र यथा संख्याविशिष्टकारकं विधीयते तद्वदत्रापि संख्याविशिष्टकारकस्योद्देशसंभवान्न वाक्यभेद इति भावः॥

७ ग्रहसमार्जनाधिकरणम्।

सिद्धान्तयति—

सर्वेषां वा लक्षणत्वादविशिष्टं हि लक्षणम् ॥ १४ ॥

वाशब्द एवार्थे। सर्वेषामेव ग्रहाणां संमार्जनं न त्वेकस्यैव। कुतः। लक्षणत्वात्। आकृत्यधिकरणन्यायेन ग्रहशब्दवाच्यतया निर्णीतस्य ग्रहत्वस्य कृत्स्नव्यक्त्युपस्थापकत्वात्। कुतः। हि यस्मात्कारणात्सर्वासु व्यक्तिषु लक्षणम् उपस्थापकं ग्रहत्वमविशिष्टम्। न चैकत्वस्यापि विधिसंस्पर्शाद्वाक्यभेदः शङ्क्यः। ग्रहैकत्वं हि विधेयम् सद्विधिसंस्पर्शि, अविधेयमेव वा। नाद्यः। उक्तन्यायेन सर्वेषु ग्रहेषु संमार्गावगमे सत्येकस्य तद्विधेः परिसंख्यानार्थत्वापत्तावेकत्र संमार्गविधानस्य स्वार्थस्य परित्यागः, सर्वत्र संमार्गनिवृत्तेः परार्थस्य स्वीकारः, उक्तन्यायेन सर्वग्रहेषु प्राप्तस्य संमार्गस्य बाध इति त्रैदोष्यापत्तेः। 'ग्रहं संमृज्यात्' 'एकमेव ग्रहं संमृज्यान्न ग्रहान्तरम' इत्येवं संमार्गवचनव्यक्तेः परिसंख्यावचनव्यक्तेश्च भेदेन वाक्यभेदापत्तेश्च। द्वितीयेऽपि किमविधेयभूतमेकत्वमुद्देश्यतया विधिसंस्पर्शि, किं वा संमार्गानन्वितग्रहान्वयमुखेन, उत संमार्गान्वितग्रहान्वयमुखेन, अथवा उद्देश्यतावच्छेदकतया। नाद्यः, असंभवादेकत्वस्य संमार्ष्टुमशक्यत्वात्। न द्वितीयः 'ग्रह एको

भवेत्, ग्रहं संमृज्यात्' इति वाक्यभेदापत्तेः, [1]संमार्गानन्वयिनैकत्वेन ग्रहान्तरेषु संमार्गस्य व्यावर्तयितुमशक्यत्वाच्च । न तृतीयः । एवं हि यं ग्रहं संमृज्यात्स एकः इत्यर्थः पर्यवस्यति । तत्र संमार्गस्याप्राप्तत्वाद्ग्रहविशेषणत्वं नोपपद्यते । इहैव हि संमार्गोऽपि विधातव्यः । ततश्च 'ग्रहं संमृज्यात्, यं संमृज्यात्स एको भवेत्' इति वाक्यभेदः । अथैकत्वविशिष्टं ग्रहं संमृज्यादित्युद्देश्यतावच्छेदकतया एकत्वस्य विधिसंस्पर्श इति तुरीयः पक्षोऽस्तु, विशिष्टोद्देशाच्च न वाक्यभेद इति चेत्; एकत्वविशिष्टग्रहस्य संमार्गविधाने हि ग्रहस्य प्रथमत एवैकत्वान्वयो वाच्यः । न चासौ संभवति । विभक्त्या हि युगपदेव संख्या कारकं चोच्यते; न तु प्रथमं प्रातिपदिकार्थस्य संख्यामभिधाय पश्चात्तद्विशिष्टं कारकमुच्यते, सकृच्छ्रुताया विभक्तेः पर्यायेण तद्बोधकत्वासंभवात् । तस्मान्नैकत्वस्योद्देश्यतावच्छेदकतया विधिसंस्पर्शसंभवः । ननु, ग्रहवदेकत्वमपि संमार्गक्रियायामेव साक्षादन्वेतु; न चायोग्यत्वादसंभवः, अरुणैकहायनीन्यायेन परिच्छेदकतया तदुपपत्तेरिति चेत् । किं संमार्गक्रियायां प्रधानतयैकत्वमन्वेति, उत गुणतया । नाद्यः, वैषम्यात् । आरुण्यैकहायन्योर्हि प्रातिस्विकतृतीयाभ्यां क्रयकरणत्वावगमे सति तन्निर्वाहाय पार्ष्टिकान्वयः कल्प्यत इति युज्यते । इह तु 'ग्रहम्' इत्येकैव द्वितीया । सा च योग्यत्वाद्ग्रहगतमेव कर्मत्वं बोधयन्ती कृतार्था शान्ताकाङ्क्षा सती अयोग्ये एकत्वे कर्मत्वं बोधयितुं न शक्नोति; येन तदन्वयानुपपत्त्या पार्ष्टिकान्वयः कल्प्येत । यदि त्वावृत्त्यैकत्वेऽपि द्वितीया प्रातिस्विकमन्वियात्तदा ग्रहैकत्वयोः पार्ष्टिकान्वये सत्यपि, प्रथमतः शब्दान्वये उभयोरपि ग्रहैकत्वगतयोः कर्मत्वयोः परस्परवार्तानभिज्ञयोः संमार्गे प्रत्येकमन्वितत्वेन प्रत्येकमुद्देश्यत्वापत्तौ वाक्यभेदापत्तेः । न द्वितीयः, द्वितीयाश्रुतिविरोधात् तस्याः प्राधान्यवाचित्वात् । न च 'सकृज्जुहोति' इत्यत्रैव द्वितीयायाः साधनत्वे लक्षणास्त्विति वाच्यम । तत्र संस्कारस्य भूतभाव्युपयोगाभावेनागत्या लक्षणास्वीकारेऽपि प्रकृते मुख्यवृत्तिसंभवेन लक्षणाया अयुक्तत्वात् । अन्यथा ग्रहस्यापि गुणत्वापत्तेः । न हि सकृदुपात्ता द्वितीयाविभक्तिर्ग्रहांशे प्राधान्यमेकत्वांशे गुणत्वमभिधातुमीष्टे । न च सर्वग्रहेषु संमार्गान्वये एकवचनस्यासांगत्यं शङ्क्यम्, जात्यभिप्रायेण तदुपपत्तेः । तथा चैकत्वस्य सर्वथापि विधिसंस्पर्शाभावादविवक्षितत्वम् ।

ननु ग्रहैकत्वोभयविशिष्टकारकस्य [2]संमार्गोद्देशान्न वाक्यभेदः, अन्यथा पश्चैकत्वे का गतिरित्याशङ्क्य पश्चैकत्वाद्वैषम्यं दर्शयति—

चोदिते[3] परार्थत्वाद्यथाश्रुति प्रतीयेत ॥ १५ ॥

1. संमार्गानन्वितविधिनैकत्वेन—ख; संमार्गानन्वये विधिनैकत्वेन—क. 2. संमार्गस्योद्देश्यत्वान्न—क, ग, घ, ङ. 3. चोदिते तु.

चोदिते एकवचनसंयोगेन विहिते पशौ, यथाश्रुति एकवचनमनतिक्रम्य, एकत्वं विवक्षितम्, प्रतीयेत, कुतः, परार्थत्वात् यागक्रियां प्रति पश्वेकत्वयोर्गुणभूतत्वादित्यर्थः। अयं भावः। 'पशुना' इति तृतीयैकवचनेन करणकारकमेकत्वं चोच्यते, प्रातिपदिकेन पशुः। तत्र पशुरेकत्वं च क्रियान्वयात्प्रागेव कारके समानपदश्रुत्या प्रथममन्वयं [1]लभते। तत्र च यागक्रिया प्रधानम्, पश्वेकत्वे तु तत्र गुणभूते भवतः। ते च प्रधानक्रियावशीकृते प्रधानाविरोधेनान्वयमाकाङ्क्षतः। ततश्च पश्वेकत्वाभ्यां युगपदन्वितस्यैव करणकारकस्यान्वयं यागक्रियानुमन्यते, ताभ्यां पृथगन्वितस्य करणकारकस्य यागक्रियायामन्वये तस्या गुणानुरोधेनावृत्तिप्रसङ्गात्। तथा च पश्वेकत्वोभयविशिष्टकरणकारकयुक्ता यागक्रिया विधावन्वेतीति न वाक्यभेदप्रसक्तिः। संमार्गवाक्ये तु ग्रहैकत्वे प्रधानभूते। संमार्गक्रिया तु गुणभूता। तस्याश्च प्रधानानुरोधेनावृत्तिरुचिता। ततश्च ग्रहैकत्वे संमार्गक्रियावश्ये न भवतः। प्रत्युत संमार्गक्रियैव ग्रहैकत्ववशवर्तिनी। सा च गुणभूता प्रधानानुरोधेन स्ववृत्तिमुचितां पर्यालोच्य ग्रहैकत्वाभ्यां प्रत्येकमेवान्वितस्य कर्मकारकस्यान्वयमनुमन्यते। तथा चैकत्वविशिष्टकर्मकारकयुक्ता ग्रहविशिष्टकर्मकारकयुक्ता च संमार्गक्रियाविधौ प्रत्येकमन्वेतीति विध्यावृत्तिलक्षणवाक्यभेदो दुर्वारः। तस्माद्ग्रहैकत्वमविवक्षितम्। यद्यपि चतुर्थाध्यपादे 'तत्रैकत्वमयज्ञाङ्गम्' इत्यधिकरणे पश्वेकत्वस्य विवक्षा व्यवस्थापयिष्यते तथापि तदधिकरणसिद्ध एवार्थः पश्वेकत्वाद्ग्रहैकत्वस्य वैषम्यप्रतिपादनाय प्राप्तावसरत्वादत्रापि [2]संक्षेपेण गुणसूत्रेऽस्मिन्प्रदर्शित इति न पुनरुक्तिः। इति ग्रहैकत्वाधिकरणम्॥

'ग्रहं संमार्ष्टि' इत्यत्र चमसा अपि संमार्ष्टव्या न वेति संशये पूर्वपक्षयति—

संस्काराद्वा गुणानामव्यवस्था स्यात्॥ १६॥

वाशब्दः प्रत्यवस्थाने। एकत्वस्येव प्रातिपदिकार्थस्याप्यविवक्षितत्वात्संमार्गादिगुणानामव्यवस्था स्यात्। श्रुतेषु ग्रहेष्वेव समावेशो न स्यात्। अश्रुतेषु चमसेष्वपि स्यात्। ननु ग्रहशब्दे सति कथं चमसेष्वपि संमार्गः; न च ग्रहशब्दो ग्रीष्मादिशब्दवदपूर्वसाधनमात्रोपलक्षणमिति वाच्यम्, श्रुतस्योपलक्षणार्थत्वे ग्रीष्मादिघटितावघातादिविधेराज्यादावपि प्रवृत्तौ यथासंयोगं व्यवस्थायाः सर्वोच्छेदप्रसङ्गात् अत आह— संस्कारादिति। भावप्रधानो निर्देशः। सोमग्रहणानन्तरं संमार्गस्य विधिबलेन सोमावसेकनिर्हरणरूपसंस्कारात्मकत्वमवगम्यते। तस्य च ग्रहेष्विव चमसेष्वपि प्रवृत्तिर्युक्ता। 'सोमेन यजेत' इत्युत्पत्तिवाक्यस्यैकत्वेन ततः सोमयागे एकस्मिन्नवगते तदपूर्वस्यैकत्वेन तत्साधनेषु निविशमानस्य संमार्गस्य ग्रहेष्विव चमसेष्वपि प्रवृत्तेः। सति हि कर्मभेदे अवघातादिवद्व्यवस्था स्यात्। एवं च

८. चमसादौ संमार्गाद्यप्रयोगाधिकरणम्।

1. लभेते— क, ग. 2. 'संक्षेपेण' इति नास्ति — क, घ, ङ.

सोमग्रहणानन्तरं 'संमार्ष्टि' इत्यतावत्युक्ते सोमावसेकनिर्हरणप्रयोजनतया सोमपात्राणामित्यवगमे सति कस्येत्याकाङ्क्षाभावादुपलक्षणमात्रं ग्रहपदं संपद्यते। तस्माच्चमसेष्वपि संमार्गः संभाव्यत इति प्राप्ते, सिद्धान्तयति—

व्यवस्था वार्थस्य श्रुतिसंयोगात्तस्य शब्दप्रमाणत्वात् ॥ १७ ॥

वाशब्द एवार्थे। संमार्गादिगुणानां ग्रहेष्वेव प्रवृत्तिः न चमसेष्विति व्यवस्थैव स्यात्, न तु चमसेष्वपीत्यव्यवस्था। न ह्येकत्ववद्ग्रहशब्दार्थस्य विवक्षायां वाक्यभेदप्रसङ्गोऽस्ति येन स न विवक्ष्येत। ननु वाक्यभेदाभावेऽप्याकाङ्क्षाविरहान्न विवक्षेत्युक्तमत आह— अर्थस्येति। ग्रहशब्दार्थस्य श्रुतत्वादित्यर्थः। शब्दोपात्तं ग्रहमुल्लङ्घ्य सामर्थ्यलभ्यं सोमपात्रं ग्रहीतुं न युक्तम्। तथा सति ग्रहशब्दस्य प्रमत्तप्रलपितत्वापत्तेः। ननु संमार्गस्यापूर्वनिबन्धनत्वात्सोमयागापूर्वस्य चैकत्वात्तत्साधनत्वाविशेषाच्चमसेष्वपि संमार्गः स्यात्, 'व्रीहीनवहन्ति' इति व्रीहिशब्दस्येव ग्रहशब्दस्यापूर्वसाधनमात्रोपलक्षणत्वात्; न चैन्द्रवायवादियागाभ्यासानामपूर्वजनकतास्ति येन ग्रहशब्दसंयुक्तापूर्वविशेषनिबन्धनः संमार्गश्चमसेषु न स्यात्, अपूर्वस्य विहितैकसाध्यत्वादभ्यासानां च प्रत्यक्षविधानाभावादित्यत आह— तस्य शब्दप्रमाणत्वादिति। तस्य अभ्यासजातस्य प्रत्यक्षविध्यभावेऽपि देवतायुक्तग्रहभेदान्यथानुपपत्तिकल्पितविधिविहितत्वादपूर्वविशेषजनकत्वमुपपद्यते। न चैवमपि ग्रहयागाभ्यासप्रयुक्तापूर्वसाधनोद्देशेन संमार्गविधौ विशिष्टोद्देशदोषप्रसङ्गादपूर्वसाधनमात्रोद्देशेन विधानस्यावश्यकत्वाच्चमससाधारण्यमवर्जनीयमिति वाच्यम्। न हि ग्रहयागाभ्यासप्रयुक्तत्वेनापूर्वं लक्ष्यते, किंत्वपूर्वत्वेनैव। तच्च प्रत्यासत्त्या ग्रहाभ्यासापूर्वं न त्वपूर्वमात्रमित्यदोषः। तदुक्तं वार्तिके 'ग्रहशब्दोपस्थापितप्रत्यासन्नापूर्वातिक्रमकारणाभावाद्व्यवस्थासिद्धिः' इति। तस्माद्ग्रहशब्दलक्षितापूर्वविशेषनिबन्धनः संमार्गो न चमसेषु। सूत्रे 'गुणानाम्' इति बहुवचनोपपत्तये 'मैत्रावरुणं पयसा श्रीणाति' 'मन्थिनं सक्तुभिः श्रीणाति' 'घृतेन पालीवतं श्रीणाति' इत्याद्युदाहार्यम्। ग्रहचमसाभ्यासापूर्वभेदवन्मैत्रावरुणादिग्रहाणामपि प्रत्येकमभ्यासापूर्वभेदादिति। वृत्तमधिकरणम् ॥

तदेवं संस्कारविनियोगविशेषे निरूपिते गुणविनियोगविशेषो निरूप्यते। 'सप्तदशारत्निर्वाजपेयस्य यूपः' इत्यत्र किम् 'सप्तदशारत्निर्वाजपेयस्य' इति वचनव्यक्तिमाश्रित्य सप्तदशारत्नित्वं
९ सप्तदशारत्नितायाः वाजपेयसाधनोर्ध्वपात्रद्वारा [1]वाजपेयाङ्गं विधीयते, उत 'सप्तदशारत्निर्यूपः'
पशुधर्मताधिकरणम्। इति वचनव्यक्तिमाश्रित्य यूपद्वारा पश्वङ्गतया तद्विधीयत इति संशयः। तत्राव्यवहितत्वात्प्रधानत्वात्प्रकरणानुग्रहाच्च 'सप्तदशारत्निर्वाजपेयस्य' इत्यन्वयः न तु 'सप्तदशारत्निर्यूपः' इति, यूपस्य व्यवहितत्वाद्वाजपेयाङ्गत्वेनाप्रधानत्वाद्वाजपेयेत्थंभावाकाङ्क्षालक्षणप्रकरणपरिग्रहा-

1. वाजपेयाङ्गतया — ङ.

भावाच्च यूपधर्मस्य सप्तदशारत्नित्वस्य पश्वङ्गतया वाजपेयेत्थंभावग्रहणायोग्यत्वात्। न च 'सप्तदशारत्निः' इत्यस्य बहुव्रीहितया विशेष्यसापेक्षस्य प्रथमान्तस्य 'वाजपेयस्य' इति षष्ठ्यन्तेन विशेष्यसमर्पणानुपपत्तेः 'यूपः' इत्यनेनैवान्वयो युक्त इति वाच्यम्। 'वाजपेयस्य' इति षष्ठ्या हि साधकतया वाजपेयसंबन्धी पदार्थोऽभिधीयते 'वाजपेयसाधकः पदार्थः सप्तदशारत्निः' इति। षष्ठ्याश्च संबन्धिपर्यन्तवाचित्वान्न लक्षणा। सप्तदशारत्नित्वं च वाजपेयसाधनेषु पुरुषादिष्वसंभवादूर्ध्वपात्राश्रयं सत्तद्वारा वाजपेयाङ्गं संपद्यते। यूपशब्दस्तूर्ध्वत्वसादृश्यादूर्ध्वपात्रे वर्तते। तत्रोर्ध्वत्वस्य प्राप्तत्वात्तद्विशेषसप्तदशारत्नित्वविधिः। चमसेषु तूर्ध्वत्वस्यैवाप्राप्तत्वान्न तद्विशेषविधेः प्रवृत्तिः। किंच 'सप्तदशारत्निर्यूपः' इत्यन्वये क्रत्वन्तरगतयूपस्याप्युद्देश्यत्वापत्तौ 'वाजपेयस्य' इत्युद्देश्यविशेषणत्वं वाच्यम्, विशेषणत्वं च साक्षात्संबन्धेनैव न्याय्यम्। यूपश्च पशोरेव साक्षादङ्गम्। वाजपेयस्य तु पशुद्वारा। ततश्च वाजपेयशब्दः स्वाङ्गभूतपशुयागे लाक्षणिकः स्यात्। न च 'सप्तदशारत्निर्वाजपेयस्य' इत्यन्वयेऽपि सप्तदशारत्नित्वस्योर्ध्वपात्रमात्रविश्रान्तत्वाद्यूपशब्दस्य तल्लाक्षणिकत्वं तुल्यमिति वाच्यम्। प्रथमश्रुतवाजपेयशब्दे लक्षणाश्रयणापेक्षया पश्चाच्छ्रुतयूपशब्दे लक्षणाश्रयणस्य युक्तत्वात्। तस्मात्सप्तदशारत्नित्वस्योर्ध्वपात्रमात्रे निवेशो युक्त इति प्राप्ते, सिद्धान्तयति

आनर्थक्यात्तदङ्गेषु ॥ १८ ॥

'सप्तदशारत्निर्यूपः' इत्येवान्वयः। 'वाजपेयस्य' इत्येतच्च 'यूपः' इत्यत्रान्वेति। तत्र सोमयागविशेषात्मकवाजपेयकर्मणि साक्षाद्यूपकार्याभावेन तदभावे सति वाजपेयिकयूपे सप्तदशारत्नित्ववचनस्य 'गगनारविन्दं सुरभि' इति वचनस्येव आनर्थक्यात् वाजपेयाङ्गभूताग्नीषोमीयादिपशुयागेषु यो यूपस्तत्र सप्तदशारत्नित्वं निविशते। न चैवं सति वाजपेयशब्दे लक्षणाशङ्कया। षष्ठी हि नाङ्गाङ्गित्वे, किंतु [1]संबन्धमात्रवाचिनी। सा चोपकार्योपकारकभावमादायोपपन्ना, यूपस्य पशुद्वारा वाजपेयनिर्वर्तकत्वात्। न ह्यव्यवहितसंबन्ध एव षष्ठ्यर्थः, 'देवदत्तस्य नप्ता' इत्यत्र देवदत्तस्य नप्त्रा साकं पुत्रद्वारकसंबन्धेऽपि तदर्शनात्। एवं च प्रकृतिभूतवाजपेयशब्दः स्वार्थवृत्तः। षष्ठ्यर्थपि पशुद्वारकवाजपेयसंबन्धवाचिनी स्वार्थवृत्तैवेति न लक्षणा। यूपशब्दोऽपि स्वार्थवृत्तत्वान्न गौणः। ऊर्ध्वपात्रमात्रनिवेशे तु स गौणः स्यात्। अप्रधानेन व्यवहितेन च संबन्धः प्रकरणबाधश्च गौणत्वापेक्षया ज्यायान्। न च 'वाजपेयस्य' इत्यस्योद्देश्यविशेषणत्वात्साक्षात्संबन्ध एवाश्रयितुमुचित इति वाच्यम्। यूपमेव ह्युद्दिश्य सप्तदशत्वं विधीयते। तस्य च पश्वङ्गस्य वाजपेयेत्थंभावाकाङ्क्षालक्षणप्रकरणपरिग्रहाभावेऽप्यधिकारलक्षणप्रकरणवशाद्वाजपेयिकयूपस्यैवोद्देश्यतापर्यवसानान्नाति-प्रसङ्गः[2]। 'वाजपेयस्य' इति त्वनुवादमात्रम्। अतोऽपि परंपरासंबन्धाश्रयणं[3] न दोषः। तस्मात्

1. संबन्धसामान्यवाचिनी— क. 2. नातिप्रसङ्गावकाशः— क. 3. आश्रयणात्— क, घ, ङ.

'सप्तदशारत्नियूपः' इत्येवान्वय इति यूपस्यैव सप्तदशारत्निता नोर्ध्वपात्रस्य । ननु वाजपेयेत्थंभावाकाङ्क्षालक्षणप्रकरणे 'यूपमारोहति' इति यूपारोहणमाम्नायते । तथा च वाजपेयस्य यूपाभावात्तदङ्गभूतपशुयागीययूपे 'सप्तदशारत्निः' इत्यसंगतमिति चेत्सत्यम् । 'यूपम्' इति द्वितीयाश्रुत्या यूपार्थत्वमारोहणस्यावगतं, पश्वङ्गमित्येव युक्तम्, पशुयागानां तदविनाभूतेन यूपेनोपस्थितेः । एवं च प्रकरणबाधेन वाक्यात्पश्वर्थत्वमेव यूपारोहणस्य न्याय्यमित्यास्तां तावत् । इत्यानर्थक्यतदङ्गाधिकरणम् ॥

दर्शपूर्णमासयोः प्रयाजसंनिधौ श्रूयते 'अभिक्रामं जुहोति' इति । तत्र किम् 'अभिक्रामम्' इत्येतद्भक्त्वा प्राकरणिककर्मणां कर्तृषु निवेशयामः, उत जुहोतिनान्वितं सत्प्रयाजहोमकर्तर्येव निवेशयाम इति संशये, पूर्वपक्षयति—

कर्तृगुणे तु कर्मासमवायाद्वाक्यभेदः स्यात् ॥ १९ ॥

अभिक्रमणे होमरूपकर्मसमवायानर्हत्वात्कर्तृगुणे सति वाक्यभेदः स्यात् जुहोतिना विच्छेदः स्यात् । न ह्यमूर्तमभिक्रमणं होमकारकं भवितुमर्हति । न चारुण्यवद्द्रव्यद्वारा तत्संभवति । तत्र ह्येकहायनीद्रव्यमुपात्तत्वाद्द्वारीभवितुं युक्तम् । नात्र द्रव्यमुपात्तमुपलभामहे । एवं वैषम्यद्योतनायैव तुशब्दः । न च 'जुहोति' इति होमकर्तोपात्त इति शङ्क्यम्, आख्यातस्य कर्तृवाचकत्वाभावात् । एतेनाभिक्रमणस्य साक्षाद्धोमार्थत्वासंभवात्पूर्वाधिकरणन्यायेन प्रयाजहोमकर्तृरूपाङ्गावतारोऽपि प्रत्युक्तः । यूपस्य शब्दोपस्थितत्वेन तत्र सप्तदशारत्नित्वस्यावतारेऽपि प्रकृते कर्तुः शब्दत उपस्थित्यभावेन तत्राभिक्रमणस्यावतारासंभवात् । एतद्वैषम्यद्योतनार्थोऽपि तुशब्दः । तथा च जुहोतितो विच्छिन्नमभिक्रमणं प्रकरणेन गृह्यते । जुहोतिस्त्ववयुत्यानुवादतया कथंचिन्नेयः । न च प्रकरणेनापि क्रियासंबन्धस्यैव बोधनीयत्वात्तत्राप्ययोग्यत्वं तुल्यमिति वाच्यम् । न हि प्रकरणेन क्रियाकारकभावो बोध्यते, किंत्वङ्गाङ्गिभावः । स च क्रिययोः संभवत्येव । वाक्येन तु क्रियासंबन्धः कारकभावेनैव बोध्यत इति वैषम्यम् । शक्यते हि च क्रियायाः प्रकरणेन ग्रहणं प्रयाजादिवत् । संभवति च कर्मणः कर्मोपकारकत्वम् । कारकत्वं तु न संभवति । न च प्रकरणेन गृहीतमभिक्रमणं प्रयाजादिवदारादुपकारकमेव किं न स्यादिति वाच्यम् । आरादुपकारकत्वे सकृदेवानुष्ठेयतया 'आभीक्ष्ण्ये णमुल्' इति विहितणमुलभिहितावृत्त्यानर्थक्यापत्तेः, संभवति दृष्टेऽदृष्टार्थत्वाश्रयणस्यान्याय्यत्वाच्च । अतः कर्तुराहवनीयादिसमीपदेशप्राप्त्याधायकत्वसामर्थ्यात्कर्तृसंस्कारकमेवाभिक्रमणम् । न चैवमपि प्रधानकर्तर्येव निवेशः स्यात् न तु कृत्स्नप्राकरणिककर्तरीति वाच्यम् । सेतिकर्तव्यताकप्रयोगेऽवगते हि करिष्यामीति बुद्धौ सत्यां किं ससहायोऽसहायो वेत्यस्यामवस्थायाम्

१०. अभिक्रमणादीनां प्रयाजमात्राङ्गताधिकरणम् ।

'शास्त्रफलं प्रयोक्तरि तल्लक्षणत्वात्' इत्यधिकरणन्यायेन तत्प्रयोगे यजमानस्यैव कर्तृत्वे प्राप्तेऽध्वर्व्वादयोऽपि कर्तारो विधीयन्ते। समीहितप्राप्त्यर्थो यः पुरुषव्यापारः स प्रयोग इत्युच्यते। स च फलसामग्रीविषयः। समस्ताङ्गसहितानि च प्रधानानि फलसामग्री, न केवलं प्रधानानि। अतः समस्तविषयव्यापारात्मकप्रयोग एव कर्तृसंबन्ध इत्येकादशस्य द्वितीये 'अङ्गानि तु विधानत्वात्प्रधानेनोपदिश्येरंस्तस्मात्स्यादेकदेशत्वम्' इत्यधिकरणे व्यवस्थापयिष्यते। अतः कर्तृसंस्कारमुखेन दर्शपूर्णमासप्रकरणपरिगृहीतसर्वप्रयोगाङ्गमभिक्रमणमिति प्राप्ते, सिद्धान्तयति—

साकाङ्क्षं त्वेकवाक्यं स्यादसमाप्तं हि पूर्वेण ॥ २० ॥

तुरवधारणे। 'अभिक्रामम्' इत्येतज्जुहोतिना एकवाक्यम् एकार्थप्रतिपादकं स्यात्। जुहोतावेवान्वयः स्यान्नतु प्राकरणिकसर्वक्रियासु। कुतः। हि यस्मात्कारणात्, पूर्वेण 'अभिक्रामम्' इत्येतावता पदेन जन्यं पदार्थज्ञानम्, असमाप्तम् अपर्यवसन्नं सत् जुहोतिना साकाङ्क्षं भवति; अतस्तदेकवाक्यत्वं युक्तमित्यर्थः। अयं भावः। 'समानकर्तृकयोः पूर्वकाले' इत्यधिकारविहितणमुल्प्रत्ययान्तं पूर्वकालक्रियावाचि 'अभिक्रामम्' इत्येतत्समानकर्तृकोत्तरकालक्रियासाकाङ्क्षं प्राकरणिकक्रियाभिर्यावत्संबध्नाति ततः प्रागेव प्रत्यक्षश्रुतजुहोतिना संबद्धं भवति। 'मातुः स्मरति' 'सर्पिषो जानीते' 'एधोदकस्योपस्कुरुते' 'फलानां तृप्यति' इत्यादौ मात्रादेः शेषत्वेन विवक्षितस्याप्यन्वयदर्शनान्न कारकस्यैव क्रियान्वयनियमः। संभवति चाभिक्रमणस्य होमे कारकत्वं तत्कर्तृद्वारा, आरुण्यवत्। न च कर्तुः शब्दत उपादानं तत्र प्रयोजकम्, गम्यमानस्यापि तस्य द्वारत्वोपपत्तेः। अत एव 'तिष्ठन्नन्वाह' इत्यादावनुपात्तस्याप्यनुवचनादिकर्तुः स्थानादिद्वारत्वमुपपन्नं भवति। जुहोतिना चात्र संनिहिताः प्रयाजहोमा एव विवक्षिताः। ततश्च तत्कर्तर्येवाभिक्रमणं निविशत इति भाष्यानुसारी पन्थाः॥

वार्तिककृतस्तु 'अभिक्रामम्' इत्यस्य णमुलन्तस्य समानकर्तृकतासंबन्धेन जुहोत्यन्वयस्य स्पष्टत्वाज्जुहोतेः प्रयाजहोममात्रपरत्वे प्रमाणाभावादरुणाधिकरणेन गतप्रायत्वाच्च सूत्रद्वयमिदमन्यथा योजयामासुः। तद्यथा—होमानुवादेन विधीयमानमभिक्रमणं किं प्राकरणिकसर्वहोमाङ्गम्, उत प्रयाजहोममात्राङ्गमिति संशये, पूर्वपक्षयति—'कर्तृगुणे तु कर्मासमवायाद्वाक्यभेदः स्यात्'॥ द्रव्यधर्मस्य सप्तदशारत्निरित्वस्य यूपद्वारा वाजपेयाङ्गत्वसंभवाद्वाजपेयस्य यूपः सप्तदशारत्निरिति यूपशब्देन सप्तदशारत्निरित्यस्यैकवाक्यत्वं युक्तम्। कर्तृगुणे त्वभिक्रमणेऽङ्गानामितिकर्तव्यताकाङ्क्षाविरहेणावान्तरप्रकरणपर्युपस्थापितकेवलप्रयाजहोमकर्मसंबन्धाभावात्तत्प्रकरणैकवाक्यत्वाभावरूपो वाक्यभेदः स्यात्। तथाहि— फलवाक्यप्रतिपादितभावनायास्तावत्प्रथमं कथंभावाकाङ्क्षोद्भवति। तदनन्तरं च प्रयाजादीनामङ्गानां विधीयमानानामित्थंभावग्रहणव्यग्रप्रधानभावनाग्रस्तत्वेन परार्थतयोपक्षीणत्वान्न

तान्यपि स्वयं [1]प्रधानंमन्यानि स्वार्थमित्थंभावम् आकाङ्क्षितुं प्रभवन्ति। अन्यथा प्रयाजाज्यभागादीनां परस्परमङ्गत्वप्रसङ्ग इति नाङ्गानामवान्तरप्रकरणं विद्यते। तदभावाच्चाभिक्रमणं न केवलप्रयाजहोमाङ्गम। किंतु दर्शपूर्णमासप्रकरणपरिगृहीतसर्वहोमाङ्गमेव। न च संनिधिवशाज्जुहोतिः प्रयाजहोमविषयः स्यादिति वाच्यम। तस्य प्रकरणापेक्षया दुर्बलतायाः श्रुतिलिङ्गादिसूत्रे वक्ष्यमाणत्वात्। न चासत्यप्यवान्तरप्रकरणे वाक्यादेवाभिक्रमणं प्रयाजाङ्गं स्यात् न तु दर्शपूर्णमासप्रकरणगतसर्वहोमाङ्गम्, जुहोतेः संनिहितप्रयाजविषयत्वात् प्रकरणाच्च वाक्यस्य बलीयस्तायाः श्रुतिलिङ्गादिसूत्रे वक्ष्यमाणत्वादिति वाच्यम्। साधारण्येन श्रुतस्य जुहोतेः संनिधानात्संकोचस्यायुक्तत्वात्। न च श्रुतिजनिताविशेषप्रत्ययस्य विशेषे व्यवस्थापनं संकोचः, इह च न प्रथमं सर्वविषयप्रत्ययो जायते; किंतु श्रुत्या प्रथमं जायमान एव प्रत्ययः संनिहितमात्रगोचरो जायते, जुहोतेरनुवादत्वेन [2]संनिहितगामित्वादिति वाच्यम। बुद्धौ विपरिवृत्तिरेव ह्यनुवादस्यापेक्षिता, न तु पाठप्रत्यासत्तिरूपसंनिधिः। अन्यथात्यन्तसंनिधानादुत्तमप्रयाजस्यैवाभिक्रमणमङ्गं स्यात्। किंच 'बर्हिर्लुनाति' 'बर्हिषि हवींष्यासादयति' इत्यादिबर्हिर्धर्माणामपि यस्यैव हविषः कियानपि पाठतः संनिधिविशेषोऽस्ति तन्मात्रविषयत्वापत्तौ, 'प्रकरणविशेषादसंयुक्तं प्रधानस्य' इत्यग्निमसप्तमपादाद्याधिकरणे प्रकरणवशेन तेषामङ्गप्रधानार्थत्वं व्यवस्थापयिष्यमाणं विरुध्येत। बुद्धिविपरिवृत्तिस्तु सर्वेषामेव होमानां प्रकरणाविशेषादविशिष्टा। अतो बर्हिर्हविःशब्दस्येव जुहोतेरपि संनिधिमात्रेण [3]संकोचायोगादवान्तरप्रकरणस्य चाभावाद्दर्शपूर्णमासप्रकरणपरिगृहीतसर्वहोमाङ्गमभिक्रमणमिति प्राप्ते, सिद्धान्तयति— **साकाङ्क्षं त्वेकवाक्यं स्यादसमाप्तं हि पूर्वेण** ॥ तुरवधारणे। प्रयाजभावनयाभिक्रमणं साकाङ्क्षमेव इत्थंभावाकाङ्क्षालक्षणप्रकरणयुक्तमेव। भावनास्वाभाव्येनाङ्गभावनास्वपि क्रतूपकारभाव्यकास्वितिकर्तव्यताकाङ्क्षोपपत्तेः। न चेत्थंभावग्रहणव्यग्रप्रधानभावनाग्रस्तानामङ्गानां नेतिकर्तव्यताकाङ्क्षासंभवः, अन्यथा प्रयाजाज्यभागादीनामपि परस्परमङ्गत्वापत्तेरिति वाच्यम्। न हि वयं सर्वत्राङ्गविधावित्थंभावाकाङ्क्षामभ्युपगच्छामः। किंतु यत्राङ्गोद्देशेन किंचिद्विधीयते तत्र तत्संबन्धलाभायाङ्गस्य कथंभावाकाङ्क्षोत्थाप्यते। अस्ति च प्रयाजोद्देशेन विधानम् 'समानयत उपभृतः' इति। 'उपभृति गृहीतस्याज्यस्यार्धं जुह्वां समानयते' इत्यर्थः। यद्यप्यस्मिन्वाक्ये प्रयाजोद्देशेन विधानं नास्ति प्रयाजशब्दाभावात्, तथापि 'यदुपभृति प्रयाजानूयाजेभ्यस्तत' इति प्रयाजानूयाजार्थत्वेनावगतस्यौपभृताज्यस्यार्धं प्रयाजार्थं जुह्वां समानयत इत्यर्थलाभात्समानयनस्य प्रयाजार्थत्वलाभः। प्रयाजाज्यभागादीनां च परस्परोद्देशेन विधानाभावान्न परस्पराकाङ्क्षेति नाव्यवस्था। तथा च प्रयाजभावनाप्रसूतकथंभावाकाङ्क्षालक्षणावान्तरप्रकरणपरिगृहीतमभिक्रमणं तदेकवाक्यं स्यात्, प्रयाजभावनायामेवान्वितं स्यात्। ननु प्रयाजार्थत्वेनावगते समानयने प्रयाजभावनाया आकाङ्क्षा-

1. प्रधानानि...घ, ङ. 2. संनिहितमात्रगामित्वात्... क. 3. संकोचाभावात्... ख.

सत्त्वेऽप्यभिक्रमणविधौ प्रयाजशब्दाभावेन तदुद्देशविधानाभावादभिक्रमणस्य न प्रयाजभावनाकाङ्क्षा-परिग्रह इत्यत आह—असमाप्तमिति। 'समानयत उपभृतः' इति प्रयाजोद्देशेन पुरस्ताद्गुणविधिः 'प्रयाजानिष्ट्वा हवींष्यभिघारयति' इति पश्चात्प्रयाजार्थगुणविधिः। अभिघारणं ह्येतत्प्रयाजद्रव्यप्रतिपत्तिरूपं प्रयाजार्थमिति चतुर्थस्याद्यपादे 'अभिघारणे विप्रकर्षादनूयाजवत्पात्रभेदः स्यात्' इत्यधिकरणे व्यवस्थापयिष्यते। तयोश्च प्रयाजसंयुक्तयोः समानयनाभिघारणयोर्मध्येऽभिक्रमणमङ्गमसंयुक्तं विहितम्। तत्र पूर्वपठितसमानयनविधिनोत्थापितं प्रयाजभावनाया इत्थंभावाकाङ्क्षालक्षणं प्रकरणमसमाप्तम्। किंतु पाश्चात्याङ्गभूतप्रयाजशेषाभिघारणविधिपर्यन्तमनुवर्तते, अन्यथा पाश्चात्याङ्गविधौ पुनराकाङ्क्षोत्थापनापत्त्या गौरवप्रसङ्गात्। ततश्चासंयुक्तमपि संयुक्तमध्यपतितमभिक्रमणमुद्भूताङ्गाकाङ्क्षानुवृत्तौ विधानात्प्रयाजानामेव होमेष्वङ्गम्, न तु सर्वहोमेषु। तदुक्तं वार्तिके 'येनाभिक्रमणादूर्ध्वं प्रयाजानां गुणोऽपरः। विधास्यते प्रयाजानां तस्मात्प्रकरणास्तिता' इति। इत्यभिक्रमणाधिकरणम्॥

तैत्तिरीयके 'सत्यं प्रपद्ये' इति प्रपाठके 'प्र वो वाजा अभिद्यवः' इत्याद्याः सामिधेन्यो नाम ऋचः समाम्नाताः। ततः 'अग्ने महाꣳ असि ब्राह्मणभारत, असावसौ' इति प्रवरः। ततः 'देवेद्धो मन्विद्धः' इत्यादयश्च निविदो नाम मन्त्राः समाम्नाताः। तत्र 'विश्वरूपो वै त्वाष्ट्रः' इति प्रपाठके 'देवा वै नर्चि' 'अयज्ञो वा एषः' इति सप्तमाष्टमानुवाकयोः 'पञ्चदश सामिधेनीरन्वाह' इति विहितसामिधेन्यनुवचने 'त्रिः प्रथमामन्वाह त्रिरुत्तमाम्' 'संततमन्वाह' इत्यादिना गुणान्विधाय, 'आर्षेयं वृणीते' इति प्रवरं विधाय, नवमानुवाके 'अग्ने महाꣳ असि' इत्यादिना निविदो व्याख्याय, दशमानुवाके 'त्रींस्तृचाननुब्रूयात्' इत्यादिना काम्यान्सामिधेनीकल्पान्विधाय, 'निवीतं मनुष्याणाम्' इत्येकादशानुवाके 'उपव्ययते देवलक्ष्ममेव तत्कुरुते' इति यज्ञोपवीतं विधाय, 'तिष्ठन्नन्वाह' 'आसीनो यजति' इत्युक्त्वा, पुनरपि सामिधेनीनामेव वाचनिका गुणाः समाम्नाताः—'यत्क्रौञ्चमन्वाहासुरं तद्यन्मन्द्रं मानुषं तद्यदन्तरा तत्सदेवमन्तरानूक्यम्, अन्तर्वेद्यन्यः पादो भवति बहिर्वेद्यन्योऽथान्वाह' इति। अन्तरा क्रौञ्चमन्द्रस्वरयोर्मध्यमस्वरेणेत्यर्थः। तत्र यद्यपि 'प्र वो वाजा' इत्यृचः 'अग्न आयाहि' इति तृचस्य च विनियोगानन्तरम् 'पञ्चदश सामिधेनीरन्वाह' इति पठितम्, तथापि 'त्रिः प्रथमामन्वाह' इत्यनुवचनानुवादेन गुणविध्यनुसारात्ततः प्रागेव निवेशनीयम्, पाठक्रमादर्थक्रमस्य बलीयस्त्वात्। अन्यथा यदाग्नेयादिवाक्येषु का गतिः, तेषामपि 'चतुरवत्तं जुहोति' 'उपरिष्टाद्भ्यज्याधस्तादुपानक्ति' इत्यादिगुणविधिमध्यपाठात्। एतेन "सप्तमाष्टमानुवाकयोः सामिधेन्य उक्ताः" इत्यादितैत्तिरीयकोदाहरणप्रदर्शनपरं भाष्यम् "सामिधेनीर्विधाय 'त्रिः प्रथमाम्' इत्यादिवचनैर्गुणान्विधाय" इति शास्त्रदीपिका भाट्टदीपिका च व्याख्याता। यत्तु कश्चिदाह

११ उपवीतस्य प्राकरणिकाङ्गता-धिकरणम्।

'तैत्तिरीयकं सामिधेन्यो न विहिताः, किंतु तद्गुणा एव विहिताः । शाखान्तर एव च सामिधेनीविधानमिति तैत्तिरीयके सामिधेनीनां प्रकरणं न वक्तुमुचितम् । कर्मणश्च विधिर्यत्र तत्र प्रकरणं भवेत् । न तु यत्र गुणार्थेन श्रवणं तत्र विद्यते' इत्यादि तदत एवोपेक्ष्यम । तत्र किमुपवीतं सामिधेन्यङ्गमुत दर्शपूर्णमासाङ्गमिति संशयः । [1]अङ्गभूतप्रयाजादिशब्दसंयुक्तमध्यपतितं तदसंयुक्तमभिक्रमणादिकमप्युद्भूताङ्गाकाङ्क्षानुवृत्तौ विधानादवान्तरप्रकरणेन प्रयाजाद्यङ्गमिति पूर्वाधिकरणे स्थितम । उपवीतं च तादृशम, 'त्रिः प्रथमामन्वाह' इत्यादिभिः 'अन्तरानूच्यम' इत्यादिभिश्च पुरस्तादुपरिष्टाच्चानुवचनानुवादेन गुणविधानात् । न च निविद्विर्व्यवधानान्न प्रकरणानुवृत्तिरिति वाच्यम । पूषानुमन्त्रणमन्त्रस्य विकृत्यर्थस्य दर्शपूर्णमासप्रकरणपठितस्यापि पाश्चात्यवाचनिकाङ्गविध्यनुसारेण यथा न प्रकरणविच्छेदकत्वं तथा 'अन्तरानूच्यम' इत्यादिपाश्चात्याङ्गविधिमहिम्ना निविदामपि परप्रकरणे पाठमात्रेण प्रकरणविच्छेदकत्वानुपपत्तेः; अन्यथा पाश्चात्याङ्गविधिषु पुनराकाङ्क्षोत्थापनप्रसङ्गात् । किंचावान्तरप्रकरणादेव निविदामपि सामिधेन्यङ्गत्वान्न व्यवधायकत्वम, 'न हि स्वाङ्गं स्वव्यवधायकम' इति न्यायात् । न चैवमपि 'त्रींस्तृचाननुब्रूयात्' इत्यनुवाकगतगुणानां पुरुषार्थतया सामिधेन्यर्थत्वाभावात्तैर्विच्छिन्नं सामिधेनीप्रकरणमिति वाच्यम । न हि सामिधेनीराश्रित्य गुणविधानस्याश्रयप्रकरणविच्छेदकत्वम; तथा सति गोदोहनादीनामपि प्रकरणविच्छेदकत्वापातात् । तस्मात्सामिधेन्यङ्गमुपवीतमिति प्राप्ते, सिद्धान्तयति—

[2]संदिग्धे तु व्यवायाद्वाक्यभेदः स्यात् ॥ २१ ॥

तुरवधारणं । सामिधेन्यङ्गं दर्शपूर्णमासाङ्गं वेति संदिग्धे 'उपव्ययते' इति विहिते उपवीते 'सामिधेनीरन्वाह' इति वाक्यतो भेदः स्यात् सामिधेनीप्रकरणाद्विच्छिन्नं स्यादिति यावत् । कुतः । व्यवायात् निविदादिभिर्व्यवधानादित्यर्थः । न च निविदामप्यवान्तरप्रकरणेन सामिधेन्यङ्गानां न प्रकरणविच्छेदकत्वमिति वाच्यम । निविदो हि 'अग्ने महाँ असि' इत्युपक्रम्य पठिता अग्निप्रकाशकाः प्रकरणं बाधित्वा लिङ्गादग्न्यर्था भवन्ति । सामिधेन्योऽप्यग्निनिष्पत्तिफलकसमिदाधानार्थत्वादग्न्यर्थाः । तासां [3]च न परस्परसंबन्धो भवति ॥

तदेतदाह—

गुणानां च परार्थत्वादसंबन्धः समत्वात्स्यात् ॥ २२ ॥

स्पष्टोऽर्थः । 'त्रींस्तृचाननुब्रूयात्' इति पुरुषार्थगुणैर्व्यवधानादपि सामिधेनीनां प्रकरणविच्छेदः । न च तेषां सामिधेनीराश्रित्य विधानान्न तत्प्रकरणविच्छेदकत्वमिति वाच्यम् । इह हि

1. अङ्गतः प्रयाजादि—ख; प्रयाजादि—क. 2. संदिग्धेषु 3. चोभयेषां—ख.

'एकविंशतिमनुब्रूयात्प्रतिष्ठाकामस्य' इत्यादिना न नित्यसामिधेन्याश्रयणेन फलाय गुणविधिः, निविद्भिः सामिधेनीसंनिधेर्विच्छिन्नत्वात्। किंत्वनुवचनान्तराणि संख्याविशिष्टानि फले विधीयन्ते। न च 'एकविंशतिमनुब्रूयात्' इत्यादौ संख्येयालाभान्न संख्याविशिष्टानुवचनान्तरविधिसंभव इति वाच्यम्। 'यस्य लिङ्गमर्थसंयोगादभिधानवत्' इत्याष्टमिकाद्याधिकरणन्यायेन 'प्रकृतित इत्याश्मरथ्यः' इति संकर्षचतुर्थद्वितीयपादाधिकरणन्यायेन[1] चानुवचनत्वसामान्यान्नित्यसामिधेन्यनुवचनप्रकृतित्वस्य काम्यानुवचनेषु सत्त्वेन चोदकतः प्राप्तानामृचां प्राप्तेरित्यन्यदेतत्। न चैवं सति काम्यानामनुवचनानामेवोपवीतमङ्गं स्यादिति वाच्यम्। विकृतिभूतानि ह्यनुवचनान्युपकारापेक्षाणि क्लृप्तोपकारत्वात्प्रथमं प्राकृतैरेव धर्मैः संबध्यन्ते। न तु संनिहितैर्वैकृतैः प्रथमं संबध्यन्ते, तेषामक्लृप्तोपकारत्वात्। तथा च काम्यानुवचनानां विकृतिभूतानां क्लृप्तोपकारप्राकृतधर्मपूरितानां कथंभावाकाङ्क्षाविरहान्नास्ति तेषां प्रकरणमिति न तदङ्गमुपवीतम्। पाठतः संनिधानमपि प्रकरणाद्दुर्बलमिति दर्शपूर्णमासाङ्गमेव। न च पाश्चात्याङ्गविधिमहिम्ना[2] 'पूषानुमन्त्रणमन्त्रवन्निविदां परप्रकरणपाठान्न व्यवधायकत्वमिति वाच्यम्। न हि निविदां पश्चात्सामिधेन्यङ्गविधिरस्ति, काम्यविधीनामनुवचनान्तरविषयत्वात् 'अन्तरानूच्यम्' इत्यादिविधीनामनुवचनसामान्यविषयाणां सामिधेनीमात्रविषयत्वे प्रमाणाभावात्। यदप्यन्ते 'देवा वै सामिधेनीरनूच्य' इत्यादिवचनं तदप्याधारार्थवादत्वान्न सामिधेन्यनुवृत्तिमावहति। वाचनिकपाश्चात्याङ्गाभावादेव न निविदां सामिधेन्यङ्गत्वमपि। संनिधिमात्रेण तदङ्गत्वशङ्का तु सर्वेषां परस्परमङ्गत्वापत्तेः प्रकरणबाधाच्च निरस्ता। अतो महाप्रकरणाद्दर्शपूर्णमासाङ्गमुपवीतं तत्कर्तृसंस्कारकं सर्वप्रयोगारम्भे तत्कर्तृभिः कार्यम्॥

तदेवम् 'गुणानां च परार्थत्वात्' इति सूत्रमुपवीताधिकरणशेषत्वेन व्याख्यातं वार्तिके। भाष्ये त्वधिकरणान्तरपरतया तद्व्याख्यातम्। तद्यथा— अग्न्याधेये श्रूयते 'वारणो यज्ञावचरः

१२. गुणानां मिथोऽसबन्धाधिकरणम्।

स्यान्न त्वेतेन जुहुयात्' 'वैकङ्कतो यज्ञावचरः स्याज्जुहुयादेवैतेन' इति। यज्ञस्य अवचरः प्रचारसाधनं यज्ञपात्रम्। पवमानेष्टयोऽपि तत्रैव श्रुताः। तत्र पात्राणि किं पवमानेष्टिषु निविशन्ते, उत सर्वयज्ञेष्विति संशयः। तत्र 'अग्नीनादधीत' इत्यग्न्याधेयस्य द्वितीयाश्रुत्या अग्न्यर्थत्वावगमेन फलवत्त्वादफलानि पवमानहवींषि प्रकरणात्तदङ्गतां प्रतिपद्यन्ते। ततश्च यज्ञसाधनतया श्रुतानां पात्राणामयज्ञात्मके विधिवत्संभृतदेशविशेषे मथितस्याग्नेर्निधानेऽग्न्याधेये साक्षात्समावेशासंभवादानर्थक्यतदङ्गन्यायेन पवमानहविःषु निवेश इति प्राप्ते, सिद्धान्तयति— **गुणानां च परार्थत्वादसंबन्धः समत्वात्स्यात्॥** आधानस्य पवमानहविषां चाग्न्यर्थतया गुणभूतानां परार्थतया समत्वात्

1. पादीयाधिकरणन्यायेन—क, घ, ङ. 2. पूषानुमन्त्रणवत्.

न परस्परं तादर्थ्यलक्षणः संबन्धः । ततश्च पवमानेष्टीनामाधानाङ्गत्वाभावान्न तासामानर्थक्यतदङ्गन्यायविषयत्वमित्यर्थः । तथाहि— 'यदाहवनीये जुह्वति' इत्यनारभ्याधीतमेकं वाक्यम् । पवमानहविःप्रकरणे च तत्सरूपमेवान्यद्वाक्यम् । तत्रानारभ्याधीतस्य प्रकृत्यर्थत्वात्प्रकृतिगाम्याहवनीयश्चोदकतो विकृतिष्वपि भवतीति सर्वयज्ञार्थः संपद्यते । पवमानेष्टिप्रकरणपठितं तु वाक्यं न तावदनारभ्याधीतवाक्यप्राप्तानुवादकम् । पवमानहविर्वेलायामाहवनीयस्यानिष्पन्नत्वात् । अत एव न पवमानहविःष्वधिकरणतयाहवनीयविधिपरम् अनिष्पन्नस्याधिकरणतया विधातुमशक्यत्वात् किंत्वाहवनीये निष्पादयितव्ये पवमानहविषां साधनतया विधिपरम् । जुहोतिना हि होमसंयुक्तानि पवमानहवींषि लक्ष्यन्ते । न चैवं शेषत्वार्थकसप्तम्यनुपपत्तिरिति शङ्क्यम, 'तप्ते पयसि दध्यानयति' इत्यत्र नयतेर्द्विकर्मकत्वेनानीयमानदध्याप्यतया प्रधानकर्मत्वेन साध्यत्वेऽपि यथा 'पयसि' इति सप्तमी तद्वदुपपत्तेः । न चाग्नीनां श्रौताधानावरुद्धत्वात्तत्र वाक्येन पवमानहविषां साधनतया विधिरनुपपन्नः, लक्षणायाः समभिव्याहारमूलकत्वेन तदप्रस्यस्य वाक्यगम्यत्वादिति वाच्यम् । वाक्यानर्थक्यापत्त्या दुर्बलेनापि वाक्येन पवमानहविषामगन्यर्थत्वलाभात् । एवं च पवमानहविषामाधानवदगन्यर्थत्वेनाधानाङ्गत्वाभावादाधानेऽसंभवतां पात्राणां पवमानेष्टिष्वानर्थक्यतदङ्गन्यायानवतरणेन समावेशासंभवात्सर्वयज्ञार्थत्वमिति ॥ तदेतद्भाष्यकारोत्प्रेक्षितमधिकरणमापातरमणीयमेव । पवमानेष्टिप्रकरणस्थवाक्येन पवमानहविषामगन्यर्थत्ववर्णनस्य व्यर्थत्वात् तेषामाधानाङ्गत्वेऽपि पात्राणां सर्वयज्ञार्थत्वोपपत्तेः । प्रबलेन वाक्येन यज्ञसंयुक्ततया श्रुतानां दुर्बलेन प्रकरणेनाधानाङ्गत्वस्याप्रसक्त्याधानाङ्गत्वेऽपि पवमानहविषाम्, तेषु पात्राणां समावेशस्यानवगमात् । यत्तु दुर्बलेनापि वाक्येन श्रौताधानावरुद्धाग्न्यर्थत्वं पवमानहविषाम् अन्यथा वाक्यानर्थक्यापातादिति तन्न, पवमानहविर्वेलायां परमापूर्वोत्पत्त्यभावेनाहवनीयस्यानिष्पन्नतया पवमानहविःष्वेवानारभ्यवाक्यतस्तदप्राप्तौ प्राकरणिकयदाहवनीयवाक्यस्याधानजन्योत्पत्त्यपूर्वविशिष्टाग्न्यधिकरणत्वप्रापणार्थत्वात्[1]; एवम् 'यद्गार्हपत्य आज्यमधिश्रयन्ति' इत्यादिवाक्यैर्गार्हपत्यादिप्राप्तिः । एवं च सप्तम्या न लक्षणापि । न च प्रबलव्रीहिश्रुत्यवष्टब्धानामवघातादीनां यथा प्रकरणतो निवेशस्तद्वदाधाने निवेशः पात्राणां किं न स्यादिति वाच्यम्। यज्ञस्यापूर्वाव्यभिचारादेवापूर्वार्थत्वनिर्वाहोपपत्तौ दुर्बलप्रकरणेन प्रकृताधानसंबन्ध्यपूर्वलक्षणायाः स्वीकारायोगात् । सर्वत्र हि स्वोद्देश्यस्यापूर्वव्यभिचारे सत्यपूर्वसाधनत्वलक्षणार्थं प्रकरणानुप्रवेशः यथा 'व्रीहीनवहन्ति' इत्यादौ, तत्र चानर्थक्यतदङ्गन्यायः । इह तु यज्ञपदेनैवाव्यभिचरितापूर्वसाधनत्वोपस्थितौ तदर्थं प्रकरणानुप्रवेशाभावात्प्रधानाधानसंबन्धस्यैवाप्रसक्तौ कथमानर्थक्यतदङ्गन्यायः। एवं सत्यपि यदि पवमानेष्टिसंनिधौ 'वारणो यज्ञावचरः' इत्याम्नातं स्यात्तदानुवादस्य सति संभवे संनिहितगामित्वात्सप्तदशारत्निवाक्ये यूपशब्दस्य प्रकृतवाजपेयसंबन्धियूपपरत्ववद्यज्ञशब्दोऽपि पव-

1. अग्न्यधिकरणकत्व...— ग, घ, ङ.

मानेष्टिमात्रविषयः स्यात्। नैवमस्ति, पवमानेष्टीनां प्रदेशान्तरस्थत्वात्। ततश्च प्रकरणात्पूषानुमन्त्रणवदुत्कृष्टानि वारणादिपात्राणि सर्वयज्ञार्थानि भवन्ति। एवं च पवमानहविषामाधानाङ्गत्वे सत्यपि प्रकारान्तरेण वारणादिपात्राणां सर्वयज्ञार्थत्वसंभवान्निष्प्रयोजनं भाष्यकारीयमधिकरणमिति 'गुणानां च परार्थत्वात्—' इति सूत्रं पूर्वाधिकरणशेषतयोक्तरीत्या व्याख्येयमिति वार्तिकादिग्रन्थेषु बहुधा प्रपञ्चितम्। इत्युपवीताधिकरणम्॥

स्तो दर्शपूर्णमासयोराज्यभागावाग्नेयः सौम्यश्च। तयोः क्रमेणानुवाक्याश्चतस्र ऋचः समाम्नाताः। 'अग्निर्वृत्राणि जङ्घनत्' इत्याग्नेयी, 'त्वं सोमासि सत्पतिस्त्वं राजोत वृत्रहा' इति सौमीति द्वे। ते च वृत्रहननप्रकाशिके वार्त्रघ्न्यौ। 'अग्निः प्रत्नेन जन्मना' इत्याग्नेयी, 'सोम गीर्भिष्ट्वा' इति 'सौमी' इति च द्वे। ते च 'वावृधे' 'वर्धयामः' इति वृद्धिप्रकाशिके वृधन्वत्यौ। तदेतदनुवाक्याचतुष्टयमधिकृत्याम्नायते 'वार्त्रघ्नी पौर्णमास्यामनूच्येते, वृधन्वती अमावास्यायाम्' इति। वार्त्रघ्नी वार्त्रघ्न्यौ, वृधन्वती वृधन्वत्यौ। विभक्तेरीकारश्छान्दसः। तत्र किमाज्यभागयोः क्रमप्राप्ता मन्त्रास्ताभ्यामाच्छिद्य दर्शपूर्णमासाङ्गतया विधीयन्ते, उताज्यभागयोरेवाव्यवस्थया प्राप्तयोर्युगलयोर्व्यवस्थामात्रं विधीयत इति संशयः। तत्र पौर्णमास्यमावास्याशब्दौ कर्मवचनौ, कालवचनत्वे मन्त्राणां कालप्रकाशकत्वाभावेनादृष्टद्वारैव कालार्थत्वापत्त्या 'काले यावाज्यभागौ' इत्याज्यभागोपलक्षकताप्रसङ्गात्। यदि च कालस्य प्रकरणं स्यात्तदा कथंचिदप्यदृष्टकल्पनया कालार्थता मन्त्राणां स्यात्। नैवमस्ति, कालस्याफलत्वात्। तस्मात्क्रमं बाधित्वा वाक्येन प्रकृतदर्शपूर्णमासोद्देशेन मन्त्रा विधीयन्ते। सप्तमी तु 'पूर्वेद्युरमावास्यायां वेदिं करोति' इतिवत्प्राधान्येऽप्यविरुद्धेति प्राप्ते, सिद्धान्तयति—

१३. वार्त्रघ्नयधिकरणम्।

मिथश्चानर्थसंबन्धः[1] ॥ २३ ॥

मिथः परस्परं मिलिताभ्यामनुवाक्याभ्यां वार्त्रघ्नीभ्यां पौर्णमासीकर्मणः तथा वृधन्वतीभ्याममावास्याकर्मणः अर्थेन प्रयोजनेन संबन्धो नास्ति। नैकैकस्य कर्मणो द्वाभ्यामनुवाक्याभ्यां कार्यमस्तीत्यर्थः। नाप्येकैकयेति चकारार्थः। न च पौर्णमास्यामाग्नेयस्य प्रथमा पुरोनुवाक्या अग्नीषोमीयस्य तु द्वितीया, दर्शेऽपि प्रथमस्य प्रथमा द्वितीयस्य द्वितीयेति न विरोध इति वाच्यम्। द्वितीया ह्यनुवाक्या सौमी। न च सोमदेवत्यं प्रधानं दर्शपूर्णमासयोरस्ति। अग्नीषोमीयेऽप्यग्निसहितस्य सोमस्य देवतात्वम्, न केवलस्येति स्थितिः। न चाग्नीषोमीये द्वयोरपि प्रयोग इति वाच्यम्। 'पुरोनुवाक्यामन्वाह' इति संख्याया विवक्षितत्वात्। न च 'वचनात्त्वयथार्थमैन्द्री स्यात्' इति न्यायेन वचनबलादग्नीषोमादिपरता नीयतामिति वाच्यम्। तत्र 'ऐन्द्रया गार्हपत्यम्' इति

1. संबन्धात्.

द्वितीयाश्रुत्या लिङ्गबाधेन मन्त्रस्य लक्षणाश्रयणेऽपि प्रकृते मन्त्रविनियोगस्य वाक्यगम्यतया वाक्यस्य च लिङ्गापेक्षया दुर्बलत्वेन तद्बलतो लिङ्गं बाधित्वा मन्त्रलक्षणाश्रयणस्यान्याय्यत्वात् । मन्त्रविनियोगो ह्यत्र वाक्यगम्यः, सप्तम्या लक्षणाश्रयणात् लक्षणायाश्च समभिव्याहारमूलकत्वेन तद्गम्यस्यार्थस्य वाक्यलभ्यत्वात् । न च वाक्यत्वेऽपि विधित्वात्प्राप्तार्थमन्त्रलिङ्गापेक्षया प्राबल्यमिति वाच्यम् । प्रबलमपि हि विधिवाक्यं मन्त्रलिङ्गस्य तदैव बाधकं, यदि मन्त्रलिङ्गमबाधित्वा स्वयमात्मानं न लभेत । प्रकृते च वार्त्रघ्नीवाक्यं वृधन्वतीवाक्यं च पौर्णमास्यमावास्यागतयोराज्यभागयोरव्यवस्थया पुरोनुवाक्यायुगलद्वयस्य लिङ्गतः प्राप्तौ तदबाधेन पौर्णमासीकर्मगतयोराज्यभागयोर्वार्त्रघ्न्यावमावास्याकर्मगतयोर्वृधन्वत्यावित्यपेक्षितव्यवस्थामात्रविधानतो लब्धात्मनी भवत । प्रधानोद्देशेन मन्त्रविधौ तु प्रधानेषु मन्त्रान्तरसद्भावादनपेक्षितविधानं प्राप्तव्यवस्थामात्रविधानोपपत्तावत्यन्ताप्राप्तप्रापणं च दोषः, प्राप्तव्यवस्थाया लघुत्वात् । एवं च वार्त्रघ्नयोः पौर्णमासीकर्मगताज्यभागाङ्गत्वात्पौर्णमासीविकृतिभूतसौर्येष्ट्यादावमावास्याकालत्वेऽपि प्रवृत्तिः, वृधन्वत्योस्तु दर्शकर्माङ्गाज्यभागार्थत्वात्तद्विकृतिभूतप्रजाकामैन्द्राग्नेष्ट्यादौ पौर्णमासीकालकत्वेऽपि प्रवृत्तिः । अस्तु वा कालद्वारा कर्मणि वृत्तेः पौर्णमास्यमावास्याशब्दयोर्मुख्यवृत्त्या कालवचनता । तथापि पौर्णमास्यां काले यावाज्यभागौ तयोर्वार्त्रघ्नावित्येवंप्रकारेणाज्यभागोद्देशेनैव व्यवस्थानान्न प्रधानाङ्गता । न चैवं सति विशिष्टोद्देशो लक्षणा च स्यादिति वाच्यम् । पौर्णमास्यां काले वार्त्रघ्न्यौ दर्शकाले वृधन्वत्यावित्येव व्यवस्थाविधिः । अव्यवस्थायां च प्राप्तायां व्यवस्था विधातव्या । सा चाज्यभागद्वारैव प्राप्तेति साक्षात्कालोद्देशेन व्यवस्थाविधानेऽपि तत्कालकर्तव्याज्यभागयोर्व्यवस्था पर्यवस्यति । एवं च न विशिष्टोद्देशदोषप्रसक्तिः । पौर्णमास्यमावास्याशब्दयोः स्वार्थवृत्त्योरेवोद्देश्यसमर्पकत्वान्न लक्षणापि । तथा च पौर्णमासीविकृतिभूतसौर्यादावमावास्याकालकत्वे वृधन्वत्योरेव प्रवृत्तिः, न तु वार्त्रघ्न्योः । दर्शविकृतिभूतैन्द्राग्नादौ पौर्णमासीकालकत्वे वार्त्रघ्न्योरेव प्रवृत्तिः, न तु वृधन्वत्योरिति फलभेदः । पक्षद्वयमपीदं याज्ञिका अपि संमन्यन्ते । आह हि बोधायनः 'वार्त्रघ्नावाज्यभागौ पूर्वपक्षे वृधन्वन्तावपरपक्ष इत्यौपमन्यवः' इति । औपमन्यवग्रहणात्कर्ममुखेन व्यवस्थां स्वयं बोधायनो मन्यत इति गम्यते । वस्तुतस्तु कौषीतकब्राह्मणे 'पौर्णमास्यां वार्त्रघ्नावाज्यभागौ भवतः, अमावास्यायां वृधन्वन्तौ' इत्याज्यभागशब्दसंयोगेन विधानात्प्रधानार्थत्वस्याप्राप्तेः पूर्वपक्षानुन्मेषादधिकरणप्रवृत्तिश्चिन्त्यप्रयोजनेत्यास्तां तावत् । वृत्तमधिकरणम् ॥

दर्शपूर्णमासयोः श्रूयते 'कर्मणे वां देवेभ्यः शकेयमिति हस्तावनेनिक्ते' 'गार्हपत्यात्प्रक्रम्य संततामुलपराजिं स्तृणाति' इति । अवनेनिक्ते प्रक्षालयति । उलपाः उशीरतृणानि शुष्कतृणानि वा । तेषां राजिः पङ्क्तिः । तथा ज्योतिष्टोमे श्रूयते 'मुष्टीकरोति, वाचं यच्छति, अदीक्षिष्टायं ब्राह्मण इति दीक्षितमावेदयति' इति । दीक्षितत्वेन यजमानं बोधयतीत्यर्थः । तत्रावनेजनं

तावत्कर्तृसंस्कारत्वात् 'कर्मणे वाम्' इति मन्त्रलिङ्गाच्च करिष्यमाणकर्माङ्गम्। मुष्टीकरणं वाग्यमनं च कायिकवाचिकव्यापारान्तरविरमणमुखेन करिष्यमाणकर्मसु मनःप्रणिधानार्थम्। तत्र किमवनेज-

१४. हस्तावनेजनादीनां कृत्स्नप्राकरणिकाङ्गताधिकरणम्।

नमुलपराजिस्तरणाङ्गं वाग्यमनं मुष्टीकरणं च दीक्षितावेदनाङ्गम्, उतावनेजनमध्वर्युकर्तृकप्राकरणिकसर्वकर्माङ्गं तथा वाग्यमनं मुष्टीकरणं च तदुभयानुवृत्तिकालीनप्राकरणिकयाजमानसर्वकर्माङ्गमिति संशयः। तत्रानन्तर्यादवान्तरप्रकरणादेकवाक्यत्वाच्चावनेजनमुलपराजिस्तरणाङ्गम्। अस्ति हि 'हस्तावनेनिक्ते' 'उलपराजिं स्तृणाति' इत्यनयोरेकवाक्यत्वमाकाङ्क्षावशात्। अस्ति हि सर्वभावनासु 'किम्' इत्युपकार्याकाङ्क्षा। ततश्चावनेजनेन किं कर्तव्यमित्यपेक्षायाम् 'उलपराजिं स्तृणाति' इत्युपतिष्ठते। न च तदतिक्रमे हेतुरस्ति। न च विनिगमनाविरहादवनेजनस्यैवोलपराजिस्तरणमङ्गं किं न स्यादिति वाच्यम्। प्रथमोच्चारितावनेजनवाक्योत्थकिमाकाङ्क्षाप्रस्तस्योलपराजिस्तरणस्य किमाकाङ्क्षाविरहेणावनेजनस्य तदर्थत्वानुपपत्तेः। एवं मुष्टीकरणवाग्यमनयोरप्यावेदनार्थत्वं वेदितव्यम्। न चाध्वर्यवे दीक्षितावेदने याजमानमुष्टीकरणवाग्यमनाभ्यां कथमुपयोगः तयोर्यजमानमनःप्रणिधायकत्वेन यजमानकर्मण्येवोपयोगादिति वाच्यम्। आध्वर्यवेष्वपि पदार्थेषु यजमानस्य प्रयोजकत्वेन मनःप्रणिधानावश्यंभावात्। अतोऽवनेजनमुलपराजिस्तरणाङ्गं मुष्टीकरणं वाग्यमनं च दीक्षितावेदनाङ्गमिति प्राप्ते, सिद्धान्तयति—

आनन्तर्यमचोदना ॥ २४ ॥

संनिधिरत्राप्रमाणमित्यर्थः। आनन्तर्यस्यावर्जनीयत्वेनाङ्गताग्राहकत्वानुपपत्तेः। ग्राहकत्वेऽपि तदपेक्षया प्रबलेन लिङ्गेन प्रकरणेन च बाधात्स्वोत्तराध्वर्यवसकलपदार्थाङ्गत्वं हस्तावनेजनस्य। मुष्टीकरणवाग्यमनयोस्तु तदनुवृत्तिकालीनसर्वकर्मार्थत्वम्॥

एकवाक्यत्वमप्यसिद्धमित्याह—

वाक्यानां च समाप्तत्वात् ॥ २५ ॥

आख्यातानामेकवाक्यत्वप्रयोजकयच्छब्दाद्यभावेनावनेजनादिवाक्यानां स्वस्वार्थेष्वेव पर्यवसन्नत्वान्नैकवाक्यत्वम्। चकारोऽवान्तरप्रकरणनिरासार्थः। वाचनिकसंदंशाभावेनावनेजनादावाकाङ्क्षानुत्थानात्। एतेन यच्छब्दाद्यभावेऽपि 'पश्य मृगो धावति' इत्यादिवदेकवाक्यत्वमिति निरस्तम्। तस्मात्सर्वार्थतेति। वृत्तमधिकरणम्॥

सन्ति दर्शपूर्णमासयोराग्नेयाग्नीषोमीयैन्द्राग्नाः पुरोडाशाः। तत्र 'आग्नेयं चतुर्धा करोति' इति चतुर्धाकरणविधौ आग्नेयशब्देनाग्नीषोमीय ऐन्द्राग्नश्च द्विदेवत्योऽपि गृह्यते, उत केवलाग्निदेवत्य एव गृह्यत इति संशये, पूर्वपक्षयति—

शेषस्तु गुणसंयुक्तः साधारणः प्रतीयेत मिथस्तेषामसंबन्धात् ॥ २६ ॥

तुरण्यर्थे । हस्तावनेजनादिकं करिष्यमाणसकलकर्मसाधारणमुक्तम । एवं शेषप्रतिपत्तिरूपश्चतुर्धाकरणसंस्कारोऽपि द्विदेवत्यसाधारणः प्रतीयेत । कुतः । यतो द्विदेवत्योऽपि गुणसंयुक्तः

१५. चतुर्धाकरणस्याग्नेयमात्राङ्गताधिकरणम् ।

अग्निसंयुक्तः । अग्नीषोमीयैन्द्राग्नयोरप्यग्निसंबन्धस्य सत्त्वात् । नन्वाग्नेयशब्दस्य देवतातद्धितान्तस्य देवतात्वेनाग्निसंबन्धिवाचकस्य कथमग्नीषोमीयैन्द्राग्नयोर्वृत्तिरित्यत आह—मिथस्तेषामसंबन्धादिति । न तावदत्र यदाग्नेयादिवाक्य इवाग्निः कार्ययोगित्वेनाश्रीयते, येन देवतात्वेनैव तत्संबन्धो गृह्येत । किंतु चतुर्धाकरणद्रव्योपलक्षणमात्रम । उपलक्षणानां च न कार्येण संबन्धोऽस्ति । न हि 'चित्रगुमानय' इत्युक्ते चित्रा गावोऽप्यानीयन्ते । न च 'सहैव दशभिः पुत्रैर्भारं वहति गर्दभी' इत्यादौ पुत्रादीनां वहनादिनान्वयोऽस्ति । अत एव च 'द्विपुरोडाशायां स्यादन्तरार्थत्वात्' इति दाशमिकान्त्याधिकरणे 'अनपायश्च कालस्य लक्षणं हि पुरोडाशौ' इति गुणसूत्रेण 'उपांशुयाजमन्तरा यजति' इत्यन्तरालोपलक्षणपुरोडाशद्वयकार्यान्वयाभावात् 'नासोमयाजिनो ब्राह्मणस्याग्नीषोमीयः पुरोडाशो विद्यते' इत्यसोमयाजिनो ब्राह्मणस्यैकपुरोडाशायामपि पौर्णमास्याम् 'उपांशुयाजोऽस्ति' इति व्यवस्थापयिष्यते । अत एव च 'त्वष्टारं तूपलक्षयेत्पानात्' इत्यग्रिमपादीयाधिकरणे 'सजूर्देवेन त्वष्ट्रा सोमं पिब' इति त्वष्टुरुपलक्षणभूतत्वान्न पानान्वय इति व्यवस्थापयिष्यते । एवं चतुर्धाकरणे उपलक्षणमात्रमग्निः । स च यावता विना न शक्नोति द्रव्यं लक्षयितुं तावन्मात्रमादर्तव्यम । संबन्धमात्रेण चासौ शक्नोति लक्षयितुम् । संबन्धसामान्यं चाग्नेर्द्विदेवत्ययोरग्नीषोमीयैन्द्राग्नयोरपि विद्यत इत्याग्नेयशब्देन तावपि व्यपदेशमर्हतः । अस्तु वा देवतात्वेनैवोपलक्षणमग्निः । तथापि यथा डित्थडिबित्थयोर्माता डित्थमातेत्यपि व्यपदिश्यते तद्वदुभाभ्यां दीयमानः पुरोडाश एकस्मा अपि दीयत इति त्यज्यमानहविरुद्देश्यत्वलक्षणदेवतात्वेनाग्निसंबन्धस्य द्विदेवत्ययोरपि सत्त्वात्तावप्याग्नेयव्यपदेशमर्हत इति तयोरप्यस्ति चतुर्धाकरणमिति प्राप्ते, सिद्धान्तयति—

व्यवस्था वार्थसंयोगाल्लिङ्गस्यार्थेन संबन्धाल्लक्षणार्था गुणश्रुतिः ॥ २७ ॥

वाशब्दो नार्थे । आग्नेयशब्दो द्विदेवत्यसाधारणो न भवति । किंतु केवलाग्निदेवत्ये पुरोडाशे तस्य व्यवस्था असाधारण्यम । कुतः । अर्थसंयोगात् अर्थेन देवतारूपेणाग्निना केवलाग्निदेवत्यपुरोडाशस्यैव संबन्धात । यद्यप्यग्निरुपलक्षणं तथापि श्रुतेन देवतात्वेनैव स उपलक्षणं भवितुमर्हति न त्वश्रुतेन संबन्धमात्रेण, तथा सति श्रुतबाधप्रसङ्गादश्रुतलक्षणाप्रसङ्गाच्च । न च 'सर्वत्राग्निकलिभ्यां ढग्वक्तव्यः' इति संबन्धमात्रेऽपि तद्धितस्य विधानान्नोक्तदोष इति वाच्यम् । प्रति-

पदोक्तत्वेन देवतातद्धितस्यैवाश्रयणीयत्वात्, अग्नेर्लक्षणतायाः प्रसिद्धसंबन्धेनैव वक्तव्यत्वाच्च। न ह्यप्रसिद्धसंबन्धस्य लक्षणत्वं संभवति। प्रसिद्धिश्चाग्नेर्द्रव्यसंबन्धस्य विधिवाक्यादेव वाच्या। स च संबन्धो हविरुद्देश्यत्वलक्षणदेवताभावात्मैव विधिवाक्यादवगत इति देवतातद्धित एवाश्रयितुं युक्तः। ननूक्तरीत्याग्नीषोमीयैन्द्राग्नयोरग्नेरपि देवतात्वमस्तीत्यत आह--- लिङ्गस्यार्थेन संबन्धादिति। लिङ्गस्य द्रव्योपलक्षणस्य अग्नेः अर्थेन सोमादिना संबन्धात्सापेक्षत्वात्। तद्धितो हि 'समर्थानां प्रथमाद्वा' इति स्मरणात्सामर्थ्यमपेक्षते। अग्नीषोमीय ऐन्द्राग्न इति च द्वन्द्वसमासादुत्पन्नस्तद्धितश्च द्वयोः परस्परसहितयोर्देवतात्वमाह। ततश्च 'सापेक्षमसमर्थम्' इति न्यायेन सोमादिसापेक्षस्याग्नेरसमर्थतया ततस्तद्धितोत्पत्त्यसंभवेन तद्धितान्त आग्नेयशब्दः केवलाग्निदेवत्यं पुरोडाशमभिधत्ते, न त्वन्यसहिताग्निदेवताकमपि। इत्थमातेत्यत्र तु जनयितृत्वरूपमातृत्वस्य डिवित्थनिरपेक्षमेव डित्थनिरूपितत्वात्परस्परसाहित्यबोधकतद्धिताद्यभावाच्च तथा व्यपदेशो युज्यते। नन्वेवं सति 'आग्नेयस्य मस्तकं विरुज्य प्राशित्रमवद्यति' इति प्राशित्रावदानमप्यग्नीषोमीयैन्द्राग्नयोर्न स्यादित्यत्राह— लक्षणार्थो गुणश्रुतिरिति। नेदं वचनमाग्नेयोद्देशेन प्राशित्रावदानविधिपरम्, 'प्राशित्रमवद्यति' इति सामान्यवचनेन सिद्धत्वात्; किंतु आग्नेयस्य मस्तकं भित्त्वा प्राशित्रं ततोऽवदातव्यम्; अन्यस्य तु पुरोडाशस्य विरुज्याविरुज्य वा यस्मात्कस्माच्चित्प्रदेशात्—इत्येवमाग्नेयप्राशित्रानुवादेन लक्षणार्था 'मस्तकं विरुज्य' इति गुणविधानार्था; गुणश्रुतिराग्नेयत्वश्रवणमिति न दोषः। न चाग्निदेवताकहविष्ट्वं नोद्देश्यतावच्छेदकं विशिष्टोद्देशे वाक्यभेदापत्तेः, किंतु तद्धितोपात्तहविष्ट्वमेव, तथा च द्विदेवत्ययोरपि चतुर्धाकरणं स्यात्; किं बहुना आज्यादिष्वपि तत्प्रसङ्ग इति वाच्यम्। यत्र हि परस्परान्वयो न व्युत्पन्नस्तत्रैव विशिष्टोद्देशनिबन्धनो वाक्यभेदो दोषाय। तथा च 'यस्योभयं हविरार्तिमार्च्छति' इत्यत्र नोभयत्वविशिष्टं हविरुद्देश्यम्। यत्र तु सामर्थ्यापेक्षसमासादौ परस्परान्वयो व्युत्पन्नो यथा 'अश्वाभिधानीम्' इत्यादौ तत्र न भवत्येव विशिष्टोद्देशप्रयुक्तदोषः। प्रकृते चाग्नेयशब्दे सामर्थ्यापेक्षतद्धितान्ते प्रकृतिप्रत्ययार्थयोरन्वयस्य व्युत्पन्नत्वान्न भवत्येव विशिष्टोद्देशो दोषाय। न चैवमपि 'चतुर्धा कृत्वा पुरोडाशं बर्हिषदं करोति' इति वाजसनेयब्राह्मणे पुरोडाशमात्रस्य चतुर्धाकरणवचनादनाग्नेयस्यापि तत्प्रसङ्ग इति वाच्यम्। तस्य सामान्यवचनस्य 'आग्नेयं चतुर्धा करोति' इति शाखान्तरीयवचनेन विशेषे व्यवस्थापनात्। तदुक्तं वार्तिके 'अवश्यमेव सामान्यं विशेषं प्रति गच्छति। गतमात्रं च तत्तेन विशेषे स्थाप्यते ध्रुवम्' इति। ननु यत्र सामान्यवचनस्यानुष्ठानाय विशेषापेक्षा तत्रैव विशेषोपसंहारः यथा 'अग्नीषोमीयं पशुमालभेत' इति सामान्यवचनस्य 'छागस्य वपाया मेदसः' इति मन्त्रवर्णोपस्थितविशेषे उपसंहारः। अन्यथा 'न ब्राह्मणं हन्यात्' इति सामान्यवचनस्य 'नात्रेयीं हन्यात्' इति विशेषे उपसंहारापत्तिः, 'न हिंस्यात्सर्वा भूतानि' इति सामान्यवचनस्य च

'न ब्राह्मणं हन्यात्' इति विशेषे उपसंहारापत्तिः। उक्तं च 'सामान्यविधिरस्पष्टः संह्रियेत विशेषतः। स्पष्टस्य तु विधेर्नैवमुपसंहार इष्यते' इति। अनुष्ठानाय विशेषापेक्षत्वमस्पष्टत्वम्। प्रकृते च चतुर्धाकरणस्य प्रतिपत्तिरूपतया सर्वापेक्षितत्वेन सामान्यवचनस्य पुरोडाशसामान्ये चतुर्धाकरणानुष्ठापकत्वोपपत्त्यानुष्ठानाय विशेषापेक्षाविरहान्न विशेषवचनस्योपसंहारकत्वं संभवतीति चेत्सत्यम्। 'पुरोडाशं चतुर्धा कृत्वा बर्हिषदं करोति' इति सामान्यवचनं तावत्सिद्धवन्निर्देशान्न चतुर्धाकरणविधायकम्। किंतु वाक्यान्तरप्राप्तचतुर्धाकरणमनूद्य बर्हिषत्त्वकरणस्य तदानन्तर्यविधानार्थमेव। अनुवादश्च यथाप्राप्ति भवतीति प्रापकाप्रेयवचनानुसारेण विशेषविषयत्वं सामान्यवाक्यस्य पर्यवस्यति। यद्यपि तैत्तिरीयशाखायाम् 'पुरोडाशस्यैव बर्हिषदो मीमांसा' इति प्रकृत्य 'चतुर्धा करोति' इति सामान्येन चतुर्धाकरणविधानमस्ति; न ह्यत्र सिद्धवन्निर्देशोऽस्ति; किंच क्त्वाप्रत्यये सत्यपि 'रेवतीषु वारवन्तीयं साम कृत्वा' इतिवत् 'चतुर्धा कृत्वा' इति वाजसनेयवचनमपि विधायकमेव। तथापि स्पष्टस्यापि सामान्यवचनस्य यत्र नानर्थक्यं तत्र विशेषोपसंहाराभ्युपगमान्न दोषः। प्रकृते च सामान्यवचनस्य शाखान्तरीयत्वान्नानर्थक्यम्। अन्यथा नानाशाखागताग्निहोत्रादिविधिवाक्येषु का गतिः। यथा चैतत्तथा शाखान्तराधिकरणे 'अद्भिर्वचनं वा श्रुतिसंयोगाविशेषात्' इत्यादिपञ्चसूत्रीव्याख्यावसरे भाष्यवार्तिकयोः प्रपञ्चितं स्पष्टीकृतं चास्माभिः। एवं च 'न हिंस्यात्सर्वा भूतानि' इति सामान्यवचनस्यापि शाखान्तरीयत्वेनानर्थक्याभावात् 'न ब्राह्मणं हन्यात्' इति विशेषे उपसंहार एवावकल्पते। न चैवं सति ब्राह्मणव्यतिरिक्तजीवहिंसायाः कथं प्रतिषेध इति वाच्यम्। 'अनस्थिमतां[1] च गोणीभारं हत्वा' 'क्षत्रियं हत्वा गवां सहस्रम्—' इत्यादिभिः स्मृतिवचनैः पिपीलिकादितत्तत्सर्वजन्तुवधेषु प्रायश्चित्तविधायकैः कल्पितेषु वैशेषिकेष्वहिंसावचनेषु परःसहस्रेष्वपि सामान्याहिंसावचनस्योपसंहारावश्यंभावात्। 'न ब्राह्मणं हन्यात्' इति सामान्यवचनस्य तु एकशाखागतत्वात् 'नात्रेयीं हन्यात्' इत्यत्र नोपसंहारः। तैत्तिरीयशाखायां हि द्वितीयकाण्डे षष्ठप्रपाठके 'देवा वै यज्ञस्य' इत्यनुवाके 'तस्माद्ब्राह्मणाय नापगुरेत, न निहन्यात्, न लोहितं कुर्यात्' इत्यत्र 'न निहन्यात्' इति ब्राह्मणसामान्यहिंसानिषेधः श्रुतः। तत्रैव च शाखायां षष्ठकाण्डे पञ्चमप्रपाठके 'गर्भेणाविज्ञातेन ब्रह्महा' इति श्रुतम्। पुमानयं स्त्री वेत्यनिश्चितेन गर्भेण हतेन ब्रह्महा भवतीति तदर्थः। अत एव षष्ठाद्यपादे 'लिङ्गविशेषनिर्देशात्पुंयुक्तमैतिशायनः' इत्यधिकरणे 'तद्धन्तृत्वाच्च दोषश्रुतिरविज्ञाते' 'चोदितत्वाद्यथाश्रुति' इति गुणसूत्रव्याख्यावसरे भाष्ये—'अविज्ञातेन गर्भेण—इत्यनुवादः प्रशंसार्थः; आत्रेयीं च न हन्तव्या—' इति 'आत्रेयीमापन्नगर्भामाहुः' इति च। अस्तु वा आत्रेयी अत्रिगोत्रा। तथापि 'ब्राह्मणमात्रं च' 'गर्भं च तस्याविज्ञातम्' 'आत्रेयीं च स्त्रियम्' इति समुच्चयार्थेन चकारेण तद्व्यतिरिक्तब्रह्महत्या-

1. अनड्वाहं— ख; अनस्थ्नां— ग; अनस्थानां— घ, ङ; अनस्थीनां— क.

निषेधस्याप्यापस्तम्बबोधायनमन्वादिस्मृत्यवगमाद्ब्राह्मणसामान्यनिषेधवचनस्य तदेकशाखास्थत्वमनुमिमीमहे । अतो न तस्य विशेषनिषेधोपसंहारः । अत एव 'विहारो लौकिकानाम्' इति द्वादशद्वितीयाद्याधिकरणे 'मांसपाको विहितप्रतिषेधः स्यादाहुतिसंयोगात्' इति गुणसूत्रे तद्भाष्यादौ च 'मांसं न पचेयुस्तस्मिन्नग्नौ' इति सामान्यनिषेधस्य 'तस्मिन्नग्नौ मांसं न पचन्ति यस्मिन्नाहुतीर्जुह्वति' इति विशेषवचनानुसारेणाहवनीयविहितवपाश्रपणनिषेधपरत्वमभ्युपगतम् । एवं च 'वार्ताकं न भक्षयेत्' इत्यादिसामान्यनिषेधस्मृतेः श्वेतवार्ताकादिनिषेधस्मृत्युपसंहारो माधवहेमाद्रिहरदत्तादिशिष्टानुक्रान्तोऽप्यविरुद्धो भवति । यत्तु कात्यायन आह 'उभौ वाविशेषात्' इति—'आग्नेयानाग्नेयावपि चतुर्धा करोति पुरोडाशम्' इत्यविशेषेण श्रवणादित्यर्थः; तदेतत्सूत्रं पूर्वपक्षपरम; 'आग्नेयाद्भागांश्च' इति पूर्वसूत्रं सिद्धान्तपरमिति कर्कभाष्ये योजितम । तदेतदापाततः । 'आग्नेयाद्भागांश्च' इति पूर्वसूत्रस्थेडावदानादिप्रयोगसूत्रैर्बहुभिर्व्यवहितत्वात् । वस्तुतस्तु 'आग्नेयाद्भागांश्च' इत्येकः पक्षः; 'उभौ वाविशेषात्' इति पक्षान्तरमेव, शाखान्तरीयाधिकविध्युपसंहारानित्यत्वस्य प्रायः सर्वकल्पकारसंमतत्वात् । [1]अत्र 'अष्टासु प्रक्रमेषु ब्राह्मणोऽग्निमादधीत एकादशसु राजन्यो द्वादशसु वैश्यः' इत्युक्त्वा 'चतुर्विंशत्यामपरिमिते यावता वा चक्षुषा मन्यते तस्मान्नातिदूरमाधेय इति सर्वेषामविशेषेण श्रूयते' इत्यापस्तम्बसत्याषाढभारद्वाजाः । 'परिधौ पशुं नियुञ्जन्ति' इति ब्राह्मणम; 'नित्ययूपा एवास्माकं भवन्ति' इति बोधायनः । जैमिनेरप्याचार्यस्य मते अनित्य एव शाखान्तरीयाणामधिकविधीनामुपसंहारः; युक्तं च; नित्यत्वे तदितराङ्गवत्प्रतिशाखमाम्नानप्रसङ्गात् । अत एव 'पशुचोदनायामनियमोऽविशेषात्' 'छागो वा मन्त्रवर्णात्' इति पक्षान्त्याधिकरणमर्थवत्, 'अजोऽग्नीषोमीयः' इति शाखान्तरीयविशेषवचने जाग्रति तदनुन्मेषात् । यत्तु भाष्यकृदादिभिः कृत्वाचिन्तया तदधिकरणप्रवृत्तिर्वर्णिता तदेतत्सर्वज्ञस्य सूत्रकारस्य मौढ्यं वर्णयद्भिस्तदपेक्षया सार्वज्ञ्यमपि स्वेषु प्रकटयद्भिः सूत्रकाराशयानभिज्ञत्वमेव तेषामाविष्कृतमिति तानेव वयमुपेक्षामहे । यदि हि सूत्रमनुल्लिखितवाक्यविशेषं स्यात्तर्हि स्वबुद्ध्युत्प्रेक्षितविषयवाक्ये तदधिकरणस्यानुन्मेषे सति विषयान्तरस्य च परिस्फूर्त्यभावे सति कृत्वाचिन्तया तदधिकरणप्रवृत्तिः शक्यते वर्णयितुम । प्रकृते च 'पशुचोदनायामनियमोऽविशेषात्' इति पशुवाक्यस्यैव सूत्रे कण्ठोक्त्योदाहृतत्वात्कथं कृत्वाचिन्तया प्रवृत्तिवर्णनमुपपद्येत । एतदपेक्षया शाखान्तरीयाधिकविध्युपसंहारानित्यत्वमेव सूत्रकृदभिमतमित्येव कल्पयितुमुचितत्वात् । एवं तत्र तत्र वाक्यविशेषोल्लेखिसूत्रेषु परःशतेषु शाखान्तरीयाधिकविध्युपसंहारानित्यत्वं तत्र तत्र वर्णयितव्यमिति सर्वमनवद्यम् ॥

इति तृतीयाध्याये प्रथमः पादः ॥

1. तत्र—क, ग, घ.

द्वितीयः पादः ॥

निर्मथ्य निगमसिन्धून्विविधन्यायाभिधानमन्थानैः ।
धर्मसुधामुद्धरते भूयो मुनये नमोऽस्तु जैमिनये ॥

लिङ्गस्य श्रुतिकल्पनमुखेन विनियोजकतया लिङ्गविनियोगस्य श्रुतिविनियोगोपजीव्यकत्वाच्छ्रुतिविनियोगविचारानन्तरं लिङ्गविचारः प्रस्तूयते । लिङ्गं नाम सामर्थ्यं मन्त्रगतमर्थगतं च ।

१. बर्हिर्न्यायः—मुख्ये विनियोगाधिकरणम् ।

तत्र मन्त्रगतमर्थप्रकाशनसामर्थ्यम् । मन्त्राणां ह्यनुष्ठेयार्थप्रकाशनसामर्थ्यं मन्त्राधिकरणे स्थितम् । अर्थगतं तु द्रवद्रव्यावदानादिसामर्थ्यं स्रुवादिनिष्ठम् 'अर्थाद्वा कल्पनैकदेशत्वात्' इत्यधिकरणे निरूपितम् । तत्र 'बर्हिर्देवसदनं दामि' इत्यादिमन्त्रसामर्थ्यरूपलिङ्गस्य किं मुख्यार्थे कुशादिरूप एव तद्विनियोजकत्वम्, उतोलपराजिरूपगौणार्थेऽपीति संशये, मुख्य इव जघन्येऽपि स्मारकाकाङ्क्षादिरूपसामग्र्या अविशेषात्साधारण्येनैव विनियोगः कल्प्यते, यद्यत्प्राकरणिकं प्रकाशयितुं शक्यते तत्कुर्यादिति । एवं च गौणवृत्त्या पूषादिशब्दैः प्राकृताग्न्यभिधानात्पूषानुमन्त्रणादिमन्त्राणां नोत्कर्षोऽपीति प्राप्ते, सिद्धान्तयति—

[1]अर्थाभिधानसंयोगान्मन्त्रेषु शेषभावः स्यात्तस्मादुत्पत्तिसंबन्धोऽर्थेन नित्यसंयोगात् ॥ १ ॥

यतः अर्थाभिधानलक्षणद्वारसंयोगान्मन्त्रेषु क्रतुशेषत्वं मन्त्राधिकरणे व्यवस्थापितम्, तस्माद्धेतोः उत्पत्तिसंबन्धः औत्पत्तिकेन मुख्यार्थेन मन्त्राणां संबन्धः स्यात् । कुतः । अर्थेन मुख्यार्थेनैव नित्यसंयोगात् । असति हि मुख्यान्वयानर्हमाणवकादिपदसमभिव्याहारे 'अग्निः' इत्येतावता मुख्यमर्थं ज्वलनमेव प्रतिपद्यन्ते लौकिकाः, न तु माणवकं गौणमर्थम् । यदापि माणवकं गौणमर्थमभिधत्तेऽग्निशब्दस्तदापि मुख्यमर्थमभिदधदेव तमभिधत्ते—'अग्निसदृशम्' इति । ततश्च शक्यसंबन्धापेक्षत्वेन जघन्यार्थप्रतीतेर्विलम्बितत्वेन प्रथमप्रतीतमुख्यार्थविनियोगतश्चरितार्थतया शान्ताकाङ्क्षत्वान्न जघन्यार्थविनियोगः कल्पयितुमुचितः । न च मुख्यार्थमादाय मन्त्रस्य निराकाङ्क्षत्वेऽपि गौणार्थस्य स्मारकाकाङ्क्षया तत्र मन्त्रस्याकाङ्क्षोत्थापनाद्विनियोगः कल्प्यतामिति वाच्यम् । तत्स्मारकाकाङ्क्षाया ध्यानाद्युपायेन शान्तिसंभवात् ॥

ननु मुख्यार्थमात्रविनियोगे पूषानुमन्त्रणादिमन्त्राणां प्रकरणादुत्कर्षः स्यात्तत्राह—

1. अर्थाभिधानसंबन्धात्; अर्थाभिधानसामर्थ्यात्.

संस्कारकत्वादचोदितेन स्यात् ॥ २ ॥

'पूष्णोऽहं देवयज्यया प्र प्रजया च पशुभिश्च जनिषीय' इति मन्त्रो हि पूष्णो देवतायाः प्रकाशनलक्षणसंस्कारजनकः। स च यत्र संस्कार्यस्तत्र गच्छति। दर्शपूर्णमासयोस्तु न पूषा देवतात्वेन चोदितः। अचोदिते च पूषणि 'पूष्णोऽहं देवयज्यया' इति मन्त्रो दर्शपूर्णमासयोर्न स्यात्। न च प्रकरणे मुख्यार्थस्याभावाद्गौणे विनियोगोऽस्त्विति वाच्यम। विकृतिभूतपौष्णयागे उत्कर्षेण मुख्यार्थान्वयसंभवेन लिङ्गस्य निर्बाधत्वे सति प्रकरणेन तद्बाधस्यायुक्तत्वात्। न च सामान्यतः क्रतुसंबन्धे मन्त्रस्य प्रमाणान्तरादवगते मन्त्रलिङ्गं तावत्संबन्धविशेषे व्यवस्थापयति, क्रतुसंबन्धस्यापि बोधने तस्यासामर्थ्यात्; ततश्च पूषमन्त्रस्य प्रकरणादुत्कृष्टस्यालब्धयागसंबन्धस्य कथं विशिष्य पौष्णयागे लिङ्गाद्विनियोगलाभ इति वाच्यम। 'इष्टानुमन्त्रणानि' इति समाख्यया 'देवयज्यया' इति पदसामर्थ्येन च यागसंबन्धस्य 'पूषा' इति पदसामर्थ्येन विशेषसंबन्धस्य चोपपत्तेः। अतः पूषानुमन्त्रणमन्त्रस्य विकृतावुत्कर्षो युक्तः। तस्मात्सति संभवे मुख्यार्थ एव मन्त्रलिङ्गं विनियोजकमिति। वृत्तमधिकरणम् ॥

२. ऐन्द्रीन्याय.—ऐन्द्राग्नो गार्हपत्ये विनियोगाधिकरणम्।

अग्नौ श्रूयते 'निवेशनः संगमन इत्यैन्द्र्यागार्हपत्यमुपतिष्ठते' इति। 'निवेशनः संगमनो वसूनां विश्वा रूपाभिचष्टे शचीभिः। देव इव सविता सत्यधर्मेन्द्रो न तस्थौ समरे पथीनाम्' इत्यैन्द्री ऋक्। वसूनां धनानां निवेशनः आवासः, संगमनः आश्रितेषु संगमयिता, सत्यधर्मा अबाधितरक्षितृत्वादिगुणशाली, इन्द्रः, देवः द्योतमानः, सविता सूर्य इव, विश्वा रूपा सर्वाणि वस्तूनि, शचीभिः, स्वशक्तिभिः, अभिचष्टे प्रकाशयति; किंच पथीनां कर्ममार्गाणाम्। 'ये चत्वारः पथयो देवयानाः इति कर्मवाद ऐष्टिकपाशुकसौमिकदर्विहोमानाम्' इति बोधायनः। समरे संगमने। ऋधातोः पचाद्यच्। न तस्थौ। ष्ठा गतिनिवृत्तौ। अव्याप्तो न भवति। नित्यं व्याप्त इत्यर्थः। किमत्रेन्द्रशब्दो मुख्यया वृत्त्या स्वार्थपरः गार्हपत्यशब्दस्तु विधिगतस्तदनुसारेण गौणः, उत गार्हपत्यशब्दो मुख्यया वृत्त्या ज्वलनविशेषे वर्तते इन्द्रशब्दस्तु तत्र गौण इति संशयः। तत्रेन्द्राभिधायकमन्त्रस्य गार्हपत्याग्निप्रकाशनशक्त्यभावात् अग्नेः सेचन इव गार्हपत्याग्नौ तस्य विनियोगो नोपपद्यते। न च 'नशब्द उपरिष्टादुपचार उपमानार्थः' इति निरुक्तानुसारेण 'मृगो न भीमः कुचरः' इत्यादिवन्नशब्दस्योपमानार्थतया सवितेवेन्द्र इव च पथीनां कर्ममार्गाणां समरे संगमने तस्थौ व्याप्तो भवति इत्येवं मन्त्रस्य गार्हपत्याभिधायकत्वं सूपपादमिति वाच्यम्। एवमपि नञो निषेधे प्रसिद्धस्याप्रसिद्धे इवार्थे वृत्त्याश्रयणापत्त्या विनियोज्यमन्त्रशक्त्यनुसारेण विधिगतस्यापि गार्हपत्यशब्दस्यैव गौण्येन्द्रपरताश्रयणस्य युक्तत्वात्। इन्द्रो हि गार्हपत्यशब्देन यज्ञसाधनत्वसाधर्म्येणाभिधानमर्हति। न च विनियो-

जकवाक्यगतगार्हपत्यशब्दशक्त्यनुसारेण मन्त्रगतेन्द्रशब्द एव 'इदि परमैश्वर्ये' इति धातूत्पन्नो हविःश्रपणादीशितृत्वगुणयोगाद्गार्हपत्याग्निपरं किं न स्यादिति वाच्यम्। 'ऐन्द्रया' इत्युपक्रमगततद्धितश्रुत्या मन्त्रस्य मुख्याभिधानसामर्थ्येऽवधृते सति जघन्यगार्हपत्यशब्दस्यैव गौण्या वृत्त्येन्द्रपरताश्रयणस्य युक्तत्वात्। यद्वा 'तस्येदम्' इत्यर्थे पत्युत्तरपदण्यप्रत्ययान्तोऽयं गार्हपत्यशब्दो यष्टव्यदेवतात्वेन गृहपतिसंबन्धिनमिन्द्रं मुख्ययैव वृत्त्याभिधातुमर्हति। अस्तु वा गार्हपत्यशब्दो रूढ्या ज्वलनविशेषवाचकः। द्वितीया तु सप्तम्यर्थे सामीपिकाधारत्वे। गार्हपत्यसमीपे स्थित्वा इन्द्रं प्रकाशयतीत्यर्थः। अथवा कर्मण्येव द्वितीया। ज्वलनपर एव गार्हपत्यशब्दः। उपतिष्ठतिरुपेत्य स्थाने। तस्य च मन्त्रकरणकत्वमात्मनेपदाद्गम्यते, 'उपान्मन्त्रकरणे' इति मन्त्रकरणके धात्वर्थे विद्यमानादुपपूर्वात्स्थाधातोरात्मनेपदविधानात्। उपस्थाने च मन्त्रस्य करणत्वं साक्षादसंभवादभिधानद्वारैव वाच्यमित्यात्मनेपदावगतमन्त्रकरणत्वनिर्वाहायाभिधानमनुमीयते। तस्य चानुमानतो लाभान्न तत्र शक्तिकल्पनापि। तथा च उपेत्य स्थित्वाभिधानमुपतिष्ठतेरर्थः। ऐन्द्र्या ऋचा गार्हपत्यसमीपं प्राप्याभिदधीतेत्यर्थः पर्यवस्यति। तत्र प्राप्त्यपेक्षया 'गार्हपत्यम्' इति द्वितीया। अभिधाने तु विनियोज्यमन्त्रशक्तिबलादिन्द्रस्यैव कर्मता। तस्मान्मुख्यस्यैन्द्रस्यैवायं मन्त्रः शेषः, न तु ज्वलनविशेषस्य गार्हपत्यस्येति प्राप्ते, सिद्धान्तयति—

वचनात्त्वयथार्थमैन्द्री स्यात् ॥ ३ ॥

तुरवधारणे भिन्नक्रमश्च। ऐन्द्री ऋगेव अयथार्था स्यात्। क्रियाविशेषणमेतत्। अयथा असदृशः बाधितः अर्थो यस्य तद्यथा भवति तथा। मुख्यार्थवृत्तिर्न भवेत्; गौणी स्यादिति यावत्। कुतः। वचनात् गार्हपत्ये विनियोगवचनात्। न च 'ऐन्द्र्या' इति तद्धितश्रुत्या उपक्रमगतया इन्द्र एव विनियोग उचित इति वाच्यम्। 'अस्यवामीयम्' 'कयाशुभीयम्' 'यज्ञायज्ञीयम्' इत्यादिवत्पदसंयोगमात्रेण तद्धितश्रुत्युपपत्तेः।

यदुक्तम् 'अग्निना सिञ्चति' इत्यादिवदशक्यार्थविधानमनुपपन्नमिति तत्राह—

गुणाद्वाप्यभिधानं स्यात्संबन्धस्याशास्त्रहेतुत्वात् ॥ ४ ॥

वापीति समुदायः शङ्कानिवृत्तौ। नाशक्यार्थविधानम्, यतः गुणात् अभिधानं स्यात्। हविःश्रपणादीशितृत्वगुणयोगादिन्द्रशब्देन गार्हपत्याभिधानं संभवति। नन्वेवं सति वचनविनियोज्यमन्त्रे इन्द्रशब्दस्य मुख्यार्थबाधनेन गौणार्थपरत्वकल्पने तदुपस्थानविनियोगे च वचनस्य व्यापाराद्वाक्यभेदः स्यादत आह— संबन्धस्याशास्त्रहेतुत्वादिति। मन्त्रगतेन्द्रशब्दस्य गौणः संबन्धस्तावन्न शास्त्रहेतुकः 'ऐन्द्र्या' इति वचनलभ्यो न भवति, येन वाक्यभेदः स्यात्। किं तर्हि लोकत एव

सिद्धः। 'अग्निर्माणवकः' इत्यादौ मुख्यार्थानन्वयिपदसमभिव्याहारे गौण्या वृत्त्याः कल्पनत्वात्। अस्ति चात्र तथाविधगार्हपत्यपदसमभिव्याहारः। न हि मुख्यार्थेनेन्द्रपदेन गार्हपत्यपदस्यान्वयो [1]घटते। न च विनिगमनाविरहाद्गार्हपत्यशब्दस्य गौण्येन्द्रपरत्वं किं न स्यादिति वाच्यम्। विधेर्ह्यत्यन्ताप्राप्तार्थप्रापणे स्वतन्त्रप्रथमप्रवृत्तिकस्यानन्यप्रमाणकेऽर्थे गौणत्वं न युक्तमाश्रयितुम्। मन्त्रस्य तु विधिविहितार्थप्रकाशकतया तत्परतन्त्रस्य तदुत्तरकालप्रवृत्तिकस्य विधिविरोधिनं मुख्यार्थमतिक्रम्य गौणार्थत्वं युक्तमाश्रयितुम्। तदुक्तम् 'न विधौ परः शब्दार्थः' इति। एतेन 'गार्हपत्यम्' इति द्वितीयायाः सामीप्यलक्षणापि प्रत्युक्ता। नापि संबन्धसामान्यवाचिण्यप्रत्ययान्तगार्हपत्यशब्दस्य योगवृत्त्या इन्द्रपरत्वं युक्तमाश्रयितुम्, रूढ्या योगस्यापहारात्। यदपि प्राप्त्यपेक्षया गार्हपत्यस्य कर्मता अभिधानापेक्षयाचेन्द्रस्येति न चैतद्युक्तम्; आत्मनेपदगम्यस्याभिधानस्य प्रत्ययलभ्यत्वेन प्रधानतया तत्रैव 'गार्हपत्यम्' इति द्वितीयान्वयस्याभ्यर्हितत्वात्, समीपस्थितिमात्रवृत्तेरुपतिष्ठतेः प्राप्तिपूर्वकत्वविशिष्टतदर्थे लक्षणाप्रसङ्गाच्च। वस्तुतस्तु 'उपान्मन्त्रकरणे' इति मन्त्रकरणके क्रियाविशेषे विद्यमानादुपपूर्वात्स्थाधातोरात्मनेपदं विहितम्। उपपूर्वकस्थाधातुश्च पदजन्यपदार्थोपस्थितिरित्यादौ बोधे दृष्टः। 'गोपी स्मरात्कृष्णाय तिष्ठते' इत्यादौ तु 'श्राघह्वुङ्स्थाशपां ज्ञीप्स्यमानः' इति लिङ्गात्स्थितिपूर्वकबोधने दृष्टः। यदा तु बोधे तदा समीपप्राप्तिस्तिष्ठत्त्वं च तदङ्गं शास्त्रान्तरगम्यम्। आश्वलायनसूत्रे 'प्रत्यगुदगवस्थाय' इत्युपक्रम्य 'एवंभूतोऽव्यक्तहोमाभ्याधानोपस्थानानि च' इति वचनात्। यदापि बोधने, तदोपसर्गवशात्समीपं प्राप्य स्थित्वा बोधनमुपतिष्ठतेरर्थः। ऐन्द्रया उपेत्य गार्हपत्यं स्थित्वा बोधयतीति। स्तौतीति यावत्। अतो द्वितीया न विरुध्यते। बोधायनस्तु तिष्ठत्त्वं व्यकल्पयत 'लाजहोमे च सीमन्ते देवतावाहने वरे। अर्घ्ये तिष्ठत्युपस्थाने षडेते भृगुचोदिताः' इति। वैवाहिकलाजहोमे सीमन्तोन्नयने प्रतिमादौ देवतावाहने वराय कन्यादाने अर्घ्ये मधुपर्कदाने उपस्थाने च तिष्ठेत्। षडेते पदार्थास्तिष्ठता कर्तव्यत्वेन भृगुणा परिगणिता इत्यर्थः। भृगुग्रहणाद्विकल्पो गम्यते। तदेवं वचनाद्गार्हपत्ये विनियुक्तः 'निवेशनः' इति मन्त्रस्तस्यैव शेषीभवन्निन्द्रशब्दविषये गौणीं वृत्तिमाश्रयति। इत्यैन्द्रयधिकरणम्॥

दर्शपूर्णमासयोः श्रूयते 'हविष्कृदेहीति त्रिरवघ्रन्नाह्वयति' इति। तत्र कर्तरि किंवन्तो हविष्कृच्छब्दस्तावदवघातेन हविष्कर्तरि मुख्यः। अवघाते तु साधनत्वमात्रेण गौणः। तत्र किमयं

३. आह्वाने विनियोगाधिकरणम्। मन्त्रोऽवघाते प्रयोक्तव्यः, उत हविष्कृदाह्वान इति संशयः। अवघात इति ब्रूमः। यदि ह्याह्वाने मन्त्रः संबध्येत तर्हि 'अवघ्रन्' इत्येतत्काललक्ष-

1 अन्वय उपपद्यते—क, ख, ग.

णार्थं भवेत् 'अवहननकालोपलक्षितोऽध्वर्युर्हविष्कृतमाह्वयति' इति । 'या यजमानस्य पत्नी साभिदुत्यावहन्ति' इति पत्न्या अवघातकर्तृत्वश्रवणात् । न चैतद्युज्यते, मन्त्रब्राह्मणयोर्विरोधेऽन्यतरस्य गौणपरत्व आश्रयणीये सति 'न विधौ परः शब्दार्थः' इति पूर्वाधिकरणे व्यवस्थापितत्वेन 'अवघ्नन' इति विधिगते लक्षणाश्रयणायोगात् । तस्मादैन्द्रीवद्विनियोगवचनानुसारेण गौण्या वृत्त्यावघातशेष एवायं मन्त्रः । न चाचेतनस्यावघातस्य कथमाह्वानकर्मत्वमिति वाच्यम् । आह्वयतिर्हि परं संमुखीकृत्य संबोधनार्थे उच्चारणे दृष्टो लोके । इह तूच्चारणमात्रे गौणः । आह्वातारो ह्येहिशब्दमुच्चारयन्ति । अयमप्यध्वर्युरवघाताय 'हविष्कृदेहि' इति मन्त्रं प्रयुञ्जानः 'एहि' इति शब्दमुच्चारयति । तत्सामान्याद्भवति गौणोऽयमाह्वयतिशब्दः । स च केवलमनुवादः, अनुच्चारितस्य मन्त्रस्यावघातसंबन्धानुपपत्त्योच्चारणस्यार्थप्राप्तत्वात् । न चैवमपि विधिवाक्ये लक्षणादोषस्तुल्य इति वाच्यम् । न हि विधिवाक्यावयवमात्रे लक्षणा दोषावहा, तथा सत्यर्थवादानां प्राशस्त्यलक्षकत्वानुपपत्तेस्तेषामपि विध्येकदेशत्वात् । किंतु विधेयसमर्पकपद एव लक्षणा दोषावहा । आह्वयतेश्चार्थप्राप्तोच्चारणमात्रार्थकस्य विधेयसमर्पकत्वाभावान्न तत्र लक्षणा दोषावहा । मन्त्रस्याह्वानसंबन्धेत्ववघातकालस्यापि विधेयत्वाद्विधेयसमर्पके 'अवघ्नन' इति पदे लक्षणा दोषावहैवेति वैषम्यम् । न चैवमपि प्राप्तावघातोद्देशेन मन्त्रस्य त्रिरभ्यासस्य च विधौ वाक्यभेद इति वाच्यम् । न ह्यत्र 'त्रिः' इत्यवघातेन साक्षादन्वेति, त्रिरवघाते तण्डुलनिष्पत्तेरसंभवात्; किंतु मन्त्रद्वारा । मन्त्रश्चायं कचिच्छाखायां त्रिरभ्यस्त एव पठ्यते । ततश्च 'त्रिः' इत्यनुवाद इति न वाक्यभेदः । तस्मादवघातशेषो मन्त्रः । यद्यपि मन्त्रोच्चारणानन्तरभाव्यवघातः, तथापि 'अवघ्नन' इति 'वर्तमानसामीप्ये वर्तमानवद्वा' इति भविष्यतिलटः शत्रादेशः । अवघातं निर्वर्तयिष्यन् 'हविष्कृदेहि' इति त्रिरुच्चारयतीत्यर्थः । प्राप्ताप्राप्तविवेकेन 'हविष्कृदेहि' इत्यवहन्तीत्यर्थः पर्यवस्यतीति पूर्वपक्षमुद्भाव्य सिद्धान्तयति—

तथाह्वानमपीति चेन्न कालविधिश्चोदितत्वात् ॥ ५ ॥

यथा तावदैन्द्री गार्हपत्यं प्रत्युपदिश्यमाना गौणीं वृत्तिमाश्रित्य गार्हपत्यं प्रकाशयति तथाह्वानम् एहिशब्दघटितमन्त्रोऽपि अवघातं प्रत्युपदिश्यमानः कर्तृसाधनस्यापि हविष्कृच्छब्दस्य हविःसाधनत्वमात्रेण गौण्या वृत्त्यावघातं प्रकाशयतीति चेत्तन्न, चोदितत्वात् त्रिरभ्यासस्यैवात्र वाक्ये विधानात् । न च शाखान्तरपठितत्रिरभ्यासस्यायमनुवाद इति शक्यं वक्तुम्; कचिच्छाखायां सकृदपि मन्त्रस्य पठितत्वेन त्रिरभ्यासस्य नित्यप्राप्त्यभावेन पाक्षिकानुवादत्वापातात् । एवं च त्रिरभ्यासेऽवश्यं विधातव्ये सति मन्त्रस्यावघाते विधिर्न युज्यते, वाक्यभेदप्रसङ्गात् । नन्वेवमप्याह्वानमनूद्य त्रिरभ्यासोऽवघातकालश्च विधातव्य इति वाक्यभेदो दुर्वारः, 'अवघ्नन' इत्यस्य काललक्षणादोषश्च, तत्राह— कालविधिरिति । 'न' इत्येतदत्रापि संबध्यते । आह्वानेऽवघातकालो

न विधातव्यः, अवहननकाल एव सहायाह्वानस्यापेक्षितस्य प्राप्तत्वेनार्थसिद्धत्वात् । अतः 'अवघ्नन्' इत्यनुवादमात्रम् । अनुवादत्वाच्च न लक्षणा दोषः । नन्वेवं सति मुख्ये 'अवघ्नन्' इति पदे लक्षणा स्यात्, तद्वरं जघन्ये आह्वयतिपदे इति शङ्कायामप्येतदेवोत्तरम् । कालविधिरिति । कालाभिधानं न्याय्यमित्यर्थः । उक्तं च वार्तिके 'अभिधामात्रमेवात्र विधिरित्यभिधीयते' इति । 'लक्षणहेत्वोः क्रियायाः' इति क्रियान्तरलक्षकक्रियावृत्तेर्धातोः कर्तरि शतृप्रत्ययेनावघातस्याह्वानक्रियालक्षणार्थत्वावगमेनोपसर्जनतया स्वार्थसमर्पके 'अवघ्नन्' इति पद एव प्रथमश्रुतेऽपि लक्षणाया न्याय्यत्वादिति भावः । तत्रावघातकालोपलक्षित आह्वाता 'अवघ्नन' इत्युच्यते । ततश्चावहननकालोपलक्षितोऽध्वर्युः 'हविष्कृदेहि' इति त्रिरुच्चारितेन मन्त्रेणाह्वयतीत्यर्थः । ननु प्राप्तकर्मानुवादेनानेकगुणविधाने वाक्यभेददोषः । न[1] । अनाहूताया अपि पत्न्या अवहन्तृत्वनिवृत्तये आह्वानस्याप्यवश्यविधेयस्य त्रिरभ्यासकमन्त्रकरणकावघातविशिष्टस्य[2] विधिसंभवात्, 'एहि' इति मन्त्रवर्णादेवाह्वानस्य नित्यप्राप्तेः संभवाच्च । न चैवं सत्याह्वानप्राप्तौ तत्र मन्त्रविनियोगः मन्त्रवर्णाच्चाह्वानप्राप्तिरित्यन्योन्याश्रय इति वाच्यम् । 'एहि' इति पदघटितस्यास्य मन्त्रस्य प्रकरणसिद्धक्रतूपकारकताकस्य मन्त्राधिकरणसिद्धद्रष्टार्थताकस्य द्रष्टृद्वारैव क्रतौ विनियोज्यत्वेनावगमबलादेव मन्त्रसामर्थ्यपर्यालोचनालभ्यद्वारस्य तत्र मन्त्रान्वयस्य च युगपदेव लाभेनान्योन्याश्रयानवकाशात् । तस्मान्मुख्याह्वानाङ्गमेव मन्त्रः, न गौणावघाताङ्गम् । किंच 'ऐन्द्रया' इति तृतीयानिर्देशादैन्द्र्याः श्रौतो विनियोगो गार्हपत्येऽस्ति । इतिकरणावमृष्टस्य मन्त्रस्यावघातस्य च संबन्धो गम्यमानो नाङ्गाङ्गिभावोऽवकल्पते, प्रागुक्तवाक्यभेदान्मन्त्रलिङ्गविरोधाच्च हविष्कृच्छब्दस्य कर्तृसाधनस्यावघातेऽसंभवात् । अतः समानकालत्वमेव संबन्धः सिद्धयति ॥

अस्तु वा कथंचिदवघाते हविष्कृच्छब्दस्य मुख्यता । तथापि मन्त्रस्य न तत्र सामर्थ्यमित्याह—

गुणाभावात् ॥ ६ ॥

'एहि' इति परप्रेषणरूपमध्यमपुरुषस्य 'हविष्कृत्' इति संबोधनस्य चाचेतनेऽवघातेऽसंभवेन मन्त्रस्य तत्रासामर्थ्यादित्यर्थः ॥

इतोऽपि नावघाते मन्त्र इत्याह—

लिङ्गाच्च ॥ ७ ॥

1. 2. 'न' इत्येतत् मातृकासु क्वचिदपि न दृश्यते; सर्वास्वपि मातृकासु 'विशिष्टाह्वानस्य' इत्येव पाठः; अत्र दृश्यमानश्च पाठः अस्माभिः कल्पितः ।

'वाग्वै हविष्कृद्वाचमेवैतदाह्वयति' इति स्त्रीलिङ्गशब्दवाच्यत्वसाधर्म्येण वाग्रूपतया हविष्कृत्स्तूयते। तदिदं मन्त्रस्य पत्न्याह्वानाङ्गत्वे घटते, न त्ववघातपरत्वे। अभ्युच्चयमात्रमेतत् ॥

इतोऽप्येवमित्याह—

विधिकोपश्चोपदेशे स्यात् ॥ ८ ॥

इह 'हविष्कृदेहि' इति मन्त्रस्यावघाताङ्गतयोपदेशे सति 'अवरक्षो दिवः सपत्नं वध्यासमित्यवहन्ति' इति मन्त्रविधिना कोपः विरोधः स्यात्। तथा च नित्यवदाम्नानविरोधः। विकल्पस्त्वष्टदोषदुष्टः। आह्वानसंबन्धे तु न दोषः। वृत्तमधिकरणम् ॥

ज्योतिष्टोमे श्रूयते 'उत्तिष्ठन्नाहाग्नीदग्नीन्विहर' इति 'व्रतं कृणुतेति वाचं विसृजति' इति च। किमनयोर्मन्त्रयोर्यथाक्रममुत्थाने वाग्विसर्गे च गौण्या वृत्त्या विनियोगः, उत मुख्यार्थेऽग्नि-

४. अग्निविहरणादि- प्रकाशकमन्त्रविनियोगाधिकरणम्।

विहरणे व्रतकर्तारं प्रति संप्रैषे च विनियोगः इति संशयः। तत्र मन्त्रयोरुत्थाने वाग्विसर्गे च गौणेऽर्थे ऐन्द्रीन्यायेन वचनाद्विनियोगः। अग्नीन्धनमग्निविहरणं चोत्थानं विना कर्तुमशक्यमिति तदुभयं गौण्या वृत्त्या अग्नीच्छब्देन 'अग्नीन्विहर' इत्यनेन चाभिधीयते। हे अग्नीन् अग्नीन्धनसाधनभूतोत्थान [1]आग्नीध्रीयाद्विष्ण्यादग्निविहरणसाधनं भवेति मन्त्रार्थः। 'अग्नीन' इति द्वितीया षष्ठ्यर्थे। कर्तरिविहितलोट् च साधनत्वे। संबोधनमविवक्षितम्। 'उत्तिष्ठन्' इति वर्तमानसामीप्ये भविष्यतिलटः शत्रादेशः। उत्थानं निर्वर्तयिष्यन 'अग्नीन्विहर' इत्याहेति वचनव्यक्तिः। तथा 'कृवि हिंसायाम्' इति धातोः 'कृणुत' इतिशब्दं कथंचिन्निष्पाद्य भक्षणस्यापि हिंसात्वमाश्रित्य 'व्रतं पयोयवाग्वादिकं भक्षयत' इत्येवं विसर्जनकर्मभूतवागेव कर्तृत्वोपचारादभिधीयते। बहुत्वमविवक्षितम्। आह्वानवाक्ये तावत्त्रिरभ्यासेऽवश्यं विधातव्ये सति वाक्यभेदप्रसङ्गान्नावघाते मन्त्रविधिः; अतो विनियोजकवचनाभावान्न गौणेऽर्थेऽवघाते मन्त्रस्य विनियोग इति स्थितं पूर्वाधिकरणे। नेह तथा वाक्यभेदप्रसङ्गोऽस्ति, मन्त्रस्यैवात्र विधेयत्वात्। ततश्चोत्थाने वाग्विसर्गे च मन्त्रयोर्विनियोग इति प्राप्ते, सिद्धान्तयति—

तथोत्थानविसर्जने ॥ ९ ॥

'हविष्कृदेहि' इति मन्त्रस्य मुख्येऽर्थे आह्वाने यथा विनियोग उक्तस्तथेहापि लिङ्गानुसारेण मुख्येऽर्थेऽग्निविहरणसंप्रैषे व्रतकरणप्रैषणे च विनियोगः। ऐन्द्रीवदिह गौणेऽर्थे मन्त्रविनियोजकश्रुत्यभावात्समभिव्याहारावगतसंबन्धस्य च कालार्थसंयोगत्वेनाप्युपपत्तेः। यदुक्तं मन्त्रस्यैवात्र

1. आग्नीध्रीयाग्नि...घ.

विधेयत्वान्न वाक्यभेदप्रसक्तिरिति, अस्त्वेवम्। तथापि समभिव्याहारमात्रेण लिङ्गबाधासंभवेन गौणेऽर्थे कथं विनियोगः स्यात्। अतोऽत्र कालद्वारक एव संयोगः। 'उत्थानकालोपलक्षितोऽध्वर्युरग्नीदग्नीन्विहरेत्याह' इति 'व्रतं कृणुतेति संप्रैषकाले वाचं विसृजति' इति। ननु 'अवघ्नन्' इत्यस्यानुवादत्वात्तत्र काललक्षणा युक्ता, आह्वाने अवहननकालस्यार्थसिद्धत्वात्; इह तु कालस्यापि विधेयतया तत्समर्पकशब्दे कथं लक्षणा; तथा सत्यैन्द्रीवाक्येऽपि विधेयसमर्पके लक्षणापातात्। सत्यम्। ऐन्द्रीवाक्ये तावद्गौणेऽर्थे मन्त्रविनियोगस्य श्रौतत्वेन प्रबलश्रुत्यनुरोधेन मन्त्रलिङ्गमुपेक्ष्य विधौ लक्षणानाश्रयणेऽपि प्रकृते [1]इतिकरणपरामृष्टमन्त्रविनियोगस्य वाक्यप्रमाणरूपसमभिव्याहारलभ्यस्य तदपेक्षया प्रबलमन्त्रलिङ्गविरोधे सति वाक्यप्रमाणमुपेक्ष्य प्रबलमन्त्रलिङ्गानुरोधेन विधावपि लक्षणाश्रयणस्य युक्तत्वात्। एवं च प्रबलप्रमाणाविरोधे सति विधावपि लक्षणेति सिद्धम्। वृत्तमधिकरणम्॥

दर्शपूर्णमासयोः श्रूयते 'सूक्तवाकेन प्रस्तरं प्रहरति' इति। 'इदं द्यावापृथिवी भद्रमभूत्' इत्यारभ्य 'नमो देवेभ्यः' इत्यन्तोऽनुवाकः सूक्तवाको नाम निगदः। तेन प्रस्तराख्यं [2]बर्हिर्मुष्टिविशेषं प्रहरति अग्नौ प्रक्षिपतीत्यर्थः। तत्र किं सूक्तवाकस्य प्रस्तरप्रहरणेऽङ्गतया संयोगः, उत कालार्थः संयोग इति संशये पूर्वपक्षयति—

सूक्तवाके च कालविधिः परार्थत्वात्॥ १०॥

सूक्तवाकवाक्येऽपि पूर्ववत्कालार्थ एव संप्रयोगः। कुतः। परार्थत्वात्। 'दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेत' इत्यत्र दर्शपूर्णमासयोः फलविशेषार्थतया कृतार्थयोर्यथा कालार्थः संयोगः स्तद्वदिहापि सूक्तवाकस्य कृताकृतप्रत्यवेक्षणफलकेष्टदेवतासंकीर्तनेन कृतार्थतया अङ्गतया संबन्धस्यानाकाङ्क्षितत्वादित्यर्थः। इष्टदेवतासंकीर्तनार्थत्वं च सूक्तवाकस्य लिङ्गवाक्यशेषाभ्यामवगतम्। तत्र मन्त्रलिङ्गं तावत् 'अग्निरिदं हविरजुषत' 'सोम इदं हविरजुषत' इत्यादि। 'अग्निरिदं हविरजुषतेत्याह या अयाक्ष्म देवतास्ता अरीरधामेति वा वैतदाह' इति वाक्यशेषस्तैत्तिरीयके। याः अग्न्यादिदेवताः वयमयाक्ष्म इष्टवन्तः ताः अरीरधाम पुनः कीर्तनेन संसाधिता अकार्ष्मेत्येतदेव मन्त्र आहेत्यर्थः। वाजसनेयके चास्ति वाक्यशेषः 'यावत्यो देवताः संपश्यति, स यदेवं संपश्यत्यसौ हविरजुषतासौ हविरजुषतेति, यज्ञस्यैवास्मा एतत्समृद्धिमाशास्ते' इति। न च सूक्तवाकस्य कथं प्रस्तरप्रहरणकाललक्षकता, प्रस्तरप्रहरणवत्सूक्तवाकस्याप्यनिर्ज्ञातकालत्वादिति वाच्यम्। मन्त्रसमाम्नाये ह्यनूयाजयाज्यानन्तरपाठात्तदनन्तरकालता सूक्तवाकस्य निर्ज्ञाता। प्रहरणं तु 'उत्तरं बर्हिषः प्रस्तरं साद-

५. प्रस्तरप्रहरणन्याय.—सूक्तवाकस्य प्रस्तरप्रहरणाङ्गताधिकरणम्।

1. सर्वास्वपि मातृकासु 'इतिकरणपरामृष्टमन्त्रविनियोगवाक्य...' इत्येव पाठः; अत्र दृश्यमानः पाठः अस्माभिः कल्पितः। 2. दर्भ—क.

यति' इत्यनन्तरं विहितम्। तदानीं च स्रुग्धारणादिप्रस्तरकार्यानिष्पत्तेः प्रहरणं न संभवतीत्यनिर्ज्ञातकालमेव तत्। न च तृतीययाङ्गत्वप्रतीतेः कथं कालार्थः संयोग इति वाच्यम्। 'इत्थंभूतलक्षणे' इति कंचित्प्रकारं प्राप्तस्य लक्षणे तृतीयाविधानेन प्रह्रियमाणावस्थां प्राप्तस्य ज्ञापकः सूक्तवाक इत्येवं तृतीयोपपत्तेः। प्रह्रियमाणावस्थाज्ञापकत्वं च सूक्तवाकस्य तत्प्रयोगकाले प्रस्तरप्रहरणे सत्येव भवति नान्यथा[1]। अतः सूक्तवाककाले प्रस्तरं प्रहरेदिति पर्यवस्यति। किंच सूक्तवाकनिगदे प्रहरणक्रियाभिधायकपदाभावात्कथं प्रहरणे तस्य विनियोगः। न च 'अग्निरिदं हविः' इत्यादिना प्रहरणसंबन्धिदेवताभिधानात्प्रहरणार्थत्वमिति वाच्यम्। प्रहरणे देवतासंबन्धाभावात्। न च देवताभिधानबलादेव प्रहरतिर्यागपूर्वकप्रक्षेपरूपहोमपरः, तत्संबन्धिदेवताभिधानाच्च तस्य प्रहरणार्थत्वमिति वाच्यम्। देवताभिधानेऽपि होमकल्पकद्रव्यदेवतासंबन्धस्याभावात्। न च 'अग्निरिदं हविरजुषत' इतीदंशब्दस्य संनिहितप्रस्तरपरतया सूक्तवाको द्रव्यदेवतासंबन्धमभिदधातीति वाच्यम्। 'अजुषत' इति भूतप्रत्ययेन 'इदं हविः' इत्यस्याग्नेयादिद्रव्यपरत्वेन प्रस्तरपरत्वासंभवात्। अतः कालार्थ एव संयोगः॥

अथ सिद्धान्तयति—

उपदेशो वा याज्याशब्दो हि नाकस्मात् ॥ ११ ॥

वाशब्द एवार्थे। 'सूक्तवाकेन' इत्यङ्गतयैवोपदेशः, करणत्वावाचितृतीयाश्रुतेः। न चेत्थंभूतलक्षणे तृतीयास्तिवति वाच्यम्। 'उपपदविभक्तेः कारकविभक्तिर्बलीयसी' इति कारकविभक्तेर्बलीयस्त्वात्। विपक्षे बाधकमाह— याज्येति। हि यतः सूक्तवाकस्य प्रहरणाङ्गत्वे सति 'सूक्तवाको[2] याज्या प्रस्तर आहुतिः' इति वाक्यशेषे स्तोतुमुपात्तो याज्याशब्दः, नाकस्मात् अनालम्बनो न भवति। इतरथा अनालम्बनः स्यात्। अतः करणतयैव संबन्ध उचितः। न हि प्रस्तरप्रहरणानङ्गभूते सूक्तवाकेऽङ्गत्वसाधर्म्येण प्रयुज्यमानो याज्याशब्द उपपद्यते॥

अथेष्टदेवतासंकीर्तनेन कृतार्थतयापेक्षाविरहान्नाङ्गत्वेन संबन्ध इत्युक्तं निरस्यति—

स देवतार्थस्तत्संयोगात् ॥ १२ ॥

सः सूक्तवाकः इष्टदेवतासंकीर्तनार्थ एव सन्प्रहरणाङ्गतामपि भजते। कुतः। तत्संयोगात् तस्याङ्गत्वस्यानपेक्षितस्यापि तृतीयाश्रुतिसंयोगेनावगमात्। किं हि वचनं न कुर्यात्; नास्ति वचनस्यातिभारः। ननु प्रहरणस्य तत्संबन्धिनो वा द्रव्यदेवतस्यानभिधानात्कथं सूक्तवाकस्य प्रहरणाङ्गता।

1. नान्यदा—क. 2. 'सूक्तवाक एव' इति भाष्ये पाठः.

'अग्निरिदं हविः' इत्यादीनामाग्नेयादिद्रव्यदेवतापरत्वम्[1], 'आयुराशास्ते' इत्यादीनां [2]तदसंबन्धश्च इत्याप्येतदेवोत्तरम्। स देवतार्थस्तत्संयोगात् । तृतीया हि कृत्स्नस्य सूक्तवाकनिगदस्य प्रहरणाङ्गतां गमयति । प्रहरणं तत्संबन्धिनं वा प्रकाशयत एव तस्य प्रहरणाङ्गता वाच्या । 'यदनेन हविषाशास्ते' इत्याद्यंशेषु आयुरादिफलकप्रस्तरपरेषु 'अग्निरिदं हविरजुषत' इत्याद्यंशेषु चाग्न्यादिदेवतापरेषु प्रहरणाङ्गता तदैव स्यात्, यदा आयुरादिफलानि प्रस्तरद्रव्यमग्न्यादिदेवताश्च तत्संबन्धीनि स्युः। न हि यागमन्तरेण केवलप्रक्षेपात्मनः प्रहरणस्य संस्कारकर्मणः फलसंबन्धो युज्यते । नापि द्रव्योद्देशमन्तरेणाग्न्यादिदेवतान्वयः संभवति । अतः 'यदनेन हविषाशास्ते' इति प्रस्तरवाचिहविःपदेनाग्न्यादिशब्दैरायुरादिशब्दैश्च प्रस्तरद्रव्यकोऽग्न्यादिदेवताक आयुरादिफलको यजिरनुमीयते । प्रहरतिना च विधिगतेन प्रक्षेपस्तत्पूर्वक एव होमात्माभिधीयते । केवलप्रक्षेपे देवताभिधानस्यादृष्टार्थत्वापाताच्च । यद्यपि 'अग्निरिदं हविरजुषत' इत्यादौ भूतप्रत्ययवशादाग्नेयादिद्रव्यदेवतमेवाभिधीयते तथापि तदंशस्यापि प्रहरणार्थत्वमविरुद्धमेव । तथाहि— अग्न्यादयस्तत्तद्द्रव्यमजुषन्त । अस्यामेवंविधायां होत्रायां होमक्रियायां देवंगमायां देवगामिन्यां प्रस्तरप्रहरणरूपायाम् ऋधक् ऋद्धिं प्राप्नोतु असौ यजमानः एवमाशास्ते । 'आयुराशास्ते' इत्यादि 'विश्वं प्रियमाशास्ते' इत्यन्तमृद्धेरेव प्रपञ्चनपरम् । इतोऽपि यत् अन्यत् अनेन हविषा प्रस्तरेणाशास्ते तत् यजमानः अश्यात् अश्नुताम् । तत् अस्मै यजमानाय आज्यादिद्रव्यं सेवितवन्तो देवा अग्न्यादयः राधन्तां साधयन्तु । तत्फलं दातुम् अग्निः देवेभ्यः अग्न्यादिभ्यः सकाशात् वनते भजते । वयं च मानुषाः अग्नेः सकाशाद्वनामहे प्राप्नुमः । किं तत्फलम् । इष्टं च वीतं[3] च, यागकृतं दानकृतं च । किंच उभे द्यावापृथिवी अंहसः कर्मापचारात् पातां रक्षताम् । इह प्रस्तरे वामस्य धनस्य गतिः प्राप्तिः अस्तु । इदं च नमः प्रस्तरलक्षणमन्नं देवेभ्यः इष्टेभ्यः तदन्येभ्यश्च अस्तु । 'याश्चैव देवता यजति याश्च न ताभ्य एवोभयीभ्यो नमस्करोति' इति ब्राह्मणम् । तथा च पूर्वकृतयागसंबन्धित्वोपलक्षितानाग्न्यादितदितरसकलदेवताकप्रस्तरद्रव्यकप्रहरणात्मकहोमाङ्गत्वं कृत्स्नस्य सूक्तवाकनिगदस्य सिद्धम् ॥

अत्राशङ्क्य परिहरति—

प्रतिपत्तिरिति चेत्स्विष्टकृद्वदुभयसंस्कारः स्यात् ॥ १३ ॥

कृतप्रयोजनकद्रव्यस्य रिक्तीकरणदृष्टफलः संस्कारोऽन्यत्रापनयात्मकः प्रतिपत्तिरित्युच्यते । प्रहरणं तु यदि यागपूर्वकहोमात्मकं तदा प्रतिपत्तित्वं तस्य नोपपद्येत, यागांशे दृष्टप्रयोजनाभावात्। अतः केवलप्रक्षेप एव प्रहरणमिति वक्तव्यम् । तत्र चाग्न्यादिकीर्तनस्यायुरादिफलकीर्तनस्य

1. परत्वात्—क, ख, ग. 2. तदसंबन्धाच्च—क, ख, ग. 3. वित्तं—क.

च [1]संबन्धासंभवात्कथं कृत्स्नस्य सूक्तवाकस्य प्रहरणाङ्गत्वमिति चेन्मन्यसे; नैतद्युक्तम्, यतः प्रहरणमुभयसंस्कारः स्यात् यागांशेऽदृष्टार्थं प्रक्षेपांशे प्रतिपत्त्यर्थमित्युभयात्मकं स्यात् । 'उभयात्मकत्वमुभयसंस्कारशब्देन विवक्षितम्' इति वार्तिके स्थितम् । यागांशेऽदृष्टार्थस्यापि सतः प्रक्षेपांशे प्रतिपत्तित्वमविरुद्धमिति यावत् । स्विष्टकृद्वत्, यथा स्विष्टकृद्धोमो यागांशे अदृष्टार्थः सन्प्रक्षेपांशे प्रतिपत्तिकर्म तद्वत् । तत्सिद्धं सूक्तवाकः प्रहरणाङ्गमिति । अत्र भाष्ये 'प्रतिपत्तिरिति चेत्स्विष्टकृद्वदुभयसंस्कारः स्यात्' इत्येकसूत्रतयैव पठितम् । युक्तं चैतत् । चेदन्तस्योत्तरभागस्य च विभागे साकाङ्क्षत्वेन सूत्रभेदानौचित्यात् । इतरत्र त्वेवंजातीयकेषु चेदन्तस्य विभज्योपादानं भाष्ये व्याख्यानौकर्यायेति गम्यते । वार्तिककृतस्तु 'आचार्यशैल्या द्वे सूत्रे मन्यामहे' इत्याहुः । अत्रेदं वक्तव्यम् । यजतिना जुहोतिना वा अन्येन वा शब्देन यागो यत्र चोद्यते देवतोद्देश्यकद्रव्यत्यागात्मकः तत्र 'किं द्रव्यम्' 'का देवता' इति विशेषाकाङ्क्षायां मन्त्रवर्णस्तावद्द्रव्यविशेषं देवताविशेषं च समर्पयति, न त्वसत्यामपि यागचोदनायां कल्पयितुं प्रभवतीति द्वितीयस्य तृतीये 'अद्रव्यत्वात् केवले कर्मशेषः स्यात्' इत्यधिकरणेऽवोचाम । ततश्च सूक्तवाकनिगदस्य कथं यागकल्पकता । अत एव संकर्षकाण्डे द्वितीयस्य चतुर्थे 'अदेवतासंयोगेन चोद्यमानेऽर्थगृहीता देवता यथा भोजनचोदनायां मनुष्ययोगः' इत्यधिकरणे देवतासंयोगेन विना चोद्यमाने 'उपांशुयाजमन्तरा यजति' इत्यादौ शब्दैकसमधिगम्याया देवताया अभावाद्विनैव देवतया द्रव्यमुत्सृष्टव्यमिति पूर्वपक्षयित्वा, यजिना मन्त्रवर्णतश्च सामान्यविशेषरूपेण देवतावगमाद्देवतोद्देशेन द्रव्यत्यागः संभवतीति सिद्धान्तयित्वा, तदुत्तराधिकरणे 'सूक्तवाको याज्या प्रस्तर आहुतिरिध्मः प्रथम आहुतीनां हूयते इत्येतेन व्याख्यातम्' इति सूत्रेण प्रस्तरप्रहरणमिध्माधानं च होमरूपम्, 'सूक्तवाको याज्या प्रस्तर आहुतिः' इति 'इध्मः प्रथम आहुतीनां हूयते' इति च वाक्यशेषाद्धोमत्वावगमान्मन्त्रवर्णतो विशिष्य देवतालाभाच्चेति पूर्वपक्षयित्वा, 'प्रशंसा वा संस्कारः प्रस्तरस्य संनिधानात्समिन्धनार्थ इध्मः' इति सूत्रेण आहुतित्वेन प्रशंसैषा, यतः प्रहरणं प्रस्तरस्य प्रतिपत्तिः, स्रुग्धारणोपयुक्तस्य 'प्रस्तरम्' इति द्वितीयान्तेनोपस्थितत्वात्, इध्माधानं चाग्निवृद्ध्यर्थत्वादृष्टार्थमिति सिद्धान्तितम् । "उपदेशो वा याज्याशब्दो हि नाकस्मात्' इति तु कृत्वाचिन्ता" इत्युक्तं तद्भाष्ये देवस्वामिभिः । युक्तं चैतत्, 'मरुतां पृषतयः स्थेति प्रस्तरमाहवनीये प्रहरति' इति प्रहरणे मन्त्रविधानाद्विकल्पस्याष्टदोषदुष्टत्वादुभयोरपि नित्यवदाम्नानाच्च । दृष्टार्थत्वाच्च न समुच्चयः । 'अनूच्यमाने सूक्तवाके प्रस्तरं प्रहरति' 'आशास्ते यं यजमान इत्युच्यमाने प्रहृतं प्रस्तरमवसृजति' इति वचनाच्च । सूक्तवाकस्य प्रहरणं प्रति करणत्वे तदन्त एव तदापातात् । अतः 'सूक्तवाकेन' इति कालार्थ एव संयोगः । 'इषिता दैव्या होतारो भद्रवाच्याय प्रेषितो मानुषः सूक्तवाकाय सूक्ता ब्रूहीति संप्रेष्यति' इति संप्रैषविध्य-

1. संबन्धाभावात्---ख.

नन्तरमनूच्यमाने सूक्तवाके प्रहरणस्य विधानात्सूक्तवाककालकत्वं प्रहरणस्य प्राप्तमनूद्यते 'सूक्तवाकेन प्रस्तरं प्रहरति' इति। अनुवादत्वाच्चेत्थंभूतलक्षणतृतीया न दुष्यति। प्रस्तरे प्रहियमाणे इष्टदेवतासंबन्धकीर्तनं तु कृताकृतप्रत्यवेक्षणार्थमेव। यथा उत्तमप्रयाजे स्विष्टकृति च याज्यायामिष्टयक्ष्यमाणदेवतासंकीर्तनं तद्वत्। वृत्तं सूक्तवाकाधिकरणम्॥

प्रहरणाङ्गं सूक्तवाक इति स्थितम्। तत्र 'इदं द्यावापृथिवी' इत्यारभ्य 'अग्निरिदं हविरजुषत' 'सोम इदं हविरजुषत' 'अग्निरिदं हविरजुषत' इत्यन्तः पूर्वभागोऽमावास्यापौर्णमासी-

६. सूक्तवाकन्यायः—सूक्तवाकानामर्थानुसारेण विनियोगाधिकरणम्। साधारणः, एवम् 'देवा आज्यपाः' इत्यारभ्य 'नमो देवेभ्यः' इत्यन्त उत्तरभागोऽपि 'प्रजापतिरिदं हविरजुषत' 'अग्नीषोमाविदं हविरजुषेताम्' 'इन्द्र इदं हविरजुषत' 'महेन्द्र इदं हविरजुषत' इति मध्यभागे तु दर्शपूर्णमासदेवताः संकीर्णा अनुक्रान्ता इति स्थितिः। तत्र किं कृत्स्नः सूक्तवाकः पौर्णमास्याममावास्यायां च प्रयोक्तव्यः, उत इष्टदेवतानुरोधेन विभज्य प्रयोक्तव्य इति संशये, पूर्वपक्षयति—

कृत्स्नोपदेशादुभयत्र सर्ववचनम्॥ १४॥

उभयत्र पौर्णमास्याममावास्यायां च सर्ववचनम्। कृत्स्नसूक्तवाकस्य प्रयोगो भवति। कुतः। कृत्स्नोपदेशात् कृत्स्न एवानुवाके सूक्तवाकशब्दस्याध्येतृप्रसिद्धेः। विभज्य प्रयोगे सूक्तवाकशब्दस्य तदेकदेशे लक्षणा स्यात्। न च 'ऐकादशिनान्प्रायणीयोदयनीययोरालभेरन' इत्यत्रैकादशिनानां प्रायणीयोदयनीययोर्यथा विभज्य विनियोगस्तद्वदिहापि किं न स्यादिति वाच्यम्। वैषम्यात्। ऐकादशिनोद्देशेन हि विधीयमानयोः प्रायणीयोदयनीययोः साहित्यस्य विवक्षितत्वात्साहित्ययोरेव तयोरैकादशिनान्वयाद्युक्तो विभागः। इह त्वाग्नेयादियागानामङ्गोद्देशेन विधानाभावान्न सहितानां धर्मान्वयः। किंत्वाकाङ्क्षाबलात्प्रत्येकमेव। यथा चैतत्तथा एकादशे व्यक्तं भविष्यति। न चैवमेकस्मिन्पर्वणि[1] प्रतिप्रधानं सूक्तवाकस्य भेदेन प्रयोगः स्यादिति वाच्यम्। एकस्मिन्पर्वणि प्रस्तरस्यैकत्वेन तत्प्रहरणस्यावृत्त्यभावेन तदङ्गसूक्तवाकस्याप्यनावृत्तेः। यथा प्रयाजादीनामावृत्त्यभावात्तन्मन्त्राणां दृष्टार्थानामपि नावृत्तिस्तद्वत्। एतेन दृष्टार्थत्वात्सूक्तवाकस्य न तन्त्रानुष्ठानसंभव इति निरस्तम्। पर्वान्तरे तु प्रस्तरान्यत्वेन प्रहरणस्यावृत्त्या तदङ्गसूक्तवाकस्य कृत्स्नस्यैवावृत्त्या भवितव्यम्। न च प्रहरणस्य स्वाङ्गमन्त्रद्वारा इष्टदेवतासंस्कारार्थत्वस्य पूर्वाधिकरणे उक्ततया अमावास्यादेवतापदानां पौर्णमास्यां प्रयोजनाभावादप्रयोगः, एवं पौर्णमासीदेवतापदानाममावास्याया-

1. अपि पर्वणि—क, ग, घ.

मिति वाच्यम् । प्रयोजनस्य लैङ्गिकत्वेन वचनविरोधे लिङ्गस्यानादरणीयतया वचनबलादेव दृष्ट-प्रयोजनाभावेऽपि सूक्तवाकप्रकाश्यमानानां सर्वेषामपि प्रहरणे देवतात्वकल्पनानुसारेण प्रहरणनिष्पत्तिद्वारा प्रहरणसाध्यादृष्टाय प्रयोगसंभवात् । तस्मादुभयत्रापि कृत्स्नस्य सूक्तवाकस्य प्रयोगः ॥

अथ सिद्धान्तयति—

यथार्थं वा शेषभूतसंस्कारत्वात्[1] ॥ १५ ॥

वाशब्द एवार्थे । प्राजापत्यादयः अर्थाः, तानतिक्रम्य यथार्थम् । इष्टदेवतानुरोधेन विभज्यैव प्रयोग इति यावत् । कुतः । शेषभूतसंस्कारत्वात् । दर्शपूर्णमासाङ्गभूतदेवतासंस्मरणरूपसंस्कारार्थत्वात् । दृष्टसंभवेऽदृष्टाश्रयणस्यान्याय्यत्वात् ॥

यदुक्तं वचनविरोधे लिङ्गं नादर्तव्यमिति तदनूद्य निराकरोति—

वचनादिति चेत्प्रकरणाविभागादुभे प्रति कृत्स्नशब्दः ॥ १६ ॥

लैङ्गिकदृष्टप्रयोजनमनादृत्य वचनबलादृष्टार्थतया प्रयोगसंभव इति चेन्नैवम् । प्रकरणाविभागात् । समाहारद्वन्द्वः । प्रकरणादविभागाच्च । प्रकरणं प्रक्रिया अवयवव्युत्पादनम् । आज्यभागादिषु सूक्तं सुष्टु निर्दिष्टमग्न्यादिकं वक्तीति व्युत्पत्त्या सूक्तवाकशब्द इष्टदेवताप्रकाशकमन्त्रवचनः[2] । अतः पौर्णमासिकदार्शिके उभे प्रहरणे प्रति यथादेवतं विभज्य प्रयुक्ते निगदे सूक्तवाकशब्दः कृत्स्नः अविकलः ; यत्र यावत्यो देवता इष्टास्तत्र तावद्देवतापदप्रयोगस्य सत्त्वात्, अनिष्टदेवतानामपि प्रयोगे सूक्तवाकत्वं हित्वा अनुक्तवाकत्वापातात् । अवयवव्युत्पत्त्यैव संभवे रूढिर्न कल्पनीया । उभयदेवतापदसंकीर्णे कृत्स्ननिगदे सूक्तवाकशब्दस्याध्येतृप्रसिद्धेरध्ययनकाले विभागानाकलनेनान्यथासिद्धत्वाच्च । तस्मादुभयत्र यथादेवतं विभज्यैव सूक्तवाकप्रयोगः । वृत्तमधिकरणम् ॥

७. काम्ययाज्यानुवाक्यानां काम्यमात्राङ्गताधिकरणम् ।

सन्ति काम्या इष्टयः 'ऐन्द्राग्नमेकादशकपालं निर्वपेत्प्रजाकामः' इत्यादयः । अस्ति चैतेनैव क्रमेण समाम्नातम् 'उभा वामिन्द्राग्नी' इत्यादिमन्त्रकाण्डं काम्येष्टियाज्यानुवाक्याकाण्डसमाख्यम् । किमेते मन्त्राः क्रमसमाख्ये अनादृत्य यत्र यत्र सामर्थ्यमस्ति तत्र सर्वत्र प्रयोक्तव्याः, उत क्रमसमाख्यानुसारिलिङ्गेन काम्येष्टिष्वेवेति संशयः । सर्वत्रेति ब्रूमः । सामर्थ्यं तावन्मन्त्रस्य विनियोजकम्, मन्त्रस्वरूपेऽवगते सति 'अस्यानुष्ठेयार्थस्य प्रकाशकोऽयं मन्त्रः, अतोऽत्र विनियोक्तव्यः' इति बुद्धेरुत्पत्तेः तदेतत्काम्येष्टिष्विवान्यत्रापि तद्देवत्यकर्मस्वविशिष्टम् । तस्य च सामर्थ्य-

1. ...संस्कारात्. 2. मन्त्रवाची—घ.

रूपलिङ्गस्य दुर्बलाभ्यां क्रमसमाख्याभ्यां संकोचरूपबाधो न युज्यते। तस्मात्क्रमसमाख्ये उपेक्ष्य लिङ्गात्सर्वत्र मन्त्राणां विनियोग इति प्राप्ते, सिद्धान्तयति—

लिङ्गक्रमसमाख्यानात्काम्ययुक्तं समाम्नानम् ॥ १७ ॥

लिङ्गानुग्राहकात्क्रमात्समाख्यानाच्च काम्येष्टिष्वेवाङ्गतया संयुक्तम् 'उभा वामिन्द्राग्नी' इत्यादिमन्त्रकाण्डसमाम्नानमित्यर्थः। लिङ्गं हि न साक्षाद्विनियोजकम्, किंतु श्रुतिकल्पनामुखेन। इन्द्राग्न्यादिस्वरूपमात्रप्रकाशनसामर्थ्यरूपलिङ्गकल्प्यमाना श्रुतिः 'अनेन मन्त्रेणेन्द्राग्न्यादिप्रकाशनं कुर्यात्' इत्येवंरूपैव कल्पयितुं शक्यते, न तु 'अनेन मन्त्रेण क्रत्वपूर्वसाधनेन्द्राग्न्यादिप्रकाशनं कुर्यात्' इति। अपूर्वांशस्याश्रुतत्वेन तत्र मन्त्रस्यासामर्थ्येन ततः कल्प्यायाः श्रुतेरपूर्वसाधनताविषयत्वासंभवात्। ततश्च मन्त्रस्येन्द्राग्न्यादिस्वरूपमात्रशेषत्वमेव लिङ्गात्सिध्यति, न त्वपूर्वसाधनतापन्नतच्छेषत्वम्। अतोऽस्ति लिङ्गस्य क्रतुसंबन्धबोधकप्रमाणापेक्षा। सिद्धे च प्रमाणान्तरेण कर्मसंबन्धे किंद्वारा स कर्मसंबन्ध इत्यपेक्षितद्वारविशेषमात्रे लिङ्गस्य विनियोजकता। कर्मासंबन्धिप्रकाशनस्य च मन्त्रे कर्मसंबन्धनिर्वाहकत्वाभावेन द्वारत्वाभावे सति कर्मसंबन्धिप्रकाशनस्यैव द्वारत्वात्तद्विषयैव श्रुतिर्लिङ्गात्कल्प्येति कर्मापूर्वसाधनेन्द्राग्न्यादिशेषत्वं मन्त्रस्य सिद्धं भवति। न चैवमपि 'यस्य खादिरः स्रुवो भवति' इत्यनारभ्यश्रुतखादिरत्वादीनां स्रुवादिसंबन्धात्क्रत्वर्थत्ववदिन्द्राग्न्यादिसंबन्धात्क्रत्वर्थत्वं मन्त्राणां सिध्यतीति वाच्यम्। वैषम्यात्। स्रुवादीनां क्रत्वङ्यभिचारितया तद्गतखादिरत्वादीनां क्रत्वर्थता युज्यते। प्रकृते तु नेन्द्राग्न्यादीनां क्रत्वर्थत्वाव्यभिचारः; मन्त्रार्थवादेतिहासपुराणादिषु स्वर्गाधीश्वरत्वलोकपालत्वासुरविजेतृत्वादिना प्रतिपादितानां तेषां कर्मणो बहिरपि सद्भावावगमात्। तथा च लिङ्गान्मन्त्रविनियोगे क्रतुसंबन्धप्रमाणमन्यदपेक्षितव्यम्। न चास्य मन्त्रकाण्डस्य [1]क्रमसमाख्याभ्यामन्यत्कर्मसंबन्धप्रमाणमस्ति। ततश्च क्रमसमाख्यानुगृहीतलिङ्गान्मन्त्रकाण्डाम्नानमिदं काम्येष्टिविषयमेव संपद्यते। क्रममात्रादरे [2]काम्येष्टिषु 'अग्नय आयुष्मते पुरोडाशमष्टाकपालं निर्वपेद्यः कामयेत सर्वमायुरियाम्' इति क्रमे आम्नातानाम् 'आयुष्टे विश्वतो दधदयमग्निः' इत्यादिमन्त्राणां तदिष्टिष्वन्वयमात्रेण क्रमस्योपपत्त्या तत्र प्रथमातिक्रमणे कारणाभावात्सामिधेनीष्वेवान्वयः स्यात्। समाख्यामात्रादरे तु यत्रैकदेवताका नानेष्टयः 'ऐन्द्राग्नमेकादशकपालं निर्वपेत्प्रजाकामः' 'ऐन्द्राग्नमेकादशकपालं निर्वपेत्स्पर्धमानः' इत्यादयः। मन्त्राश्च नाना 'उभा वाम्' 'अश्रवं हि' 'इन्द्राग्नी नवतिम्' 'शुचिं नु स्तोमम्' इत्यादयः। तत्र व्युत्क्रमेणाप्यन्वयः स्यात्। तद्वारणाय क्रमसमाख्यानादित्युभयादरः। तदुभयादरेणैन्द्राग्नेष्टिक्रमे आम्नातानामृचाम् 'उभा वामिन्द्राग्नी' इत्यादीनां सामिधेनीषु समाख्याविरोधादप्रवृत्तावप्याज्यभागयोः प्रवृत्तिः स्यात्।

1. क्रमसमाख्यानाभ्यां—क, ग, घ. 2. काम्येषु—क, ख, ग.

प्रथमातिक्रमणे कारणाभावात् । अतो लिङ्गस्याप्यादरः इति । वृत्तमधिकरणम् ॥

तदेवं लिङ्गस्य सामान्यसंबन्धापेक्षत्वे विचारिते प्रसङ्गाच्छ्रुतेरपि क्वचित्सति संभवे तद्विचार्यते । ज्योतिष्टोमे श्रूयते 'आग्नेय्याग्नीध्रमुपतिष्ठते' इति । तत्र किं प्रकृतया अप्रकृतया वा इदमुपस्थानं कर्तव्यमुत प्रकृतयैवेति संशये, पूर्वपक्षयति—

अधिकारे च मन्त्रविधिरतदाख्येषु शिष्टत्वात् ॥ १८ ॥

चशब्दो वार्थो व्युत्क्रमः 'अतदाख्येषु' इत्यनन्तरं द्रष्टव्यः । अधिकारे ज्योतिष्टोमप्रकरणे 'आग्नेय्या' इति यो मन्त्रविधिः सः अतदाख्येषु वा अप्रकरणाधीतेषु प्रकरणाधीतेषु वा मन्त्रेषु मध्ये यया कयाचिदाग्नेय्या ऋचा प्रत्येतव्यः । कुतः । शिष्टत्वात् अविशेषेण विहितत्वादित्यर्थः । न च प्रकरणादप्रकृतमन्त्रनिवृत्तिरिति वाच्यम् । प्रकरणं हि इतिकर्तव्यताकाङ्क्षालक्षणं संनिधिलक्षणं वा । नाद्यः, इतिकर्तव्यताकाङ्क्षालक्षणप्रकरणस्य विनियोगमात्रे समर्थत्वेन 'ज्योतिष्टोमेतिकर्तव्यताकाङ्क्षालक्षणप्रकरणपरिगृहीतया आग्नेय्या' इत्येवं विशेषकत्वाभावात् । न चैवं सति 'व्रीहीन्प्रोक्षति' इत्यत्रापि क्रतुसंबन्धिनामेव व्रीहीणां ग्रहणं न स्यादिति वाच्यम् । न हि तत्र प्रकरणवशात्क्रतुसंबन्धिनां ग्रहणं किंतु संस्कार्यत्ववशादेव, क्रत्वसंबन्धिनः संस्कारवैयर्थ्यात् । यदि चेदमुपस्थानमाग्नेयीसंस्कारार्थं स्याद्व्रीहिवत्क्रतुसंबन्धिन्येव गृह्येत । आग्नेय्यास्तृतीयाश्रुत्या[1] विधेयत्वात् । ततश्च मन्त्रमात्रस्याङ्गत्वान्न प्रकृतनियमः । अथ 'सप्तमं पदमध्वर्युरञ्जलिना गृह्णाति' इत्यत्र पदशब्दस्य संनिहितसोमक्रयणीपदपरत्वं यथा तद्वदिहापि संनिहिताग्नेयीपरत्वमिति द्वितीयः पक्षोऽस्त्विति चेन्न । अत्र ह्युपस्थानविधौ न कस्याश्चिदाग्नेय्याः संनिधिरस्ति, 'अग्र आयाहि वीतये' इत्यादिमन्त्राणां स्तोत्रादौ विधीयमानानां प्रदेशान्तरवेदान्तरस्थत्वात् । अस्तु वा संनिधानम् ; अथापि न तद्विशेषकं भवितुमर्हति, अपेक्षितसंनिधेरेव विशेषकत्वात् स्तोत्रादौ विनियुक्तानां च निरपेक्षत्वात्[2] । न हि 'अश्वेन गच्छति श्वेतेन पटेन प्रावृतः' इत्यत्र पटान्वितेन शान्ताकाङ्क्षेण संनिहितेनापि श्वेतगुणेनाश्वो विशेष्यते । नाप्यत्राग्नेयीशब्दस्य विशेषापेक्षास्ति, आग्नेयीमात्रस्याश्वमात्रवत्सम्बन्धयोपपत्तेः । ततश्चोभयोरनाकाङ्क्षत्वात्सत्यपि संनिधाने मिथः संबन्धो न घटते । एवं सत्यपि यदि विशेष्येत तर्हि 'आग्नेय्या' इति तृतीयाश्रुतिजनिताग्नेयीसामान्यप्रत्ययबाधाच्छ्रुतिबाधः स्यात् । पदस्य तु ससंबन्धिकत्वेन संबन्ध्यन्तरापेक्षत्वानियमाद्युक्तं संनिधिवशेन सोमक्रयणीविशेषकत्वम् । तस्मात्प्रकृतया अप्रकृतया वोपस्थानमिति ॥

८. आग्नीध्रोपस्थाने प्रकृतानां मन्त्राणां विनियोगाधिकरणम् ।

1. तृतीयया श्रुत्या—क, ग. 2. निराकाङ्क्षत्वात्—क.

अथ सिद्धान्तयति—

तदाख्यो वा प्रकरणोपपत्तिभ्याम् ॥ १९ ॥

वाशब्द एवार्थे । तस्मिन्नधिकारे प्रकरणे आख्यायते आम्नायत इति तदाख्यः । प्राकरणिक एव मन्त्रः आग्नेयीशब्देन विवक्षितः । कुतः । प्रकरणोपपत्तिभ्यां प्रकरणात् उपपत्तेश्च । प्रकृता ह्याग्नेयी कल्पक्रतुसंबन्धा । तस्या ग्रहणे लाघवम् । अप्रकृता तु अकल्पक्रतुसंबन्धा । तस्या ग्रहणे गौरवम्। तथाहि । आग्नीध्रोपस्थानस्य द्वे रूपे आग्नीध्रोपस्थानता ज्योतिष्टोमव्यापाररूपता च । तदुभयमपि शास्त्रैकगम्यम् । न ह्यन्यतरेणान्यतरस्य सिद्धिरस्ति । सा हि व्याग्निनिबन्धना । न चात्र व्याग्निरस्ति, यो ज्योतिष्टोमव्यापारः स आग्नीध्रोपस्थानात्मक एवेति नियमाभावात् दीक्षणीयात्मकत्वस्यापि सत्त्वात् । अथाग्नीध्रमण्डपस्य क्रत्वव्यभिचारितया तदुपस्थानं [1]ज्योतिष्टोमव्यापारात्मकमेवेति नियमः संभवतीति चेन्न । क्रत्वव्यभिचारिणोऽप्याग्नीध्रमण्डपस्य वीक्षणस्पर्शनादिव्यापारः क्रत्वनुपयुक्तोऽपि यथास्ति एवमुपस्थानस्याप्यभिधानरूपस्य क्रत्वनुपयुक्तस्य संभवात् । एवं चैकेनेतरस्यासिद्धेर्द्वे अपि रूपे शास्त्रैकगम्ये । तत्र यदि प्रकृतमेव गृह्यते तस्य क्रतुव्यापारस्य प्रकरणतः कर्तव्यत्वेनावधारितस्याग्नीध्रोपस्थानात्मकविशेषरूपमेवात्र विधीयते 'योऽयमाग्नेय्याः क्रतुव्यापारः स आग्नीध्रोपस्थानात्मकः' इति । यद्यप्यस्मिन्वाक्ये क्रतुव्यापारानुवादकं न दृश्यते तथाप्याग्नीध्रोपस्थानस्य क्रतुव्यापारत्वापेक्षणात्क्रतुव्यापारस्य सामान्यावगतस्य विशेषापेक्षणाच्च परस्परापेक्षतया क्रतुव्यापारानुवादेन विशेषरूपताविधौ पर्यवस्यतीत्यदोषः । तथा च प्रकरणतः कल्पितं श्रुतं चाग्नेय्याः क्रतुव्यापारमनूद्य विशेषमात्रमिह विधीयते । न त्विह क्रतुव्यापारः कल्प्यते नापि विधीयत इति लाघवात्प्रकृताया एव ग्रहणं युक्तम् । यदि त्वप्रकृताग्नेयी उपस्थाने गृह्येत, तदा तस्य ज्योतिष्टोमव्यापारत्वं न लभ्यते अश्रुतत्वात्, क्रतुव्यापारत्वस्यापि विधाने[2] वाक्यभेदात्, उक्तरीत्या श्रुतमात्रविधानेनैवोपपत्तावश्रुतस्य कल्पितस्य विधौ गौरवात् । इदमेव च सूत्र उपपत्तिशब्देनोच्यते ॥

ननु तर्हि श्रुतमात्रं स्वीक्रियतां न तु क्रतुव्यापारत्वमपीत्यत आह—

अनर्थकश्चोपदेशः स्यादसंबन्धात्फलवता[3] ॥ २० ॥

आग्नीध्रोपस्थानरूपमात्रेऽप्रकृताया आग्नेय्या उपदेशः अनर्थकः स्यात् । कुतः । फलवता असंबन्धात् । न हि क्रत्वसंबन्धिनोपस्थानमात्रेण फलमस्ति । विश्वजिदादिवत्स्वतन्त्रफलकल्पनायां तु स एव दोषः । चशब्दः शङ्कान्तरपरिहारे । तथाहि । ननु संनिपातिनामपूर्वसाधनान्वयस्य नवमे

1. ज्योतिष्टोमात्मकम्—क, ख, ग, घ. 2. विधौ— घ. 3. ...न त्युपस्थान फलवत् ।

वक्ष्यमाणतया उपस्थानस्य क्रत्वपूर्वसाधनार्थत्वेन क्रतुसंबन्धसिद्धेः श्रुतोपस्थानमात्रविधानान्न गौरवमिति चेन्। स्वरसतो हि पदार्थस्वरूपान्वय एव प्रतीयते। अपूर्वसाधनान्वयस्तु लक्षणावाच्यः। लक्षणा च विधीयमानस्यापूर्वसाधनाकाङ्क्षायां वाच्या। सा च क्रत्वन्वयसिद्धौ तन्निर्वाहाय प्रभवति नान्यथेत्यपूर्वसाधनान्वयस्यापि क्रत्वन्वयपूर्वकत्वादवश्यं क्रत्वन्वयस्थानेन विधिना विधेयत्वाद्गौरवमवर्जनीयम्। न च प्रकरणादेव क्रतुव्यापारस्य विधिसिद्धेर्न श्रुतविधेस्तत्र व्यापार इति वाच्यम्। श्रुतिर्यथा स्वविषयस्य धात्वर्थभावनादिभिः संबन्धमात्रे प्रमाणं न तु विधानेऽपि, तद्वत्प्रकरणस्यापि स्वतोऽविधानत्वेन ततः श्रुतिकल्पनामुखेन तद्विधिकल्पनस्यावश्यकत्वात्। 'व्रीहीनवहन्ति' इत्यत्र तु श्रुतिसमर्पितव्रीह्यवघातक्रतुसंबन्धमपि विधिरेव विधत्त इत्यगत्याभ्युपगम्यते। इह तु प्रकृतग्रहणेन गतौ सत्यां न गौरवाश्रयणं युक्तम्॥

ननु प्रकृतानां क्रतुव्यापारस्तावत्स्तोत्रादिविनियोजकवाक्याद्विशेषरूपेणैवावगतः न तु सामान्यरूपेण; ततश्चोपस्थानसंबन्धनिर्वाहाय सामान्यरूपेण क्रतुसंबन्धः प्रकृतानामपि कल्पनीय इति गौरवं तुल्यमित्याशङ्क्य निराकरोति—

सर्वेषां चोपदिष्टत्वात्॥ २१॥

चशब्द एवार्थे, भिन्नक्रमश्च। सर्वेषां प्रकृताग्नेयमन्त्राणां प्रकरणे उपदिष्टत्वादेव पाठादेव क्रतुव्यापाररूपमवगम्यते न तु स्तोत्रादिवाक्यात्। प्रकरणगम्यं च तद्रूपं स्तोत्रादिवाक्यैरिवोपस्थानवाक्येनाप्युपजीव्यत इति न पुनः कल्पनाप्रसङ्गः। न चैवं प्रकरणस्य स्वयमविधायकत्वात्तेन विधिरपि कल्पनीयः स्यात्; तद्वरं कल्प्रस्तोत्रादिविधिरेव प्रकरणसाचिव्येन क्रतुव्यापाररूपे विधायकत्वस्वीकार इति प्रकृतग्रहणेऽपि गौरवमवर्जनीयमिति वाच्यम्। स्तोत्रादिविधीनां बहूनां तत्तद्विशेषयुक्तक्रतुव्यापारविधिकल्पनापेक्षया स्तोत्रादिसर्वविध्युपयुक्ततया एकस्यैव सामान्यरूपविषयाविधेः कल्पयितुमुचितत्वात्। ननु प्रकृतानां स्तोत्रादिकार्ये विनियुक्तानां कथमुपस्थानेऽपि विनियोग इत्यत्राप्येतदेवोत्तरं सर्वेषां चोपदिष्टत्वादिति। 'यस्याश्विने शस्यमाने सूर्यो नाविर्भवति सर्वा अपि दाशतयीरनुब्रूयात्' इत्याश्विनशस्त्रे श्रुतम्। ऋक्संहिता दशमण्डला, तत्र भवा ऋचः दाशतय्यः। तथा वाचःस्तोमे श्रुतम् 'सर्वा ऋचः सर्वाणि यजूंषि सर्वाणि सामानि वाचःस्तोमे प्रयुञ्जीत'। तथा ब्रह्मयज्ञादावपि कृत्स्नमन्त्राणामस्ति विनियोगः। तथा चाविनियुक्ताया आग्नेय्याः कस्याश्चिदप्यलाभाद्विधिरेवायमनर्थकः स्यात्। अतो विनियुक्ताया अपि वचनाद्विनियोग इत्यास्थेयमिति कल्प्रक्रतुसंबन्धायाः प्रकृताया एव ग्रहणमिति स्थितम्। इत्याग्नेय्यधिकरणम्॥

अस्ति भक्षानुवाकः। तत्र 'भक्षेहि माविश' इत्यादिः 'सुप्रजास्त्वाय' इत्यन्तः

'वसुमद्गणस्य' इत्यादिः 'उपहूतो भक्षयामि' इत्यन्तश्च भक्षणप्रकाशकः। 'एहि वसो' इत्यारभ्य

९. भक्षमन्त्राणां यथालिङ्गं ग्रहणादौ विनियोगाधिकरणम्।

'बाहुभ्यां सघ्यासम्' इत्यन्तो ग्रहणप्रकाशकः। सधिर्ग्रहणार्थकः। 'अवरूयेषम्' इति चक्षिङो दर्शनार्थस्य रूपं छान्दसम्। 'चक्षिङः ख्याञ्' इत्यत्र 'ख्येञ्वुपख्यायते' इति तु वार्तिककृतः। 'विश्वा रूपाभिचष्टे' इत्यादौ चक्षिङोऽवेक्षणार्थत्वं दृष्टम्। 'हिन्व मे गात्रा' इत्यारभ्य 'मा मेऽवाङ्नाभिमतिगाः' इत्यन्तः सम्यग्जरणप्रकाशकः। सम्यग्जीर्णो हि सोमरसो गात्राणि प्रीणयितुं नाभेरधस्तादगन्तुमपि शक्नोति। तत्र किं सर्वोऽयं भक्षानुवाकः भक्षणे विनियोक्तव्यः, उत यथालिङ्गं विभज्य विनियोक्तव्यः इति संशये, पूर्वपक्षयति—

[1]लिङ्गसमाख्यानाभ्यां भक्षार्थतानुवाकस्य ॥ २२ ॥

यद्यपि तैत्तिरीये 'भक्षेहि' इत्यनुवाके भक्षणानुपयुक्ता 'यन्म आत्मनो मिन्दा' इत्यादिमन्त्रा अपि पठ्यन्ते, तथापि 'भक्षेहि' इत्यारभ्य 'नाभिमतिगाः' इत्यन्तः शाखान्तरे भक्षानुवाकः समाख्यात इह विवक्षितः। तस्य कृत्स्नस्य लिङ्गात्समाख्यानाच्च भक्षणार्थता। यद्यपि 'सघ्यासम्' इत्यादेर्ग्रहणादौ मुख्यसामर्थ्यं कल्प्यम् 'गृहीत्वावेक्ष्य सम्यग्जरणाय भक्षयामि' इत्येवं ग्रहणादिविशेषितभक्षणप्रतिपादने तु ग्रहणादिद्वारा विशिष्टभक्षणप्रतिपादने सामर्थ्यं लक्षणया तदेकवाक्यतावमर्शेन[2] कल्प्यम्, तथापि ग्रहणादिकमिहार्थप्राप्तं प्रकाश्यते न तु विहितम्। एवं च ग्रहणादिस्वरूप एव तन्मन्त्राणां शेषत्वं स्यात् न त्वपूर्वसाधनतापन्ने तस्मिन्, ग्रहणादेरविहितत्वेन विध्येकगम्यतद्रूपाभावात्। ततश्चापूर्वोपयोगाभावान्मन्त्राणामानर्थक्यं स्यात्। तथा च 'देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नये जुष्टं निर्वपामि' इति मन्त्रस्य सविवादिशब्दघटितस्य विशिष्टनिर्वापप्रतिपादकत्ववद्ग्रहणादिविशिष्टभक्षणप्रतिपादकता कृत्स्नानुवाकस्य लक्षणया तदेकवाक्यतावशाद्युक्ता। एवं च 'भक्षेहि' 'भक्षयामि' इत्युपक्रमोपसंहारावगतमेकवाक्यत्वमप्युपपन्नं भवति। भक्षानुवाकसमाख्यापि कृत्स्नानुवाकस्यानुगृहीता भवति। एवं चाग्नेयीवाक्ये सामान्यसंबन्धबोधकप्रकरणेन प्रकृताप्रकृतसाधारण्यप्रवृत्तश्रुतिस्वारस्यभङ्गवादेहापि कृत्स्नानुवाकस्य भक्षणार्थत्वबोधकसमाख्यावशाल्लिङ्गस्वारस्यभङ्ग आश्रयणीयः॥

अथ सिद्धान्तयति—

तस्य रूपोपदेशाभ्यामपकर्षोऽर्थस्य चोदितत्वात् ॥ २३ ॥

तस्य भक्षानुवाकस्य अपकर्षः ग्रहणादौ विभज्य विनियोगः। कुतः। रूपोपदेशाभ्याम्,

---

1. लिङ्गसमाख्याभ्यां 2. वशेन—क, ग, घ.

रूपाद्ग्रहणादौ मुख्यसामर्थ्यादुपदेशाच्च । कथमुपदेशः । अर्थस्य चोदितत्वात् यावता विना विधेयोऽर्थो न सिध्यति तावतोऽर्थस्य चोदनपरिगृहीतत्वेन ग्रहणमवेक्षणं च विना अन्यूनानतिरेकेण भक्षयितृभिः सहभक्षणस्यानुपपत्त्या ग्रहणादेरपि भक्षयतिचोदिततया अपूर्वसाधने तत्र विनियोगसंभवेन वैयर्थ्याभावादित्यर्थः । न चैवं सति व्रीहिचोदनयाकर्षणादेरपि परिग्रहणादङ्गत्वं स्यादिति वाच्यम् । प्रतिग्रहादिनापि कस्यचिल्लाभसंभवेनैकान्ततस्तदपेक्षाभावात् । एवं प्रतिग्रहादेरपि । न च भक्षणोत्तरभावि जरणं न भक्षणाक्षेप्यमिति वाच्यम् । जरणपर्यन्त एव भक्षणे भक्षयतेर्लोकप्रसिद्धत्वेन सोमवमने प्रायश्चित्तविधानेन च जरणपर्यन्तभक्षणस्यैवात्र भक्षयतिना विहितत्वात् । न च भक्षणे कृते प्रयत्नं विना स्वयमेवानुनिष्पद्यमानजरणस्य पृथगनुष्ठेयत्वाभावान्न स्मारकमन्त्रापेक्षेति वाच्यम् । 'भुक्त्वा वै सुखमास्थाय तदन्नं परिणामयेत्' इति जरणस्यापि सुखासनादिप्रयत्नसाध्यत्वात् । तदेवं मुख्यलिङ्गानुसारेण विभज्य विनियोगे संभवति वाक्यसमाख्याभ्यां दुर्बलाभ्यां भक्षार्थता कृत्स्नानुवाकस्येत्ययुक्तम् । भक्षस्यानुवाक इति समाख्यालब्धसंबन्धस्य ग्रहणादिद्वारेणोपपत्तेः समाख्यापि न विरुध्यते । यत्तु सवित्रादिपदघटितनिर्वापमन्त्रस्येव विशिष्टार्थप्रतिपादकत्वमिति तन्न । प्रकरणे सवित्रादिदेवताभावेनोत्कर्षापत्त्या च कथंचिद्विशिष्टपरत्वस्वीकारेण लिङ्गविनियोगबाधेऽपि प्रकृते तथाविधबाधकाभावेन लिङ्गादेव वाक्यबाधस्य युक्तत्वात् । तस्माद्विभज्य विनियोगः । तत्र 'भक्षेहि' इत्यादिः 'सुप्रजास्त्वाय' इत्यन्तो भक्षणे 'एहि वसो' इत्यादिः 'सघ्यासम्' इत्यन्तो ग्रहणे इति वार्तिककृतः । आपस्तम्बादयो याज्ञिकास्तु 'भक्षेहीति भक्षमाह्रियमाणं प्रतीक्ष्याश्विनोस्त्वा बाहुभ्यां सघ्यासम इति प्रतिगृह्य' इत्याहुः । वृत्तमधिकरणम् ॥

तस्मिन्नेव भक्षानुवाके 'मन्द्राभिभूतिः' इत्यादिः 'सोमस्य तृप्यतु' इत्यन्तः किं तृप्तौ विनियोक्तव्यः, उत 'भक्षयामि' इत्येकवाक्यतया भक्षण इति संशये, लिङ्गात्तृप्तौ विभज्य विनियोक्तव्य इति प्राप्ते, सिद्धान्तयति—

गुणाभिधानान्मन्द्रादिरेकमन्त्रः स्यात्तयोरेकार्थसंयोगात् ॥ २४ ॥

'मन्द्राभिभूतिः' इत्यादिः 'भक्षयामि' इत्यन्तः एको भक्षणमन्त्रः स्यात् । कुतः । गुणाभिधानात् । गुणस्य भक्षणानुनिष्पाद्यतृप्तेर्निरर्थकाभिधानप्रसङ्गात् । तृप्तिर्हि न भक्षणात्पृथक्प्रयत्नसाध्या, भक्षणे सति तस्मात्स्वयमेवोत्पत्तेः । अतस्तृप्तिप्रकाशनस्यानर्थक्यान्न तत्र मन्त्रविनियोगसंभवः । तत्प्रकाशनस्यादृष्टार्थत्वे तु स एव दोषः । न च केवलभक्षणस्य प्रकाशनतोऽप्यनुष्ठानसिद्धेस्तृप्तिविशिष्टतत्प्रकाशनेऽप्यदृष्टार्थत्वं तुल्यमिति वाच्यम् । तस्योत्साहजननार्थतया दृष्टार्थत्वात् । ननु 'तृप्यतु' 'भक्षयामि' इत्याख्या-

१०. मन्द्राभिभूतिरित्यादेरेकमन्त्रताधिकरणम् ।

तयोर्निराकाङ्क्षयोः कथमेकवाक्यत्वमत आह—तयोरिति। लिङ्गविनियोगासंभवात्सत्यप्याख्यातस्य निराकाङ्क्षत्वे इतिकरणाध्याहारेण 'वाक्तृप्यतु इत्येवमर्थम् भक्षयामि' इत्येवमेकवाक्यतां प्रकल्प्य तृप्तिविशिष्टभक्षणप्रतिपादकत्वोपपत्तेः। प्रयोजनं पूर्वपक्षे तृप्तेर्भक्षणानन्तरभावित्वाद्भक्षणानन्तरं मन्त्रः प्रयोक्तव्यः; सिद्धान्ते तु भक्षणात्प्रागेवेति। वृत्तमधिकरणम् ॥

सन्ति ज्योतिष्टोमे शुक्रग्रहमन्थिग्रहसवनमुखीयचमसादिप्रदानान्यैन्द्राणि, अनैन्द्राणि चैन्द्रवायवमैत्रावरुणाश्विनादिग्रहोक्थ्यचमसादिप्रदानानि। भक्षानुवाके च 'मन्द्राभिभूतिः' इत्यादिभक्षणमन्त्रे 'इन्द्रपीतस्य' इति पठितम्। तत्र किमैन्द्रेष्वेव प्रदानेष्वयं मन्त्रः अनैन्द्रेष्वमन्त्रकं भक्षणम्, उतानैन्द्रेष्वप्यूहेन मन्त्रः, अथवा सर्वत्र यथाम्नानमेव मन्त्र इति संशये, पूर्वपक्षयति —

लिङ्गविशेषनिर्देशात्समानविधानेष्वनैन्द्राणाममन्त्रत्वम् ॥ २५ ॥

अनैन्द्राणां प्रदानानां शेषभक्षणस्यामन्त्रकत्वम्। कुतः। लिङ्गविशेषनिर्देशात् इन्द्रपीतत्वेन विशेषेण सोमस्य निर्देशात्। 'इन्द्रपीतस्य' इति हि तृतीयासमासः। न चेन्द्रेण पीतो यस्मिन्सवने तत्संबन्धिसोमस्य भक्षयामीति बहुव्रीह्याश्रयणादनैन्द्रविषयत्वमपि मन्त्रस्य न विरुद्धमिति वाच्यम्। बहुव्रीहेरन्यपदार्थपरत्वेन गौरवात् तृतीयासमासस्य स्वार्थवृत्तित्वेन लाघवात्। न च पूर्वपदप्रकृतिस्वरेण बहुव्रीह्याश्रयणमिति वाच्यम्। तृतीयासमासेऽपि 'तृतीया कर्मणि' इति पूर्वपदप्रकृतिस्वरोपपत्तेः। नन्वनैन्द्रप्रदानेषु 'मित्रावरुणपीतस्य' इत्याद्यूह्यतां मन्त्रे इत्यत आह—समानविधानेष्विति। समानं विधानं धर्माम्नानं येषामैन्द्रानैन्द्रप्रदानानां तेषां मध्येऽनैन्द्रप्रदानेषु भक्षणमन्त्र ऊहो न संभवति, प्रत्यक्षोपदिष्टधर्मकतया प्रकृतित्वात्। ऊहस्य विकृतिमात्रविषयताया दशमे वक्ष्यमाणत्वात्। ऐन्द्रानैन्द्रप्रदानानामुभयेषामपि समानविधानतया प्रकृतिविकारभावाभावात्। तस्मादनैन्द्रेष्वमन्त्रकं भक्षणमिति ॥

११. इन्द्रपीतस्येत्यादिमन्त्राणां विनियोगाधिकरणम्।

तमिमं पूर्वपक्षं निराकुर्वन्पूर्वपक्षान्तरमुत्थापयति—

यथादेवतं वा तत्प्रकृतित्वं हि दर्शयति ॥ २६ ॥

वाशब्दः पक्षान्तरसंभावनायाम्। अनैन्द्रप्रदानेषु नामन्त्रकं भक्षणम्, किंतु 'मित्रावरुणपीतस्य' इत्येव यथादेवतमूहेन समन्त्रकं भवति। हि यतः तत्प्रकृतित्वं प्रथममैन्द्रप्रदानप्रकृतिकत्वमन्यप्रदानानां दर्शयति। 'अनुष्टुप्छन्दस इति भक्षमन्त्रं नमति' इत्यूहविधिरिति शेषः। षोडशिभक्षमन्त्रे 'गायत्रच्छन्दसः' इति स्थाने 'अनुष्टुप्छन्दसः' इत्यूहेदित्यर्थः। षोडशिप्रदानस्य विकृतित्वं सिद्धवत्कृत्य तत्रोहविशेषविधानं सवनमुखीयान्यप्रदानानां विकृतित्वं गमयति। यद्यपि सोमयाग

एकं कर्म तथापि तदीयप्रदानानां नानात्वात्प्रकृतिविकृतिभाव उपपद्यते । 'इन्द्राय त्वा वसुमते सोमं गृह्णामि' 'इन्द्राय त्वा वृत्रघ्ने' 'इन्द्रायैकधनविदे' इत्यादिग्रहणमानाप्यायनादिमन्त्रवशेन सोमस्यैन्द्रप्रदानविषयत्वावगतस्याभिषवादिसकलधर्माज्ञानेन प्रथमस्यैन्द्रप्रदानस्य सवनमुखीयस्य प्रत्यक्षोपदिष्टधर्मकत्वात्प्रकृतित्वं नेतरेषामिति न तुल्यविधानत्वम् । न च मन्त्ररूपाङ्गानुसारेण प्रधानभूतसोमस्य कथं संकोच इति वाच्यम् । अङ्गभूतेनाप्याहवनीयादिनाग्निहोत्रादीनामाहिताग्निमात्रविषयत्ववदुपपत्तेः । तथा च सवनमुखीयान्यप्रदानानां विकृतित्वादूहेन तत्र भक्षणमन्त्रः प्रयोक्तव्यः इति द्वितीयः पक्षः ॥

इतः परं सिद्धान्ते वक्तव्ये एतद्वितीयपूर्वपक्षप्रयोजनतया विचारान्तरं प्रसङ्गात्प्रस्तूयते । सन्ति ज्योतिष्टोमे दश चमसाः । तत्र मध्यतःकारिसमाख्याकानां होतृब्रह्मोद्गातृयजमानानां चत्वारश्चमसाः मैत्रावरुणब्राह्मणाच्छंसिपोतृनेष्ट्रच्छावाकाग्नीध्राणां होत्रकाणां षट् । तत्र प्रातःसवने शुक्रामन्थिप्रचारेऽच्छावाकचमसवर्जं नव चमसाः सवनमुखीयाः प्रथममिन्द्राय हूयन्ते, इतरयोस्तु सवनयोर्दश दश । तत्र होत्रकाणां चमसेषु सकृत्सकृदिन्द्राय हुतेषु तच्छेषेषु सत्स्वेवाभक्षितेषु पुनरपि द्रोणकलशात्सोममुन्नीय मित्रावरुणादिदेवताभ्यो हुत्वा तेषु चमसेषु हुतशेषः सोमो भक्ष्यत इति स्थितिः । तत्र भक्षणमन्त्रे 'इन्द्रपीतस्य' इति पदे 'मित्रावरुणपीतस्य' इत्येवं मित्रावरुणादय एव केवला उपलक्षणीयाः, उत 'इन्द्रमित्रावरुणपीतस्य' इत्येवं पूर्वहोमदेवतेन्द्रोऽप्युपलक्षणीय इति संशये, सिद्धान्तेनोपक्रमते—

१२. अभ्युन्नीतसोमभक्षणाधिकरणम् ।

पुनरभ्युन्नीतेषु सर्वेषामुपलक्षणं द्विशेषत्वात् ॥ २७ ॥

उन्नीतेषु चमसेषु इन्द्राय हुतेषु मित्रावरुणादिप्रदानार्थं तच्छेषोपरि पुनरुन्नीताः सोमाः पुनरभ्युन्नीताः; तेषु भक्ष्यमाणेषु इन्द्रस्य मित्रावरुणादीनां च सर्वेषामुपलक्षणं कीर्तनं भवति । कुतः । द्विशेषत्वात् । भक्ष्यमाणस्य शेषस्य ऐन्द्रानैन्द्रोभयविधप्रदानशेषत्वात् ॥

अथ पूर्वपक्षी प्रत्यवतिष्ठते—

अपनयाद्वा पूर्वस्यानुपलक्षणम् ॥ २८ ॥

वाशब्दः प्रत्यवस्थाने । ऐन्द्रहुतशेषस्य पुनरभ्युन्नीतमैत्रावरुणादिप्रदानशेषस्य च संसृष्टस्य भक्षणे पूर्वप्रदानदेवताविशेषस्य इन्द्रस्यानुपलक्षणम् । कुतः । अपनीतत्वात् मैत्रावरुणाद्युत्तरप्रदानदेवताभूतमित्रावरुणादिसंबन्धेन तस्य अपनीतत्वात् बाधितत्वात् । न च मित्रावरुणाद्यर्थतया यः पुनरुन्नीतोंऽशः तस्यैव मित्रावरुणादिसंबन्ध इति शङ्कयम् । न ह्युन्नयनकाले देवतोद्देशोऽस्ति

येन पुनरुन्नीतांशस्यैव मित्रावरुणादिसंबन्धात्पूर्वशेषस्येन्द्रसंबन्धो नापेयात्। प्रदानकाल एव हि याज्यातो देवतोद्देशः। तदानीं पुनरुन्नीतांशस्यैव मित्रावरुणादिसंबन्धात्पूर्वशेषस्य च संसृष्टत्वान्न पुनरुन्नीतांशमात्रस्य मित्रावरुणादिदेवतोद्देशसंभवः। देवता वा कथं पूर्वशेषाद्विविच्य पुनरुन्नीतसोमांशं गृहीत्वा भोक्तुं शक्नुयात्, संसर्गिद्रव्यस्य विवेकासंभवात्। ततश्च संसृष्टस्य मित्रावरुणादिदेवतासंबन्धः पूर्वदेवतासंबन्धे सति न संभवतीति पूर्वशेषांशस्य पूर्वदेवतासंबन्धापनयात्पूर्वदेवताया अनुपलक्षणम्। किंतु मित्रावरुणादिदेवतानामेवोपलक्षणमिति॥

तदिदं सिद्धान्ती निराचष्टे—

अग्रहणाद्वानपायः[1] स्यात्॥ २९॥

वाशब्दश्चार्थे। पूर्वशेषस्यापि मित्रावरुणादिदेवतान्तरार्थत्वेनाग्रहणादुन्नयनकालेऽभ्युन्नीतमात्रस्य करिष्यमाणयागार्थत्वावधारणाच्च पूर्वदेवतायाः अनपायः पूर्वशेषादपनयनं न स्यादित्यर्थः। अभ्युन्नयनस्य हि सामर्थ्यात्करिष्यमाणयागार्थत्वमसंदिग्धम्। ततश्चाभ्युन्नीतांशस्यैव मित्रावरुणादिसंबन्धोऽवधृतः, न तु पूर्वशेषस्यापि। वचनाद्धि सशेषेषु चमसेपून्नयनम्। तत्र चमसोपलक्षणत्वेनोपपन्नः पूर्वशेषः। यदा चोन्नयनवेलायां पूर्वशेषस्य देवतान्तरार्थत्वं नावधृतं तदा प्रदानवेलायामपि यथागृहीतस्यैव होमात्संनिहितोऽपि पूर्वशेषोऽसावसंकल्पितत्वान्न देवतान्तरार्थो भवितुमर्हति। इन्द्राय त्यक्तस्य पूर्वशेषस्य देवतान्तरोद्देशेन पुनस्त्यागायोगाच्च। यत्तु संसर्गिद्रव्यत्वादभ्युन्नीतसोमांशः पूर्वशेषात्कथं पृथगुद्दिश्येत देवता वा कथं स्वीकुर्यादिति तन्न; बुद्ध्या निष्कृष्य पृथगुद्देशसंभवात्, हंसस्य क्षीरोदकविभजन इव पूर्वशेषतदभ्युन्नीतसोमविभजने महात्मनां मित्रावरुणादिदेवतानां सामर्थ्यसंभवाच्च। एवं च पूर्वशेषस्य न देवतान्तरसंबन्धः। अभ्युन्नीते सोमे हूयमाने पूर्वशेषोऽपि नान्तरीयकतया प्रक्षिप्यते, न तु मित्रावरुणादिभ्यो दीयते। ततश्च पूर्वदेवतापनायकस्य देवतान्तरसंबन्धस्य पूर्वशेषेऽभावान्न तत्र पूर्वदेवतापनय इति भवतीन्द्रमित्रावरुणपीतस्येत्येवमुपलक्षणमिति स्थितम्॥ अत्रेदं चिन्त्यम्। 'यथादेवतं वा तत्प्रकृतित्वं हि दर्शयति' इति पूर्वतरसूत्रेऽनैन्द्रप्रदानानामैन्द्रप्रदानविकृतित्वाद्यथादेवतमूह इति स्थितम्। प्रकृते चैन्द्रप्रदानशेषस्य मैत्रावरुणादिप्रदानशेषस्य च संसृष्टस्य भक्षणमेकमेवेति न तस्येन्द्रप्रदानभक्षणविकृतित्वम्, एकस्यैव प्रकृतिविकृतिभावाभावात्। ततश्च 'इन्द्रपीतस्य' इत्येव मन्त्र इति युक्तम्। संसृष्टमैत्रावरुणाद्यंशे तु तूष्णीं भक्षणं पर्यवस्यति, प्रकृतावूहविरोधात्। अस्तु वा एतस्यापि भक्षणस्य पूर्वशेषांशे प्रकृतित्वम् अभ्युन्नीतांशे विकृतित्वम्। तथापि विचारोऽयमभित्तिचित्रायितः। सोमभक्षणे हि वषट्कारः समाख्या होमाभिषवौ च समुदितौ निमित्तमित्यग्रिमपञ्चमपादे वक्ष्यते। अध्वर्युर्न वषट्कर्ता। नापि कस्यचिच्चमसस्य 'अध्वर्युचमसः' इति समाख्यास्ति। नाप्यैन्द्रप्रदानात्मके शुक्रामन्थिप्रचारेऽध्वर्युणा मैत्रावरुणादिहोत्रकचम-

1. ...अपनयः

सा हुताः। चमसाध्वर्युभिरेव हि ते हुताः। ब्रह्मयजमानसदस्यानां यद्यपि समाख्याभक्षणमस्ति तथापि न तदीयचमसानामभ्युन्नयनमस्ति, नापि मित्रावरुणाद्यर्थतया ते हुताः। होत्रकाणां चमसास्तु पुनरभ्युन्नीताः प्रस्थितयाज्यासु मित्रावरुणाद्यर्थतया हुताः। तत्र पूर्वशेषस्याध्वर्युहुतत्वाभावादध्वर्योर्भक्षणमप्रसक्तमिति 'मित्रावरुणपीतस्य' इत्येवं मित्रावरुणादीनामेवोपलक्षणम्। 'इन्द्रपीतस्य' इत्याम्नानं तु ऐन्द्रप्रदाने ब्रह्मादिषु सावकाशम्। तत्र भक्ष्यमाणेऽभ्युन्नीतसोमे पूर्वशेषोऽप्यवर्जनीयत्वादध्वर्युणा भक्ष्यते। तत्तु क्रतोरकिंचित्करमिति न तत्र भक्षणमन्त्रस्य प्रसक्तिः। सूत्राणि त्वेवं योजनीयानि। 'पुनरभ्युन्नीतेषु सर्वेषामुपलक्षणत्वं द्विशेषत्वात्' इत्युक्तार्थकं पूर्वपक्षपरम्। 'अपनयाद्वा पूर्वस्यानुपलक्षणम्' इति द्वितीयसूत्रं तु सिद्धान्तपरम्। अभ्युन्नीतसोमेऽध्वर्युणा भक्ष्यमाणेऽवर्जनीयपूर्वशेषभक्षणस्यावैधत्वेन ततो भक्षणमन्त्रस्यापनीततया इन्द्रस्योपलक्षणमप्रसक्तमित्यर्थः। तर्हि 'इन्द्रपीतस्य' इत्याम्नानं प्रकृतिभूतादैन्द्रप्रदानादपेयादित्यत्र तृतीयसूत्रमुत्तरम्। 'अग्रहणाद्वानपायः स्यात्' इति 'मध्यतःकारिणां चमसाध्वर्यवो वषट्कृतानुवषट्कृतां जुहुत' 'प्रैतु होतुश्चमसः, प्र ब्रह्मणः, प्रोद्गातुः, प्र यजमानस्य' 'होत्रकाणां चमसाध्वर्यवः सकृत्सकृद्धुत्वा शुक्रस्याभ्युन्नीयोपावर्तध्वम्' इति प्रैषानुसारेण होत्रकचमसव्यतिरिक्तब्रह्मादिचमसानामैन्द्रप्रदानानन्तरं मित्रावरुणाद्यर्थं पुनरभ्युन्नयनाभावेन तद्भक्षणे ब्रह्मादिभिः क्रियमाणे 'इन्द्रपीतस्य' इति निर्बाधतया भक्षमन्त्रस्य प्रकृतिभूतादैन्द्रप्रदानादनपाय इत्यर्थः। न चाभ्युन्नीतसोमे पूर्वशेषसंसृष्टे वषट्कारनिमित्तेन होत्रकैर्भक्ष्यमाणे 'इन्द्रमित्रावरुणपीतस्य' इत्येवमूहसंभव इति वाच्यम्। पूर्वहोमे ऐन्द्रे तेषां वषट्कर्तृत्वाभावेन तच्छेषभक्षणस्याप्रसक्तेः, तेषाम् 'भक्षेहि' इति मन्त्राभावाच्च। 'वाग्देवी सोमस्य तृप्यतु' इति भक्षणे मन्त्रान्तरस्यैव बाह्लृच्ये समाम्नानात्। तस्मात्पुनरभ्युन्नीतसोमभक्षणे मित्रावरुणपीतस्य मरुत्पीतस्य त्वष्ट्रपीतस्य अग्निपीतस्य इत्येवं केवलमित्रावरुणादीनामुपलक्षणमिति युक्तम्। तदेतन्मीमांसकयाज्ञिकशिरोमणयो विदांकुर्वन्तु। वृत्तमधिकरणम्॥

सन्ति प्रातःसवने ऐन्द्रवायवमैत्रावरुणाश्विना द्विदेवत्या ग्रहाः। तेषु हुतेषु तदीयाः शेषा आदित्यस्थाल्यामवनीयन्ते। अस्ति च तृतीयसवने आदित्यग्रहः। स च सशेषं हूयते। अस्ति च तृतीयसवने आग्रयणग्रहणविधिः। 'चतसृभ्यो धाराभ्य आग्रयणं गृह्णाति' 'आग्रयणादुत्सिच्य द्वितीयां धारां करोति' 'आदित्यस्थाल्यास्तृतीयाम्' 'आदित्यग्रहसंपाताच्चतुर्थीम्' इति। तदेतस्मादाग्रयणात्पात्नीवतग्रहग्रहणमाम्नातम् 'आग्रयणात्पात्नीवतं गृह्णाति' इति। तस्मिन्पात्नीवते हुते तच्छेषे भक्ष्यमाणे किम् 'वाय्विन्द्रवायुमित्रावरुणाश्व्यादित्यपत्नीवत्पीतस्य' इत्यूहः, उत 'पत्नीवत्पीतस्य' इत्येवेति संशये, पूर्वपक्षयति—

१३. पात्नीवतभक्षणे इन्द्रादीनामनुपलक्षणाधिकरणम्।

पाल्नीवते तु पूर्ववत्[1] ॥ ३० ॥

तुरप्यर्थे । यथा पुनरभ्युन्नीतांशस्यैवोन्नयनेन देवतान्तरसंबन्धात्पूर्वशेषांशस्य तत्संसृष्टस्यापि देवतान्तरसंबन्धाभावान्न पूर्वदेवतापनयः । ततश्च तद्भक्षणमन्त्रे 'वाग्विन्द्रवायुमित्रावरुणाग्न्यादित्यपत्नीवत्पीतस्य' इत्यूहः । भाष्यादौ 'इन्द्रवायुपत्नीवत्पीतस्य' इति वायुमित्रावरुणादेरपि प्रदर्शनार्थम् ॥

अथ सिद्धान्तयति—

ग्रहणाद्वापनीतः[2] स्यात् ॥ ३१ ॥

वाशब्दस्तुपर्यायो वैषम्ये । पुनरभ्युन्नीतांशस्यैवोन्नयनेन मित्रावरुणादिदेवतान्तरार्थतया तत्संसृष्टस्याप्यैन्द्रशेषस्य मित्रावरुणादिदेवतान्तरसंबन्धाभावान्न पूर्वदेवतापनय इति युक्तम् । इह तु द्विदेवत्यादिशेषसंसृष्टादाग्रयणाद्गृह्यमाणस्य संसृष्टत्वरूपेणैव पत्नीवद्रूपदेवतान्तरार्थतया ग्रहणात्पूर्वशेषः पूर्वदेवतासंबन्धादपनीतः स्यादित्यर्थः । न च 'आग्रयणात्' इत्यपादानत्वश्रवणादाग्रयणावयवस्यैव पात्नीवतत्वमवगम्यते, न तु पूर्वशेषस्यापि तत्संसृष्टस्येति वाच्यम् । न ह्यपादानत्वेऽवयवावयविभावः प्रयोजकः, 'धावतोऽश्वात्पुरुषः पतति' इत्यादौ व्यभिचारात् । किंतु विश्लेषमात्र प्रयोजकम् । तच्चाग्रयणांशवदनाग्रयणस्यापि पूर्वशेषस्य संसृष्टस्यैव संभवति, आग्रयणमात्रांशस्य विश्लेषयितुमशक्यत्वात् । तस्मादुभयस्यापि पत्नीवत्संबन्धात्पूर्वदेवतापनये सति 'पत्नीवत्पीतस्य' इत्येवोहः । वृत्तमधिकरणम् ॥

१४. पात्नीवतशेषभक्षणे त्वष्टुरनुपलक्षणीयताधिकरणम् ।

अस्ति पात्नीवतग्रहहोममन्त्रः 'अग्ना ३ इ पत्नीवा ३: सजूर्देवेन त्वष्ट्रा सोमं पिब स्वाहा' इति । 'अग्ने' इति संबोधनम् । 'एचोऽप्रगृह्यस्यादूराद्भूते पूर्वस्यार्धस्यादुत्तरस्येदुतौ' इत्येकारस्य पूर्वार्धमकारः प्लुतो भवति । उत्तरार्धमिकारः । 'अग्ना ३ इ' इति रूपम् । हे पत्नीवन् अग्ने देवेन त्वष्ट्रा सह जुषमाणः सोमं पिबेत्यर्थः । अनेन मन्त्रेण हुते पात्नीवते तच्छेषे भक्ष्यमाणे 'त्वष्टृपत्नीवत्पीतस्य' इति त्वष्टाप्युपलक्षणीयो न वेति संशये, पूर्वपक्षयति—

त्वष्टारं तूपलक्षयेत्पानात्[3] ॥ ३२ ॥

तुः प्रत्यवस्थाने । मास्तु वाग्वादीनां पात्नीवतभक्षण उपलक्षणम्, पूर्वशेषस्य वाग्वादिसंबन्धापनयात् । त्वष्टारं तु उपलक्षयेत् । कुतः । पानात् । मन्त्रतो ह्यग्नेः पत्नीवतः त्वष्ट्रा सह पानं गम्यते । न चैतत्त्वष्टुर्देवतात्वमन्तरेण संभवति । तस्मात्सोऽप्युपलक्षणीयः ॥

---

1. पूर्ववत्वात्. 2. नीतं. 3. त्वष्टारं तूपलक्षयेत्.

अथ सिद्धान्तयति—

अतुल्यत्वात्तु नैवं स्यात् ॥ ३३ ॥

तुरवधारणे । त्वष्टारमुपलक्षयेदित्येवं यदुक्तं तन्नैव स्यात् । कुतः । अतुल्यत्वात् पाने त्वष्टुः पत्नीवता तुल्यत्वाभावात् । पानेऽन्वयाभावादिति यावत् । त्वष्टुर्हि सहभावमात्रं न तु पानेऽन्वयः, 'सहैव दशभिः पुत्रैर्भारं वहति गर्दभी' इत्यत्र क्रियान्वयाभावेऽपि सहभावस्य दर्शनात् । अस्तु वा त्वष्टुरपि पातृत्वम् । तन्मात्रेण कथं तस्य देवतात्वम्, तस्य त्यज्यमानहविरुद्देश्यत्वात्मकत्वात् । ननु पाने प्रतीयमानोऽपि संबन्ध उद्देश्यत्व एव पर्यवस्यतीत्यत्राप्यतुल्यत्वादित्येवोत्तरम् । विध्युद्देशमन्त्रवर्णयोर्बलविषयेऽतुल्यत्वादित्यर्थः । 'पात्नीवतं गृह्णाति' इति विध्युद्देशे हि केवलस्य पत्नीवतो देवतात्वं तद्धिताद्गम्यते । तदेतन्मन्त्रवर्णतस्त्वष्टुरपि देवतात्वे बाध्येत । त्वष्टृसापेक्षतया पत्नीवतो देवतात्वे तद्धितानुपपत्तिः । न हि मन्त्रवर्णेन तद्धितस्य बाधो युज्यते, मन्त्रवर्णस्य शाब्दविधया देवतात्वरूपेण त्वष्ट्रभिधायकत्वाभावेन पानतस्तत्कल्पकतया देवतावाचितद्धितापेक्षया दुर्बलत्वात् । अदेवताभूतस्यापि त्वष्टुर्मन्त्रे उपादानं तु स्तुत्यर्थं भविष्यति 'महानुभावेन त्वष्ट्रा सेव्यमानः पत्नीवानग्निः' इति । तैत्तिरीयशाखायाम् 'तस्मात्पात्नीवते त्वष्ट्रेऽपि गृह्यते' इति वचनं मन्त्रोपात्तत्वष्टृसहभावोपपादनार्थत्वादर्थवादमात्रमिति दिक् । वृत्तमधिकरणम् ॥

अस्त्यस्मिन्नेव पात्नीवते याज्यामन्त्रः 'ऐभिरग्ने सरथं याह्यर्वाङ् नानारथं वा विभवो ह्यश्वाः । पत्नीवतस्त्रिंशतं त्रींश्च देवाननुष्वधमावह मादयस्व' इति । 'आ एभिः' इति च्छेदः ।

१५. पात्नीवतशेषभक्षणे त्रिंशतोऽनुपलक्षणाधिकरणम् ।

हे अग्ने एभिर्वक्ष्यमाणैस्त्रयस्त्रिंशद्देवैः सरथं एकरथं यथा तथा अर्वाङ् समीपे आयाहि । तवाश्वाः हि यतः विभवः विविधरूपग्रहणे समर्थाः । अतो नानारथं वा आयाहि । पत्नीवतः त्रिंशतं त्रींश्च देवान् । अनुष्वधं स्वधा अन्नं सोमः । तमन्नमभिलक्ष्य तदर्थम् आवह प्रापय । ततो मादयस्व तर्पय इति मन्त्रार्थः । अत्राग्नेर्मादयितृत्वमवगतम्, न तृप्तिः । पत्नीवतां तु त्रयस्त्रिंशद्देवानां तृप्तिरवगतेति तेषामेव देवतात्वमवगतम् । 'अग्ना३ इ पत्नीवा३ः सजूर्देवेन त्वष्ट्रा सोमं पिब स्वाहा' इति मन्त्रे तु पत्नीवतोऽग्नेर्देवतात्वमवगतम् । पत्नीवान्पत्नीवन्तश्च देवता अस्य पात्नीवत इति कृतैकशेषबहुवचनान्ततद्धितेन तदुभयेषामपि देवतात्वमविरुद्धम् । विद्युद्देशविरोधात्त्वष्टुर्देवतात्वाभावेऽपि त्रयस्त्रिंशद्देवानां तदविरोधात्तद्देवतात्वमस्त्येव । ततश्च 'पत्नीवद्भ्य इदं न मम' इति त्यागः । भक्षणमन्त्रे 'पत्नीवत्पीतस्य' इत्यत्राग्नित्रयस्त्रिंशद्देवताश्च पत्नीवन्तः प्रत्येतव्या इति प्राप्ते, सिद्धान्तयति—

त्रिंशच्च परार्थत्वात् ॥ ३४ ॥

'त्रिंशत्' इति व्यधिकोपलक्षणम् । त्वष्ट्रवत्त्रयस्त्रिंशदेवा अपि न पात्नीवते देवतात्वं लभन्ते । कुतः । परार्थत्वात् । याज्यायां तन्निर्देशो हि स्तुत्यर्थः 'इत्थमयमग्निः प्रशस्तो यत्स्वकीयेन हविषा महानुभावांस्त्रयस्त्रिंशदेवानपि पत्नीवतस्तर्पयति' इति । अतो न तेषां देवतात्वम् । यद्यप्यग्नेर्मोदयितृत्वमवगतं तथापि न तत्तस्य देवतात्वं व्याहन्ति, प्रत्युत तस्य देवतात्वमावहति । न ह्यग्नेर्यजमानद्रव्येण त्रयस्त्रिंशदेवान्मादयितुं शक्नोति, किंतु स्वकीयेन । कथं च यजमानद्रव्यमग्नेः स्वं स्याद्यदि यजमानोऽग्नये न दद्यात् । अतोऽग्नेरेव यजमानसंकल्पविषयत्वादितरेषामग्निदत्तेन मात्रतामपि यजमानसंकल्पविषयत्वाभावान्न देवतात्वम् । एवं च 'पात्नीवतम्' इति तद्धितोऽप्यसति बहुवचनग्राहकानन्यथासिद्धप्रमाणे एकवचनेनैव विगृहीतो भवतीति लाघवम् । ततश्च 'पत्नीवत इदं न मम' इति त्यागः । 'पत्नीवत्पीतस्य' इत्यत्राग्निरेव पत्नीवान्प्रत्येतव्यः । यत्तु 'अग्नित्रयस्त्रिंशदेवपत्नीवत्पीतस्य' इति पूर्वपक्षे ऊहः सिद्धान्ते तु 'पत्नीवत्पीतस्य' इत्याहुस्तन्न ; मन्त्रवर्णलब्धानां त्रयस्त्रिंशदेवानाममेश्च विधिगतपत्नीवच्छब्देनैवोपलक्षणीयत्वात् । यथा चैतत्तथा नवमे वक्ष्यते । वृत्तमधिकरणम् ॥

अस्ति प्रतिसोमयागाभ्यासमनुवषट्कारः 'सोमस्याग्ने वीहीत्यनुयजति' इति । तत्र मन्त्रवर्णादग्निर्देवता । नात्र पूर्ववत्पारार्थ्यं किंचिदुपलक्ष्यते । अतोऽनुवषट्कारप्रयुक्तशेषभक्षणे 'अग्निपीतस्य' इत्यूहः इति प्राप्ते, सिद्धान्तयति—

[1]अनुवषट्कारश्च कर्तृवत् ॥ ३५ ॥

अनुवषट्कारदेवतापि नोपलक्षणीया । यथा, 'होत्रादिपीतस्य' इति कर्ता नोपलक्ष्यते । अयमाशयः अनुवट्कारस्तावत् 'सोमेन यजेत' इति विहितैन्द्रवायवादिग्रहयजिवन्न सोमयागाभ्यासरूपः । किंतु 'सोमस्याग्ने वीहीत्यनुयजति' इति वाक्यान्तरविहितत्वात्कर्मान्तरं सोमयागाङ्गतया विधीयत इति संकर्षकाण्डे 'अनुयजतीत्यनुवषट्कारश्चोद्यते' इति प्रथमाधिकरणे वक्ष्यते । तत्र प्रकृतिभूतैन्द्रप्रदानाङ्गभूतानुवषट्कारदेवता न भक्षण उपलक्षणमर्हति, प्रकृतावूहाभावेन[2] मन्त्राभावात् । एवं च विकृतिभूतानैन्द्रप्रदानाङ्गभूतानुवषट्कारभक्षणेऽपि मन्त्रस्य न प्राप्तिः । यथा 'व्रीहीणां मेधः' इत्यस्य मन्त्रस्य प्रकृतौ यवेष्वभावान्न विकृतावपि यवेषु प्राप्तिस्तद्वत् । वैकृताङ्ग-

१६. भक्षणेऽनुवषट्कारदेवताया अनुपलक्षणाधिकरणम् ।

1. वषट्कारश्च पूर्ववत्. 2. विरोधेन— क, ग, घ.

देवतायाः प्राकृतप्रधानकार्यापत्त्यभावाच्च । तस्माद्विकृतावपि नानुवषट्कारदेवतोपलक्षणीया । वृत्तमधिकरणम् ॥

तदेवं द्वितीयः पूर्वपक्षः सप्रपञ्चमुपवर्णितः । अथ तं निराकुर्वन्प्रथमपक्षी प्रत्यवतिष्ठते—

[1]छन्दःप्रतिषेधस्तु सर्वगामित्वात् ॥ ३६ ॥

तुः प्रत्यवस्थाने । ऐन्द्रानैन्द्रप्रदानानां समानविधानत्वमेवास्तु । ततश्चानैन्द्रप्रदानेषु कथं यथादेवतमूहः, प्रकृतित्वात् । इत्थंभावाकाङ्क्षायां धर्मान्वयः । सा च नैन्द्रयजित्वेन, 'सोमेन यजेत' 'ज्योतिष्टोमेन स्वर्गकामो यजेत' इति सामान्यरूपेणैव विधानात् । सर्वेषु प्रदानेष्वेकस्यैव यागस्याभ्यस्यमानत्वात् । न च प्रदानानां फले विधिरस्ति येन तेषां प्रत्येकमित्थंभावाकाङ्क्षा स्यात्, प्रत्येकं चैन्द्रप्रदानेषु धर्मान्वयः स्यात् । ततश्च यजिरूपेण सर्वेषामपि प्रदानानां विधानसत्त्वान्न प्रकृतिविकृतिभावः । न च सोममानग्रहणादिमन्त्रवशादैन्द्रप्रदानविषयत्वेनावगतस्य सोमस्याभिषवादिधर्मान्नादैन्द्रप्रदानमेव प्रकृतिरिति वाच्यम् । मानग्रहणादिमन्त्राणां सोमद्रव्यं प्रत्यङ्गभूतत्वेन तदनुरोधेन सोमस्यैन्द्रप्रदानमात्रे संकोचस्यायुक्तत्वात्, सोमद्रव्यस्योत्पत्तिशिष्टस्योत्पन्नशिष्टमन्त्रापेक्षया प्रबलत्वाच्च । क्रतुविधीनां तु गुणभूताहवनीयाद्यनुसारेणाहिताग्निविषये संकोचो युज्यते, 'यदाहवनीये जुह्वति' 'यद्गार्हपत्य आज्यमधिश्रयन्ति संपन्नीर्याजयन्ति' इत्यादिविधिभिराहवनीयादीनां होमाद्यर्थतया विधानेन क्रतुविधीनां तदेकोपायकत्वात् । प्रकृते च मानग्रहणादिमन्त्राणां सर्वप्रदानसाधारण्येन विधानाभावादनैन्द्रप्रदानीयसोममानादेरुपायान्तरेणापि स्मरणसंभवाच्च मन्त्रबलान्न संकोच इति वैषम्यम् । नन्वनैन्द्रप्रदानानां समानविधानत्वे षोडशिनि 'अनुष्टुप्छन्दस इति भक्षमन्त्रं नमति' इति विरोध इत्यत आह— छन्दःप्रतिषेधः सर्वगामित्वादिति । प्रातःसवनिकसवनमुखीयैन्द्रप्रदानीयशेषभक्षणमन्त्रस्य 'गायत्रच्छन्दसः' इति घटितस्य षोडशिनि प्रतिषेधः निवृत्तिः भवति, तृतीयसवनस्थ 'जगतीच्छन्दसः' इति मन्त्रान्तरस्य कृत्स्नतृतीयसवनगामित्वात् षोडशिनश्च तृतीयसवनस्थत्वात् । अतस्तार्तीयसवनिकमन्त्रविशेषे ऊहविधानमेतत्; न तु प्रातःसवनिकसवनमुखीयैन्द्रप्रदानतः प्राप्तमन्त्रे; येनैतदूहवचनमैन्द्रप्रदानस्य तस्य प्रकृतित्वमितरेषां च प्रदानानां विकृतित्वं गमयेत् । समानविधानत्वेऽपि तार्तीयसवनिकमन्त्रे ऊहवचनस्योपपन्नत्वात् । ततश्च ऐन्द्रानैन्द्रप्रदानानां सर्वेषामपि समानविधानत्वान्न प्रकृतिविकृतिभाव इत्यनैन्द्रप्रदानेषूहविरोधात् 'इन्द्रपीतस्य' इत्यस्य चासमवायादमन्त्रकमेव भक्षणमिति प्रथमपक्ष एव स्थितः ॥

१७. कृत्वाचिन्तारूपम् अनैन्द्राणाममन्त्रकभक्षणाधिकरणम् ।

---

1. छन्दोनिषेधस्तु.

एवं स्थिते इदं चिन्त्यते। अस्ति ज्योतिष्टोमे ऐन्द्राग्नो ग्रहः 'ऐन्द्राग्नं गृह्णाति' इति। तस्मिन्भक्ष्यमाणे 'इन्द्रपीतस्य' इति भवति न वेति संशये पूर्वपक्षयति—

ऐन्द्राग्ने तु लिङ्गभावात्स्यात् ॥ ३७ ॥

तुः प्रत्यवस्थाने। अस्त्वनैन्द्राणां मैत्रावरुणादीनाममन्त्रकं भक्षणम्। ऐन्द्राग्ने तु भक्ष्यमाणे 'इन्द्रपीतस्य' इति स्यात्। कुतः। लिङ्गभावात् 'इन्द्रपीतस्य' इत्यस्य इन्द्राग्निपीतेऽपि प्रतिपादनसामर्थ्यसत्त्वात् इन्द्राग्निपीते इन्द्रपीतत्वस्यापि सत्त्वात्। नन्वाग्नेयशब्देनाग्नीषोमीयस्यापि व्यपदेशः स्यादिति चेत्सत्यम्। ऐन्द्राग्नग्रहयजौ समुदितवेषेण इन्द्राग्न्योर्देवतात्वान्मिश्रोद्देशेन दीयते सोमः। मिश्राभ्यां च स्वीक्रियते प्रत्येकं तूभाभ्यां पीयते, क्रियास्वाभाव्येन पानस्य प्रत्येकं परिसमाप्तेः। अग्नीषोमीयपुरोडाशे तु न देवताकर्तृकं भक्षणं श्रुतमस्ति। दानस्वीकारौ तु समुदितयोरेव संभवतः। तस्मादैन्द्राग्नभक्षणे 'इन्द्रपीतस्य' इत्यस्ति मन्त्रः ॥

१८. ऐन्द्राग्नभक्षस्यामन्त्रकताधिकरणम्।

अथ सिद्धान्तयति—

एकस्मिन्वा देवतान्तराद्विभागवत् ॥ ३८ ॥

वाशब्द एवार्थे। एकशब्दः कैवल्ये। 'एके मुख्यान्यकेवलाः' इति कोशः। अन्तरशब्दो भेदवाची। 'अन्तरमवकाशावधिपरिधानान्तर्धिभेदतादर्थ्ये' इति कोशः। एकस्मिन्केवले इन्द्रप्रदानीयशेषभक्षण एव 'इन्द्रपीतस्य' इति मन्त्रः, न त्वैन्द्राग्नभक्षणेऽपि। कुतः। देवतान्तरात् अग्निसापेक्षस्येन्द्रस्य केवलेन्द्रादन्यत्वात्। विभागवत् विभागश्चतुर्धाकरणं यथा केवलाग्नेयदेवत्ये पुरोडाशे भवति न त्वग्नीषोमीये तद्वत्। अयमाशयः। हुत एव सोम इन्द्रपीतः, 'न हि देवा अहुतस्याश्नन्ति' इति लिङ्गात्। न तस्य भक्षणप्रसक्तिः। हुतशिष्टस्तु नेन्द्रपीतः, तस्य प्रत्यक्षमुपलभ्यमानत्वात्। अतः पीतशब्देन स्वीकारो लक्ष्यते। शक्यते हि हुताहुतसमुदायः इन्द्रेण स्वीकृतत्वात् 'इन्द्रपीतः' इति वक्तुम्[1]। दानं च तद्धितानुसारेण मिश्रयोरेवेन्द्राग्न्योरिति न तत्र 'इन्द्रपीतस्य' इति मन्त्रो भवतीत्यमन्त्रकमेवैन्द्राग्नभक्षणम्। वृत्तमधिकरणम् ॥

तत्रैव भक्षमन्त्रे 'गायत्रच्छन्दसः' इति सोमविशेषणं श्रुतम्। गायत्र्येव गायत्रं छन्दो यस्य स्तोत्रशस्त्रादिविषये इति बहुव्रीहिः। किमयं भक्षमन्त्रः केवलगायत्रीच्छन्दस्के प्रदाने भवति, उत च्छन्दोन्तरसहितगायत्रीच्छन्दस्केऽपि प्रदाने इति संशये, पूर्वपक्षयति—

१९. 'गायत्रच्छन्दसः' इत्यादिमन्त्रविनियोगाधिकरणम्।

छन्दश्च देवतावत् ॥ ३९ ॥

1. 'इन्द्रदत्तः'—क.

यथा 'इन्द्रपीतस्य' इत्यत्र केवल इन्द्रो गृह्यते न त्वग्न्यादिसहितस्तथा गायत्रच्छन्दोऽपि केवलमेव समासवशाद्गृह्यते न तु च्छन्दोन्तरसहितम् ॥

अथ सिद्धान्तयति—

सर्वेषु वाभावादेकच्छन्दसः ॥ ४० ॥

वाशब्द एवार्थे । छन्दोन्तरसहितगायत्रीच्छन्दस्केषु केवलगायत्रीच्छन्दस्केषु च सर्वेष्वेव प्रदानेषु 'गायत्रच्छन्दसः' इति भवति, न तु केवलगायत्रीच्छन्दस्क एव प्रदाने । कुतः । एकच्छन्दसः अभावात् केवलगायत्रीच्छन्दस्कप्रदानस्याभावात् । वेदत्रयसाध्ये ज्योतिष्टोमे सर्वेष्वपि प्रदानेषु छन्दोन्तराणामवश्यंभावात् सर्वप्रदानसाधारणाङ्गभूतप्रातरनुवाकादौ छन्दोन्तराणां नियतत्वाच्च । एतेन 'केवलगायत्रे बृहस्पतिसवादौ गायत्रच्छन्दसः इति सावकाशम्' इति निरस्तम् । एवं च छन्दोन्तरसहितस्यैवान्यपदार्थसंबन्धितया नित्यसापेक्षत्वान्नासामर्थ्यम् । तस्माच्छन्दोन्तरसत्त्वेऽपि 'गायत्रच्छन्दसः' इति भवति मन्त्रः । वृत्तमधिकरणम् ॥

तदेवमनैन्द्रप्रदानेष्वमन्त्रकं भक्षणमिति प्रथमपूर्वपक्षः स्थितः । अथ तृतीयपक्षेण सिद्धान्तयति—

सर्वेषां त्वैकमन्त्र्यमैतिशायनस्य भक्तिपानत्वात्सवनाधिकारो हि ॥ ४१ ॥

तुरवधारणे । सर्वेषाम् ऐन्द्रानैन्द्रप्रदानानां शेषभक्षणे ऐकमन्त्र्यमेव ऐतिशायनाचार्यस्याभिमतम् । एकरूपः अविकृतो मन्त्रः येषु तेषां भावः ऐकमन्त्र्यम् । अनैन्द्रप्रदानेष्वपि 'इन्द्रपीतस्य' इत्यविकृत एव भवतीति यावत् । कुतः । सवनाधिकारो हि । सवनमधिकरोति विशिनष्टीति सवनाधिकारः । इन्द्रेण पीतः सोमो यस्मिन्निति बहुव्रीहिणा 'प्रातःसवनस्य' इत्यस्य विशेषणम् 'इन्द्रपीतस्य' इत्येतदिति यावत् । न त्वेतत्तृतीयासमासेन सोमविशेषणं भवितुमर्हति । कुतः । भक्तिपानत्वात् । भक्त्या उपचारेणाभिधीयमानं पानं यस्य सोमस्य तस्य भावः भक्तिपानत्वम् । यो हि सोमांशो हुतः न तस्य भक्षणप्रसक्तिः । यस्तु हुतशिष्टश्चमसस्थः सोमः स तु नेन्द्रपीतः, अनुपलब्धिप्रसङ्गात् । अतः पिबतिना स्वीकारो लक्षणीयः । ततश्च 'सोम देव ते मतिविदः' इति संबुद्ध्यन्तेन सोमशब्देन 'ते' इति प्रत्यक्षतया च निर्दिष्टस्य हुतशिष्टसोमस्य तावत् 'इन्द्रपीतस्य' इति विशेषणेन भवितव्यम् । न च हुतशिष्टः सोम इन्द्रस्वीकृतः, उन्नयनादिसमये संकल्पितस्य होम्यतदितरसमुदायस्यैवेन्द्राय दत्तत्वात् अदत्तस्य च तदेकदेशस्य स्वीकारायोगात् । तथा च 'इन्द्रपीतस्य' इत्य-

1. त्वेकमन्त्रत्वम...

नेन ऐन्द्रसमुदायावयवो हुतशिष्टः सोमांशो लक्षणीयः स्यात्। एवं चेन्द्रपीतपदे तृतीयासमासे इन्द्रशब्दस्येन्द्रकर्तृके पीतशब्दस्य स्वीकृतावयवे चेति पूर्वोत्तरपदयोर्द्वयोरपि लक्षणाप्रसङ्गाद्बहुव्रीहिरेवाश्रयणीयः। इन्द्रेण पीतः सोमो यस्मिन्सवने तस्य यः सोमः तं भक्षयामीत्यन्वयः। न च बहुव्रीहावपि इन्द्रपदस्येन्द्रकर्तृके पीतशब्दस्य स्वीकृतेऽवयविनि सोमे च लक्षणा, अवयविनः सोमस्य पीतपदाच्छक्त्यानुपस्थितेरिति पूर्वोत्तरपदयोर्लक्षणा तुल्येति वाच्यम्। अवयवस्वीकारस्यावयविस्वीकारापेक्षत्वेन विलम्बोपस्थितिकतया वैषम्यात्। वस्तुतस्तु, पीतपदे 'आदिकर्मणि क्तः कर्तरि च' इति क्तप्रत्ययः। ततश्च इन्द्रः प्रथमं पाता यस्मिन्सवने इत्यर्थलाभान्न पूर्वपदे लक्षणेति तृतीयासमासाद्वैषम्यम्। प्रकरणाच्च पानं सोमविषयमिति गम्यते। पीतशब्दस्याहिताग्न्यादित्वात्परनिपातः। न च बहुव्रीहावपि पदद्वयस्यान्यपदार्थे लक्षणा दोष इति वाच्यम्। बहुव्रीहावन्यपदार्थस्य समासशक्यत्वात् अन्वयतात्पर्यानुपपत्तिप्रतिसंधानं विना शाब्दबोधस्य तत्रानुभवसिद्धत्वात् 'अनेकमन्यपदार्थे' इत्यनुशासनबलाच्च। न चैवं सति 'चित्रगुः' इत्यत्र चित्रपदार्थस्य गोपदार्थस्य चान्यपदार्थे विशेषणतया भानं न स्यादिति वाच्यम्। अवयवशक्तिसहकृतसमुदायशक्त्या वर्तिपदार्थविशिष्टान्यपदार्थस्य वाच्यत्वाभ्युपगमात्। 'चित्रगुः' 'पीताम्बरः' 'प्राप्तोदको ग्रामः' 'उद्धृतौदना स्थाली' इत्यादावावयवार्थविशिष्टेऽन्यपदार्थे नियततात्पर्यवचनानुरोधाच्च न लक्षणा युक्ता। यदि ह्येते शब्दा लाक्षणिकास्तर्हि गङ्गाशब्दस्य तीरादौ लाक्षणिकस्य प्रवाहविशेषे मुख्येऽपि यथा प्रयोगस्तथा चित्रासु गोषु, पीतेऽम्बरे, प्राप्त उदके, उद्धृत ओदने, इत्याद्यवयवार्थे मुख्येऽपि केवले 'चित्रगुः' 'पीताम्बरः' 'प्राप्तोदकः' 'उद्धृतौदनः' इत्यादिप्रयोगः स्यात्। निरूढलक्षणयातिप्रसङ्गपरिहारे तु समुदायशक्तिरेवाभ्युपगता भवति, निरूढलक्षणायाः शक्तेश्चानतिभेदात्। उक्तं च वार्तिके 'निरूढालक्षणाः काश्चित्सामर्थ्यादभिधानवत्' इति, 'इह केषुचिदर्थेषु शक्तिवदेव लक्षणाप्यनादिकालवृत्तित्वेन निरूढा' इति च। किंच 'चित्रगुः' इत्यत्र वर्तिपदद्वयस्यान्यपदार्थलक्षणां वदन्प्रष्टव्यः किं पूर्वपदस्योत्तरपदार्थान्वयमुखेनान्यपदार्थे लक्षणा उत तन्नैरपेक्ष्येण। नान्त्यः; परस्परनिरपेक्षत्वेनासामर्थ्यात्समासानुपपत्तेः, चित्रत्वस्य गोविशेषणतयैव बोधस्यानुभवसिद्धत्वाच्च, चित्रत्वस्यान्यपदार्थेऽनुपलब्धिपराहतत्वाच्च। 'सप्तमी विशेषणे बहुव्रीहौ' इति विशेषणस्य पूर्वनिपातविधिना पूर्वपदार्थस्य चित्रत्वस्योत्तरपदार्थविशेषणताया अवगमाच्च। नाद्यः, तर्हि चित्रत्वविशिष्टविशेष्यवाचकोत्तरपदमात्रस्यान्यपदार्थलक्षकतया पदद्वयलक्षणाव्याघातात्। अस्तूत्तरपदस्यैवान्यपदार्थलक्षकतेति चेत्तर्हि गोपदेनैव गोस्वामिलक्षणया गवि चित्रत्वान्वयो न स्यात् पदार्थैकदेशत्वात्। न च शक्यार्थयोरन्वयबोधानन्तरं लक्षणाभ्युपगमात् चित्रपदस्य तात्पर्यग्राहकतया गोपदेनैव चित्रगोस्वामिलक्षकत्वाद्वा न दोष इति वाच्यम्। एवमपि 'प्राप्तोदको ग्रामः' इत्यषष्ठ्यर्थबहुव्रीहौ लक्षणाया दुर्वारत्वात्। तथाहि। किं तत्र प्राप्तिकर्तृभूतमुदकमिति बोधोत्तरं तत्संबन्धिग्रामलक्षणा, उत उदककर्तृका प्राप्तिरिति

बोधोत्तरं तत्कर्मप्रामलक्षणा । नाद्यः, एवमप्युदककर्तृकप्राप्तिकर्म ग्राम इति विवक्षितार्थानिर्वाहात् । न द्वितीयः, प्रत्ययार्थप्राधान्यस्यान्यत्र क्लृप्तस्य भङ्गापत्त्या 'सत्त्वप्रधानानि नामानि' इति निरुक्तवचनविरोधेन च तथा बोधासंभवात् । 'घटो नित्यः' इत्यतो नित्याभिन्नघटत्ववानिति बोधवारणायाभेदसंसर्गेण नामार्थप्रकारबोधे विशेष्यतावच्छिन्ननामजन्योपस्थितेर्हेतुतया कर्तरि उदकाभेदान्वयासंभवाच्च । न चोदकपदेनोदककर्तृकप्राप्तिकर्मीभूतो लक्ष्यते प्राप्तपदं च तत्र तात्पर्यग्राहकमिति वाच्यम् । प्राप्तपदमेव तथा लक्षकमुदकपदं तात्पर्यग्राहकमित्यपि वक्तुं शक्यत्वेन विनिगमनाविरहात् । एवम् 'उद्धृतौदना स्थाली' 'ऊढरथोऽनड्वान्' इत्यादावप्यषष्ठ्यर्थबहुव्रीहावूह्यम् । तथा च 'प्राप्तोदकः' इत्यादौ प्राप्तादिपदेभ्यो विशेषणविशेष्यभावव्यत्यासेन तद्विशिष्टान्यपदार्थकर्माद्युपस्थितिः ; 'चित्रगुः' इत्यादौ यञेति प्रकृतिप्रत्ययार्थव्यत्यासेन तद्विशिष्टान्यपदार्थोपस्थितिश्च समुदायशक्तिसाध्यैव । न च व्यासेसमासयोरेकार्थत्वाय चित्राणां गवामयमिति विग्रहोऽस्त्विति वाच्यम् । एवं विग्रहेऽपि षष्ठ्यर्थसंबन्धस्य भेदेनायमित्यत्रान्वयेऽपि चित्रगोसंबन्धवानिति संबन्धनिष्ठप्रकारतानिरूपितभेदसंसर्गीयविषयताशाली बोधः ; समासे तु चित्रगववानिति चित्रगोनिष्ठप्रकारतानिरूपितसंबन्धिनिष्ठविशेष्यताशाली बोध इति भेदस्य तदवस्थत्वात् । अषष्ठ्यर्थबहुव्रीहौ प्राप्तस्योदकस्यायमिति विग्रहेऽप्युदककर्तृकप्राप्तिकर्म ग्राम इत्यादिबोधस्य समासे दुरुपपादत्वाच्च । तस्माद्व्यासेसमासयोरेकार्थत्वनियमाभावात्समुदायशक्तितः समासे विशिष्टार्थबोधो विग्रहवाक्याद्विलक्षणोऽभ्युपेयः । नन्वेवमपि स्वघटकपदघटितवाक्यदृष्टार्थमात्रविषयतत्पुरुषीयशक्तिग्रहापेक्षया बहुव्रीहिसमासीयशक्तिग्रहस्य स्वघटकपदघटितवाक्यदृष्टार्थातिरिक्तबहिर्भूतान्यपदार्थविषयकत्वेन बहिरङ्गतया कथम् 'इन्द्रपीतस्य' इति बहुव्रीहिरिति चेन्न । इन्द्रपदस्य तत्कर्तृके पीतपदस्य च स्वीकृते लक्षणापत्त्या बहुव्रीहेरेवात्र बहिरङ्गस्याप्याश्रयणात् । तस्मादनैन्द्रप्रदानेष्वपि 'इन्द्रपीतस्य' इत्यविकृत एव भक्षमन्त्र इति सिद्धम् ॥

इति तृतीयाध्यायस्य द्वितीयः पादः ॥

तृतीयः पादः ॥

निर्मथ्य निगमसिन्धून्विविधन्यायाभिधानमन्थानैः ।
धर्मसुधामुद्धरते भूयो मुनये नमोऽस्तु जैमिनये ॥

पूर्वयोः पादयोः श्रुतिलिङ्गविनियोगौ निरूपितौ । संप्रति तदुभयसापेक्षवाक्यादिविनियोगस्तृतीयपादे निरूप्यते । वाक्यं नाम यथाश्रुतार्थस्य पदस्य संसर्गविधया लक्षणया वार्थान्तरकल्पनानुकूलः पदान्तरसमभिव्याहारः । 'धेनुर्दक्षिणा' इत्यादौ या दक्षिणा सा धेनुरित्येवमुद्देश्यविधेयभावादेः 'उच्चैर्ऋचा क्रियते' इत्यादौ करणत्वादेश्चोच्चैस्त्वादिगतस्य संसर्गमर्यादया 'प्रयाजशेषेण हवींष्यभिघारयेत्' इत्यादौ प्रयाजशेषं हविःषु क्षारयेदित्येवं कर्मत्वादेश्च लक्षणया भानात् । पदसमभिव्याहारलक्षणवाक्यस्य च योग्यताज्ञानं विना उक्तविधार्थान्तरकल्पकत्वानुपपत्तेर्योग्यतारूपलिङ्गानुमापकता, धेन्वा दक्षिणाकार्यं संपादयेदिति श्रुतिकल्पकत्वं च । यद्यपि श्रुतस्यैव धेन्वादिपदस्य करणत्वादिलक्षकतया न[1] तद्वाचकपदश्रुतिरूपश्रुतिकल्पकता । तथापि करणत्वादिरूपतात्पर्यकत्वरूपधर्मवैशिष्ट्यरूपेण कल्पनाच्छ्रुतिकल्पकता । ततश्च लिङ्गश्रुतिकल्पनामुखेन वाक्यमङ्गत्वे प्रमाणम् । तदिह ज्योतिष्टोमे तावत् 'प्रजापतिरकामयत प्रजाः सृजेयेति, स तपोऽतप्यत, तस्मात्तेपानात्त्रयो देवा असृज्यन्ताग्निर्वायुरादित्यः, ते तपोऽतप्यन्त; तेभ्यस्तेपानेभ्यस्त्रयो वेदा असृज्यन्ताग्नेर्ऋग्वेदो वायोर्यजुर्वेद आदित्यात्सामवेदः' इत्युपक्रम्य श्रूयते 'उच्चैर्ऋचा क्रियते उपांशु यजुषा उच्चैः साम्ना' इति । किमत्र ऋचा यत्क्रियते तदुच्चैरित्येवमृगादिशब्दा मन्त्रपराः उत वेदपराः । वेदानां च मन्त्रवत्क्रियां प्रति करणत्वाभावान 'क्रियते' इति करोतिना 'ऋग्वेदेन विधीयते' इत्येवं विधानं लक्ष्यते । कोटिद्वयेऽप्युच्चैस्त्वादेः शब्दधर्मस्य क्रियायां संनिवेशासंभवादानर्थक्यतदङ्गन्यायेन तदङ्गमन्त्रेषु निवेशः । तत्र पूर्वपक्षयति—

श्रुतेर्जाताधिकारः स्यात् ॥ १ ॥

जातिर्जातमिति पर्यायः । 'जातिर्जातं च सामान्यम्' इति कोशः । इह ऋगादिमन्त्रगतजातिविशेषा ऋक्त्वादयो विवक्षिताः । अधिकारः शेषित्वविशेषापरपर्यायं प्राधान्यम् । तच्च 'दंपत्योः सहाधिकारः' इत्यादौ कर्मफलभोक्तृत्वलक्षणम् । इह तु तात्पर्यविषयत्वं विवक्षितम् । ततश्चोच्चैस्त्वादिविधौ ऋगादिशब्दानामेव श्रवणाद्वेदशब्दाश्रवणादृगादिशब्दो जातिपरःसन्नाकृत्यधिकरण-

१. उच्चैस्त्वादीनां वेदधर्मताधिकरणम् ।

1, नञ् एषोऽस्माभिः कल्पितः, मातृकासु क्वचिदपि न दृश्यते ।

न्यायेनाक्षेपलब्धतदाश्रयमन्त्रपरः स्यान्न तु वेदपरः, लक्षणाप्रसङ्गात्। ननूपक्रमगतार्थवादस्थवेदशब्दानुसारेणोपसंहारस्थविधिगतेषु ऋगादिशब्देषु वेदलक्षणाश्रयणीया, न च विनिगमनाविरहः, 'मुख्यं वा पूर्वचोदनाल्लोकवत्' इति द्वादशिकाधिकरणे मुख्यजघन्ययोर्धर्मविप्रतिषेधे मुख्यधर्मानुग्रहस्य वक्ष्यमाणतया तन्न्यायेन प्रकृतेऽपि प्रथमश्रुतार्थवादस्यैवानुसरणीयत्वात् इति चेन्, नैतद्युक्तम्। उपक्रमे वेदशब्दस्य वेदयत्यनुष्ठेयार्थमिति व्युत्पत्त्या ऋगादिमन्त्रमात्रेऽप्युपपत्तेः मन्त्रब्राह्मणसमुदायस्यैव वेदशब्दार्थत्वे शूद्रस्य मन्त्राध्ययने वेदाध्ययननिषेधस्याप्रवृत्तिप्रसङ्गात्। अस्तु वा वेदशब्दो मन्त्रब्राह्मणसमुदाये मुख्यः। तथाप्युपसंहारस्थविध्युद्देशानुसारेणोपक्रमगतार्थवादस्थवेदशब्दस्य ऋगादिमन्त्रलक्षकताश्रयणं युक्तम्। यत्तु 'मुख्यं वा पूर्वचोदनाल्लोकवत्' इति न्यायेन प्रथमश्रुतार्थवादानुसरणमिति, तन्न। तत्र हि सूत्रे पूर्वसूत्राद्विप्रतिषिद्धधर्माणां समवाय इत्यनुवर्तते। तुल्यबलयोर्विरोधो विप्रतिषेधः। ततश्च प्रधानयोर्विरोधे मुख्यानुसरणम्। न त्वङ्गप्रधानयोर्विप्रतिषेधोऽस्ति, प्रधानानुसारित्वादङ्गानामतुल्यबलत्वात्। ततश्च दीक्षणीयासुत्ययोरङ्गप्रधानयोरतुल्यबलत्वादविप्रतिषेधान्मुख्यस्यापि दीक्षणीयाकालस्य पर्वणो यइष्ट्यादिवाक्यप्राप्तस्य एकदीक्षापक्षे प्रधानसुत्याकालेन पर्वणा बाध इति 'अङ्गगुणविरोधे च तादर्थ्यात्' इति तदुत्तराधिकरणे वक्ष्यते। अर्थवादविध्युद्देशयोश्च न तुल्यबलत्वम्, अर्थवादस्य विध्यपेक्षितस्तुतिसमर्पकतया विधिशेषत्वात्। किंच विधेरप्राप्तविषयतया स्वतन्त्रत्वात्प्राबल्यम्; अर्थवादस्य तु प्राप्तानुवादतया प्राप्तिपरतन्त्रत्वाद्दुर्बलतेति नास्ति तयोर्विप्रतिषेधः। ततश्च प्रधानत्वादप्राप्तविषयत्वाच्चैस्त्वादिविधिगतेषु ऋगादिशब्देषु न लक्षणा। अर्थवादस्य तु गुणत्वात्प्राप्तानुवादत्वाच्च तद्गतवेदशब्दे ऋगादिमन्त्रलक्षणा। 'अक्ताः शर्करा उपदधाति' 'तेजो घृतम्' इत्यत्र तूपक्रमस्थस्यापि विध्युद्देशस्योपसंहारगतार्थवादानुसरणं युज्यते, विरोधाभावात्। घृतनियमे हि न विध्युद्देशो विरुध्यते। अर्थवादोऽप्यनुगृह्यते। घृततैलाद्यनियमे तु यद्यपि विध्युद्देशो न विरुध्यते अर्थवादस्तु विरुध्यते; संभवति च घृतनियमाद्गुणभूतस्याप्यर्थवादस्याविरोधे सति न घृततैलाद्याश्रयणं युक्तम्। अतः कांस्यभोजिन्यायेन तत्र विध्युद्देशस्य प्रधानस्यापि गुणभूतार्थवादानुसारेण घृते संकोचः। 'अधिकश्च बहुगुणः साधारणे विरोधात्कांस्यभोजिवदमुख्येऽपि' इति द्वादशाधिकरणन्यायात्। प्रकृते त्वर्थवादानुसारेण विध्युद्देशे ऋगादिशब्दानामृगादिबहुलवेदलक्षणया मुख्यार्थातिलङ्घनाद्विरोधान्न तदनुसरणमिति वैषम्यम्। तस्मादुचैस्त्वादिविधिषु ऋगादिशब्दा मन्त्रपराः, न तु वेदपराः॥

अथ सिद्धान्तयति—

वेदो वा प्रायदर्शनात् ॥ २ ॥

वाशब्द एवार्थे। वेद इति सामान्याभिप्रायमेकवचनम्। उचैस्त्वादिविधिष्वृगादिशब्दै-

वेदा एव लक्षणया विवक्षिताः, न त्वृगादिमन्त्राः। कुतः। प्रायदर्शनात्। प्रपूर्वादिण्धातोर्भावे घञि प्रायशब्द उपसर्गवशादुपक्रमवाची। दृशिश्च श्रवणे। उपक्रमे वेदशब्दश्रवणादित्यर्थः। अङ्गीकुर्मः प्रधानं मुख्यादपि बलीय इति। तत्तु लब्धात्मकमेव तथा। प्रकृते तु प्रधानस्य लब्धात्मकत्वाभावान्न मुख्यबाधकता। तथाहि। ऋगादिशब्दसंयुक्तविध्युद्देशजन्यं ज्ञानं वेदशब्दसंयुक्तमर्थवादमन्यथयतीति वदन्प्रष्टव्यः किं विध्युद्देशजन्यं ज्ञानमर्थवादैकवाक्यताप्रतिसंधानात्प्राचीनमिह विवक्षितम्, उत तत्कालीनम्। नाद्यः। केवलविध्युद्देशश्रवणदशायामर्थवादस्फूर्तेरेवाभावेन तज्जन्यज्ञानस्यार्थवादगौणतापादनाक्षमत्वात्। न द्वितीयः। न हि तदशायां विध्युद्देशेन ऋगादिमन्त्रविषयज्ञानं जनयितुं शक्यम्, विध्युद्देशस्यार्थवादाननुगुणार्थकत्वे तदेकवाक्यताया अनिर्वाहात्। अतो विध्युद्देशस्य नास्ति लब्धात्मकता। अर्थवादस्य तु प्राथमिकत्वेनासंजातविरोधितया स्वार्थपरत्वादस्ति लब्धात्मकता। सुत्याकालस्तु यइष्ट्यादिवाक्यलब्धात्मकत्वादङ्गभूतदीक्षणीयाकालं बाधत इति युक्तम्। एतेनोपक्रमगतस्य 'पौर्वापर्ये पूर्वदौर्बल्यं प्रकृतिवत्' इत्यपच्छेदाधिकरणन्यायात्परेण बाध इति प्रत्युक्तम्। परस्य लब्धात्मकत्व एव तन्न्यायप्रवृत्तेः। प्रकृते च विधेः स्तुतिसापेक्षत्वेनार्थवादैकवाक्यतया तस्य ऋगादिमन्त्रपरत्वेऽर्थवादाननुगुणत्वेनैकवाक्यतानुपपत्त्या लब्धात्मकत्वाभावात्। तदुक्तम् 'पूर्वात्परबलीयस्त्वं तत्र नाम प्रतीयताम्। अन्योन्यनिरपेक्षाणां यत्र जन्म धियां भवेत्' इति। यच्चोक्तमप्राप्तविषयत्वाद्विध्युद्देशस्य यथाश्रुतार्थत्वं न्याय्यमिति तत्र ब्रूमः। उपक्रमे तावद्वेदशब्दश्रवणमात्रादेतावदवगतम्। नूनमत्र वेदानां स्तूयमानत्वादुद्देश्यत्वं विधेयत्वं वा विवक्षितमिति, [1]तत्रोद्देश्यत्वादिविधेयलाभात्परिशेषादेव तस्योद्देश्यत्वावगतेर्वस्तुतः ऋगादिपदमनुवादकमेव सदुद्देश्यपरम्। अतो विध्युद्देशगतोऽप्यृगादिशब्दः प्राप्तानुवादित्वाल्लक्षणां सहते। असंजातविरोधिन उपक्रमस्थवेदशब्दस्यैव तात्पर्यग्राहकस्य सत्त्वात्। न चोपक्रमस्थार्थवादानुसारेण विध्युद्देशस्यान्यथानयनेऽपि 'श्येनेनाभिचरन्यजेत' इत्यत्र विध्युद्देशस्य 'यथा ह वै श्येनो निपत्यादत्ते एवमयं द्विषन्तं निपत्यादत्ते' इति चरमश्रुतार्थवादवशेन कथं प्रसिद्धार्थत्यागेन नामधेयत्वाश्रयणमिति वाच्यम्। तत्र हि मत्वर्थलक्षणाप्रसङ्गेन गुणविध्यसंभवात्सामानाधिकरण्याच्च कर्मनामत्वम्। अर्थवादेन तु प्रवृत्तिनिमित्तसमर्पणेन तन्निर्वाहमात्रं क्रियते। न तु तावतार्थवादवशादेवोपक्रमस्थविध्युद्देशस्य प्रसिद्धार्थत्याग इत्यदोषः। ननूपक्रमेऽपि ऋग्वेदादिशब्दाः कथं तत्तद्वेदपराः; ऋग्यजुःसाम्नां सर्वेष्वपि वेदेषु संकीर्णत्वादित्यत्राप्येतदेवोत्तरं वेदो वा प्रायदर्शनादिति। प्रायशब्दो बाहुल्ये। 'प्रायो भूम्न्यन्तगमने' इति कोशः। क्वचिदृचां क्वचिद्यजुषां क्वचित्साम्नां बाहुल्येन दर्शनादृग्वेदादिशब्दैस्तत्तद्वेदोऽभिधीयत इत्यर्थः। एवमर्थान्तरद्योतनायैव प्रायपदं प्रायुङ्क्त। अन्यथा 'उपक्रमदर्शनात्' इत्येवावक्ष्यत्॥

1. ततश्चोद्देश्यत्वादि—क, ग, घ.

इतोऽप्येवमित्याह—

लिङ्गाच्च ॥ ३ ॥

चशब्दोऽन्वाचये। 'ऋग्भिः पूर्वाह्णे दिवि देव ईयते, यजुर्वेदे तिष्ठति मध्ये अह्नः। सामवेदेनास्तमये महीयते, वेदैरशून्यस्त्रिभिरेति सूर्यः।' इति मन्त्रे आद्यपादे 'ऋग्भिः' इत्युपादाय द्वितीयतृतीयपादयोर्यजुर्वेदसामवेदौ संकीर्त्य चतुर्थपादे 'वेदैः' इति बहुवचनेनोपसंहारादाद्यपादे ऋक्छन्दसा ऋग्वेदसंकीर्तनस्य सिद्धवत्कारदर्शनाल्लिङ्गादपि ऋगादिशब्दास्तत्तद्वेदपरा लक्षणया भवन्ति ॥

इतोऽप्येवमित्याह—

धर्मोपदेशाच्च न हि द्रव्येण संबन्धः ॥ ४ ॥

चशब्दोऽन्वाचये। द्रव्यशब्दमृक्षु प्रयुञ्जते छन्दोगाः। इह तदाधारकं साम लक्ष्यते। यदि ऋगादिमन्त्राणामेवोच्चैस्त्वादिधर्मः स्यात्तर्हि ऋच उच्चैस्त्वधर्मोपदेशादेव तदाधारसाम्न उच्चैस्त्वसिद्धेः द्रव्येण ऋगाधारकसाम्नोच्चैस्त्वसंबन्धः, हि यतः न विधातव्यः स्यात्, अतोऽप्युच्चैस्त्वादिर्वेददधर्मः। तथा च 'उच्चैर्ऋचा' इति ऋग्वेदविहितकर्मसु मन्त्राणामृग्यजुःसाम्नामुच्चैस्त्वसिद्धावपि सामवेदविहितकर्माङ्गमन्त्रेषु तेषूच्चैस्त्वस्यासिद्धया 'उच्चैः साम्ना' इत्यर्थवत्। यद्यप्युच्चैस्त्वस्य ऋग्धर्मत्वेऽपि प्रजापतेर्हृदयाद्यनृक्सामसु 'उच्चैः साम्ना' इत्यर्थवत्, तथाप्यभ्युच्चयमात्रमेतदिति नातीवात्राभिनिवेष्टव्यम् ॥

यत्तु वेदशब्दो मन्त्राणामेव वाचकः, न तु ब्राह्मणसमुदायस्येति तत्राह—

त्रयीविद्याख्या च तद्विदि ॥ ५ ॥

चशब्दोऽवधारणे। त्रयो वेदास्त्रयी विद्या यस्य स त्रयीविद्यः त्रयीविद्यशब्दस्याख्या प्रयोगः। तद्विदि ऋग्यजुःसामप्रचुरवेदत्रयाध्येतर्येव दृश्यते, न त्वृगादिमन्त्रमात्राध्येतरि। ततश्चोपक्रमगततथाविधवेदशब्दानुसारेण विध्युद्देशेषु वेदलक्षणा युज्यते। न चैवं सति ऋगादिमन्त्रमात्राध्ययनं शूद्रस्य न प्रतिषिध्येतेति वाच्यम्। 'कपिलाक्षीरपानेन ब्राह्मणीगमनेन च। वेदाक्षरविचारेण शूद्रश्चण्डालतामियात्॥' 'शूद्रे वेदाक्षरेणैव निष्कृतिर्नैव विद्यते' इति पाराशर्यादिस्मृत्यनुसारेण 'न स्त्रीशूद्रौ वेदमधीयाताम्' इत्यत्रावयवमुखेन तन्निषेधाभ्युपगमात्, कलञ्जादिनिषेधे तदवयवनिषेधवदुपपत्तेश्च ॥

नन्वेवमपि ऋचां यजुर्वेदविहितकर्माङ्गत्वे उपांशुत्वम्; ऋक्सामवेदविहितकर्माङ्गत्वे उच्चैस्त्वमिति वैरूप्यं स्यात्; एवं यजुषां साम्नां च यजुर्वेदविहितकर्माङ्गत्वे उपांशुत्वम्, वेदान्तरविहि-

तत्वे उच्चैस्त्वमिति वैरूप्यं स्यात्; उच्चैस्त्वादेर्मन्त्रधर्मत्वे तु नायं दोषो भवतीति मन्त्रधर्मत्वमेवास्थेयमित्याशङ्क्य निराकरोति—

व्यतिक्रमे यथाश्रुतीति चेन्न सर्वस्मिन्निवेशात् ॥ ६ ॥

ऋगादिमन्त्राणां वेदान्तरविहितकर्माङ्गत्वं व्यतिक्रमः; तस्मिन्सति, यथाश्रुति ऋक्त्वादिश्रवणानतिक्रमेण ऐकरूप्येणैव उच्चैस्त्वमुपांशुत्वं च भवति, यदि मन्त्रधर्मत्वमभ्युपगम्येत; वेदधर्मत्वे तु न स्यादैकरूप्यमिति न वेदधर्मत्वमिति चेत्, तन्न। कुतः। सर्वस्मिन्निवेशात्। सर्वस्मिन् तत्तद्वेदविहिते कर्मणि अङ्गभूतानां व्यतिक्रान्तानामपि ऋगादिमन्त्राणां विधिबलादेव स्वरान्तरसंनिवेशादेकस्यैव मन्त्रस्योच्चैस्त्वादिवैरूप्यं वचनबलान्न दुष्यतीति यावत् ॥

ननु उच्चैस्त्वस्य वेदधर्मत्वे प्रकरणबाधः स्यात्; ज्योतिष्टोमो हि याजुर्वेदिक इत्यनुपदमेव वक्ष्यते; अतस्तदङ्गानामृग्यजुःसाम्नामुपांशुत्वमेव; ततश्च 'उच्चैर्ऋचा' 'उच्चैः साम्ना' इत्यनयोः पूषानुमन्त्रणन्यायेनान्यत्र 'पुत्रकामा हाप्याख्यापयेरन्' इति बह्वृचब्राह्मणादिविहिते छन्दोगब्राह्मणविहिते अद्भुतशान्तिप्रमुखे च कर्मण्युत्कर्षः स्यात् इत्याशङ्क्याह—

[1]वेदसंयोगात्प्रकरणं बाध्येत ॥ ७ ॥

उपक्रमगतवेदशब्दसमभिव्याहाररूपवाक्यप्रमाणेन उच्चैस्त्वोपांशुत्वविधीनां तत्तद्वेदविहितकर्माङ्गमात्रोद्देश्यकत्वरूपवेदसंयोगात्प्रकरणं बाध्यताम्। वाक्येन प्रकरणबाधस्य न्याय्यत्वादिति भावः। तदेवमृग्वेदविहितकर्माङ्गानां सामवेदविहितकर्माङ्गानां च ऋग्यजुःसाम्नामुच्चैस्त्वम्। यजुर्वेदविहितकर्माङ्गानां तेषामुपांशुत्वमिति स्थितम्। इत्युपक्रमाधिकरणम् ॥

२. आधाने गानस्योपांशुताधिकरणम्।

याजुर्वेदिकस्याधानस्य सामवेदे 'वारवन्तीयं गायति' इत्यङ्गविधिः। तत्र वारवन्तीयस्य साम्नः सामवेदिकः स्वर उच्चैस्त्वम्, उत याजुर्वेदिकः स्वर उपांशुत्वमिति संशयः। सामवेदिकः स्वर इति ब्रूमः। न च पूर्वाधिकरणन्यायेन यजुर्वेदविहिताधानेऽपि ज्ञायमानमुपांशुत्वं तत्रासंभवादानर्थक्यतदङ्गन्यायेन तदङ्गमन्त्रेषु निविशमानं वारवन्तीयसामाप्यास्कन्दतीति वाच्यम्। पूर्वाधिकरणे ह्युपक्रमवशाद्वेदपरत्वेऽवधृते ऋगादिवेदैर्यद्विधीयते तत् 'उच्चैः' 'उपांशु' इत्येतावदवगतम्। मन्त्राश्च विनियोजकवाक्यैर्विहिताः। तेषु तत्तद्वेदविहितत्वनिबन्धनस्वरस्य साक्षादेव निवेशसंभवान्नात्रानर्थक्यतदङ्गन्यायावतरणमिति न स्वरविधिः प्रधानकर्मापेक्षः। ततश्च वारवन्तीयस्य सामवेदविहितत्वादुच्चैस्त्वमेव। न च 'अङ्गानि तु विधानत्वात्प्रधाननोपदिश्येरन्' इत्येकादशेऽङ्गानामपि प्रधानविधिविहितत्वस्य वक्ष्यमाणतया वारवन्तीयस्यापि

1. संयोगात्प्र...

याजुर्वेदिकाधानविधिविहितत्वादुपांशुत्वमिति वाच्यम्। प्रधानविधेरङ्गविधायकताया अङ्गविधिप्रवृत्तिनिबन्धनत्वेन प्रधानवेदस्वरस्योपांशुत्वस्याङ्गेषु मन्दप्रवृत्तिकतया, अङ्गवेदस्वरस्य चौदैस्त्वस्य निरपेक्षतया प्रथमं प्रवृत्तत्वेन, प्रथमोपस्थिताङ्गवेदस्वरस्यैव प्राह्यत्वात्। तस्मादिह वारवन्तीयस्योदैस्त्वमिति प्राप्ते, सिद्धान्तयति—

गुणमुख्यव्यतिक्रमे तदर्थत्वान्मुख्येन वेदसंयोगः ॥ ८ ॥

गुणमुख्ययोरङ्गविधिप्रधानविधिनिबन्धनस्वरयोरुदैस्त्वोपांशुत्वयोर्व्यतिक्रमे वारवन्तीयसाम्नि विरोधे सति, गुणस्य मुख्यार्थत्वात्, मुख्येन प्रधानविधिनैव निमित्तेन, 'उपांशु यजुषा' इति यजुर्वेदसंयुक्तस्वरः प्रत्येतव्यः। अङ्गविधिनिबन्धनस्वरो हि प्रथमोपस्थितोऽप्यङ्गधर्मत्वादुर्बलः। प्रधानविधिनिबन्धनस्वरस्तु पश्चादुपस्थितोऽपि प्रधानधर्मत्वात्प्रबलः। तथाहि। प्रधानविधिस्तावत्साङ्गं प्रधानं विधत्ते प्राच्योदीच्याङ्गकलापोपकृतेनाधानेनाग्निमुत्पादयेदिति। एवं च प्रधानविधिनिबन्धनस्वरोऽङ्गेष्वनुष्ठितोऽपि प्रधानस्यैव धर्मः। न स पृथगङ्गानां भवितुमर्हति। अङ्गानां प्रधानशेषत्वेनास्वतन्त्रतया स्वातन्त्र्येण धर्मग्रहणानर्हत्वात्। ततश्च प्रधानस्यैवाङ्गसाहित्यवेषेणोपांशुत्वसंपत्तयेऽङ्गभूतवारवन्तीये तदनुष्ठानमात्रम्, प्रधाने साक्षात्तदनुष्ठानासंभवात्। न त्वेतावता सोऽङ्गधर्मः। ततश्च प्रधानवेदस्वरस्योपांशुत्वस्य प्रधानधर्मत्वात्तद्बाधे प्रधानवैगुण्यम्। अङ्गवेदस्वरस्योदैस्त्वस्य बाधे त्वङ्गवैगुण्यमिति वारवन्तीयस्य प्रधानवेदनिबन्धनमुपांशुत्वमेव ॥

तदिदं भाष्यकारीयमधिकरणमनुपपन्नम्। अङ्गवेदस्वरस्याप्युदैस्त्वस्य प्रधाने श्रुतस्याङ्गद्वारा प्रधानोपकारकतया तद्बाधेऽपि प्रधानवैगुण्यस्य दुर्वारत्वात्; 'अङ्गगुणविरोधे च तादर्थ्यात्' इति द्वादशिकाधिकरणेन गतप्रायत्वात्; प्रधानविध्याश्रितस्य स्वरस्य प्रधाने श्रुतस्याङ्गेष्वनुष्ठानकल्पनस्य गुरुत्वात्; यजुर्वेदे वारवन्तीयविधेराम्नातत्वाच्च इत्यादिदूषणमुद्भाव्याधिकरणमन्यथा वर्णितं वार्तिके। कस्मिन्मन्त्र ऋक्सामवेदयोः केवलमाम्नायते न तु विनियुज्यते; यजुर्वेदे एव च विनियुज्यते— यथा 'यस्याग्निने शस्यमाने सूर्यो नाविर्भवति सर्वा अपि दाशतयीरनुब्रूयात्' 'गोपूक्तेन साम्नोपतिष्ठेत' इत्यादौ। तत्र कः स्वर इति संशये अविज्ञातस्वरूपस्य मन्त्रस्य विनियोक्तुमशक्यत्वात्तत्स्वरूपज्ञानस्य चाम्नानाधीनत्वात्तद्वेदनिबन्धनस्यैव प्रथमोपस्थितत्वाद्बलवत्त्वम्। 'ऋचा क्रियते' इति करोतिरुत्पत्तौ। ऋग्वेदेन यदुत्पद्यते सामवेदेन च तदुभैः; यजुर्वेदेन यत्तदुपांश्वित्यर्थः— इति प्राप्ते, सिद्धान्तयति— गुणमुख्यव्यतिक्रमे तदर्थत्वान्मुख्येन वेदसंयोगः ॥ गुणमुख्ययोराम्नानविनियोगवेदनिबन्धनस्वरयोर्विरोधे सति आम्नानस्य विनियोगार्थत्वात् मुख्येन विनियोगविधिनैव निमित्तेन वेदसंयुक्तः स्वरः प्रत्येतव्यः। करोतिरुत्पत्ताविति न युक्तम्। आम्नानं ह्युत्पाद्यः। नैतावन्मात्रेण 'क्रियते' इति व्यपदेशमर्हति मन्त्रः, कर्तव्यत्वेनावगम्यमानस्यैव 'क्रियते' इति व्यपदेशार्हत्वात्। विनियोग-

विधिना कर्तव्यत्वेनावगम्यमानो मन्त्रः 'क्रियते' इति व्यपदेशमर्हति। 'क्रियते' इत्यस्य विधीयत इत्येवार्थः। तदुक्तम् 'तेन तु क्रियते मन्त्रो यत्र मन्त्रो विधीयते' इति। प्रकृते च ऋक्साम-वेदयोर्मन्त्रस्य विनियोगविधेयभावान्न तद्वेदस्वरः। किंच कर्तव्यत्वेनावगतस्य स्वराकाङ्क्षा। कर्तव्यत्वावगमश्च विध्यायत्तः। तदशायां च संनिहितत्वाद्विनियोगविधिवेदस्वर एव ग्रहीतुमुचितः। अङ्गविधिष्वपीतिकर्तव्यताकाङ्क्षालक्षणप्रकरणावान्तरप्रकरणस्य[1] प्रपूर्वपादे 'साकाङ्क्षं त्वेकवाक्यं स्यात्' इत्यधिकरणे वार्तिके प्रपञ्चितत्वेनाङ्गानामपि धर्मग्राहित्वात्। तदेवं प्रकृते यजुर्वेदविनियुक्तमन्त्रेषूपांशुत्वमेवेति स्थितम्। एवमन्यत्रापीत्येवंजातीयकेषु योज्यम्। एवं ज्योतिष्टोमे ऋग्यजुःसाममन्त्राणां सर्वेषामपि तत्तद्वेदविनियुक्तानां यथायथमुच्चैस्त्वोपांशुत्वयोः संनिवेशसंभवादुच्चैस्त्वविध्योः प्रकरणादुत्कर्षो न कल्प्यत इति लाघवम्। प्रधानविधिवेदनिबन्धनत्वे तु ज्योतिष्टोमस्य याजुर्वेदिकत्वात्तदङ्गानामृग्यजुःसाम्नां तत्तद्वेदविनियुक्तत्वेऽप्युपांशुत्वस्यैव प्राप्तेरुच्चैस्त्वविध्योः प्रकरणादुत्कर्षः स्यात्। न चैवं सति 'वेदसंयोगात्प्रकरणं बाध्येत' इति पूर्वाधिकरणगुणसूत्रविरोधः, तत्रोच्चैस्त्वविध्योः प्रकरणबाधस्योक्तत्वादिति वाच्यम्। 'वेदसंयोगान्न प्रकरणेन बाध्येत' इत्येव वार्तिके पठितत्वात्। उच्चैस्त्वविधिद्वयमपि न प्रकरणेन बाध्येत न प्रकरणादुत्कृष्येत, स्वरविधीनां विनियोगविधिवेदनिबन्धनत्वात्, ज्योतिष्टोमे च वेदत्रयविनियुक्तानामपि मन्त्राणां सत्त्वात्—इति योजना। तदेवं वार्तिकमते विनियोगविधिवेदनिबन्धनत्वं स्वरविधीनामिति स्थितम्। स्यादेतत्। कः स्वरविधीनां विषयः। न तावद्दर्शपूर्णमासौ, ज्योतिष्टोमप्रकरणे श्रुतत्वात्। न च 'उच्चैर्ऋचा' इत्यादिवाक्यानामविशेषप्रवृत्तत्वाज्ज्योतिष्टोमादन्यत्रापि तत्संभवः, प्रकरणेन वाक्यसंकोचायोगादिति वाच्यम्। एवमपि 'मन्द्रया वाचाज्यभागान्तं परं मध्यमया उत्तमयानूयाजादि' इति वैशेषिकस्वरान्तरविधानेन दर्शपूर्णमासयोरुक्तस्वरविधिप्रवृत्तेः। अत एव दर्शपूर्णमासविकृतय इष्टिपशुबन्धा न विषयः, तत्रापि चोदकतो मन्द्रादिस्वरप्राप्तेः। न च 'उच्चैर्ऋचा' 'उपांशु यजुषा' इति प्रत्यक्षोपदिष्टस्वराभ्यां तद्बाध इति वाच्यम्। [2]अग्निमसप्तमपादे 'तद्ग्रहणाद्वा स्वधर्मः स्यात्' इत्यधिकरणे वैकृतप्रधानप्रयोगवचनस्य चोदकोपजीवकतया दुर्बलत्वस्य वक्ष्यमाणत्वेन चोदकतो मन्द्रादिस्वराणामेव विकृतीष्टिपशुषु प्राप्तेः। नापि ज्योतिष्टोमो विषयः। तत्र हि 'यत्किंचित्प्राचीनमग्नीषोमीयात्तेनोपांशु चरन्ति' 'यावत्या वाचा कामयेत तावत्या दीक्षणीयायामनुब्रूयात्, मन्द्रं प्रायणीयायाम्, मन्द्रतरमातिथ्यायाम्, उच्चैः प्रवर्ग्येण चरन्ति' इत्यग्नीषोमीयात्प्राग्वर्तिषु दीक्षणीयाप्रायणीयादिषु स्वरविशेषा विहिताः। अग्नीषोमीये तु चोदकतो मन्द्रमध्यमोत्तमस्वराः प्राकृता भवन्ति। एवमुदयनीयानूबन्ध्यादियज्ञपुच्छेऽपि। सुत्यायां तु 'मन्द्रया वाचा प्रातःसवने मध्यमया माध्यंदिने सवने उत्तमया तृतीयसवने' इति स्वरविशेषा विहिताः। तस्मात् 'उच्चैर्ऋचा' इत्यादिस्वरविधीनां विषयो दुर्निरूप इति चेत्।

1. लक्षणावान्तर— ब. 2. 'अग्निमाष्टमपादे' इत्येव सर्वासु मातृकासु दृश्यते

अत्र वार्तिककृतः। यदृग्वेदसामवेदयोः काम्यं नैमित्तिकं वा ज्योतिष्टोमाङ्गं तत्सर्वमुचैः कर्तव्यम्; यथा 'भिन्नमभिमृशेद्यद्दते चिदभिश्रिषः' इत्यादि। 'मन्द्रया वाचा प्रातःसवने' इत्यादि हि नित्यवदाम्नातत्वादनित्यैः काम्यनैमित्तिकैरसंबध्यमानं नित्याङ्गविषयमेवेति युक्तम्। एवं याजुर्वेदिकमुपांशुत्वमप्युदाहार्यम्। तथावभृथस्यापूर्वत्वात्तत्र प्राकृतस्वराप्राप्तेः सोऽपि स्वरविधिविषय इत्याहुः। तदेतद्याज्ञिका न संमन्यन्ते। मन्द्रत्वादयो ह्युचैस्त्वावान्तरधर्माः। उचैस्त्वमृक्सामवेदविहितमन्त्रेषु विहितम्। तच्च 'मन्द्रं प्रातःसवने स्तुवीरन्' 'मन्द्रं प्रातःसवने शंसति' इत्यादिभिः स्तुतशस्त्रेषु मन्द्रत्वादिरूपेण व्यवस्थाप्यते। इतरेषु तु परिसामादिषु हारियोजनीयप्रैषयाज्यादिषु चोचैस्त्वं यथाकथंचिद्भवति। एवं यजुर्वेदविहितेष्वाश्रुतप्रत्याश्रुतसंप्रैषादिषु परप्रत्यायनार्थतयार्थप्राप्तमुचैस्त्वम 'मन्द्रयाज्यभागान्तम्' इत्यादिविशेषेषु व्यवस्थाप्यते। तदितरेषु तु जपानुमन्त्रणादिमन्त्रेषु 'उपांशु यजुषा' इति व्यवतिष्ठते। एवं च मन्द्रादिविधीनां नापूर्वविधित्वमिति लाघवम्। एवं ज्योतिष्टोमदर्शपूर्णमासविकारेष्वपूर्वेषु च दर्वीहोमेषु यथायथमूह्यम्। वृत्तमधिकरणम्॥

ज्योतिष्टोमे वेदत्रयसमाम्नाते किमुचैस्त्वमुपांशुत्वं वेति संशये एकस्यैव शाखान्तराधिकरणन्यायेन वेदत्रयेऽपि विधिसंभवादनियम इति प्राप्ते, सिद्धान्तयति—

भूयस्त्वेनोभयश्रुति ॥ ९ ॥

उभयशब्दोऽनेकत्वपरः। अनेकस्मिन्वेदे श्रवणं यस्य तत् उभयश्रुति ज्योतिष्टोमकर्म भूयस्त्वेन विधिप्रतीतिपौष्कल्येन अस्मिन्नेव वेदे विहितमिति निर्धार्यम्। द्रव्यदेवतं यागस्य स्वरूपम्।

३. ज्योतिष्टोमस्य याजुर्वेदिकताधिकरणम्।

ततश्च सोमद्रव्यस्याभिषवादितद्धर्मसंयुक्तस्य इन्द्रवाय्वादिदेवतानां च यजुर्वेदे समाम्नानात्तत्रैव तद्विधिः। वेदान्तरे तु सोमद्रव्ययुक्तयजिमात्रश्रवणे[1] विधेयकर्मस्वरूपविशेषानवगमाद्विधिप्रतीतिपर्यवसानाभावान्न तत्र तद्विधिः। किंतु [2]स्तोत्रादिविधानाय तदनुवादमात्रमिति ज्योतिष्टोमाङ्गमन्त्रेषु याजुर्वेदिकस्वर उपांशुत्वम्। यत्र तु कर्मणि द्रव्यदेवतादि समस्तं वेदत्रये समाम्नातम्, यथाग्निहोत्रे, तस्यर्ग्वेदे ऐतरेयकौषीतकादिब्राह्मणे यजुर्वेदे च तैत्तिरीयादौ सामवेदे तलवकारीयादौ कृत्स्नाम्नानात्; एवंजातीयेषु कर्मसूचैस्त्वोपांशुत्वयोर्विकल्प इति भाष्यानुसारी पन्थाः। वार्तिकरीत्या विनियोगविधिवेदनिबन्धनत्वे तु ज्योतिष्टोमस्य याजुर्वेदिकत्वेऽपि तदङ्गमन्त्रेषु तत्तद्वेदस्वरप्राप्तेः तस्य याजुर्वेदिकत्वसाधने फलाभावात्सूत्रमिदमन्यत्र योज्यम्। तद्यथा। आधानमधिकृत्य सामवेदे श्रुतम् 'जातेऽग्नौ रथंतरं गायति'[3] इत्यादि, तथा यजुर्वेदे श्रुतम् 'रथंतरमभिगायते गार्हपत्य आधीयमाने' इत्यादि। तदेतदुभयश्रुति

1. श्रवणेन— घ. 2. स्तोत्रशस्त्रादि— घ. 3. गायन्ति... ख, घ.

उभयत्र श्रूयमाणं साम भूयस्त्वेन विधिप्रतीतिपौष्कल्येन हेतुना अन्यतरत्र विहितमिति निर्धार्यम् । सामान्यस्वरूपस्यानवगमे हि तद्विनियोगविधिर्न संभवति । तत्स्वरूपावगमश्च सामवेद एवेति तत्रैव तद्विधिः । यजुर्वेदे 'रथंतरमभिगायते गार्हपत्य आधीयमाने' इत्यादि तु सामवेदविहितरथंतरानुवादेन [1]कालान्तरविधिपरमिति न[2] तत्र तद्विधिः । ततश्चाधानाङ्गरथंतरादिसामसूत्रैस्त्वमेव ; यस्य तु मन्त्रस्य वेदद्वयेऽपि समाम्नानम्, विनियोगविधिश्चानन्यथासिद्धः, तत्रागत्या विकल्पः । वृत्तमधिकरणम् ॥

तदेवं श्रुतिलिङ्गवाक्यैर्विनियोगे निरूपिते प्रकरणेन विनियोगो निरूप्यते । 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इत्यत्र 'समिधो यजति' 'तनूनपातं यजति' इत्यादि श्रुतम् । तदेत-

४ प्रकरणस्य विनियोगाङ्गत्वाधिकरणम् ।

दर्शपूर्णमासाङ्गं न वेति संशयः । नाङ्गमिति ब्रूमः, श्रुतिलिङ्गवाक्यानामङ्गजकताधिकरणम् । तावोधकानामभावात् । न च प्रकरणादङ्गत्वमिति वाच्यम् । प्रकरणं हि किं संनिधिः, उत साकाङ्क्षत्वम्, अथवा प्रकाराकाङ्क्षत्वे सति संनिहितत्वम् । नाद्यः, 'गोदोहनेन पशुकामस्यापः प्रणयेत्' इत्यादिगुणकामानां दर्शपूर्णमासाङ्गत्वापत्तेः । न द्वितीयः । प्रयाजादिवाक्यानां दर्शपूर्णमासवाक्यस्य च स्वस्वार्थपर्यवसन्नत्वेन पदार्थविधयाकाङ्क्षाविरहात्, प्राकृताङ्गानां विकृत्यपेक्षितत्वेन तेषां विकृतिप्रकरणपरिग्रहापत्तावतिदेशोच्छेदापत्तेश्च । न तृतीयः । कथं यागेन कुर्यादिति कथंभावाकाङ्क्षाया अनुष्ठानमात्रेण शान्तेः । अनुष्ठानमेव हि यागस्य प्रकारः । अनुष्ठितस्यैव फलसाधकत्वात् । अनुष्ठानस्य च लोकतो विज्ञातत्वान्नास्त्यपेक्षा । ननु समिदादिवाक्यं फलाकाङ्क्षम् ; प्रकारविशेषसमर्पणमेव फलम् ; तदाकाङ्क्षावशाच्च दर्शपूर्णमासवाक्यस्याप्याकाङ्क्षोत्तिष्ठतीति चेन्न । विश्वजिन्न्यायेन स्वर्गफलकल्पनया वा, रात्रिसत्रन्यायेन 'यत्प्रयाजानूयाजा इज्यन्ते वर्मैव तद्यजमानाय क्रियते वर्म यजमानाय' इत्याद्यार्थवादिकफलकल्पनया वा, दर्शपूर्णमासवाक्यगतस्वर्गपदानुषङ्गेण वा समिदादिवाक्यानां फलाकाङ्क्षाशान्त्या तद्वशेन दर्शपूर्णमासवाक्ये प्रकाराकाङ्क्षानुत्थानात् । न च प्रकारतया प्रयाजाद्यनाकाङ्क्षायामपीतिकर्तव्यतात्वेन तदाकाङ्क्षासंभव इति वाच्यम् । इतिकर्तव्यतात्वं हि यागेन फले जननीये सहकारित्वं वा, करणजन्यत्वघटितावान्तरव्यापारत्वं वा । नाद्यः, एकेन प्रधानेन फले जननीये प्रधानान्तरस्यापि सहकारित्वेनाङ्गतयातिदेशापत्तेः । न द्वितीयः, प्रयाजादिष्वभावात् । न हि प्रयाजादयो यागेन प्रधानेन जन्यन्ते । अतो नास्ति प्रकरणं नाम प्रमाणान्तरमिति प्रयाजादीनां न दर्शपूर्णमासाङ्गत्वमिति प्राप्ते, सिद्धान्तयति—

असंयुक्तं प्रकरणादितिकर्तव्यतार्थित्वात्[3] ॥ १० ॥

श्रुत्याद्यसंयुक्तमपि प्रयाजादिकं प्रकरणाद्दर्शपूर्णमासाङ्गतां भजते । प्रकरणादित्यस्य व्या-

1. कालान्तरादि—क, ग, घ. 2. नञ् एष मातृकासु न दृश्यते. 3. ...तार्थत्वात्.

ख्यानमितिकर्तव्यतार्थत्वादिति। करणगतशक्त्याधायको व्यापार इतिकर्तव्यता। तामर्थयतेऽपेक्षते यत्तदितिकर्तव्यतार्थि तस्य भावस्तत्त्वम्। दर्शपूर्णमासाभ्यां फलं साधयेत् कथम्? इत्याकाङ्क्षायामश्रुतप्रयोजनानि प्रयाजादिकर्माणि पठितानि। तत्र करणभूतानां यागानामस्ति शक्तिजननाख्यानुग्रहापेक्षा। अशक्तस्य कोमलदण्डस्य करणत्वाभावात्। सा च जन्यवृत्तिश्चेज्जन्यत इत्युत्सर्गः। अग्नेर्दाहजनकताशक्तौ कर्मणः संयोगजनकताशक्तौ चोत्पादकसामग्र्यभावादनादिता। एवं च यागानामपि करणानामस्ति शक्त्याधायकसामग्र्यपेक्षा, प्रयाजादीनां च साध्यापेक्षा। तदुभयाकाङ्क्षावशादेवं ज्ञायते—दर्शपूर्णमासयागोऽयं शक्तिजननरूपमनुग्रहमाकाङ्क्षति; स नूनमेभिः प्रयाजादिभिः क्रियते; यच्च प्रयाजादयः प्रयोजनमपेक्षन्ते तदेतद्यागानुग्रहरूपमिति। तस्मान्नष्टाश्वदग्धरथन्यायेन प्रयाजादिवाक्यानां दर्शपूर्णमासवाक्यस्य च परस्परमभिसंबन्धः सिद्धः। तदेवं संभवत्युभयाकाङ्क्षालक्षणसंबन्धेऽन्यतराकाङ्क्षालक्षणः संबन्धो न परिग्रहीतुं युज्यत इति विश्वजिदादिवत्फलान्तरकल्पनं न शक्यमाश्रयितुम्। नापि दर्शपूर्णमासवाक्यगतफलानुषङ्गः; अन्यत्रान्वयेन शान्ताकाङ्क्षफलस्यात्र संबन्धकाभावाच्च। न चैवम् 'समिधो यजति' 'तनूनपातं यजति' इत्येवं प्रयाजाद्यनुगृहीतयागैः स्वर्गं कुर्यादित्यनेकाख्यातैकवाक्यत्वस्य 'येन कर्मणेर्त्सेत्तत्र जयाज्जुहुयात्' इत्यादिवच्छब्दाद्युपबन्धाभावेन प्रत्यक्षतोऽनवगमात्तत्कल्पनेऽपि गौरवं तुल्यमिति वाच्यम्। फलान्तरकल्पनापेक्षया एवमेकवाक्यत्वकल्पनस्य लघीयस्त्वात्। अन्यथा अनुग्रहाकाङ्क्षा क्रतोरनिवृत्तैव स्यात्। तत्सिद्धं प्रकरणं नाम चतुर्थं विनियोजकप्रमाणमिति वार्तिककृतः। शास्त्रदीपिकायां तु—'अननुगृहीतस्यापि कर्मणः संयोगारम्भकत्वदर्शनान्नानुग्रहाकाङ्क्षा प्रकरणम्; किंतु सामान्यात्मना व्यापार एवार्थभावनात्मा आख्यातेनाभिधीयते; तद्विशेषापेक्षैवेतिकर्तव्यताकाङ्क्षा; प्रयाजादीनां चाभेदसंबन्धेन विशेषणतया भावनायामन्वयः; इदमेव च प्रकरणम्; तथा च प्रयाजादिरूपा स्वर्गभावनेति वचनव्यक्तिः' इत्युक्तम्। एवं तर्हि यागस्य भावनायां कथं करणत्वेनान्वयः। भावना हि प्रयाजादिरूपा पर्यवसन्ना। तस्यां च यागस्य करणत्वं नाम न तावत्साधकतमत्वम्। असंभवात्। न हि प्रयाजादिव्यापारो यागजन्यः। यत्तु—'कुठारेण च्छिनत्ति' इत्यत्रोद्यमननिपतनादिव्यापारो न कुठारं प्रत्युद्यमनत्वादिरूपेण साध्यः; कुठारोऽपि न तत्र स्वरूपेण साधनम्, वैयर्थ्यात्; किंतु द्वैधीभावजननसामर्थ्यरूपाभिघाताद्यतिशयविशिष्टतया कुठार उद्यमननिपतनादिव्यापारे द्वैधीभावानुकूलव्यापारात्मनि करणं संपद्यते; ततश्च द्वैधीभावानुकूलव्यापारे उद्यमनादौ कुठारः करणमित्युक्ते 'सविशेषणे हि—' इति न्यायेन द्वैधीभावनिष्पत्तौ कुठारः करणमिति पर्यवस्यति; एवम् 'यजेत स्वर्गकामः' इत्यत्रापि दृष्टादृष्टोपकारविशिष्टतया यागस्यावघातप्रयाजादिरूपे कर्तृव्यापारे स्वर्गानुकूलव्यापारत्वरूपापन्ने साधनत्वम् 'सविशेषणे हि—' इति न्यायेन स्वर्गोत्पत्तौ पर्यवस्यति; एतन्मूलक एव भावनाभाव्यनिर्वर्तकत्वं करणत्वमिति प्रवाद इति। तदयुक्तम्। एवं सति प्रयाजादिरूपा याग-

करणिका स्वर्गभावनेत्येवं करणस्य यागस्य प्रयाजादिव्यापारस्य च परस्परवार्तानभिज्ञतयैव भावनान्वयापत्तौ यागवत्प्रयाजादिव्यापारस्यापि प्राधान्यापत्तेः; तस्यैव भावनात्वात्, फलस्य भावनाभाव्यत्वात् फलसाधनस्यैव च प्रधानत्वात्। न च करणान्वयद्वारा प्रयाजादिव्यापारस्य भावनान्वयाभ्युपगमेऽनुक्तदोष इति वाच्यम्। करणेऽनुग्रहाकाङ्क्षायाः कर्मादौ व्यभिचारोपन्यासेनानभ्युपगमात्। न च करणस्य यागस्यानुग्रहाकाङ्क्षाविरहेऽप्युद्यमनादिव्यापारस्य कुठारादिकरणानुग्रहमुखेनैव फलोत्पादकत्वदर्शनात्प्रयाजादिव्यापारस्यापि करणानुग्रहमुखेनैव फलभावनान्वयस्य वाच्यतया, अन्यतराकाङ्क्षयैव करणभूतयागानुग्रहमुखेन स्वर्गभावनान्वयान्न प्रयाजादीनां यागवत्प्राधान्यसंभव इति वाच्यम्। फलाकाङ्क्षाणां प्रयाजादीनां फलभावनायामभेदेनान्वये सति फलाकाङ्क्षायाः शान्तत्वेन तेषां करणाकाङ्क्षाया असिद्धेः। किंचैवं यदि प्रयाजाद्यनुगृहीतयागकरणिका स्वर्गभावनेति वचनव्यक्तिः, तर्हि भावनायामभेदसंबन्धेन विशेषकत्वं प्रयाजादीनामभ्युपगतं व्याहतं स्यात्। यदि च यागानुग्राहकप्रयाजादिरूपा फलभावनेति वचनव्यक्तिः, एवमपि यागानुग्राहकत्वमवघातप्रयाजादीनां दृष्टादृष्टोपकारवत्तया यागनिष्पादकत्वमेव वाच्यम्। एवं च यागः स्वर्गश्च प्रयाजादिव्यापारात्मकभावनायाः साध्यः स्यात्। न चैवं संभवति, प्रयाजादिव्यापारेण यागं कुर्यात्स्वर्गं कुर्यादिति वाक्यभेदप्रसङ्गात्। अत एव 'यागविषयैव कृतिः शब्देनोच्यते' इति प्राभाकरमतमुद्भाव्य—'विषयत्वं न साध्यत्वम्। स्वर्गो ह्यत्र साध्यतया संबध्यते, न तु यागोऽपि। न ह्येवं संभवति स्वर्गं यागं कुर्यादिति' इति स्वयं दूषितमुपपद्यते। एतेन प्रयाजत्वादिविशेषरूपेण यागानुग्राहकता, व्यापारसामान्यात्मना फलभावनात्मकतेत्यादिशिष्यदन्धनमपि निरस्तम्। प्रयाजत्वादिविशेषरूपापन्नेन व्यापारेण यागम्, व्यापारसामान्यात्मना च स्वर्गं साधयेदिति वाक्यभेदात्। एतदपेक्षया करणभूतयागस्यानुग्रहाकाङ्क्षामुक्तरीत्यानुसृत्य प्रयाजाद्यतिरिक्तां फलभावनां चाख्यातवाच्यामङ्गीकृत्य तस्यां यागानुग्रहमुखेन प्रयाजादिव्यापारस्य भेदेनैवान्वयोऽभ्युपगन्तव्यः। प्रयत्न एव हि फलभावना आख्यातेनाभिधीयते। पचति पाकं करोतीति विवरणात्करोतेर्यत्नार्थकत्वात्। न च तस्य यतिवदकर्मकत्वं शङ्कयम्। शब्दशक्तिस्वाभाव्यादुत्पत्त्यनुकूलयत्नत्वेन तद्वाचकत्वाद्वा। न चैवं सति सर्वेषां सकर्मकत्वापत्तिः। इष्टापत्तेः। पचति पाकं करोति, आस्ते आसनं करोति, शेते शयनं करोति, इत्यादिविवरणेन धात्वर्थस्यैव कर्मत्वात्। अत एव किं करोतीति प्रश्ने 'आस्ते' 'शेते' इत्युत्तरमुपपद्यते। 'सुखकाम आसीत' 'स्वास्थ्यकामः शयीत' 'ओदनं पचति' इत्यादौ तु साध्यत्वगमककमितिपदद्वितीयाविभक्त्यादिसमभिव्याहाराद्धात्वर्थः करणत्वमापद्यते। तदुक्तं वार्तिके 'करोतेः सर्वदा सकर्मकत्वादकर्मकाख्यातानामपि किं करोत्यास्ते शेत इति तत्सामानाधिकरण्यदर्शनात्सिद्धैवमादिष्वपि सकर्मिका भावना' इत्यादि। कस्तर्हि सकर्मकाकर्मकयोर्भेद इति चेत्सोऽपि वार्तिके विवेचितः 'साक्षादव्यभिचारेण धात्वर्थो यत्र कर्मभाक्। सकर्मकः स धातुः

स्यात्पारम्पर्ये त्वकर्मकः' इति। विवृतं चेदं तत्रैव 'आसनशयनादीनां न नियमेन आनन्तर्येण वा इदं तदिति वा कर्म निरूप्यते। तेनाकर्मका इत्यभिधीयन्ते। पचिगम्यादीनां तु विच्छिन्नसंयुज्यमानादिसाक्षात्संबन्धिकर्माव्यभिचारित्वात्सकर्मकत्वम्' इत्यादि। विस्तरस्तु वार्तिककौस्तुभादिग्रन्थेषु ज्ञेयः। वृत्तमधिकरणम्॥

अथ क्रमप्रमाणं निरूप्यते। दर्शपूर्णमासयोः आग्नेयादिप्रधानानि येन क्रमेणाम्नातानि, तेनैव क्रमेण 'अग्नेरहं देवयज्ययान्नादो भूयासम्' इत्यादयो हुतानुमन्त्रणमन्त्रा आम्नाताः।

'९. क्रमस्य विनियोजकत्वाधिकरणम्।

तत्र उपांशुयाजक्रमे 'दध्निरस्यदब्धो भूयासम्' इति हुतानुमन्त्रणमन्त्रः आम्नातः। स किमुपांशुयाजाङ्गमुताग्नेयादिसर्वप्रधानाङ्गमिति संशयः। सर्वाङ्गमिति ब्रूमः। श्रुतिलिङ्गयोर्विशेषकयोरभावात्, प्रकरणस्य चाविशेषात्। यत्र क्वचित्पठितव्यस्यास्य मन्त्रस्य तत्र पाठ इत्येतावन्मात्रेण क्रमस्य चोपपत्त्या तस्य नियामकत्वाभावात्। तथा च 'अग्नेरहं देवयज्यया' इत्यादिमन्त्राणां दध्निमन्त्रस्य च विकल्प इति प्राप्ते, सिद्धान्तयति—

क्रमश्च देशसामान्यात्[1]॥ ११॥

क्रमश्च विनियोजकः। कुतः। देशसामान्यात्। उपांशुयाजविधेर्दध्निमन्त्रस्य च स्थानसाम्यात्। यत्र [2]क्वचित्पठितव्यस्य तत्र पाठ इत्यभ्युपगमे क्रमपाठस्यादृष्टार्थत्वापत्तिः। शक्नोति च क्रमोऽपि विनियोक्तुम्। पुरुषो हि प्रथमस्य प्रधानस्य मन्त्रमन्विच्छन्मन्त्रसमाम्नायमादितः पर्यालोचयति। तत्र प्रथममन्त्रः प्रथमं हृदयमागच्छति। न चास्यातिक्रमे हेतुरस्तीति स एव गृह्यते। तथा मन्त्रस्यापि शेषिणमपेक्षमाणस्य प्रथमेन शेषिणा सह संबन्धो भवति। ततश्च तन्निराकाङ्क्षतया द्वितीयादीनामप्येवमेव द्वितीयादिभिः संबन्धेन भवितव्यम्। एवं च क्रमेण समाम्नायः आकाङ्क्षालक्षणं प्रकरणं कल्पयित्वा तद्द्वारा च वाक्यलिङ्गश्रुतीः कल्पयित्वा शक्नोत्यङ्गत्वं बोधयितुमिति भवति क्रमोऽपि विनियोगे प्रमाणम्। न च क्रमाद्बलवता प्रकरणेन दध्निमन्त्रस्य सर्वार्थतैव स्यादिति वाच्यम्। आग्नेयादीनाम् 'अग्नेरहं देवयज्यया' इत्यादिमन्त्रान्तरावरुद्धत्वेन तस्य सर्वार्थत्वासंभवात्। विकल्पस्य चाष्टदोषदुष्टत्वात्। कृताकृतप्रत्यवेक्षणार्थत्वेन समुच्चयस्यानुपपत्तेः। अदृष्टार्थत्वेऽपि 'अग्नेरहम्' इत्यादिविशेषलिङ्गैर्मन्त्रैः कृतार्थेनाग्नेयादिप्रधानजातेनानपेक्षितस्य दध्निमन्त्रस्य सत्यां गतौ तैः समुच्चययोगात्। अस्ति ह्युपांशुयाजस्तस्य गतिः। तस्मादध्निमन्त्र उपांशुयाजाङ्गम्। न च 'लिङ्गक्रमसमाख्यानात्' इत्यत्र क्रमादस्य विनियोग उक्त इति मन्तव्यम्। अत्रोपपादितस्य क्रमस्य तत्र लिङ्गविनियोगेऽपेक्षितत्वमात्रप्रतिपादनात्। वृत्तमधिकरणम्॥

---

1. ...साम्यात् 2. क्वापि—क, ग, घ.

दर्शपूर्णमासयोः शास्त्राच्छेदनादयः पदार्था आध्वर्यवसमाख्याताः सन्ति। ते किमध्वर्युणैव कर्तव्या उत येन केनचिदिति संशयः। नियामकश्रुत्याद्यभावाद्येनकेन चिदिति ब्रूमः। न चाध्वर्योरिदमाध्वर्यवमिति समाख्यया कर्तृविशेषलाभ इति वाच्यम्। अध्वर्योः पदार्थानां च समाख्यया संबन्धमात्रावगमेऽप्यमी पदार्था अनेन कर्तव्या इति विध्यभावेन कर्तृनियमासिद्धेः। प्रथमतः पुरुषः संबन्धं ज्ञात्वा समाख्यां प्रवर्तयति, प्रवर्तकस्य च पुरुषस्य संबन्धबोधने समाख्यैव प्रमाणमित्यन्योन्याश्रयाच्च। तस्मान्न समाख्या विनियोजिकेति प्राप्ते, सिद्धान्तयति—

६. समाख्याया विनियोजकताधिकरणम्।

[1]आख्या चैवं तदर्थत्वात् ॥ १२ ॥

क्रमो यथा विनियोजयत्येवं समाख्यापि विनियोजिका। कुतः। तदर्थत्वात् कर्तृविशेषसमर्पणार्थत्वात्। यत्तु समाख्यया संबन्धमात्रमवगम्यते न त्वनेन कर्त्रेदं कर्तव्यमिति विनियोग इति, तन्न। विहितस्याध्वर्योः प्रयोजनापेक्षायां समाख्यावगतसंबन्धेन शास्त्राच्छेदनादिपदार्थोपस्थितेः, पदार्थानां च कर्त्रपेक्षायां तेनैव संबन्धेनाध्वर्यूपस्थितेः, मिथ उपस्थितानां च तेषां परस्परसंबन्धस्य योग्यतावशात्क्रियाकर्तृभावलक्षणतया सिद्धस्य प्रयोगविधिपरिग्रहात्। समाख्या चानादिः, संकेतयितुरस्मरणात्। तदुक्तम् 'लौकिकं वैदिकं वापि प्रमाणं दोषवर्जितम्। सर्वमाश्रीयते स्वार्थे न चास्मिन्दोषसंभवः' इति। अतो गवादिशब्दानां संकेतग्रह इवात्रापि न परस्पराश्रयप्रसक्तिः। वृत्तमधिकरणम् ॥

उक्तानि श्रुत्यादिषड्विधविनियोजकप्रमाणानि। अधुना तेषां बलाबलविचारः प्रस्तूयते। तत्रेदं सूत्रम्—

श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात् ॥ १३ ॥

श्रुतिलिङ्गयोर्लिङ्गवाक्ययोर्वाक्यप्रकरणयोः प्रकरणस्थानयोः स्थानसमाख्ययोरित्येवं प्रमाणानां समवाये संनिपाते सति परस्योत्तरोत्तरप्रमाणस्य दौर्बल्यं प्रत्येतव्यम्। अर्थस्य विनियोगस्य पूर्वपूर्वश्रुत्यादिकल्पनेन विप्रकर्षात् व्यवहितत्वादित्यर्थः। समवायशब्देन च विरोधाधायक एकविषयसंनिपातो विवक्षितः। एवं च 'अरुणया क्रीणाति' इत्यत्र श्रुतिवाक्यप्रकरणानां त्रयाणामपि विनियोजकता न विहन्यते। आरुण्यस्य तृतीयाश्रुत्या क्रियासामान्यं प्रति शेषत्वं गम्यते। क्रीणातिसमभिव्याहारलक्षणवाक्येन च क्रयरूपक्रियाविशेषं प्रति, प्रकरणेन च ज्योतिष्टोमापूर्वसाधनतापन्नं प्रति, इत्येवं भिन्नविषयत्वेन विरो-

७. श्रुतिप्राबल्याधिकरणम्।

1. समाख्या...

धाभावात्। न हि वाक्यावगतः क्रयरूपक्रियाविशेषसंबन्धस्तावत्तृतीयाश्रुत्यावगतं क्रियासामान्यसंबन्धं विरुणद्धि; प्रकरणावगताक्रयस्यापूर्वसाधनतापि न क्रयरूपक्रियाविशेषसंबन्धम्। न चैकैकस्य पञ्चभिः सह बलाबलविचारस्य कर्तव्यत्वात्किमेकैकेन सह क्रियत इति शङ्कयम्। यानि वाक्यादीनि श्रुत्यादिबाध्यैः पूर्वपूर्वलिङ्गादिभिर्बाध्यन्ते तानि लिङ्गादिबाधकैः श्रुत्यादिभिर्बाध्यन्त इत्यनुक्तसिद्धम्। बाधितबाध्यस्य बाधकबाधकेन सुतरां बाध्यत्वात्। तत्र प्रथमं तावच्छ्रुतिलिङ्गयोर्विरोधे चिन्त्यते— किं लिङ्गं श्रुतिश्चेत्युभयं तुल्यबलम्, उत लिङ्गं बलीयः, अथ श्रुतिरेव बलीयसीति अविशेषात्तुल्यबलत्वम्। ततश्च 'ऐन्द्र्यागार्हपत्यमुपतिष्ठते' इत्यत्र मन्त्रस्थेन्द्राभिधानसामर्थ्याद्गार्हपत्यमित्यस्येन्द्रलक्षकतयेन्द्रोपस्थाने लैङ्गिको विनियोगः; 'ऐन्द्रया गार्हपत्यम्' इति श्रुत्या इन्द्रपदघटिताया ऋचो गार्हपत्यस्य च शेषशेषिभावेऽवगते मन्त्रे इन्द्रशब्दस्य गार्हपत्यपरतया गार्हपत्य एव मन्त्रेणोपस्थेय इति श्रौतो विनियोगः— इति विकल्पः। न च विनियोगे लिङ्गस्य श्रुतिकल्पनापेक्षा विद्यते। सामर्थ्यपर्यालोचनमात्रादेव साक्षाद्विनियोगसिद्धेः। अथवा गार्हपत्य इन्द्रश्चोपस्थेय इति समुच्चयोऽस्तु, द्वयोरुपस्थानस्य युगपदशक्यत्वेऽपि मन्त्रस्यावृत्त्या उभयत्र प्रयोगसंभवात्, प्रतिप्रधानं गुणावृत्तेर्न्याय्यत्वात् समुच्चयसंभवे च श्रुतिबलीयस्त्वेऽपि लिङ्गबाधो न युज्यते, विरोधाभावात्। यद्वा अशक्यस्य श्रुतिसहस्रेणापि विनियोक्तुमशक्यत्वेन विनियोज्यशक्त्यनुसारेणैव श्रुतेर्विनियोजकत्वस्य वाच्यतया श्रुतिविनियोगेऽपि लिङ्गस्योपजीव्यतया प्रबलत्वाल्लैङ्गिकेन्द्रोपस्थानविनियोग एव युक्त इति पूर्वः पक्षः॥ सिद्धान्तस्तु— श्रुतिविनियोगे लिङ्गस्योपजीव्यत्वमसिद्धम्। श्रौतविनियोगेऽवगतेऽशक्तस्य विनियोगानुपपत्त्या पश्चात्तन्निर्वाहमात्रे शक्तेर्व्यापारात्। न चात्र श्रौतविनियोगस्यानिर्वाहः। 'वचनात्त्वयथार्थमैन्द्री स्यात्' इत्यधिकरणे 'गुणाद्वाप्यभिधानं स्यात्संबन्धस्याशास्त्रहेतुत्वात्' इति गुणसूत्रेण मन्त्रगतेन्द्रशब्दो हविःश्रपणेशितृत्वादिगुणयोगेन गार्हपत्यमभिधत्त इत्येवं गौणसामर्थ्येन श्रौतविनियोगनिर्वाहस्योक्तत्वात्। अतो न लिङ्गस्य श्रुत्यपेक्षया बलवत्त्वम्। नापि तयोः समानबलत्वम्। प्रथमतो हि मन्त्रतोऽर्थं प्रत्येति। ततस्तस्य प्रयोजनमाकाङ्क्षन्निन्द्रोपस्थाने मन्त्रः सामर्थ्यसत्त्वाद्विनियोक्तुं युज्यत इति सामर्थ्यं पर्यालोच्य तस्मादेव मन्त्रस्येन्द्रशेषत्वप्रत्यायिकां श्रुतिं कल्पयति, शेषत्वस्य विध्येकगम्यत्वात्। ततश्च लैङ्गिको विनियोगो विलम्बते। श्रौतो विनियोगस्तु प्रत्यक्षश्रुत्या झटिति प्रवर्तते। ततश्च लिङ्गविनियोगस्य श्रुतिकल्पनया विप्रकर्षान्न श्रुतिलिङ्गयोस्तुल्यबलत्वम्। न च लिङ्गोपस्थापितसाध्यसाधनभावस्य प्रयोगविधित एव विध्युपपत्तौ किं पृथग्विधिकल्पनयेति वाच्यम्। अङ्गस्यैव सतः प्रयोगविधिपरिग्रहः। न चाविहितमङ्गं भवति। ततश्च प्रयोगविधिपरिग्रहसिद्ध्यर्थमेव प्रातिस्विकविधिः कल्पनीयः। स च प्रत्ययमात्रस्य तद्घटितपदमात्रस्य चाप्रामाण्यात् 'इदमनेन कुर्यात्' इति कल्प्यते इत्यन्यदेतत्। न चैवमपि श्रुतिप्रवृत्तिदशायां लिङ्गस्याप्रवृत्त्या कथं तस्य श्रुत्या बाध इति वाच्यम्। बह्वौष्ण्यप्रत्यक्षेण प्रथमप्रवृत्तेन पश्चात्प्रवृत्ततदनुष्णत्वानुमानस्येव लिङ्गस्यापि प्रथमप्रवृ-

तया श्रुत्या बाधसंभवात् । यच्च विरोधाभावात्समुच्चय इति तन्न । विषयापहारलक्षणविरोधाभावेऽपि श्रुतेर्लिङ्गप्रवृत्तिप्रयोजकाकाङ्क्षाविच्छेदकतया विरोधसत्त्वात् । लिङ्गं ह्याकाङ्क्षितमेव मन्त्रं विनियोक्तुमुद्युङ्क्ते । मन्त्राकाङ्क्षा च प्रत्यक्षश्रुत्या गार्हपत्ये विनियोगादेव शान्तेति लिङ्गस्य प्रवृत्तिप्रतिबन्धाकस्ति श्रुत्या विरोध इति न समुच्चयावकाशः । स्यादेतत् । श्रुतिलिङ्गयोरत्र विरोध एव नास्ति । द्वितीयाश्रुत्या हि गार्हपत्यस्य प्राधान्यम्, तृतीयया चैन्द्र्याः शेषत्वमवगतम् । ऐन्द्रीं प्रति गार्हपत्यस्य प्राधान्यं गार्हपत्यं प्रति चैन्द्र्याः शेषत्वमित्यन्वयस्तु पदान्तरसमभिव्याहाररूपवाक्यगम्यः । तत्र यच्छ्रुत्युपात्तमनिर्धारितविशेषं शेषशेषित्वं न तल्लिङ्गेन विरुध्यते । लिङ्गान्मन्त्रस्यैन्द्रार्थत्वे सत्यपि श्रुत्युपात्तसामान्यरूपस्य गार्हपत्यप्राधान्यस्य कांचिदाग्नेयीं प्रति, ऐन्द्र्याः शेषत्वस्य चेन्द्रं प्रति संभवात् । परस्परनिरूपितं शेषशेषित्वं यद्वाक्यगम्यं तत्परं लिङ्गेन विरुध्यत इति लिङ्गवाक्ययोरेवात्र विरोधः न तु श्रुतिलिङ्गयोरिति चेत् । न[1] । अस्ति ह्यत्र श्रुत्युक्तसामान्यरूपशेषशेषिभावस्यापि लिङ्गेन विरोधः । न हि 'गार्हपत्यम्' इति श्रुत्युक्तशेषित्वसामान्यमाग्नेयीविषयं भवितुमर्हति; न वा 'ऐन्द्र्या' इति श्रुत्युक्तशेषत्वमपीन्द्रविषयम् । किंतु तद्व्यतिरिक्तविषयमेव । अन्यथा गार्हपत्ये आग्नेयीशेषित्वस्य ऐन्द्र्यामिन्द्रशेषत्वस्य च लिङ्गादेव प्राप्तत्वेन वचनानर्थक्यात् । वाक्यविरोधहेत्वभावादपि श्रुतिलिङ्गविरोध एवायम् । विरोधस्थले हि प्रबलेन दुर्बलस्यावश्यं बाधो वाच्यः । ययोश्च प्रबलदुर्बलयोर्बाध्यबाधकभावो भवति तयोरेव विरोधो नान्ययोः । प्रकृते न च लिङ्गेन वाक्यं शक्यते बाधितुम् । तद्बाधे पृथग्भूतयोरैन्द्रीगार्हपत्यपदयोः कस्याप्यर्थस्याप्रतिपादकत्वात्पदमात्रस्याप्रामाण्यात् । एवं चात्र लिङ्गेन वाक्यस्यात्यन्तबाधे सति श्रुतिवाक्ययोरुभयोरप्यप्रामाण्यापत्तौ तत्सामान्यात्कृत्स्नवेदाप्रामाण्यापत्तेर्न वाक्यस्य बाधसंभव इति न लिङ्गवाक्ययोर्विरोधः । 'स्योनं ते सदनं करोमि' इत्यत्र तु वाक्यबाधेऽपि तदवयवयोः पृथग्भूतयोरपि स्वस्वार्थप्रतिपादनसंभवेनाप्रामाण्याभावाद्भवति लिङ्गवाक्योदाहरणमिति वक्ष्यते । प्रकृते लिङ्गेन श्रुतिबाधेऽपि न तदप्रामाण्यम् । लिङ्गान्मन्त्रस्येन्द्रशेषत्वे सति 'गार्हपत्यम्' इत्यस्य श्रुतार्थपरित्यागेऽपि गौण्या अर्थान्तरप्रामाण्योपपत्तेः । तथा च लिङ्गस्य बलीयस्त्वे तेन श्रुतिर्बाधितुं शक्यते इति श्रुतिलिङ्गविरोध एवायमिति दिक् । वृत्तं श्रुतिलिङ्गाधिकरणम् ॥

८ वाक्यापेक्षया लिङ्गस्य प्राबल्याधिकरणम् ।

अथ लिङ्गवाक्ययोर्विरोधे चिन्त्यते । अस्ति दर्शपूर्णमासयोर्मन्त्रः 'स्योनं ते सदनं करोमि, घृतस्य धारया सुशेवं कल्पयामि, तस्मिन्त्सीदामृते प्रतितिष्ठ, व्रीहीणां मेध सुमनस्यमानः' इति । हे पुरोडाश, ते तव स्योनं सुखहेतुं सदनं स्थानं करोमि । घृतस्य धारया सुशेवं सुखशयनयोग्यमाधारं कल्पयामि । तस्मिन्त्सदने हे व्रीहीणां मेध सारभूत, सुमनस्यमानः प्रीयमाणः अमृते शाश्वते स्थाने तस्मिन्

1. अनेदं न दृश्यते—क, ग, घ.

प्रतितिष्ठ स्थिरो भवेत्यर्थः । तत्र किं लिङ्गाद्वाक्यं बलीयः, उतोभयं तुल्यबलम्, अथवा लिङ्गमेव बलीय इति संशयः । पदानां सहप्रयोगमात्रेणार्थबोधमनपेक्ष्य प्रथमतः प्रतीयमानत्वाद्वाक्यमेव बलीयः । अन्यथा 'देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नये जुष्टं निर्वपामि' इत्यत्र सवित्रादिपदानामेकवाक्यत्वानुसारेण निर्वापप्रशंसार्थकत्वानुपपत्तेः । ततश्च 'स्योनं ते' इति पूर्वभागस्य 'तस्मिन्त्सीद' इत्युत्तरभागस्य चैकवाक्यतया प्रतिष्ठापने विनियोगः । एकवाक्यतया सदनकरणपूर्वकप्रतिष्ठापनस्य मन्त्रप्रतिपाद्यत्वात् । न तु लिङ्गात्पूर्वभागस्य सदनकरणे उत्तरभागस्य च प्रतिष्ठापने इति विभज्य विनियोगः । संभवत्येकवाक्यत्वे वाक्यभेदस्यान्याय्यत्वात्, लिङ्गाद्विभज्य प्रयोगे उत्तरभागे 'तस्मिन' इत्यस्य पूर्वोक्तसापेक्षत्वेनाबोधकत्वापाताच्च । ननु तत्र प्रकरणे सवित्रादिदेवतानामभावात्सवित्रादिपदानां पृथग्भावे सत्यानर्थक्यापत्त्या निर्वापप्रशंसार्थत्वं स्वीक्रियते । नैतावता लिङ्गाद्वाक्यप्राबल्यमायाति । प्रकृते हि पृथग्भूतयोरपि पूर्वोत्तरभागयोर्नानर्थक्यम् । तयोः स्वार्थप्रतिपादनसंभवात्, 'तस्मिन' इति सर्वनामाकाङ्क्षाया वाक्यान्तरोपस्थितिमादाय शान्तेश्च । पुरुषसूक्ते 'तस्माद्विराडजायत' इति मन्त्रगतत्च्छब्दवत् । 'ऋताषाडृतधामाग्निर्गन्धर्वस्तस्यौषधयोऽप्सरस ऊर्जो नाम स इदं ब्रह्मक्षत्रं पातु ता इदं ब्रह्मक्षत्रं पान्तु तस्मै स्वाहा ताभ्यः स्वाहा' इत्यादिराष्ट्रभृन्मन्त्रेषु 'ताभ्यः स्वाहा' इतिवच्च । तत्र हि तच्छब्दः 'तस्यौषधयोऽप्सरस ऊर्जो नाम ता इदं ब्रह्मक्षत्रं पान्तु' इति पूर्वपूर्वमन्त्रोपात्ता अप्सरसः परामृशति । न च तत्र 'ऋताषाडृतधामाग्निर्गन्धर्वः स इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा' 'तस्यौधयोऽप्सरस ऊर्जो नाम ता इदं ब्रह्मक्षत्र पान्तु ताभ्यः स्वाहा' इति यथालिङ्गं स्त्रीवाचकशब्दानां विनिष्कृष्यैव प्रयोग इति वाच्यम् । एवमपि 'तस्य' इति तच्छब्दस्य पूर्वपूर्वमन्त्रोपात्ताग्न्यादिसाकाङ्क्षत्वात् । संकर्षकाण्डे 'ऋताषाडृतधामेति यथार्थविनिष्कर्षोऽर्थपृथक्त्वात्' इति पूर्वपक्षयित्वा, 'यथासमाम्नानं वा' इति सूत्रेण यथामन्त्रपाठमेव व्यतिषक्ततया पूर्वपूर्वमन्त्रस्य प्रयोगः, 'ताभ्यः स्वाहा' इति सर्वनाम्नः पूर्वपूर्वमन्त्रव्यतिषक्तस्त्रीवाचकपदान्तरोपस्थितिमादायाकाङ्क्षाशान्तेरिति सिद्धान्तयिष्यमाणत्वाच्च । ततश्च प्रकृतेऽपि यथालिङ्गं विभज्य विनियोगोऽस्विति चेत्तर्हि मा भूद्वाक्यं लिङ्गाद्बलीयः । विनिगमनाविरहादुभयं तुल्यबलमस्तु । उभयोरपि श्रुतिकल्पनामुखेनैव विनियोजकत्वाविशेषात्पूर्वोत्तरभागसमभिव्याहारात्मकवाक्यप्रमाणेनापि मन्त्रस्य सदनं प्रतिष्ठापनं च प्रति साध्यसाधनभावप्रतीत्या श्रुतिकल्पनायास्तत्राप्यवश्यंभावात् । एवं च सकलस्य सदने प्रतिष्ठापने च, अथवा विभज्य सदनकरणे पूर्वभागस्य प्रतिष्ठापन उत्तरभागस्य विनियोग इति पूर्वः पक्षः ॥ सिद्धान्तस्तु— यद्यप्युभयोरपि श्रुतिकल्पनापेक्षा, तथापि श्रुतिकल्पेन तस्मिँल्लिङ्गस्यास्ति संनिकर्षः, वाक्यस्य तु विप्रकर्षः । सर्वमपि हि विनियोजकं प्रमाणं विनियोज्यसामर्थ्यानुसारेण विनियुङ्क्ते । विनियोज्यसामर्थ्ये च पर्यालोच्यमाने पृथग्भावस्य सदनकरण एव सामर्थ्यं प्रत्यक्षमवगम्यते । ततश्च लिङ्गं श्रुतिमनुमाय झटिति प्रवर्तते । वाक्यं तु प्रतिष्ठापने तस्य विनियो-

गसिद्धयर्थं सदनपूर्वकत्वरूपप्रतिष्ठापनविशेषणसमर्पकतया गौणसामर्थ्यात्मकं लिङ्गं प्रथमतः कल्पयति, ततः श्रुतिमिति मन्दं विनियुङ्क्ते । एवं च वाक्यप्रमाणं श्रुतिकल्पनेन लिङ्गकल्पनेन च व्यवहितमिति वाक्यस्य लिङ्गापेक्षया विप्रकृष्टत्वाल्लिङ्गमेव बलीयः । किंच । अर्थैक्यनिबन्धनमेकवाक्यत्वं समभिव्याहारात्स्वध्यवसानम् । ततश्चार्थैक्याभावे एकवाक्यत्वस्यैवानिर्वाहात्तेन श्रुतिकल्पनानुपपत्तेरेकवाक्यतासिद्धयर्थं प्रथमतः सामर्थ्यकल्पनमावश्यकम् । सामर्थ्ये च पर्यालोच्यमाने नानावाक्यत्वस्यैवावगमान्नैकवाक्यताया उन्मेषोऽपीति विभज्यैव विनियोगः । इति लिङ्गवाक्याधिकरणम् ॥

वाक्यस्य प्रकरणापेक्षया प्राबल्याधिकरणम् ।

अथ वाक्यप्रकरणयोर्विरोधे चिन्त्यते । सूक्तवाकनिगदे 'अग्नीषोमाविदं हविरजुषेताम्, अवीवृधेतां महो ज्यायोऽक्राताम्' 'इन्द्राग्नी इदं हविरजुषेताम्' इत्यादावग्नीषोमादिदेवतापदं पौर्णमास्याममावास्यायां च यथालिङ्गं विनिष्कृष्य प्रयोक्तव्यमिति 'कृत्स्नोपदेशादुभयत्र सर्ववचनम्' इत्यधिकरणे स्थितम् । तत्र पौर्णमास्यां विनियुक्तस्य 'अग्नीषोमौ' इत्यस्य शेषः 'अवीवृधेतां महो ज्यायोऽक्राताम्' इति । स किम् 'अग्नीषोमौ' इत्यनेनैकवाक्यं सद्वाक्यप्रमाणेन पौर्णमासीमात्राङ्गम्, उत प्रकरणादुभयार्थं सदिन्द्राग्निप्रकाशनद्वारा दर्शाङ्गमपीति संशयः । प्रधानाकाङ्क्षालक्षणं प्रकरणमव्यभिचरितप्रधानसंस्पर्शि । अतो नैवंविधवाक्यप्रमाणात्प्रबलमिति तन्निबन्धन एव विनियोगः । नापि प्रकरणस्य श्रुतिकल्पनाविप्रकर्षो दौर्बल्यहेतुरस्ति । तथा चामावास्यायाम् 'इन्द्राग्नी' इत्यतः पूर्वोत्ताभ्याम् 'इदं हविरजुषेताम्, अवीवृधेतां महो ज्यायोऽक्राताम्' इत्युभाभ्यामिन्द्राग्नी प्रकाशयितव्याविति पूर्वः पक्षः ॥ सिद्धान्तस्तु—'अग्नीषोमौ' इत्यस्य 'इदं हविः' इत्यादेश्च प्रत्यक्षमेकवाक्यता गम्यते । तत्र सामर्थ्यश्रुत्योर्द्वयोरेव कल्पनमिति संनिकर्षः । 'इन्द्राग्नी' इत्यनेन तु, तदुत्तरेण 'इदं हविः' इत्यनेन शान्ताकाङ्क्षेण तस्यैकवाक्यतां कल्पयित्वा, तस्मात्सामर्थ्यश्रुत्योः कल्पनमिति विप्रकर्षः । ततश्च प्रधानसंस्पर्शिनोऽपि प्रकरणस्य प्रामाण्यं श्रुतिकल्पनाधीनमिति तद्विप्रकर्षाद्दौर्बल्यमेव । ततश्च 'अग्नीषोमौ' इत्यनन्तरपठितस्य 'इदं हविः' इत्यादेः पौर्णमास्यङ्गत्वमेव । एवम् 'पौर्णमास्यां वैमृधमनुनिर्वपति' इति वाक्यावगतेन वैमृधस्य पौर्णमास्यङ्गत्वेन प्रकरणावगतदर्शपूर्णमासोभयाङ्गत्वबाध इत्यादि द्रष्टव्यम् । इति वाक्यप्रकरणाधिकरणम् ॥

१०. प्रकरणस्य क्रमापेक्षया प्राबल्याधिकरणम् ।

अथ प्रकरणस्थानयोर्विरोधे चिन्त्यते । स्थानं नाम क्रमः । अस्ति राजसूयः । तत्र सन्ति अनुमत्यै पुरोडाशमष्टाकपालम्' इत्याद्या इष्टयः । 'आदित्यां मल्हां गर्भिणीमालभते' इत्याद्याः पशवः । 'अग्निष्टोममम्म आहरति' इत्यादयः सोमाश्च । सर्वे चैते राजसूयशब्दवाच्याः फलवन्तः समप्रधानाः । तेषां च विकृतित्वान्नास्ति प्रातिस्विकं प्रकरणम्, प्राकृतेनेत्थंभावेन कथंभावाकाङ्क्षापूरणात् । सत्यां हि वैकृत-

काङ्क्षायां संनिधिपठितैरुपहोमादिभिस्तस्याः शान्त्या विकृतिषु कथं चोदकप्रवृत्तिः स्यात् । राजसूयात्मना तु तेषामस्त्येव प्रकरणम् । न च निवृत्ताकाङ्क्षत्वादेव राजसूयात्मनापि कथं प्रकरणं स्यादिति वाच्यम् । 'राजसूयाय ह्येना उत्पुनाति' 'राजसूयेनेजानः सर्वमायुरेति' इत्येवं राजसूयशब्दसहचरितत्वदङ्गविध्यनुसारेण निवृत्ताया अप्याकाङ्क्षायाः पुनरुत्थानात् । अतो राजसूयात्मना प्रकरणमस्ति । तत्र राजसूयेऽभिषेचनीयो नामास्ति सोमः । तत्संनिधौ 'दिशोऽभ्ययं राजाभूदिति पञ्चाक्षान्प्रयच्छति' 'शौनःशेपमाख्यापयते' इत्येवं विदेवनादयः समाम्नाताः । ते किं कृत्स्नस्य राजसूयस्याङ्गम्, उताभिषेचनीयस्यैवेति संशयः । प्रकरणात्साधारणात्संनिधिरूपक्रमस्यासाधारणतया बलवत्त्वात्तद्वशादभिषेचनीयाङ्गमिति प्राप्ते, सिद्धान्तः --- यद्यपि संनिधिरसाधारणः, तथापि न तस्य साक्षादङ्गत्वप्रत्यायकता । किंतु विशिष्याकाङ्क्षाकल्पकतयैव वाच्या । एवं चाभिषेचनीयस्य विदेवनादीनां च विशिष्याकाङ्क्षाकल्पनामुखेन संनिधेर्विनियोजकत्वम् । ततश्च कल्प्याकाङ्क्षालक्षणप्रकरणेन झटिति सर्वार्थतया तेषां विनियोगाद्विप्रकृष्टः संनिधिस्तेन बाध्यते । यद्यपि विदेवनादिषु राजसूयशब्दो नास्ति, तथापि राजसूयसंशब्दिताङ्गसंदृष्टत्वात्तेषामप्यस्ति राजसूयप्रकरणपरिग्रहः । अतो राजसूयार्था विदेवनादयः । इति प्रकरणक्रमाधिकरणम् ॥

११ क्रमस्य समाख्यापेक्षया प्राबल्याधिकरणम् ।

अथ क्रमसमाख्ययोर्विरोधे चिन्त्यते । पौरोडाशिकसमाख्याते दर्शपूर्णमासकाण्डे सांनाय्यपात्रप्रोक्षणक्रमे 'शुन्धध्वम्' इति मन्त्रः समाम्नातः । स किं समाख्यया पुरोडाशपात्राङ्गम्, उत क्रमवशात्सांनाय्यपात्राङ्गमिति संशयः । 'तस्य व्याख्यान इति च व्याख्यातव्यनाम्नः' इत्यधिकारे 'पौरोडाशपुरोडाशात्ष्ठन्' इति व्युत्पादितपौरोडाशिकसमाख्यायाः पुरोडाशसंबन्धवाचिन्याः श्रुतिवद्विनियोगे इतरानपेक्षत्वेन क्रमापेक्षया प्राबल्यात्पुरोडाशपात्राङ्गमेव मन्त्र इति पूर्वः पक्षः ॥ सिद्धान्तस्तु— पाचकादिशब्दे प्रत्ययेन पुरुषोऽभिधीयते । संबन्धस्तु न कस्यचिद्वाच्यः, समभिव्याहारलभ्य एव, अनन्वलभ्यस्यैव शब्दार्थत्वात् । उक्तं च वार्तिके 'पाकं हि पचिरेवाह कर्तारं प्रत्ययोऽप्यकः । पाकयुक्तः पुनः कर्ता वाच्यो नैव तु कस्यचित्' इति । एवं पौरोडाशिकशब्देऽपि प्रकृत्या पुरोडाशः प्रत्ययेन काण्डमभिधीयते । संबन्धस्तु समभिव्याहारलभ्यः । क्रमे तु समानदेशत्वलक्षणः संबन्धः प्रत्यक्ष इति क्रमो बलवान् । न चानभिहितस्यापि वाक्यार्थविधया प्रतीयमानत्वान्न कल्पनप्रसक्तिरिति वाच्यम् । पौरोडाशिकपदं हि केवलं स्वतो न संबन्धसद्भावे प्रमाणम्, केवलस्य[1] पदस्याप्रमाणत्वात् । ततश्च 'पौरोडाशिकमधीते' 'पौरोडाशिकं समाप्तम्' इत्यादौ समाख्यां

1. 'प्रमाणम्' 'केवलस्य' इत्यनयोर्मध्ये—क, ख, ग पुस्तकेषु 'वस्तुसिद्धेः प्रमाणाधीनत्वात्' इत्यधिकं दृश्यते ।

संबन्धनिमित्तां श्रुत्वा पुरोडाशस्य मन्त्रस्य च संबन्धः कश्चिदस्तीति कल्पनीयम्। तेन च समाख्याकल्पितमन्त्रसंबन्धेन पुरोडाशपात्रशुन्धनस्य स्मारकतन्मन्त्रविशेषाकाङ्क्षा कल्प्या। तत एकवाक्यत्वम्। तच्च मन्त्रज्ञानबलकल्प्यमन्त्रविध्येकवाक्यत्वरूपम्। मन्त्रस्य सामान्यतः पात्रशुन्धनसमर्थतायाः स्वत एव सिद्धेः, ततः श्रुतिः कल्प्या। ततो विनियोगः। मन्त्रस्य तु समानदेशत्वलक्षणसंबन्धस्य प्रत्यक्षत्वान्न तत्कल्पने समाख्या व्याप्रियते, किं त्वेकवाक्यत्वादिश्रुत्यन्तकल्पन एव व्याप्रियते इति श्रुतिकल्पने संनिकर्षात्समाख्यातः क्रमो बलवान्। तस्मात्सांनाय्यपात्राङ्गमेव मन्त्रः। यद्यपि तैत्तिरीयशाखायामयं मन्त्रः पुरोडाशपात्रशुन्धनक्रमेऽप्यान्नातः तथापि शाखान्तरविषयो विचार इत्यदोषः। इति क्रमसमाख्याधिकरणम्॥

तदेवं श्रुत्यादिप्रमाणेषु पूर्वपूर्वं प्रबलमुत्तरोत्तरं दुर्बलमिति स्थितम्। किमस्य विचारस्य फलम्। प्रबलेन पूर्वपूर्वेणोत्तरोत्तरस्य बाध इति चेत्, न। उत्तरोत्तरं लिङ्गादि हि किं श्रुतिकल्पनया

१२. बाधयोग्यता- लब्धप्रमाणभावं सद्बाध्यते, उतालब्धप्रमाणभावम्। नाद्यः, श्रुतिकल्पनया धिकरणम्। प्रमाणभावं प्राप्तस्य बाधानुपपत्तेः। न द्वितीयः, अलब्धप्रमाणभावस्य लिङ्गादेरकिंचित्करतया तद्विनियोगस्याप्रसक्तत्वात्। नैष दोषः। श्रुत्यादिभिर्हि पूर्वपूर्वैः स्वस्वविषयविनियोगे मन्त्रादीनामवगमिते सति लैङ्गिकादिविनियोगान्तराकाङ्क्षालक्षणमूलोच्छेदाच्छ्रुतिकल्पना प्रतिबध्यते। ततश्चालब्धप्रमाणभावस्यैव लिङ्गादेर्बाधान्नोक्तदोषः। एवं च श्रुत्यादिप्रवृत्त्या लिङ्गादेः प्रवृत्तिप्रतिबन्ध एव बाधः। सोऽयमप्राप्तबाध इत्युच्यते। अत्र दृष्टान्तः प्रदर्शितो वार्तिके 'निःश्रेण्यारोहणप्राप्यं प्राप्तिमात्रोपपादि च। एकमेव फलं प्राप्तुमुभावारोहतो यदि। अधःसोपानमेकोऽन्य उत्तरं तु तयोः श्रितः। उभयोस्तु जवस्तुल्यः प्रतिबन्धश्च नान्तरा। आरोहतांस्तदेको हि तत्फलं प्राप्नुयात्तयोः। प्रथमेन गृहीतेऽस्मिन्पश्चिमोऽवतरेन्मुधा' इत्यादि। 'कुशमयं बर्हिर्भवति' इति प्राकृतं तु प्राप्तमेव कुशमयत्वम् 'शरमयं बर्हिर्भवति' इति वैकृतेन बाध्यते इति दशमाध्याये वक्ष्यते। इति श्रुत्यादिपेटिका॥

तदेवं श्रुत्यादीनां बलाबलं विचारितम्। अधुना विरोधः कास्ति नास्तीति विचार्यते। प्रथमं तावत्प्रकरणस्य श्रुत्या विरोधसद्भावविचारः प्रस्तूयते। ज्योतिष्टोमे श्रूयते 'तिस्र एव साह्नस्योपसदो द्वादशाहीनस्य' इति। समानेनाह्ना संतिष्ठते यत्र सुत्या स क्रतुः

१३ द्वादशोपसत्ता- साह्नः एकदिनसाध्यसुत्याको ज्योतिष्टोमः। छान्दसं रूपम्। तत्र साह्नस्य या अहीनाङ्ग- ज्योतिष्टोमस्य त्र्युपसत्कत्वमङ्गमिति निर्विवादम्। द्वादशोपसत्कस्यमध्यहीनतांधिकरणम्। श्रुत्या विधीयमानं प्रकरणात्तस्यैवाङ्गम्, उत द्विरात्राद्यहर्गणाङ्गमिति संशयः। तत्र पूर्वपक्षयति—

अहीनो वा प्रकरणाद्गौणः ॥ १४ ॥

वाशब्दः संभावनायाम् । अहीनशब्दः प्रकरणाज्ज्योतिष्टोमेऽपि वर्तितुमर्हति । नन्वप्रसिद्धः कथं तत्र वर्तेतेत्यत आह— गौण इति । अवयवयोगयुक्त इत्यर्थः । न हीन अहीनः इति व्युत्पत्तेः । ज्योतिष्टोमो हि केनापि सोमक्रतुना न हीयते न त्यज्यते, तस्य प्रकृतित्वेन सर्वैः सोमक्रतुभिरपेक्ष्यमाणत्वात् । ततश्च नाहीनश्रुत्या प्रकरणस्य विरोध इति भवति द्वादशोपसत्कत्वं व्युपसत्कत्वं वा ज्योतिष्टोमाङ्गमिति ॥

अथ सिद्धान्तयति—

असंयोगात्तु मुख्यस्य तस्मादपकृष्येत ॥ १५ ॥

तुर्नार्थे । द्वादशोपसत्कत्वं न ज्योतिष्टोमाङ्गम । किंतु तस्माज्ज्योतिष्टोमप्रकरणादपकृष्येत अन्यत्र निविशेत । द्विरात्राङ्गमिति यावत् । कुतः । मुख्यस्य असंयोगात् मुख्यस्य प्रकृतिभूतज्योतिष्टोमस्य साह्नशब्देनोपात्तस्य पुनरहीनशब्देन संयोगासंभवात् । एकार्थविषये शब्दद्वयप्रयोगस्य वैयर्थ्यात् । एवं साह्नशब्दवाच्यज्योतिष्टोमादन्यस्यैवाहीनशब्दतः प्रतीयमानत्वेन प्रकरणस्य 'अहीनस्य' इति षष्ठीश्रुत्या विरोधान्न ज्योतिष्टोमाङ्गता द्वादशोपसत्कत्वस्य युज्यते । मुख्यस्य प्रकृतिभूतज्योतिष्टोमस्य द्विरात्राद्यहर्गणे रूढेनाहीनशब्देन संयोगासंभवादित्यर्थः । 'तस्य समूहः' इत्यधिकृत्य 'अह्नः खः क्रतौ' इति सूत्रेणाहर्गणसाध्यसुत्याकक्रतौ वाच्ये अहनशब्दात्खप्रत्यये 'आयनेयीन' इत्यादिना तस्य ईनादेशे अहीनशब्दस्य व्युत्पादितत्वात् । ननु द्विरात्रादावप्यहर्गणसाध्यसुत्यासमूहेऽहीनशब्दो योगेनैवानुशिष्यते । ततश्च योगविशेषात्प्रकरणानुग्रहाय नञ्समास एवाश्रयणीय इति चेत्, न । एवं सति [1]सत्रेष्वप्यहीनशब्दस्य प्रयोगापत्तेः । एवं चाहर्गणविशेषे द्विरात्रादावेवायमहीनशब्द । मुख्यस्य प्रकृतिभूतज्योतिष्टोमस्य मध्योदात्ताहीनशब्देन संयोगासंभवादित्यर्थः । अहीनशब्दो हि मध्योदात्तः पठ्यते । नञ्समासे तु 'तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्याः' इति पूर्वपदस्य नञः प्रकृतिस्वरेणोदात्तत्वे अहीनशब्द आद्युदात्तः स्यात् । नञो हि 'निपाता आद्युदात्ताः' 'उपसर्गाश्चाभिवर्जम' इत्युदात्तत्वमेव प्रकृतिसिद्धः स्वरः । न च 'प्रत्ययः' 'परश्च' 'आद्युदात्तश्च' इति प्रत्ययसंज्ञासंनियोगशिष्टनाद्युदात्तस्वरेणान्तरङ्गत्वादीनादेशात्पूर्वप्रवृत्तेन खप्रत्ययाकारस्योदात्तत्वे ततः खकारस्य ईनादेशे तदीकारस्याहन्शब्दाकारस्य च 'अनुदात्तं पदमेकवर्जम्' इत्यनुदात्तत्वे सति खप्रत्ययान्तत्वेऽप्यहीनशब्दस्य कथं मध्योदात्तत्वमिति वाच्यम । 'आयनादिषूपदेशिवद्वचनं स्वरसिद्ध्यर्थम्' इति कात्यायनवार्तिके प्रत्ययोपदेशावस्थायामेवायनादि-

1. सत्रेऽपि—क, ग, घ.

विधानेन ईनादेशस्य प्रत्ययसंज्ञाप्रवृत्तिदशायामेव प्रवर्तमानतया प्रत्ययस्वरेण तस्य[1] उदात्तत्वे 'अनुदात्तं पदमेकवर्जम्' इत्यहन्शब्देऽकारस्य नकारादकारस्य चानुदात्तत्वे, [1]तस्य स्वरितत्वेऽहीनशब्दस्य मध्योदात्तत्वोपपत्तेः। यद्यपि द्वादशाहे विहितस्य द्वादशोपसत्कत्वस्य द्विरावादावपि चोदकतः प्राप्तेर्ज्योतिष्टोमप्रकरणे 'द्वादशाहीनस्य' इति न विधिः। किंतु महतोऽहीनस्य महती संख्योचिता; अल्पस्य तु ज्योतिष्टोमस्याल्पेत्येवं त्र्युपसत्कत्वप्रशंसार्थोऽर्थवादः। तस्य च ज्यौतिष्टौमिकत्र्युपसत्कत्वस्तुत्युपयुक्तत्वान्न प्रकरणविरोधोऽस्ति। तथापि यत्र शाखासु द्वादशाहे द्वादशोपसत्कत्वं न विहितं तद्विषयोऽयं विचारः इति वार्तिककृतः। शाखान्तरोपसंहारानित्यत्वस्य शाखान्तराधिकरणे प्रपञ्चितत्वादिति तदाशयः। प्रकारान्तरेणाप्यधिकरणप्रवृत्तिर्वार्तिक उत्प्रेक्षिता क्लिष्टत्वादुपेक्षिता। याज्ञिकास्तु द्वादशाहप्रकरणे 'द्वादशोपसदः' इति विधिः सत्रभूतद्वादशाहविषय इति मन्यन्ते। वस्तुतस्तु स्वरविरोधात्पूर्वपक्षस्यैवानुत्थितेरधिकरणप्रवृत्तिश्चिन्त्या। छान्दसस्वरव्यत्ययेन पूर्वपक्षोत्थितिवर्णनं तु क्लिष्टमेवेत्यास्तां तावत्। वृत्तमधिकरणम्॥

ज्योतिष्टोमे 'उपास्मै गायता नरः' इति नित्यां प्रतिपदं विधाय 'युवं हि स्थः स्वर्पती—इति, द्वयोर्यजमानयोः प्रतिपदं कुर्यात्' 'एते असृग्रमिन्दवः—इति बहुभ्यो यजमानेभ्यः' इति श्रुतम्।

१४. कुलायादौ प्रतिपदोरुत्कर्षाधिकरणम्।

बहिष्पवमानस्तोत्रे आद्या स्तोत्रीया ऋक्प्रतिपदित्युच्यते। किमिदं प्रतिपद्विधिद्वयं ज्योतिष्टोम एव निविशते, उत 'कुलायेन राजा पुरोहितश्च सायुज्यकामौ यजेयाताम्' 'एको द्वौ बहवो वाहीनैर्यजेरन्' इति द्विबहुयजमानकेषु कुलायादिषूत्कृष्यत इति संशये, सिद्धान्तेनोपक्रमते—

द्वित्वबहुत्वयुक्तं चाचोदनात्तस्य॥ १६॥

यजमानद्वित्वबहुत्वयुक्तं प्रतिपद्विधिद्वयमपि कुलायादावुत्कृष्यते। कुतः। तस्य अचोदनात्। तस्य द्वित्वस्य बहुत्वस्य च प्रकृतौ ज्योतिष्टोमे अविधानात्। 'यजेत' इति तदेकत्वस्यैव श्रवणात्। तस्य चोपादेयकर्तृगतत्वेन विवक्षितत्वात्॥

अथ पूर्वपक्षमुत्थाप्य निराकरोति—

पक्षेणार्थकृतस्येति चेन्न प्रकृतेरेकसंयोगात्॥ १७॥

'वसन्ते वसन्ते ज्योतिष्टोमेन यजेत' इति ज्योतिष्टोमस्य नित्यप्रयोगविधिः; 'ज्योतिष्टोमेन स्वर्गकामो यजेत' इति काम्यप्रयोगविधिरिति द्वितीयस्य चतुर्थे यावज्जीविकाधिकरणे निरू-

1. 'तस्य' इत्यतः पूर्वं 'स्वरितात्संहितायामिति' इत्यधिकोंशः सर्वत्र दृश्यते; स चासंगतत्वादुपेक्षितः 2. चाचोद...

पितम् । तत्र काम्यप्रयोगः सर्वाङ्गोपेत एव फलं साधयति । नित्यप्रयोगस्य त्ववश्यकर्तव्यत्वादशक्यानुष्ठानमङ्गं प्रयोगविधिर्न संगृह्णातीति तत्राशक्यकतिपयाङ्गत्यागेऽपि न दोष इति षष्ठतृतीयाद्ये वक्ष्यते । तथा च बहुद्रव्यसाध्यं ज्योतिष्टोमं यद्येकः कर्तुं न शक्नुयात्तदा कर्त्रैकत्वमङ्गं परित्यज्य द्विबहवः कुर्युः । ततश्चार्थकृतस्याशक्तिनिमित्तकस्य यजमानद्विबहुत्वस्य संबन्धि प्रतिपद्द्वयं नित्यप्रतिपच्च पक्षेण विकल्पेन ज्योतिष्टोम एव निवेशमर्हति । तथा चैकस्य शक्तौ नित्या प्रतिपत् । तदशक्तावनेकयजमानके इदं प्रतिपद्द्वयमिति विकल्पो व्यवतिष्ठत इति चेत्, तन्न । कुतः । प्रकृतेः एकसंयोगात् । ज्योतिष्टोमस्योत्पत्तिवाक्ये 'यजेत' इत्येकेनैव कर्त्रा संयोगात् । उत्पत्तिकालेऽनुष्ठानाशक्तिहेतुदक्षिणाबाहुल्याद्यनवगमेन कर्त्रैकत्वस्यासंजातविरोधितया सर्वथा परित्यागानर्हत्वात् । यदशक्यमङ्गं नित्यप्रयोगविधिर्न संगृह्णाति तत्परित्यागमर्हति । यजमानैकत्वं तु नित्यप्रयोगविधावपि श्रूयमाणं कथं परित्यागमर्हति । किंच पुरुषप्रयत्नसाध्यं यत्प्रधानविधिना कर्तव्यतया चोद्यते तद्विषय एव यथाशक्त्युपबन्धः नानुपादेयकालादिविषय इति वक्ष्यते । अनुपादेयं च यजमानस्यात्मीयमेकत्वम् । ततश्चैकमेव यजमानमधिकृत्य यथाशक्त्युपबन्धः प्रवर्तते 'एको यथाशक्ति कुर्यात्' इति । तथा च ज्योतिष्टोमे यजमानद्विबहुत्वाभावात्तत्संयुक्तं प्रतिपद्विधानं कुलायादिषूत्कृष्यते । न च यजमानश्च यजमाना च, यजमानश्च यजमाने च, इत्येवम् 'पुमान्स्त्रिया' इति कृतैकशेषयोर्द्विवचनबहुवचनान्तयजमानशब्दयोरेकानेकपत्नीकयजमानाभिधायिनोर्ज्योतिष्टोमे संभवान्नोत्कर्ष इति वाच्यम् । विरूपैकशेषस्य लाक्षणिकत्वात् । किंच द्विबहुवचनयोः पत्न्यभिधायकत्वे ज्योतिष्टोमस्य कदाप्येकयजमानकत्वाभावादिमे एव प्रतिपदौ स्याताम् । ततश्च नित्यप्रतिपद्विधिरनर्थकः स्यात् । विषमशिष्टविकल्पो वा स्यात् । तस्मादुत्कर्षः । वृत्तमधिकरणम् ॥

१५. आधान्या अनुक्रमणाधिकरणम् ।

दर्शपूर्णमासयोः श्रूयते 'जाघन्या पत्नीः संयाजयन्ति' इति । अत्र 'सोमं यजति' 'त्वष्टारं यजति' 'देवानां पत्नीर्यजति' 'अग्निं गृहपतिं यजति' इति सोमादयः पत्नीशब्देन सृष्टिन्यायेन विवक्षिताः । द्वितीया तु 'संप्रदानस्य च कर्मसंज्ञा वक्तव्या' इति वाचनिकी । जाघनीशब्दो लाङ्गूलमाचष्टे । तत्र किं जाघनीमुद्दिश्य पत्नीसंयाजाः संस्कारा विधीयन्ते, ततश्च संस्कार्यतया प्राधान्यात्तत्र जाघनी तत्र पत्नीसंयाजा उत्कृष्यन्त इत्यग्नीषोमीयपश्वनुनिष्पन्नजाघनी संस्कर्तव्येति फलति; उत पत्नीसंयाजोद्देशेन जाघनी विधीयते, दर्शपूर्णमासयोरेवापणस्थजाघनी संपाद्येति संशये, पूर्वपक्षयति—

जाघनी चैकदेशत्वात् ॥ १८ ॥

जाघनीसंस्कारविधिः संस्कार्यानुसारेणाग्नीषोमीयपशावुत्कृष्यते । संस्कारविधौ हि पत्नीसंयाजानां संनिपत्योपकारकतया दृष्टार्थत्वम् । ननु तृतीयाश्रुत्या जाघन्या गुणत्वप्रतीतेस्तत्संस्कारवि-

धित्वमसिद्धम्, ततश्च पत्नीसंयाजोद्देशेनैव [1]'विधीयमाना जाघनी दर्शपूर्णमासयोरेव क्रयादिना छाग-हरिणादिप्रकृतिकस्वनिष्पत्तिं प्रयोजयेदिति नोत्कर्ष इत्यत आह— एकदेशत्वादिति । 'उत्तरार्धात्स्विष्टकृते समवद्यति' इत्युत्तरार्धशब्दस्यैकदेशवचनतया कस्योत्तरार्धादित्याकाङ्क्षायां प्रकृताग्नेयादिद्रव्य-स्येत्यवगमेन द्रव्यान्तराप्रयोजकत्वात्स्विष्टकृतः प्रतिपत्तित्वमिति चतुर्थाधिकरणे 'एकदेशद्रव्यश्चोत्पत्तौ विद्यमानसंयोगात्' इत्यधिकरणे व्यवस्थापयिष्यते । तथा च जाघनीशब्दस्याप्येकदेशवचनत्वेन तद्द्रव्यकयागस्य स्वयं द्रव्यान्तराप्रयोजकतया यत्रैकदेशी विद्यते तत्र तदीयैकदेशस्य ग्राह्यत्वात्तस्य चैकदेशिसंपातायातस्य प्रतिपाद्यत्वं न्याय्यमिति पत्नीसंयाजादीनामग्नीषोमीयपशुहविर्हृदयानुनिष्पाद्यजाघनीप्रतिपत्तिकर्मत्वात्प्रकरणं बाधित्वा वाक्यात्तन्नोत्कर्षः । तृतीया तु 'प्रयाजशेषेण हवींषि' इतिवद्वयत्ययेन नेतव्या ॥

अथ सिद्धान्तयति -

चोदना वापूर्वत्वात् ॥ १९ ॥

वाशब्द एवार्थे । जाघन्या एव पत्नीसंयाजार्थतया चोदना, न तु जाघन्यर्थतया पत्नी-संयाजानाम् । कुतः । पूर्वत्वात् अपूर्वत्वाच्च । तथाहि । किं जाघन्युद्देशेन पाशुकाः पत्नीसंयाजाः प्रतिपत्तितया विधीयन्ते, उत दार्शपूर्णमासिकाः । नाद्यः, अपूर्वत्वात् पाशुकानां पत्नीसंयाजानां प्रकरणान्तरगतत्वेनासंनिहितत्वात् । न द्वितीयः, दार्शपूर्णमासिकपत्नीसंयाजानाम् 'पत्नीः संयाज-यन्ति' इत्युत्पत्तिवाक्ये द्रव्यविशेषासंयुक्ततया संनिहितत्वात् द्रव्यापेक्षेषु च तेषु जाघन्या विधा-नौचित्यात् दर्शपूर्णमासयोर्जाघन्या भूतभाव्युपयोगाभावेन संस्कारानर्हतया पाशुक्याश्च तस्या असं-निहिततया [2]'दार्शपूर्णमासिकपत्नीसंयाजानां तत्प्रतिपत्तितया विधानानुपपत्तेश्च । ततश्च द्रव्यासंयुक्तो-त्पन्नदार्शपूर्णमासिकपत्नीसंयाजोद्देशेन तदपेक्षितजाघनीद्रव्यविधिरिति युक्तम् । न च जाघन्युद्देशे-नापूर्वाः पत्नीसंयाजाः प्रतिपत्तितया विधीयन्तामिति वाच्यम् । 'पत्नीः संयाजयन्ति' इत्यनन्तरवि-हितानां मनसि विपरिवर्तमानानामेव जाघनीवाक्येऽपि 'पत्नीः संयाजयन्ति' इत्यनेन परामर्शौचि-त्यात्, जाघन्युद्देशेन यागविधौ यागोद्देशेन च पत्नीशब्दप्रतिपाद्यसोमादिदेवताविधौ विरुद्धत्रिकद्वया-पाताच्च । पत्नीविशिष्टयागविधौ गौरवात् । विशिष्टयागानुवादेन जाघनीमात्रविधानोपपत्तेः । न च विशिष्टानुवादेऽपि वाक्यभेदः शङ्क्यः । पत्नीशब्दस्याविवक्षितार्थत्वात् । 'जाघन्या संयाजयन्ति' इत्येतावतैवानन्तरवाक्यविहितानां पत्नीसंयाजानामुपस्थितिसंभवात् । अपूर्वत्वादप्राप्तत्वाज्जाघन्या एव चोदनेत्यपि योज्यम् । एवं च जाघन्या अकृतार्थत्वात्तामुद्दिश्य पत्नीसंयाजविधेरप्रवृत्तेः 'प्रयाजशेषेण' इतिवद्विभक्तिव्यत्ययकल्पनापि न प्रसज्यते ॥

1. 'विधीयमाना जाघनी'—एतत् क, ख, ग. पुस्तकेषु नास्ति. 2. दर्शपूर्णमास—क.

एकदेशत्वादित्याह—

एकदेश इति चेन्न प्रकृतेरशास्त्रनिष्पत्तेः ॥ २० ॥

उत्तरार्धादिशब्दवज्जाघनीशब्द एकदेशवचनः; अतो द्रव्यान्तराप्रयोजकत्वात्स्विष्टकृद्वत्प्रतिपत्तिकर्मत्वं पत्नीसंयाजानामिति चेत्, तन्न। कुतः। प्रकृतेरशास्त्रनिष्पत्तेः। दर्शपूर्णमासयोरङ्गत्वेन जाघन्याः शास्त्रतोऽनिष्पत्तेरविधानात्। लोकत एव तन्निष्पत्तेः। जाघनीशब्देन हि अग्नीषोमीयपश्वनुनिष्पन्ना जाघन्येव न विवक्षिता, जाघनीमात्रस्यैव शब्दार्थत्वात्। यद्यप्युत्तरार्धादिशब्दवज्जाघनीशब्दस्याप्यवयववाचित्वम्। तथाप्युत्तरार्धादिशब्द उत्तरार्धत्वादिना प्रकृतिसापेक्षरूपेणाभिधत्ते। ततश्चाग्नेयादिद्रव्यज्ञानं विना उत्तरार्धत्वस्य ज्ञातुमशक्यत्वात्सापेक्षवृत्तित्वम्। जाघनीशब्दस्तु हृदयादिशब्दवज्जातिवचनः। जातिश्चानपेक्षा। ततश्चाग्नीषोमीयपशुज्ञानाभावेऽपि प्राणिमात्रजाघनी ज्ञातुं शक्यत इति, जाघनीशब्दस्य निरपेक्षवृत्तित्वमेव। तथा च हरिणादेर्यस्य कस्यचित्प्राणिनो जाघन्यापणादिस्था[1] क्रयादिना संपाद्या। अग्नीषोमीये तु पशौ वपादीनामुत्पत्तिप्रकारः संज्ञपनादिः शास्त्रनियत इति न क्रयाद्याश्रयणम्। अतो दार्शपूर्णमासिकपत्नीसंयाजेषु 'आज्येन पत्नीसंयाजा इज्यन्ते' इति शाखान्तरविधिना जाघनीविधिर्विकल्प्यते। इति जाघन्यधिकरणम् ॥

तदेवं श्रुतिप्रकरणयोर्विरोधाविरोधचिन्ता प्रस्तुता। अधुना वाक्यप्रकरणयोर्विरोधाविरोधचिन्ता प्रस्तूयते। ज्योतिष्टोमे श्रूयते 'हनू वा एते यज्ञस्य यदधिषवणे न संतृणत्ति' 'अथो खलु दीर्घसोमे संतृण्वे धृत्यै' इति। ययोरुपरि सोमोऽभिषूयते ते अधिषवणे फलके यत यतः यज्ञस्य हनुस्थानीये, अतः ते फलके न संतृणत्ति यथा न विश्लिष्येते तथा न कीलिते करोति। दीर्घसोमे तु ते संतृण्वे अविश्लिष्टत्वाय कीलिते करोति। धृत्यै अभिषवयोग्यदार्ढ्यायेत्यर्थः। तदिदं संतर्दनं किं प्रकृतिभूते ज्योतिष्टोम एव निविशते, उतान्यत्रोत्कृष्यते; यदा चोत्कृष्यते तदा किं [2]द्विरात्राहीनसत्रेषु, उत उक्थ्यादि संस्थास्वेव, अथवा तास्वहीनसत्रेषु चाग्निष्टोमाधिकक्रतुष्विति पञ्चधा संशयः। तत्र पूर्वपक्षयति—

१६. सतर्दनस्य स्थानिवेशाधिकरणम्।

संतर्दनं प्रकृतौ क्रयणवदनर्थलोपात्स्यात् ॥ २१ ॥

संतर्दनं प्रकृतौ ज्योतिष्टोमे स्यात्। कुतः। अनर्थलोपात् इष्टिपशुदर्वीहोमापेक्षया दीर्घकालके प्रकृतिभूतज्योतिष्टोमे दीर्घसोमशब्दस्यावयवार्थलोपाभावात्। तथा च प्रकरणानुग्रहान्नोत्कर्षः। तस्मादसंतर्दनविधिना संतर्दनविधिः प्रकृतौ विकल्प्यते। क्रयणवत्। 'यथा गोवासोहिरण्यादिसोमक्रयणद्रव्याणि तद्वत्' इति भाष्यम्। 'क्रयाणां[3] विकल्पं पूर्वपक्षयित्वा समुच्चयस्य द्वादशे वक्ष्य-

1. ...आपणस्था घ. 2. द्विरात्राद्यहीन...क. 3. क्रयणानाम् —क. 4. धारणाशक्तेः—क.

माणत्वात्पूर्वपक्षाभिप्रायो दृष्टान्तः' इति वार्तिककृतः । अन्यथापि योजित वार्तिके । अनर्थलोपात् वाक्यशेषश्रुतधारणशक्तेः[1] संतर्दनप्रयोजनस्य प्रकृतौ ज्योतिष्टोमे संभवात् संतर्दनं नोत्कृष्यते । ननु प्रकृतिभूतज्योतिष्टोमस्योक्थ्याद्यपेक्षयाल्पत्वान्मन्दफलं तत्संतर्दनमित्यत आह— क्रयणवदिति । प्रयोजनलोपाभावे दृष्टान्तः । यथा अल्पमूल्यस्य सोमद्रव्यस्य गोवासःप्रभृतिद्रव्याणामन्यतमेन क्रये सिद्धेऽप्यानतिसौकर्यार्थं शेषाणां दानम् । अधिकमूल्यदाने हि विक्रेतुः स्वानतत्वात्क्रयसिद्धिरविलम्बिता भवति । अविलम्बितक्रयकश्च सोमोऽभ्युदयकारी भवतीति शास्त्रार्थो विज्ञायते । तथा संतृण्णयोरेव फलकयोरभिषवक्षमत्ववचनसामर्थ्याद्दृढतरकृतोऽभिषवः श्रेयस्कर इति विज्ञायते । ननु तर्हि 'न संतृणत्ति' इत्यसंतर्दनविधायकपूर्ववाक्यादसंतृण्णयोरेवाधिषवणफलकयोः प्रकृतावभिषवक्षमत्वस्याद्दृढकृताभिषवश्रेयस्करत्वस्य चावगमात् 'दीर्घसोमे संतृद्ये धृत्यै' इत्युत्तरवाक्यं दृढतरकृताभिषवक्षमत्वफलकसंतर्दनविधायकं प्रकृतौ लुप्तार्थं सद्विकृतौ दीर्घसोम उक्थ्यादाववोत्कर्षमर्हतीति चेन्, असंतर्दनवाक्यं नास्तीति कृत्वा क्रयणवदिति दृष्टान्तः समर्थनीय इति— तदेतच्छिष्यदन्धनमात्रम् । वस्तुतस्तु 'अनर्थलोपात्' इत्येतन् इष्टिपशुदर्वीहोमापेक्षया द्रव्यव्ययायासकालाद्यधिकत्वात्प्रकृतावेव दीर्घसोमशब्दस्य संभवादित्येव व्याख्येयम् । क्रयणवदिति संतर्दनासंतर्दनविकल्पे दृष्टान्तः । तैत्तिरीयादिशाखागतदशक्रयणविधयः 'गवाहिरण्येनवाससाजयेति चतुर्भिः क्रीणाति' इति बह्वृचब्राह्मणगतचतुःक्रयणविधयश्च यथा विकल्पन्ते, तद्वत्संतर्दनमसंतर्दनं च प्रकृतौ विकल्पत इत्यर्थः ॥

अथ सिद्धान्तयति—

उत्कर्षो वा ग्रहणाद्विशेषस्य ॥ २२ ॥

वाशब्द एवार्थे । संतर्दनस्य प्रकरणादुत्कर्ष एव स्यात् । कुतः । विशेषस्य ग्रहणात् दीर्घसोमशब्देन प्रकृतिसोमविकारस्य ग्रहणात् । न हीष्टिपशुदर्वीहोमापेक्षया दीर्घत्वं[2] दीर्घसोमशब्दप्रवृत्तौ निमित्तम् । तथा सति सोमशब्दस्य वैयर्थ्यात् सर्वस्यापि सोमस्य इष्ट्याद्यपेक्षया दीर्घत्वात् । अतः सजातीयसोमान्तरापेक्षमेव बहुसोमद्रव्यकत्वचिरकालत्वादिरूपमेव दीर्घत्वं विवक्षितमिति स्यादुत्कर्षः ॥

अत्र पूर्वपक्षी प्रत्यवतिष्ठते—

कर्तृतो वा विशेषस्य सन्निमित्तत्वात्[3] ॥ २३ ॥

वाशब्दः प्रत्यवस्थाने । कर्तृतः । सार्वविभक्तिकस्तसिः । कर्तरि यजमाने दीर्घशब्दोऽस्तु । ततश्च दीर्घस्य यजमानस्य सोम इति षष्ठीसमासः प्रकृतिसोम एवोपपद्यते; न तु दीर्घश्चासौ सोम-

1. 'अभिषवस्य श्रेयस्करत्वावगमात्' इत्येव सर्वत्र पाठः । अयं त्वस्माभिः कल्पितः । 2. दीर्घसोमत्वम् क, ख, ग. 3. तन्नि...

श्रेति कर्मधारयः । कुतः । विशेषस्य सन्निमित्तत्वात् । समासविशेषनिर्धारणस्य विद्यमाननिमित्तकत्वात् । न हि स्वरविशेषः कश्चित्समासविशेषको धर्मोऽत्र विद्यते । अन्तोदात्तत्वस्य षष्ठीसमासकर्मधारयसाधारण्यात् । ततश्च कथंचित्प्रकृतावेव संभवतीति दीर्घसोमशब्दे प्रकरणबाधो न युक्त आश्रयितुम् ॥

अथ सिद्धान्ती परिहरति—

क्रतुतो वार्थवादानुपपत्तेः स्यात् ॥ २४ ॥

वाशब्द एवार्थे । क्रतावेव दीर्घशब्दो वर्तते, न तु यजमाने । दीर्घसोमशब्दः कर्मधारय इति यावत् । कुतः । अर्थवादानुपपत्तेः । षष्ठीतत्पुरुषे पूर्वपदार्थस्योत्तरपदार्थोपसर्जनतया प्राधान्येन स्वार्थवदनानुपपत्तेः । पूर्वपदस्य लक्षणया स्वार्थसंबन्धिपरतया मुख्यवृत्त्या स्वार्थवादित्वानुपपत्तेश्च । कर्मधारये तु द्वयोरपि पदयोः प्राधान्येन मुख्यवृत्त्या च स्वस्वार्थवदनं भविष्यति । धृत्या इत्यर्थवादस्यानुपपत्तेरित्यप्यर्थः । कर्मधारयसमासे हि द्विरात्रादिर्दीर्घसोमे चिरकालबहुसोमद्रव्यकक्रतौ चिरकालं ग्रावभिरभिषूयमाणे सोमेऽधिषवणफलकयोर्विश्लेषशङ्कायां संतर्दनं विधीयमानं धृत्यै भवतीत्यर्थवाद उपपद्यते । न हि यजमानस्य दीर्घत्वे ह्रस्वत्वे वा प्रकृतावभिषवस्य किंचिदाधिक्यमस्ति, येन तत्रापि विश्लेषशङ्का स्यात् ; 'धृत्यै' इत्यर्थवादश्चोपपद्येत । तस्मादुत्कर्षः ॥

स च द्विरात्रादिष्वेव, न तूक्थ्यषोडश्यतिरात्रसंस्थास्विति तृतीयं पक्षमुपक्षिपति-

[1]संस्थासु च कर्तृवद्धारणार्थाविशेषात् ॥ २५ ॥

चो नार्थे । अग्निष्टोमवदुक्थ्यादिसंस्थास्वपि न संतर्दनम् । कुतः । धारणार्थाविशेषात् । धारणरूपप्रयोजनानुपपत्तेरविशेषो धारणार्थाविशेषः । शाकपार्थिवादिवन्मध्यमपदलोपी समासः । धारणार्थवादानुपपत्तेरविशेषादिति यावत् । अग्निष्टोमे तावद्यजमाने दीर्घे ह्रस्वे वा दशमुष्टिपरिमित एव सोमोऽभिषूयते । "[2]एकयैकयाङ्गुल्याङ्गुष्ठेन चांशून्संगृह्य मिमीते' 'पञ्चकृत्वो यजुषा मिमीते पञ्चकृत्वस्तूष्णीम्' इत्यादिवचनात् उक्थ्यादिसंस्थास्वपि तावानेव सोमोऽभिषूयते । ततश्चाग्निष्टोम इवोक्थ्यादिसंस्थास्वपि धारणार्थवादानुपपत्तेस्तुल्यत्वान्न संतर्दनमिति द्विरात्रादिष्वेवोत्कर्षः ॥

तमिमं तृतीयं पक्षं निराकुर्वंश्चतुर्थपक्षमवलम्बते—

स्यादनित्यत्वात् ॥ २६ ॥

1. संस्थासु कर्तृवद्धारणाविशेषात् 2. एकैकया—ख.

उक्थ्यादिसंस्थासु धारणार्थवादोपपत्तिः स्यात्। तत्राग्निष्टोमापेक्षया यागाभ्यासाधिक्येनाधिकसोमस्याभिषोतव्यत्वात्। न च तोयेन सोमरसवृद्धिः संपाद्येति वाच्यम्। सोमसाधनके कर्मणि वचनं विना द्रव्यान्तरप्रक्षेपानुपपत्तेः। ननु सोमरसवृद्धिरेकादशादिमुष्टिवृद्धया न संभवति; नापि लतादैर्घ्येण, दशमुष्टित्रिपर्वत्वयोर्विधानादित्यत आह—अनित्यत्वादिति। [1]पर्वणामायामपरिमाणस्यानियतत्वादित्यर्थः। तथा च दीर्घत्रिपर्वदशमुष्टिपरिमितसोमलतोपादाने सति प्रदानवृद्धिः यथोक्तपरिमाणस्याप्यबाधः संभवति। वस्तुतस्तु अनित्यत्वादित्यस्य दशमुष्टयवशिष्टसोमलतापरिमाणस्यानित्यत्वादित्यर्थः। श्रूयते हि 'प्रजाभ्यस्त्वा इत्यवशिष्टानंशूनुपसमूहति' इति दशमुष्टिपरिमितसोमेनावशिष्टसोमलताः संयोजयतीत्यर्थः। अवशिष्टलतानां च न किंचिदपि परिमाणं श्रुतम्। ततश्च प्रदानवृद्धयनुसारेण सर्वत्र सोमद्रव्यस्यैव वृद्धेरुक्थ्यादिसंस्थासु धारणार्थवाद उपपद्यत इति संतर्दनस्य तास्वेव निवेशः। एवं च प्रकरणमप्यनुगृहीतं भवति, उक्थ्यादिष्वपि ज्योतिष्टोमस्वरूपानुस्यूतेः सत्त्वात्। ननु 'संस्थाश्च समानविधानाः प्रकरणाविशेषात्' इत्यधिकरणे उक्थ्यादिसंस्थानां प्रकरणं निराकरिष्यत इति चेत्, सत्यम्। तत्र ह्यग्निष्टोमसंस्थस्य नित्यत्वात्तदीयप्रकरणेनाविशेषसंयुक्ता नित्यवदाम्नाता एव धर्मा गृह्यन्ते; उक्थ्यादीनां तु काम्यत्वेनानित्यत्वान्न तद्धर्मा गृह्यन्ते, नित्यानित्यसंयोगविरोधादिति वक्ष्यते। ततश्च यथा 'आग्नेयमग्निष्टोम आलभते' 'ऐन्द्राग्नमुक्थ्ये' इत्यादयो धर्मा उक्थ्यादिसंयुक्ता उक्थ्यादिरूपज्योतिष्टोमप्रकरणेन गृह्यन्ते, तद्वत्संतर्दनस्यापि दीर्घसोमसंयुक्तस्याग्निष्टोमेऽसंभवत्प्रवृत्तिकस्य प्रकरणेनापरिगृहीतस्यापि [2]'दीर्घसोमसंशब्दितोक्थ्यादिरूपज्योतिष्टोमप्रकरणेन परिग्रहे संभवति न द्विरात्रादिपूत्कर्षो युज्यते। तस्मादुक्थ्यादिसंस्थास्वेव प्रकरणदीर्घसोमशब्दाभ्यां संतर्दनस्य निवेशः। 'उत्कर्षो वा ग्रहणाद्विशेषस्य' इति सूत्रे उत्कर्षशब्दस्त्वग्निष्टोमापेक्षया ज्ञेयः। एवं च 'स्यादनित्यत्वात्' इति सूत्रेऽपि 'अनित्यत्वात्' इति बहुव्रीहिः। न विद्यते नित्यं प्रकरणं यस्य तदनित्यम्; ततश्च संतर्दनस्य नित्याग्निष्टोमप्रकरणेनापरिग्रहात्केवलोक्थ्याद्यनित्यप्रकरणपरिग्रहः अविरुद्धः स्यादित्यपि योजना। सोऽयं चतुर्थपक्षो भाष्यसिद्धान्तः। वार्तिककृतस्तु 'स्यादनित्यत्वात्' इति सूत्रं पञ्चमपक्षपरं योजयामासुः। उक्थ्यादिसंस्थासु द्विरात्रादिषु च संतर्दनं स्यात्. न तूक्थ्यादिष्वेव। कुतः अनित्यत्वात्। दीर्घसोमशब्दस्योक्थ्यादिसंस्थास्वेव व्यवस्थितत्वाभावात्। संस्थासु द्विरात्रादिषु चाग्निष्टोमापेक्षया दीर्घत्वस्याविशेषादिति यावत्। ततश्च 'एष वाव प्रथमो यज्ञो यज्ञानां यज्ज्योतिष्टोमो य एतेनानिष्ट्वाथान्येन यजेत' इत्यत्र अन्यशब्दो यथाग्निष्टोमान्यसर्वक्रतुपरः न तु उक्थ्यादिसंस्थामात्रपरः, एवं दीर्घसोमवाक्यमप्यग्निष्टोमाधिकसर्वक्रतुषु प्रवर्तमानं न प्रकरणात्संस्थास्वेव व्यवस्थापयितुं

---

1. पर्वणामायामस्य—ख. 2. दीर्घसोमशब्द—घ.

शक्यते, प्रकरणाद्वाक्यसंकोचस्यायुक्तत्वात् । यदि च संतर्दनमुक्थ्यादिसंनिधौ तदवान्तरप्रकरणे वा श्रूयेत तदा स्यादपि संस्थास्वेव तस्य निवेशः । इदं तु तदसंनिधौ समाम्नातं संस्थाधिकरणन्यायेन तदीयप्रकरणाम्राह्यैर्ज्योतिष्टोमधर्मैरन्तरितं तदीयकथंभावसंस्पर्शं न भजते । तस्मान्न प्रकरणं संस्थासु संतर्दनस्य विनियोजकम । किंतु दीर्घसोमशब्दसंयुक्तं वाक्यमेव । तच्च संस्थासु द्विरात्रादिषु चाविशिष्टमेवेति । अत्र च 'संस्थासु च कर्तृवद्धारणार्थाविशेषात्' इत्यनन्तरम 'उक्थ्यादिषु वार्थस्य विद्यमानत्वात्' 'अविशेषात्स्तुतिर्न्यर्थेति चेत्स्यादनित्यत्वात्' इत्येवं सूत्रानुपूर्वी भाष्यपुस्तकेष्विदानींतनेषु दृश्यते। तत्रैवं योजना । 'संस्थासु च कर्तृवद्धारणार्थाविशेषात्' इति सूत्रेऽग्निष्टोम उक्थ्यादिसंस्थासु च दशमुष्टिपरिमित एव सोमोऽभिषूयत इति धारणार्थवादानुपपत्तेस्तुल्यत्वादहीनसत्रेष्वेव संतर्दनमिति शङ्कास्थिता । तां परिहरति—उक्थ्यादिषु वार्थस्य विद्यमानत्वात् । वाशब्द एवार्थे । उक्थ्यादिसंस्थास्वेव संतर्दनम । कुतः । संतर्दनप्रयोजनस्य धारणस्य तासु सत्त्वात् । यागाभ्यासाधिक्येन तासु प्रदेयसोमवृद्धेरावश्यकत्वात । ननु दशमुष्टित्वत्रिपर्वत्वविरोधादेकादशादिमुष्टिवृद्ध्या लतादैर्घ्यवृद्धया वा वृद्धिर्न संभवति; तोयत एव वृद्धिः संपाद्या; ततश्चाभिषोतव्यसोमस्याग्निष्टोमवदुक्थ्यादिसंस्थास्वप्यविशेषात्संतर्दनप्रयोजनधारणार्थवादस्तत्रापार्थकः स्यादिति द्विरात्रादिष्वेव संतर्दनम, न संस्थास्वित्याशङ्क्य निराकरोति—अविशेषात्स्तुतिर्न्यर्थेति चेत्स्यादनित्यत्वात् । चेदन्तं स्पष्टम् । स्यादनित्यत्वादिति तु भाष्यरीत्या वार्तिकरीत्या च पूर्ववदेव व्याख्येयम । इति संतर्दनाधिकरणम ॥

कौषीतकब्राह्मणे ज्योतिष्टोमप्रकरणे प्रवर्ग्यं प्रकृत्य श्रूयते 'न प्रथमयज्ञे प्रवृञ्ज्यात्' इति । तत्र किं ज्योतिष्टोमाङ्गमयं प्रतिषेधः, उत तदीयप्रथमप्रयोगाङ्गमिति संशये, पूर्वपक्षयति—

संख्यायुक्तं क्रतोः प्रकरणात्स्यात् ॥ २७ ॥

संख्यावाचिप्रथमशब्दसंयुक्तं प्रवर्ग्यप्रतिषेधनमाद्यानाद्यप्रयोगसाधारण्येन ज्योतिष्टोमक्रतोरङ्गं स्यात् । कुतः । प्रकरणात् । न च प्रकरणं बाधित्वा प्रथमशब्दसंयुक्तवाक्यवशेन प्रथमप्रयोगाङ्गं स्यादिति वाच्यम । न ह्यत्र प्रथमशब्दः प्रयोगाभिप्रायकः, यज्ञशब्दसामानाधिकरण्यविरोधात् । यज्ञशब्दस्य प्रयोगपरत्वे लक्षणाप्रसङ्गात् । न च यज्ञशब्दस्य यज्ञविशेषे ज्योतिष्टोमेऽपि लक्षणा तुल्येति वाच्यम । विशेषांशस्य प्रकरणत एव लाभात् । 'एष वाव प्रथमो यज्ञो यज्ञानां यज्ज्योतिष्टोमो य एतेनानिष्ट्वाथान्येन यजेत गर्तपत्यमेव तत्' इति वाक्यान्तरेण प्रथमयज्ञशब्दस्य प्रथमप्रयोगप्रवृत्तिनिमित्तकत्वस्य ज्योतिष्टोम एवावगमितत्वाच्च । तथा च दीर्घसोमवाक्ये वाक्यप्रकरणयोर्विसंवादाद्वाक्येन प्रकरणबाधेऽपि प्रकृते विसंवादाभावान्न प्रकरणबाध इति प्रकरणाद्वाक्यानुगृहीताज्ज्योतिष्टोमाङ्गं प्रतिषेधः ।

१७. प्रवर्ग्यनिषेधाधिकरणम् ।

अथ सिद्धान्तयति—

नैमित्तिकं वा कर्तृसंयोगाल्लिङ्गस्य तन्निमित्तत्वात्॥ २८॥

वाशब्द एवार्थे। प्रथमपदं नैमित्तिकमेव शक्यसंबन्धानिमित्तकमेव। ज्योतिष्टोमे लाक्षणिकमेवेति यावत्। कुतः। कर्तृसंयोगात् लिङ्गस्य तन्निमित्तत्वात्। कर्तृसंयोगादिति ल्यब्लोपे पञ्चमी। लिङ्गस्य प्रतिषेधोपलक्षणभूतप्रथमपदस्य कर्तृसंयोगमपेक्ष्य [1]मुख्यवृत्तिनिमित्तकत्वात्। प्रथमशब्दो ह्यप्रवृत्तपूर्वस्य कर्तुराद्यप्रवर्तन एव मुख्यवृत्त्या वर्तते। तादृशप्रवर्तनाविषयतया तु ज्योतिष्टोमे लक्षणया वर्तते। आकृत्यधिकरणव्युत्पादितेन नागृहीतविशेषणान्यायेनाद्यप्रवर्तनापरपर्यायाद्यानुष्ठानात्मकाद्यप्रयोगस्यैव प्रथमशब्दमुख्यार्थतया प्रथमप्रयोगाङ्गमेव प्रतिषेध इति युज्यते। आद्यप्रयोगो हि प्रथमशब्दश्रवणमात्राद्गम्यते; ज्योतिष्टोमस्तु यज्ञशब्दसामानाधिकरण्यानुपपत्तिप्रतिसंधानमूलकलक्षणागम्य इति प्रथमयज्ञवाक्यात्प्रयोगाङ्गं प्रतिषेधो गम्यते। प्रकरणात्तु क्रत्वङ्गमिति विसंवादे प्रकरणं बाधित्वा वाक्यात्प्रयोगाङ्गमेव प्रतिषेधो विज्ञायते। न च प्रथमशब्दस्याद्यप्रयोगपरत्वे यज्ञशब्दसामानाधिकरण्यानुपपत्तिरिति वाच्यम्। अत एव यज्ञशब्दस्य प्रयोगपरत्वाभ्युपगमात्। 'टित्करणं करोति' इतिवत्सामान्यविशेषभावेन पौनरुक्त्याभावात्। न चोभयथापि लक्षणा तुल्येति वाच्यम्। जघन्यस्य यज्ञशब्दस्य लक्षणयापि नेतुं शक्यत्वात्। मुख्यस्य प्रथमशब्दस्य श्रुतिवृत्तस्यैव ग्राह्यत्वात्। न च प्रथमशब्दे 'एष वाव प्रथमो यज्ञः' इति सामानाधिकरण्यान्नामत्वे निश्चिते श्येनादौ वत्यर्थवल्लक्षणा न दोष इति वाच्यम्। स्तुत्यर्थं प्रवृत्तार्थवादगतप्रयोगस्य लक्षणयापि नेतुं शक्यत्वेन शक्तिकल्पनायामसमर्थतया नामत्वनिश्चयस्यैवासिद्धेः। एतेन 'एष वाव प्रथमो यज्ञो यज्ञानां यज्ज्योतिष्टोमः' इति सामानाधिकरण्यात् 'प्रथमयज्ञः' इति ज्योतिष्टोमस्य रूढं नामधेयमित्यपि प्रत्युक्तम्। द्वितीयादिवारं ज्योतिष्टोमे प्रयुज्यमानेऽपि प्रथमयज्ञ इति व्यपदेशापत्तेश्च। अत्रेदमवधेयम्। क्वचिच्छाखायामनारभ्याधीतः प्रवर्ग्यः, प्रथमयज्ञवाक्यमपि तत्रैवान्नातम्। न तद्विषयेयमधिकरणप्रवृत्तिः, अस्याधिकरणस्य वाक्यप्रकरणविरोधविषयत्वात्। क्वचित्तु शाखायां प्रवर्ग्योऽनारभ्याधीतः। प्रथमयज्ञवाक्यं तु ज्योतिष्टोमप्रकरणे पठितम्। तत्र प्रवर्ग्यस्यानारभ्याधीतत्वेऽपि प्रथमयज्ञवाक्यस्य प्रकरणाधीतत्वमात्रेणाधिकरणप्रवृत्तिरुपपद्यत एव। एवमपि 'ज्योतिष्टोमे प्रवर्ग्यं प्रकृत्य श्रूयते—न प्रथमयज्ञे प्रवृञ्ज्यात्' इति भाष्यमनुपपन्नमिति, तत्समर्थयितुं वार्तिके कौषीतकब्राह्मणमुदाहृतम्। तत्र हि प्रवर्ग्यस्य प्रथमयज्ञवाक्यस्य च ज्योतिष्टोम एव पाठः प्रत्यक्षसिद्ध इति। ननु प्रकरणबाधेन यदि प्रथमप्रयोगाङ्गमेव प्रतिषेधः स्यान्न तु ज्योतिष्टोमाङ्गम्, तर्हि यस्य कस्यचित्प्रथमप्रयोगेऽपि प्राप्नुयात्। नैष दोषः। प्रतिषेधस्य प्राप्त्यपेक्षत्वेन यत्र प्रवर्ग्यस्य प्राप्तिस्तत्रैव ज्योतिष्टोमे सामर्थ्यात्प्राप्तेः। प्रवर्ग्यश्च

1. 'मुख्यप्रवृत्ति' इत्येव सर्वत्र पाठः। अयं तु कल्पितः।

कौषीतकब्राह्मणे प्रकरणपाठाज्ज्योतिष्टोमाङ्गमेव । तैत्तिरीयशाखायां त्वनारभ्याधीतः प्रवर्ग्यः—'यत्प्रवर्ग्यं प्रवृणक्ति' इति । स च 'पुरस्तादुपसदां प्रवर्ग्यं प्रवृणक्ति' इति सोमाव्यभिचरितोपसदादिसंबन्धात्सोमं गच्छति, तत्राप्यनारभ्यन्यायेन प्रकृतिभूतं ज्योतिष्टोमम्, तत्रापि प्रथमशब्दसंयोगात्तदीयाद्यप्रयोगमिति नातिप्रसङ्गः । न च विकृतिसोमानामपि प्रथमप्रयोगे प्रवर्ग्यनिषेधश्रोदकतः प्राप्नुयादिति वाच्यम् । प्रथमशब्दस्याविशेषितस्य सर्वाद्ये वर्तमानस्यान्यत्राप्रवृत्तेः । ननु, एवमपि तैत्तिरीयशाखायाम् 'अग्निष्टोमे प्रवृणक्ति' इति व्यर्थम् । उक्तरीत्या प्रवर्ग्यस्य तत्रैव प्राप्तेः । न च 'न प्रथमयज्ञे' इति प्रतिषिद्धस्य प्रवर्ग्यस्य पक्षे प्रतिप्रसवार्थं तदिति वाच्यम् । भिन्नविषयत्वात् । प्रतिषेधवाक्यानुसारेणाग्निष्टोमवाक्यस्य तदीयाद्यप्रयोगपरत्वे लक्षणाप्रसङ्गात् । अतोऽग्निष्टोमवाक्यस्य प्रतिप्रसवार्थत्वाय प्रतिषेधवाक्यस्यापि क्रतुविषयत्वमेव स्वीकार्यम्, न तु प्रयोगविषयत्वम् इति चेत्, सत्यम् । यदि प्रतिषेधवाक्यं प्रतिप्रसववाक्यं च क्रतुविषयमेव स्यात्तर्हि प्रतिप्रसवफलस्य प्रकृतिसोमे प्रवर्ग्यविकल्पस्य प्रकरणानारभ्यन्यायानुगृहीतेन 'यत्प्रवर्ग्यं प्रवृणक्ति' इति सामान्यविधिना प्रतिषेधेन च सिद्धेः प्रतिप्रसववाक्यं सर्वथानर्थकमेव स्यात् । प्रतिषेधप्रतिप्रसवयोः प्रयोगविषयत्वे तु प्रतिप्रसवोऽर्थवान्भवति । तत्र हि प्रतिप्रसववाक्याभावे प्रवर्ग्यप्रतिषेधविकल्पस्याद्यप्रयोगाङ्गतया अप्राप्तिरस्ति । सामान्यविधेः क्रतुविषयत्वेन प्रतिषेधस्य प्रयोगविषयत्वेन भिन्नविषयत्वात् । तथा चाद्यप्रयोगविषयकविकल्पप्रयोजनत्वात्प्रतिप्रसवोऽर्थवान्संपद्यत इति प्रयोगविषयक एव प्रतिप्रसवोऽवश्यमास्थेयः । प्रतिप्रसवबलादेव प्रतिषेधस्य, प्रथमप्रयोगपर्यवसानमात्रम्; न तु वाचनिकमग्निष्टोमप्रयोगविषयत्वम् । एवं चाग्निष्टोमशब्दस्य प्रयोगलक्षणेति निरस्तम् । सोऽयं प्रतिप्रसवलब्धः अग्निष्टोमे प्रवर्ग्यविकल्पः 'कामं तु योऽनूचानः श्रोत्रियः स्यात्तत्र प्रवृञ्ज्यात्' इति वचनेनोपसंहियते । ततश्चानूचानस्य श्रोत्रियस्याग्निष्टोमप्रथमप्रयोगे प्रवर्ग्यविकल्पः, काममित्यव्ययस्य विकल्पार्थकत्वात्; 'आ द्वादशभ्यो ददाति' 'काममूर्ध्वं देयम्' इति यथा । अननूचानस्याश्रोत्रियस्य तु तत्र नित्य एव प्रवर्ग्यप्रतिषेध इति वार्तिककृतः । येषां तु 'योऽनूचानः श्रोत्रियस्तस्य प्रवृञ्ज्यात्' इत्येव वचनम्, न तु कामंशब्दः, तेषां तु मतेऽनूचानस्य श्रोत्रियस्याग्निष्टोमाद्यप्रयोगे नित्यः प्रवर्ग्यः । अननूचानश्रोत्रियस्य तु विकल्पः । सोऽयमापस्तम्बभारद्वाजसत्याषाढादिकल्पसूत्रानुयायी पक्षः । येषां तु 'प्रथममतिरात्रेण यजेत' इति वचनम्, तेषामप्यतिरात्रस्य ज्योतिष्टोमस्याद्यप्रयोगे 'न प्रथमयज्ञे' इति प्रतिषेधादनग्निष्टोमत्वेन प्रतिप्रसवाभावाच्च नित्यमेव नास्ति प्रवर्ग्यः । याज्ञिकमते त्वनूचानवाक्ये काममित्यव्ययाभावात्तत्रापि नित्य एव प्रवर्ग्यः । ननु 'धर्मेण वेदानामेकां शाखामधीत्य श्रोत्रियो भवति' इति धर्मसूत्रात्तल्लक्षणः श्रोत्रिय एव कर्मस्वधिक्रियते, न त्वन्यः, 'नाश्रोत्रियस्य यज्ञः' इति प्रतिषेधात् । एवं चाश्रोत्रिये प्रवर्ग्यस्यैवाप्रसक्तेः तत्प्रतिषेधे श्रोत्रियग्रहणमनर्थकमिति चेत्— अत्र वार्तिककृतः । 'श्रोत्रियस्येति पुनर्वचनसामर्थ्यात्प्रकर्षगतिर्विज्ञायते श्रोत्रियतमस्येति; यथा हि—

अभिरूपाय कन्या देया— इत्युक्तेऽभिरूपतमायेति गम्यते' इति समादधते । याज्ञिकास्तु 'नाक्रियो ब्राह्मणो नासंस्कारो द्विजो नाविद्वान्विप्रो नैतैर्हीनः श्रोत्रियो नाश्रोत्रियस्य यज्ञः धर्मेण वेदानामेकैकां शाखामधीत्य श्रोत्रियो भवति' इत्यादिश्रोत्रियलक्षणे गर्भाधानादिक्रियाया जातकर्मादिसंस्काराणां नियमाध्ययनस्य च श्रोत्रियत्वोत्कर्षनिमित्तस्य प्रविष्टत्वादन्यस्य च तदुत्कर्षनिमित्तस्याभावाच्छ्रोत्रियग्रहणं व्यर्थं सत्कर्मोपयुक्तवेदैकदेशाध्ययनमात्रादश्रोत्रियस्यापि गौणं कर्माधिकारमभ्युपजानातीति मन्यन्ते । तदेतदग्रिमाष्टमपादे 'ज्ञाते च वाचनं न ह्यविद्वान्विहितोऽस्ति' इत्यत्र वार्तिकेऽपि स्पष्टं भविष्यति । अनूचानस्त्वध्यापयिता; तद्ग्रहणं तु क्षत्रियवैश्यव्यावृत्त्यर्थम्; न हि तयोरध्यापयितृत्वमस्तीति वार्तिककृतः । आचार्यादधिगतं वेदं पश्चाच्छिष्येभ्यो [1]वक्ति सोऽनूचान इति व्युत्पत्तेरिति तदाशयः । बोधायनस्तु साङ्गाध्याय्यनूचान इति मन्यते । 'अनूचानः प्रवचने साङ्गेऽधीती गुरोस्तु यः' इत्यमरः । अस्मिंस्तु पक्षे श्रोत्रियग्रहणमनर्थकमित्युक्त एवार्थः । 'मार्गादनपेतोऽनूचानः' इति भारद्वाजः । वृत्तमधिकरणम् ॥

दर्शपूर्णमासयोः प्राशित्रं प्रकृत्य श्रूयते 'तत्पूषा प्राश्य दतोऽरुणत्तस्मात्पूषा प्रपिष्टभागोऽदन्तको हि' इति । तदिदं पूषभागस्य पेषणं किं प्रकृतौ निविशते उत विकृताविति संशयः । प्रकरणात्प्रकृताविति ब्रूमः । यजमानं पोषयतीति व्युत्पत्त्या पूषनशब्दस्याग्न्यादिदेवतापरत्वेनाविरोधादिति प्राप्ते, सिद्धान्तयति—

पौष्णं पेषणं विकृतौ प्रतीयेताचोदनात्प्रकृतौ ॥ २९ ॥

पौष्णम् । पूषन्शब्दात् 'तस्येदम्' इत्यण् । पौष्णद्रव्यसंबन्धि पेषणं विकृतौ पूषदेवत्यायां प्रतीयेत । कुतः । प्रकृतावचोदनात् । पूष्ण इति शेषः[2] । नन्वग्न्यादीन्पूषनशब्दो गौण्या वृत्त्या

१८. पौष्णपेषणस्य विकृतौ विनियोगाधिकरणम् ।

वदतीति । सत्यमेवम्, यदि तस्य मुख्यार्थो न लभ्येत । अस्ति तु विकृतौ पूषा 'पौष्णं चरुं निर्वपति' इत्यादौ । अतस्तत्रैव पेषणमिदमुत्कृष्यते । प्रकरणबाधश्च युक्त एव, बलीयसो वाक्यात् । न च 'लिङ्गक्रमसमाख्यानात्काम्ययुक्तं समाम्नानम्' इत्यत्रेन्द्रादीनां कर्मणो बहिरपि सद्भावस्य प्रतिपादिततया पूष्णः क्रतुव्यभिचारात्क्रतूपस्थितौ प्रमाणाभाव इति वाच्यम् । भागशब्देन तदुपस्थितेर्वक्ष्यमाणत्वात् । न च प्रकृतावङ्गतया द्रव्यदेवताविशिष्टकर्मान्तरविधिरेव किं न स्यादिति वाच्यम् । विशेषणमात्रस्य विधिसंभवे विशिष्टविध्याश्रयणायोगात् । तत्र पूषपदेन तद्यागमुद्दिश्य प्रपिष्टभागपदेन प्रपिष्टद्रव्यविधिः । भागोद्देशेन पेषणविधौ पदस्यैकप्रसरत्वभङ्गापत्तेः । फलतस्तु पेषणमात्रविधिः । द्रव्यांशस्यान्यतः

1. विविनक्ति—ख. 2. अतः परं 'पौष्णपेषणम् इति पाठः सुगमः' इत्यधिकं च पुस्तके दृश्यते ।

प्राप्तत्वात् । तदिदमधिकरणं नोन्मिषति । पूषन्शब्दस्य प्रकरणादन्यादिपरत्वेऽपि तदीयद्रव्यपेषणस्याप्यन्यत एव सिद्धत्वेन पुनस्तद्विधित्वैयर्थ्यापत्त्या पूर्वपक्षस्यातिमन्दत्वात् । संतर्दनाधिकरणन्यायेन वाक्यप्रकरणविरोधे विकृत्यर्थतायाः सिद्धत्वाच्च । किंतु पौष्णपेषणं किं सर्वत्र भवति, उत चरावेवेति करिष्यमाणविचारस्य प्रकृतौ चरोरभावेन विकृतावुत्कर्षे विनानुपपत्त्या तत्सिद्ध्यर्थम्, प्रकरणविरोधचिन्ताप्रस्तावे साक्षात्संगतत्वाभावेन तस्य प्रासङ्गिकत्वसिद्ध्यर्थतया च, पेषणस्य वाक्येनोत्कर्षप्राप्तिमात्रमनेन सूत्रेणानूद्यत इति प्राञ्चः । वृत्तमधिकरणम् ॥

१९. पौष्णपेषणस्य चरावेव निवेशाधिकरणम् ।

सन्ति पौष्णाः पशवः 'पौष्णं श्याममालभेतान्नकामः' इत्यादयः । सन्ति च तत्र पौष्णाः पशुपुरोडाशाः 'यद्देवत्यः पशुस्तद्देवत्यः पुरोडाशः' इति वचनात् । सन्ति च पौष्णाश्चरवः 'पौष्णं चरुं श्यामो दक्षिणा' इत्यादयः । किमेतेषु सर्वेषु 'पूषा प्रपिष्टभागः' इत्येतन्निविशते, उत चरुमात्रे इति संशये, पूर्वपक्षयति—

तत्सर्वार्थमविशेषात् ॥ ३० ॥

तत् पौष्णपेषणं पश्वादिसर्वद्रव्यार्थम् । कुतः । अविशेषात् । सर्वेषु पश्वादिद्रव्येषु पौष्णत्वस्य 'अदन्तको हि' इति हेतुवादस्य चाविशेषात् ॥

अथ सिद्धान्तयति—

चरौ वार्थोक्तं पुरोडाशेऽर्थविप्रतिषेधात्पशौ न स्यात् ॥ ३१ ॥

वाशब्द एवार्थे । पौष्णपेषणं चरावेव भवति, न तु पुरोडाशे पशौ च । यतः पुरोडाशे पेषणमर्थादेव प्राप्तं न विधातव्यं स्यात् । न हि विना पेषणं पुरोडाशो भवति । यदि त्वापणादिस्थितलौकिकपिष्टोपादानेनापि पुरोडाशसिद्धेः नार्थिकं पेषणमिति कश्चिद्ब्रूयात्, तर्ह्येवं व्याख्येयम् । अर्थे प्राकृतोपकारे साधनतयोपदिष्टं पेषणमर्थोक्तम् । चोदकसिद्धं पुरोडाशे पेषणमिति यावत् । ननु पाकात्प्रागेव चोदकतः पेषणं प्राप्नोति; इदं तु पेषणं पाकोत्तरमन्यदेव विधीयत इति चेन्न । विधेरप्राप्तपेषणके चरौ चरितार्थत्वेन पाकोत्तरं पेषणान्तरकल्पनायामसामर्थ्यात्, पेषणान्तरविधौ गौरवाच्च । एतेन पौष्णपेषणस्य पशुविषयकत्वमपि निरस्तम् । पशोः सांनाय्यविकारत्वस्याष्टमे वक्ष्यमाणत्वेन पुरोडाशधर्मस्य पेषणस्य तत्रात्यन्ताप्राप्तत्वेन तद्विधौ गौरवात् । चरौ चोदकप्राप्तं पेषणं प्रयोजनाभावान्निवर्तमानं प्रतिप्रसूयत इति न गौरवम् । अत्यन्ताप्राप्तप्रापणापेक्षया प्राप्तनिवृत्तप्रतिप्रसवस्य लघुत्वात् । इतोऽपि पशौ पेषणं निवर्तत इत्याह—अर्थविप्रतिषेधात्पशौ न स्यादिति । पेषणे हि

अर्थस्य आकृतिविशेषात्मकहृदयादिस्वरूपस्य विप्रतिषेधात् विनाशात् पशौ पेषणं न भवतीत्यर्थः। न हि पेषणे सति 'हृदयस्याग्रेऽवद्यति' इत्याद्युपपद्यते। न च पिष्ट्वा पुनस्तदाकृतिकरणं शक्यम्। एवमपि मृद्गवयादौ गवयादिशब्दवद्धृदयादिशब्दोऽपि तत्र गौण एव स्यात्। 'उत्सादनदेशादवद्यति' इति श्रुतस्यार्थस्य पशौ विरोधात्पेषणं निवर्तत इत्यप्यर्थः। उत्सादनदेशः उत्कृत्तदेशः। न हि पिष्टस्य हृदयादेरुत्कृत्तदेशो विज्ञायते अनेन प्रदेशेन इदं पशोरुत्कृत्तमिति। तस्मात्पौष्णचरावेवाविप्रतिषिद्धमप्राप्तं च पेषणं विधीयते॥

ननु दशमे 'ओदनो वाप्रयुक्तत्वात्' इति चरुशब्दस्यौदनवाचकताया व्यवस्थापयिष्यमाणत्वादन्योन्यासंसृष्टत्वलक्षणवैशद्ययुक्ते तण्डुलप्रकृतिकपक्वान्न एव चौदनत्वप्रसिद्धेः पेषणे च सति वैशद्यासंभवात्कथं चरौ पेषणमित्याशङ्क्य परिहरति—

चरावपीति चेन्न पक्तिनामत्वात्॥ ३२॥

चरावपि पेषणं चरुत्वविघातकमिति चेत्, तन्न। कुतः। पक्तिनामत्वात्। ओदनशब्दस्य तण्डुलप्रकृतिकावस्रावितानवस्रावितोभयविधविशदपक्वान्नवाचकत्वात्। चरुशब्दस्य तण्डुलप्रकृतिकानवस्रावितान्तरूष्मपक्वविशेषवाचकत्वाच्च। शाकादिनिरासाय तण्डुलप्रकृतिकेति; भ्राष्ट्रपक्वापूपादिनिरासायान्तरूष्मेति। दाशमिकसूत्रं तु चरुशब्दस्य स्थालीपरत्वव्यावृत्तिपरमिति दशमे वक्ष्यते। तस्माच्चरावेव पौष्णे पेषणम्। वृत्तमधिकरणम्॥

राजसूये समामनन्ति 'सोमापौष्णं चरुं निर्वपत्यैन्द्रापौष्णं चरुं पौष्णं चरुं श्यामो दक्षिणा' इति। तत्र 'पूषा प्रपिष्टभागः' इति पेषणं किं केवलपूषदेवत्यचरौ, उतान्यसहितपूषदेवत्येऽपीति संशये, सिद्धान्तेनोपक्रमते—

२०. पौष्णंपेषणस्यैकदेवत्ये निवेशाधिकरणम्।

एकस्मिन्नेकसंयोगात्॥ ३३॥

'एके मुख्यान्यकेवलाः' इत्यमरः। एकस्मिन् केवलपूषदेवत्यचरावेव पेषणम्, न तु द्विदेवत्येऽपि। कुतः। एकसंयोगात् 'पूषा प्रपिष्टभागः' इति केवलपूषसंयोगेनैव पेषणश्रवणात्। यथा 'आग्नेयं चतुर्धा करोति' इत्यैन्द्राग्नो न चतुर्धा क्रियते, यथा वा 'इन्द्रपीतस्य' इत्यैन्द्राग्नग्रहो न भक्ष्यते तद्वत्॥

इतोऽप्येवमित्याह—

धर्मविप्रतिषेधाच्च॥ ३४॥

सोमापौष्णादावर्धं वा पिष्यते समस्तं वा । आद्येऽपि यद्येकस्यामेव स्थाल्यां पच्यते, तत्र पिष्टांशः शीघ्रतरं पच्येत अपिष्टांशस्तु चिरेण । तत्र पक्के पिष्टांशे यदि चरुरुद्वास्यते, तर्ह्यपिष्टांशस्य पक्वता न स्यात् । यदि त्वपिष्टांशपाकपर्यन्तं पिष्टांशोऽपि चिरेण पच्येत, तर्हि पिष्टांशस्य पाके विलयनप्रसङ्गाच्चरुत्वं विहन्येत । चरुशब्दार्थेऽविलयनस्यापि प्रवेशात् । न च पिष्टापिष्टांशयोः पात्रभेदेन पाके सति न विरोध इति वाच्यम् । 'सोमापौष्णं चरुम्' इत्येकत्वसंख्यायाः यागं प्रत्युपादेयचरुगतायाः विवक्षितत्वेन पात्रभेदे तद्विरोधात् । चर्वेकत्वे पात्रैकत्वस्यैव नियामकत्वात् । यदि च पूषानुरोधेन भागान्तरमपि कांस्यभोजिन्यायेन पिष्यते एकस्यामेव च स्थाल्यां पच्येत, तर्हि भागसंकरादन्यदीयभागेऽन्यस्मै दीयमाने वैगुण्यमापद्येत । न चैन्द्राग्नपुरोडाशवन्मिश्रितोद्देशेन युगपद्दानाभ्युपगमान्न दोष इति वाच्यम् । वैषम्यात् । ऐन्द्राग्नपुरोडाशे हि सामर्थ्यापेक्षतद्धितश्रुत्या 'पुरोडाशम्' इत्येकवचनेन च मिश्रयोरेवानुत्पन्नभागविवेकैकहविरुद्देश्यत्वावगमात् । संकीर्णदत्तमप्येकैका देवता स्वं स्वं भागं विभज्य गृह्णातीति युज्यते । सोमापौष्णे तु चरौ 'पूषा प्रपिष्टभागः' इति पूषभागः पेषणीय इत्यवधृतम् । ततश्च सिद्धे भागविवेके वचनादृते पुनरेकीकरणानुपपत्तेर्भवत्येव संकरो दोष इति विप्रतिषिद्धमेव तत्र पेषणम् ॥

अत्र पूर्वपक्षी प्रत्यवतिष्ठते—

अपि वा सद्धितीये स्याद्देवतानिमित्तत्वात् ॥ ३५ ॥

अपिशब्दो व्युत्क्रमः । वाशब्दः प्रत्यवस्थाने । सद्धितीयेऽपि पूषणि स्यादेव पेषणम् । कुतः । देवतानिमित्तत्वात् पेषणस्य स्वरूपेण पूषप्रयुक्तत्वात् । पेषणे हि पूषा स्वरूपेणैव निमित्तमवगतम् , न तु देवतात्वेन । देवतातद्धिताद्यभावात् । ततश्च सोमापौष्णे चरौ तद्धितवशेन देवतात्वस्य व्यासज्यवृत्तितया पूष्णो देवतात्वेनासङ्गावेऽपि स्वरूपेण सद्भावात्स्यादेव पेषणम् । ऐन्द्राग्ने तु पुरोडाशेऽग्नेर्देवतात्वाभावान्नाग्नेयधर्मश्चतुर्धाकरणं प्रवर्तते । तद्धितवशेन मिश्रयोरेव देवतात्वावगमात् । 'इन्द्रपीतस्य' इति भक्षणमन्त्रोऽप्यैन्द्राग्नग्रहे न प्रवर्तते । 'इन्द्रपीतस्य' इति सामर्थ्यापेक्षसमासेन केवलेन्द्रपीतत्वस्यैवावगमात् ऐन्द्राग्ने च तदभावात् । तद्धितवृत्त्या मिश्रयोरेव देवतात्वावगमात् । एवं च पूषानुरोधेन भागान्तरमपि कांस्यभोजिन्यायेनाविरोधात्पिष्यते । भागद्वयमप्येकस्यामेव स्थाल्यां ग्राहकद्वयवत्यां पच्यते । ततश्च न पाकवैषम्यम् , नापि भागसंकरः ॥

इतोऽप्येवमित्याह—

लिङ्गदर्शनाच्च ॥ ३६ ॥

पौष्णपेषणे पूष्णो भग्नदन्तत्वं हेतुरुच्यते । स च हेतुः सोमापौष्णेऽपि पूषणि विद्यते ।

न हि सद्वितीयस्य पूष्णो [1]देवतान्तरसहभावमात्रेण पुनर्दन्ता उत्तिष्ठन्ति। ततश्चादन्तत्वहेतुवादादपि लिङ्गात्पूषा स्वरूपेणैव पेषणे निमित्तम्, न तु देवतात्वेन। किंच 'सोमापौष्णं चरुं निर्वपेन्नेमपिष्टं पशुकामः' इति क्वचित्सोमापौष्णेऽर्धपिष्टमनुवदति। तदेतदन्यत्रापि सद्वितीये पूषणि पेषणे लिङ्गम्॥

ननु 'नेमपिष्टम्' इति नानुवादः, येनान्यत्रापि द्विदेवत्ये पेषणप्रवृत्तौ लिङ्गं स्यात्। किंतु 'नेमपिष्टम्' इति विधिरेव। क्वचिच्च द्विदेवत्येऽर्धपेषणविधानमन्यत्र सद्वितीये पूषणि पेषणाभावमेव प्रत्युत ज्ञापयतीत्याशङ्क्याह—

वचनात्सर्वपेषणं तं प्रति शास्त्रवत्त्वादर्थाभावाद्धि चरावपेषणं भवति॥ ३७॥

सोमपूषदेवताकचरोस्तत्र नेमपिष्टत्वस्य च विधौ वाक्यभेदः। 'सोमापौष्णं चरुम्' इत्यनूद्य नेमपिष्टत्वविधौ चोभयानुवादप्रयुक्तवाक्यभेददोषः। अन्यतरानुवादे यश्चरुः स नेमपिष्ट इत्याश्रयणे 'सोमापौष्णम्' इत्यनर्थकं स्यात्। यः सोमापौष्णः स नेमपिष्ट इत्याश्रयणे चरुशब्दोऽनर्थकः स्यात्। यदि तु चरमश्रुतत्वाच्चरुशब्दस्यैवानर्थक्यमाश्रित्य यः सोमापौष्णः स नेमपिष्ट इत्याश्रीयते, तर्हि वचनाच्चरुत्वमपुरस्कृत्य नेमपिष्टत्वविधानात्सर्वस्यापि सोमापौष्णस्य पशुचरुपुरोडाशात्मकस्यार्धांशपेषणं स्यात्। कुतः। तं प्रति शास्त्रवत्त्वात्। चरुत्वाविशेषितं सोमापौष्णं सर्वं प्रत्येवार्धांशपेषणस्य शास्त्रतात्पर्यविषयीभूतत्वात्। नन्वस्तु तर्हि पश्वादेरपि सोमापौष्णस्य पेषणं तत्राह—अर्थाभावादिति। चरुशब्दस्यानर्थक्यप्रसङ्गान्नैवाश्रयितुं युक्तमित्यर्थः। ननु तवापि नेमपिष्टमित्यस्यानुवादत्वादानर्थक्यं तुल्यमित्यत्राप्येतदेवोत्तरमर्थाभावादिति। 'नेमपिष्टम्' इत्यनुवादस्य पूषा स्वरूपेण पेषणनिमित्तं न तु देवतात्वेनेति ज्ञापनं प्रयोजनमस्तीति तस्यानुवादत्वं युज्यते। 'नेमपिष्टम्' इत्यस्य विधित्वे तूक्तरीत्या 'चरुम्' इत्यनुवादस्यानर्थक्यमेव। [2]पाक्षिकानुवादत्वं च दोषः; सोमापौष्णशब्दस्य यदा पशुविषयत्वं पुरोडाशविषयत्वं वा तदा चर्वनुवादत्वासंभवात्। अतः 'नेमपिष्टम्' इत्यस्यैवानुवादत्वमाश्रयितुं युज्यते। ननु पूर्वाधिकरणे पुरोडाशेऽर्थात्प्राप्तं पेषणं न विधातव्यम्। पशौ त्वर्थविप्रतिषेधान्न पेषणं विधातुं शक्यमिति परिशेषाच्चरोरेव पेषणमित्युक्तम्। अतः 'नान्तरिक्षे न दिव्यग्निश्चेतव्यः' इतिवत् 'चरुम्' इति नित्यानुवादोऽस्त्वित्याह— अर्थाभावाद्धि चरावपेषणं भवतीति। 'असूर्यंपश्या राजदाराः' इत्यादिवत् 'अपेषणम्' इत्यसमर्थसमासः। 'चरौ वार्थोक्तं पुरोडाशेऽर्थविप्रतिषेधात्पशौ न स्यात्' इति पूर्वाधिकरणसूत्रं केवलपूषदेवत्यविषयं न तु सद्वितीयविषयम्। न

1. देवतात्वाभावमात्रेण देवतात्वाभावाद्दन्ता उत्तिष्ठन्ति— क, ग. 2. पाक्षिकानुवादश्च—क.

हि सोमापौष्णपुरोडाशेऽर्धपेषणमर्थप्राप्तम्; येन तद्विधिर्नोपपद्येत। कृत्स्नपेषणस्यैव तत्र प्राप्तेः। ततश्च सर्वपेषणे प्राप्तेऽर्धपेषणं तत्र विधीयते। तावतैव च पुरोडाशं निष्पाद्यार्धान्तरं त्याज्यम्। अथवा अपिष्टं पिष्टं चोभयं संसृज्य कथंचित्पुरोडाशो निष्पाद्यः। हृदयादीनामपि उत्सादनदेशविशिष्टमर्धं विहायार्धान्तरपेषणे सति नात्यन्तमाकृतिनाशः। नाप्युत्सादनदेशव्यामोहः। तस्मान्न परिशेषसिद्धं चरोः पेषणम्। ततश्च, हि यतः, 'अर्थोक्तं पुरोडाशेऽर्थविप्रतिषेधात्पशौ न स्यात्' इत्युक्तार्थस्य पशौ पुरोडाशे चाभावाच्चरोरेव पेषणमिति परिशेषो न संभवति; अतः पेषणस्य पश्वादिसाधारणत्वात् 'सोमापौष्णं चरुम्' इति चरुशब्दः पाश्निकोऽनुवादः स्यादिति पूषदेवताकचरुद्रव्यकयागविधिपरमेवेदं वाक्यं स्वरूपेण पूषसंबन्धनिमित्तकं पेषणं प्राप्तमनुवदतीत्यवश्यमास्थेयमिति भवत्ययमनुवादः पूषा स्वरूपेणैव पेषणनिमित्तमित्यत्र लिङ्गमिति॥

तदेतत्सिद्धान्ती निराचष्टे—

एकस्मिन्वार्थधर्मत्वादैन्द्राग्नवदुभयोर्न स्यादचोदितत्वात्॥ ३८॥

वाशब्द एवार्थे। एकस्मिन् केवले एव पूषणि पेषणम्। न तु सद्वितीये। कुतः। अर्थधर्मत्वात्। अर्थ्यते फलनिष्पादकतयेत्यर्थ अपूर्वम्, तच्छेषत्वात्पेषणस्येत्यर्थः। प्रोक्षणादीनां व्रीह्यादिस्वरूपे आनर्थक्यादपूर्वसाधनरूपार्थत्वस्य नवमादौ वक्ष्यमाणत्वादिति भावः। कस्यापूर्वमित्यपेक्षिते पूषदेवत्ययागस्येति गम्यते। तथाहि। भज्यते प्राप्यत इति भागः। कर्मणि घञ्। स्वीकार्यं द्रव्यमुच्यते। प्रपिष्टो भागः स्वीकार्यं द्रव्यं यस्येति बहुव्रीहिणा पूषणि स्वीकार्यप्रपिष्टसंबन्धो योग्यतया स्वीकर्तृत्वमेवेति गम्यते। पूषा च प्रपिष्टं द्रव्यं परस्वं परेण पूषोद्देशेनात्यक्तं न स्वीकर्तुं प्रभवतीति प्रपिष्टस्य पूषोद्देशेन त्यागोऽप्याक्षेपाल्लभ्यते। त्यज्यमानहविरुद्देश्यत्वमेव देवतात्वमिति देवतोद्देश्यकद्रव्यत्यागो यागः समानसंवित्संवेद्यः। ततश्च पूषदेवताकयागः प्रपिष्टद्रव्यक इत्यर्थः पर्यवस्यति। एवं च पूषदेवत्ययागापूर्वधर्मः पेषणमिति देवतात्वेनैव पूषा पेषणनिमित्तम्। न तु स्वरूपेण। एवं च सोमापौष्णे तद्धितवशेनोभयोः सोमापूष्णोर्मिश्रयोरेव देवतात्वात्पूष्णो देवतात्वचोदनाभावात्पेषणं न भवति। ऐन्द्राग्नवत्। यथा ऐन्द्राग्नपुरोडाशे आग्नेयधर्मश्चतुर्धाकरणं न भवति तद्वत्। न च सोमापूष्णोर्देवतात्वस्य व्यासज्यवृत्तित्वेऽपि पूष्णोऽपि देवतात्वाश्रयत्वात्पेषणं कथं न स्यादिति वाच्यम्। न हि व्यासज्यवृत्तिधर्मप्रकारतायां प्रत्येकवृत्तिसंबन्धः संसर्गो भवितुमर्हति। अन्यथा एको द्वित्ववानिति बोधापत्तेः। ततश्च सोमापूष्णोरुभयोर्देवतात्वस्य पर्याप्तिसंबन्धेनैव प्रकारत्वात्तस्य च पूषांशे बाधात्केवलपूषदेवत्य एव पेषणम्॥

अथ यदुक्तम् 'अदन्तको हि' इति पेषणहेतोरदन्तकत्वस्य सद्वितीयेऽपि साम्यादस्ति पेषणमिति, तत्राह—

हेतुमात्रमदन्तत्वम् ॥ ३९ ॥

अकिंचित्करतायां मात्रशब्दः, 'संशयमात्रमेतद्भवति' 'प्रयोजनमात्रमेतद्भवति' इति महाभाष्यप्रयोगदर्शनात् । पेषणेऽदन्तकत्वं न हेतुरिति यावत्, हेत्वधिकरणे एवंजातीयकहेतुवादस्यार्किंचित्करत्वनिश्चयात् । ततश्च केवलपूषदेवत्ययागे पेषणविधेरेव प्रशंसापरमदन्तकवाक्यं व्यवतिष्ठते । न त्वन्यत्रापि सोमापौष्णे पेषणं कल्पयितुमलम्, देवतात्वनिमित्तकपेषणविधिविरोधात् । यथा 'तेन ह्यन्नं क्रियते' इति वाक्यम् 'शूर्पेण जुहोति' इति विधेरेव प्रशंसापरमवतिष्ठते, न तु येन येनान्नं क्रियते तेन तेन होतव्यमिति विधिं कल्पयितुमलम्– तद्वत् ॥

यच्च पेषणे पूषा स्वरूपेणैव निमित्तम् इत्यत्र क्वचित्सोमापौष्णे 'नेमपिष्टम्' इत्यनुवादो लिङ्गमिति, तत्राह—

वचनं परम् ॥ ४० ॥

यदन्यत् 'नेमपिष्टम्' इत्येतत् तत् वचनम् अर्धपेषणविधायकमेव, न त्वनुवादः येनान्यत्रापि द्विदेवत्ये पेषणे लिङ्गं स्यात् । न च वाक्यभेदः, विशिष्टविधानात् । प्राप्तकर्मानुवादेनानेकविधावेव तस्य दोषत्वात् । अन्यथा यदाग्नेयादिवाक्ये का गतिः । तस्मान्न सोमापौष्णादौ द्विदेवत्ये पेषणमिति सिद्धम् । यद्यपि वाजसनेयके 'प्रपिष्टानां पौष्णं चरुं श्रपयति' इति तद्धितश्रुत्या चरुशब्देन च केवलपूषदेवत्ये चरावेव पेषणं श्रुतम्, ततश्च 'तत्सर्वार्थमविशेषात्' इति पूर्वाधिकरणस्य पेषणे पूषा स्वरूपेण निमित्तं देवतात्वेन वेति विचारपरस्यैतदधिकरणस्य च नोन्मेषः; तथापि शाखान्तरोपसंहारस्यानित्यतायाः शाखान्तराधिकरणे निर्णीतत्वात् 'प्रपिष्टानां पौष्णं चरुम्' इति वाजसनेयकवाक्ये 'पूषा प्रपिष्टभागः' इति तैत्तिरीयकवाक्यस्यानुपसंहारे सति तद्विषयेयमधिकरणद्वयप्रवृत्तिरित्यास्तां तावत् । वृत्तमधिकरणम् ॥

इति तृतीयाध्यायस्य तृतीयः पादः ॥

चतुर्थः पादः ॥

निर्मथ्य निगमसिन्धून्विविधन्यायाभिधानमन्थानैः ।
धर्मसुधामुद्धरते भूयो मुनये नमोऽस्तु जैमिनये ॥

तदेवं श्रुत्यादिषु षट्सु प्रमाणेषु श्रुतिलिङ्गे प्रथमद्वितीयपादयोः तृतीयपादेऽवशिष्टानि चत्वारि विचार्य, तेषां षण्णां बलाबलविचारः तन्मूलभूतविरोधाविरोधविचारश्च प्रपञ्चितः ।

१ निवीताधिकरणम् ।

चतुर्थेऽस्मिन्पादे म एव विरोधाविरोधविचारः प्रस्तूयते । पूर्वत्र तद्विचारः प्रकरणबाधफलकः, इह प्रायेण प्रमाणान्तरबाधफलक इति पादान्तरत्वम् । दर्शपूर्णमासयोः श्रूयते 'निवीतं मनुष्याणां प्राचीनावीतं पितृणामुपवीतं देवानामुपव्ययते देवलक्ष्ममेव तत्कुरुते' इति । तत्र 'निवीतं मनुष्याणाम्' इति किमयं मनुष्यधर्मः, उत कर्मधर्मः, अथ कर्मयुक्तमनुष्यधर्मः, अथवा प्रकरणे यन्मनुष्यप्रधानमन्वाहार्यपचनादि कर्म तस्य धर्मः, आहोस्विदप्रकरणे यन्मनुष्यपूजात्मकमातिथ्यादि कर्म तस्य धर्मः इति पञ्चधा संशयः । तत्र पूर्वपक्षयति—

निवीतमिति मनुष्यधर्मः शब्दस्य तत्प्रधानत्वात् ॥ १ ॥

'निवीतम्' इत्यादिना मनुष्यधर्मः मनुष्यप्रधानं निव्यानं विधीयते । 'व्येञ् संवरणे' । अवसञ्जनमत्र विवक्षितम् । 'निवीतम्' इति भावे निष्ठा, कर्मणि वा । अजिनवासःसूत्राणामन्यतमं कर्णावसक्तं निवीतमिति स्मरन्ति । मनुष्यान्निव्यानेन संस्कुर्यादिति वचनव्यक्तिः । कुतः । शब्दस्य तत्प्रधानत्वात् 'मनुष्याणाम्' इति षष्ठ्यन्तशब्दस्य मनुष्यप्रधानत्वावगमकत्वादित्यर्थः । यथा 'द्वादशाहीनस्य' इति षष्ठीश्रुत्या बलीयस्या प्रकरणं बाध्यते । तस्मात्सुवर्णभरणादिवन्मनुष्यधर्मो निवीतम् ॥

अत्र सिद्धान्ती प्रत्यवतिष्ठते—

अपदेशो वार्थस्य विद्यमानत्वात् ॥ २ ॥

वाशब्दः प्रत्यवस्थाने । 'निवीतम्' इत्यनुवादः स्यात्, न तु मनुष्यधर्मविधिः । कुतः । अर्थस्य विद्यमानत्वात् निवीतशब्दार्थस्य कर्णावसञ्जनस्य लोकत एव प्राप्तिसद्भावात् । कृतपरिकरबन्धा एव ह्यव्यग्रतया लोके कर्मसु प्रगल्भन्ते । ततश्च परिकरबन्धत्वेन प्राप्तस्य निव्यानस्यायमनुवादः ॥

अथ पूर्वपक्षी निराचष्टे—

[1]विधिस्त्वपूर्ववत्त्वात्स्यात् ॥ ३ ॥

तुः शङ्कानिरासे । 'निवीतम्' इति मनुष्यधर्मविधिः स्यात्, न त्वनुवादः । कुतः । अपूर्ववत्त्वात् । पूर्वं प्रापकं प्रमाणान्तरं यस्य विद्यते तत्पूर्ववत् । नियमतस्तत्प्रापकप्रमाणान्तराभावादित्यर्थः । न हि निव्यानमवश्यं प्राप्तम्, तेन विनाप्यव्यग्रतायाः कक्ष्यादिनिबन्धनेन[2] कदाचित्संभवात् । तथा चापूर्वविधित्वाभावेऽपि पुरुषार्थनियमविधित्वं न विरुध्यते ॥

अथ कर्मधर्म इति द्वितीयं पक्षमुपक्षिपति—

स प्रायात्कर्मधर्मः स्यात् ॥ ४ ॥

सः निव्यानाख्योऽजिनादिविन्यासविशेषः दर्शपूर्णमासकर्मशेषः स्यात् । कुतः । प्रायात् सामिधेन्यादिदर्शपूर्णमासधर्मबहुलप्रदेशपाठात् । तथा च प्रयाजादिवन्निवीतमपि कथंभावपरिग्रहात्कर्मधर्मः । मनुष्यग्रहणं त्वनुवादः । ततश्च दर्शपूर्णमासयोः सर्वैरपि ऋत्विग्भिर्यजमानेन च निव्यानं कर्तव्यम् । तच्च 'उपव्ययते' इत्यनेन विकल्पते

अथ तृतीयमुपक्षिपति—

[3]वाक्यशेषवत्त्वात् ॥ ५ ॥

शेषशब्देन अन्तिमं समाख्याप्रमाणं विवक्षितम् । निवीतवाक्यस्य यजुर्वेदाम्नातस्याध्वर्युसमाख्यानवत्त्वात् यजुर्वेदस्य चाध्वर्युवेदत्वप्रसिद्धेः कर्मोपयुक्तकर्तृधर्मे सत्येव निव्याने कर्मापेक्षितकर्तृविशेषसमर्पिका आध्वर्यवसमाख्यानुगृह्यते । केवलकर्मधर्मत्वे तु सा व्यर्था सती बाध्येत । अतः कर्मयुक्तमनुष्यधर्मः ॥

इतोऽप्येवमित्याह—

तत्प्रकरणे यत्तत्संयुक्तमविप्रतिषेधात् ॥ ६ ॥

दर्शपूर्णमासप्रकरणे यत् अध्वर्युरूपमङ्गं श्रुतम्, तत्संयुक्तं तच्छेषभूतं निवीतम् । कुतः । अविप्रतिषेधात् श्रुतिप्रकरणसमाख्यानामविरोधात् । न हि षष्ठीश्रुत्या गम्यमानं मनुष्यधर्मत्वं प्रकरणगम्यं च कर्मधर्मत्वं समाख्यागम्यं चाध्वर्युधर्मत्वं विरुध्यते, येन बाध्यबाधकभावः स्यात् । अतः क्रतुयुक्ताध्वर्युधर्मः । एतदेव सूत्रं चतुर्थपक्षपरमपि योज्यम । तथाहि— दर्शपूर्णमासप्रकरणे तत्संयुक्तं मनुष्योद्देश्यकमन्वाहार्यपाकादिकर्म यत् तदर्थमेव निवीतम् । कुतः । एवं सत्येव अविप्रतिषेधात् ।

1. विधिस्त्वपूर्वत्वात्स्यात् 2. कक्ष्या नियन्धनेन...क. 3. वाक्यशेषत्वात्

अन्यथा 'मनुष्याणाम्' इत्यस्य वैयर्थ्यापत्त्या तद्विरोधात्। 'मनुष्याणाम्' इत्यस्य 'निवीतम्' इत्यनेनोद्देश्यतया संबन्धे सति 'मनुष्याणाम्' इत्यनुवादवैयर्थ्यात्। अतो मनुष्याणां शेषभूतं यत्कर्म तत्र निवीतमित्येव युक्तम्। 'प्राचीनावीतं पितृणामुपवीतं देवानाम्' इत्यत्र पितृदेवोद्देश्यककर्मधर्मत्वस्यैव वक्तव्यतया निवीतस्य [1]क्रतुयुक्तकर्तृधर्मत्वे तद्वैषम्यरूपविरोधाच्च। अप्राकरणिकातिथिपूजादिव्यावृत्तये 'तत्प्रकरणे' इति। ततश्च दर्शपूर्णमासप्रकरणे यन्मनुष्यप्रधानमन्वाहार्यपाकादिकर्म तत्र अध्वर्युणा निव्यातव्यमिति पर्यवस्यति। तत्र 'मनुष्याणाम्' इति षष्ठ्या मनुष्यप्रधानकत्वं प्रकरणादन्वाहार्यपाकादिसमाख्यया चाध्वर्युरूपमनुष्यविशेषवत्त्वं गम्यते इति विवेकः। ननु षष्ठीश्रुत्या लब्धं मनुष्यधर्मत्वमेव निव्यानम्याश्रयितुमुचितम; न तु प्रकरणलब्धस्यान्वाहार्यपाकादिकर्मणः समाख्यालब्धाध्वर्युत्वस्य चोद्देश्यकोटौ निवेश उचितः, बलीयस्या श्रुत्या तयोर्बाधादित्यत्राप्येतदेवोत्तरम् 'अविप्रतिषेधात्' इति। श्रुतिप्रकरणसमाख्यानामविरोधादित्यर्थः। मनुष्योद्देश्यकान्वाहार्यपाकादिकर्म अध्वर्युर्निव्यानेन कुर्यात् इत्येवं श्रुत्यादिलब्धानां परस्परान्वयसंभवात्। अयमेव पक्षः केनचित्सिद्धान्ततया परिगृहीतः। तद्भाष्यवार्तिकाननुगुणम्॥

अथ पञ्चमपक्षपरिग्रहेण सिद्धान्तयति—

तत्प्रधाने वा तुल्यवत्प्रसंख्यानादितरस्य तदर्थत्वात्॥ ७॥

वाशब्दोऽवधारणे। दर्शपूर्णमासप्रकरणापरिगृहीते मनुष्यप्रधानके आतिथ्यादिकर्मण्येव निवीतं निविशते; न तु प्रकरणपरिगृहीते मनुष्यप्रधानकान्वाहार्यपाकादावित्युद्देश्यकोटौ प्रकरणमपि निवेशनीयम्। कुतः। तुल्यवत्प्रसंख्यानादितरस्य तदर्थत्वात् 'तुल्यवत्' इति क्रियाविशेषणम्। स्वार्थे वतिः। तुल्यमेतानि वाक्यानि समाम्नातानि 'निवीतं मनुष्याणां प्राचीनावीतं पितृणामुपवीतं देवानाम्' इति। तत्रोपवीतप्राचीनावीते स्वतन्त्रदेवपितृप्रधानकर्मविषये समधिगते। 'उपवीतं देवानाम्' इति हि दर्शपूर्णमासकर्मणि देवप्रधाने उपवीतं विदधाति। 'प्राचीनावीतं पितृणाम्' इति तु पितृप्रधाने पिण्डपितृयज्ञादिकर्मणि प्राचीनावीतं विदधाति। अतस्तदवैषम्याय इतरस्य निवीतवाक्यस्यापि अतिथिपूजादिरूपमनुष्यप्रधानस्वतन्त्रकर्मार्थत्वं समभिव्याहाररूपवाक्यप्रमाणात् मन्यामहे। अतः प्रकरणादुत्कर्षो निवीतविधेरिति स्थितम्॥

तदेवं निवीतवाक्यस्य विधित्वमभ्युपगम्य मनुष्यधर्मत्वादिविचारः प्रक्रान्तः। वस्तुतो विधित्वमेव नास्ति। मनुष्यधर्मत्वादिविचारस्तु कृत्वाचिन्तयैवेति वक्तुं सिद्धान्ततयोत्प्रेक्षितं पञ्चमपक्षमपि निराकुर्वन्नर्थवादत्वमवलम्बते—

1. क्रतुयुक्तकर्मकर्तृधर्मत्वे— क.

अर्थवादो वाप्रकरणात् ॥ ८ ॥

वाशब्दोऽवधारणे। निवीतवाक्यम् 'उपव्ययते' इति विधेरर्थवाद एव। न त्वतिथिपूजादिकर्मणि निवीतविधिः। कुतः। प्रकरणात्। दार्शपूर्णमासिकोपव्यानविध्यर्थवादत्वे सत्येव प्रकरणानुग्रहात्। 'अप्रकरणात्' इत्यपि च्छेदः। अप्रकरणं बुद्धावपरिवृत्तिः। श्रुत्यादिषट्प्रमाणासंस्पृष्टातिथ्यादिकर्मणो बुद्ध्यनारोहाच्च ॥

इतोऽप्यर्थवादत्वमित्याह—

विधिना चैकवाक्यत्वात् ॥ ९ ॥

'शशाङ्कस्य रोहिणी' 'नलस्य दमयन्ती' इत्यादौ दारान्तरसत्त्वेऽपि रोहिण्यादयः प्रियतमा इति गम्यते। एवं च निवीतप्राचीनावीते यथा मनुष्याणां पितॄणां च प्रिये तथा देवानामुपवीतम् इत्येवं स्तुत्या वा निवीतप्राचीनावीतयोर्मनुष्यपितृविषयत्वेन देवान्प्रत्ययोग्यत्वादुपवीतमेव देवानां प्रशस्तम् इति विपर्ययमुखेन वा स्तुत्या 'उपव्ययते' इति प्रकृतविध्येकवाक्यत्वे संभवति अप्रकृतातिथिपूजादिविध्येकवाक्यत्वस्यानुचितत्वादर्थवादत्वमेव। चकारोऽनुक्तसमुच्चये। 'निवीतं मनुष्याणां प्राचीनावीतं पितृणाम्' इत्यत्र विधिप्रत्ययाश्रवणात् अनेकाहदृष्टकल्पनाप्रसङ्गाच्चेत्यर्थः। यद्यप्यौदुम्बराधिकरणे फलाय विध्यसंभवात् विध्येकवाक्यत्वसंभवाच्च अर्थवादत्वमास्थितम्, तथैवेहाप्यर्थवादत्वं वर्ण्यत इति पौनरुक्त्यम्, विध्यर्थवादत्वचिन्ताप्यस्मिन्नध्यायेऽसंगता, तथापि कृत्वाचिन्तात्वस्फोरणार्थमेव तदधिकरणसिद्धार्थवादत्वोपन्यास इत्यदोषः। तदेवम् 'उपव्ययते' इति विधीयमानमुपवीतं स्तोतुं निवीतादिवाक्यं प्रवृत्तमिति स्थितम्। अत्र च 'निवीतं मनुष्याणां प्राचीनावीतं पितृणामुपवीतं देवानाम्' इत्यन्यतःप्राप्तानामनुवादात् तत्प्रापकवचनानि वेदेषु विज्ञेयानि। तत्र 'यज्ञोपवीत्येवाधीयीत याजयेद्यजेत वा' 'संवीतं मानुषम्' इत्यादिवचनं तैत्तिरीयादिशाखासु प्रत्यक्षमेव। 'उपव्ययते' इति विधेस्तु प्रयोजनं वक्ष्यते। प्राचीनावीतविषये तु शाखान्तरे ज्ञेयम्। ज्ञात्वैव च स्मर्तारो निबध्नन्ति 'यज्ञोपवीती दैवानि कर्माणि कुर्वीत प्राचीनावीती पित्र्याणि निवीती मानुषाणि' इति। तत्र निवीतकार्याणि परिगणयति बोधायनः 'निवीतकार्योण्यृषीणां तर्पणं व्यवायः प्रजासंस्कारा अन्यत्र होमान्मूत्रपुरीषोत्सर्गः प्रेतोद्वहनं यानि चान्यानि मनुष्यकार्याणि' इति। अतिथिपूजा तु दैवकर्मैव, 'स एकः प्राजापत्यः कुटुम्बिनो यज्ञो नित्यप्रततः' इत्यादिना आतिथ्यकर्मणः प्रजापतिदेवताकत्वावगमात्। अतिथिस्तु आहवनीयादिवद्धविःप्रक्षेपाधारमात्रम् इति तत्रोपवीतमेवेति। एवं नित्यभोजनेऽपि आद्यानां पञ्चानां ग्रासानां प्राणादिदेवत्यत्वात्, 'तूष्णीं भूयो व्रतयेत्प्रजापतिं मनसा ध्यायन्' इति तदितरग्रासानां

प्रजापतिदेवत्यत्वात् । इदमेवाभिप्रेत्य स्मरन्ति 'उपासने गुरूणां वृद्धानामतिथीनां होमे जप्यकर्मणि भोजन आचमने स्वाध्याये च यज्ञोपवीती स्यात्' इत्यादि । अन्वाहार्यपाकादेर्मनुष्यकर्मत्वेऽपि तत्रोपवीतमेवेत्यनुपदमेव वक्ष्यते । इति निवीताधिकरणम् ॥

'उपव्ययते' इति दर्शपूर्णमासयोः श्रुतमुपवीतं किं सर्वकर्माङ्गम्, उत दर्शपूर्णमासाङ्गमिति संशये पूर्वपक्षयति—

उपवीतं लिङ्गदर्शनात्सर्वधर्मः स्यात् ॥ १० ॥

उपवीतं सर्वकर्माङ्गं स्यात् । कुतः । लिङ्गदर्शनात् । जीवदवस्थायां प्रक्रान्ते दिष्टगताग्निहोत्रे श्रूयते 'प्राचीनावीती दोहयेद्यज्ञोपवीती हि देवेभ्यो दोहयति' इति । तत्र यद्यपि 'तूष्णीं जुहोति' इति वचनात् 'यत्तूष्णीं तत्प्राजापत्यम्' इति प्रजापतिदेवताकत्वं प्राप्तम्, तथाप्यत्र दोहने प्राचीनावीतविधानात्पित्र्यत्वं विज्ञायत इति स्थितिः । तत्र यदि सर्वकर्मार्थमुपवीतं स्यात्, तदा जीवदग्निहोत्रेऽग्निसूर्यादिदेवप्रधाने कर्मणि 'यज्ञोपवीती हि देवेभ्यो दोहयति' इत्यनुवाद उपपद्यते । उपवीतस्य दर्शपूर्णमासार्थत्वे तु तल्लोपवीतस्याप्राप्तेरनुवादो नावकल्पेत, अग्निहोत्रस्यापूर्वत्वेन दर्शपूर्णमासतश्चोदकतस्तत्प्राप्त्यभावात् । ततश्च जीवदग्निहोत्रे दोहने यज्ञोपवीतस्य सिद्धवदनुवादाल्लिङ्गात्प्रकरणं बाधित्वा 'उपव्ययते' इति विधेः सर्वकर्मसु निवेशं मन्यामहे । न च दर्शपूर्णमासस्थोपवीतस्यैवायमनुवादोऽस्त्विति वाच्यम्, विप्रकृष्टत्वात् 'देवेभ्यो दोहयति' इति बहुवचनानुपपत्तेश्च । तत्रेन्द्रस्य महेन्द्रस्य वा एकस्यैव सांनाय्यदेवतात्वात् । न च द्वितीयस्य तृतीये 'अयनेषु चोदनान्तरं संज्ञोपबन्धात्' इत्यधिकरणे दाक्षायणयज्ञस्य दर्शपूर्णमासानन्यत्ववर्णनात् 'पूर्णमासे संनयेन्मैत्रावरुण्यामिक्षयामावास्यायां यजेत' इति तदीयदेवताबहुत्वाभिप्रायं बहुवचनमिति वाच्यम्, दाक्षायणयज्ञस्य काम्यत्वेनानित्यतया तदीयदोहदेवतानां नित्यवच्छ्रुतबहुवचनेनानुवादासंभवात् । तस्मात् 'यज्ञोपवीती हि देवेभ्यो दोहयति' इति जीवदग्निहोत्रविषयमेवेति तदनुवादाल्लिङ्गात्सर्वकर्मार्थम् 'उपव्ययते' इति विधानम् ॥

२. उपव्ययत इति वाक्यविहितोपवीतस्य दर्शपूर्णमासमात्राङ्गताधिकरणम् ।

अथ सिद्धान्तयति—

न वाप्रकरणात्तस्य दर्शनम् ॥ ११ ॥

वाशब्द एवार्थे । 'अप्रकरणात्' इत्यपि च्छेदः । नैवोपवीतं सर्वकर्माङ्गम्, किं तु दर्शपूर्णमासाङ्गमेव । कुतः । प्रकरणात् । अथ लिङ्गदर्शनमन्यथयति—अप्रकरणात्तस्य दर्शनमिति । तस्य उपवीतस्य दर्शपूर्णमासगतस्यैव 'यज्ञोपवीती हि देवेभ्यः' इत्यनुवादः । कुतः । अप्रकरणात् प्रकृता-

लाभात्। अनुवादो हि प्राप्त्यपेक्षः। स च संनिकृष्टाभावे विप्रकृष्टविषयोऽप्याश्रीयते। बहुवचनं प्रकृतिविकृतिदेवताभिप्रायमविवक्षितार्थं वेति अगत्या आश्रयणीयम्। न ह्यग्निहोत्रविषयमिदं बहुवचनमिति युज्यते, तस्याग्निसूर्यमात्रप्रधानदेवत्यत्वस्य तत्प्रख्याधिकरणे निरूपितत्वात्। अङ्गदेवतां प्रजापतिमादाय बहुवचनसमावेशे स्विष्टकृतमादाय दर्शपूर्णमासयोरेव तदुपपत्तेः। दर्शे स्विष्टकृति दोहद्रव्यस्यापि समावेशात्। केचित्तु 'तस्य दर्शनम्' इत्येतदन्यथा व्याचक्षते। तस्य उपवीतस्य 'यज्ञोपवीती दैवानि कर्माणि करोति' इति स्मृतिमूलश्रुत्या जीवदग्निहोत्रे प्राप्तस्य 'यज्ञोपवीती हि देवेभ्यः' इत्यनुवाद इति। ततश्च 'यज्ञोपवीती हि' इत्यनुवादस्य दर्शपूर्णमासविषयत्वात्, अग्निहोत्रविषयत्वेऽपि स्मार्तयज्ञोपवीतविषयत्वेनान्यथासिद्धत्वात्, दर्शपूर्णमासाङ्गतयैव 'उपव्ययते' इति विधिरिति सिद्धम्। यद्यप्यग्निहोत्रादावपि स्मृत्या यज्ञोपवीतं प्राप्तत एव, तथापि स्मृतिमूलश्रुतेरविज्ञातवेदविशेषस्थत्वात्, तद्विहितापचारेऽविज्ञातवेदविहितभ्रेषे 'भूर्भुवःसुवरित्याहवनीये जुहुयात्' इति प्रायश्चित्तमग्निहोत्रादौ भवति। दर्शपूर्णमासयोस्तु 'उपव्ययते' इति यजुर्वेदे तैत्तिरीयशाखायां विधानात् तदपचारे 'यदि यजुष्टो यज्ञभ्रेष आगच्छेद्ध्रुवः स्वाहेति दक्षिणाग्नौ जुहुयात्' इति प्रायश्चित्तं भवति। वृत्तमधिकरणम्॥

'उपव्ययते' इत्यनुवादो विधिर्वेति संशयः। तत्र 'नित्ययज्ञोपवीती' इति स्मृतिमूलश्रुत्या विहितमेकं यज्ञोपवीतं पुरुषार्थतया नित्यधार्यम्। 'यज्ञोपवीत्येवाधीयीत याजयेद्यजेत' इति तैत्तिरीयश्रुत्या 'यज्ञोपवीती दैवानि कर्माणि करोति' इति स्मृतिमूलश्रुत्या च सर्वार्थतया विहितमन्यद्यज्ञोपवीतम्। तदेतत्पुरुषार्थेन यज्ञोपवीतेन समुच्चीयते, क्रतुपुरुषार्थतया संयोगभेदात्। बोधायनसूत्रे 'नित्यमित्याचार्याः संप्रतिपन्नाः कथमेतदुच्यते' इति कर्मसु 'नित्ययज्ञोपवीती' इत्येवं सिद्धे पुनस्तद्विधानं व्यर्थमित्याक्षिप्य 'अजिनं वासः सूत्रं वा द्वितीयं यस्य यद्भवति तेन स उपव्ययते' इति समुच्चयवचनाच्च, टुप्टीकावार्तिके 'यज्ञोपवीतेनोपवीतस्याविरोधात्समुच्चयः' इति वक्ष्यमाणत्वाच्च। तदेतदुभयविधस्योपवीतस्य 'उपव्ययते' इत्यनुवादो दर्शपूर्णमासयोरिति प्राप्ते, सिद्धान्तयति—

विधिर्वा स्यादपूर्वत्वात्॥ १२॥

वाशब्द एवार्थे। 'उपव्ययते' इति विधिरेव, न त्वनुवादः। स हि गुणविध्यर्थो वा स्यात् स्तुत्यर्थो वा। नात्र विधेयो गुणः कश्चिदुपलभ्यते। नापि स्तोतव्यं किंचिदस्ति।

३. उपव्ययत इत्यस्य विधित्वाधिकरणम्।

यदुक्तम् उपवीतमन्यतः प्राप्तत्वान्न विधेयमिति, तत्राह— अपूर्वत्वादिति। न विद्यते पूर्वं प्रापकं प्रमाणं यस्य तदपूर्वम्। प्रापकप्रमाणाभावादित्यर्थः। दर्शपूर्णमासयोर्हि मनुष्यप्रधानान्वाहार्यपाकादिकर्मणि 'स्वधा पितृभ्यः'

इति प्रोक्षणीशेषनिनयने च पित्र्यकर्मणि निवीतप्राचीनावीताभ्यां बाधितमुपवीतम् 'उपव्ययते' इति प्रतिप्रसूयते। भवस्वामिप्रभृतयो याज्ञिका अपि बहव एवमाहुः। एवं चाग्निहोत्राद्यङ्गभूत-पित्र्यकर्मणि 'स्वधा पितृभ्यः' इति लेपनिर्मार्गादौ प्रतिप्रसवाभावात्प्राचीनावीतमेव भवति। वृत्त-मधिकरणम् ॥

तत्रैव दिष्टगताग्निहोत्रे श्रूयते 'ये पुरोदञ्चो दर्भास्तान्दक्षिणाग्रान्करोति' इति। पुरा जीवदवस्थायां प्रक्रान्ते दिष्टगतार्ग्निहोत्रे ये परिस्तरणदर्भा उदग्राः स्थिताः, तान्दिष्टगताग्निहोत्रे दक्षिणाग्रान्कुर्यादित्यर्थः। तत्र 'ये पुरोदञ्चः—' इति किं विधिः उतानुवाद इति संशये, पूर्व-पक्षयति—

उदक्त्वं चापूर्वत्वात् ॥ १३ ॥

'तान्दक्षिणाग्रान्' इत्यनेन दिष्टगताग्निहोत्रे परिस्तरणदर्भाणां दक्षिणाग्रत्वमिव जीवद-ग्निहोत्रे तेषामुदगग्रत्वं 'ये पुरोदञ्चः—' इत्यनेन विधीयते। कुतः। अपूर्वत्वात् अप्राप्तार्थत्वात्।

४. ये पुरोदञ्चो दर्भा इत्यस्यानुवादता-धिकरणम्।

न च 'प्रागग्राण्युदगग्राणि वा' इति स्मृत्या तत्प्राप्तिरिति वाच्यम्। स्मृतेः श्रुतिमूलकत्वेन श्रुतेः स्मृतिप्राप्तानुवादत्वासंभवात्, स्मृतिमूलश्रुतितः प्राप्त्य-भिधाने च आवश्यकत्वादस्या एव श्रुतेर्मूलतया अन्यतस्तत्प्राप्त्यसंभवात्। ततश्च यच्छब्दोपबन्धे सत्यपि व्यवहितान्वयाध्याहारकल्पनया वाक्यभेदेन च विधिद्वयमास्थेयम्। तत्र पुरा जीवदवस्थायां प्रक्रान्तेऽग्निहोत्रे ये दर्भाः, ते उदग्राः कार्या इत्येकं वाक्यम्; ये पुरा उदञ्चः परिस्तरणदर्भाः, तान्दक्षिणाग्रान्कुर्यादित्यपरं वाक्यम् ॥

अथ सिद्धान्तयति—

सतो वा लिङ्गदर्शनम् ॥ १४ ॥

वाशब्द एवार्थे। सतः स्मृतिप्राप्तस्योदगग्रत्वस्यायमनुवादः। न तु विधिः। यतः अनु-वादत्वे एकवाक्यत्वे च लिङ्गस्य यत्तच्छब्दोपबन्धस्य दर्शनमस्ति। न च प्राप्त्यभावः, 'उदग-ग्राणि प्रागग्राणि वा' इति स्मृत्या तत्प्राप्तेः। न चेयमेव श्रुतिः स्मृतेर्मूलमिति वाच्यम्, स्मृतेः सर्वसाधारणतया तां प्रति जीवदग्निहोत्रमात्रविषयायाः 'ये पुरोदञ्चः—' इति श्रुतेर्मूलत्वासंभवेन मूलान्तरस्यैव कल्पनीयत्वात्, कल्पिते तस्मिन् श्रुत्यन्तरे तत एव जीवदग्निहोत्रेऽपि प्राप्तेरनुवाद एवायम्। एवं च यत्तच्छब्दोपबन्धाभ्यां स्वरसतः प्रतीयमानमेकवाक्यत्वमप्यनुसृतं भवति। वा-क्यभेदे च 'तान्दक्षिणाग्रान्करोति' इति तच्छब्दस्य वाक्यान्तरगतयच्छब्देनान्वयः, 'ये पुरोदञ्चः—' इति पूर्ववाक्ये तच्छब्दान्तरस्य कार्या इत्यस्य चाध्याहारश्च नाश्रितो भवति।

प्रयोजनम्—पूर्वपक्षे जीवदग्निहोत्रे उदक्त्वस्यापचारे यजुर्भेषप्रायश्चित्तम्, सिद्धान्ते तु उदक्त्वस्याविज्ञातवेदविशेषमूलकस्मृतिमूलकत्वात् तदपचारे [1]अविज्ञातभेषप्रायश्चित्तमिति । वृत्तमधिकरणम् ॥

तदेवम् 'विधिर्वा स्यादपूर्वत्वात्' इति सूत्रेणैकमधिकरणम्, तदुत्तरसूत्राभ्यां च अधिकरणान्तरं वर्णितम् । तत्र 'विधिर्वा स्यादपूर्वत्वात्' 'सतो वा लिङ्गदर्शनम्' इति सूत्रयोरधिकरणान्तरपरत्वमप्यावृत्त्या लभ्यते । तथाहि— 'यज्ञोपवीती हि देवेभ्यो दोहयति' इति किमयं जीवदग्निहोत्रे दैवे यज्ञोपवीतविधिः, उत मृताग्निहोत्रदोहे 'प्राचीनावीती दोहयति' इति विधातुं दर्शपूर्णमासादिषु प्राप्तस्योपवीतस्य विधेयप्राचीनावीतस्तुत्यर्थोऽनुवाद इति संशये, पूर्वपक्षयति— **विधिर्वा स्यादपूर्वत्वात्** । जीवदग्निहोत्रदोहे उपवीतविधिरेवायम । यद्यपि 'न वाप्रकरणात्तस्य दर्शनम्' इति पूर्वसूत्रे दार्शपूर्णमासिकानुवादत्वमुक्तं तथापि तन्न संभवति, दिष्टगताग्निहोत्रदोहविषयप्राचीनावीतसमभिव्याहारेण 'यज्ञोपवीती हि देवेभ्यः' इत्यस्य जीवदग्निहोत्रदोहविषयत्वस्य स्वरसतः प्रतीतेः, [2]अग्निहोत्रे चाप्राप्तत्वेन यज्ञोपवीतस्य विधिरयम । यद्यपि 'यज्ञोपवीती दैवानि कर्माणि' इति स्मृत्या 'यज्ञोपवीत्येवाधीयीत, याजयेद्यजेत' इत्यादिश्रुत्या च सर्वकर्मार्थं यज्ञोपवीतं विहितं जीवदग्निहोत्रे प्राप्तम्, तथापि तत्र 'स्वधा पितृभ्य इति लेपं निमार्ष्टि' इत्यादिपित्र्यकर्मणि स्मृतिप्राप्तेन प्राचीनावीतेन बाधो मा भूदिति पुनर्विधिः । हि-शब्दस्तु विधानानन्तरभाविप्रसिद्धिद्योतक इति न विरोध इति स्थिते, वाक्यान्तरविषयेऽपि पूर्वपक्षमुपक्षिपति— **उदक्त्वं चापूर्वत्वात्** । उक्तोऽर्थः । तदिदं पूर्वपक्षद्वयमप्येकेनैव सूत्रेण निराचष्टे— **सतो वा लिङ्गदर्शनम्** । 'ये पुरोदश्वः—' इति विषये सिद्धान्ततया व्याख्यातमेवैतत् । 'यज्ञोपवीती हि देवेभ्यः' इति वाक्यविषयेऽप्येवं योज्यम् । उक्तश्रुतिस्मृतिभ्यां सर्वकर्मार्थतया विहितस्य जीवदग्निहोत्रे सतः विद्यमानस्योपवीतस्य अनुवाद एवायम्, यतः लिङ्गस्य अनुवादत्वद्योतकस्य हि-शब्दस्यात्र दर्शनमस्ति; स्वरसतः स्ववाक्यगतहिशब्दावगतानुवादत्वाश्रयणे संभवति वाक्यान्तरसमभिव्याहारलभ्यस्य जीवदग्निहोत्रविषयत्वस्याश्रयणायोगादिति भावः । प्रयोजनम्— पूर्वपक्षे जीवदग्निहोत्रे पित्र्यनिमार्जनादिकर्मणि यज्ञोपवीतमेव न तु प्राचीनावीतम्, सिद्धान्ते तु प्राचीनावीतमिति । वृत्तमधिकरणम् ॥

५. उपरि हि देवेभ्यो धारयतीत्यस्य विधित्वाधिकरणम् ।

दिष्टगताग्निहोत्रे श्रूयते 'अधस्तात्समिधं धारयन्ननुद्रवेदुपरि हि देवेभ्यो धारयति' इति । गार्हपत्यसमीपे स्थालीगतं हविरग्निहोत्रहवण्यामुन्नीय तदधस्तात्समिधं धारयन्नाहवनीयसमीपं नयेत्; हि यतः दैवे जीवदग्निहोत्रे समिधमग्निहोत्रहवण्यामुपरि धारयतीत्यर्थः । तत्र 'उपरि हि देवेभ्यो धारयति' इति किमनुवादः, उत विधिरिति संशयः । सर्वमभ्यर्हितं द्रव्यमाच्छाद्यैव नेयमिति समयाचारसिद्धम् । तत्राग्निहोत्रद्रव्यस्यापि नीयमानस्य येन केनचिदाच्छादने प्राप्ते 'समि-

1. अविज्ञातप्रायश्चित्तम्— क. 2. अग्निहोत्रे चाप्राप्तत्वात्— क.

धमुपसंगृह्य' इति समिन्नियम्यते। सा च समित् उपरि धार्यमाणैवाच्छादयितुं प्रभवतीति जीवदग्निहोत्रे प्राप्तमुपरिधारणमनूद्यते दिष्टगताग्निहोत्रे विधेयमधस्ताद्धारणं स्तोतुमिति प्राप्ते, सिद्धान्तयति—

विधिस्तु धारणेऽपूर्वत्वात् ॥ १५ ॥

तुर्वैषम्ये। न पूर्ववदनुवादोऽत्र युज्यते। किंतु जीवदग्निहोत्रे उपरिधारणं विधिरेवायम्। कुतः। अपूर्वत्वात् जीवदग्निहोत्रे उपरिधारणस्याप्राप्तत्वात्। उपरिधारणविध्यभावे हि 'स्रुग्दण्डे समिधमुपसंगृह्य' इति श्रवणात् कृत्स्नाया अपि समिधः स्रुग्दण्ड एव धारणं भवेत्, न तु बिलस्थहविरुपरि। ततश्च समिधा आच्छादनमत्यन्ताप्राप्तमिति विधिरेवायम् 'धारयति' इति। लेड्रूपं कल्प्यम्। हि-शब्दश्च विध्यनन्तरभाविप्रसिद्धिं द्योतयति। सति चोपरिधारणविधौ स्रुग्दण्डे बिलसमीपप्रदेशे समिधो मूलांशस्य बिलप्रदेशे च मध्याग्रांशस्य धारणमिति न विरोधः। वृत्तमधिकरणम्॥

ज्योतिष्टोमे श्रूयते 'दिशो व्यभजन्त प्राचीं देवा दक्षिणा पितरः प्रतीचीं मनुष्या उदीचीꣳ रुद्राः' इति। तत्र 'प्रतीचीं मनुष्याः' इति वाक्ये निवीताधिकरणमतिदिशति—

दिग्विभागश्च तद्वत् ॥ १६ ॥

प्रतीचीविभागोऽपि निवीतवदेव प्रत्येतव्यः॥ देवपितृरुद्राणां कर्मानधिकारस्य षष्ठे वक्ष्यमाणत्वात्तद्धर्मत्वादिसर्वपक्षाणां देवादिसंयुक्तवाक्येष्वसंभवान्न तेषामिह विषयत्वम्। तत्र 'मनुष्या व्यभजन्त' इति सामानाधिकरण्यश्रवणादेव मनुष्यधर्मत्वमिति प्रथमसूत्रं योज्यम्। प्रायेण पूर्वाह्णे व्याप्रियमाणानां मनुष्याणामादित्यं पृष्ठतः कर्तुं प्रतीचीसंबन्धस्यार्थतः प्राप्तत्वान्न मनुष्यधर्मतया तद्विधिरिति शङ्कापरतया 'अपदेशो वा' इति द्वितीयं सूत्रं योज्यम्। नियोगतस्तदप्राप्तेर्नियमविधिरिति 'विधिस्त्वपूर्ववत्त्वात्स्यात्' इति सूत्रेण तत्परिहारः। प्रकरणसमाख्यानाभ्यां कर्मधर्मः, मनुष्यसामानाधिकरण्यश्रवणप्रकरणसमाख्यानामविरोधात्क्रतुयुक्तकर्तृधर्मः, मनुष्यपदस्यावैयर्थ्याय श्रुत्यादिप्रमाणानुग्रहाय च प्राकरणिकमनुष्यप्रधानदक्षिणाप्रतिग्रहादिकर्मधर्मः, वाक्येन प्रकरणसमाख्ययोर्बाधादातिथ्यादौ निवेशः, आतिथ्यादिकर्मणोऽतिव्यवहितत्वान् प्रकरणे संभवतश्चानुत्कर्षात् 'प्राचीनवꣳशं करोति' इति विध्येकवाक्यत्वाच्च प्रतीचीविभागवाक्यमर्थवादः— इत्येवं यथासंभवं पक्षा योज्याः। केचित्तु 'दिग्विभागश्च तद्वत्संबन्धस्यार्थहेतुत्वात्' इति पठन्ति—दिग्विभागवाक्यमपि निवीतवाक्यवज्ज्ञेयम्; न च 'प्रतीची मनुष्यैर्विभाज्या' इति विधिः कल्प्यतामिति वाच्यम्, संबन्धस्यार्थहेतुत्वात्, अर्भ्यते अपेक्ष्यत इत्यर्थः स्तुतिः, प्रतीच्या मनुष्यसंबन्धकीर्तनस्य प्राचीनवंश-

६. दिग्विभागस्यानुवादताधिकरणम्।

विध्याकाङ्क्षितस्तुतिप्रयोजनकत्वे संभवति विध्यन्तरकल्पनाया अनुचितत्वादिति व्याख्येयम्। ननु निवीताधिकरणातिदेशपरत्वे तदनन्तरमेवेदमधिकरणं प्रवर्तयितुमुचितमिति चेत्— अत एव 'उपवीतं लिङ्गदर्शनात् सर्वधर्मः स्यात्' इति षट् सूत्राण्यनार्षाणीति प्रतीमः, भाष्ये तेषामव्याख्यातत्वाच्चेति केचित्; भाष्यकृतो विस्मरन्ति स्मेत्येके; भाष्यसंदर्भ उत्सन्न इत्यपरे; फल्गुत्वादुपेक्षितानीत्यन्ये; वृत्तिकारैस्तु सर्वैर्व्याख्यातानीमानि षट् सूत्राणि, सन्ति च जैमिनेरप्येवंप्रकाराण्यसारभूतानि सूत्राणि, व्यवहितातिदेशाश्च 'पानव्यापच्च तद्वत्' इत्यादावाश्रिताः— इति वार्तिके बहुधोत्प्रेक्षितम। वृत्तमधिकरणम॥

महापितृयज्ञे श्रूयते 'यत्पुरुषि दिनं तद्देवानाम्, यदन्तरा तन्मनुष्याणाम्, यत्समूलं तत्पितृणाम्, ममूलं बर्हिर्भवति व्यावृत्त्यै' इति। पुरुषि पर्वणि, दिनं लूनम्, अन्तरा मूलपर्वणोर्मध्ये। तत्रैव श्रूयते 'यत्पूर्णं तन्मनुष्याणाम्, उपर्यर्धो देवानाम्, अर्धः पितृणाम्, अर्ध उपमन्थति' इति। तथा ज्योतिष्टोमे श्रूयते 'घृतं देवानां मस्तु पितृणां निष्पक्वं मनुष्याणां तद्वा एतत्सर्वदेवत्यं यन्नवनीतं यन्नवनीतेनाभ्यङ्क्ते' इति। घृतम् अग्नौ विलीनम्, मस्तु स्वयं विलीनम्, निष्पक्वं सुरभि वस्तु प्रक्षिप्य पक्वम्, 'सुरभि घृतं मनुष्याणाम्' इति बह्वृचब्राह्मणम्। तथा दर्शपूर्णमासयोः श्रूयते 'यो विदग्धः स नैर्ऋतो योऽशृतः स रौद्रो यः शृतः स सदेवस्तस्मादविदहता शृतंकृत्यः' इति। एतेष्वपि वाक्येषु निवीताधिकरणमतिदिशति—

[1]पुरुषिदिनपूर्णघृतविदग्धं च तद्वत्॥ १७॥

समाहारद्वन्द्वः। पुरुषिदिनादिशब्दैस्तद्घटितवाक्यानि विवक्षितानि, अनुकरणत्वात्। पुरुषीति सप्तम्या न लुक्। एतान्यपि वाक्यानि निवीतवाक्यवदेव प्रत्येतव्यानि॥ तत्र मनुष्यसंयुक्तेषु 'यदन्तरा तन्मनुष्याणाम्' 'यत्पूर्णं तन्मनुष्याणाम्' 'निष्पक्वं मनुष्याणाम्' इत्येतेषु मनुष्यधर्मत्वादयः सर्वेऽपि पक्षाः सुयोजाः। विदग्धवाक्ये तु निर्ऋतिधर्म इत्यसंभवात्प्राकरणिकहविषो विदाहे निमित्ते प्राकरणिकदेवतापनयेन निर्ऋतिदेवताविधिः, एवं रौद्रवाक्येऽपि; अथवा यो नैर्ऋतः स विदग्धः कार्यः यो रौद्रः सोऽशृतः कार्य इति नैर्ऋते रौद्रे च हविषि विदग्धादिविधिः, यद्वा अर्थवादः— इति पक्षा योज्याः। तत्र 'यदन्तरा' इत्यादिमनुष्यसंयुक्तवाक्येषु मनुष्यभागाय क्रियमाणं दर्भलवनं मूलपर्वणोर्मध्ये कार्यम, धान्यादिकं च मीयमानं पूर्णं मातव्यम, अभ्यञ्जनादि स्नेहकार्यं निष्पक्वेन कार्यमिति नियम्यत इति मनुष्यधर्मत्वपक्षः। यद्वा प्रकरणसमाख्याभ्यां तत्तत्कर्मधर्मः; ततश्च महापितृयज्ञे दर्भाणामन्तरालवनम् 'समूलं बर्हिर्भवति' इत्यनेन विकल्पते, आज्यं च स्थाल्यां पूर्णं निर्वपणी-

७. पुरुषिदिनादीनामनुवादताधिकरणम्।

1. पुरुषिदित ..

यम, सोमे चाज्यकार्यं निष्पक्केन कर्तव्यमिति नियमः फलति; 'मनुष्याणाम्' इति अर्थप्राप्तकर्त्रनुवादः। अथवा श्रुतिप्रकरणसमाख्यानामविरोधात्प्राकरणिकाध्वर्युधर्मः, ततश्च महापितृयज्ञे दर्भाणामन्तरालवनं धान्यादीनां च पूर्णत्वं सोमे चाज्यस्य निष्पक्कत्वमध्वर्युणा कर्तव्यम्, एतैः संस्कृतोऽध्वर्युः कर्माङ्गम्। अपि वा मनुष्यपदावैयर्थ्याय श्रुत्यादिसर्वप्रमाणाविरोधाय च प्राकरणिकमनुष्यप्रधानकर्मणि निवेशः, ततश्च महापितृयज्ञे तथाविधहोतृसदनार्थदर्भाणामन्तरालवनम् अन्वाहार्यस्य पूरणं सोमे च तानूनप्त्रादिप्रचारे [1]आज्यस्य निष्पक्कत्वं कार्यम्। अथवा स्वतन्त्रमनुष्यप्रधानातिथ्यादिकर्मणि विष्टरादिदर्भाणामन्तरालवनम् ओदनादीनां पूर्णत्वम् आज्यस्य च निष्पक्कत्वं कार्यमिति। तत्र विधित्वाभ्युपगमे नियमादृष्टकल्पनादिदोषप्रसङ्गादर्थवादत्वमिति स्थितम्। यद्यप्यत्र नियमादृष्टस्याविघ्नसमाप्त्यर्थतयापेक्षावशाल्लवनादिष्वेवोपयोगसंभवाददृष्टसाध्यस्वर्गादिफलं न कल्प्यम्, तथा विदग्धवाक्येऽपि नैर्ऋतादियागोपकारस्यैव फलत्वान्नादृष्टफलकल्पनम्; तथापि लवनादिसौकर्यसिद्धयर्थतया लोकतः प्राप्तत्वादन्तरादीनामनुवादः, ततश्च यादृच्छिकलौकिकान्तरालवनमुद्दिश्य मनुष्यसंबन्धस्तुत्यर्थतयैवोपदेशोपपत्तेर्न विधिकल्पनम्, विदग्धवाक्येऽपि विदग्धस्य कर्मानर्हत्वफलकनिर्ऋतिसंबन्धमात्रस्य प्रतिपादनान्निर्ऋतेश्च [2]देवतानर्हभक्षकत्वस्य प्रमाणान्तरसिद्धत्वान्न विधिकल्पनम् इत्यधिकाशङ्कापरिहारार्थमेतत्सूत्रम्। वृत्तमधिकरणम् ॥

दर्शपूर्णमासयोः श्रूयते 'नानृतं वदेत्' इति। किमयं पुरुषधर्मतया विधिः, उत क्रतुयुक्तपुरुषधर्मतयानुवादः, यद्वा केवलक्रतुधर्मतयानुवादः, अथवा केवलक्रतुधर्मतया विधिः इति संशये, पूर्वपक्षयति—

अकर्म क्रतुसंयुक्तं संयोगान्नित्यानुवादः स्यात् ॥ १८ ॥

निवीतसूत्रान्मण्डूकप्लुत्या मनुष्यधर्म इत्यनुवर्तते। अकर्म अनृतवदनवर्जनं प्रकरणात्क्रतुसंयुक्ततया प्रसक्तं पुरुषधर्मतयैव प्रत्येतव्यम्। कुतः। संयोगात् अनृतवर्जनस्य श्रुत्या पुरुषसंयोगावगमात्। 'वदेत्' इत्याख्यातेन हि कर्ताभिधीयते, कर्तुस्तत्र नियमेन प्रतीतेः। 'लः कर्मणि च भावे चाकर्मकेभ्यः' इति स्मरणाच्च, तत्र चकारेण 'कर्तरि कृत्' इति पूर्वसूत्रस्थकर्तुरनुकर्षणात्। कर्तृविशेषसमर्पकप्रथमान्तपदसामानाधिकरण्याच्च, कथमन्यथा 'युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः' 'अस्मद्युत्तमः' 'शेषे प्रथमः' इति तिङ्समानाधिकरणे युष्मदस्मदि च क्रमेण मध्यमोत्तमपुरुषौ, अन्यत्र प्रथमपुरुष इति पुरुषव्यवस्था सिध्येत्। तथा च कर्तुराख्यातवाच्यत्वे सति प्रत्ययार्थत्वेन प्रधानतया तं प्रति धात्वर्थस्य वदनस्य गुणत्वात् समानपदश्रुत्या पुरुषार्थं वदनमिति तत्प्रतिषेध-

८. अनृतवदननिषेधस्य क्रतुधर्मताधिकरणम्।

1. आज्यं निष्पक्कं—क, ख. 2. 'देवतान्नभक्षकत्वस्य' इत्येव पाठो सर्वत्र दृश्यते। अयं तु कल्पितः।

स्यापि पुरुषार्थत्वं सिध्यति। यदर्थं वदनं तदर्थताया एव तत्प्रतिषेधस्य न्याय्यत्वात्। प्रतिषेधविधिर्हि प्रतिषेध्यस्यानिष्टसाधनत्वं गमयति, अन्यथा तत्प्रतिषेधस्यानर्थक्यात्; तत्रैकस्मिन्वाक्ये 'वदेत्' इति वदने पुरुषं प्रतीष्टसाधनत्वस्य नञ्यानिष्टसाधनत्वस्य चावगमविरोधात् प्रतिषेधापेक्षितप्रसक्तिसमर्पकानुवादत्वम् 'वदेत्' इत्यस्याश्रित्य, यत् पुरुषस्येष्टसाधनतया पुरुषार्थं वदनं प्रसक्तं तन्न तथा; किंतु अनिष्टमेव पुरुषस्य साधयतीति वाक्यार्थो वर्णनीयः। पुरुषस्येष्टसाधनमेव वदनं क्रतोरनिष्टसाधनमपीत्यर्थस्तु न संभवति, येन प्रतिषेधस्य क्रत्वर्थता लभ्येत। 'वदेत्' इति शब्दो हि प्रसक्तां वदनक्रियामनुवदन श्रुत्या पुरुषं प्रतीष्टसाधनतया वदनमुपस्थापयति, न तु प्रकृतं कर्म प्रति, प्रकरणाच्छ्रुतेर्बलीयस्त्वात्; ततश्च प्रतिषेधोऽप्यनुवादानुसारेण पुरुषं प्रत्येव तस्यानिष्टसाधनतां गमयति, न तु क्रतुं प्रति, तस्य तदानीमप्रतिपन्नत्वात्। न च प्रतिषेध्यप्रतिषेधयोरैकरूप्यनियमात् यदर्थं वदनं तदर्थः प्रतिषेध इत्यभ्युपगमे, 'दीक्षितो न ददाति, न पचते, न जुहोति' इति दानपाकहोमानां क्रत्वर्थः प्रतिषेध इति दशमे वक्ष्यमाणं विरुध्येतेति वाच्यम्; तत्र हि दानादीनां क्रत्वर्थतया विहितानां प्रतिषेधे विकल्पापत्तेः अगत्या पुरुषार्थानामेव क्रत्वर्थः प्रतिषेध इति वक्ष्यते। ततश्च प्रतिषेध्यस्य पुरुषार्थत्वावगमिकया 'वदेत्' इत्येकपदश्रुत्या प्रतिषेधस्यापि पुरुषार्थत्वमावहन्त्या प्रकरणबाधात्पुरुषार्थत्वमेवानृतवदनवर्जनस्य स्वीकार्यम्। ननु स्मृतावेव पुरुषार्थतयानृतवदनवर्जनस्य विधानात्प्रतिषेधविधिरयमनर्थक इत्यत आह— नित्यानुवादः स्यादिति। नित्यम् अपौरुषेयं वेदवाक्यमनृतवदननिषेधकम्। तदनुवादः स्यात्स्मृतिः, तत्राप्येतदेव मूलं भवतीति यावत्। तस्मादनृतवदनप्रतिषेधोऽयं केवलपुरुषधर्मः, तदतिक्रमे च 'भुक्त्वा क्षुत्वा च जृम्भित्वा ष्ठीवित्वोक्त्वानृतं वचः। आचान्तः पुनराचामेद्वासो विपरिधाय च' इत्यादिस्मृतिसिद्धं द्विराचमनादिप्रायश्चित्तमिति प्रथमः पक्षः॥ द्वितीयपक्षेऽप्येतत्सूत्रं योज्यम्। अकर्म अनृतवदनवर्जनं प्रकरणात्क्रतुयुक्तमेव सत् उक्तरीत्या श्रुत्या पुरुषसंयोगावगमात्पुरुषधर्मोऽपि स्यात्, श्रुतिप्रकरणयोरविरोधात्क्रतुयुक्तपुरुषधर्मोऽयं प्रतिषेध इति यावत्। तथा च दर्शपूर्णमासौ कुर्वाणस्यानृतवदनं वर्जनीयमिति पर्यवस्यति। स चायं प्रतिषेधः क्रतुयुक्तपुरुषधर्मतया नात्र विधीयते, किंत्वनूद्यत इत्याह—नित्यानुवादः स्यादिति। नित्यसिद्धप्रतिषेधस्यानुवादो नित्यानुवादः। 'सत्यं ब्रूयात्प्रियं ब्रूयान्न ब्रूयात्सत्यमप्रियम्। प्रियं च नानृतं ब्रूयादेष धर्मः सनातनः' 'प्रागुपनयनात्कामचारवादभक्षः' इत्यादिस्मृत्योपनयनप्रभृति यावज्जीवं विहितमनृतवदनवर्जनं दर्शपूर्णमासयोरपि नित्यं प्राप्तत्वादनूद्यते। न च स्मृतेरिदमेव वैदिकं वचनं मूलमिति युक्तम्, क्रतुमात्रकालकानृतवदनप्रतिषेधश्रुतेरस्याः सार्वकालिकतत्प्रतिषेधकस्मृतिं प्रति मूलत्वासंभवेन तत्र तथाविधश्रुत्यन्तरमूलत्वस्यैव कल्प्यत्वात्। न चैवमपि क्रतुयुक्तपुरुषसंस्कारत्वस्य स्मृतितः प्राप्त्यभावात् कथं क्रतुयुक्तपुरुषधर्मतानुवादत्वं श्रुतेः, स्मृतिवचनस्य प्रकरणपाठाभावादिति वाच्यम्—

क्रतुर्हि स्वस्य फलसाधनत्वसिद्धयर्थं यजमानस्य फलाधारत्वयोग्यतामपेक्षते; निषिद्धाचारवतश्च पुंसो नास्ति फलाधारत्वयोग्यता, 'अदुष्टकर्मणामुपायनं वेदाध्ययनमग्न्याधेयं फलवन्ति च कर्माणि' इत्यादिस्मरणात्; ततश्च पुरुषार्थमनृतवदनवर्जनं सार्वकालिकं विदधाना स्मृतिः कर्मदशायामपि यजमानमनृतवदनाद्व्यावर्तयन्ती तस्मिन्क्रत्वपेक्षितफलाधारत्वयोग्यतामादधाना क्रत्वपूर्वीयत्वरूपेणापि पुरुषार्थतां प्रतिषेधस्यावगमयतीति तदनुवादत्वं श्रुतेरिति युज्यते । एवं च क्रतोर्बहिः प्रतिषेधातिक्रमे पुरुषः केवलं प्रत्यवैति, तत्र पूर्वोक्तमाचमनादि स्मार्तं प्रायश्चित्तं भवत्येव; क्रतौ प्रतिषेधातिक्रमे तु पुरुषोऽपि प्रत्यवैति, ततः कर्तृवैगुण्यात्क्रतोश्च वैगुण्यम्, तत्र प्रतिषेधश्रुतेः स्मृतिप्राप्तानुवादत्वात् स्मृतेश्च अविज्ञातवेदविशेषमूलकत्वात् 'यद्यविज्ञाते भूर्भुवःसुवः स्वाहेत्याहवनीये जुहुयात्' इत्यविज्ञातवेदविशेषविहितयज्ञाङ्गभ्रेषनिमित्तकं श्रौतप्रायश्चित्तम् आचमनादि स्मार्तप्रायश्चित्तं च समुच्चीयत इति द्वितीयः पक्षः ॥ तृतीयपक्षपरमप्येतत्सूत्रम् । अकर्म अनृतवदनवर्जनं पुरुषम् अद्वारीकृत्य साक्षादेव क्रतुना शेषतया युज्यते । कुतः । संयोगात् कर्तुराख्यातप्रत्ययवाच्यत्वेऽपि तस्य क्रियां प्रति गुणत्वेन संयोगात्, कर्तुः कारकत्वेन क्रियागुणत्वावश्यंभावात्, 'भावप्रधानमाख्यातम्' इति निरुक्ताच्च प्रत्ययार्थप्राधान्यस्मरणस्य च आख्यातव्यतिरिक्तविषयत्वोपपत्तेः । ततश्च धात्वर्थवदनं प्रति पुरुषस्य शेषित्वप्रत्यायकश्रुत्यभावे सति प्रकरणात्प्रतिषेधस्य साक्षादेव क्रत्वर्थत्वं न तु पुरुषद्वारेति पर्यवस्यति । स चायं प्रतिषेधः स्मृतिप्राप्तत्वान्न विधीयते, किंत्वनूद्यते। न च स्मृतेरप्राकरणिकत्वेन तस्याः पुरुषार्थप्रतिषेधपरतया क्रत्वर्थप्रतिषेधस्य ततः प्राप्त्यभावात् कथं स्मृतिप्राप्तानुवादकत्वं श्रुतेरिति वाच्यम्—न हि 'नानृतं वदेत्' इति स्मृतावनृतवदनवर्जनं पुरुषार्थतया विहितम्, क्रियां प्रति कर्तुर्गुणभूतत्वात्; कर्तृगुणकस्य चानृतवदनस्य वर्जनं विधीयमानं फलमाकाङ्क्षत् अर्थात्कर्त्रभिलषितार्थमेव; ततश्चानृतवदनं वर्जयन्क्रतुदशायामपि वर्जयत्येव; तदानीं च तद्वर्जनं क्रत्वर्थं संपद्यते; यदर्थं ह्यनृतवदनं तदर्थमेव तद्वर्जनमुचितं भवति; यद्यप्यनृतवदनं क्रतौ न विहितमस्ति, तथापि स्वकार्यसिद्धयर्थमनृतं वदन्पुरुषः क्रतोरपि स्वकार्यत्वाविशेषात्तदर्थमपि यदनृतं वदति द्रव्यार्जनादिविषये तदेव क्रत्वर्थमनृतवदनं वाच्यम्; तच्च क्रतुबहिःकार्यान्तरार्थानृतवदनवत् पुरुषाभिलषितार्थतयैव वर्जनीयतया क्रतावपि स्मृतितः प्राप्तमित्यर्थादेकविषयोपनिपातान्नयुक्तं स्मृत्यनुवादत्वं श्रुतेः । तदेतदाह— नित्यानुवादः स्यादिति । क्रतौ तद्बहिश्च सर्वदा स्मृतितः प्राप्तस्यानृतवदनवर्जनस्य क्रत्वर्थतया प्रतिषेधश्रुतिरनुवाद इत्यर्थः । एवं च प्रतिषेधश्रुतेः स्मृतिप्राप्तानुवादतया, स्मृत्या कर्तृगुणकानृतवदनवर्जनस्य कर्त्रभिलषितकार्यार्थतयैव विहितस्य क्रतुदशायामपि सत्त्वेऽपि विधिगम्याङ्गत्वाभावात्तद्भ्रेषेऽविज्ञातवेदविशेषविहिताङ्गभ्रेषप्रायश्चित्तं न भवति, किंतु स्मार्तमाचमनादिकमेव । क्रतुयुक्तपुरुषधर्मत्वपक्षे तु प्रतिषेधस्य फलिसंस्कारत्वात् तदतिक्रमे फलिनोऽङ्गस्य पुरुषस्य भ्रेषात् प्रत्यवायाच्च अविज्ञातप्रायश्चित्तं स्मार्तप्रायश्चित्तेन समुच्चीयत

इति भेदः। एवं च शुद्धक्रतुधर्मतयानुवाद इति प्राप्ते, सिद्धान्तयति—

विधिर्वा संयोगान्तरात् ॥ १९ ॥

वा-शब्द एवार्थे। क्रतुपुरुषसंयोगभेदेन विषयभेदादप्राप्तत्वात्केवलकर्मधर्मतयैव विधिरित्यर्थः। 'धर्मातिक्रमे खलु पुनर्नरकः' इत्यादिस्मृत्या हि विहितस्यानृतवदनवर्जनस्यातिक्रमे नरको गम्यते। तस्मिंश्च कालान्तरदेहान्तरोपभोग्ये प्रतिषेधातिक्रमणस्यानृतवदनादिरूपस्याशुतरविनाशिनः साधकत्वनिर्वाहाय दुरदृष्टं किंचित्कल्प्यते, सोऽयं प्रत्यवाय इत्युच्यते। ततश्च अनृतं वदतः पुरुषस्य प्रत्यवायो भवति, तद्वर्जनाच्च न भवतीत्येतावदनृतवदनप्रतिषेधस्मृत्यावगतम्। नैतावतानृतवदनतद्वर्जनाभ्यां कर्मणो वैगुण्यमवैगुण्यं च लभ्यते। ततश्च क्रतुदशायामनृतवदनवर्जनातिक्रमेऽपि प्रायश्चित्तेन तत्प्रयुक्तप्रत्यवायं परिहरिष्यामीत्येवं प्रत्यवायमभ्युपेत्य क्रतावनुष्ठीयमाने तद्वैगुण्याप्रसक्तेः सत्यपि स्मृत्या पुरुषसंयोगेन निषेधे क्रतावनृतवदनवर्जनं न प्राप्नुयात्। अनृतवदनवर्जनश्रुत्या तु प्रकरणगतया अनृतवदनतद्वर्जनाभ्यां क्रतुगत एव प्रत्यवायस्तत्परिहारश्च बोध्यत इत्यप्राप्तक्रतुसंयोगार्थत्वान्न तस्या अनुवादता। न च क्रतुदशायां प्रतिषेधातिक्रमे क्रतोर्वैगुण्यमेव, अदुष्टकर्मणामेव कर्माधिकारस्योक्तत्वादिति वाच्यम्। कर्मारम्भात्प्राक्तनमेव हि निषिद्धाचरणं कर्मानधिकारमावहति। आरब्धे तु कर्मणि निषिद्धाचरणं पुरुषस्य केवलं प्रत्यवायमाधत्ते, न तु कर्मानधिकारमपि, तस्य कर्मप्रवृत्त्ययोग्यतात्मकत्वात् इह च प्रवृत्तेर्वृत्तत्वात्। 'यदि यजमानः सुरापो वा स्याद्ब्रह्महा वा तस्य ध्रुवायां यजमानभागमवधाय समिष्टयजुषा प्रस्तरेण वा सह जुहुयात्' इत्यादिकल्पसूत्राण्यप्यत्रानुकूलानि। किंच 'नानृतं वदेत्' इत्यत्र निषेधवत् निषेध्यस्याप्यनृतवदनस्य क्रत्वर्थतयैवोपस्थितत्वात् 'दर्शपूर्णमासयोरनृतवदनेनोपकुर्यादिति न भवति' इत्यर्थपर्यवसानात् क्रतुमध्येऽपि क्रत्वर्थद्रव्यार्जनादिविषयानृतवदन एव क्रतोर्वैगुण्यं न तु पुरुषार्थानृतवदने, किमुत 'न कलञ्जं भक्षयेत्' इत्याद्यप्राकरणिकपुरुषार्थप्रतिषेधातिक्रमे। तदुक्तं वार्तिके 'यो नाम क्रतुमध्यस्थः कलञ्जादीनि भक्षयेत्। न क्रतोस्तस्य वैगुण्यं यथाचोदितसिद्धितः' इति। 'क्रतुमध्यस्थः' इत्यनेन क्रत्वारम्भात्प्राक्तनं निषिद्धाचरणं क्रत्वधिकारं विरुणद्धीति सूचितम्। एवं चानृतवदनवर्जनस्य यजुर्वेदविहितत्वात् तदतिक्रमे यजुष्टो यज्ञश्रेष्ठप्रायश्चित्तं भवति॥ स्यादेतत्। 'वदेत्' इति कर्तृवाचकलिङा एकपदश्रुत्या प्रतिषेध्यस्य पुरुषार्थत्वावगमिकया प्रतिषेधस्यापि पुरुषार्थत्वमावहन्त्या प्रकरणेन चाविरुद्धया पुरुषद्वारैव कर्मधर्मतैवानृतवदनवर्जनस्य न्याय्या। यत्तु कर्तुराख्यातवाच्यत्वेऽपि तस्य कारकत्वात् 'भावप्रधानमाख्यातम्' इति निरुक्तस्मरणाच्च क्रियां प्रति गुणतया पुरुषस्य धात्वर्थवदनं प्रति शेषित्वप्रत्यायकश्रुत्यभावे सति प्रकरणात्प्रतिषेधस्य केवलकर्मधर्मत्वमिति, नैतद्युक्तम्। न हि धात्वर्थः क्रिया, येन तत्र कर्ता गुण-

त्वेनान्वीयेत । भावनैव हि क्रिया । तस्यैव सर्वकारकाणामन्वयः । न च धात्वर्थस्य क्रियात्वाभावे भूप्रभृतीनां कथं धातुसंज्ञा, 'भूवादयो धातवः' इति क्रियावाचिनामेव धातुसंज्ञाविधानादिति वाच्यम् । तत्र हि क्रियात्वं नोत्पादनारूपभावनात्वं विवक्षितम्, किंतु लिङ्गसंख्याद्यनन्वयित्वमेवेति न दोषः । एवं च धात्वर्थस्याख्यातप्रत्ययवाच्यकर्तुश्च परस्परवार्तानभिज्ञयोरेव प्रथमं भावनान्वये सति पश्चादरुणैकहायनीन्यायेन तयोः परस्परमन्वयो वाच्यः । स च कर्तुः प्रत्ययवाच्यतया प्रत्ययार्थप्राधान्यस्य च सति संभवे भङ्गानुपपत्त्या तस्यैव धात्वर्थवदनं प्रति प्रधानतया पर्यवस्यति । निरुक्तवचनं त्वाख्यातगम्यानां मध्ये भावः प्रधानमित्येवंपरम् । अत एव 'भावकालकारकसंख्याश्चत्वारोऽर्था आख्यातस्य, तत्र भावः प्रधानम्' इति तद्भाष्यं संगच्छते । तथा च कर्तुर्धात्वर्थवदनं प्रति प्रधानत्वादुक्तरीत्या समानपदश्रुत्या प्रकरणानुगृहीतया क्रतुयुक्तपुरुषार्थत्वमनृतवदनवर्जनस्य सिध्यति । तत्र च निषेध्यस्यानृतवदनांशस्य श्रुतिप्रकरणाभ्यां क्रतुयुक्तपुरुषार्थतयैवोपस्थितत्वात् यजमानसंस्कारवपनस्नानाद्युपयोगितया प्रसक्तमनृतवदनं वर्ज्यम्; तदतिक्रमे यजुष्टो यज्ञश्रेषप्रायश्चित्तमिति चेत्, अत्र ब्रूमः—'प्रशंसायां रूपप्' इति सूत्रे महाभाष्ये 'प्रशंसायां यत्प्रातिपदिकं वर्तते तिङन्तं वा तस्मात्स्वार्थे रूपप्भवति' इत्युपक्षिप्य, 'पचतिरूपम्' 'पचतेरूपम्' 'पचन्तिरूपम्' इत्यत्र स्त्रीप्रत्ययद्विवचनबहुवचने चाशङ्क्य, 'सिद्धं तु क्रियाप्रधानत्वात्' इति तत्परिहारवार्तिकमवतार्य, "क्रियाप्रधानमाख्यातम्; द्रव्यप्रधानं नाम; यत्क्रियां पृष्टस्तिङाचष्टे—किं देवदत्तः करोति? पचति; द्रव्यं पृष्टः कृताचष्टे— कतरो देवदत्तः? यः कारको हारकः" इत्युक्त्या 'भावप्रधानमाख्यातम्; सत्त्वप्रधानं नाम' इति निरुक्ते यास्कोक्त्या च ऋष्यनुभवानुसृतया भावना तावदाख्यातवाच्येत्यविवादम् । ततश्च भावनया तदविनाभावात् कर्ता लभ्यत इति सः नाख्याताभिधेयो भवितुमर्हति, अनन्यलभ्यस्यैव शब्दार्थत्वात् । ततश्चाख्यातात्कर्तृप्रतीतेरन्यथासिद्धत्वात् न सा कर्तुस्तद्वाच्यत्वगमिका । न च कर्तृत एव तदविनाभावाद्भावना लभ्यत इति विपर्ययः शङ्क्यः, कृदन्तेषु पाचकादिशब्देषु कर्तृवाचकेषु व्यभिचारात् । 'लः कर्मणि—' इत्यपि न कर्तुर्वाच्यत्वगमकम्, तस्य सूत्रस्य 'ञ्येकयोर्द्विवचनैकवचने' 'बहुषु बहुवचनम्' इति सूत्रद्वयैकवाक्यतया भावनाक्षिप्तकर्तृगतैकत्वादिसंख्यावाचकत्वस्यैव तेन लाभात् । न च सत्यप्येकवाक्यत्वे एकस्मिन्कर्तरि लकारैकवचनमित्येवमर्थकतया कर्तृवाचकत्वमेव लभ्यते, न तु संख्यावाचकत्वमिति वाच्यम्। 'ञ्येकयोः—' इत्यस्य हि द्वित्वैकत्वयोरित्यर्थः, धर्मिपरत्वे बहुवचनप्रसङ्गात्, द्वयोरेकस्य च संनिपाते बहुत्वात् । भावप्रत्ययनिर्देशे वर्णाधिक्यप्रसङ्गात्तु 'ञ्येकयोः' इत्येव सूत्रितम् । न च 'बहुत्वे बहुवचनम्' इत्येव सूत्र्यतामिति वाच्यम्, वैपुल्याद्यर्थकत्वनिरासेन त्रित्वादिसंख्याव्याप्यबहुत्वस्फोरणाय 'बहुषु' इति निर्देशोपपत्तेः । न च कर्तृसंख्यावाचित्वेऽपि विशेषणीभूतकर्तृवाचित्वमपि सिध्यतीति वाच्यम्, भावनया आक्षेपलब्धस्यानभिधेयस्यापि कर्तुः संख्योपलक्षणमात्रत्वात् । 'त्वं करोषि' 'अहं करोमि'

'चैत्रः पचति' इति कर्तृसामानाधिकरण्यमपि तिङामाक्षेपलभ्यकर्तारमादायैवोपपन्नम्—यथा 'गौः शुक्लः' इति जातिगुणवाचिनोर्गोशब्दशुक्लशब्दयोरनभिधेयावपि व्यक्तिगुणिनावादाय सामानाधिकरण्यं तद्वत्। ननु, कर्तुराख्यातानभिधेयत्वे 'देवदत्तः पचति' इत्यत्र तृतीया स्यात्, तिङ्कृत्तद्धितसमासैरनभिहिते कर्मकर्त्रादिकारके द्वितीयातृतीयादिविभक्तिविधानात्, इह च कर्तुस्तिङानभिहितत्वात्। न च कर्तरि यदेकत्वादि तस्मिन्ननभिहिते तृतीयैकवचनादिकमित्येकवाक्यत्वात् इह च कर्त्रेकत्वस्य तिङाभिहितत्वात् न तृतीयेति वाच्यम्; एवमपि 'देवदत्तः पक्ता' इत्यत्र तृतीयापत्तेः, तृचः कर्तृमात्रवाचकत्वात् कर्तृगतसंख्यायाश्च सुब्विभक्तिवाच्यत्वात्। न चानभिहितस्य कर्तुरेकत्वादौ तृतीयैकवचनादीत्यर्थान्न दोष इति वाच्यम्, एवं सति 'देवदत्तः पचति' इत्यत्र तृतीयापत्तेः। न च 'अनभिहिते' इत्यस्य अबोधिते इत्यर्थः; बोधश्च शक्त्या आक्षेपाद्वा; तत्र 'पक्ता' इत्यादौ कृति शक्त्या 'पचति' इत्यादौ तिङि त्वाक्षेपादिति नोभयत्र तृतीयेति वाच्यम्—'ओदनो देवदत्तेन पच्यते' इति कर्मप्रत्ययस्थलेऽपि पाकः क्रियत इति विवरणेन भावनाया वाच्यत्वावश्यकतया तस्याश्च विनाश्रयमनुपपत्त्या कर्तुराक्षेपादभिहितत्वेन तृतीयानापत्तेः। तस्मात् कर्तुराख्याताभिधेयत्वमावश्यकमिति चेन्। अत्र वार्तिककृतः—'कर्तुर्येद्यपि शास्त्रेऽस्मिन्नाभिधेयत्वमाश्रितम्। तथाप्याश्रितासिद्धयर्थमभिधेयत्वमिष्यते ॥' अनभिहितस्य कर्तुरेकत्वे तृतीयैकवचनमित्येवार्थः। 'लः कर्मणि—' इति सूत्रे च न कर्तरि वस्तुतोऽभिधेये लकारोऽनुशिष्यते, येन तदादेशस्य तिङो वस्तुतः कर्तृवाचिता लभ्येत। किंतु अस्मिन्व्याकरणशास्त्रे 'अनभिहिते' इत्यादिकार्यावशेन अनभिधेयस्याप्यभिधेयत्वं पारिभाषिकमाश्रीयते 'देवदत्तः पचति' इत्यादौ तृतीयादिवारणार्थम्, यथा 'अधिशेते, अधितिष्ठति, अध्यास्ते वा वैकुण्ठं हरिः' इत्यादौ द्वितीयालाभाय 'अधिशीङ्स्थासां कर्म' इत्यधिकरणस्यापि कर्मत्वमाश्रीयते तद्वत्। न शक्नोति हि 'लः कर्मणि—' इति सूत्रं वस्तुतो लकारस्य कर्तृवाचितां बोधयितुम्, लकारस्य 'भवति' 'पचति' इत्यादौ क्वाप्यश्रूयमाणस्यानुपलब्धिपराहतत्वात्। न च 'लः कर्मणि—' इति लादेशानामर्थादेशनमिति वाच्यम्, लादेशस्यापारमार्थिकत्वात्, सुशब्दापशब्दविवेचनोपायस्य प्रकृतिप्रत्ययविभागकल्पनस्यापारमार्थिकस्यैव लेखागवयन्यायेन व्याकरणशास्त्रे व्युत्पादनाभ्युपगमात्। उक्तं हि हरिणा—'उपायाः शिक्ष्यमाणानां बालानामुपकारकाः। असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते' इति। किंच अनधीतव्याकरणानां लादेशत्वमविदुषामपि बोधात् कथं लादेशत्वं शक्तावच्छेदकं स्यात्। किंच क्वचिद्व्याकरणे तिबादेशानां कडादेशत्वम्, क्वचित्तडादेशत्वम् अन्यत्र च पडाद्यादेशत्वमुक्तम्। एवं सुशब्दापशब्दविवेचनोपायभेदा अनन्ता व्याकरणेषु सन्ति। उक्तं च हरिणा—'उपेयप्रतिपत्त्यर्था उपाया अव्यवस्थिताः' इति। ततश्च व्यभिचाराद्न कस्यापि स्थानिनः शक्तावच्छेदकता, किंतु शक्तिग्राहकशिरोमणिना वृद्धव्यवहारेण भावनायामेव श्रूयमाणेषु 'ति,

तस्, अन्ति' इत्यादिषु आख्यातत्वेनैव शक्तिग्रहः, सर्वेष्वाख्यातेषु भावनाया नियमेन प्रतीतेः, कर्त्रादिकारकस्य कर्मप्रत्ययादिस्थले प्रतीत्यभावेन व्यभिचारात्, भावनया आक्षेपलभ्यत्वेनान्यथासिद्धत्वाच्च । ततश्च 'लः कर्मणि—' इत्यर्थादेशनं किं लोकवेदव्यवहारार्थम्, उत स्वशास्त्रे व्यवहारार्थमिति परीक्षायां लोकवेदयोराख्यातस्य कर्त्रादिकारकवाचिताया निरस्तत्वात् स्वशास्त्रे व्यवहारार्थमिति विज्ञायते । तथा च 'देवदत्तः पचति' इत्यत्र कर्तुः परमार्थतोऽनभिधानेऽपि व्याकरणेऽभिहितवदाश्रयणादनभिहिताधिकारविहिता तृतीया न भवतीति [1]परमार्थः । कर्त्रादेरनभिधानादेव चानभिहिताधिकारोऽर्थवान्भवति, अन्यथा 'बहुपटुः' इत्यादौ 'विभाषा सुपो बहुच्पुरस्तात्तु' इति बहुच्प्रत्ययेनोक्तार्थत्वात् 'ईषदसमाप्तौ कल्पब्देश्यदेशीयरः' इति कल्पबादयो यथा न भवन्ति तथा 'देवदत्तः पचति' 'ओदनः पच्यते' 'पक्ता देवदत्तः' 'शतेन क्रीतः शत्यः' 'प्राप्त आनन्दो यं स प्राप्तानन्दो ग्रामः' इत्यादौ तिङ्कृत्तद्धितसमासैरुक्तत्वादेव कर्त्रादौ तृतीयादिविभक्तिर्न भवतीति किमनभिहिताधिकारेण । यदा तु परमार्थतो न कर्त्रादेराख्याताभिधेयता, किंतु तद्गतैकत्वादेरेव, तदा यद्यपि 'पच्यते' 'पचति' इत्यत्र कर्मादिगतैकत्वादेस्तिङोक्तत्वादेव द्वितीयाद्यप्रसक्तावपि, 'पक्ता देवदत्तः' 'कृतः कटः' इत्यत्र तृजादिप्रत्ययेन कर्तृकर्ममात्रोक्तावपि तदेकत्वाद्यनुक्त्या द्वितीयादेः प्राप्तौ तन्निवृत्तयेऽनभिहिताधिकार आवश्यकः । अनभिहिते कर्मादौ यदेकत्वादि तत्र द्वितीयैकवचनादीत्यर्थः । 'देवदत्तः पचति' इत्यादौ तु परमार्थतोऽनभिधेयस्यापि कर्त्रादेः अभिहितवदाश्रयणान्न तृतीयादिविभक्तिः । तदेतत् 'अनभिहिते' इति सूत्रव्याख्यावसरे पातञ्जलभाष्ये स्पष्टमेवोक्तम्— 'अनभिहिताधिकारः कर्तव्यः, यदेकत्वादयो विभक्त्यर्थाः; यदि तु कर्मादयः; नार्थोऽनभिहिताधिकारेण' इति । अनभिहिताधिकारारम्भसामर्थ्यादेकत्वादयो विभक्त्यर्था इत्येव पाणिनेरभिमतमिति पतञ्जलेराशयः । कर्मादयो विभक्त्यर्था इत्याश्रित्यानभिहिताधिकारप्रत्याख्यानं तु पतञ्जलेर्नाभिमतम्, पूर्वग्रन्थसंदर्भे संख्यावाचित्वकारकवाचित्वपक्षावुपक्षिप्य कर्मादिगतसंख्यावाचित्वस्यैव कात्यायनपतञ्जलिभ्यां वाक्यभाष्यकाराभ्यामवधारितत्वात्, 'बहुषु बहुवचनम्' इति सूत्रव्याख्यावसरे 'एकत्वादयो विभक्त्यर्थाः कर्मादयोऽपि विशेषणत्वेन' इति ताभ्यामेवोक्तत्वाच्च । न च 'एकत्वादयो विभक्त्यर्थाः' इति पातञ्जलभाष्यं सुब्विभक्तिविषयमिति वाच्यम् । 'सर्वाण्येव हि शास्त्राणि स्वप्रदेशान्तरैः सह । एकवाक्यतया युक्तमुपदेशं वितन्वते' इति न्यायेन 'कर्मणि द्वितीया' इत्यादिवत् 'लः कर्मणि—' इत्यस्यापि 'द्व्येकयोः —' इत्याद्येकवाक्यतावश्यंभावात् । तथा चाख्यातेषु भावनाक्षेपलब्धस्य कर्तुरनभिधेयस्यैव सतः तत्संख्योपलक्षणमात्रत्वमाश्रीयते । सुब्विभक्तिषु तु भावनाया अनभिधानान्न किंचित्कारकोपस्थापकमस्तीति स्वयं

1. परमार्थतः कर्त्रादेः—घ.

कारकमनभिधाय तद्विशिष्टसंख्याभिधानानुपपत्त्या कारकमप्यभिधेयमास्थातव्यम्। ततश्च 'पचति' इत्यत्र आख्यातत्वेन भावना वाच्या। तदाश्रयस्य कर्तुरेकत्वादिकं तु तिप्त्वादिना वाच्यम्। तस्य च भावनायां कारकद्वारा यथायथमन्वयः। एवं च प्रकृते कर्तुरवाच्यत्वे सति पुरुषश्रुत्यभावात् प्रकरणात्केवलकर्मधर्म एवानृतवर्जनमिति समादधते। प्रयोजनं नूक्तमेव। प्रयोजनान्तरमप्युक्तं वार्तिके— 'विधयोऽपि हि पूर्वस्मिन्पक्षे संस्कारतां गताः। ते सर्वे याजमानाः स्युर्दीक्षासंस्कारवर्गवत्' इति; सर्वेऽप्यङ्गविधयः पूर्वस्मिन्पक्षे कर्तृसंस्कारविधयः संपन्नाः; ततश्च 'संस्कारास्तु पुरुषसामर्थ्ये यथावेदं व्यवतिष्ठेरन्' 'याजमानास्तु तत्प्रधानत्वात्कर्मवत्' इत्यष्टमपादीयाधिकरणन्यायेन याजमानाः स्युः; तत्र बहुयजमानकेऽपि सत्रे प्रयाजादियागात्मकस्य संसृष्टसाधारणद्रव्यत्यागव्यापारस्य दीक्षणीयादिवत्तन्त्रेण प्रयोग इति संस्कारकर्मत्वार्थकर्मत्वयोर्न कश्चिद्भेदः। स्तोत्रशस्त्रजपादीनां तु साधारणद्रव्यत्यागवत्तन्त्रत्वं न संभवतीति दन्तधावनादिवत् ते गुणभूतकर्तृनियमनसमर्था प्रधाननियमानधिकृतामौद्गात्रादिसमाख्यां बाधित्वा यजमानकर्तृकाः सन्तः प्रतियजमानं भिद्येरन्। कर्तुरवाच्यतयार्थकर्मत्वे तु स्तोत्रशस्त्रजपादीनां केवलकर्मधर्मत्वात्मकृदेव प्रयोग. इत्यादि। तथा कर्तुरवाच्यत्वमनुमानतोऽपि साधितं वार्तिके— 'पचति' इत्याख्यातशब्दो न कर्तुरभिधाता, तदत्यन्ताविनाभूतार्थाभिधायित्वात्। यो यदत्यन्ताविनाभूतार्थाभिधायी स तस्य न वाचकः— यथा शिंशुपाशब्दः वृक्षत्वनियतशिंशुपात्वस्य वाचको न वृक्षत्वस्य। कर्ता तिङा नाभिधीयते, तदभिधेयापरित्यागात्, तद्वथापाराद्विनापि च प्रतीयमानत्वात्, कारकत्वाच्च, द्रव्यवत्, तस्मिन्नेव शिंशुपाशब्दे वृक्षत्ववत् करणादिवच्च। तिङ्प्रत्ययो न कर्तृवाचकः, आख्यातत्वात्, 'आस्यते' इत्यादिवत्। अत्र दूषणभूषणानि तत्रैव प्रपञ्चितानि। इति कर्त्रधिकरणम्॥

दर्शपूर्णमासयोः श्रूयते— 'जज्ञभ्यमानो ब्रूयान्मयि दक्षक्रतू इति' इति। 'जभ' जृम्भणे। यङन्तात्कर्तरि लटः शानच्। तादिदं मन्त्रवदनं किं केवलक्रतुधर्मः, उत केवलपुरुषधर्मः, अथवा क्रतुयुक्तपुरुषधर्मः इति संशये, पूर्वाधिकरणन्यायेन 'ब्रूयात्' इत्यत्र कर्तुरश्रुतत्वात् प्रकरणात्केवलक्रतुधर्म इति प्राप्ते, द्वितीयपक्षमुपक्षिपति—

अहीनवत्पुरुषधर्मस्तदर्थत्वात्॥ २०॥

पुरुषस्यैवायं धर्मः, न तु क्रतोः। कुतः। तदर्थत्वात्। 'ब्रूयात्' इत्याख्यातस्य कर्तृवाचित्वाभावेऽपि 'जज्ञभ्यमानः' इति लादेशस्य शानचः 'कर्तरि कृत्' इत्यधिकारविहितस्य कर्तृवाचित्वात्। न हि शानञ्विधेर्लकारविधिवत् 'ल्येकयोर्द्विवचनैकवचने' 'बहुषु बहुवचनम्' इत्येकवाक्यतास्ति, येन कर्तृसंख्या लभ्येत। 'तान्येकवचनद्विवचनबहुवचनान्येकशः' 'सुपश्च' इत्येकवचनादिसंज्ञानां सुप्रि-

९. जज्ञभ्यमानधर्माणा पकरणे निवेशाधिकरणम्।

त्रविषयत्वात् । न च पूर्वाधिकरणोक्तरीत्या लविधाविव कृद्विधावपि कर्तृवाचित्वं पारिभाषिकमेवाश्रीयते 'पक्ता देवदत्तः' इत्यादावभिधानव्यवस्थासिद्ध्यर्थमिति वाच्यम् । 'क्रियाप्रधानमाख्यातम्' इत्याद्युदाहृतमहाभाष्यादिवचनेन 'लः कर्मणि—' इत्यस्य पारिभाषिककर्त्रभिधायित्वस्वीकारेऽपि, 'द्रव्यप्रधानं नाम' इत्याद्युदाहृतमहाभाष्यादिवचनेन कृतां द्रव्यवाचितया तत्र भावनाया वाच्यत्वाभावेन कर्तुराक्षेपासिद्धया 'कर्तरि कृत्' इत्यस्य वस्तुतः कर्तृवाचित्वानुशासनपरताया एव स्वीकार्यत्वात् । 'धातोः परोऽकारोऽकशब्दो वा स्वभावतः कर्तारं ब्रुवन्कृत्संज्ञो भवति प्रत्ययसंज्ञश्च' इति 'कर्तरि कृत्' इति सूत्रस्थमहाभाष्ये वस्तुतः कर्तुः कृद्वाच्यताया उक्तत्वाच्च । न च 'लः कर्मणि—' इत्यत्र चकारेण 'कर्तरि कृत्' इत्यत एव 'कर्तरि' इत्यस्यानुकृष्टत्वादाख्यातेऽपि कर्तुर्वस्तुतो वाच्यत्वापत्तिरिति वाच्यम् । 'बहुगणवतुडति संख्या' इति सूत्रस्थसंख्याशब्दस्य संज्ञाभूतस्यापि 'ष्णान्ता षट्' इत्युत्तरसूत्रेऽनुवृत्तस्य शब्दाधिकाराश्रयणेन पूर्वसूत्रे वस्तुतो वाच्यतासमर्पकस्यापि 'कर्तरि' इत्यस्य उत्तरस्मिन लविधिसूत्रे योग्यतावशेन पारिभाषिकतया वाच्यत्वसमर्पकत्वाश्रयणोपपत्तेः । एतेन लादेशेषु तिङां न कर्तृवाचित्वं कृतां तु शानजादीनां कर्तृवाचित्वमित्यर्धजरतीन्यायमापादयन्तो वैयाकरणाः प्रत्युक्ताः, उभयत्र कथंचिद्वाच्यत्वाक्षतेः पारिभाषिकत्वपारमार्थिकत्वयोर्योग्यतालभ्यत्वेन तत्र शब्दव्यापाराभावात् । एतेन शानचो लादेशत्वाल्लविधौ च 'कर्तरि' इत्यस्य संख्याविशेषणत्वात् न लविधिना शानचः कर्तृवाचित्वमित्यपि वैयाकरणोक्तं प्रत्युक्तम् । एकस्यापि लविधिशास्त्रस्य तिङ्भाविलकारविध्यंशमात्रे संख्याशास्त्रेणैकवाक्यता, न त्वतिङ्भाविलविध्यंशेऽपि । शानचप्रभृतीनामतिङ्रूपाणां लादेशानामेकवचनादिसंज्ञाविरहात् । ततश्च अतिङ्भाविलकारविध्यंशस्य कर्तृवाचित्वानुशासनपरत्वमेव पर्यवस्यति । विषयभेदाच्चैकस्यापि शास्त्रस्य कर्तृतत्संख्यानुशासनपरतया वैषम्यं न दोषाय । अत एव 'आदेशप्रत्यययोः' इति सूत्रे 'एकापि षष्ठी विषयभेदाद्भिद्यते; आदेशरूपस्य सकारस्य प्रत्ययावयवस्य सकारस्य' इति वैयाकरणैरुक्तं संगच्छते । यदपि वैयाकरणैरुक्तम्— 'कर्तरि कृदिति कृद्वाक्यशेषोऽयमनिर्दिष्टार्थेषु ण्वुल्तृजादिषूपतिष्ठते न तु लादेशेषु शानजादिषु, तेषां लविधिलभ्यस्थान्यर्थेनैव निराकाङ्क्षत्वात्' इति, तदयुक्तम् । उक्तरीत्या लविधौ अतिङ्भाविलविध्यंशस्य संख्याशास्त्रैकवाक्यत्वासंभवेन तत्र 'लः कर्मणि—' इत्यस्याप्रवृत्त्या शानजादिस्थानिनोऽर्थवत्त्वस्यैवासिद्धया तेष्वपि 'कर्तरि कृत्' इत्यस्योपस्थानावश्यंभावात् । एवं च 'पच्यमानः' इत्यादौ शानचो न कर्तृवाचित्वप्रसक्तिरपि । अतिङ्भाविलविध्यंशस्य संख्याशास्त्रैकवाक्यत्वाभावेन[1] शानङ्भाविलविधेः[2] स्वतन्त्रतया [3]तत्र लकारस्य कर्मार्थतया स्थान्यर्थविरोधेन 'कर्तरि' इत्यस्यानुपस्थानात् । वस्तुतस्तु— 'धातोः परोऽकारः स्वभावतः कर्तारं ब्रुवन्कृत्संज्ञो भवति प्रत्ययसंज्ञश्च, एवमकादिः' इति सं-

1. वाक्यत्वासंभवेन— ख, घ. 2. शानज्विधेः—क. 3. तत्र लविधिना लकारस्य—क.

ज्ञाया एवात्र नियमः क्रियते, न तु कृत्प्रत्ययस्य कर्त्रर्थकत्वमत्रानुशिष्यते, तथा सति 'काष्ठभिदब्राह्मणः' इति दकारादकारस्यापि कर्तृवाचित्वस्य कृत्संज्ञायाः प्रत्ययसंज्ञाया-श्चापत्तेरिति—'कर्तरि कृत' इति सूत्रस्थतद्भाष्यसंदर्भे 'कर्तरि' इत्यन्यतः प्राप्तकर्तृवाचित्वं कृत्संज्ञाप्रत्ययसंज्ञाविधानायानूद्यत इति गम्यते। धातोः परत्वेन श्रुतानामकाराकादिशब्दानाम् 'कतरो देवदत्तः? पचः, पाचकः' इति लोके प्रतिवचनबलादेव 'द्रव्यप्रधानं नाम' इति पतञ्जलि-यास्कवचनतदनुभवानुगृहीतात् कर्तृवाचित्वं सिद्धम्, न तु शास्त्रस्य तत्र व्यापारः। 'सिद्धे शब्दा-र्थसंबन्धे, लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमो यथा लौकिकवैदिकेषु' इति पस्पशा-ह्निके, 'सिद्धं तु नित्यशब्दत्वात्' 'किमर्थं शास्त्रमिति चेन्निवर्तकत्वात्सिद्धम्' इति वृद्धिसूत्रे च महाभाष्ये तथा व्यवस्थापितत्वात्। उक्तं च वार्तिके भट्टपादैः—'वाच्यवाचकसंबन्धो नाचार्यैरुप-दिश्यते। अन्यथानुपपत्त्या हि व्यवहारात्स गम्यते' इति। एवं च ज्ञानजादिलादेशानां लविधिल-भ्यस्थान्यर्थेनैव निराकाङ्क्षतया 'कर्तरि कृत्' इत्यस्यानुपस्थानेऽपि न तेषां कर्तृवाचित्वहानिः, लोकव्यवहारादेव तदुपपत्तेरुक्तत्वात्। उक्तरीत्या लभ्य वस्तुतः कर्तृवाचित्वाभावेन तदादेशज्ञान-जादिषु स्थान्यर्थेनावास्तवेन कर्त्रा वास्तवकर्त्राकाङ्क्षाया अशान्ततया वस्तुतः कर्तुवाच्यत्वसमर्पणाय तत्रापि 'कर्तरि कृत्' इत्यस्योपस्थानावश्यंभावाच्च। एवं च जञ्जभ्यमानशब्दस्य जृम्भणकर्तृवा-चितया वाक्योपात्तेन पुरुषेण संयुक्तमिदं मन्त्राभिधानं प्रकरणं हित्वा प्रबलाद्वाक्यप्रमाणात्केवल-पुरुषधर्मतामेव प्रतिपद्यते। अहीनवत्। यथा 'द्वादशाहीनस्य' इति द्वादशोपसत्कत्वं ज्योतिष्टोम-प्रकरणमुल्लङ्घ्य द्विरात्राद्यहीनेषु निविशते तद्वत्। न च पुरुषार्थत्वे विश्वजिन्न्यायेन फलकल्पनैव दोष इति वाच्यम्, प्रबलवाक्यप्रमाणावगतजञ्जभ्यमानपुरुषार्थत्वबलेन फलकल्पनस्य न्याय्यतया अदोषत्वात्। यथा 'ज्योतिर्गौरायुः' इति विहितरात्रिसत्रे 'प्रतितिष्ठन्ति ह वा एते य एता रात्रीरुपयन्ति' इत्यर्थवादिकफलेन निराकाङ्क्षतया न विश्वजिन्न्यायेन फलकल्पना, एवमिहापि 'सर्वमायुरेति' इत्यर्थवादिकफलेन निराकाङ्क्षतया अश्रुतफलकल्पनाया असंभवाच्च। तस्मात्केवल-पुरुषधर्म इति प्राप्ते, सिद्धान्तयति—

प्रकरणविशेषाद्वा तद्युक्तस्य संस्कारो द्रव्यवत् ॥ २१ ॥

वाशब्द एवार्थे। क्रतुयुक्तस्यैव जञ्जभ्यमानस्य 'मयि दक्षक्रतू' इति मन्त्राभिधानं धर्मः, न तु केवलपुरुषस्य। कुतः। प्रकरणविशेषात्। प्रकरणम् इत्थंभावाकाङ्क्षालक्षणम्, तेन विशेषात् अक्रतुयुक्तस्य व्यावर्तनात्। प्रकरणवशेन क्रतुयुक्तस्यैव जञ्जभ्यमानस्य ग्रहणादिति यावत्। द्रव्यवत्। यथा व्रीह्यादिद्रव्यं दर्शपूर्णमासापूर्वसाधनरूपापन्नमेव प्रोक्षणादि प्रतिपद्यते, तद्वत्। यद्यपि वाक्यं प्रकरणात्प्रबलं तथापि विरोधे सत्येव बाध्यबाधकभावः। प्रकृते च प्राक-

रणिकपुरुषविषयत्वेन[1] जन्यमानवाक्यस्योपपत्तेर्न विरोधोऽस्ति । एवं च नाश्रुतफलकल्पनाप्रसक्तिः । तदुक्तम्— 'अविरोधात्समावेशे लभ्यमाने प्रमाणयोः । बाधो न युज्यते कर्तुं न च दूरात्फलश्रुतिः' इति । ननु तथापि पुरुषार्थत्वात्फलकल्पनं दुर्वारमित्यत आह—संस्कार इति । नास्य मन्त्राभिधानस्य प्राधान्यमभ्युपगम्य क्रतुयुक्तपुरुषधर्मत्वमुच्यते, येन विश्वजिदादिवत्फलं कल्प्येत ; किंतु पुरुषसंस्कारमुखेन क्रत्वर्थत्वमेवेति [2]न दोषः । न चैवमपि सामान्यविषयवाक्यप्रमाणस्य दुर्बलप्रकरणेन संकोचो न युक्त इति वाच्यम् । प्रबलमपि हि वाक्यमपेक्षितफललाभाद्दुर्बलेनापि प्रकरणेन संकोचमनुमन्यते । एवं च क्रतुफलेनैव मन्त्रवदनस्य फलवत्त्वसिद्धेर्न फलवाचकशब्दाध्याहार इति लाघवम् । 'सर्वमायुरेति' इत्यर्थवादेऽपि वर्तमानापदेशात्फलप्रत्यायककामशब्दाभावाच्च तत्प्रत्यायकशब्दाध्याहारस्य दुर्वारत्वान्न ततोऽपि फलकल्पनम् ।

अथ यदुक्तमहीनवदिति तत्राह—

व्यपदेशादपकृष्येत ॥ २२ ॥

दिशिरुच्चारणार्थक इति 'आदेच उपदेशे' इत्यादिसूत्रमहाभाष्ये स्पष्टम्, अपेति विप्रकर्षे, वीत्यतिशये । अहीनस्य ज्योतिष्टोमप्रकरणादत्यन्तविप्रकृष्टान्नानादहीनसंयुक्तं द्वादशोपसत्कत्वं ज्योतिष्टोमप्रकरणेनागृह्यमाणत्वाज्ज्योतिष्टोमादुत्कृष्यत इति युक्तम् । प्रकृते तु जन्यमानपुरुषस्य क्रतौ लाभात्तद्विषयत्वेन मन्त्रवदनमुपपन्नमिति न तस्य क्रतुत उत्कर्षः । तस्मात्क्रतुयुक्तपुरुषसंस्कार एवेदं मन्त्राभिधानमिति स्थितम् । प्रयोजनं केवलक्रतुधर्मत्वे समाख्यानान्मन्त्राभिधानमिदमाध्वर्यवं क्रतुबहिश्च न; केवलपुरुषधर्मत्वे क्रतोर्बहिरपि स्यात्, क्रतौ च सर्वेषां स्यात्, क्रत्वङ्गत्वाभावेन समाख्याया अकिंचित्करत्वात् । क्रतुयुक्तपुरुषधर्मत्वे तु क्रतावेव, न तु ततो बहिः, याजमानं च— 'संस्कारास्तु पुरुषसामर्थ्ये' इत्यग्रिमाष्टमपादीयाधिकरणन्यायादित्याद्यूह्यम् । इति जन्यमानाधिकरणम् ॥

दर्शपूर्णमासयोः 'देवा वै यज्ञस्य स्वगाकर्तारं नाविन्दन, ते शंयुं बार्हस्पत्यमब्रुवन्' इत्युपक्रम्य श्रूयते 'ब्राह्मणाय नापगुरेत न निहन्यान्न लोहितं कुर्यात्' इति । 'ब्राह्मणाय' इति द्वितीयार्थे चतुर्थी । 'गुरी' उद्यमने । नापगुरेत हन्तुं नोद्युञ्जीत । स्पष्टमन्यत् । सोऽयमपगोरणादिप्रतिषेधः क्रत्वर्थः पुरुषार्थो वेति संशयः । प्रकरणात्क्रत्वर्थ एवायम्, पुरुषार्थत्वे च फलकल्पनाप्रसङ्गात् । ननु 'योऽपगुरातै शतेन यातयात्, यो निहनत्सहस्रेण यातयात्, यो लोहितं करवद्यावतः प्रस्कण्व पाꣳसून्त्संगृह्णात्तावतः संवत्सरान्पि-

१०. अपगोरणादीना पुमर्थताधिकरणम्।

1. प्राकरणिकपुरुषीयत्वेन—क, घ. 2. नोक्तदोषः—क, घ.

तृलोकं न प्रजानात्' इत्यर्थवादादेव तत्सिद्धिः— यो ब्राह्मणमपगुरेत स शतसंवत्सरैरनुभवितव्यां यातनां प्राप्नुयात्, एवमप्रेऽपीति चेत्, न। यातनाया अनिष्टत्वेन फलत्वाभावात्, तन्निवृत्तेश्चापगोरणादिवर्जनसाध्यत्वाश्रवणेन फलत्वासंभवात। युज्यते च क्रत्वर्थतया प्रसक्तस्यापगोरणादेः प्रतिषेधोऽप्यनृतवदनवर्जनन्यायेन क्रत्वर्थ इति वक्तुम्। ऋत्विजां हि सामदानभेददण्डैरानमने प्रसक्तेऽन्वाहार्याख्यौदनदानेनानमयेदिति[1] नियमितम्। यदि च तावता नानमन्ति तदा, तेषामानमने लौकिकोपायप्रसक्तौ सत्यामयं दण्डप्रकारः अपगोरणादिः कदाचित्प्राप्तः प्रतिषिध्यते। ततश्च तद्व्यतिरिक्तसामाद्युपायाश्रयणमभ्यनुज्ञातं भवतीति प्राप्ते, सिद्धान्तयति—

शंयौ सर्वपरिदानात् ॥ २३ ॥

शंयूपक्रमे वाक्येऽपगोरणादिप्रतिषेधः केवलपुरुषधर्मः, न तु क्रतुयुक्तपुरुषधर्मः। कुतः। सर्वपरिदानात्। 'योऽपगुरातै' इत्यादिवाक्यशेषे यच्छब्दैः क्रतुतद्वहिर्गतसाधारण्येन सर्वस्यैव पुरुषस्य परिदानात्[2] उपादानात् परामर्शात्। ततश्च तत्संयुक्तमिदमपगोरणादिवर्जनं प्रकरणं हित्वा प्रबलाद्वाक्यप्रमाणात्केवलपुरुषधर्मतां प्रतिपद्यते। न च फलकल्पना शङ्क्या। सत्यां फलाकाङ्क्षायाम् 'शतेन यातयात्' इत्यादिवाक्यशेषेण रात्रिसत्रन्यायेन फललाभात्। न च पूर्वाधिकरणरीत्या 'सर्वमायुरेति' इति जञ्जभ्यमानवाक्यशेषवदस्यापि फलसमर्पकत्वाभावः शङ्क्यः। तत्र हि वर्तमानापदेशात्साध्यत्वगमकर्कामिपदाद्यभावाच्च न फलसमर्पकतेति युक्तम्। नेह वर्तमानापदेशको लडस्ति। अस्ति च साध्यत्वाभिधायको लेट्, 'हेतुहेतुमतोर्लिङ्' इति लिङर्थत्वेनावगते हेतुहेतुमद्भावे विवक्षिते 'लिङर्थे लेट्' इति विधानात्। एवं च शतयातनादेरपगोरणादिसाध्यत्वावगमे सति अर्थाच्छतयातनादिनिवृत्तेरपगोरणादिवर्जनसाध्यत्वावगमात् अपगोरणादिनिषेधः स्ववाक्य एवार्थात्साध्यत्वेनावगतां शतयातनादिनिवृत्तिमेव फलत्वेन स्वीकरोति, न तु क्रतूपकारम्। क्रतुतद्वहिःसाधारण्येन यच्छब्दोपात्तपुरुषसंयुक्तवाक्यतो हि पुरुषमात्रविषयेऽपगोरणादेः शतयातनादिनरकः साध्यत्वेनावगतः। स च नरको यद्गतस्तस्य तत्परिहारार्थोऽपगोरणादिप्रतिषेध इति युज्यते, न तु क्रतूपकारार्थ इति। नन्वेवं सति ऋत्विगानमनार्थापगोरणादेः प्रतिषेधो न स्यादित्यत्राप्येतदेवोत्तरं सर्वपरिदानादिति। परिदानमिहोपसर्गवशाद्वरदानं विवक्षितम्। शंयुना हि बृहस्पतिपुत्रेण देवान्प्रति वरोऽभ्यर्थितः 'किं मे प्रजायाः' इति। ब्राह्मणत्वेन मत्सजातीयायाः प्रजाया ब्राह्मणजातेः किमभीष्टं दातुं भवन्तो मन्यन्त इत्यर्थः। एवं पृष्टे सति 'योऽपगुरातै शतेन यातयात्' इत्यादिवराः देवैर्ब्राह्मणजातये दत्ताः। तदिदं वरदानम् 'मे प्रजायाः' इति स्वारस्येन क्रतुतद्वहिःसाधारण्येन ब्राह्मणजातिविषयमवगतम्। ततश्च ऋत्वि-

1. अन्वाहार्याख्यौदनेनानमयेत्—ग, घ. 2. परिदानात्परामर्शात्—क, घ.

गानमनार्थं प्रसक्तमप्यपगोरणादिकं ब्राह्मणविषयमिति 'ब्राह्मणाय नापगुरेत' इत्यादिनिषेधस्तस्यापि भवतीति विज्ञायते । अतः केवलपुरुषधर्म एवायमपगोरणादिप्रतिषेधः । वृत्तमधिकरणम् ॥

११. मलवद्वाससवादनिषेधस्य पुरुषधर्मताधिकरणम् ।

दर्शपूर्णमासयोः श्रूयते 'मलवद्वाससा न संवदेत' इति । रजस्वलया न संभाषेतेत्यर्थः । किमयं प्रतिषेधः क्रत्वर्थः पुरुषार्थो वेति संशयः । पुरुषार्थत्वे आर्थवादिकस्यापि फलस्याभावाद्विश्वजिन्न्यायेन तत्कल्पनापत्तेः प्रकरणादनृतवदनन्यायेन क्रत्वर्थ एवायं प्रतिषेधः । क्रतौ साधारणब्रीह्यादिद्रव्यानुमतिविषये तया संवादस्य प्रसक्तेः, हस्तसंज्ञादिना कदाचित्तदनुमतिसूचनसंभवेऽपि कदाचित्संवादस्यापि प्रसक्तेः । न च 'रजस्वला च षण्डश्च' इत्युपक्रम्य 'दैवे कर्मणि पित्र्ये च तानप्यपनयेत्ततः' इति मनुस्मृत्या रजस्वलाया अपनयविधानात् तया संवादो दर्शपूर्णमासयोरप्रसक्त इति वाच्यम् । 'नाशुचिः काम्यं तप आतिष्ठेन्न यजेन्न स्वाध्यायमधीयीतान्यत्राग्निहोत्रदर्शपूर्णमासेभ्यः' इति बोधायनादिवचनेनोक्तस्मृतेस्तदन्यविषयत्वावगमात् । न च 'यस्य व्रत्येऽहन्पत्न्यनालम्भुका भवति तामपरुध्य यजेत' इति रजस्वलाया अपनयविधानात् दर्शपूर्णमासयोर्द्रव्यानुमतिविषयसंवादस्याप्यप्रसक्तिरिति वाच्यम् । 'व्रत्येऽहन' इत्यनेन व्रतग्रहणप्रभृति व्रतविसर्गपर्यन्तमेव तदपनयस्य तद्वाक्यादवगमेऽपि व्रतग्रहणात्प्राग्यागीयद्रव्यानुमतिविषये व्रतविसर्गानन्तरं क्रत्वङ्गब्राह्मणभोजनद्रव्यानुमतिविषये च संवादस्य प्रसक्तेः । ततश्च क्रत्वर्थ एव तत्प्रतिषेध इति प्राप्ते, सिद्धान्तयति—

प्रागपरोधान्मलवद्वाससः ॥ २४ ॥

मलवद्वाससः रजस्वलायाः संभाष्यत्वप्रतिषेधः पुरुषार्थ एव न तु क्रत्वर्थः । कुतः । प्रागपरोधात् । 'अपरुध्य' इति ल्यपा 'यजेत' इति च लिङा अंशत्रयविशिष्टभावनावाचिना रजस्वलायाः पत्न्याः क्रतुव्यापारनिवर्तनरूपापरोधस्य साङ्गप्रयोगात्पूर्वकालकत्वावगमात् । ततश्चारम्भप्रभृति समाप्तिपर्यन्तं क्रतौ रजस्वलासंवादस्याप्रसक्तत्वान्न तत्प्रतिषेधः क्रत्वर्थो भवति । 'व्रत्येऽहन' इति तु नियतकर्मयोग्यकालो विवक्षितः । तेनानियतकाम्यकर्मसु नायमपरोधविधिः प्रवर्तते ।

इतोऽप्येवमित्याह—

अन्नप्रतिषेधाच्च ॥ २५ ॥

'मलवद्वाससा न संवदेत' इत्यनन्तरं श्रुतम् 'नास्या अन्नमद्यात्' 'अभ्यञ्जनं वाव स्त्रिया अन्नम' इति । 'अभ्यञ्जनमुपगमनं यन्धिरिति पर्याया इति लाटेषु प्रसिद्धिः' इति वार्तिककृतः । उपगमनं स्त्रीणामन्नवत्प्रियतममिति वाक्यशेषार्थः । उपगमनं च पुरुषार्थ इत्यविवादम् । यदर्थो च प्राप्तिस्तदर्थः प्रतिषेधः । ब्रह्मचर्यविधानाच्च क्रतौ पुरुषार्थस्यापि तस्य न प्रसक्तिरस्ति

येन तस्य क्रतौ प्रतिषेधः स्यात् । अतो वाक्यशेषानुसारात् 'नास्या अन्नमद्यात्' इति प्रतिषेधः पुरुषार्थ इति तत्प्रायपाठात्संवादप्रतिषेधस्यापि पुरुषार्थत्वं विज्ञायते । वृत्तमधिकरणम् ॥

किंचिदप्यनारभ्य श्रूयते— 'सुवर्णं हिरण्यं भार्यम्, सुवर्ण एव भवति', 'दुर्वर्णोऽस्य भ्रातृव्यो भवति' इति । 'सर्वं हिरण्यं रजतम्' इति रजतेऽपि हिरण्यशब्ददर्शनात्तद्व्यावृत्त्यर्थ

१२. सुवर्णधारणादीना पुरुषधर्मतार्धिकरणम् ।

'सुवर्णम्' इति । किमयं सुवर्णभरणविधिः क्रत्वर्थः, उत पुरुषार्थ इति संशयः । क्रत्वर्थत्वेऽपि त्रेधा संशयः—किं विशिष्टविधिः 'सुवर्णहिरण्यभरणेन क्रतुमुपकुर्यात्' इति, उत क्रतुगतहिरण्यसंस्कारविधिः 'क्रतुगतं हिरण्यं भरणेन संस्कुर्यात्' इति, अथवा क्रतौ भरणीये हिरण्ये सुवर्णत्वगुणविधिः 'क्रतौ भार्ये यद्धिरण्यं तत्सुवर्णम्' इति । तत्र सिद्धान्तेनोपक्रमते—

अप्रकरणे तु तद्धर्मस्ततो विशेषात् ॥ २६ ॥

तुरवधारणे । अप्रकरणे आम्नातं हिरण्यभरणं पुरुषधर्म एव न तु क्रतुधर्मः । कुतः । ततो विशेषात् । ततः अप्रकरणाम्नानेन हेतुना हिरण्यभरणस्य प्रकरणाम्नातप्रयाजाद्यपेक्षया पुरुषधर्मत्वरूपविशेषावगमात् । 'अविशेषात्' इत्यपि च्छेदः । यदि अप्रकरणाम्नातं प्रकरणाम्नातं च क्रत्वङ्गं स्यात्, ततः प्रकरणाम्नातादप्रकरणाम्नातस्य विशेषकत्वाभावात् प्रकरणाप्रकरणाम्नानविवेकोऽनर्थकः स्यात् । अतोऽवगम्यते 'अप्रकरणाम्नातं हिरण्यभरणं पुरुषधर्मः' इति । ततश्च 'सुवर्णहिरण्यभरणेनेष्टं भावयेत्' इति पुरुषधर्मतया विशिष्टविधिः ॥

अथ एतदेव सूत्रं प्रथमपूर्वपक्षपरमपि योज्यम् । तुरप्यर्थे । अप्रकरणे आम्नातमपि हिरण्यभरणं तद्धर्मः क्रतुधर्मः । कुतः । ततो विशेषात् । ततः तस्मात् पुरुषार्थत्वात् क्रत्वर्थत्वस्य विशिष्टत्वात् । पुरुषार्थत्वे वर्तमानापदेशार्थवादतः फलकल्पनापेक्षया क्लृप्तफलकक्रतूपकारार्थत्वाश्रयणस्य ज्यायस्त्वादिति यावत् । ननु क्रतूपस्थापकशब्दाभावात्कथं क्रत्वर्थता हिरण्यभरणस्य—इत्यत्राप्येतदेवोत्तरम्— ततोऽविशेषादिति । षष्ठ्यर्थे तसिः । तस्य हिरण्यभरणस्य फलापेक्षस्य अविशेषात् वैदिकक्रियात्वेन साम्यात् प्रयाजादिवत्क्रतूपकारकत्वं युज्यते ॥

अथ द्वितीयं पूर्वपक्षमुत्थापयति—

अद्रव्यत्वात्तु शेषः स्यात् ॥ २७ ॥

तुनार्थे । न विशिष्टविधिः । किंतु क्रतौ 'हिरण्यं दक्षिणा' इत्यादिविहितहिरण्यस्य भरणं शेषः संस्कारः स्यात् । कुतः । अद्रव्यत्वात् । विधेर्हिरण्यरूपद्रव्यगोचरत्वाभावेन क्रतुगतं

सुवर्णं हिरण्यमनूद्य भरणमात्रस्य विधौ लाघवात् । न च कथं हिरण्यस्य क्रतुसंबन्धित्वेनानुवादः, क्रतूपस्थापकाभावादिति वाच्यम् । भरणं हि स्वभावात्प्रथमतो द्रव्यशेषत्वेनावगतम् । तच्च यत्र द्रव्यं तत्र गच्छतीति भवति हिरण्यस्य क्रतुसंबन्धित्वोपस्थितिः ॥ भाष्ये तु पूर्वसूत्रोपक्षिप्ते पुरुषार्थतया प्रधानकर्मत्वे आक्षेपपरतया इदं सूत्रमेवं योजितम्—'यागहोमदानानामेव प्रधानकर्मत्वम् । भरणं तु न तेष्वन्तर्गतम् । न च यागाद्यन्यतममत्र कल्पयितुं शक्यम् । कुतः । अद्रव्यत्वात् । द्रव्यमात्रमिह विद्यते, न तु देवता तत्संबन्धश्च । तथा च द्रव्यदेवतासंबन्धस्य कल्पकस्याभावान्न यागहोमाविह लभ्येते । संप्रदानाभावाच्च न दानम् । अतः परिशेषाद्भरणं कर्मशेष एव स्यात्' इति । तदिदं सूत्राक्षराननुगुणम् । न हि 'अद्रव्यत्वात्' इत्यस्य द्रव्यदेवतासंबन्धाभावादित्यर्थपर्यवसानं संप्रदानाभावादित्यर्थश्च कथंचिदक्षरपदवीमारोहति । गायत्रीजपादीनामपि पुरुषार्थत्वेन विहितानां प्रधानकर्मत्वाच्च । तदेतदुक्तं वार्तिके—'यत्त्वत्र भाष्यकारेण देवताग्रहणं कृतम् । तदुत्सूत्रमयुक्तं च प्रधानं हि जपाद्यपि' इति । क्वचित्तु भाष्यपुस्तकेषु 'अद्रव्यदेवतत्वात्' इति सूत्रपाठोऽपि दृश्यते । स तु 'उत्सूत्रम्' इति वार्तिकविरुद्धत्वादुपेक्ष्यः ॥ अथ तृतीयपूर्वपक्षपरतयाप्येतत्सूत्रं योज्यम् । भरणीयं हिरण्यमनूद्य सुवर्णत्वाख्यः शेषो गुणो विधेयः स्यात्, न तु हिरण्यमनूद्य भरणविधिः । कुतः । अद्रव्यत्वात् सुवर्णत्वस्य हिरण्यरूपद्रव्यान्वयविरोधात् । हिरण्यानुवादेन भरणविधौ सुवर्णपदानर्थक्यापत्त्या सुवर्णत्वस्यापि विधौ 'भरणेन हिरण्यं संस्कुर्यात्' 'तच्च सुवर्णं भवेत्' इति वाक्यभेदप्रसङ्गादिति यावत् । न च 'भार्यं हिरण्यं यत्' इति विशिष्टोद्देशे गौरवमिति वाच्यम् । हिरण्यमेव हि अनूद्य अत्र सुवर्णता विधीयते, भरणं योग्यतया प्राप्तमनूद्यत इति न दोषः । तदेवं त्रेधा वर्णिते क्रत्वर्थत्वे युक्त्यन्तरमाह—

वेदसंयोगात् ॥ २८ ॥

अध्वर्युवेदसमाख्याते यजुर्वेदे तावदिदं भरणं विहितम् । तस्य च प्रधानकर्मणः संस्कारकर्मणो वा क्रत्वर्थत्वे सत्येव यजुर्वेदसमाख्या अध्वर्युसंयोगं नियमयन्ती अनुगृहीता भवति । पुरुषार्थत्वे तु सा बाध्येत । एतेन प्रथमपूर्वपक्षे सामान्याल्लौकिकस्यापि भरणकर्मणो ग्रहणमिति निरस्तम् । द्वितीयपूर्वपक्षे च लोके क्रयविक्रयादिव्यवहारगतस्यापि हिरण्यस्य संस्कार इत्यपि निरस्तम् ॥

अथ यदेतत् द्वितीयपूर्वपक्षे भरणस्य स्वभावादेव संस्कारत्वमुक्तम्, तत्र हेत्वन्तरमाह—

द्रव्यपरत्वाच्च ॥ २९ ॥

'भार्यम्' इति कर्मणिविहितकृत्यप्रत्ययेन भरणस्य हिरण्यलक्षणद्रव्यप्रधानकत्वावगमेनापि तच्च तत्संस्कारत्वमध्यवसीयत इत्यर्थः ॥

तदेवं त्रेधा क्रत्वर्थत्वमुत्प्रेक्षितं सिद्धान्ती निराचष्टे—

स्याद्वा संयोगवत्फलेन संबन्धस्तस्मात्कर्मैतिशायनः ॥ ३० ॥

वाशब्द एवार्थे । प्रवर्तनात्मको विधिस्तावत्पुरुषं स्वाभिलषितसाधने प्रवर्तयन विहितस्य पुरुषार्थत्वमेव स्वरसतोऽवगमयति । पुरुषाभिलषितं च फलं यदि स्ववाक्ये न श्रूयेत, तदा विश्वजिन्न्यायेन कल्पनीयम् । अर्थवादे च श्रूयमाणं फलं स्ववाक्यगतमेव भवति, तस्य विध्येकदेशत्वात् । अतस्तादर्थ्यमेव विहितस्य भरणस्याध्यवसातुं युक्तम् । संयोगवत्—स्ववाक्यैकदेशस्वर्गकामपदसंयोगे सति यथा फलसंबन्धः, तथात्राप्यार्थवादिकफलेनैव स्वशोभनवर्णत्वभ्रातृव्यदुर्वर्णत्वबलक्षणफलेन संबन्ध उचितः । ततश्च स्ववाक्य एव विध्यपेक्षितपुरुषाभिलषितफललाभात्तदुद्देशेन सुवर्णहिरण्यविशिष्टभरणात्मकं कर्म विधीयत इत्यैतिशायनो नामाचार्यो मन्यते; तदेवास्माकमप्यभिमतमित्यर्थः । यत्तु वैदिकक्रियात्वसामान्याद्विशिष्टभरणस्य क्रत्वर्थत्वमिति, तन्न, स्वर्गोत्पत्तेरपि वेदावगतक्रियात्वेन तत्र व्यभिचारात् । न च संस्कार्यत्ववशाद्धिरण्यस्य क्रतुगतस्यैव प्रतीतिरिति वाच्यम् । क्रतुगतहिरण्यदानत्वे निश्चिते संस्कार्यत्वनिश्चयः, सति च तस्मिन् निष्प्रयोजनस्य हिरण्यस्य संस्कार्यत्वायोगात्क्रतुगतत्वप्रतीतिरित्यन्योन्याश्रयात् । न च क्रतुगतत्वेन हिरण्यप्रतीतेः पूर्वमेव स्वभावादेव भरणस्य संस्कारत्वावगमसंभवान्नान्योन्याश्रय इति वाच्यम्; अदृष्टार्थतयापि भरणस्योपपन्नतया स्वभावतः संस्कारत्वनिश्चयासंभवात् । न च कृत्यप्रत्ययात्संस्कार्यत्वावगमे सति तद्वशात्क्रतुगतत्वेन हिरण्योपस्थितिरिति वाच्यम् । कृत्यप्रत्ययो हि कर्मत्वमाह, 'तयोरेव कृत्यक्तखलर्थाः' इति भावकर्मणोरनुशासनात् । तच्च साध्यत्वमात्रं न तु शेषित्वम् । न च कर्मत्वमेव शेषित्वमिति युक्तम्, 'यागात्स्वर्गो भवति' इत्यत्र कर्मत्वाभावेऽपि शेषित्वसत्त्वात् । न चाश्वप्रतिग्रहेष्टौ यथा वैदिकत्वसामान्याद्वैदिकमेवाश्वदानमुद्देश्यम्, तद्वदिहापि वैदिकमेव हिरण्यभरणमुद्देश्यमिति स्यात्क्रतूपस्थितिरिति वाच्यम; अश्वप्रतिग्रहेष्टौ हि अश्वदाननिमित्तकत्वस्य निश्चितत्वान् वैदिकमेवाश्वदानमुद्देश्यमिति युज्यते; इह विधानस्यापि संभवेन हिरण्योद्देश्यकत्वस्यैवानिश्चयान्न तथा । तस्मात्सुवर्णहिरण्यभरणं पुरुषार्थमेव । वृत्तमधिकरणम् ॥

इदमनारभ्यामनन्ति—'येन कर्मणेत्सेत्तत्र जयाञ्जुहुयात्' इति । ईत्सेत् ऋद्धिमिच्छेत् । 'चित्तं च' इत्यादिमन्त्रका होमा जयाः, 'यज्जयैरजयन तज्जयानां जयत्वम्' इति निर्वचनात् । तदिमे जयाः किं लौकिकवैदिककर्मसाधारणाः, उताहवनीययुक्तवैदिककर्ममात्रविषया इति संशये, पूर्वपक्षयति—

शेषोऽप्रकरणेऽविशेषात्सर्वकर्मणाम् ॥ ३१ ॥

अप्रकरणे यः शेषः कर्माङ्गत्वेनावगतः, सः अविशेषात् लौकिकवैदिकसर्वकर्मणां साधारणः प्रत्येतव्यः। ततश्च जयहोमा एते कृष्यादिलौकिककर्मस्वपि फलभूमात्मकसमृद्धीच्छायां भवन्ति; यथावस्थितफलेच्छायां तु न भवन्ति। न च वैदिकत्वसामान्यान्न लौकिककर्मस्वेषां प्रवृत्तिरिति वाच्यम्, वैदिकत्वसामान्यस्य संनिधिरूपस्थानप्रमाणान्तर्गतत्वेन ततो वाक्यस्य संकोचायोगात्। अश्वप्रतिग्रहेष्टौ तु लौकिके दाने पुरुषार्थत्वं वैदिके तु ऋत्वर्थत्वमिति वैरूप्यापत्त्या विशेषापेक्षायां वैदिकत्वसामान्याद्वैदिकदानमेव निमित्तमिति युज्यते। न च 'यदाहवनीये जुह्वति' इति जयहोमानामाहवनीयसाध्यत्वात्कथं कृष्यादिकर्माणि प्रवृत्तिरिति वाच्यम्; अङ्गगुणविरोधन्यायेनाहवनीयाभावे लौकिकेऽप्यग्नौ जयहोमानां कर्तुं शक्यत्वात्, अनाहिताग्नेः कृष्यादिकर्मण्याहवनीयाभावेऽप्याहिताग्नेस्तत्सत्त्वाच्च। तस्माल्लौकिकवैदिकसर्वकर्मार्था जयहोमा इति प्राप्ते, सिद्धान्तयति -

१३. जयादीनां वैदिकहोमाङ्गतार्थाधिकरणम्।

होमास्तु व्यवतिष्ठेरन्नाहवनीयसंयोगात् ॥ ३२ ॥

तुरवधारणे। जयहोमा वैदिकेष्वेव कर्मसु व्यवतिष्ठेरन्, न तु लौकिकेषु। कुतः। आहवनीयसंयोगात्। यदाहवनीये जुह्वति' इति होमानामाहवनीयसाध्यत्वावगमात् कृष्यादिषु च लौकिककर्मस्वाहवनीयाभावात्। अङ्गगुणविरोधन्यायश्च, यानि प्रयोगविधिः उपादेयत्वेनाङ्गानि विधत्ते, तन्मात्रविषयः। यानि तु विध्यन्तरप्रयुक्तानि स्वयं सिद्धानि वा अङ्गत्वेन परिगृह्यन्ते, तानि तु स्वरूपत एवाधिकारिविशेषणतां प्रतिपद्यन्ते; न तु तत्राङ्गगुणविरोधन्यायः, नापि सर्वशक्त्यधिकरणन्यायः। अन्यथा तिर्यगधिकरणे अङ्गानुसारेण प्रधानवाक्यसंकोचाश्रयणमसंगतं स्यात्। अग्निहोत्रादीनि च कर्माणि यथाशक्त्युपबन्धादनाहिताग्नेरपि प्रसज्येरन्। नापि कृष्यादिकर्मण्याहवनीयः संभवति, तस्याग्न्यगारस्थत्वात्। 'अङ्गानि तु विधानत्वात्प्रधानेनोपदिश्येरन्, तस्मिन्नन्यादेकदेशत्वम्' इत्येकादशस्य द्वितीये अङ्गाना प्रधानदेशत्वस्य व्यवस्थापयिष्यमाणतया अग्न्यगारे कृतानां जयहोमानां कृष्यर्थत्वायोगात्। न चाहवनीयमात्रस्य कृषिदेशे प्रणयनमिति युज्यते, गार्हपत्यादष्टासु प्रक्रमेष्वाहवनीयस्यायतनमिति विरोधात्। न च गार्हपत्योऽपि कृषिदेशे नीयतामिति वाच्यम्, तावता कृषिसामीप्यमात्रलाभेऽपि तत्सादेश्यालाभात्। हलेन क्षेत्रविदारणं हि कृषिः; न ह्येकस्मिन्विदारणदेशे आहवनीयं निक्षिप्य होतुं शक्यते। आहवनीयप्रदेशस्य कर्षणासंभवाच्च। न च प्रयोगवचनपरिगृहीतानामेवाङ्गप्रधानानां समानदेशत्वस्य एकादशे वक्ष्यमाणत्वात् लौकिककर्मणः कृषेः प्रयोगवचनपरिग्रहाभावान्न सादेश्यनियम इति वाच्यम्; 'पुरस्तात्कृषिकर्मणां प्राच्यां क्षेत्रमर्यादायां शावाप्रथिवीयं बलिं हरेत्' इत्याद्यङ्गविधिस्मरणेन 'तद्युक्तकृषिं कुर्यात्' इति प्रयोगवचनकल्पनस्यावश्यकत्वात्। एवं च कृष्यादिषु क्रियमाणा जयहोमा वैदेश्याद्विगुणा भवेयुः। वैदि-

केषु तु कर्मस्वाहवनीयवत्सु क्रियमाणास्ते प्रधानसादेश्यात्सगुणा भवन्ति । अतः सादेश्यसंपादनसामर्थ्यरूपलिङ्गानुसारेण जयहोमविधिर्वैदिकविषय एव संकोचमर्हति ॥

इतोऽप्येवमित्याह—

शेषश्च समाख्यानात् ॥ ३३ ॥

अध्वर्युसमाख्याते यजुर्वेदे जयहोमा विहिताः । ते च समाख्यावशादध्वर्युकर्तृकाः । लौकिककर्मणि चाध्वर्योरभावात् अनध्वर्युणा क्रियमाणा होमाः समाख्यां बाधेरन् । यदि च होममात्रमध्वर्युः करोति तदा यद्यपि समाख्या अनुगृह्यते, तथापि कृषेर्होमानां च समानकर्तृकत्वं बाध्येत; कृषेरवैदिकत्वेन समाख्याभावेन तत्राध्वर्युनियमाप्राप्तेः । अतः समाख्यानुग्रहादपि वैदिककर्मशेषत्वेनैव जयहोमविधिः । वृत्तमधिकरणम् ॥

इदमामनन्ति—'वरुणो वा एतं गृह्णाति, योऽश्वं प्रतिगृह्णाति, यावतोऽश्वान्प्रतिगृह्णीयात्तावतो वारुणांश्चतुष्कपालान्निर्वपेद्वरुणमेव स्वेन भागधेयेनोपधावति, स एवैनं वरुणपाशान्मुञ्चति' इति । अत्र प्रतिपूर्वो गृह्णातिर्दाने वर्तत इत्युत्तराधिकरणे वक्ष्यते । किमेषा इष्टिर्लौकिके वैदिके चाश्वदाने भवति, उत लौकिके, अथवा वैदिके इति संशयः । तत्र निमित्तस्याश्वदानस्य लौकिकत्वेन वैदिकत्वेन च विशेषणे वाक्यभेदप्रसङ्गादुभयत्रापीति प्रथमपक्षं [1]सिद्धवत्कृत्य निराकुर्वन द्वितीयपक्षमुपक्षिपति—

१४. अश्वप्रतिग्रहेष्टेरधिकरणम् ।

दोषात्त्विष्टिर्लौकिके स्याच्छास्त्राद्धि वैदिके न दोषः स्यात् ॥ ३४ ॥

तुनार्थे । नोभयत्र इयमिष्टिः, किंतु लौकिक एव दाने स्यात् । कुतः । दोषात् । वरुणपाशग्रहदोषयुक्ताश्वदानस्य निमित्तत्वावगमात् वैदिकदाने च दोषाभावात् । न च दोषविशिष्टनिमित्तानुवादे वाक्यभेदः शङ्क्यः । अश्वदानत्वेनैव हि तन्निमित्तं शब्दवृत्त्यावगम्यते । पर्यवसानगत्यैव दोषवदश्वदानं निमित्तम् । तथाहि—अश्वदाने विहिताया इष्टेः फलाकाङ्क्षायाम् 'स एवैनं वरुणपाशान्मुञ्चति' इति वाक्यशेषाद्वरुणपाशग्रहदोषनिर्घातः फलमवगम्यते । दोषश्च प्रतिषेधसमनियतः । लौकिकमेव चाश्वदानम् 'न केसरिणो ददाति' इति प्रतिषिद्धम्; न तु वैदिकमपि, तस्य विहितत्वात्, अहिंसावाक्यवत् न-केसरिवाक्यस्यापि विहितेतरविषयत्वात् । ततश्च हि यतः 'अश्वो दक्षिणा' इत्यादिशास्त्राद्वैदिकाश्वदाने दोषो नास्ति, अतोऽवैदिकमेवाश्वदानं निमित्तं पर्यवस्यति । तथा च आर्थवादिकफलानुसारेण लौकिकस्यैवाश्वदानस्य निमित्तत्वादिष्टेः पुरुषार्थत्वमेव, न तु

1. विधिवत्कृत्य—ख.

क्रत्वर्थत्वम् । न च क्रतुबहिरपि अश्वदानस्य 'अश्विसालोक्यमाववः' इत्यादिश्रुतिविहितत्वात् 'न केसरिणो ददाति' इति प्रतिषेधविषयत्वाभावेन तत्रापि दोषाभावात्कथं निमित्तत्वमिति वाच्यम्; विधिमनपेक्ष्य स्नेहप्रत्युपकारादिवशेन मित्रादिभ्यो यदश्वदानं क्रियते, तस्य प्रतिषेधविषयतया दोषसत्त्वेन निमित्तत्वोपपत्तेः । तस्माल्लौकिक एवाश्वदाने पुरुषार्था इयमिष्टिः ॥

अथ सिद्धान्तयति—

अर्थवादो वानुपपातात्तस्माद्याज्ञे प्रतीयेत ॥ ३५ ॥

वाशब्दोऽवधारणे । 'स एवैनं वरुणपाशान्मुञ्चति' इति वाक्यशेषस्तावदर्थवाद एव । यथा वरुणग्रहे सति तद्विमोचनसाधनमवश्यमनुष्ठेयम्, तद्वत् अश्वदाने सति इयमिष्टिः—इत्यवश्यकर्तव्यताद्दृष्टान्तपरतया इष्टिविध्यपेक्षितप्रशंसारूपार्थम्य वादः, न तु दोषनिर्घातवादः । कुतः । अनुपपातात् वाक्यशेषस्य मुख्यार्थे समावेशासंभवात् । मुख्यया हि वृत्त्या जलोदरपर्यायवरुणपाशमोचनं फलं वाक्यशेषादवगम्यते, वरुणपाशशब्दस्य जलोदरव्याधौ प्रसिद्धेः । जलोदरस्य च लौकिकमश्वदानं निमित्तमिति न प्रत्यक्षादिलौकिकप्रमाणादवगतम् । नापि कस्यांचिद्वैदिकसंहितायामेवं निबद्धमस्ति । नापि 'न केसरिणो ददाति' इति वाक्यादेवमवगन्तुं शक्यते, प्रतिषेधतः पापस्यैव कल्पनात् तस्य च इहानुपादानात् । न च 'वरुणो वा एतं गृह्णाति योऽश्वं प्रतिगृह्णाति' इति वाक्यशेषादेवाश्वदानस्य जलोदरात्मकवरुणग्रहहेतुत्वमवगम्यत इति वाच्यम् । न हि तस्य वाक्यशेषस्य तत्प्रतिपत्तौ व्यापारोऽस्ति, 'योऽपगुरातै शतेन यातयात्' इत्यादिवत् इह हेतुहेतुमद्भावबोधकप्रत्ययाभावेन प्रसिद्धजलोदरानुवादेन तन्निर्घातार्थकर्मविधिमात्रपरत्वात्, अत्रैव च तद्बोधने वाक्यभेदप्रसङ्गात् । न च 'वृणोति दुःखानि च्छादयति' इति व्युत्पत्त्या पापमेव वरुणशब्देन विवक्षितम्, तच्च प्रतिषिद्धे लौकिकेऽश्वदानेऽस्तीति तन्निर्घातार्थत्वमिष्टेः संभवतीति वाच्यम्; वरुणपाशशब्दस्य जलोदरविषयां समुदायप्रसिद्धिं परित्यज्य यथाकथंचिद्व्याख्यानस्यायुक्तत्वात् । तथा व्याख्यानेऽपि वैदिकेऽश्वदानेऽपि अश्ववियोगदुःखस्य दर्शनात् तदेव वरुणपाशशब्देन शक्यते वक्तुम्, 'वृणोति पुरुषम्' इति दुःखं वरुणशब्दस्य संभवात् । न चैवं सति इष्टेस्तथाविधदुःखनिवर्तकत्वाभावात् 'स एवैनं वरुणपाशान्मुञ्चति' इति वाक्यशेषासंगतिरिति वाच्यम्, इष्टयाडम्बरविनोदनेनाश्ववियोगदुःखनिवृत्तेः सत्त्वात् । तदेवमुभयथापि लौकिकाश्वदाने वरुणपाशदोषो न प्रसजतीति वाक्यशेषस्य मुख्यार्थे दोषनिर्घाते अनुपपातात् असमावेशात् विध्यपेक्षितकेवलस्तुतिपरत्वं विज्ञायते । तस्माद्वाक्यशेषस्य फलपरत्वाभावात् याज्ञे ज्योतिष्टोमादियज्ञाङ्गभूते 'गौश्चाश्वश्च' इत्यादिविहितेऽश्वदाने विहिता एषा इष्टिः क्रत्वर्थतया प्रतीयेत ॥

अत्र शङ्कते—

अचोदितं च कर्मभेदात् ॥ ३६ ॥

च-शब्दः शङ्कायाम्। 'कर्मभेदात्' इति ल्यब्लोपे पञ्चमी। लौकिकं वैदिकमिति विशेषमुपादाय इदमिष्टिकर्म अचोदितं न विहितम्, किंतु अविशेषेणाश्वदानमात्रं विहितम्। अतो लौकिके वैदिके चाश्वदाने स्यात्। उक्तरीत्या 'स एवैनं वरुणपाशान्मुञ्चति' इति वाक्यशेषस्य दोषनिर्घातपरत्वासंभवेन केवलस्तुतिपरतया दोषवदश्वदानस्यैव निमित्तत्वालाभेन अश्वदानमात्रस्यैव निमित्तत्वलाभे सति वैदिकमात्रपरिशेषनिर्णायकाभावात्। तस्मात् 'याज्ञे प्रतीयेत' इत्यनुपपन्नः॥

अथ परिहरति—

सा लिङ्गादार्त्विजे स्यात् ॥ ३७ ॥

सा इष्टिः आर्त्विजे ऋत्विक्संप्रदानके क्रत्वङ्गभूते अश्वदाने स्यात्, न तु लौकिके। कुतः। लिङ्गात् वैदिकत्वसामर्थ्यात्। प्रसिद्धे ह्यश्वदाने निमित्ते इदं कर्म विधीयते। प्रसिद्धौ च पर्यालोच्यमानायां नैमित्तिककर्मणोऽस्य वैदिकत्वात् तत्सदृशं वैदिकमेवाश्वदानं निमित्तं शीघ्रमुपतिष्ठत इति तत्संबन्धिक्रतूपस्थानात् तदुपकारार्थत्वं गम्यते। ततश्च तेनैव निराकाङ्क्षत्वान्न लौकिकस्य ग्रहणम्। एवं च फलं न कल्प्यमिति लाघवम्। किंच, लौकिकेऽश्वदाने इष्टेः पुरुषार्थता; वैदिकदाने तु तस्याः क्रत्वर्थता; न चैकस्य कर्मणस्तदुभयार्थत्वं युज्यते; क्रत्वर्थत्वे ज्योतिष्टोमादिप्रधानविधिपरतन्त्रत्वात् नाधिकारान्तरप्रयोजकत्वम्, पुरुषार्थत्वे तु स्वातन्त्र्येणाधिकारान्तरप्रयोजकत्वमिति वैषम्यापत्तेः। तस्माद्वैदिक एवाश्वदाने इयमिष्टिः। तत्रापि श्रौत एव दाने, न तु स्मार्ते, तस्य प्रत्यक्षवेदविहितत्वाभावेन प्रत्यक्षवेदविहितनैमित्तिकविसदृशतया लौकिकवदेव शीघ्रोपस्थित्यभावात्। तदेवम् 'दोषाक्विष्टिः' इत्यारभ्य चत्वारि सूत्राण्येकाधिकरण्यपरतया वार्तिके योजितानि॥

भाष्ये तु 'अचोदितं च कर्मभेदात्' 'सा लिङ्गादार्त्विजे स्यात्' इति सूत्रद्वयम् अस्मामेवेष्टावधिकरणान्तरपरतया योजितम्— 'प्रजापतिर्वरुणायाश्वमनयत्; स स्वां देवतामार्च्छत्; स पर्यदीर्यत; स एतं वारुणं चतुष्कपालमपश्यत्; तमिरवपत्; ततो वै स वरुणपाशादमुच्यत; वरुणो वा एतं गृह्णाति योऽश्वं प्रतिगृह्णाति; यावतोऽश्वान्प्रतिगृह्णीयात्तावतो वारुणांश्चतुष्कपालान्निर्वपेत्' इति श्रुतम्। प्रजापतिर्वरुणायाश्वमनयत् दत्तवान्। स प्रजापतिः स्वां स्वकीयां देवतां संप्रदानभूतं वरुणम् आर्च्छत्प्राप्तवान्। प्रजापतिरश्वं दत्त्वा वरुणग्रहं प्राप्तवानिति यावत्। सः प्रजापतिः पर्यदीर्यत जलोदरेण व्याधिना उदरे विदीर्णोऽभवत्। स प्रजापतिरेतं चतुष्कपालमित्यादि स्पष्टम्। इयमिष्टिः प्रतिग्रहीतुः दातुर्वेति

१५. दातुर्वारुणेष्ट्यधिकरणम्।

संशये पूर्वपक्षयति—**अचोदितं च कर्मभेदात्** ॥ दानप्रतिग्रहकर्मणोर्भेदात्प्रतिग्रहीतृसंबन्धित्वेन श्रुतमिदं कर्म दातुरचोदितं मन्यामहे । च-शब्दो युक्त्यन्तरमनुक्तं समुच्चिनोति— विध्युद्देशस्य बलीयस्त्वात् उपक्रमगतोऽप्यर्थवादः अन्यथा नेय इति । उपक्रमे हि यद्यपि प्रजापतिरश्वदानाद्वरुणगृहीतोऽभवत्, वारुण्येष्ट्या तन्मोचनमात्मनः कृतवान, तस्मादन्योऽप्येवं कुर्यादिति विज्ञायते; तथापि विध्युद्देशस्य प्रबलत्वात् तदनुसारेण तद्वाक्यशेषः उपक्रमगतोऽपि अङ्गगुणविरोधन्यायेनान्यथा नेयः— दातुरपि यदि दोषः स्यात् किमुत प्रतिग्रहीतुरिति । न च 'दोषात्त्विष्टिः' इति सूत्रद्वयसिद्धपूर्वाधिकरणे 'याज्ञे प्रतीयेत' इति वैदिककर्माङ्गत्ववलादेव दातुरिष्टिरिति लभ्यते, अन्यथा यजमानस्य सकाशात्प्रतिग्रहीतुरस्यामिष्टावधिकारसिद्धये तद्वाम्येव फलं कल्प्यमिति यजमानरूपदातृगामिफलककर्माङ्गत्वासंभवात्; न हि प्रतिग्रहीत्राधिकारिकाया इष्टेः दात्रधिकारिकज्योतिष्टोमादिवैदिककर्मणः श्राङ्गाङ्गिभावः संभवति, अङ्गप्रधानयोरेककर्तृकत्वनियमादिति वाच्यम् । एतदधिकरणप्रवृत्त्युपजीवनेनैव [1]पूर्वाधिकरणे याज्ञत्वव्यवहारप्रवृत्तेः । तस्मात्प्रतिग्रहीतुरिष्टिः । तस्यां च प्रतिग्रहीतृकर्तृकायां यजमानकर्तृकवैदिककर्माङ्गत्वाभावेन पुरुषार्थतया ऋत्विजामितरेषां च फलकल्पनायास्तुल्यत्वाल्लौकिकेऽपि प्रतिग्रहे इयमिष्टिरिति । अथ सिद्धान्तयति— **सा लिङ्गादार्त्विजे स्यात्** ॥ सा इष्टिः आर्त्विजे ऋत्विक्संप्रदानके याजमानेऽश्वदाने स्यात् । कुतः । लिङ्गात् उपक्रमसामर्थ्यात् । उपक्रमे हि प्रजापतिरश्वं दत्त्वा वरुणग्रहं प्राप्तः, वारुणेष्ट्या ततो मुक्त इत्यवगतम् । तदेतद्दातुरेवेष्टिविधौ युज्यते । न हि प्रजापतिनाश्वदात्रा वारुणेष्ट्या वरुणपाशविमोचनस्य कृतत्वात् अश्वप्रतिग्रहीत्रा वारुणेष्ट्या यष्टव्यमिति समञ्जसम् । न च दातुरपि दोषश्चेत्किमुत प्रतिग्रहीतुरित्येवमङ्गगुणविरोधन्यायेन विध्युद्देशमनुसृत्य उपक्रमगतवाक्यशेषोऽन्यथा नेय इति वाच्यम् । असंजातविरोधित्वेनोपक्रमगतार्थवादस्य यथाश्रुततयैव व्याख्यातव्यतायां अङ्गगुणविरोधन्यायस्य विध्युद्देशतद्वाक्यशेषान्यविषयतायाश्चोपक्रमाधिकरणे व्यवस्थापितत्वात् । ननु, प्रजापतिर्वरुणायाश्वमनयत् अददात्; सः वरुणः स्वां स्वकीयां देवतां देवत्वम् 'वारुणो वा अश्वः' इति तदभिमानित्वम्, आर्च्छत् 'नोभयतोदतः प्रतिगृह्णीयात्' इति अप्रतिग्राह्यप्रतिग्रहात् आर्तमकरोत्; स वरुणः पर्यदीर्यत जलोदरेण उदरे परिदीर्णोऽभवत्; सः वरुणः एतं वारुणमित्यादि स्पष्टम्; तदेवमुपक्रमस्थ प्रतिग्रहीतृपरतयैवोपपत्तेः विध्युद्देशस्य तत्परत्वमेवेति चेन्न । 'प्रजापतिर्वरुणायाश्वमनयत्' इति हि प्रजापतिर्दाता संकीर्तितः, वरुणश्च संप्रदानम्; 'स स्वां देवताम्' इति तच्छब्दश्च प्रथमान्तः प्रजापतिमेव परामृशति समानविभक्त्यन्तत्वात्; न तु वरुणम्, तस्य चतुर्थ्यन्तोपात्तत्वात् । एवम् 'स पर्यदीर्यत' 'स एतं वारुणम्' इत्यत्रापि । वरुण एव वरुणपाशं प्राप्तः इत्यस्य वारुणेष्ट्या तस्मान्मुक्त इत्यस्य च व्याहतत्वाच्च । न हि स्वेनैव स्वयं पीड्यते । नापि वरुणस्या-

1. पूर्वाधिकरणप्रवृत्तेः—ख.

त्मोद्देशेन यागः संभवति, स्वद्रव्यत्यागात्मकस्य यागस्यात्मोद्देश्यकत्वे व्याघातात्। ततश्चोक्तरीत्या उपक्रमस्य दातृपरत्वमेव युक्तमिति तदनुसृत्योपक्रमाधिकरणन्यायेन विध्युद्देशस्य दातृपरत्वमेवास्थेयम्। ननु 'ऋग्भिः पूर्वाह्णे दिवि देव ईयते, यजुर्वेदे तिष्ठति मध्ये अह्नः, सामवेदेनास्तमये महीयते, वेदैरशून्यस्त्रिभिरेति सूर्यः' इत्यादावृगादिशब्दानां वेदेष्वपि बहुशो दृष्टत्वात् 'अग्नेर्ऋग्वेदः' इत्युपक्रमानुसारेण 'उद्भैरृचा क्रियते' इत्यादिविध्युद्देशानां तत्तद्वेदपरत्वमुचितम्; इह तु प्रतिगृह्णाते: कापि दाने प्रयोगाभावान्न विध्युद्देशस्य दातृपरत्वं संभवति इति; अत्राप्येतदेवोत्तरम्—'सा लिङ्गादार्त्विजे स्यात्' इति। सा इष्टिः आर्त्विजे ऋत्विक्संप्रदानके याजमानेऽश्वदाने स्यात्; कुतः? लिङ्गात् 'तत्प्रयोजको हेतुश्च' इति प्रयोजकस्यापि कचित्कर्तृत्वस्मरणात्। 'प्रतिगृह्णीयात्' इति हि कर्ता गम्यते। स च प्रतिग्रहस्य प्रयोजको दातापि भवति। यथा 'षड्भिर्हलैः कृषति' इति। तत्र हि कर्षणस्य मुख्यकर्ता भृत्यः। क्षेत्रस्वामी तु तत्प्रयोजकः। स एव च तत्र 'कृषति' इति विवक्षितः। न हि क्षेत्रस्वामी स्वयं कृषति। किं तु कर्षणे भृत्यं प्रयोजयति। एवमिहापि प्रतिग्रहस्य प्रयोजकः कर्ता 'प्रतिगृह्णीयात्' इत्यनेन विवक्ष्यते। एतेनोपक्रमाधिकरणन्यायेन गतार्थत्वं निरस्तम्, [1]उक्ताधिकशङ्कापरिहारार्थत्वात्। ननु मैत्रायणीयशाखायाम् 'स एषोऽश्वः प्रतिगृह्यते' इत्येवं प्रतिग्रहोपक्रमाया एवास्या इष्टेराम्नानात् तैत्तिरीयशाखागतस्याप्यस्योपक्रमस्थस्यार्थवादस्य प्रतिग्रहीतृपरत्वमेवोचितमिति चेत्; न, तत्रोपक्रमे प्रतिग्रहावगमेऽपि तदनुसारेण तैत्तिरीयशाखायामुपक्रमार्थवादस्य स्पष्टमेव दातृपरस्य विरुद्धत्वेन प्रतिग्रहीतृपरत्वाश्रयणानुपपत्तेः। न हि विरुद्धयोरेकवाक्यतास्ति। तदुक्तं वार्त्तिके 'प्रतिग्रहीतरि स्पष्टं यदि वाक्यान्तरं ततः। भवेत्तस्यापि तेनेष्टिर्दातुस्तु न निवार्यते' इति। एतच्छङ्कापरिहारार्थोऽपि सूत्रे चकारः। इति शाबरमतानुसारी भट्टानुमतः पन्थाः॥

प्राचीनभाष्येषु मैत्रायणीयशाखीयोपक्रमानुसारेण तैत्तिरीयशाखायामप्युपक्रमार्थवादस्य प्रतिग्रहविषयत्वमविरोधादभ्युपेत्य चत्वार्यपि सूत्राणि प्रतिग्रहविषय एव एकाधिकरणपरतया योजितानि। तद्यथा— 'स त्वां देवतामार्च्छत्' इति तच्छब्दो वरुणमेव संनिहितं परामृशति न तु दातारं प्रजापतिम्, व्यवहितत्वात्। न ह्येकविभक्त्युपात्तपरामर्शित्वं सर्वनाम्नां नियतम्; 'अजाइशरथो जातो रामस्तस्मादजायत' इत्यादौ व्यभिचारात्, 'वरुणमेव स्वेन भागधेयेनोपधावति, स एवैनं वरुणपाशान्मुञ्चति' इत्युत्तरवाक्ये तच्छब्दस्य भिन्नविभक्त्युपात्तवरुणपरतायां निर्विवादत्वाच्च। ततश्च मैत्रायणीयतैत्तिरीयशाखयोरविरोधलाभात्प्रतिग्रहीतुरेवेष्टिः। न च 'अनयत्' इत्याख्यातोपात्तकर्तुः प्रजापतेरेव संनिहितत्वात् 'स त्वाम्—'

1. उक्तातिशङ्का— ख.

इति तच्छब्देन परामर्शो युक्त इति वाच्यम्; आख्यातस्य कर्तृवाचिताया: कर्त्रधिकरणे निरस्तत्वात्। वरुणस्यैव कथं वरुणग्रह इति विरोधस्तु 'अग्निर्वा अकामयत अन्नादो देवानां स्यामिति, स एतमग्नये कृत्तिकाभ्य: पुरोडाशमष्टाकपालं निरवपत्' इत्यादिवत्, 'आत्मनो वपामुदक्खिदत्' इत्यादिवच्च महानुभावानां देवानां लोकानुग्रहार्थं रूपभेदाश्रयणेन परिहार्य:। सा चेयमिष्टि: किं लौकिकेऽश्वप्रतिग्रहे उत वैदिके इति संशये, पूर्वपक्षयति— **'दोषात्त्विष्टिर्लौकिके स्याच्छास्त्राद्धि वैदिके न दोष: स्यात्'**। जलोदरपर्यायवरुणपाशनिर्घातार्थत्वादियमिष्टिर्लौकिकेऽश्वप्रतिग्रहे स्यात्, वैदिकेऽश्वप्रतिग्रहे विहितत्वादेव दोषासंभवादित्यर्थ:। सिद्धान्तयति— **अर्थवादो वानुपपातात्तस्माद्याज्ञे प्रतीयेत**। 'स एवैनं वरुणपाशान्मुञ्चति' इत्यर्थवाद एव, न तु फलवाद:! कुत:? अनुपपातात् जलोदरनिर्घाते मुख्यार्थे उक्तरीत्या वाक्यस्य समावेशासंभवात्। तस्मादिष्टेर्दोषनिर्घातार्थत्वासंभवादप्रसक्तदोषेऽपि याज्ञे क्रत्वङ्गभूतेऽश्वप्रतिग्रहे इष्टि: प्रतीयेत। अत्र शङ्कते— **अचोदितं च कर्मभेदात्**। ल्यब्लोपे पञ्चमी। लौकिकं वैदिकमिति विशेषमनपेक्ष्य अश्वप्रतिग्रहमात्रे इदमिष्टिकर्म विहितम्। अत उभयत्र स्यात्, वाक्यशेषस्य केवलस्तुतिपरतया दोषवदश्वप्रतिग्रहस्यैव निमित्तत्वालाभात्। अतो याज्ञे प्रतीयेतेत्यनुपपन्नम्। अथ परिहरति— **सा लिङ्गादार्त्विजे स्यात्**। सा इष्टि:, लिङ्गात् वैदिकत्वसामान्यात्, आर्त्विजे ऋत्विग्भ्यो दक्षिणात्वेन देयस्याश्वस्य प्रतिग्रहे यजमानकर्तृके प्रत्येतव्या। ततश्च यजमानगामिफलकक्रत्वर्थत्वं भवति। अस्ति हि क्रत्वङ्गतया यजमानकर्तृकोऽश्वप्रतिग्रह:— 'दीक्षितो द्वादशाहं भूतिं वन्वीत' 'पूषा सन्येति सनिहारान्प्रहिणोति' 'चन्द्रमसीति हिरण्यं प्रतिगृह्णाति' 'वस्त्रमसीति वास:' 'उस्रासीति गाम्' 'हयोऽसीत्यश्वम्' इत्यादिश्रवणात्। भूतिर्दक्षिणार्थं द्रव्यम्। वन्वीत याचेत। सनिं याच्ञालब्धं द्रव्यं हरन्तीति सनिहारा:, तान्प्रहिणोति दातृसकाशं प्रापयति। स्पष्टमन्यत्। तदेतत्षष्ठोपान्त्याधिकरणे 'याच्ञाक्रयणभविष्यमाने लोकवत्' इत्यत्र स्पष्टं भविष्यति। अत: प्रतिग्रहीतुरेवैषा इष्टि:। सोऽयं प्राचीनभाष्यानुसारी पक्षोऽपि वार्त्तिके ध्वनित: याज्ञिकसंमतश्च। तथा च भारद्वाजसूत्रम् 'प्रतिग्रह इष्टि: स्यादित्याश्मरथ्योऽश्वप्रतिग्रह इत्यालेखन आर्त्विजे प्रतिग्रहे यजमानस्यैव स्यात्' इति। वृत्तमश्वप्रतिग्रहेष्टयधिकरणम्॥

इदमामनन्ति 'सोमेन्द्रं श्यामाकं चरुं निर्वपेत् य: सोमं वमिति' इति। किमियमिष्टिर्लौकिकसोमस्य धातुसाम्यार्थं पीतस्य वमने निमित्ते भवति, उत वैदिकसोमवमने, अथ वोभयत्रेति संशये, वमनस्य विहितत्वाभावेनावैदिकतया अश्वदानवद्वैदिकस्यैव तस्य शीघ्रोपस्थित्यसंभवादुभयत्रापि निमित्ते इयमिष्टिरिति प्राप्ते, सिद्धान्तयति—

पानव्यापच्च तद्वत् ॥ ३८ ॥

पानेति कर्मणि ल्युट्। पीतसोमरसस्य व्यापत् व्यापत्तिः वान्तिरपि तद्वत् वैदिकयेव निमित्तमित्यर्थः। यद्यपि वमनं न विहितं तथापि सोमपानस्य विहितत्वेन तद्वमनस्यापि वैदिकत्वात् शीघ्रोपस्थितिः संभवतीति भावः। भाष्ये तु 'दोषाश्चिष्टि-लौकिके' इति [1]व्यवहिताधिकरणपूर्वपक्षपरतया इदं सूत्रं योजितम्। तदेत-त्क्लिष्टत्वादुपेक्ष्य[2] वार्त्तिके अव्यवहिताधिकरणसिद्धान्तातिदेशपरं योजितम्।

१६. वैदिकपानव्यापदि सोमेन्द्रचरुविधाना-धिकरणम्।

'सा लिङ्गादार्त्विजे स्यात्' इत्यव्यवहितपूर्वसूत्रस्य वैदिकाश्वदानमात्रविषयतयापि वार्त्तिके योजितत्वेन तथा व्याख्यानस्य युक्तत्वात्। स्यादेतत्। 'इन्द्रियेणैष वीर्येण व्यृध्यते यः सोमं वमिति' इति सोमवमने इन्द्रियवीर्यसमृद्धयभावदोषस्य 'नेन्द्रियेण वीर्येण व्यृध्यते' इति इष्टेस्तन्निर्घातार्थत्वस्य च श्रवणाद्वैदिकस्य च सोमस्य विहितपानमात्रेण कृतप्रतिपत्तिकस्य वमने-ऽपि दोषाभावात् न तत्र दोषनिर्घातार्थेष्टिविधानमर्थवत्; अतो लौकिकसोमवमन एवेष्टिः; न च 'वरुणो वा एतं गृह्णाति योऽश्वं प्रतिगृह्णाति' इतिवत् 'इन्द्रियेण वा एष व्यृध्यते' इत्येतदप्य-र्थवाद इति वाच्यम्; न ह्यश्वदाने सति जलोदरग्रहवत् सोमवमने इन्द्रियवीर्यव्यृद्धिरत्यन्ता-विद्यमाना; न च लौकिकवमनादिन्द्रियवीर्यसमृद्धिरेव, अन्यथा धातुसाम्यानुपपत्तेरिति वाच्यम्; वमनादूर्ध्वमिन्द्रियवीर्यसमृद्धावपि तत्काले इन्द्रियवीर्यशोषसत्त्वात्— इत्याशङ्क्य निराकरोति—

दोषात्तु वैदिके स्यादर्थाद्धि लौकिके न स्यात् ॥ ३९ ॥

तुरवधारणे। इन्द्रियवीर्यसमृद्धिदोषनिर्घातार्थत्वश्रवणादिदृष्टिर्वैदिकसोमवमन एव स्यात्। लौकिके हि वमने अर्थात् प्रयोजनवशादेव दोषो न स्यात्। सोमपानं हि लोके वमनायैव प्रयोजनाय क्रियते। वमने ह्यन्तर्गतदोषनिःसारणेन धातुसाम्यं जायते। ततश्च तात्कालिके-न्द्रियवीर्यशोषाभ्युपगमेनैव लोके वमनप्रवृत्तेः 'अङ्गीकृता ग्लानिर्न दोषाय' इति न्यायेन लौकिकसोमवमने दोषो नास्ति। वेदे तु सोमपानस्य 'हिन्व मे गात्रा हरिवः' इत्यादिमन्त्रवर्णतो जरणपर्यन्तस्यैव शास्त्रार्थतया तद्वमने दोषोऽस्त्येव। अतो दोषवशादेव वैदिकसोमवमने स्यादिष्टिः। ननु वमनप्रयुक्तेन्द्रियवीर्यव्यृद्धेरिष्ट्यनुष्ठानेनाप्यपरिहार्यतया इष्टेर्दोषनिर्घातार्थत्वासंभवात् 'इन्द्रि-येण वा एष वीर्येण व्यृध्यते' इत्यर्थवादमात्रमिति कुतस्तद्वशाद्वैदिकवमनमात्रे इष्टिः स्यादिति, अत्राप्येतदेव सूत्रमुत्तरम्। अस्तु दोषश्रवणमर्थवादः। अर्थात् अर्थनात् अपेक्षावशात् वैदिकवमन एव स्यात् न तु लौकिकवमने। तत्र हि दोषाभावात्प्रतीकारापेक्षा नास्तीत्यनपेक्षितं प्रायश्चित्तेष्टिवि-

1. व्यवहितसूत्र ..ख. 2. दुष्टत्वादुपेक्ष्य—क.

धानम् । वेदे तु जरणपर्यन्तस्यैव सोमपानस्य क्रतौ विधानात् वमने क्रतुवैगुण्यात् तत्प्रतीकाराय अपेक्षितमिष्टिविधानमिति तत्रैवेष्टिः । किं च लोकेऽपि तात्कालिकेन्द्रियवीर्यव्यृद्धेरवर्जनीयत्वेन तन्निर्घातार्थत्वासंभवाद्दोषश्रवणं पूर्वपक्षिणाप्यर्थवादमात्रमित्येव स्वीकार्यमिति । ततः फलाकाङ्क्षापूरणाभावात्तत्पक्षे फलकल्पनागौरवं स्यादिति फलकल्पनालाघवादपि वैदिकवमन एवेष्टिः । वृत्तमधिकरणम् ॥

किमिदं वैदिकसोमवमनं याजमानमेव निमित्तम्, उतार्त्विजमपीति संशये पूर्वपक्षयति–

तत्सर्वत्राविशेषात् ॥ ४० ॥

तत् वैदिकसोमवमनं सर्वत्र यजमाने ऋत्विक्षु च विद्यमानं निमित्तम्; कुतः ? अविशेषात् यजमानस्यैव ऋत्विजां सोमवमनेऽपि सम्यग्जरणपर्यन्तप्रतिपानव्यापद्विषयताधिकरणम्। पत्तिवैगुण्येन क्रतुवैगुण्यापत्त्या पूर्वाधिकरणोक्तापेक्षितविधानस्याविशेषात् ॥

१७. सोमेन्द्रचरोर्यजमान-

अथ सिद्धान्तयति—

स्वामिनो वा तदर्थत्वात् ॥ ४१ ॥

वाशब्दोऽवधारणे । स्वामिनः यजमानस्यैव सोमवमनं निमित्तम्, न त्वृत्विजामपि; कुतः ? तदर्थत्वात् इष्टेर्यजमानार्थत्वात् । इष्टिर्ह्येषा क्रत्वङ्गमिति पूर्वाधिकरणे स्थितम् । ततश्चाङ्गप्रधानयोरेककर्तृकत्वनियमात्क्रत्वधिकारिकत्वमेवेष्टेरास्थेयम् । 'यः सोमं वमिति स सोमेन्द्रं चरुं निर्वपेत्' इति च यच्छब्दबलादिष्टिवमनयोरेककर्तृकत्वमवगतम्[1] । अतो याजमानमेव सोमवमनं निमित्तम् । न चैवं सति ऋत्विजां सोमवमने क्रतुवैगुण्यस्य कथं परिहारः, ऋत्विग्विषयेऽपि सोमपानस्य जरणपर्यन्तत्वादिति वाच्यम्, सर्वप्रायश्चित्तादिना तत्संभवात् ॥

इतोऽप्येवमित्याह—

लिङ्गदर्शनाच्च ॥ ४२ ॥

यः सोमपानात्समृद्धिं कामयते तस्यैव तद्वैगुण्याद्व्यृद्धिरुद्घाट्यते 'इन्द्रियेण वा एष वीर्येण व्यृध्यते' इति । तदेतत् स्वामिन एवोपपद्यते, न त्वृत्विजाम् । तत्सामर्थ्यादपि स्वामिन एवेष्टिरिति मन्यामहे । वृत्तमधिकरणम् ॥

दर्शपूर्णमासयोः 'आग्नेयोऽष्टाकपालो भवति' इत्यादि श्रुतम् 'व्यवदानं जुहोति' इति च 'उपस्तृणाति' 'द्विर्ह्यविषोऽवद्यति' 'अभिघारयति' 'चतुरवत्तं जुहोति' इति च । तत्र व्यव-

1. एककर्तृत्वनियमात्क्रत्वङ्गत्वमवगतम्--क, घ.

दानवाक्यमुपस्तरणाभिघारणाज्यसहितज्यवदानपरं चतुरवत्तवाक्येन समानार्थकम्। शाखाभेदाच्च न पौनरुक्त्यम्। तत्र किं कृत्स्नस्य पुरोडाशस्याहवनीये होमः, उत उपस्तरणाभिघारणसंस्कृततूष्णवत्तमात्रस्येति संशये, पूर्वपक्षयति—

सर्वप्रदानं हविषस्तदर्थत्वात् ॥ ४३ ॥

सर्वप्रदानं कृत्स्नस्यैव पुरोडाशस्याहवनीये होमः न तु ज्यवदानमात्रस्य; कुतः? हविषस्तदर्थत्वात् कृत्स्नस्य पुरोडाशस्य देवतार्थत्वात्। 'आग्नेयोऽष्टाकपालः' इति हि अष्टसु कपालेषु संस्कृतस्य पुरोडाशस्याग्निदेवत्यत्वमवगम्यते न तु ज्यवदानस्य तदवयवस्य। अवयविशब्दस्यावयवे लक्षणाप्रसङ्गात्। ततश्च न ज्यवदानमात्रस्य होमः। किं तु कृत्स्नस्यैव पुरोडाशस्य। विना होमं तस्य देवतासंबन्धानिर्वाहात्। न च 'अग्नय इदं न मम' इति त्यागमात्रेण होमं विनापि कृत्स्नस्य पुरोडाशस्य देवतासंबन्धः सिध्यतीति वाच्यम्, 'अग्निमुखा वै देवाः' इति वाक्यशेषबलेन देवतासंबन्धस्याहवनीयाद्यग्निसाध्यत्वावगमेन होमं विना तदनिर्वाहात्। न च कृत्स्नस्य पुरोडाशस्य होमे सति 'शेषास्त्विष्टकृते समवद्यति' इत्यादिशेषकार्याणां लोपः स्यादिति वाच्यम्, अत एवाग्निप्रपुरोडाशान्तरतस्तत्संभवात्। न च शेषकार्याणामप्रयोजकत्वस्य चतुर्थे वक्ष्यमाणत्वान्नात्र द्रव्यान्तराक्षेपसंभव इति वाच्यम्; 'एकदेशद्रव्यं चोत्पत्तौ विद्यमानसंयोगात्' इति चातुर्थिकाधिकरणे हि एकदेशद्रव्यकस्य सतः कर्मणः संनिहितशेषसत्त्वान्न द्रव्यप्रयोजकत्वमिति वक्ष्यते। इदानीं च सर्वहोमे सति संनिहितशेषाभावेन तदधिकरणन्यायाप्रवृत्त्या द्रव्यान्तराक्षेपो निर्बाधः। न चैकस्मिन्नवयविन्युपयुक्तावयवादितरस्यैवानुपयुक्तावयवस्य शेषशब्दार्थत्वात् कथं पुरोडाशान्तरे शेषशब्द इति वाच्यम्, अवयवावयविभावमनपेक्ष्यापि शेषशब्दस्यान्यशब्दपर्यायतायाः श्रुतिस्मृत्योर्दर्शनात्। तत्र वेदे तावत् 'पर्यग्निकृतं पात्नीवतमुत्सृजति' 'आज्येन शेषं संस्थापयति' इत्यत्र शेषशब्दोऽन्यपर्यायः 'आज्येन शेषम्—' इति कर्मान्तरविधिरिति नवमान्त्याधिकरणे वक्ष्यते। धर्मसूत्रे स्वर्गारम्भककर्मणां फलभोगमुक्त्वा ततः 'शेषेण विशिष्टदेशजात्यादिमन्तो जन्म प्रतिपद्यन्ते' इति स्वर्गारम्भकसुकृतादन्यस्मिन्सुकृते शेषशब्दः प्रयुक्तः। न च स्वर्गारम्भकसुकृतस्यैकेनांशेन स्वर्गमुपभुज्य अवशिष्टांशेनेह जन्म प्रतिपद्यन्त इति युक्तम्, स्वर्गारम्भककर्मणां निःशेषमेव फलोपभोगात्, अन्यफलकस्य सुकृतस्यान्यत्र व्यापारासंभवेन स्वर्गारम्भकसुकृतांशेनेह जन्मप्राप्तेरसंभवाच्च। ततश्च पुरोडाशान्तरमेव शेषशब्देन विवक्षितमित्यविरोधः॥

१८ आग्नेयाष्टाकपालचरोर्ज्यवदानमात्रस्य होतव्यताधिकरणम्।

अथ सिद्धान्तयति—

निरवदानात्तु शेषः स्यात् ॥ ४४ ॥

तुर्नार्थे । न सर्वस्य पुरोडाशस्य होमः । किं तु द्रव्यवदानमात्रस्य । शेषस्तु स्विष्टकृदाद्यर्थं स्थापनीयः स्यात् । कुतः ? निरवदानात् । पुरोडाशाग्निष्कृष्य द्रव्यवदानं यस्मिन्वाक्यजाते प्रत्यक्षश्रुतमस्ति तन्निरवदानम् । 'द्विर्हविषोऽवद्यति' 'मध्यात्पूर्वार्धाच्च द्विरवद्यति' 'अङ्गुष्ठपर्वमात्रमवद्यति' 'व्यवदानं जुहोति' इत्यादिवाक्यजातादित्यर्थः । अत्र हि पुरोडाशाग्निष्कृष्याङ्गुष्ठपर्वमात्रशो द्विरवत्तस्यांशस्य होमसाधनता श्रुता । आग्नेयादिवाक्यात्तु कृत्स्नस्य पुरोडाशस्य देवतासंबन्धित्वेनावगतस्य 'अग्निमुखा वै देवाः' इति वाक्यशेषवशेन होमं विनानुपपत्त्या होमसाधनत्वं कल्प्यते । एवं च प्रत्यक्षश्रुतव्यवदानहोमसाधनतानुसारेण आग्नेयवाक्यतोऽपि व्यवदानप्रणाडिकया होमसाधनत्वं पर्यवस्यति । अतो व्यवदानमात्रं हुत्वा शेषयितव्यम् ॥

अत्र पूर्वपक्षी प्रत्यवतिष्ठते—

उपायो वा तदर्थत्वात् ॥ ४५ ॥

वाशब्दः प्रत्यवस्थाने । आग्नेयवाक्यात् 'अग्निमुखा वै देवाः' इत्यर्थवादसहकृतात्कृत्स्नस्य पुरोडाशस्य होमेऽवगते सति निरवदानवाक्यजातमुपायोपदेशपरं भविष्यति 'मध्यात्पूर्वार्धाच्च पुनः पुनर्द्विर्द्विरवदाय होतव्यम्' इति । ननु पुनः पुनर्द्विर्द्विरवदाय होम इति कुतः, अभ्यासस्याश्रवणात् ? इत्यत आह— तदर्थत्वादिति । उत्पत्तौ कृत्स्नस्य पुरोडाशस्य होमार्थत्वावगमादित्यर्थः । ततश्च यथा उत्पत्त्यवगतकृत्स्नपुरोडाशहोमे व्यवदानहोमोऽयमुपायः स्यात् तथा सोमयागवदभ्यसितव्यो व्यवदानहोम इति पर्यवस्यति । तथा च [1]द्विर्द्विरवदायावदाय पुनः पुनर्होमात्कृत्स्नस्य पुरोडाशस्य होमसाधनत्वम् ॥

अथ सिद्धान्ती निराचष्टे—

कृतत्वात्तु कर्मणः सकृत्स्याद्द्रव्यस्य गुणभूतत्वात् ॥ ४६ ॥

तुर्नार्थे । यद्यपि कृत्स्नस्य पुरोडाशस्योत्पत्तिवाक्ये होमार्थत्वमवगतम्, तथापि द्रव्यवदानहोमस्य सकृदेव प्रयोगः स्यात् । नाभ्यासः, कृतत्वात् । सकृत्प्रयोगेणैव 'द्रव्यवदानं जुहोति' इति [2]शास्त्रार्थस्य पर्यवसन्नत्वात् । न चोत्पत्तिवाक्यावगतं कृत्स्नस्य पुरोडाशस्य होमसाधनत्वं द्रव्यवदानहोमाभ्यासमन्तरेणानुपपद्यमानं तदभ्यासं प्रयोजयतीति वाच्यम् । अग्निदेवत्यहोमसाधनत्वमेव ह्याग्नेयत्वं पुरोडाशस्य । तच्च वाक्यान्तरपर्यालोचनया द्रव्यवदानप्रणाडिकया कृत्स्नस्य पुरोडाशस्योपपाद्यम् । यथा व्रीहीणां पुरोडाशप्रणाडिकया पशोर्हृदयादिप्रणाडिकया सोमस्य च रसप्रणाडिकया तद्वत् । एवं च द्रव्यवदानप्रणाडिकया कृत्स्नस्य पुरोडाशस्याग्नेयत्वमुपपन्नमिति

1. द्विर्द्विरवदाय पुनः पुनरादाय...क. 2. शास्त्रस्य... ख.

न तत् अवदानस्याभ्यासं प्रयोजयितुमीष्टे। ननु द्रव्यवदानहोमोऽभ्यस्यताम् आग्नेयत्वं वा प्रणाडिकया नीयतामित्यत्र विनिगमनाविरह इत्यत आह— द्रव्यस्य गुणभूतत्वादिति। होमो हि 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इति फलसंबन्धात्प्रधानम्, पुरोडाशस्तु तत्र साधनत्वाद्गुणभूतः। न च तदनुसारेण प्रधानभूतहोमस्यावृत्तिर्न्याय्या। न च 'स्वर्गकामो यजेत' इति यागस्यैव फलसंबन्धात्प्राधान्यम्, न तु होमस्येति वाच्यम्, यजतेरपि होमवाचित्वात् जुहोतिचोदितेष्वपि कर्मसु 'अग्निहोत्रस्य यज्ञक्रतोः, एक ऋत्विक्' इत्येवं यजिनानुवाददर्शनात्। ततश्चाग्नेयवाक्यं द्रव्यवदानहोमवाक्यं चैकवाक्यं संपद्यते— अष्टाकपालपुरोडाशप्रकृतिकद्रव्यवदानमग्निदेवत्यहोमसाधनम् इति। तुशब्दश्चार्थोऽनुक्तसमुच्चयेऽपि, पुनः पुनरवदाने मध्यात्पूर्वार्धादिति विरोधश्चेति। तस्मान्न सर्वहोमः॥

इतोऽप्येवमित्याह—

शेषदर्शनाच्च ॥ ४७ ॥

'शेषात्स्विष्टकृतं यजति' इत्यादिशेषकार्यदर्शनादपि न सर्वहोमः। न च हविरन्तरपरः शेषशब्द इति युक्तम्, शेषशब्दस्योपयुक्तावशिष्टांशविषयां प्रसिद्धिं परित्यज्य अन्यशब्दपर्यायताश्रयणस्यान्याय्यत्वात्। वस्तुतस्तु, वाजसनेयके 'अथायं देवो योऽयं पशूनामीष्टे' इत्युपक्रम्य 'यावतीभ्यो देवताभ्यो हवींषि गृहीतान्यभवन्सर्वाणि तानि हुतानि, कथमस्मा आहुतिं कल्पयेम' इत्युक्त्वा 'स यथापूर्वं हवींष्यभिघारयत्तदेकस्मा अवदानाय पुनराप्याययदयातयामान्यकरोत्तत एकैकमवदानमवाद्यत्' इति स्विष्टकृद्वाक्यशेषे देवतान्तरहुतशिष्टत्वाद्यागान्तरायोग्यत्वाधायकं दोषमुद्भाव्य अवत्तप्रदेशप्रत्यभिघारणादयातयामत्वम्, अतः स्विष्टकृद्यागार्हत्वमाग्नेयादिभागशिष्टहविषामित्येवं दृश्यते। तदेतच्छेषशब्दस्योपयुक्तावशिष्टांशपरत्व एव घटते। तस्मादपि न सर्वहोम इति व्याख्येयम्॥

तदेतदधिकरणं भाष्योत्प्रेक्षितं वार्त्तिके परिष्कृतं दूषितं च। तद्यथा— यत्तावदुक्तमाग्नेयत्वं द्रव्यवदाने उपसंहृतमिति तदयुक्तम्। 'सामान्यविधिरस्पष्टः संह्रियेत विशेषतः। स्पष्टस्य तु विधेर्नान्यैरुपसंहारसंभवः'। 'सप्तदश सामिधेनीरनुब्रूयात्' इत्यनारभ्यवादेन तावत्साप्तदश्यस्य सामिधेनीसंबन्ध एव स्फुटमवगम्यते न तु क्रतुसंबन्धः। क्रतूपस्थापकशब्दाभावात्। क्रत्वन्यभिचरितसामिधेनीलिङ्गादेव क्रतूपस्थितिः। तत्र सामिधेनीलिङ्गात्सर्वास्विष्टिषूपस्थितासु साप्तदश्यमनारभ्याधीतं प्रकृतिभूतदर्शपूर्णमासौ प्राप्य पाञ्चदश्यावरुद्धत्वात्तत: परावृत्य सर्वासु विकृतीष्टिषु यावन्निवेष्टुमुद्युङ्क्ते ततः प्रागेव मित्रविन्दादीष्टिषु प्रत्यक्षोपदिष्टं साप्तदश्यं प्रवृत्तं पर्यालोच्य ततोऽपि परावृत्य अनाम्नातसाप्तदश्यासु विकृतीष्टिषु निवेष्टुमुद्युञ्जानं सत् मित्रविन्दादिषु

कचिदिदिष्टेषु प्रत्यक्षोपदेशवैयर्थ्यं पर्यालोच्य तत्रैव प्रत्यक्षोपदिष्टसाम्नदृश्ये उपसंह्रियते। अनारभ्याधीतसामान्यवचनस्य तु शाखाभेदान्न पौनरुक्त्यम्। शाखान्तरोपसंहाराभावे सर्वविकृत्यर्थं च, शाखान्तरोपसंहारानित्यत्वस्य शाखान्तराधिकरणे व्यवस्थापितत्वात्। केचित्तु सामान्यवचनतो विज्ञानमभ्युदयकारीत्याहुः। इह त्वष्टाकपालस्य स्फुट एव देवतासंबन्धः, तद्धितश्रुत्याभिहितत्वात्। 'आग्नेयः' इति हि तद्धितेन 'सास्य देवता' इत्यधिकृत्य विहितेन 'अग्निकलिभ्यां ढग्वक्तव्यः' इति ढक्प्रत्ययेनाष्टाकपालपुरोडाशस्याग्निर्देवतेत्यवगतम्। त्यज्यमानहविरुद्देश्यत्वमेव च देवतात्वम्; न तु वेदपुराणप्रसिद्धो जातिविशेषः, 'रक्षोदेवत्यम्' 'पितृदेवत्यम्' इत्यादावसंभवात्। देवतोद्देश्यकद्रव्यत्याग एव यागः। तथा च 'आग्नेयोऽष्टाकपालः' इत्युत्पत्तिवाक्यादग्निदेवताकयागसाधनमष्टाकपालपुरोडाश इति शब्दमर्यादयैव स्फुटमवगतम्। नात्र साम्नदृश्यानारभ्यवादवदनुमानापेक्षास्ति। द्रव्यवदानस्य तु न स्फुटो देवतासंबन्धः, 'द्रव्यवदानं जुहोति' इत्यत्र तथाविधशब्दाभावात्। यद्यपि जुहोतिर्देवतोद्देश्यकत्यज्यमानहविःप्रक्षेपवाची, तथापि तावता सामान्यतो देवतासंबन्ध एव द्रव्यवदानस्य शाब्दः। अग्नित्वेन रूपेण तस्य देवताविशेषसंबन्धस्त्वाग्नेयपुरोडाशावयवत्वादनुमेय इत्यस्पष्टमेव द्रव्यवदानस्याग्नेयत्वम्। तथा च 'आग्नेयोऽष्टाकपालः' इति स्पष्टः सामान्यविधिः कथमस्पष्टाग्नेयताकद्रव्यवदानमात्र उपसंह्रियते। यद्यपि द्रव्यवदानस्य होमात्मकत्यागसंबन्धः शाब्दः, पुरोडाशस्य तु श्रुतदेवतासंबन्धस्य 'अग्निमुखा वै देवाः' इत्यर्थवादवशेनाहवनीये प्रक्षेपमन्तरेणानुपपत्त्या कल्प्यते, तथापि द्रव्यवदानस्याग्नेयत्वे सिद्धे तत्र सामान्यश्रुतस्याग्नेयत्वस्योपसंहारो वाक्यः। द्रव्यवदानस्य चाग्नेयत्वमाग्नेयवाक्यप्राप्ताग्निदेवताकपुरोडाशावयवत्वादनुमेयमित्याग्नेयवाक्यं तत्रोपजीव्यं भवति। अपर्यवसन्नार्थक एव तस्मिन्नाग्नेयवाक्ये सति द्रव्यवदानस्याग्नेयत्वानुमानं न प्रवर्तितुमर्हतीति स्वार्थपर्यवसानान्यथानुपपत्त्या प्रथमतरानुमितः पुरोडाशस्य कृत्स्नस्य होमसंबन्धः प्रत्यक्षविशेषवचनशतेनापि द्रव्यवदानमात्रविषयतामापादयितुं न शक्यते। किं च यत्र विशेषस्य सामान्यात्मना अभेदः तत्रैव सामान्यविधेर्विशेषे उपसंहारः। न चात्र द्रव्यवदानं पुरोडाशस्यावयवभूतं पुरोडाशात्मकं भवति, येन पुरोडाशस्यावयविन उक्तमाग्नेयत्वं तदवयवभूतद्रव्यवदानविषयमुपसंह्रियेत, अवयवावयविनोः सामान्यविशेषभावव्यवहाराभावात्। यच्चोक्तं व्रीह्यादीनां पुरोडाशादिप्रणाडिकयेव पुरोडाशस्यापि द्रव्यवदानद्वारा आग्नेयत्वमिति, तदयुक्तम्, अवघातादिना व्रीह्यादिस्वरूपस्याभिषवादिना सोमलतास्वरूपस्य विशसनादिना पशुस्वरूपस्य च विनष्टत्वेन व्रीह्यादीनां साक्षाद्यागसाधनत्वासंभवेन पुरोडाशशरसहृदयादीनामेव 'आग्नेयोऽष्टाकपालः' 'ऐन्द्रवायवं गृह्णाति' 'हृदयस्याग्रेऽवद्यति' इत्यादिवाक्यान्तरतो यागसाधनत्वावगमात्। प्रणाड्याभयणेऽपि प्रकृते साधकबाधकप्र-

माणाभावेन प्रणाड्याश्रयणस्यायुक्ततया स्वरसतः साक्षादेवावगतस्य कृत्स्नपुरोडाशदेवतासंबन्धस्य व्यवदानद्वारा आश्रयणायोगात्। अथ 'व्यवदानं जुहोति' इति वाक्यमेव तत्र प्रमाणमिति चेत्, किमिह वाक्ये 'अष्टाकपालं जुहोति— इति यत् तत् पुरोडाशाद्विरवदाय' इति विधिः? उत 'व्यवदानं होमेन संस्कुर्यात्' इति? नाद्यः, होमस्याप्राप्तत्वेनानुवादायोगात्। उत्पत्तिवाक्यात्तत्प्राप्तिरिति चेत्, न। तत्राष्टाकपालपुरोडाशेऽग्निदेवतासंबन्धस्य 'अग्नय इदं न मम' इति त्यागमात्रेण आहवनीये प्रक्षेपात्मकं होमं विनाप्युपपत्तेः। अग्नौ प्रक्षेपाभावेऽपि पदहोमादौ देवतासंबन्धदर्शनेन 'अग्निमुखा वै देवाः' इत्यर्थवादतो होमसंबन्धस्यासिद्धेः। कथं चान्यथा 'पात्नीवतमुत्सृजेत्' इत्यादौ देवतासंबन्धः स्यात्, होमस्यैवाभावात्? ततश्च 'द्विर्हविषोऽवद्यति' इति प्राप्तद्रव्यवदानं द्वितीयया प्राधान्येन निर्दिश्य तत्संस्कारो विधीयत इति द्वितीयः पक्षः परिशिष्यते। एवं च कथं द्रव्यवदानप्रणाड्या पुरोडाशस्याग्नेयत्वसिद्धिः? 'द्रव्यवदानं जुहोति' इति वाक्ये द्रव्यवदानस्य प्रक्षेपमात्रावगमात्, तस्य चोत्पत्तिवाक्यावगतसमस्तपुरोडाशाग्नेयत्वेनाविरोधात्। तथा हि— उत्पत्तिवाक्ये तावदष्टाकपालः पुरोडाशोऽग्न्युद्देश्यकस्वत्वत्यागात्मकयागसाधनमित्यवगतम्। तस्य च पुरोडाशस्यावघातपेषणादिना प्रोक्षणादिना च दृष्टादृष्टविधयोत्पादितस्य यत्र कचित्प्रदेशे स्थितस्य यागसाधनत्वे प्राप्ते 'वेद्यां बर्हिषि हवींष्यासादयति' इति प्रदेशविशेषो नियमितः। तदेवंविधं बर्हिष्यासादितं पुरोडाशलक्षणं हविः 'अग्नय इदं न मम' इति यजमानस्त्यजति। त्यक्तं च तद्धविः प्रतिपत्तिमपेक्षते। यजमानश्च स्वत्वत्यागात्तस्मिन्नुदास्ते। एवं स्थिते वाक्यान्तराणि श्रूयन्ते 'उपस्तृणाति,' 'द्विर्हविषोऽवद्यति,' 'अभिघारयति,' 'चतुरवत्तं जुहोति' 'शेषात्स्विष्टकृतं यजति' 'यजमानपञ्चमा इडां भक्षयन्ति' 'ऋत्विजो हविःशेषान्भक्षयन्ति' इति। ततश्चाज्येनोपस्तीर्णाभिघारितं प्रकृतस्य हविषो व्यवदानं होतव्यमित्यवगतम्। न चेदं व्यवदानमप्रकृतद्रव्यविषयं भवितुमर्हति। 'द्रव्यवदानम्' इत्यनुवादस्य प्राप्त्यपेक्षत्वेन यथाप्राप्ति वर्णनीयत्वात्। 'द्विर्हविषोऽवद्यति' इति हि तत्प्राप्तिः। तत्रापि 'हविषः' इत्यनुवादः 'आग्नेयोऽष्टाकपालः' इत्युत्पत्तिवाक्यापेक्षः। उत्पत्तिवाक्ये च कृत्स्नावयवावच्छेदेन पुरोडाशस्याग्नेयत्वमवगतम्। ततश्चाग्नेयपुरोडाशलक्षणहविषो द्विरवदाय होतव्यमिति लभ्यते। देवतोद्देश्यकस्वत्वत्यागो यागः, स एव प्रक्षेपसहितो होम इति चतुर्थे वक्ष्यते 'यजतिचोदना द्रव्यदेवताक्रियं समुदाये कृतार्थत्वात्' 'तदुक्ते श्रवणाज्जुहोतिरासेचनाधिकः स्यात्' इति। तथा च देवतोद्देशः स्वत्वत्यागः प्रक्षेप इति त्र्यंशो होमः संपद्यते। इह च द्रव्यवदानविषये त्यागदेवतोद्देशयोरुत्पत्तिवाक्यत एव प्राप्तत्वात्प्राप्ताप्राप्तविवेकेन प्रक्षेपांश एव संस्कारो विधीयते। 'द्रव्यवदानं जुहोति' इति त्याग-

देवतोद्देशौ त्वनूद्येते । एतेन जुहोतेः प्रक्षेपमात्रे लक्षणेति निरस्तम् । सोऽयं द्रव्यवदानस्याहवनीये देवतोद्देशत्यागरहितः केवलः प्रक्षेपः नोत्पत्तिवाक्यावगतं कृत्स्नपुरोडाशस्याग्नेयत्वं विरुणद्धि, येन द्रव्यवदानं प्रणाडीत्वेनाश्रीयेत । अग्नये त्यक्तस्य कृत्स्नपुरोडाशस्याग्नौ तदेकदेशभूतद्रव्यवदानप्रक्षेपमात्रे सत्यप्याग्नेयत्वानपायात् । नापि द्रव्यवदानस्याग्निदेवताकयागसाधनत्वमिह विशिष्यावगतं [1]येनोत्पत्तिवाक्यावगताग्नेयत्वस्य द्रव्यवदानं प्रणाडी संभाव्येत । न त्वेवमस्ति । तत्र जुहोतिनोत्पत्तिवाक्यावगतयागानुवादस्योक्तत्वात् । अतो द्रव्यवदानप्रणाड्या पुरोडाशस्याग्नेयत्वमित्ययुक्तम् । तदयमत्र पर्यवसन्नोऽर्थः । वेद्यां बर्हिष्यासादितं पुरोडाशलक्षणं हविराज्यभागानन्तरं यजमानेन 'अग्नय इदं न मम' इति त्यक्तव्यम् । तदेवं समस्तेन पुरोडाशेन यागे यजमानेन साधिते सति पुरोडाशैकदेशभूतं द्रव्यवदानमुपस्तीर्णाभिघारितमाश्रावणप्रत्याश्रावणादिविधिना आहवनीयेऽध्वर्युणा प्रक्षेप्तव्यमिति । सोऽयं पक्षो न युज्यते । एवं हि सति प्रक्षेप उपयुक्तसंस्कारत्वात्प्रतिपत्तिकर्मेति लभ्यते । ततश्च त्यागानन्तरं होमात्प्राक् द्रव्यवदाननाशे सति हविरन्तरं नोत्पादयितव्यं स्यात् । प्रक्षेपस्य प्रतिपत्तितया द्रव्यप्रयोजकत्वाभावात् । ततश्च 'शेषाद्द्रव्यवदाननाशे स्यात्तदर्थत्वात्' 'निर्देशाद्वान्यदागमयेत्' इति षाष्ठाधिकरणे व्यवस्थापयिष्यमाणमवदाननाशे द्रव्यान्तरोत्पादनं विरुध्येत । किं च वेद्यां बर्हिषि हविरासादनम्, सामिधेन्यः, इध्माधानम्, पूर्वाधारः, प्रवरः, उत्तराधारः, प्रयाजाः, आज्यभागौ, 'अग्नय इदं न मम' इति याजमानस्त्यागः, 'अग्नयेऽनुब्रूहि' इति संप्रैषः, पुरोनुवाक्यावचनम्, उपस्तरणम्, द्विरवदानम्, अभिघारणम्, दक्षिणातिक्रमणम्, आश्रावणम्, प्रत्याश्रावणम्, 'अग्निं यज' इति संप्रैषः, याज्यावचनम्, तदन्ते वषट्कारः, वषट्कृते द्रव्यवदानस्याहवनीये प्रक्षेपः इति क्रमः । यद्याज्यभागानन्तरमेव यागः स्यात्, तदनन्तरं चोपस्तरणादिविधिना द्रव्यवदानस्य केवलः प्रक्षेपः स्यात्, तर्हि प्रक्षेपस्य तस्य यागत्वाभावाद्याज्यासंबन्धो वषट्कारसंबन्धश्चानुपपन्नः स्यात्; वाजसनेयके 'अनया यजतीति हि याज्या वषट्कारेण हि देवेभ्योऽन्नं दीयते' इति याज्यावषट्कारसाध्यत्वश्रवणं च यागस्य विरुध्येत, ततः प्रागेव यागस्य निष्पन्नत्वात् । तस्माद्यागः प्रधानम्, होमस्तु केवलः प्रक्षेपात्मकः प्रतिपत्तिरिति न युज्यते इति दूषयित्वा अथवेत्यादिना पक्षान्तरमप्युत्प्रेक्षितं वार्त्तिके । तद्यथा— देवतोद्देश्यकद्रव्यत्यागो यागः, स एव च प्रक्षिप्यमाणद्रव्यविषयको होमः । स च यागान्नातिरिक्यते, प्रक्षेपांशाधिक्यमात्रेण यागस्याविघातात् । न ह्यङ्गुल्यन्तरोपजनने सति देवदत्तो न मनुष्यो भवति । तथा च देवतोद्देश्यकद्रव्यत्यागत्वं यागस्य सामान्यरूपम् । देवतोद्देश्यकप्रक्षिप्यमाणद्रव्यविषयकत्वात्मकहोमत्वं च तस्य विशेषरूपमिति द्वयाकारो यागः । तत्र 'आग्ने-

1. येनोत्पत्त्यवगत— क, घ.

वोऽष्टाकपालो भवति' इति सामान्यरूपापन्नयागसाधनत्वं पुरोडाशस्यावगतम्। 'द्रुवयदानं जुहोति' इति तु तदवयवस्य द्रुवयदानस्य विशेषरूपापन्नतत्साधनत्वमवगतम्। तत्र वषट्कारोत्तरकाले यजमानेन समस्तपुरोडाशोऽग्नये त्यक्तव्यः। तस्मिन्नेव क्षणे द्रुवयदानमध्वर्युणा प्रक्षेप्तव्यम्। एवं च द्रुचाकारोऽयं यागः समस्तपुरोडाशेन युगपदेकस्मिन्क्षणे कृतो भवति। उभाभ्यामेव च वाक्याभ्यामुत्पन्नस्य द्रुचाकारस्य यागस्य 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इति फलसंबन्धात्प्राधान्यम्। नापि याज्यावषट्कारसंयोगविरोधः, तदनन्तरमेव यागनिष्पत्तेः। त्यागप्रक्षेपयोरेककालतया प्रक्षेपात्प्राग्त्यागस्यानिष्पत्तिनियमेन तदा द्रव्यनाशे सति प्रक्षेपार्थतया द्रव्यप्रयुक्त्यभावेऽपि त्यागार्थतया द्रव्यप्रयुक्त्यवश्यंभावान्न षाष्ठाधिकरणविरोधः। अमुमपि द्वितीयपक्षं प्रतिक्षिप्य तृतीयपक्ष उपक्षिप्तो वार्त्तिके। यथा— सत्यं याज्यावषट्कारोत्तरकालमेव यागनिष्पत्तिरिति। किं तु द्रुचाकारो याग इति कृत्वा प्रक्षेपांशस्यापि प्राधान्यकोटौ निवेश इत्येतत्तु न मृष्यामहे। प्रक्षेपस्यापि प्राधान्ये सति तस्य विकृतिष्वतिदेशानापत्तेः 'कर्मणस्त्वप्रवृत्तित्वात्फलनियमकर्तृसमुदायस्यानन्वयत्वद्बन्धनत्वात्' इत्याष्टमिकाधिकरणे वक्ष्यमाणत्वात्। किं च प्रक्षेपस्य प्राधान्येऽग्निहोत्रादिवदर्शपूर्णमासादिष्वपि जुहोतिव्यवहार एव स्यात्। तथा च होमस्य यजिविशेषत्वेऽपि यत्र फलवाक्ये यजिश्रवणं तत्र प्रक्षेपं विहाय केवलयागस्य फलसंबन्धात्प्राधान्यम्। यत्र तु फलवाक्ये जुहोतिः श्रूयते तत्र प्रक्षेपांशस्यापि प्राधान्यम्, यथा अग्निहोत्रादौ। प्रकृते तु फलवाक्ये यजिश्रवणादाग्नेयवाक्यावगतयागस्यैव समस्तपुरोडाशद्रव्यकस्य प्राधान्यम्। तदेकदेशद्रव्यवदानस्य तु केवलः प्रक्षेपः प्रोक्षणादिवत्संस्कारः। इयांस्तु विशेषः। प्रोक्षणादिरूपयोक्ष्यमाणसंस्कारः, स्विष्टकृदादिरूपयुक्तसंस्कारः प्रतिपत्त्यपरनामधेयः, द्रव्यदानस्य वषट्कराव्यवहितोत्तरकाले आहवनीये प्रक्षेपस्तूपयुज्यमानसंकार इति। केचित्तु वषट्कारानन्तरं त्यागः, तदव्यवहितोत्तरक्षणे प्रक्षेपः प्रतिपत्तिरूपयुक्तसंस्कार एव, यागप्रक्षेपयोरत्यन्तमव्यवहितत्वात्; त्यागानन्तरं प्रक्षेपात्प्राग्द्रुचवदाननाशस्यासंभावितत्वान्न षाष्ठाधिकरणविरोध इत्याहुः। तदयुक्तम्। एवं सति 'वषट्कृते जुहोति' इति प्रक्षेपांशस्य वषट्कराव्यवहितोत्तरकालकत्वावगमविरोधात्, त्यागेन व्यवहितत्वात्, 'सह वा वषट्कारेण जुहुयात्' इत्यस्मिन्पक्षे प्रक्षेपस्य वषट्कारसमकालकतया ततः पूर्वमेव यागनिष्पत्तौ 'वषट्कारेण देवेभ्योऽन्नं दीयते' इति यागस्य वषट्कारसंयोगश्रवणविरोधाच्च। स्मृतिनिबन्धनकृतस्तु केचिदर्वाचीनाः 'अवश्यं तु त्यजेदन्नं मनसा वचसापि च। ततश्च प्रक्षिपेदग्नावेष धर्मः सनातनः॥ अत्यक्त्वा जुहुयाद्यस्तु मोहेनान्वितमानसः। न स तत्फलमाप्नोति नरकं प्रतिपद्यते' इति जैमिनिस्मृतिवचनमुदाहरन्ति। तदेतद्विज्ञानेश्वरमाधवहेमाद्र्यादिप्राचीननिबन्धनेष्वदर्शनादुपेक्ष्यम्। अस्तु वा तदपि जैमिनिवचनं

प्रमाणम् । तथापि जुहोतिचोदिताग्निहोत्रादिविषयं भविष्यति । तत्र हि जुहोतिः देवतोद्देश-त्यागप्रक्षेपात्मकत्र्यवयवकसमुदाये वर्तते मुख्यवृत्त्या । अन्यत्र तु यजतिचोदिते दर्शपूर्णमासादि-कर्मण्युत्पत्तिवाक्यावगतदेवतोद्देशत्यागयोः प्राप्तत्वात् 'त्र्यवदानं जुहोति' इति प्रक्षेपमात्रे वर्तते । प्रक्षेपत्यागयोश्च 'वषट्कृते जुहोति' 'वषट्कारेण देवेभ्योऽन्नं दीयते' इति वषट्काराख्यवहितोत्तर-कालकत्वं प्रत्यक्षश्रुतम् । वषट्कारानन्तरं त्यागस्तदनन्तरं च प्रक्षेप इति स्मार्तक्रमे च तद्विरोधः । वषट्कारेण सह जुहुयादित्यस्मिन्पक्षे वषट्कारात्प्रागेव त्यागापत्तौ 'वषट्कारेण देवेभ्योऽन्नं दीयते' इति श्रुतिविरोधश्च । ततश्च श्रुतिविरुद्धाया जैमिनिस्मृतेरस्या अग्निहोत्रादिजुहोतिचोदितकर्मविषय-त्वमेव युक्तमाश्रयितुम् । तत्र हि 'अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति जुहोति' इति त्र्यंशहोमम् 'अग्निहोत्रं जुहोति' इत्युत्पत्तिवाक्यप्राप्तमनूद्य मन्त्रविधिः । प्रक्षेपशिरस्को याग एव च होमः । [1]तथा च स्वाहान्ते यजमानेन त्यक्तव्यम्, तदुत्तरक्षणेऽध्वर्युणा प्रक्षेप्तव्यमिति लभ्यते । अमुमेव वेदसिद्धमर्थमुदाहृतजैमिनिस्मृतिरुपोद्बलयतीति न विरोधः । ततश्च यजतिचोदितदर्शपूर्णमासादिक-र्मसु वषट्कृते 'अग्नय इदं न मम' इति समस्तपुरोडाशो यजमानेन देवतायै त्यक्तव्यः । याग एव च प्रधानम् । तस्मिन्नेव च क्षणे तदीयत्र्यवदानमध्वर्युः प्रक्षेपेण संस्करोति । जुहोतिचोदि-तेषु त्वग्निहोत्रादिषु 'अग्निहोत्रं जुहोति' इत्युत्पत्तिवाक्येऽग्निहोत्रस्थालीस्थकृत्स्नद्रव्यस्य देवता-संबन्धानवगमाद्यावदग्नौ प्रक्षेप्तव्यं स्वाहान्ते तावदेव प्रक्षेपात्प्राग्यजमानेन देवतायै त्यक्तव्यम्, तदव्यवहितोत्तरक्षण एव चाध्वर्युणा प्रक्षेप्तव्यम्, प्रक्षेपशिरस्कयागस्य होमशब्दार्थत्वात् इति फलति । अधिकरणं तु यजतिजुहोत्योः पर्यायत्वमभ्युपगम्य प्रवर्तितमिति स्थितम् । वस्तुतस्तु जुहोतिचोदितेष्वपि त्यागप्रक्षेपयोः समकालकत्वमेव मन्यामहे । उत्पत्तिवाक्ये हि जुहोतीति त्र्यंशो होमोऽवगतः । त्यागानन्तरं प्रक्षेप इत्येतत्तु नावगतम् । सूत्रकारोऽपि चतुर्थे 'जुहोति-रासेचनाधिकः स्यात्' इत्येव तल्लक्षणं वक्ष्यति । प्रक्षेपांशस्याधिक्यं च यागतत्पूर्वोत्तरतत्क्षणेषु यथाकथंचित्साहित्यमात्रेणोपपद्यते । तत्र 'अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति जुहोति' इति होमकरणत्वं मन्त्रस्यावगम्यमानं समाख्याबलात् यागांशस्य च त्याज्यमानत्वात् अध्वर्युकर्तृकप्रक्षेपांशं प्रति करणत्वे विश्राम्यतीति स्वाहान्ते प्रक्षेपः सिद्धः । 'स्वाहाकारेण देवेभ्योऽन्नं दीयते' इति श्रवणाद्यागांशोऽपि स्वाहान्तेऽवगतः । ततश्च जुहोतिचोदितेष्वपि त्यागप्रक्षेपयोः स्वाहान्ते युगपत्प्रयोगस्य प्रत्यक्षश्रवणात् तदनुसारेणोदाहृतस्मृतिवचने तत इति सार्वविभक्तिकतसिप्रत्ययमा-श्रित्य 'यदा त्यजेत्तदा अग्नौ प्रक्षिपेत्' इति व्याख्येयम् । 'अत्यक्त्वा जुहुयात्' इत्यत्रापि समानकर्तृकत्वमिव पूर्वकालकत्वमपि 'मुखं व्यादाय स्वपिति' इतिवदविवक्षितम् । अत एव

---

1 ततश्च— क.

वार्त्तिके 'यागहोमावभेदेन वैमोंहात्परिकल्पितौ। तेषामपरिहार्यत्वं भेदे त्वेषोऽभिधीयते' इति कारिकाव्याख्यावसरे "तयोस्तु यागहोमयोर्भेदः शब्दान्तराधिकरणन्यायसिद्धः। 'जुहोतिरासेचनाधिकः स्यात्' इति सूत्रकारेणोक्यमानमपि तयोर्भेदं तत्रैव समर्थयिष्यामहे। यथा देवतोद्देशेन स्वत्वत्यागमात्रं यागः, देवतोद्दिष्टत्यज्यमानस्वत्वकद्रव्यप्रक्षेपो जुहोतिः" इत्यादि प्रपञ्चितम्। तस्मात्सर्वत्र त्यागप्रक्षेपयोः समानकालकत्वमित्याद्यां तावत्प्रसक्तानुप्रसक्तम्। तदेवं कृत्स्न एव पुरोडाशो यागसाधनम्। तदवयवद्रव्यवदानस्याहवनीये प्रक्षेपस्तु त्यज्यमानपुरोडाशसंस्कार इति वार्त्तिकनिष्कर्षः॥ वस्तुतस्तु भाष्यरीत्या द्रव्यवदानप्रणाड्यैव पुरोडाशस्याग्नेयत्वं युक्तमाश्रयितुम्। तथा हि। यथा पशुशब्दः सोमशब्दश्च विशसनाभिषवाभ्यां पश्वाकृतेः सोमलताकृतेश्च भङ्गात्तदवयवपरः, तथात्रापि पुरोडाशशब्दः मध्यात्पूर्वार्धाच्च द्विरवदानतः पुरोडाशाकृतेर्भङ्गात्तदवयवद्रव्यवदानपरः। अवयवसामान्यावच्छेदेनावगम्यमानोऽपि देवतासंबन्धस्तावत् 'अङ्गुष्ठपर्वमात्राणि दैवतान्यवदानानि' 'ज्यायांसि सौविष्टकृतानि' इत्यादिवाक्यान्तरगततद्धितान्तदैवतशब्देन द्रव्यवदानस्य देवतासंबन्धानुवादमहिम्ना तन्मात्रविषये विश्राम्यति। अत एव च 'शेषात्स्विष्टकृतं यजति' इत्युपपद्यते। अन्यथा कृत्स्नस्य पुरोडाशस्याग्नेये त्यक्तत्वेन तदेकदेशस्य स्विष्टकृते पुनस्त्यागासंभवात्। अथाग्नेये त्यक्तस्यापि पुरोडाशस्यैकदेशमग्नेः सकाशात्स्वीकृत्य स्विष्टकृते त्यागसंभव इति चेत् शिष्यदन्धनमेतत्। उक्तरीत्या द्रव्यवदानमात्रस्याग्नेययागसाधनत्वाश्रयणेन स्विष्टकृद्विधेः सामञ्जस्ये सति त्यक्तपुनःस्वीकारकल्पनस्याश्रयणायोगात्। किं च 'व्रीहिभिर्यक्ष्ये' इति संकल्प्य प्रक्रान्ते प्रयोगे यदि द्रव्यवदानपर्याप्तमात्रा व्रीहयो लभ्यन्ते, नीवारास्तु शेषकार्येभ्योऽपि पर्याप्ता लभ्यन्ते, तदा व्रीहिकार्यस्याग्नेययागस्य प्रधनस्य द्रव्यवदानत एव संभवादङ्गभूतस्विष्टकृदादिकार्यानुरोधेन प्रधानगुणस्य व्रीहित्वस्य बाधितुमशक्यत्वात् न नीवाराः प्रतिनिधातव्याः किं तु व्रीहिभिरेव कथंचिद्द्रव्यवदानपर्याप्तं पुरोडाशमुत्पाद्य ततः प्रधानमात्रं कर्तव्यम्; स्विष्टकृदाद्यङ्गकार्याणि तु नादर्तव्यानीति— षष्ठस्य तृतीये 'विधिरप्येकदेशे स्यात्' 'अपि वार्थस्य शक्यत्वादेकदेशेन निर्वर्तेतार्थानामविभक्तत्वाद्गुणमात्रमितरत्तदर्थत्वात्' इत्यधिकरणे व्यवस्थापयिष्यते। तदेतत्कृत्स्नस्य पुरोडाशस्याश्वशफमात्रपरिमाणस्य यागसाधनत्वे विरुध्येत। अतो द्रव्यवदानस्यैव यागसाधनत्वमिति भाष्यमेव समञ्जसमिति प्रतीमः। यजतिजुहोत्योः पर्यायत्वं चाभ्युपेत्याधिकरणं भाष्ये प्रवर्तितमिति स्थितम्। नन्वेवमपि वषट्कृते यजमानेन द्रव्यवदाने देवतायै त्यज्यमाने यज्ञध्वर्युः प्रमादात्प्रक्षेपं विलम्ब्य कुर्यात्, तत्र च प्रक्षेपात्प्राग्यागानन्तरं द्रव्यवदानं नश्येत्, तदा हविरन्तरं नोत्पादयितव्यं स्यात्, यागस्य प्रधानस्य निर्वृत्तत्वात् प्रक्षेपस्य चोपयुज्यमानसंस्कारतयाङ्गत्वेन हविरन्तरप्रयोजकत्वाभावात् इति चेत्— तुल्यमेतत्कृत्स्नस्य पुरोडाशस्य यागसाधनत्वेऽपि। तत्त्वं तु 'न हि देवा अदत्तस्याश्नन्ति'

इति वाक्यशेषबलेन प्रक्षेपसंस्कार्यस्याङ्गभूतस्यापि हविरन्तरप्रयोजकत्वं विज्ञायते, 'उपरि हि देवेभ्यो धारयति' इतिवदस्यापि वाक्यशेषस्य स्वार्थपरत्वोपपत्तेः । एतदेवाभिप्रेत्य वार्त्तिके 'प्राक्प्रक्षेपादनिर्वृत्तयागावगमान्नाशादिष्वन्यद्द्रव्यमागमयितव्यम्' इति। तदेतत्संकर्षकाण्डे द्वितीयस्य चतुर्थे 'देवतासंयोगेन चोद्यमाने प्रदान आहुतिर्यथा लोके' इत्यत्र प्रपञ्चयिष्यत इति संक्षेपः । इति सर्वप्रदानाधिकरणम् ॥

हविःशेषकार्याणि स्विष्टकृदिडाचतुर्धाकरणादीनि किमेकस्मादेव हविःशेषात्कर्तव्यानि, उत सर्वेभ्य इति संशये, पूर्वपक्षयति—

अप्रयोजकत्वादेकस्मात्क्रियेरञ्शेषस्य गुणभूतत्वात् ॥ ४८ ॥

एकस्मादेव हविःशेषात्स्विष्टकृदादिकार्याणि[1] क्रियेरन् । कुतः । अप्रयोजकत्वात् । स्विष्टकृदादिकार्याणां प्रतिहविःशेषमावृत्तिप्रयोजकत्वाभावात् । कुतः । शेषस्य गुणभूतत्वात् हविः-

१९ सर्वशेषैः स्विष्टकृदनुष्ठानाधिकरणम् ।

शेषस्य स्विष्टकृदादिकार्येषु साधनतया गुणभावात् । गुणानुरोधेन प्रधानावृत्तेरन्याय्यत्वात् । ननु चतुर्थस्य द्वितीये 'उत्पत्तौ येन संयुक्तम्' इत्यधिकरणे स्विष्टकृदादीनां प्रतिपत्तिरूपसंस्कारकर्मत्वं व्यवस्थापयिष्यते, तथा च संस्कार्यहविःशेषलक्षणप्रधानानुसारेण प्रतिहविःशेषं तदावृत्तिरुचितेति शङ्कायामपि एतदेव सूत्रमुत्तरम् । एकस्मादेव हविःशेषात्स्विष्टकृदादिकार्याणि क्रियेरन् । कुतः । चातुर्थिकन्यायस्याभासतया प्रतिहविःशेषं तदावृत्तौ प्रयोजकत्वाभावात् । कुत आभासता । शेषस्य गुणभूतत्वात् । हविःशेषस्य कृतकार्यतया संस्कारानवसरलक्षणं गुणं प्राप्तत्वात् । अकृतकार्यमेव द्रव्यं संस्कारमपेक्षते । कार्यार्थमेव द्रव्येण संस्कारस्याकाङ्क्षितत्वात् । प्रकृते च कार्यस्य यागस्य निर्वृत्ततया तदानीमेव विनष्टतया च तदुत्तरकालं द्रव्यसंस्काराणामनवसर इति प्रधानकर्मत्वमेवैषामुचितम् । तेषु च हविःशेषस्य साधनत्वेन गुणभूततया न तदनुरोधेनैषामावृत्तिः प्रतिहविःशेषमित्येवं चातुर्थिकन्यायोपमर्देन पूर्वः पक्षः ॥

इतोऽप्येवमित्याह—

संस्कृतत्वाच्च ॥ ४९ ॥

स्विष्टकृदादिभिर्हि हविःशेषेष्वदृष्ट एव संस्कार उपजन्यते । स चादृष्टसंस्कार एकद्रव्यनिष्पादितैरेव स्विष्टकृदादिभिः सर्वेषु हविःशेषेषु सिध्यति । अतोऽप्येकस्मादेव शेषकार्याणि ॥

अथ सिद्धान्तयति—

---

1 स्विष्टकृदिडादि— क ; घ.

सर्वेभ्यो वा कारणाविशेषात्संस्कारस्य तदर्थत्वात् ॥ ५० ॥

वाशब्द एवार्थे। सर्वेभ्य एव हविःशेषेभ्यः स्विष्टकृदादीनि क्रियेरन् नैकस्मादेव। कुतः। कारणाविशेषात् 'उत्पत्तौ येन संयुक्तम्' इति चतुर्थे वक्ष्यमाणस्य प्रतिपत्तिकर्मत्वकारणस्य कृतकार्यकत्वस्य सर्वेष्वपि हविःशेषेष्वविशेषात्। कृतकार्यमपि हि द्रव्यं संकीर्णकरतया स्थलरिक्तीकरणायान्यत्रापनयात्मिकां प्रतिपत्तिमपेक्षते। अपेक्षितविधानं च ज्याय इति हविःशेषसंयुक्तस्विष्टकृदादिवाक्यानि प्रतिपत्तिविधय इति तत्र वक्ष्यते। यद्वोक्तं निष्पन्ने कार्ये संस्काराणामनवसर इति तत्राह— संस्कारस्य तदर्थत्वादिति। निष्पन्नेषु विनष्टेषु च प्रधानेषु तदीयानामेव सतां हविःशेषाणां का प्रतिपत्तिरित्यपेक्षायां प्रतिपत्तिनियमो विधातुं शक्यते ॥

इतोऽप्येवमित्याह—

लिङ्गदर्शनाच्च ॥ ५१ ॥

'सकृत्सकृदवद्यति' इति सौविष्टकृतावदानवीप्सा सर्वेभ्यो हविःशेषेभ्यः [1]स्विष्टकृतं तस्य च संस्कारकर्मत्वं गमयति। अतोऽपि सर्वेभ्यः शेषकार्याणि। वृत्तमधिकरणम् ॥

एकस्मादेव हविःशेषात्स्विष्टकृदादिकार्याणीत्यभ्युपगम्य चिन्त्यते— किं यस्मात्कस्माच्चिदेकस्मात्, उत प्रथमादिति। तत्र पूर्वपक्षयति—

एकस्माच्चेद्याथाकाम्यमविशेषात् ॥ ५२ ॥

यद्येकस्माच्छेषकार्याणि तदा याथाकाम्यं यथेच्छम्, यस्मात्कस्माच्चिदित्यनियम इति यावत्। कुतः। अविशेषात्। न च प्राथम्यादाग्नेयादेव शेषकार्याणीति वाच्यम्। आग्नेययागोपस्थितिदशायां सर्वप्रधानयागोत्तरविहितशेषकार्योपस्थित्यभावात्। तदुपस्थितिवेलायां च शेषशब्देन सकृच्छ्रुतेन तन्त्राभिधानशक्त्या 'यजेत स्वर्गकामः' इति यजिना यागानामिव सर्वेषां हविःशेषाणां युगपदुपस्थितेः। अत एकस्माद्यस्मात्कस्माच्चिदिति प्राप्ते, सिद्धान्तयति—

२०. प्राथमिकशेषात् स्विष्टकृदाद्यनुष्ठानाधिकरणम्।

मुख्याद्वा पूर्वकालत्वात् ॥ ५३ ॥

वाशब्दोऽवधारणे। मुख्यात् प्रथमादेव हविःशेषात् स्विष्टकृदादीनि भवन्ति। कुतः। पूर्वकालत्वात् शेषकार्योपस्थितेः प्रथमकालत्वात्। 'शेषास्विष्टकृतं यजति' इत्यादौ शेषशब्देन प्रधानहविःशेषाणामेव परामर्शो वक्तव्यः। अन्यथातिप्रसङ्गात्। प्रधानानां च शेषकार्योपस्थितिवेलायां न यजिनोपस्थितिरस्ति, येन 'यजेत स्वर्गकामः' इति यजिना यागानामिव युगपदु-

1 स्विष्टकृदादिकं— क, घ.

पस्थितिः स्यात् । किं तु प्रकरणबलादेव तदुपस्थितिः । प्रकरणे च यदाग्नेयादिवाक्यैः क्रमेणोत्पन्नानां प्रधानानां शेषकार्योपस्थितिवेलायामपि तथैवानुसंधानात्तदनुसारेण प्रथमहविःशेषादेव शेषकार्याणां प्रथममनुष्ठाने सति तेनैव नैराकाङ्क्ष्यान्नेतरेभ्यः शेषकार्याणि । तदनेन न्यायेन 'पुरोडाशकपालेन तुषानुपवपति' इति पुरोडाशद्रव्यानुनिष्पादितुषोपवापः पूर्वपक्षे येनकेनचित्कपालेन कार्यः, सिद्धान्ते तु प्रथमोपधेयकपालेनेति फलति । संगतिलोभेन तु हविःशेषविषया सूत्रप्रवृत्तिरिति दिक् । वृत्तमधिकरणम् ॥

दर्शपूर्णमासयोराग्नेयपुरोडाशस्य चतुर्धाकृतस्य 'इदं ब्रह्मणः, इदं होतुः, इदमध्वर्योः इदमग्नीधः' इति व्यादिष्टस्य 'अग्नीधे प्रथमायादधाति' 'वेदेन ब्रह्मणे ब्रह्मभागं परिहरति' 'अथ काममन्येन' 'ततो होत्रे' 'अथाध्वर्यवे' इति भागदानं श्रुतम् । किमिदमानत्यर्थं सत् ऋत्विक्संस्कारार्थम्, उत भक्षणार्थमिति संशये, पूर्वपक्षयति—

भक्षाश्रवणाद्दानशब्दः परिक्रये ॥ ५४ ॥

'आदधाति' 'परिहरति' इति च योऽयं दानपरः शब्दः स परिक्रये परिक्रयणफलके समर्पणे प्रत्येतव्यः । कुतः । भक्षाश्रवणात् । यद्यपि परिक्रयोऽपि न श्रुतः, तथापि कर्म-

२१. पुरोडाशविभागस्य करेभ्यो दानस्यान्वाहार्यादिदक्षिणादानवत्परिक्रयश्रुतिमन्तरेणापि तदर्थता भक्षार्थताधिकरणम् । लभ्यते । यथेष्टविनियोगार्हद्रव्यलाभफलकस्य कर्मकरेभ्यो दानस्य भक्षणनियमे विरोधात् । न च पुरोडाशभागानामल्पानां कथमृत्विगानत्यर्थत्वमिति वाच्यम् । ऋतुपेये सोमचमसवदल्पानतिक्रत्वेऽपि तदुपपत्तेः । तस्मात्परिक्रयार्थमेव भागदानमिति ॥

इतोऽप्येवमित्याह—

तत्संस्तवाच्च ॥ ५५ ॥

'दक्षिणा वा एता हविर्यज्ञस्यान्तर्वेद्यवरुध्यन्ते, यत्पुरोडाशं बर्हिषदं करोति' इति दक्षिणात्वसंस्तवादपि परिक्रयार्थत्वमेव लभ्यते ॥

अथ सिद्धान्तयति—

भक्षार्थो वा द्रव्ये समत्वात् ॥ ५६ ॥

वाशब्द एवार्थे । भक्षणार्थ एवायं भागदानविधिः । कुतः । द्रव्ये समत्वात् हविःशेषभक्षणे द्रव्ये ऋत्विजां यजमानस्य च स्वामित्वाभावस्य तुल्यत्वात् । सकलहविषि देवतायै त्यक्ते सति तत्रानीशानो यजमानः ऋत्विग्भिस्तुल्यः सन् तदेकदेशैः कथमृत्विजः परिक्रेतुं प्रभवेत् । तथा च भक्षणाश्रवणेऽपि अदनीयद्रव्यत्वेन योग्यतया भक्षणार्थत्वमेव युक्तमाश्रयितुम् । यद्यपि भाष्यमते द्रव्यवदानमात्रस्य देवतायै त्यक्तत्वेन तदवशिष्टांशे यजमानस्य स्वामित्वसंभवः, तथापि

तन्मते सूत्रमन्यथा योज्यम्। तद्यथा। हविःशेषस्य प्रतिपत्त्यपेक्षस्यादनीयत्वेन योग्यतया भक्षणमेव प्रतिपत्तिरित्यवगतम्। भक्षणे च कर्तृविशेषापेक्षायां ब्रह्मादयो नियम्यन्ते। तथा च भक्षाय दानविधौ कर्तृनियममात्रमिति लाघवम्। परिक्रयार्थत्वे तु अन्वाहार्यदक्षिणया ऋत्विजामानतत्वात्तया सह समुच्चयेन विकल्पेन वा भागदानविध्यापत्तेर्गौरवम्। एवं च द्रव्ये हविःशेषे परिक्रयफलकसमर्पणविधेर्भक्षणार्थतद्विध्यपेक्षया असमत्वात् विषमत्वात् गुरुत्वात् भक्षार्थ एव भागदानविधिरिति युक्तम्। अथ 'तत्संस्तवाच्च' इत्यत्राह—

व्यादेशाद्दानसंस्तुतिः ॥ ५७ ॥

'अयं ते भागः' इति विभज्य निर्देशो व्यादेशः। स तावत्सौमिकदक्षिणादाने इह च भागसमर्पणेऽस्ति। तत्सौम्यादिदक्षिणादानत्वसंस्तवः अर्थवादः। अत एव 'यथैवादः सौम्येऽध्वरे आदेशमृत्विग्भ्यो दक्षिणा नीयन्ते तादृगेव तत्' इति चतुर्धाकृतभागसमर्पणस्य दक्षिणादानसाम्यवादः संगच्छते। अत एव च 'पृथिव्यै भागोऽसीति होता भक्षयति' 'अन्तरिक्षस्य भागोऽसीत्यध्वर्युः' 'दिवो भागोऽसीति ब्रह्मा' इति भक्षणं नित्यवदनूद्य मन्त्रविधयः संगच्छन्ते। अतो भक्षार्थता न तु परिक्रयार्थता। प्रयोजनं पूर्वपक्षे 'दक्षिणां प्रतिग्रहीष्यत्सप्तदशकृत्वोऽपान्यात्' इति विधिना प्रतिग्रहः यथेष्टविनियोगश्च। सिद्धान्ते तु न विधिवत्प्रतिग्रहः भक्षणनियमश्चेति सिद्धम्। वृत्तमधिकरणम्॥

इति तृतीयाध्यायस्य चतुर्थः पादः॥

पञ्चमः पादः ॥

—*—

निर्मथ्य निगमसिन्धून्विविधन्यायाभिधानमन्थानैः ।
धर्मसुधामुद्धरते भूयो मुनये नमोऽस्तु जैमिनये ॥

चतुर्थपादान्ते उपक्षिप्तो हविःशेषकार्यविचारः । स एव च पञ्चमे पादे विस्तरेणा-
१. ध्रुवाज्यादिभिः स्वि- भिधीयते । स्विष्टकृदादिशेषकार्याणि किमुपांशुयाजद्रव्यादाज्यादपि भवन्ति,
ष्टकृदादिशेषानानु- उत नेति संशये, पूर्वपक्षयति—
ष्ठानाधिकरणम् ।

आज्याच्च सर्वसंयोगात् ॥ १ ॥

आज्यादपि शेषकार्याणि विद्यन्ते । कुतः ? सर्वसंयोगात् 'सर्वेभ्यो वा कारणा-विशेषात्—' इत्यनुपदमेव सर्वहविषां शेषकार्यसंयोगस्य व्यवस्थापितत्वात् ॥

इतोऽप्येवमित्याह—

कारणाच्च ॥ २ ॥

'देवा वै स्विष्टकृतमब्रुवन्हव्यं नो वहेति; सोऽब्रवीद्वरं वृणै भागो मेऽस्त्विति; वृणीष्वेत्यब्रुवन्; सोऽब्रवीदुत्तरार्धादेव मह्यं सकृत्सकृत्समवद्यतेति' इत्यादिवाक्यशेषे आग्नेयादि-हविःषु स्विष्टकृतो भागप्राप्तौ तत्तद्देवतायै तत्तद्धविर्वहनं कारणमुपन्यस्तम्; अतोऽपि भवत्या-ज्यादपि स्विष्टकृत् । तत्सामान्यादितराण्यपि शेषकार्याण्याज्यस्य भवन्ति ॥

इतोऽप्येवमित्याह—

एकस्मिन्समवत्तशब्दात् ॥ ३ ॥

ज्योतिष्टोमे प्रायणीयेष्टौ 'आज्यस्यैताश्चतस्रो देवता यजति, पथ्यां स्वस्तिं पुरस्तात्, अग्निं दक्षिणतः, सोमं पश्चात्, सवितारमुत्तरतः, मध्येऽदितिं चरुणा यजति' इति पञ्च यागाः सन्ति । तत्रेदं क्वचिच्छाखायां श्रुतम्— 'अग्नये स्विष्टकृते समवद्यति' इति । 'सम्' इत्येकत्र संमेलने । एकत्र संमेलयन्नवद्यतीत्यर्थः । तस्मादाग्नेयविकारत्वाच्चरोरस्ति चोदकतः स्विष्ट-कृत् । आज्यहविषस्तु यागा उपांशुयाजविकाराः । यदि प्रकृतावुपांशुयाजस्य स्विष्टकृन्न स्यात्, तदा विकृतावस्यामिष्टावाज्यहविषां यागानां न चोदकतः स्विष्टकृत्प्राप्तिरस्ति । ततश्च 'समवद्यति'

इति नोपपद्यते। यदि तु प्रकृतावुपांशुयाजस्याप्यस्ति स्विष्टकृत्, तदा विकृतावप्याज्यहविषां यागानामाज्यात् स्विष्टकृदस्तीति तदर्थावदानसत्त्वात्समवदानानुवाद उपपद्यते। अतोऽपि लिङ्गात्प्रकृतावाज्यादपि स्विष्टकृत्तत्सामान्यादन्यान्यपि शेषकार्याण्याज्यस्य भवन्ति। सूत्रे 'समवत्त' इति भावे क्तः; समवदानप्रतिपादकात् 'समवद्यति' इति शब्दादित्यर्थः॥

इतोऽप्येवमित्याह—

आज्ये च दर्शनात्स्विष्टकृदर्थवादस्य ॥ ४ ॥

आज्येऽपि स्विष्टकृत्प्रापकार्थवादो दृश्यते—'अवदायावदाय ध्रुवां प्रत्यभिघारयति; स्विष्टकृतेऽवदाय न प्रत्यभिघारयति, न हि ततः परामाहुतिं यक्ष्यन्भवति' इति। ध्रौवाज्यादवदाय ध्रुवां प्रत्यभिघारयति पुनः पूरयति, अन्यथा ध्रुवाया रिक्तत्वप्रसङ्गात्; स्विष्टकृते तु ध्रुवातोऽवदाय तां न प्रत्यभिघारयति, हि यतः ततः परां तदुत्तरकालिकीमाहुतिं ध्रुवातोऽवदाय न करिष्यन्भवतीत्यर्थः। अतः 'स्विष्टकृतेऽवदाय' इति स्विष्टकृदर्थाज्यावदानानुवादादपि लिङ्गादाज्यादपि स्विष्टकृत्॥

अथ सिद्धान्तयति—

अशेषत्वात्तु नैवं स्यात्सर्वादानादशेषता ॥ ५ ॥

तुरवधारणे। आज्यादपि शेषकार्यमिति यदुक्तं तन्नैवं स्यात्। कुतः? अशेषत्वात् ध्रुवाज्यस्य उपांशुयाजशेषत्वाभावात्। अशेषत्वमपि कुतः? सर्वादानादशेषता, 'सर्वस्मै वा एतद्यज्ञाय गृह्यते यद्ध्रुवायामाज्यम्' इति ध्रुवायामाज्यस्य सर्वयज्ञार्थतया आदानात् ग्रहणात् ध्रौवाज्यस्योपांशुयाजाशेषता॥

ननु तथाप्युपांशुयाजार्थचतुरवत्तशेषत्वं ध्रुवाज्यस्य संभवत्येवेत्यत आह—

साधारण्यान्न ध्रुवायां स्यात् ॥ ६ ॥

ध्रुवायां यदाज्यम्, तस्य नोपांशुयाजार्थचतुरवत्तशेषता स्यात्। कुतः? साधारण्यात् ध्रौवाज्यस्य यज्ञार्थत्वात्। न हि सर्वयज्ञार्थस्य तस्योपांशुयाजशेषत्वं संभवति, तदुत्तरभाव्यग्नीषोमीयपुरोडाशोपस्तरणाभिघारणादिकार्यान्तरानिष्पत्त्या कृतप्रयोजनत्वाभावात्। कृतकार्यमेव हि द्रव्यं शेषव्यपदेशमर्हति। न चोपस्तरणादिभाविकार्यार्थस्यापि सत उपांशुयाजशेषत्वमविरुद्धमेव तदंशे कृतकार्यत्वादिति वाच्यम्; साधारणद्रव्यस्य सर्वकार्यनिष्पत्तेः प्राक्छेषव्यपदेशाभावात्। न हि बहूनामतिथीनामेकस्मिन्पात्रे पक्वस्यौदनस्य एकस्मिन्भागे प्रथमाभ्यागताय समर्पिते सति तदतिरिक्तभागानां तच्छेषव्यपदेशोऽस्ति॥

अत्र पूर्वपक्षी प्रत्यवतिष्ठते, सिद्धान्ती च प्रत्याचष्टे—

अवत्तत्वाच्च जुह्वां तस्य च होमसंयोगात् ॥ ७ ॥

'अवत्तत्वाच्च जुह्वाम्' इति सूत्रभागः प्रत्यवस्थानपरः । चकारस्तुकारस्थाने द्रष्टव्यः । तदुत्तरभागस्तु तत्प्रत्याख्यानपरः । ध्रौवाज्यं साधारणमस्तु; तथाप्युपांशुयाजार्थतया ध्रुवातो यज्जुहां गृहीतमाज्यं तदेकदेशेनोपांशुयाजहोमे कृते सति तदितरांशः शेषो भवत्येव, तस्य जुहूस्थस्याज्यस्य केवलोपांशुयाजार्थतया चतुरवत्तत्वात् । तत्रोत्तरम्—'तस्य च होमसंयोगात्' इति । चतुरवत्तस्यापि तस्य जुहूस्थाज्यस्य कृत्स्नस्यैव होमसंयोगात् 'चतुरवत्तं जुहोति' इति विधानात् ॥

अत्राशङ्क्य परिहरति—

चमसवादिति चेन्न चोदनाविरोधाद्धविःप्रकल्पनाच्च ॥ ८ ॥

यथा चमसेषून्नीतस्य सोमस्य होमसंयोगे सत्यपि शेषो विद्यते, तथा उपांशुयाजार्थचतुरवत्तस्यापि होमशेषो भविष्यतीति चेत्, न । कुतः? चोदनाविरोधात् । चमसेषून्नीतस्य सोमस्य निःशेषं होमे सति, 'असर्वहुतं जुहोति' इत्यादिविधिविरोधादस्तु चमसेषु हुतशेषः । इह तु चतुरवत्तस्याज्यस्याशेषहोमे न किंचिद्बाधकमस्ति । नापि सशेषहोमे किंचित्प्रमाणमस्ति, 'शेषास्त्विष्टकृतम्—' इत्यस्य पुरोडाशादिविषयतयैवोपपत्तेः । प्रत्युत 'चतुरवत्तं जुहोति' इति द्वितीयया चतुरवत्तं होमसंस्कार्यमवगतम् । तत्र यावतोंशस्य होमो न भवति तावतः संस्कारलोपः प्रसज्यत इति कृत्स्नस्यैव चतुरवत्तस्य होम उचितः । चमसेषु तून्नीतः सोमो नैवं होमसंयुक्तः श्रुतः, 'उन्नीतं सोमं जुहोति' इति विध्यदर्शनात् । प्रत्युत 'चमसेषून्नयति' इति होमासंयुक्तमेवोन्नयनं श्रुतम् । तच्च प्रधानयागाभ्याससिद्ध्यर्थतया हविःप्रकल्पनमात्रं संपद्यते । तस्य होमसंयोगस्तु भक्षसहभावेन श्रूयते—'हुत्वा प्रत्यञ्चः परेत्य सदसि भक्षयन्ति' इति । तथा च चमसेषून्नीतस्य सोमस्य होमभक्षाभ्यां संयोगे सति स होमस्तदेकदेशस्यैव सिध्यति । तथा च सर्वार्थाज्यस्योपांशुयाजशेषत्वाभावान्न शेषकार्याणि ॥

अथ 'सर्वेभ्यो हविर्भ्यः समवद्यति' इति वचनादाज्यादपि स्विष्टकृदिति शङ्कां निरस्यति—

उत्पन्नाधिकारात्सति सर्ववचनम् ॥ ९ ॥

सति विद्यमाने हविःशेषे सर्वशब्दः प्रत्येतव्यः । कुतः? उत्पन्नाधिकारात् उत्पन्नस्य बुद्धिमारूढस्य अधिकारात् विषयीकरणात्, प्रकृतविषयत्वादिति यावत् । यथा 'सर्वं ओदनो भुक्तः' इति सर्वशब्दः प्रकृतविषयः, एवमिहापि ये हविःशेषाः प्रकृता विद्यन्ते तेभ्यः सर्वेभ्य इति मन्यामहे ॥

यच्चोक्तं प्रायणीयायाम् 'समवद्यति' इति लिङ्गादाज्यादपि स्विष्टकृदिति, तत्राह—

जातिविशेषात्परम् ॥ १० ॥

त्यङ्लोपे पञ्चमी। परं हेत्वन्तरम् 'समवद्यति' इत्येतत् उपस्तरणाभिघारणाज्यसंसृष्टबहुसिक्थावयवकौदनगतामाज्यजातिमोदनजातिं चापेक्ष्य प्रयुक्तं वेदितव्यम् ॥

यच्चोक्तम् 'आज्ये च दर्शनात्स्विष्टकृदर्थवादस्य' इति, तत्राह—

अन्त्यमरेकार्थे ॥ ११ ॥

आज्यादपि स्विष्टकृदित्यत्र 'स्विष्टकृतेऽवदाय' इति स्विष्टकृदर्थाज्यावदानानुवाददर्शनं पूर्वपक्षान्ते यत्साधकमुपन्यस्तम्, तत् अरेकार्थे विषये प्रत्येतव्यम्। रेकः शेषः, तत्संबन्धि कार्यं रेकार्थः, शेषकार्यमिति यावत्, स न भवति अरेकार्थः तस्मिन्। उपांशुयाजप्रयुक्तशेषकार्यं यदाज्यावदानम्, न तस्येदमनुवादकम् 'स्विष्टकृतेऽवदाय' इति, येनाज्यादपि स्विष्टकृद्गम्येत; किं तु 'उपस्तीर्य सकृत्सकृत्सर्वेभ्यो हविर्भ्यः समवद्यति' 'द्विरभिघारयति' इति सौविष्टकृतपुरोडाशसांनाय्यशेषावदानसंस्कारकोपस्तरणाभिघारणार्थाज्यावदानमेव 'स्विष्टकृतेऽवदाय' इत्यनूद्यते। अतो नाज्यादुपांशुयाजीयशेषकार्यगमकमेतत्। वृत्तमधिकरणम् ॥

अस्ति साकंप्रस्थायीयो नाम दर्शस्य गुणविकारः— 'साकंप्रस्थायीयेन यजेत पशुकामः' इति। तत्र द्वौ सायंदोहौ प्रातर्दोहौ च। तेषां चतस्रः कुम्भ्यः सन्ति। तत्रेदं श्रुतम्—

२. साकंप्रस्थाप्ये शेषकर्मानुष्ठानाधिकरणम्।

'आज्यभागाभ्यामाग्नेयेन च पुरोडाशेन प्रचर्याग्नीधे स्रुचौ प्रदाय सह कुम्भीभिरतिक्रामन्नाहेन्द्रायानुब्रूह्याश्राव्येन्द्रं यजेति संप्रैषौ' इति। तत्र स्विष्टकृदादिशेषकार्याणि सन्ति, न वेति संशयः। तत्रोपांशुयाजस्य शेषाभावात्स्विष्टकृदाद्यभावेऽपि प्रकृते शेषसत्त्वादस्ति तत्कार्यम्। न च 'सह कुम्भीभिरतिक्रामन्' इत्यपरेणाहवनीयं कुम्भीभिः सह होमदेशं गन्तुं दक्षिणातिक्रमणस्य दृष्टार्थत्वाय तद्गतदोहानामशेषाणामेव होमस्य वक्तव्यतया कथमिह शेषकार्यमिति वाच्यम्। दक्षिणातिक्रमणानन्तरं यथाप्रकृति जुह्वामवदाय तया होमे सति, कुम्भीसाहित्यस्य दृष्टार्थत्वोपपत्तेः इति प्राप्ते, सिद्धान्तयति—

साकंप्रस्थायीये स्विष्टकृदिडं च तद्वत् ॥ १२ ॥

साकंप्रस्थायीयेऽपि तद्वत् उपांशुयाजवत् शेषाभावान्न दोहानां स्विष्टकृदादि शेषकार्यम्। इह हि कुम्भीसाहित्यविशिष्टमतिक्रमणं प्रकृताद्धोमार्थातिक्रमणादन्यदपूर्वं न विधेयम्, अदृष्टार्थत्वप्रसङ्गाद्विशिष्टविधिगौरवाच्च। किं तु प्राकृत एव होमार्थातिक्रमणे कुम्भीसाहित्यमात्रं विधेयम्,

अतिक्रमणस्य च प्राकृतस्य जुहूसाहित्यादिहापि कुम्भीसाहित्ये विधीयमाने कुम्भीनां प्राकृतजुहूस्थानापन्नत्वात् प्रकृतौ च जुह्वा होमार्थत्वात् कुम्भीनां होमार्थत्वं विज्ञायमानं कुम्भीस्थानां दोहानामशेषाणामेव होमं गमयति। अन्यथा होमार्थातिक्रमणे कुम्भीगताशेषदोहसाहित्यस्यादृष्टार्थत्वापत्तेः। ततश्च शेषाभावान्न स्विष्टकृदादि कार्यम्। वस्तुतस्तु, प्राकृते होमार्थातिक्रमणे कुम्भीसाहित्यस्य दृष्टार्थत्वाय तद्गतदोहानामशेषाणां होमार्थत्वस्य वक्तव्यतया कुम्भीषु शेषाभावात्स्विष्टकृदिडं न विद्यते उपांशुयाजवदित्येव सूत्रं व्याख्येयम्। न त्विह कुम्भीनां जुहूप्रत्याम्नायत्वमप्यभिमतम्। अत एव संकर्षे प्रथमस्य तृतीये 'सह कुम्भीभिरतिक्रामन्नाहेति स्रुक्प्रत्याम्नायः श्रूयते यथा पलाशस्य मध्यमेन पर्णेन जुहोति' इति सूत्रेण पूर्वपक्षयित्वा 'दारुपात्राणि कुम्भीभिर्विकल्प्येरन्नेकार्थत्वात्' इति तदुत्तरसूत्रेण 'सह कुम्भीभिः' इति वचनात् 'दारुपात्रेण जुहोति' इति वचनाच्च विकल्पः; 'दारुपात्रेण' इत्येकत्वं तु न विवक्षितम्; जात्यभिप्रायं वा; शाखान्तरे 'यावत्यः कुम्भ्यस्तावन्ति दारुपात्राण्युपकल्प्यानि स्युः' इति श्रवणादिति पश्चान्तरमुपक्षिप्य, सह कुम्भीभिरतिक्रमणेन प्रक्रान्तस्य होमस्य कुम्भीभ्योऽपनयो भवति, 'यावत्यः कुम्भ्यस्तावन्तो ब्राह्मणा दक्षिणत उपवीतिन उपोत्थाय कुम्भीभ्यः पात्राणि पूरयित्वा तैरध्वर्यु जुह्वतमनु जुह्वति' इति श्रवणात्, यथा प्रक्रान्तस्य पाल्लीवतस्य पर्यग्निकरणेतरप्रयोगापनयस्तद्वत्; 'जुह्वतमनु' इत्यनुः सहार्थकः 'तृतीयार्थे' इति कर्मप्रवचनीयः; अध्वर्युणा सह जुह्वतीत्यर्थः; अध्वर्युणान्वारब्धा जुह्वतीति यावत्; ततश्च कुम्भ्यो दोहानां दक्षिणतोऽपनयार्था एव; दारुपात्रैरेव तु होम इति सिद्धान्तयिष्यते 'प्रवृत्तस्य प्रदानस्य पात्रविधानादपनयो यथा पाल्लीवतं पर्यग्निकृतमुत्सृजेत्' इति सूत्रेण। तदुत्तराधिकरणे च 'तत्र शेषकार्याणि क्रियेरन्पात्रान्यत्वात्' इति पूर्वपक्षयित्वा, 'नापनीतेषु श्रुतत्वात्तद्व्याख्यातम्' इति सूत्रेण प्राकृते होमार्थातिक्रमणे सर्वहोमार्थत्वफलककुम्भीसाहित्यविधिना शेषकार्येष्वपनीतेषु दारुपात्राणि श्रुतानि, तस्मान्न शेषकार्यमिति द्वादशाध्याय्यां तृतीयस्य पञ्चमे व्याख्यातमिति सिद्धान्तयिष्यत इति दिक्। वृत्तमधिकरणम्॥

सौत्रामण्यां श्रूयते— 'आश्विनं सारस्वतमैन्द्रमिति त्रीन्पयोग्रहान्गृह्णाति त्रीन्सुराग्रहान्' इति। तेषु स्विष्टकृदादिशेषकार्यमस्ति, न वेति संशयः। तत्र गृह्णातिशब्दितेष्वैन्द्रवायवा-

३. सौत्रामण्यां शेषकर्मानुष्ठानाधिकरणम्।

दिसोमग्रहेषु 'न सर्वहुतं जुहोति' इति शेषसत्त्वादिहापि शेषोऽस्तीति स्यादेव शेषकार्यम्। इयांस्तु विशेषः— सोमस्यापूर्वत्वात्कतुशेषसत्त्वेऽपि न प्राकृतं स्विष्टकृदादि कार्यम्। इह तु पयसः सांनाय्यविकारत्वात्सुरायाश्च पिष्टप्रकृतिकायाः पुरोडाशविकारत्वात्संभवत्येव प्राकृतं शेषकार्यम् इति प्राप्ते, सिद्धान्तयति—

सौत्रामण्यां च ग्रहेषु ॥ १३ ॥

सौत्रामण्यामप्याश्विनादिग्रहेषु न प्राकृतं शेषकार्यं विद्यते, तत्र शेषस्य वैकृतकार्यान्तरश्रवणात्। श्रूयते हि— 'अध्वर्युः प्रतिप्रस्थाताग्नीध्रश्चाश्विनं भक्षयन्ति; होता ब्रह्मा मैत्रावरुणश्च सारस्वतमैन्द्रं यजमानः; सुराग्रहान्दक्षिणतः प्राचीनावीतिनो भक्षयन्ति; अपि वा ब्राह्मणं परिक्रीणीयादुच्छेषणस्य पातारम्; यदि ब्राह्मणं न विन्देदध्वर्युर्लोमकवपायामवनयेत्' इत्यादि। न च वैकृतशेषकार्यार्थं तत्तद्ग्रहपात्रेषु किंचित्स्थापयित्वा अन्यभागान्प्रकृतिवज्जुह्वामवदाय तदेकदेशेषु हुतेषु जुह्वां शेषसत्त्वात्ततः प्राकृतशेषकार्यं न विरुध्यत इति वाच्यम्। इह हि श्रूयते— 'यथा गृहीतान्ग्रहानृत्विज उपाददते; उत्तरेऽग्नौ पयोग्रहाञ्जुह्वति, दक्षिणे सुराग्रहान्' इति। येन क्रमेण गृहीतास्तेन क्रमेणाददत इति नार्थः, होमानामेकवषट्कारकालकतया यौगपद्ये, तदादानानामपि यौगपद्यात्; किं तु यथा गृहीतास्तथाभूतानेवाददते, न तु ततः प्रकृतिवज्जुह्वामवदायेति तदर्थः॥

ननु मास्तु जुह्वामवदानम्; तथापि ग्रहाणामेकदेशेषु हुतेषु, तच्छेषतः प्राकृतं वैकृतं च शेषकार्यमस्तु। न च प्रत्यक्षोपदिष्टवैकृतशेषकार्यत एव निराकाङ्क्षत्वात्प्राकृतशेषकार्याणामिह चोदकतो न प्राप्तिसंभव इति वाच्यम्; 'न सर्वे जुहोति शिनष्टि' इति पुनरिह वचनेन प्राकृतशेषकार्याणामपि प्रवृत्तेरभ्यनुज्ञानात्, अन्यथा वैकृतशेषकार्यविधिबलादेव शेषणसिद्धेः पुनर्वचनवैयर्थ्यादित्यत आह—

तद्वच्च शेषवचनम् ॥ १४ ॥

सोमे ऐन्द्रवायवादिग्रहेषु हुतशेषे भक्षणबलादेव सिद्धे 'न सर्वे जुहोति' इति वचनं यथानुवादः तद्वदत्रापि तद्वचनमनुवाद इत्यर्थः। वृत्तमधिकरणम्॥

४. सर्वपृष्ठेष्टौ स्विष्टकृदिडादीनां सकृदनुष्ठानाधिकरणम्।

अस्ति सर्वपृष्ठा नामेष्टिः— 'य इन्द्रियकामो वीर्यकामः स्यात्तमेतया सर्वपृष्ठया याजयेत्' इति। तत्र सन्ति षड्यागाः— 'यदिन्द्राय राथन्तराय निर्वपति, यदिन्द्राय बार्हताय, यदिन्द्राय वैरूपाय, यदिन्द्राय वैराजाय, यदिन्द्राय शाक्कराय, यदिन्द्राय रैवताय' इति। तत्र एकैकस्यै देवतायै चतुरश्चतुरो मुष्टीनेकस्मिञ्छूर्पे निरुप्य सहावहत्य पिष्ट्वा तैर्महान्तमेकं पुरोडाशं कृत्वा उत्तानेषु द्वादशसु कपालेषु श्रपयित्वा आसाद्य प्रचरणकाले पुरोडाशस्य मध्यभागमपहाय परितः प्रान्तभागं मनसा षड्धा विभज्य पूर्वभागस्य मध्यात्पूर्वार्धाच्च द्विरवदाय प्रथमां देवतां यजति। एवं तत आरभ्य प्रदक्षिणमुत्तरापवर्गं प्रान्तदेशेभ्यो मध्यात्पूर्वार्धाच्च द्विरवदायेतरा देवता यजतीति स्थितिः। 'उत्तानेषु कपालेष्वधिश्रयति' 'द्वादशकपालः पुरोडाशो भवति' 'समन्तं पर्यवद्यति'

इत्यादिवचनात् । तत्र किं प्रधानावदानदेशस्योत्तरार्धात् सकृत्सकृत्स्विष्टकृतेऽवदातव्यम्, उत पुरोडाशस्योत्तरार्धात्सकृदेवावदातव्यमिति संशये, पूर्वपक्षयति—

द्रव्यैकत्वे कर्मभेदात्प्रतिकर्म क्रियेरन् ॥ १५ ॥

सत्यपि पुरोडाशद्रव्यैकत्वे, प्रतिकर्म यावत्प्रधानं स्विष्टकृते अवदानानि क्रियेरन् । कुतः ? कर्मभेदात् । प्रकृतौ 'उत्तरार्धात्स्विष्टकृतेऽवद्यति' इति प्रधानदेशस्योत्तरार्धात्स्विष्टकृदवदानं विहितम्; इह च 'समन्तं पर्यवद्यति' इति प्रधानावदानदेशानां भिन्नत्वादुत्तरार्धभेदेन तत्प्रतिपत्तिकर्मस्विष्टकृदवदानभेदावश्यंभावादित्यर्थः । वषट्कारभेदादित्यप्यर्थः । प्रतियागं वषट्कारभेदात्स्विष्टकृदवदानभेदः । सोमे ह्यैन्द्रवायवग्रहो वायवे इन्द्रवायुभ्यां च गृह्यते । स च द्विवषट्कारकः— वायवे एको वषट्कारः, इन्द्रवायुभ्यामपरः । तस्य च ग्रहस्य द्विर्भक्षणं विहितम्— 'द्विरैन्द्रवायवं भक्षयति' इति । तत्र हेतुवादः श्रूयते— 'द्विर्ह्येतस्य वषट्करोति' इति । अस्मादेव हेतुवादात्प्रकृतेऽपि प्रतियागं वषट्कारभेदाच्छेषकार्यभेदोऽनुमीयते ॥

अथ सिद्धान्तयति—

अविभागात्तु शेषस्य सर्वान्प्रत्यविशिष्टत्वात् ॥ १६ ॥

तुर्नार्थे । न प्रतिप्रधानं स्विष्टकृदवदानभेदः, किं तु पुरोडाशस्योत्तरार्धात्सकृदेवावदाय स्विष्टकृत्कार्यः । कुतः ? सर्वान्प्रत्यविशिष्टत्वात् शेषस्याविभागात्, सर्वान्षडपि यागान्प्रति पुरोडाशस्य साधारणत्वेन शेषस्याविभागात् संसृष्टत्वात् । प्रकृतौ हि कृतकार्यद्रव्यस्योत्तरार्धादवद्यतीत्येव शास्त्रार्थः, कृतकार्यद्रव्यस्य प्रतिपत्त्यपेक्षायां प्रवर्तमानस्य 'उत्तरार्धादवद्यति' इत्यस्य तदुत्तरार्धविषयताया एवोचितत्वात् । यद्यागीयद्रव्यस्योत्तरार्धं तदेव प्रकृतौ वस्तुत उत्तरार्धमभूदिति न स शास्त्रार्थः । एवं चेह कृतषड्यागकार्यस्य पुरोडाशशेषस्य संसृष्टद्रव्यारब्धस्य सर्वयागसाधारणतया तदीयमुत्तरार्धमपि सर्वयागसाधारणमिति तस्यैकस्यागृह्यमाणविशेषत्वात्तन्त्रेणैव स्विष्टकृदवदानम् ॥

अथ यदुक्तमैन्द्रवायवग्रहशेषस्य प्रतिवषट्कारं भक्षणदर्शनादत्रापि शेषकार्यभेद इति, तत्राह—

ऐन्द्रवायवे तु वचनात्प्रतिकर्म भक्षः स्यात् ॥ १७ ॥

तुर्वैषम्ये । ऐन्द्रवायवे ग्रहे 'द्विरैन्द्रवायवं भक्षयति' इति वचनादेव प्रतिकर्म प्रतियागं वायव्ययागनिमित्तमैन्द्रवायवयागनिमित्तं च भक्षणभेदः स्यात् । न तु वषट्कारभेदनिबन्धनस्तत्र द्विर्भक्षः, 'द्विर्ह्येतस्य वषट्करोति' इत्येतस्य हेत्वधिकरणन्यायेनार्थवादत्वात् । तस्मादिह सकृदेव पुरोडाशस्योत्तरार्धात्स्विष्टकृतेऽवदानम् । वृत्तमधिकरणम् ॥

वचनादैन्द्रवायवस्य द्विर्भक्ष इत्युक्तम्। तत्प्रसङ्गात्सोमभक्षविषयो विचारः प्रस्तूयते। ज्योतिष्टोमे सन्ति सोमग्रहाश्चमसाश्च बहवः, होतृब्रह्मादयश्च कर्तारः। तेषु ग्रहचमसेषु किं क्वचिदपि

५. सोमे शेषभक्षणाधिकरणम्।

कस्यचिदपि न भक्षणम्, उत सर्वत्र सर्वेषामविशेषेण भक्षणम्, अथ वा यस्य यत्र प्रत्यक्षवचनं तस्य तत्र भक्षणम्, किं वा यस्य यत्र 'होतृचमसः' 'ब्रह्मचमसः' इत्यादिसमाख्या वा वषट्कर्तृत्वं वा होमाभिषवकर्तृत्वं वा प्रत्यक्षवचनं वा तस्य तत्र भक्षणम्, इति संशये, पूर्वपक्षयति—

सोमेऽवचनाद्भक्षो न विद्यते ॥ १८ ॥

सोमे हुतशिष्टे क्वचिदपि कस्यचिदपि भक्षो न विद्यते। कुतः? अवचनात् दर्शपूर्णमासयोरिव सोमे भक्षणविध्यभावात्, सोमस्यापूर्वत्वेन चोदकतो भक्षणाप्रवृत्तेः। यद्यपि 'अरुणं जुहोति' इति वचनादस्ति शेषः, तथापि न तस्य भक्षणनियमे प्रमाणमस्ति। 'पुरस्तादैन्द्रवायवं भक्षयति' इति तु रागप्राप्तकादाचित्कभक्षणे पुरस्तात्स्थापनादिगुणविधिपरं भविष्यति। 'हारियोजनस्य सर्व एव लिप्सन्ते' इति च हारियोजनाख्यग्रहशेषलिप्सामात्रपरम्, न तु भक्षणपरम्। तस्माद्ग्रहचमसेषु क्वचिदपि न भक्षणम् ॥

अथ द्वितीयपक्षमुपक्षिपति—

स्याद्वान्यार्थदर्शनात् ॥ १९ ॥

वाशब्दः पक्षान्तरे। सर्वत्र सोमशेषे सर्वेषामृत्विग्यजमानानां भक्षणं स्यात्। कुतः? अन्यार्थदर्शनात् 'पुरस्तादैन्द्रवायवं भक्षयति' इति गुणविधिपरे वाक्ये भक्षणस्य नित्यानुवाददर्शनात्, रागप्राप्तकादाचित्कभक्षपरत्वे च पाक्षिकानुवादत्वापातात्। क्वचिच्च कस्यचिद्भक्षानुवादः स्थालीपुलाकन्यायेन सर्वत्र सोमशेषे सर्वेषां भक्षणं गमयति ॥

अथ तृतीयपक्षमुपक्षिपति—

वचनानि त्वपूर्वत्वात्तस्माद्यथोपदेशं स्युः ॥ २० ॥

तुः पक्षान्तरे। 'पुरस्तादैन्द्रवायवमध्वर्युर्भक्षयति' 'पुरस्तान्मैत्रावरुणम्' 'सर्वतः परिहारमाश्विनम्' इत्यादिवाक्येषु न प्राप्तभक्षानुवादेन गुणविधिः, येन क्वचित्कस्यचिद्भक्षानुवादः सर्वत्र सर्वेषां भक्षणं गमयेत्। किं तु पुरस्तात्स्थापनादिगुणविशिष्टभक्षणविधायकान्येवैतानि वाक्यानि स्युः। कुतः? अपूर्वत्वात् भक्षणस्य लोकतो नित्यमप्राप्तत्वात्। तस्मात् भक्षणस्य सर्वत्र प्राप्त्यभावात् यथोपदेशं भक्षणविधिमनतिक्रम्य यत्र यस्य भक्षणं प्रत्यक्षमुप-

दिश्यते तत्र तस्य भक्षणम्, न तु सर्वत्र सर्वेषाम् इति तृतीयः पक्षः ॥

यत्र प्रत्यक्षवचनं तत्र भक्ष इत्यङ्गीकुर्मः। किं तु प्रत्यक्षवचनमेव भक्षप्रापकम्, 'पुरस्ता-दैन्द्रवायवं भक्षयति' इत्यादयश्च गुणविशिष्टभक्षणविधय इति न मृष्यामहे, प्रत्यक्षवचनवत्समा-ख्याया वषट्कारस्य होमाभिषवयोश्च भक्षप्रापकत्वात्। एवं चैन्द्रवायवादिषु होमाभिषवाभ्या-मध्वर्योर्भक्षस्य प्राप्तत्वान्न विधानम्; किं तु तदनुवादेन गुणविधानमेव। तथा च समाख्यादि-कमपि सोमभक्षणे निमित्तमिति सिद्धान्तसंग्रहः ॥

तत्र समाख्याया भक्षनिमित्तत्वं तावदाह—

चमसेषु समाख्यानात्संयोगस्य तन्निमित्तत्वात् ॥ २१ ॥

चमसेषु हुतशेषस्य भक्षोऽस्ति। कुतः? समाख्यानात् 'होतृचमसः' 'ब्रह्मचमसः' इत्येवं चमसानां होत्रादिसंयुक्तनिर्देशात्। अस्ति हि शुक्रामन्थिप्रचारे संप्रैषः— 'प्रैतु होतु-श्चमसः, प्र ब्रह्मणः, प्रोद्गातुः, प्र यजमानस्य, प्र सदस्यस्य' इति। होतुश्चमसः सदः प्रैतु गच्छतु। 'प्र ब्रह्मणः' इत्यादिष्वपि 'एतु' इत्यनुषज्यते; ब्रह्मणश्चमसः प्रैतु। एवं सर्वत्र योजना। नन्वस्तु चमसानां होत्रादिसंयुक्तनिर्देशः, तावता कथं तेषु भक्षप्राप्तिरित्यत आह— संयोगस्य तन्निमित्तत्वादिति। चमसेषु होत्रादिसंबन्धस्य भक्षणद्वारकत्वात्। 'चमु अदने'। 'अत्य-विचमितमिनमिरभिलभिनभितपिपतिपनिपणिमहिभ्योऽसच्' इत्यौणादिकोऽसच्प्रत्ययः। चम्यते भक्ष्यतेऽस्मिन्निति चमसः। होतुश्चमसः होतुर्भक्षणपात्रमित्यर्थः। होत्रादिकर्तृकसोमभक्षणाधारतया निर्देशात्मिका समाख्यापि भक्षनिमित्तम्। नन्वोदनादिद्रव्यान्तरस्य तेषु भक्षणेनापि 'होतुश्चमसः' इत्यादिसमाख्योपपत्तेर्न सोमस्यैव भक्षलाभ इत्यत्राप्येतदेव सूत्रमुत्तरम्— 'सोमचमसः' इति समाख्यानात्सोमस्यैव भक्ष इति लभ्यते। संयोगस्य तन्निमित्तत्वाच्च। 'न सोमेनोच्छिष्टा भवन्ति' इति सोमसंयोगस्यैवानुच्छिष्टत्वनिमित्तत्वमवगतम्। ओदनादिद्रव्ये तु भक्ष्यमाणे पात्राणामु-च्छिष्टत्वात्तैः कथं पुनर्होमसंभवः? शुद्ध्यर्थं तक्षणाश्रयणे तु यद्रूपस्य होत्रादिचमसत्वमवधारितं तस्य नाशप्रसङ्गः। पात्रान्तरोत्पादने तु 'एकादश चमसाः' इति संख्याविरोधः। अतश्चमसिनां चमसेषु समाख्या सोमभक्षस्य निमित्तम्। केचित्तु याज्ञिकाः— आस्यस्पर्शं विनैव सोमभक्ष-णमाहुः; 'न सोमेनोच्छिष्टा भवन्ति' इति स्मृतिस्तु पीतशेषपाननिषेधप्रतिप्रसवपरा; 'हविरु-च्छिष्टं दक्षिणा' इतिवच्छेषवाच्युच्छिष्टशब्दः; सोमेन भक्षितेन च ब्रह्मचमसास्तच्छेषदुष्टा न भवन्ति, पीतशेषपानदोषो न भवतीति यावत्— इति मन्यन्ते। तदेतत् शुद्ध्यर्थतक्षणाश्रय-णादिशङ्कातत्परिहारादिपरवार्त्तिकविरुद्धम्, 'भुक्त्वा पात्रे यतिर्नित्यं क्षालयेन्मन्त्रपूर्वकम्। न दुष्ये-

तास्य तत्पात्रं यज्ञेषु चमसो यथा ॥ चमसः सोमसंयोगाद्यथा वै मेध्य उच्यते। अपां तथैव संयोगान्नित्यो मेध्यः कमण्डलुः' इति मन्वादिस्मरणविरुद्धं चेत्युपेक्ष्यम् ॥

इतोऽप्येवमित्याह—

तस्माच्चाब्राह्मणस्य सोमभक्षणं प्रतिषेधति ॥ २२ ॥

श्रुतिरिति शेषः। तस्मात् समाख्याकल्पितभक्षणविधिबलादेव अब्राह्मणस्य क्षत्रिय-वैश्ययजमानस्य स्वचमसे भक्षणं प्रसक्तं प्रतिषेधति श्रुतिः— 'यदि राजन्यं वैश्यं वा याजयेत्स यदि सोमं बिभक्षयिषेत्र्यग्रोधस्तिभिनीराहृत्य ताः संपिष्य दधन्युन्मृज्य तमस्मै भक्षं प्रयच्छेन्न सोमम्' इति। यदि समाख्या भक्षणनिमित्तं न स्यात्, तदा यजमानस्य स्वचमसे भक्षणप्रसक्त्यभावात् 'यदि सोमं बिभक्षयिषेत्' इति तत्प्रसक्त्युद्भावनम् 'न सोमम्' इति प्रतिषेधश्च नोपपद्येत। अतोऽपि समाख्या भक्षनिमित्तम्। एतेन होतृचमससमाख्या वषट्कार-निमित्तभक्षणेनान्यथासिद्धेति निरस्तम्, ब्रह्मयजमानादिचमसेषु वषट्कारनिमित्तभक्षणाप्रसक्तेः। केचित्तु नेदं सूत्रम्, किं तु संग्राहकं भाष्यमेव— इति मन्यन्ते। वृत्तमधिकरणम् ॥

किमुद्गातृचमसमुद्गातैव भक्षयेत्, उत सर्व ऋत्विजः, अथ वा स्तोतार उद्गातृप्रस्तोतृप्रतिहर्तारः, यद्वा ते त्रयः सुब्रह्मण्यश्चेति चत्वारः, इति संशये, पूर्वपक्षयति—

उद्गातृचमसमेकस्य श्रुतिसंयोगात् ॥ २३ ॥

उद्गातृचमसमेकस्यैवोद्गातुर्भक्षणीयं प्रतीयात्, 'उद्गातुश्चमसः' इति तस्यैव श्रुत्या संयोगात्। न च 'प्रैतु होतुश्चमसः' इत्यादिप्रैषे 'प्रोद्गातॄणाम्' इति क्वचिच्छाखायां पाठादुद्गातृ-
६. उद्गातॄणां सहसुब्रह्मण्य- बहुत्वावगमात्कथमेकस्यैव भक्ष इति वाच्यम्; उद्गातुरेकत्वेन बहुवचन-
भक्षाधिकरणम्। स्यावियक्षितार्थत्वात्। न चोद्गातृशब्दस्य छत्रिन्यायेन तदितरपरत्व-मप्याश्रित्य बहुवचनं स्वार्थमेव नीयतामिति वाच्यम्; प्रातिपदिकस्य प्रथमप्रतीतत्वेन तत्र लक्षणाश्रयणायोगात् ॥

अथ द्वितीयपक्षमुपक्षिपति—

सर्वे वा सर्वसंयोगात् ॥ २४ ॥

वाशब्दः पक्षान्तरे। ऋत्विजः सर्वे भक्षयेयुः; कुतः? सर्वसंयोगात् उद्गातृशब्दस्य उद्गातृतदितरेषु सर्वर्त्विक्षु वाचकतया संयोगात्। पक्षात्प्रतीतस्यापि बहुवचनस्यात्यन्तबाधापेक्षया पूर्वप्रतीतस्यापि प्रातिपदिकोद्गातृशब्दस्याजहत्स्वार्थलक्षणा युक्ता ॥

अथ तृतीयपक्षेण सिद्धान्तयति—

स्तोत्रकारिणो वा तत्संयोगाद्बहुत्वश्रुतेः ॥ २५ ॥

वाशब्द एवार्थे । स्तोत्रकारिण उद्गातृप्रस्तोतृप्रतिहर्तार एवोद्गातृचमसं भक्षयेयुः; कुतः? तत्संयोगात् तेषां त्रयाणां गानसंयोगात्, 'प्रोद्गातृणाम्' इति बहुवचनश्रवणाच्च । एवं च प्रातिपदिकबहुवचनयोरुभयोरपि मुख्यार्थत्वं लभ्यते । सुब्रह्मण्यस्तु न गाता, तस्य सामाभावात् । 'सुब्रह्मण्योमिन्द्रागच्छ' इत्यादिस्तु निगदो यजुर्विशेष एव । अत एव व्याकरणे 'न सुब्रह्मण्यायाम्—' इत्येकश्रुत्यं प्रतिषिध्यते; सामत्वे हि 'यज्ञकर्मण्यजपन्यूङ्खसामसु' इति पर्युदासादेवैकश्रुत्यनिवृत्तिसिद्धेः किं तेन? तस्मादपसुब्रह्मण्यानां त्रयाणामेव स्तोत्रकारिणामुद्गातृचमसे भक्षणम् ॥

अथ चतुर्थपक्षवादी प्रत्यवतिष्ठते—

सर्वे तु वेदसंयोगात्कारणादेकदेशः स्यात् ॥ २६ ॥

तुः प्रत्यवस्थाने । सर्वे सामगा उद्गातृप्रस्तोतृप्रतिहर्तृसुब्रह्मण्याः उद्गातृचमसं भक्षयेयुः; कुतः? वेदसंयोगात्; प्रस्ताव उद्गीथः प्रतिहार उपद्रवो निधनमिति साम्नः पञ्च भक्तयः; तत्र द्वितीयभक्तेर्गाने उत्पूर्वो गाधातुर्मुख्यवृत्त्या वर्तते; तां च भक्तिं यो गायति तत्रोद्गातृशब्दो मुख्यः; प्रस्तोतृप्रतिहर्तृसुब्रह्मण्येषु तु उद्गातृवेदविहितप्रस्तावप्रतिहारगानसुब्रह्मण्याह्वानकर्तृत्वयोगान्निरूढलक्षणया वर्तते; 'प्रोद्गातृणाम्' इति प्रथमप्रतीतप्रातिपदिकरूढ्यर्थपरिग्रहे बहुवचनमनुपपद्यमानमेव प्रातिपदिकनिरूढलक्षणामनुमन्यते, न तु 'उद्गैर्गानम्' इत्यवयवयोगम्, तत्र रूढिपरित्यागात्; तथा चोद्गातृप्रस्तोतृप्रतिहर्तृसुब्रह्मण्याश्चत्वार उद्गातृशब्देनात्र विवक्षिताः, 'उद्गातारो निषद्य स्तुवते' इत्यत्र तु स्तौतिसमभिव्याहारात्कारणात्, एकदेशः स्यात्— 'दिश अतिसर्जने'; अतिसर्जनं त्यागः; चतुर्षु ऋक्छन्दोगेषु एकस्य सुब्रह्मण्यस्य वर्जनं स्यात्; 'प्रस्तोता प्रस्तौति, उद्गातोद्गायति, प्रतिहर्ता प्रतिहरति, उपद्रवमुद्गाता गायति, निधनं सर्व उपयन्ति' इति त्रयाणामेव स्तोतृत्वात्; तस्मादुद्गातृचमसभक्षणे अपसुब्रह्मण्यवादोऽपन्यायः । तदेवं प्रत्यवस्थाने एतदेव सूत्रमुत्तरम्— तुः संभावनायाम्; यद्यप्युक्तरीत्या वेदसंयोगात्सर्वे ससुब्रह्मण्याः स्तोत्रकारिण उद्गातृशब्दगम्या भवितुमर्हन्ति, तथापि कस्मिंश्चित्कारणादुद्गातृशब्दे एकस्य सुब्रह्मण्यस्य देशः अतिसर्जनं वर्जनं स्यात्; कर्मव्यापृतिः प्रैषकाले नियमेन संनिधानं च भक्षकारणम्; शेषप्रतिपत्त्यर्थेऽपि हि भक्षणे कर्तृनियमस्यार्थवत्त्वाय कर्तृगतमपि किंचित्प्रयोजनं वाच्यम्; एवं च कर्मणि व्याप्रियमाणानामानुषाङ्गिकक्षुत्पिपासानिवृत्तिमुखेनादृष्टाय कर्तृनियमो भवति; सुब्रह्मण्यस्य च न तदानीं कर्मणि व्यापृतिरस्ति, प्रातरनुवाकानन्तरमेव

सुब्रह्मण्याह्वानस्य तद्व्यापारस्योपरतत्वात्; यद्यपि शाखान्तरे दक्षिणाकालेऽपि सुब्रह्मण्याह्वानमस्ति, तथापि भक्षवेलायां तदभावात्सुब्रह्मण्यविषये भक्षकर्तृनियमस्य केवलादृष्टार्थत्वं स्यात्; अतो न तस्य भक्षः; 'प्रोद्गातृणाम्' इति प्रैषकाले सुब्रह्मण्यस्यावश्यं संनिध्यभावाच्च; न हि कदाचित्संनिहितस्य तस्य नित्यवत्प्रैषविषयत्वमस्ति; संनिधानस्यापि समाख्याविधौ तु गौरवम्; न च समाख्यया सुब्रह्मण्यस्य भक्षे विहिते अर्थादेतस्य संनिधानमपि नित्यं लभ्यत इति वाच्यम्, 'प्रोद्गातृणाम्' इति प्रैषगतसमाख्याकल्प्यप्रैषविधेः सदःस्थितस्तोत्रकारिमात्रविषयतयैवोपपन्नत्वेन ततः संनिध्यलाभात्; तस्मादपसुब्रह्मण्यानां स्तोत्रकारिणामेवोद्गातृचमसे भक्षणमिति वार्त्तिकसंमतः सिद्धान्तः। भाष्ये तु— 'सर्वे तु वेदसंयोगात्' इत्यादिसूत्रमुद्गातृवेदसमाख्यातसामवेदविहितकर्मकर्तृत्वलक्षणगुणयोगात्सर्वे ससुब्रह्मण्याश्छन्दोगाः 'प्रोद्गातृणाम्' इत्यत्र विवक्षिताः; अतः समाख्यया सुब्रह्मण्यस्यास्ति भक्षः; 'उद्गातारो निषद्य स्तुवते' इत्यत्र तु स्तौतियोगात्कारणादपसुब्रह्मण्याः स्तोत्रकारिण एव विवक्षिता इत्येवं सिद्धान्तपरतयैव योजितम्। युक्तं चैतत्— तुशब्दस्वारस्यात्। यत्तु सोमभक्षणस्य कर्मणि व्याप्रियमाणकर्तृषु क्षुत्पिपासानिवृत्तिलक्षणतृप्तिमुखेनादृष्टार्थत्वाद्भक्षवेलायां च सुब्रह्मण्यस्य कर्मव्यापाराभावान्न भक्ष इति— तन्न; भक्षणस्य केवलशेषप्रतिपत्त्यर्थत्वात्, अन्यथा कादाचित्कक्षुत्पिपासयोरभावे भक्षणस्य लोपे सति तस्य नित्यवच्छ्रवणविरोधात्, अत एव च 'न भक्षः कर्तृसंस्कारः, द्रव्यसंस्कारोऽयम्' इति वार्त्तिकं संगच्छते। यच्चोक्तम्— प्रैषकाले सुब्रह्मण्यस्य नित्यं संनिधौ न प्रमाणमिति, तदपि न, उपगानार्थतया तत्संनिधेरावश्यकत्वात्, सप्तमपादे 'उपगाश्च लिङ्गदर्शनात्' इत्यत्र अध्वर्युव्यतिरिक्तानामृत्विजामुपगातृत्वस्य वक्ष्यमाणत्वात्। यद्यपि 'चत्वारोऽवरार्ध्या उपगातारः' इत्युक्तम्, तथापि ये केचिच्चतुराद्या उपगायेयुः— इति मत्वा सर्वस्यैवैकस्यासंनिधानादुपगानलोपप्रसङ्गः स्यादिति सर्वेषामपि संनिधेः प्रतीक्षणीयत्वादस्ति सुब्रह्मण्यस्यापि नित्यं संनिधिः। किं च तलवकारिशाखामधिकृत्य प्रवर्तिते जैमिनिकल्पसूत्रे सुब्रह्मण्यस्यापि भक्षणमुक्तम्— "अथ चमसमवेक्षत उद्गाता 'इयेनो नृचक्षाः' इति; एवमितरे यथापूर्वम्; अथोपहवमिच्छन्ते—'होतरुपह्वयस्व, प्रस्तोतरुपह्वयस्व, प्रतिहर्तरुपह्वयस्व, सुब्रह्मण्योपह्वयस्व' इति; उद्गातैव होतर्युपहवमिच्छते; उद्गातरि प्रस्तोतृप्रतिहर्तारौ सुब्रह्मण्यश्च; उपहवमिष्ट्वा भक्षयन्ति" इति। तस्मात्सुब्रह्मण्याः स्तोत्रकारिण उद्गातृचमसं भक्षयेयुरिति भाष्यसिद्धान्तो भगवतो जैमिनेरभिमत इति प्रतिभाति। द्राह्यायणसूत्रे तु अपसुब्रह्मण्यानां स्तोत्रकारिणामेवोद्गातृचमसे भक्षणमुक्तम्; तदिदं वचनान्तरमूलकम्; यथा कथंचिदस्तु; न तु तज्जैमिनीयन्यायसरणिमनुसरति; एवं च भाष्यानुसारिणः प्राभाकरा यद्वार्त्तिकमदूषयन्— 'अपसुब्रह्मण्यवादिनोऽपन्यायवादिनः' इति— 'तत्प्राज्ञैरुन्मत्तभाषितवदुपेक्ष्यम्' इति यत्पार्थसारथिमिश्रैरुक्तं तदेवोन्मत्तप्रलपितवदुपे-

क्ष्यमिति । वृत्तमधिकरणम् ॥

तदेवं वृत्तः समाख्याभक्षविचारः । संप्रति वाचनिकभक्षविचारः प्रस्तूयते—'यथा चमसमन्यांश्चमसांश्चमसिनो भक्षयन्ति' 'अथैतस्य हारियोजनस्य सर्व एव लिप्सन्ते' इति श्रुतम् । किमिदं हारियोजनस्य भक्षणं प्रावस्तुतोऽपि ऋत्विग्विशेषस्य विद्यते? न वेति संशये, पूर्वपक्षयति—

७. प्रावस्तुतः सोमभक्षाधिकरणम् ।

प्रावस्तुतो भक्षो न विद्यतेऽनाम्नानात् ॥ २७ ॥

प्रावस्तुतः क्वचिदपि भक्षो न विद्यते; कुतः? अनाम्नानात् वचनाभावात्, समाख्यावषट्कारहोमाभिषवाणामुक्तवक्ष्यमाणकारणानां चाभावात्; 'हारियोजनस्य लिप्सन्ते' इति तु हारियोजनग्रहलिप्सामात्रं गमयति, न तु भक्षम्, लब्धस्य यथेष्टविनियोगोपपत्त्या लाभस्य भक्षणनियतत्वाभावात् ॥

अथ सिद्धान्तयति—

हारियोजने वा सर्वसंयोगात् ॥ २८ ॥

वाशब्द एवार्थे । हारियोजनग्रहे प्रावस्तुतो भक्षो विद्यत एव; कुतः? सर्वसंयोगात् 'हारियोजनस्य सर्व एव लिप्सन्ते' इति सर्वेषां भक्षश्रवणात्; लाभस्य प्रयोजनाकाङ्क्षायाम् 'भक्षयति' इति पूर्ववाक्यश्रुतभक्षार्थत्वे सति लिप्सतेर्भक्षपरत्वे पर्यवसानात् ॥

अथ पूर्वपक्षी प्रत्यवतिष्ठते—

चमसिनां वा संनिधानात् ॥ २९ ॥

वाशब्दः प्रत्यवस्थाने; सर्वशब्देन पूर्ववाक्योपात्ताश्चमसिन एव परामृश्यन्ते, न तु प्राकरणिका ऋत्विग्यजमानाः; कुतः? संनिधानात् प्रकरणरूपसंनिध्यपेक्षया स्ववाक्यसंनिधेः प्रबलत्वात्; अन्यथा 'यथा चमसमन्यांश्चमसांश्चमसिनो भक्षयन्ति' इति पूर्ववाक्यस्य वैयर्थ्यात्; न ह्यस्य सर्वविशेषणत्वादन्यत्प्रयोजनमस्ति; ततश्च प्रावस्तुतश्चमसित्वाभावान्न हारियोजनभक्षः ।

अथ सिद्धान्ती परिहरति—

सर्वेषां तु विधित्वात्तदर्था चमसिश्रुतिः ॥ ३० ॥

तुरवधारणे । सर्वेषामेव ऋत्विग्यजमानानां हारियोजनभक्षः, न तु चमसिनामेव; कुतः? विधित्वात्— यो यो यस्य यस्य चमसः समाख्यातः स स एकैकस्तं तं चमसम्—

इत्येवमन्यांश्चमसांश्चमसिनो भक्षयन्ति; हारियोजनस्य तु चमसिनस्तदितरे च इत्येवमस्य वाक्यस्य चमसितदितरसाधारण्येन भक्षविधिपरत्वात्। यथासमाख्यं तं तं चमसमेकैकमित्येवं चमसिनश्चमसान्भक्षयन्ति; हारियोजनस्य तु नैको भक्षयति, किं तु सर्वे चमसिनः— इति तु नार्थः; तथा सति 'चमसिनः' इत्यस्य वैयर्थ्यात् 'यथा चमसं चमसान्भक्षयन्ति' इत्येतावतैव 'चमसिनः' इत्यस्य लाभात्। अतः पूर्ववाक्ये चमसिग्रहणम् 'अथैतस्य' इत्युत्तरवाक्ये सर्वशब्दस्य चमसितदितरप्राकरणिकसर्वर्त्विग्यजमानविषयत्वलाभार्थमित्येव वक्तव्यमिति। तदेतदाह— तदर्था चमसिश्रुतिरिति। चमसिग्रहणं सर्वशब्दस्य चमसितदितरर्त्विग्यजमानविषयत्वसिद्ध्यर्थमित्यर्थः। नन्वेवमपि 'हारियोजनस्य सर्व एव लिप्सन्ते' इत्येतावतैव प्राकरणिकानामृत्विग्यजमानानां लाभात् 'यथाचमसम्' इत्यादिपूर्ववाक्यं व्यर्थमित्यत्राप्येतदेवोत्तरम्— तदर्था चमसिश्रुतिरिति। अल्पत्वाच्चमसानां चमसिन एव तान्भक्षयन्ति; हारियोजनस्य तु महानुभावत्वात्तत्र तदितरेऽपि सर्वे भक्षयेयुरिति प्रशंसार्थमित्यर्थः। वृत्तमधिकरणम्॥

अथान्यद्भक्षनिमित्तमभिधीयते। 'वषट्कर्तुः प्रथमभक्षः' इति श्रुतम्। तत्र किं वषट्कर्तुर्यो भक्षः स प्रथम इति विधिः? उत यो वषट्करोति तस्य प्रथमभक्ष इति विधिरिति संशयः। तत्र कथंचिदनुवादत्वे संभवति प्राथम्यविशिष्टविध्ययोगाद्वषट्कर्तुर्होत्रादेश्चमसे यत्समाख्यया भक्षणं प्राप्तं तत्प्रथमं कर्तव्यमित्यर्थः। एवं च होतृवषट्कारे ग्रहचमसेषु हुतेषु मैत्रावरुणादीनां स्वस्वचमसेषु समाख्याभक्षणात्पूर्वमेव स्वचमसमेव होता भक्षयति; न तु चमसान्तराणि; नापि ग्रहम्, तेषु होतुः समाख्याया अभावात्, वषट्कारस्य चेदानीं भक्षनिमित्तत्वासिद्धेः। एवं मैत्रावरुणादेरपि वषट्कर्तुः स्वस्वचमस एव प्रथमं समाख्याभक्षः नेतरेषु ततोऽन्येषां स्वस्वचमसेषु समाख्याभक्षः; वषट्कारनिमित्तस्तु भक्षो न क्वचिदप्यस्तीति प्राप्ते, सिद्धान्तयति—

८. वषट्करणस्य भक्षनिमित्ताधिकरणम्।

वषट्काराच्च भक्षयेत् ॥ ३१ ॥

वषट्कारोऽपि सोमभक्षणस्य निमित्तमित्यर्थः। न तावदिह 'यो भक्षः स प्रथमः' इति केवलभक्षोद्देशेन प्राथम्यविधिः, अवषट्कर्तुरपि भक्षप्राथम्यापत्तेः। नापि 'वषट्कर्तुर्यो भक्षः स प्रथमः' इति विधिः, विशिष्टोद्देशे वाक्यभेदात्। किं च भक्षोद्देशेन प्राथम्यविधावुद्देश्यस्य प्रथमप्रतीत्यवश्यंभावाद्भक्षशब्देन स्वार्थः प्रथमं प्रतिपाद्यः पश्चात्प्रथमशब्देन तदर्थ इति वक्तव्यम्; न चैतत्संभवति समस्यमानपदयोर्युगपत्प्रसरतया युगपदेव विशिष्टैकार्थप्रतिपादकत्वात्, अन्यथा एकार्थीभावलक्षणसामर्थ्याभावेन समासासंभवात्, 'समर्थः पदविधिः' इत्यनुशासनात्। तस्माद्वषट्कारे निमित्ते प्राथम्यविशिष्टभक्षविधिः; वषट्कर्तृकर्तृकप्राथम्यविशिष्टे भक्षे

विधीयमाने अर्थाद्वषट्कारस्य प्राथम्यनिमित्तत्वलाभात्। एवं च होतुर्वषट्कारे हुतेषु ग्रहचमसेषु सर्वत्र समाख्याया असत्त्वेऽपि वषट्कारनिमित्तं तस्य भक्षान्तरम्, मैत्रावरुणादीनां स्वस्वचमसेषु समाख्याभक्षणात्पूर्वमेव भवति; ततो होतुरन्येषां च स्वस्वचमसेषु समाख्याभक्षः—इति सिद्धम्। वृत्तमधिकरणम्॥

अथान्यद्भक्षकारणमभिधीयते। 'हविर्धाने चर्मण्यधिग्रावभिरभिषुत्याहवनीये हुत्वा प्रत्यञ्चः परेत्य सदसि भक्षयन्ति' इति श्रुतम्। तत्र किं भक्षानुवादेन गुणविधिः? उताभिषवहोमनिमित्तभक्षान्तरविधिरिति संशयः। भक्षानुवादेन गुणविधिरिति ब्रूमः। न च प्राप्तकर्मानुवादेनानेकगुणविधौ वाक्यभेदः शङ्क्यः, अनेकगुणविशिष्टभक्षविधौ सति प्राप्ताप्राप्तविवेकेन समाख्यादिनिमित्तके प्राप्ते भक्षे गुणविधित्वपर्यवसानसंभवादिति प्राप्ते—

सिद्धान्तयति—

होमाभिषवाभ्यां च ॥ ३२ ॥

'भक्षयेत्' इत्यनुषज्यते; होमाभिषवावपि सोमभक्षनिमित्तमित्यर्थः। 'सोममभिषुणोति, हविर्धानेऽभिषुणोति, ग्रावभिरभिषुणोति, चर्मण्यभिषुणोति, ग्रहाञ्जुहोति, चमसाञ्जुहोति, यदाहवनीये जुहुति' इति वचनैरभिषवहविर्धानग्रावचर्महोमाहवनीयाः प्राप्ताः, तन्निमित्तताधिकरणम्। 'अभिषुत्य हुत्वा भक्षयति' इति क्रमोऽपि, अभिषवं विना रसस्य होमासंभवात् होमाभावे कृतकार्यत्वाभावेन भक्षणरूपप्रतिपत्त्यनपेक्षत्वाच्चार्थादेव सिद्धः। वषट्कर्त्रादीनां भक्षयितॄणां सदसि स्थितत्वात्तत्र समाख्यादिनिमित्तभक्षतदुपहवदानार्थमध्वर्योराहवनीयदेशे स्थितस्य सदः प्रति गमनं प्रत्यङ्मुखत्वं चार्थादेव प्राप्तम्। तस्मात् 'अभिषुत्य हुत्वा भक्षयन्ति' इति होमाभिषवसमानकर्तृकभक्षविधौ होमाभिषवयोर्भक्षणप्राग्भावनियमादर्थान्निमित्तत्वमवगतमिति सिद्धं होमाभिषवनिमित्तं भक्षान्तरम्। न च भक्षणमपि समाख्यानिमित्तं प्राप्तमेवेति वाच्यम्, अभिषवहोमकर्ता ह्यध्वर्युरेव भवति; न च 'अध्वर्युचमसः' इति समाख्यास्ति, नापि तस्य वषट्कर्तृत्वमस्ति, येन तस्य भक्षणं प्राप्नुयात्। तस्माद्धोमाभिषवनिमित्तभक्षान्तरविधिः। वृत्तमधिकरणम्॥

अथैकस्मिन्पात्रे समाख्यानिमित्तस्य वषट्कारनिमित्तस्य होमाभिषवनिमित्तस्य च भक्षणस्य समवाये सति बाधविकल्पसमुच्चयसंशये, पूर्वपक्षयति—

प्रत्यक्षोपदेशाच्चमसानामव्यक्तः शेषे ॥ ३३ ॥

हुतशेषे वषट्कारहोमाभिषवनिमित्तो भक्षः अव्यक्तः सामान्यविहितः ग्रहचमसाधा-

रणः; स तावत्समाख्याभक्षेण बाध्यत इत्यध्याहारः। कुतः? प्रत्यक्षोपदेशात् होतृचमसादिस-
१०. वषट्कर्त्रादीनां चमसे माख्याकल्पितविधिना चमसभक्षणस्य विशिष्य विधानात्; न च संभ-
सोमभक्षाधिकरणम्। वात्समुच्चयः किं न स्यादिति वाच्यम्, भक्षणस्य प्रतिपत्त्यर्थत्वात्, प्रतिपत्तेश्चैकेन विशिष्यविहितसमाख्याभक्षणेनैव सिद्धेः; एतेन चमसेषु समाख्याभक्षस्य विकल्पोऽपि प्रत्युक्तः; एवं च ग्रहेषु वषट्कारनिमित्तहोमाभिषवनिमित्तभक्षयोस्तुल्यबलत्वाद्विकल्पः सूचितो भवति॥

अथ सिद्धान्तयति—

स्याद्वा कारणभावादनिर्देशश्चमसानां कर्तुस्तद्वचनत्वात्॥ ३४॥

वाशब्दोऽवधारणे। स्यादेव चमसेषु समाख्यादिभक्षाणां समुच्चयः; कुतः? कारणभावात् भक्षकारणानां समाख्यादीनां सत्त्वात्; यत्तु समाख्या चमसेषु विशिष्य भक्षविधिप्रापिकेति तत्राह—अनिर्देशश्चमसानां कर्तुरिति। यद्यपि समाख्या 'चमसिनश्चमसान्भक्षयन्ति' इति विशेषविधिप्रापिका, तथापि चमसानां भक्षणविषये वषट्कर्तुर्होमाभिषवकर्तुश्चानिर्देशः—निष्कृष्य वचनं चमसिन एवेति परिसंख्यानम्—न भवति, समाख्यायाः 'चमसिनश्चमसान्भक्षयन्ति' इत्येतावन्मात्रविधौ व्यापारात्; न हि वषट्कारनिमित्तहोमाभिषवनिमित्तयोर्भक्षयोः प्रत्यक्षविहितयोः समाख्यानकल्पितेन सामान्यविधिनापि बाधो युज्यते। किं च सति विरोधे विशेषविधिः सामान्यविधिं बाधते; न त्विह विरोधोऽस्ति, सोमरसस्यावयवशश्चमसिभिस्तदितरैश्च भक्षयितुं शक्यत्वात्। यद्यप्येकेनैव भक्षेण प्रतिपत्तिः सिध्यति, तथाप्यबाधनैवोपपत्तौ बाधस्यान्याय्यत्वादवयवशो भक्षणेनैव प्रतिपत्तिः संपाद्या। ततश्च चमसेषु समाख्यादिभक्षाणां समुच्चयः। एवं ग्रहेष्वपि वषट्कारनिमित्तहोमाभिषवनिमित्तयोस्तुल्यन्यायत्वात्समुच्चयः॥

इतोऽप्येवमित्याह—

चमसेषु चान्यदर्शनात्॥ ३५॥

चमसेषु चमसिभ्योऽन्यस्यापि भक्षो दृश्यते—'हुत्वा चमसांश्चमसाध्वर्यवो भक्षान्ववषट्कर्त्रे हरन्ति' इति; न हि वषट्कर्तुर्होतुरन्यस्य वा सर्वचमसेषु समाख्याभक्षः संभाव्यते, होतृचमसादिसमाख्याया एकैकचमसमात्रविषयत्वात्, अतो भक्षान्तरार्थमेव हरणमिदं वाच्यमिति सिद्धं वषट्कारादीनामपि चमसभक्षे निमित्तत्वम्। वृत्तमधिकरणम्॥

एकस्मिन्पात्रे होमाभिषवकर्तृवषट्कर्त्रोर्भक्षे प्रसक्ते, कतरः पूर्वो भक्षयतीति संशये, पूर्वपक्षयति—

एकपात्रे क्रमाद्ध्वर्युः पूर्वो भक्षयेत् ॥ ३६ ॥

एकस्मिन्पात्रे अध्वर्युर्होमाभिषवकर्ता पूर्वो भक्षयेत; कुतः? क्रमात्— हुत्वा भक्षयतीति भक्षस्य होमानन्तर्यावगमात्, वषट्कर्तृभक्षप्राथम्ये च तद्विरोधात्; 'वषट्कर्तुः प्रथमभक्षः' इति वचनं तु वषट्कर्ता चमसिभ्यः पूर्वं भक्षयेदित्येवंपरम् ॥

११. होतुः प्रथमभक्षाधिकरणम् ।

अथ सिद्धान्तयति—

होता वा मन्त्रवर्णात् ॥ ३७ ॥

वाशब्द एवार्थे । होता वषट्कर्तैव प्रथमं भक्षयेत्; ततो होमाभिषवकर्ता; कुतः? मन्त्रवर्णात्— 'प्रावाणः, सुकृतः सुकृत्यया होतुश्चित्पूर्वे हविरद्यमाशत' इति मन्त्रलिङ्गात्;— प्रावाणः, सुकृतः शोभनं कुर्वाणाः, सुकृत्यया सुकर्मणा अभिषवेण, होतुश्चित् होतुरपि, पूर्वे, हविरद्यं सोमभक्षणम्, आशत प्राप्नुवन्— इति तदर्थः । अत्र होतुरपि पूर्वमित्युक्त्या सर्वापेक्षया पूर्वं प्राप्तां सोमभक्षणम्; ततो होतुः; तत इतरेषाम्— इत्यवगम्यते ॥

इतोऽप्येवमित्याह—

वचनाच्च ॥ ३८ ॥

'वषट्कर्तुः प्रथमभक्षः' इति वचनादपि वषट्कर्तैव प्रथमं भक्षं लभते; न च चमसिभ्यः पूर्वं वषट्कर्ता भक्षयति— इति तदर्थ इति वाच्यम्, 'हुत्वा भक्षयति' इति क्त्वाप्रत्ययस्य पूर्वकालतामात्रविषयतया तदव्यवहितत्वस्य न्यायतः कल्प्यत्वेन तदनुसारेण प्रथमपदस्यापि विशेषेण प्रवृत्तस्य चमसिमात्रापेक्षया संकोचायोगात् ॥

युक्त्यन्तरमाह—

कारणानुपूर्व्याच्च ॥ ३९ ॥

'वषट्कृते जुहोति' इति वचनादादौ वषट्कारः प्रथमं क्रियते; पश्चाद्धोमः; अतो निमित्तक्रमादपि वषट्कर्तुः प्राथम्यम् । यद्यपि वषट्कारात्पूर्वमेवाभिषवो भवति, तथापि न दोषः; न ह्यभिषव एव निमित्तम्, किं तु स च होमश्चेति द्वयं समुदितं निमित्तमिति— षष्ठस्य चतुर्थे 'होमाभिषवभक्षणं च तद्वत्' इत्यत्र वक्ष्यते । वृत्तमधिकरणम् ॥

वचनादनुज्ञातभक्षणम् ॥ ४० ॥

'नानुपहूतेन सोमः पातव्यः' इति वचनादनुज्ञातस्यैव भक्षणमित्यर्थः। पातव्यः पातव्यः; कृत्यार्थे तव्यप्रत्ययः; 'अनुज्ञात—' इत्यनेनोपपूर्वो ह्वयतिरनुज्ञानार्थ इति सूचितम्। उत्तरवि-
१२. भक्षस्यानुज्ञापूर्वकत्व- धिभक्षार्थमेतत्सूत्रम्। अनुज्ञापनं विनानुज्ञानानुपपत्तेरनुज्ञापनमर्थादाक्षिप्तम्;
मधिकरणम्। तदुभयमपि 'अनुजानीहि' 'अनुज्ञातोऽसि' इत्यादिशब्दोच्चारणादिलौकिकोपायेन प्राप्तम्; तत्राह—

तदुपहूत उपह्वयस्वेत्यनेनानुज्ञापयेल्लिङ्गात् ॥ ४१ ॥

'उपहूतः' इत्येको मन्त्रः; भक्षं कर्तुमनुज्ञातोऽसीत्यर्थः। 'उपह्वयस्व' इत्यन्यो मन्त्रः भक्षणमनुजानीहीत्यर्थः; तत्र 'होतः' इत्यादिसंबुद्ध्यन्तपदमध्याहार्यम्— 'होतरुपह्वयस्व' इत्यादि। 'असावसावुपह्वयस्वेति कर्मनामधेयेनामन्त्रयते' इति कल्पसूत्रम्। अनुज्ञापयेत्— इत्युपलक्षणम्— तत् भक्षणम्, अनुज्ञापयेत् अनुजानीयाच्च; कुतः? लिङ्गात् मन्त्रसामर्थ्यात्। इदमपि सूत्रमुत्तरविवक्षार्थमेव॥

'उपहूतः' 'उपह्वयस्व' इति मन्त्रद्वयेनानुज्ञानमनुज्ञापनं च कर्तव्यमिति स्थितम्। तत्र किमिदं मन्त्रद्वयमनुज्ञानानुज्ञापनयोरन्यतरत्र प्रयोक्तव्यम्, अन्यतरत्र तु लौकिकोपाय आश्रयणीयः? उतोभयत्रोभयं प्रयोक्तव्यम्? अथ वा यथालिङ्गं विभज्य विनियोगः? इति संशयः। तत्र यथालिङ्गं विभज्य विनियोगे स्वीक्रियमाणे अनुज्ञानस्य 'उपहूतः' इति प्रतिवचनात्मकस्य 'होतरुपह्वयस्व' इत्याद्यनुज्ञापनोत्तरभावित्वात् 'उपह्वयस्व' इति द्वितीयमन्त्रस्य प्रथमकर्तव्येऽनुज्ञापने प्रथमं प्रयोगः; 'उपहूतः' इति प्रथममन्त्रस्य तु तदुत्तरकर्तव्येऽनुज्ञाने पश्चात्प्रयोगः स्यादिति मन्त्रपाठक्रमो बाध्येत; अतो मन्त्रद्वयमिदं यथापाठमेवान्यतरत्र प्रयोक्तव्यम्; तत्र 'उपहूतः' इत्यस्यानुज्ञापने विशेषणप्रतिपादनमुखेन समावेशः; तथा 'उपह्वयस्व' इत्यस्यानुज्ञाने विनियोगयलादैन्द्रीन्यायेन व्यत्ययमाश्रित्य 'अनुजानीयात्' इत्यर्थाश्रयणेन समावेशः; एवं च लिङ्गमनुगृहीतम्, पाठश्च; तथा च मन्त्रद्वयमेकत्र प्रयोक्तव्यम्; अन्यत्र तु लौकिकोपाय आश्रयणीयः। अथ वा प्रतिप्रधानं गुणावृत्तेर्न्याय्यत्वादुभयमुभयत्रेति प्राप्ते, सिद्धान्तयति—

तत्रार्थात्प्रतिवचनम् ॥ ४२ ॥

तत्र तयोर्मन्त्रयोर्मध्ये 'उपहूतः' इति मन्त्रेण प्रतिवचनमनुज्ञानं कर्तव्यम्; अर्थात्सामर्थ्यानुसारात्; एवं च परिशेषात् 'उपह्वयस्व' इति मन्त्रेणानुज्ञापनं कर्तव्यमित्युक्तप्रायम्, 'उपहूतः' इत्यस्य विशेषणमुखेनानुज्ञापनपरत्वे अजहत्स्वार्था वृत्तिराश्रिता स्यात्; 'उपह्वयस्व' इत्यस्य तु विशेष्यपरित्यागेनानुज्ञापरत्वे स्वार्थैकदेशत्यागाज्जहत्स्वार्था वृत्तिराश्रिता स्यात्; अतो यथालिङ्गं

विभज्य विनियोगः। यत्तु पाठक्रमो बाध्यत इति; तत्राप्येतदेव सूत्रमुत्तरम्; अर्थक्रमात्पाठक्रमं बाधित्वा यथालिङ्गमेव विनियोग इत्यर्थः। वृत्तमधिकरणम् ॥

तदेतत् 'होतरुपह्वयस्व' इत्यनुज्ञापनं भक्षयित्रा कर्तव्यमित्यविवादम्; तत्र किं यं कंचिदनुज्ञापयेत्, 'उपहूतः' इत्यनुज्ञानं च यः कश्चित्कुर्यात्— इत्यनियमः? उत एकस्मिन्पात्रे यावन्तः प्रतिभक्षयन्ति तावन्तो ह्यनुजानीयुः? एको द्वौ बहवो वा? इति संशये— मन्त्रलिङ्गकाल्पितानुज्ञापनविधेरेकमेवानुज्ञाप्यमादाय चरितार्थत्वात्, दृष्टार्थत्वाच्चानुज्ञापमानुज्ञानयोः, यं कंचिदेकमनुज्ञापयेत् स एवैकोऽनुजानीयाच्चेति प्राप्ते, सिद्धान्तयति—

तदेकपात्राणां समवायात् ॥ ४३ ॥

तत् अनुज्ञापनमनुज्ञानं च, एकपात्राणाम्— एकं भक्षणपात्रं येषां ते एकपात्राः— एकस्मिन्पात्रे भक्षयितारः— तत्कर्तृकं भवति; कुतः? समवायात् एकपात्रभक्षयितृकर्तृकयो-

१३. एकपात्राणामनु- रेवानुज्ञापनानुज्ञानयोः प्रयोजनेन संयोगात्। तथा हि— एकपात्रस्थः

ज्ञापनाधिकरणम्। सोमः 'समं स्यादश्नुतत्वात्' इति न्यायेन समशो भक्षणीयः; न्यूनाधिकभावस्तु तत्रावर्जनीयः; तन्मर्षणायानुज्ञापनं क्रियते; तस्मादेकपात्रे बहूनां भक्षणे सर्वे भक्षयितारोऽनुज्ञाप्याः। एवं च एकस्मिन्नेव समये नानापात्रेषु बहुभिर्भक्ष्यमाणेषु तथा एकस्मिन्पात्रे एकेनैव भक्ष्यमाणेऽपि नानुज्ञापनमनुज्ञानं चेति स्थितम्। वृत्तमधिकरणम् ॥

ज्योतिष्टोमे सन्ति ऋतुमहाः; तत्र होतृवेदसमाख्याते ऋग्वेदे काचिद्याज्या पठिता— 'अग्निं गृहपतिम्' इत्यादिः; सा तावत्समाख्यया होतारं प्राप्ता; 'अग्निं गृहपतिमिति यजमानस्य याज्या' इति वचनाद्धोतुरपनीता, यजमानं प्राप्ता; 'सोऽभिप्रेष्यति होतरेतद्यज' इति यजमानसंप्रैषात्पुनर्होतारं प्राप्ता, 'स्वयं वा निषद्य यजति' इति वचनात्पुनर्होतुरपनीता पक्षे यजमानेऽवतिष्ठते; निषद्य होतुर्धिष्ण्यस्य पश्चादुपविश्येत्यर्थः; तत्र यदा यजमानप्रेषितो होता याज्यां वदति तदा होतुरेव वषट्कृत्वाद्भक्ष इत्यविवादम्; यदा तु यजमानो याज्यां वदति तदा होतुर्भक्षोऽस्ति नास्तीति संशये, पूर्वपक्षयति—

याज्यापनये नापनीतो भक्षः प्रवरवत् ॥ ४४ ॥

होतुः सकाशाद्याज्याया अपनये सत्यपि भक्षो नापनीतः स्यात्, भक्षनिमित्तस्य वषट्कारस्य होतुः सकाशादपनयाभावात्; न हि वषट्कारो याज्यान्तर्भूतः, 'याज्यायां अधि वषट्करोति'

१४. स्वयं यष्टुः भक्षा- इति वचनात्; प्रवरवत्— यथा होतुः सकाशाद्याज्याया अपनयेऽपि

स्तित्वाधिकरणम्। 'इन्द्रं होत्रात्सजूर्देव आ पृथिव्या असौ मानुषः' इति होतारं वृणीते

इति ऋतुयाज्यार्थवरणलक्षणः प्रवरो नापनीतः, तद्वदृषट्कारस्यान्निमित्तभक्षश्च नापनीतः। सूत्रे भक्षग्रहणं वषट्कारस्याप्युपलक्षणम् ॥

अथ सिद्धान्तयति—

यष्टुर्वा कारणागमात् ॥ ४५ ॥

यष्टुः यजमानस्य याज्याप्रयोक्तुरेव भक्षो भवति; कुतः? कारणागमात् 'याज्याया अधि वषट्करोति' इति वचनेन याज्याप्रयोक्तुरेव वषट्कारस्य आगमात् प्राप्तेः; न च यजमानप्रयुक्ताया याज्याया उपरि होता वषट्करोति— इति युक्तम्, 'संततमृचा वषट्कृत्यम्' इति विरोधात्; न हि पुरुषभेदे याज्यावषट्कारयोः सांतत्यं संभवति; अविच्छिन्नप्रयत्नत्वमेव हि सांतत्यम्; याज्यामात्रं च ब्रुवन्यजमान उपरतप्रयत्नः स्यात्। किं च 'स्वयं यजति' इति यजमानस्य प्रदानार्थकवषट्कारार्थकयाज्याप्रयोक्तृत्वं श्रुतम्, केवलयाज्याप्रयोक्तृत्वे प्रदानार्थकयजेस्तत्र जहत्स्वार्थलक्षणाप्रसङ्गात्। तस्माद्याज्याप्रयोक्तुर्यजमानस्यैव वषट्कारो भक्षश्च ॥

अथ प्रवरवदित्याह—

प्रवृत्तत्वात्प्रवरस्यानपायः ॥ ४६ ॥

'इन्द्रं होत्रात्' इति प्रवरो न केवलमेतद्याज्यार्थः; किं तु तन्त्रेण सकलसौमिकहोत्रीययाज्यार्थतया प्रवृत्तः; अतो याज्यायामस्यां होतुः सकाशादपनीतायां यजमानं प्राप्तायां तदर्थयजमानवरणावश्यंभावेऽपि तदितरसकलयाज्यार्थं होतुरपि वरणस्यावश्यंभावान्न तस्य होतुः सकाशादपनय इति वैषम्यमित्यर्थः। वृत्तमधिकरणम् ॥

ज्योतिष्टोमे श्रूयते— 'यदि राजन्यं वैश्यं वा याजयेत्, स यदि सोमं विभक्षयिषेत्, न्यग्रोधस्तिभिनीराहृत्य ताः संपिष्य दधन्युन्मृज्य तमस्मै भक्षं प्रयच्छेत्, न सोमम्' इति। न्यग्रोधस्तिभिनीः न्यग्रोधफलस्तबकान्, संपिष्य सूक्ष्मं पिष्ट्वा, दधनि उन्मृज्य संकलय्य। स्पष्टमन्यत्। सोऽयं फलचमसः केवलं सोमभक्षप्रत्याम्नायभक्षार्थो यजमानस्य, यागार्थस्तु यजमानसोमचमसः अस्त्येव; उत यजमानचमसस्यैवायं फलचमसः प्रत्याम्नायः, नास्त्येवान्यो यजमानचमसः, तत्स्थाने फलचमसेन यष्टव्यम्— इति संशये, पूर्वपक्षयति—

फलचमसो नैमित्तिको भक्षविकारः श्रुतिसंयोगात् ॥ ४७ ॥

दधिसंसृष्टन्यग्रोधफलपिष्टद्रवपूर्णश्चमसः फलचमसः, स च यजमानस्य राजन्यत्वे वैश्यत्वे च निमित्ते विहितः; भक्षविकारः— भक्षं सोमभक्षणं विकरोति बाधते— इति भक्षविकारः;

१५. पलचमसस्येज्या-विकारताधिकारताधिकरणम्।

सोमभक्षणमात्रे विषये सोमचमसप्रत्याम्नायः, न त्विज्यायामिति यावत्; कुतः? श्रुतिसंयोगात्— 'विभक्षयिषेत्' 'भक्षं प्रयच्छेत्' इति सोमभक्षणकार्यकारित्वश्रवणेन फलचमसस्य संयोगात् यजतेश्च तत्राश्रवणात्; तस्माद्यजमानस्य केवलं सोमभक्षप्रत्याम्नायभक्षणार्थः फलचमसः; इज्यार्थस्तु याजमानः सोमचमसोऽस्त्येव; तस्य तु वषट्कर्तृभक्षणमेव प्रतिपत्तिः॥

अथ सिद्धान्तयति—

इज्याविकारो वा संस्कारस्य तदर्थत्वात् ॥ ४८ ॥

वाशब्दोऽवधारणे। इज्याविषय एवायं फलचमसो यजमानसोमचमसप्रत्याम्नायः; न तु भक्षणमात्रे; कुतः? संस्कारस्य तदर्थत्वात्— भक्षणरूपसंस्कारस्य प्रतिपत्तिविधया यागार्थत्वात्, प्रतिपत्तिरूपभक्षणस्य यागाविनाभूतत्वादिति यावत्; एतेन— यजेरश्रवणाद्यागार्थत्वमेव फलचमसस्यासिद्धम्, येन तस्य यागार्थद्रव्यसंस्काररूपभक्षणसंबन्धाद्यागसाधनत्वमुन्नीयेत— इति निरस्तम्; 'यदि सोमं विभक्षयिषेत्' इति हि यागीयसोमभक्षप्रत्याम्नायत्वं फलचमसभक्षस्यावगतम्; अतस्तथाविधभक्षणसंबन्धाद्यागीयत्वं तस्योन्नेतुं शक्यते; तत्र भक्षसंबन्धादुन्नीतं यागसाधनत्वमेव विधेयम्; तद्विधौ च फलचमसस्य नैमित्तिकतया सोमचमसविकारत्वेन चोदकतो भक्षस्य प्राप्तत्वादनुवाद इति वाक्यभेदः॥

इतोऽप्येवमित्याह—

होमात् ॥ ४९ ॥

'यदन्यांश्चमसाञ्जुह्वत्यथैतस्य दर्भतरुणकेनोपहृत्य जुहोति' इति होमानुवादाद्यागो गम्यते, होमस्य यागाविनाभावात्। ननु 'स्वयं वा निषद्य यजति' इति वषट्कारनिमित्तो यजमानस्य ऋतुग्रहभक्षोऽस्तीति पूर्वाधिकरणे स्थितम्; ततश्च तद्यागसाधनत्वमपि न्यग्रोधक्षिभिनीनां कुतो न स्यादित्यत्राप्येतदेव सूत्रमुत्तरम्— 'हु दानादनयोः' इति हुधातुर्भक्षणेऽपि वर्तते; ततश्च 'होमात्' इति सूत्रस्य ऋतुग्रहपात्रे बहूनां भक्षणमित्यर्थः; एकमेव हि ऋतुग्रहपात्रमध्वर्युप्रतिग्रस्तातारौ होत्रादयश्च भक्षयन्ति; तेषां च सोम एव भक्षः; एवं च भूयोनुग्रहन्यायाद्यजमानस्यापि तत्र सोमभक्ष एव युज्यत इति न तत्र क्षिभिनीनां यागसाधनत्वम्॥

इतोऽपि फलचमसो यागविषये सोमचमसप्रत्याम्नाय इत्याह—

चमसैश्च तुल्यकालत्वात् ॥ ५० ॥

'यदान्यांश्चमसानुन्नयत्यथैतं चमसमुन्नयति' इति यागीयचमसान्तरैः सह फलचमसस्योन्नयनमेककालकं श्रुतम्; अतोऽपि तस्य यागसाधनत्वमनुमिमीमहे, चमसमात्रविषयत्वं च।

इतोऽप्येवमित्याह—

लिङ्गदर्शनाच्च ॥ ५१ ॥

पूर्वपक्षे तावद्भक्षणमिदं न फलचमससंस्कारः, भूतभाव्युपयोगाभावात्; अतः सक्तुहोमवदारादुपकारकमेवेदं फलचमसभक्षणं वाच्यम्, सोमभक्षणं तु कृतयागकार्यसोमप्रतिपत्त्यर्थम्; अतो भिन्नकार्यत्वान्न फलचमसः सोमभक्षं निवर्तयेत्; ततश्च 'न सोमम्' इत्यनुवादो नावकल्पेत। न च 'न सोमम्' इति नानुवादः, किं तु प्रतिषेधविधिरेवायमिति वाच्यम्; फलचमसभक्षस्य सोमभक्षप्रतिषेधस्य च विधौ वाक्यभेदात्, अनेकादृष्टकल्पनापाताच्च। सिद्धान्ते तु फलचमसस्य यागसाधनत्वात्तस्य च सोमचमसविकारत्वाद्यजमानचमसयागप्रयुक्तं भक्षणं तस्यैव प्राप्तम्, न तु सोमस्य, चमसे सोमस्योन्नयनाभावात्। ततश्च 'न सोमम्' इत्यनुवादादपि लिङ्गात्फलचमस इत्याधिकारः। वृत्तमधिकरणम् ॥

अस्ति राजसूये दशपेयो नाम सोमः। तत्र श्रूयते—'शतं ब्राह्मणाः सोमान्भक्षयन्ति'; 'दश दशैकैकं चमसमनुप्रसर्पेयुः' इति;— भक्षार्थं गच्छेयुरित्यर्थः। तत्र किं यजमानचमसोऽपि ब्राह्मणैरेव दशभिर्भक्षयितव्यः? उत राजन्यैरिति संशये, पूर्वपक्षयति—

अनुप्रसर्पिषु सामान्यात् ॥ ५२ ॥

'अनुप्रसर्पेयुः' इति विहितभक्षयितृषु मध्ये राजन्या एव यजमानस्य चमसं भक्षयेयुः; कुतः? सामान्यात्—'राजा राजसूयेन यजेत' इति यजमानस्य राजन्यत्वं प्राप्तम्; एकत्वं तु चोदकतः प्राप्तम्; तत्र दशत्वं विधीयमानं तुल्यजातीयत्वादेकत्वमेव बाधते, न तु जातिमपि; ततश्चानिवृत्तराजन्यजातिरेव यजमानचमसो दशत्वसंख्यया युज्यत इति दश राजन्यास्तं भक्षयेयुः; 'शतं ब्राह्मणाः' इति ब्राह्मणशब्दस्तु च्छत्रिन्यायेन राजन्येष्वपि लाक्षणिकः; अनुवादत्वाच्च लक्षणा न दुष्यति; 'शतं ब्राह्मणाः' इति हि 'दश दशैकैकं चमसम्' इति विधिलभ्यसमस्तसंख्यानुवादः। न च 'शतं ब्राह्मणाः' इत्येव विधिः, ततश्च 'समं स्यादश्रुतत्वात्' इति न्यायेन प्रतिचमसं दशसंख्याप्राप्तेः 'दश दश—' इति वाक्यमेवानुवादः किं न स्यादिति वाच्यम्; 'अनुप्रसर्पेयुः' इति विधिप्रत्ययश्रवणेन 'दश दश—' इति वाक्यस्यैव विधित्वात्, 'पिबन्ति' इति वर्तमानापदेशेन 'शतं ब्राह्मणाः' इत्यस्यानुवादत्वात्। तत्र चमसमिस्युद्दिश्य दशेति

१६. ब्राह्मणानामेव राजन्यचमसानुसर्पाधिकरणम्।

विधीयते; अनुप्रसर्पणमनूद्यते; अतश्चमसविशिष्टानुसर्पणस्योद्देश्यत्वाभावात् न विशिष्टानुवाददोषः; तथा च प्रत्युद्देश्यं वाक्यपरिसमाप्तिन्यायेन प्राप्तार्थत्वात् 'दश दश' इति वीप्सा, 'एकैकम्' इति चानुवादः इति नानेकविधिप्रयुक्तवाक्यभेदः; तस्मादिह राजन्या एव यजमानचमसं भक्षयेयुः ।

अथ सिद्धान्तयति——

ब्राह्मणा वा तुल्यशब्दत्वात् ॥ ५३ ॥

वाशब्दोऽवधारणे । यजमानचमसमपि ब्राह्मणा एव भक्षयेयुः; कुतः? तुल्यशब्दत्वात्—— 'शतं ब्राह्मणाः पिबन्ति' इति लटो लेडर्थकल्पनया 'अनुप्रसर्पेयुः' इति लिङ्प्रत्ययान्तेन तुल्यशब्दत्वात् 'समिधो यजति' इत्यादिवद्विधायकत्वादिति यावत् । तत्र 'दश दश' इति विधिलब्धां शतसंख्यामनूद्य 'ब्राह्मणाः' इति तदाश्रयविधिः; ततश्च यजमानचमसे राजन्यजातिर्निवर्तते; सोममिति भक्षयतीति चार्थप्राप्तमिति न विशिष्टोद्देशः; दशैकैकं चमसम्—— इत्येवं ये सोमस्य भक्षयितारस्ते ब्राह्मणाः—— इति वचनव्यक्तिः; 'दश दशैकैकं चमसम्' इति दशत्वसंख्याविधिः, एकैकमित्यादिरनुवादः—— इत्युक्तमेव । एवं च उभयोरपि वाक्ययोर्विधायकत्वादर्थवत्त्वं लभ्यते; ब्राह्मणशब्दे च लक्षणा नाश्रिता भवति; 'शतं ब्राह्मणाः' इति च कृत्स्नमेव वाक्यमनुवादकं चेदनर्थकमेव स्यात् । एवं च दश ब्राह्मणा एव यजमानचमसं भक्षयेयुः; तेनैव च नैराकाङ्क्ष्याद्न यजमानभक्षः; प्रकृतावब्राह्मणस्य सोमभक्षप्रतिषेधाच्च । वृत्तमधिकरणम् ॥

इति तृतीयाध्याये पञ्चमः पादः ॥



॥ षष्ठः पादः ॥

निर्मथ्य निगमसिन्धून्विविधन्यायाभिधानमन्थानैः ।
धर्मसुधामुद्धरते भूयो मुनये नमोऽस्तु जैमिनये ॥

अनारभ्याधीतहिरण्यभरणजयहोमाश्वप्रतिग्रहेष्टिपानव्यापद्विचारे प्रस्तुते, तत्र सोमवमनप्रसङ्गागतहविःशेषविचारे च वृत्ते सति, षष्ठे पादेऽस्मिन् स एवानारभ्यविचारः प्रा- १. स्रुवादिषु खादिरतादि- धान्येन प्रस्तूयते । 'यस्य खादिरः स्रुवो भवति' 'यस्य पर्ण- विषेः प्रकृतिगामिताधि- मयी जुहूर्भवति' इत्याद्यनारभ्याम्नानं प्रकृतिविकृतिसाधारणम्, प्रकृ- करणम् । तिमात्रविषयं वेति संशये, पूर्वपक्षयति—

सर्वार्थमप्रकरणात् ॥ १ ॥

खादिरत्वाद्याम्नानं सर्वार्थं प्रकृतिविकृत्यर्थम् ; कुतः, अप्रकरणात् प्रकरणविशेषाभावात् ॥

अथ सिद्धान्तयति—

प्रकृतौ वा द्विरुक्तत्वात् ॥ २ ॥

अनारभ्याम्नानं प्रकृतिविषयमेव न तु विकृतिविषयमपि ; कुतः, द्विरुक्तत्वात् प्रकृतिमात्रोपदिष्टस्य खादिरत्वादेरौदकतो विकृतिष्वपि प्राप्तिसंभवेन तत्र पुनरुपदेशे द्विरुक्तत्वापातात् ॥

अथ पूर्वपक्षी प्रत्यवतिष्ठते—

तद्वर्जं तु वचनप्राप्तेः ॥ ३ ॥

तुः-प्रत्यवस्थाने ; अनारभ्याम्नानं विकृत्यर्थमप्यस्तु ; न च द्विरुक्तिदोषः — हि यतः तद्वर्जम् अनारभ्यविहितवर्जम्, प्रकरणाम्नातं प्रयाजादिकमेव चोदकः प्रापयति ; कुतः, वचनप्राप्तेः प्रत्यक्षस्यानारभ्यवचनस्यानुमानिकाविदेशप्रवृत्तेः प्रागेव विकृतिषु प्राप्तत्वेन तत्रातिदेशप्रवृत्तेरनारभ्यविहितव्यतिरिक्तविषयत्वाद्वृथ्यभावात् ॥

नन्वेवं सति विकृतिषु प्रत्यक्षानारभ्यविहितैरेवोपकाराकाङ्क्षाशान्तौ तत्र प्रयाजादयो न

प्राप्नुयुः; ततश्च सौर्येष्टौ "प्रयाजेप्रयाजे कृष्णलं जुहोति" इति प्रयाजानुवादो नोपपद्येत; अतः प्रकृत्यर्थ एवानारभ्यवादः—

इति सिद्धान्तितं प्रत्यवतिष्ठमानं पूर्वपक्षी निराचष्टे—

दर्शनादिति चेन्न चोदनैकार्थ्यात् ॥ ४ ॥

क्वचिद्विकृतौ प्रयाजानुवाददर्शनात् प्रकृत्यर्थोऽनारभ्यवाद इति चेत्, तन्न; कुतः, चोदनैकार्थ्यात्— अनारभ्यवादेन प्राकरणिकविधिभिश्च चोद्यन्ते प्रत्यक्षमुपदिश्यन्त इति चोदनाः स्रादिरत्वादयः प्रयाजादयश्च, तदुभयेषाम् ऐकार्थ्यात् भिन्नकार्यत्वात्; एकशब्दोऽन्यपर्यायः; "एके मुख्यान्यकेवला" इति कोशः; एककार्यत्वे सत्येव वैकृतैरङ्गैः प्राकृताङ्गानि बाध्यन्ते, यथा शरैः कुशादयः; न तु भिन्नकार्यत्वेऽपि; अन्यथा आमनहोमादिभिरपि वैकृतैरङ्गैः प्राकृतानि प्रयाजाद्यङ्गानि बाध्येरन्; तथा च सौर्येष्टौ प्रयाजदर्शनस्य न विरोधः। यद्वा— अनारभ्यविहितैश्चोदकप्राप्ता न बाध्यन्ते; कुतः, चोदनाया अनारभ्यविधेः, ऐकार्थ्यात् एकविधेयकत्वात्, स्रादिरादिवाक्येषु प्राप्तस्रुवाद्युद्देशेन स्रादिरत्वादि विधीयते, न तु स्रुवाद्यपि, वाक्यभेदप्रसङ्गात्; स्रुवादि च प्रकृतावुपदिष्टम्, न तु विकृतिषु; अनारभ्यवादश्च प्रकृतिविकृतिसाधारण्येन स्रुवाद्युद्दिश्य स्रादिरत्वादि प्रत्यक्षमुपदिशन्, विकृतिषु स्रुवाद्यपश्यन्, तत्प्राप्तेरतिदेशाधीनत्वादुद्देश्यस्रुवादिविषये अतिदेशमनुमन्यमान एकदेशानुमत्या सर्वाङ्गविषयमतिदेशमनुमन्यत इति— न सौर्येष्टौ प्रयाजादिदर्शनविरोधः; स च सर्वाङ्गविषयमतिदेशमनुमन्यमानो विकृतिषु स्वप्रवृत्तेर्द्विरुक्तिदोषं पर्यालोच्य स्वविधेयस्रादिरत्वादिव्यतिरिक्तसर्वाङ्गविषयमेव चोदकमनुमन्यत इति न द्विरुक्तिदोषोऽपि; तस्मात् सर्वार्थोऽनारभ्यवादः ॥

ननु स्रुवादीनां प्रकृतावेव प्रत्यक्षोपदेशः विकृतिषु तु अतिदेशतः तत्प्राप्तिः अतः क्षीप्रप्रवृत्तिकस्रुवादिद्वारा प्रकृतावन्वय एव स्रादिरत्वादीनां न्याय्य इति पुनः प्रत्यवतिष्ठमानं सिद्धान्तिनं पूर्वपक्षी निराचष्टे—

उत्पत्तिरिति चेन्न तुल्यत्वात् ॥ ५ ॥

प्रकृतावेव उत्पत्तिः प्रत्यक्षोपदेशः स्रुवादीनाम्; अतस्तद्द्वारा प्रकृतावेवान्वयोऽनारभ्यवादस्येति चेत्, न, कुतः, तुल्यत्वात्—स्रादिरत्वादिविधौ हि स्रुवादिप्राप्तिरपेक्षिता, तत्क्षीप्रत्वं त्वकिंचित्करम्; अन्यथा प्रकृतावपि तन्निवेशो न स्यात्, कदाचित् कस्यचित् दुष्टत्व प्रकृतिस्थानां बन्धिस्रुवादीनामपि क्षतिस्युपलिप्यभावसंभवात्; तेन च या औपदेशिकी या अतिदेशिकी वा स्रुवादिप्राप्तिः सा सर्वापि प्राप्तित्वेन रूपेण तुल्या। अतस्तदनुरोधेन विधीयमानं स्रादिरत्वादिकं

सर्वार्थमेव; तथा च यथा सर्वपदार्थगोचरस्यापि चोदकस्य प्रत्याम्नातप्रतिषिद्धलुप्तद्वारान् पदार्थान्वर्जयित्वा पर्यवसानं तथा प्रत्यक्षाम्नातखादिरत्वादिकमपि वर्जयित्वा पर्यवसानसंभवान्न द्विरुक्तिदोषः । तदेवम् 'तद्वर्जं तु वचनप्राप्तेः' इति पूर्वपक्षः स्थितः ॥

अथ सिद्धान्ती प्रत्याचष्टे—

चोदकार्थकात्स्न्र्यात्तु मुख्यस्य विप्रतिषेधात् प्रकृत्यर्थः ॥ ६ ॥

तुरवधारणे । प्रकृत्यर्थ एवानारभ्यवादः, न तु विकृत्यर्थोऽपि, द्विरुक्तिदोषप्रसङ्गात् । यत्तु 'तद्वर्जं तु वचनप्राप्तेः' इति तत्राह— चोदकार्थकात्स्न्र्यादिति । विकृतिषु चोदकतः प्राप्तव्यः उपकारः चोदकार्थः, तस्य कात्स्न्र्यात् कृत्स्नपदार्थविशिष्टाखण्डोपकारूपत्वात् । न हि प्रतिपदार्थं चोदको भिद्यते, येनानारभ्यविहितव्यतिरिक्तपदार्थेष्वेव चोदकाश्रयणात्तद्वर्जं प्राप्नियुज्येत । नैवमस्ति, तत्तत्पदार्थसाध्यदृष्टादृष्टावान्तरव्यापारनिचयात्मकाखण्डोपकारस्यातिदेश इति दशमे वक्ष्यमाणत्वात् । न चैवमपि पदार्थानां प्रत्येकमुपकारविशेषणतया चोदकस्य कतिपयपदार्थवर्जं प्रवृत्तिः संभवतीति वाच्यम्, समुचितानामेव पदार्थानामुपकारविशेषणत्वस्य वक्ष्यमाणत्वात् । ततश्चानारभ्यविहितवर्जं चोदकः प्रापयतीत्यनुपपन्नम् । यदप्युक्तम्— चोदकप्रवृत्तेः प्रागेव प्रत्यक्षमनारभ्यवचनं प्रवर्तत इति तदप्यसिद्धमित्याह— मुख्यस्य विप्रतिषेधादिति । मुख्यस्य प्रथमप्रमाणप्रत्यक्षगोचरानारभ्यवादस्य विप्रतिषेधात् अतिदेशप्रवृत्तेः प्राक्प्रवृत्तिविरोधात् । प्रत्यक्षानुमानयोर्हि शीघ्रमन्थरप्रवृत्तिकृतं बलाबलम्; इह च प्रत्यक्षस्याप्यनारभ्यवादस्य स्रुवादिप्राप्तिसापेक्षत्वान्न शीघ्रं प्रवृत्तिः, किं तु स्रुवादिप्राप्तिमुपजीव्यैव प्रवृत्तिरिति अनुमानस्यैव शीघ्रं प्रवृत्तिः; ततश्च प्रत्यक्षाप्यनारभ्यवादस्य चोदकबाधकत्वासंभवात् न प्रत्याम्नानप्रतिषेधद्वारलोपस्थल इव चोदकस्य तद्व्यतिरिक्तपदार्थेषु पर्यवसानम्; एवं च यस्यानारभ्यवादस्यातिदेशिकपदार्थानपेक्षत्वम्, तत्र प्रत्यक्षस्य तस्य शीघ्रप्रवृत्तेः प्रकृतिविकृतिसाधारण्यमेव— यथा 'अग्निष्टोमे प्रवृणक्ति' इत्यादौ; न हि तत्र विकृत्यग्निष्टोमस्यातिदेशिकतास्ति; एवं च चोदकत एव खादिरत्वादीनां विकृतिषु प्रवृत्तिसंभवात् अनारभ्यवादस्य विकृतिसाधारण्ये द्विरुक्तिदोषप्रसङ्गात् प्रकृतिमात्रविषयत्वमेवाश्रयणीयम् ॥

प्रयोजनम्— पूर्वपक्षे अनारभ्यविहितपदार्थाश्रितगुणकामानां विकृतिषु प्रवृत्तिः, सिद्धान्ते तु अप्रवृत्तिरिति ॥ वृत्तमधिकरणम् ॥

'पञ्चदश स्रामिधेनीरनुब्रूयात्' इत्यनारभ्यवादः प्रकृतौ निविशते, उत विकृतिष्वेवेति संशयः । पूर्वाधिकरणन्यायात् प्रकृतिविषयत्वम्; न च 'पञ्चदश स्रामिधेनीरनुब्रूयात्' इति

प्रकरणविहितपाञ्चदृश्यविरोध इति वाच्यम्, अत एव विकल्पसंभवात्। ननु पाञ्चदृश्यं प्रकरणोपस्थापितदर्शपूर्णमासात्मककृतुविशेषसंबन्धिनया विहितत्वात् प्रबलम्, साप्तदृश्यं तु कर्त्तव्यभिचरितसामिधेन्युपस्थितकृतुसामान्यसंबन्धितया विहितत्वाद्दुर्बलमित्युल्यबलत्वान्न विकल्पसंभवः किं तु विशेषविहितपाञ्चदृश्येन साप्तदृश्यस्य बाध एवोचित इति चेत्, सत्यम्— पाञ्चदृश्यवाक्यमपि साप्तदृश्यवाक्यवत् शब्दमर्यादया पाञ्चदृश्यस्य सामिधेनीमुखेन क्रतुसामान्यसंबन्धमेव बोधयति; तस्य दर्शपूर्णमासात्मककृतुविशेषसंबन्धस्तु प्रकरणाल्लभ्यते; प्रकरणं च वाक्यादुर्बलम्; ततश्च विशेषस्य तुल्यप्रमाणकत्वाभावात् न सामान्यबाधकत्वम्; ततश्च यावत् प्रकरणं व्याप्रियते, ततः प्रागेव शाब्दमर्यादया तुल्यबलेन वाक्यद्वयेन विकल्पेऽवधारिते सति पश्चादुन्मिषदपि प्रकरणं दुर्बलत्वान्नानुसर्तव्यम्; तस्मात्प्रकृतौ पाञ्चदृश्येन साप्तदृश्यस्य विकल्प इति प्राप्ते—

सिद्धान्तयति—

प्रकरणविशेषात्तु विकृतौ तद्विरोधि स्यात् ॥ ७ ॥

तुरवधारणे। साप्तदृश्यवादः विकृतिष्वेव स्यात्, न तु प्रकृतौ; यतः प्रकृतौ साप्तदृश्यं तेन पाञ्चदृश्येन विरुध्यते। न च विकल्पः। कुतः, प्रकरणविशेषात्— पाञ्चदृश्यस्य प्रकरण

२. सामिधेनीनां सप्त- दशसंख्याया विकृतिगामिताधिकरणम्।

कृतवैलक्षण्यात्। तथाहि— पाञ्चदृश्यसाप्तदृश्ययोः शाब्दमर्यादया स्वरूपेण सामिधेनीसंबन्धस्यावगम्यमानस्य आनर्थक्यापत्त्या नावमिकाद्याधिकरणन्यायेन सामिधेनीशब्देनापूर्वसाधनतापन्नसामिधेनीर्लक्षयित्वा अपूर्वसाधनत्वरूपेण तयोः सामिधेनीसंबन्धो वाच्यः; अपूर्वसाधनरूपलक्षणा च पाञ्चदृश्यवाक्ये झटिति प्रवर्तते, प्रकरणबलात्; साप्तदृश्यवाक्ये तु अपेक्षितापूर्वसाधनरूपस्य झटित्युपस्थापकप्रमाणाभावात् सामिधेनीशब्देन तदुपस्थितेः तल्लक्षणा न शीघ्रं प्रवर्तते, ततश्च बलवता पाञ्चदृश्येन प्रकृतौ बाधितत्वाद्विकृतिष्वेव साप्तदृश्यं निविशते ॥ वृत्तमधिकरणम् ॥

दर्शपूर्णमासयोः श्रूयते—'पञ्चदश सामिधेनीरन्वाह' 'साप्तदशानुब्रूयाद्वैश्यस्य' इति। तदिदं साप्तदृश्यं विकृतिषु, प्रकृतौ वेति संशयः। तत्र प्रकृतेः पाञ्चदृश्यावरुद्धत्वात् साप्तदृश्यस्य अनारभ्यविहितसाप्तदृश्यवत् विकृतिष्वुत्कर्षः। न च विनिगमनाविरहः, ब्राह्मणकर्तृकप्रकृतिप्रयोगे साप्तदृश्यस्याप्रवृत्त्या तत्र निर्बाधस्यास्य पाञ्चदृश्यस्य लघ्वात्मकतायाः एव विनिगमकत्वात्। अथ वा द्वयोरप्यनयोः पाञ्चदृश्यसाप्तदृश्यवाक्ययोः प्रकरणाधीतत्वेन पूर्ववत् सामिधेनीशब्दे लक्षणाप्रवृत्तौ शैघ्र्यमान्यकृतविशेषाभावात् प्रकृतौ पाञ्चदृश्यसाप्तदृश्ययोः विकल्पः इति प्राप्ते—

सिद्धान्तयति—

नैमित्तिकं तु प्रकृतौ तद्विकारः संयोगविशेषात् ॥ ८ ॥

तुर्वैषम्ये। प्रकृतेः पाञ्चादृश्यावरुद्धत्वादनारभ्यविहितं साप्रदृश्यं विकृतावेव निविशत इति युक्तम्; इदं तु नैमित्तिकं वैश्यत्वनिमित्तकं साप्रदृश्यम्, प्रकृतौ, तद्विकारः तस्य

३. नैमित्तिकसाप्रदृश्यस्य प्रकृतिगामिताधिकरणम्।

पाञ्चादृश्यस्य विकारः प्रत्यवायाय बाधकं सत्, निविशते। कुतः। संयोगविशेषात् पाञ्चादृश्यसाप्रदृश्ययोः नित्यनैमित्तिकसंयोगभेदात्। पाञ्चादृश्यविधिस्तावत् प्रकरणाविशेषात् दर्शपूर्णमासप्रयोगसामान्यविषयः; स च विशेषविषयत्वं विनानुष्ठानपर्यवसानाभावात् सामान्यमुखेन तत्तत्प्रयोगविशेषान् लक्षयित्वा पर्यवस्यति; यावच्च लक्षणया वैश्यकर्तृकप्रयोगविषयीभवितुमुत्सृजेत्, ततः प्रागेव विशिष्य वैश्यशब्देन विधीयमानं साप्रदृश्यं वैश्यकर्तृकप्रयोगे प्रवर्तत इति बलवद्भवति। तथा नित्यस्य निमित्तानपेक्षतया पूर्वमेव प्रवृत्तिः; नैमित्तिकस्य तु निमित्तानुसंधानसापेक्षतया पश्चात्प्रवृत्तिः; तत्र नित्यस्य प्रवृत्तिवेलायां नैमित्तिकस्यासंजाततया नैमित्तिकमबाधित्वैव प्रवृत्तिः, नैमित्तिकं तु नित्ये प्रतिपन्ने उत्पन्ने सति तद्विज्ञानावस्थायामेवोत्पत्तुमुद्यच्छत् न नित्यमबाधित्वा उत्पत्तुमर्हति; ततश्च—'पूर्वं परमजातत्वादबाधित्वैव जायते। परस्यानन्तरोत्पादात् पूर्वाबाधे न संभवः' इत्यपच्छेदाधिकरणन्यायेन नैमित्तिकं साप्रदृश्यं पश्चादुत्पन्नमेव बलवत्। तथा पाञ्चादृश्यं ब्राह्मणराजन्यविषये सावकाशम्; साप्रदृश्यं तु वैश्यादन्यत्र निरवकाशमिति तदेव बलवत् तस्मात्प्रकृतावेव वैश्यप्रयोगे पाञ्चादृश्यं बाधित्वा साप्रदृश्यं निविशते, अनुपदिष्टसाप्रदृश्यास्वपि विकृतिषु वैश्यस्य प्रकृतिवत्साप्रदृश्यमेव, न तु पाञ्चादृश्यमपि। तदेवं सूत्रगतनैमित्तिकपदानुसारेण नैमित्तिकसाप्रदृश्यविषयमिदमधिकरणमुपवर्णितं भवत्ये ॥

वार्तिके तु 'चमसेनापः प्रणयेत्' 'गोदोहनेन पशुकामस्य' इति काम्यविषयभेदमधिकरणं वर्णितम्। युक्तं चैतत्, नैमित्तिकसाप्रदृश्यस्य प्रकरणाज्ञानानर्थक्येन विकृतौ तदुत्कर्षपूर्वपक्षस्य सावकाशनिरवकाशादिस्थले विकल्पाप्रसक्त्या विकल्पपूर्वपक्षस्य चातिमन्दत्वात्। काम्योदाहरणे तु पूर्वपक्ष एवमुन्मिषति। प्रकृतिप्रयोगस्य सर्वस्यापि चमसेनावरुद्धत्वात् काम्यं गोदोहनं विकृतावर्थवदुत्कृष्यते। न च सामान्यविशेषविहितत्वाद्युक्तहेतुत्रयेण काम्यगोदोहनेन नित्यश्चमसो बाध्यतामिति वाच्यम्; नित्यपाञ्चादृश्यनैमित्तिकसाप्रदृश्ययोः क्रतूपकारलक्षणकार्यैक्यादस्ति विरोध इति बाध्यबाधकभावो युज्यते, इह तु चमसः क्रत्वर्थः गोदोहनं तु पश्वर्थमिति भिन्नाविषयतया विरोधाभावान्न चमसस्य गोदोहनेन बाधो युज्यते। अथापि यदि बाध्येत, तर्हि क्रतोर्विगुणत्वात्तदाश्रितगोदोहनात् कथं फलं स्यात्; ततश्च 'पशवो मधुबिन्दुं तु जीर्णशाखाधिरोहणात्। मन्दबुद्धेः

रवश्यं तु विनिपातस्तस्तो भवेत्' इति न्यायः आश्रितः स्यात्। अतो विकृतिरेव गोदोहनस्य गतिः। यदि तु विकृतावपि चमसबाधे क्रतुवैगुण्यात्तत्रापि गोदोहनस्य न निवेशसंभवः, तर्हि लौकिकमेवापां प्रणयनं गोदोहनस्य गतिरस्तु, 'आयुष्यं प्राङ्मुखो भुङ्क्ते यशस्यं दक्षिणामुखः' इत्यादौ लौकिकभोजनाद्याश्रितादपि गुणात् फलदर्शनात्। यद्वा फलाय गुणविधिबलात् गुणफललाभार्थमपांप्रणयनस्याश्रयेण आक्षिप्यते—— यथा ऐन्द्रवायवग्रहे मित्रावरुणादिदेवतान्तरनिवेशासंभवात् मित्रावरुणादिदेवत्यग्रहयागाभ्यामान्तरम् 'मैत्रावरुणं गृह्णाति' इत्यादिविधिबलादाक्षिप्यते तद्वत्। एवं च क्रत्वर्थं चमसेनापः प्रणीय पश्वर्थं गोदोहनेनापः प्रणेतव्याः। तदेवं पूर्वपक्षद्वये, प्राप्ते, सिद्धान्तः——

नैमित्तिकं तु प्रकृतौ तद्विकारः संयोगविशेषादिति— अत्र नैमित्तिकमित्यनेन कादाचित्कतया काम्यं गोदोहनं विवक्षितम्। प्रकृतौ, तद्विकारः— तं चमसं विकरोति बाधते नित्यानित्यसंयोगकृतवैलक्षण्यादित्यर्थः तत्र बाध्यबाधकभावे त्रयो हेतवः पूर्वमुक्ताः, ते अत्राप्यनुसंधातव्याः। किं च काम्यं गोदोहनं फलस्य प्रत्यासन्नं शीघ्रं प्रयुज्यते, तस्य क्रतूपकारद्वारा फलोपयोगात्; ततश्च पुरुषार्थप्रत्यासन्नत्वाद्गोदोहनं बलवत्; तेन चमसस्य बाधः। ननु भिन्नविषयत्वात्कथं बाध्यबाधकभाव इत्यत्राप्येतदेवोत्तरम्— संयोगविशेषादिति। चमसो गोदोहनं च येन द्वारेण संयुज्यते, तद्विशेषात् प्रणयनरूपद्वारविशेषस्य एकत्वादिति यावत्। सत्यपि कार्यभेदे द्वाराभेदादस्ति विरोधः। ततश्च पशुकामप्रयोगादन्यस्मिन् प्रकृतिप्रयोगे चमसः प्रणयनं साधयति; पशुकामप्रयोगे तु गोदोहनेन चमसो बाध्यते; बाधितत्वादेव चमसस्य नास्ति पशुकामप्रकृतिप्रयोगे चमसाभावकृतं वैगुण्यम्, पशुकामप्रयोगवेलायां चमसस्य बाधितत्वेनानङ्गत्वात्—— यथा कृष्णलेष्ववघातस्य बाधितत्वात्तदभावकृतं न वैगुण्यं तद्वत् ॥ वृत्तमधिकरणम् ॥

'अग्नीनादधीत' 'अग्नये पवमानाय पुरोडाशमष्टाकपालं निर्वपेदग्नये पावकायाग्नये शुचये' इति श्रुतम्। तत्राग्न्याधेयं पवमानेष्ट्यङ्गं न वेति संशये, पूर्वपक्षयति——

इष्ट्यर्थमग्न्याधेयं प्रकरणात् ॥ ९ ॥

पवमानेष्ट्यर्थमग्न्याधेयम्। कुतः, प्रकरणात्। ननु नास्ति पवमानहविषां प्रकरणम्, फलाश्रवणात्; कथमिदं फलमनेन कर्तव्यमित्याकाङ्क्षैव हि प्रकरणम्; किं च फलवत्संनिधावफलं

४. आधानस्य पवमानेऽतदङ्गम्; आधानं च 'अग्नीन्' इति स्ववाक्यगतद्वितीयानिर्दिष्टाग्निभिरेव ष्ट्यनङ्गताधिकरणम्। फलवदिति कथं तस्य पवमानेष्ट्यङ्गता; प्रत्युत पवमानेष्टीनामेवाफलत्वात् फलवदाधानाङ्गत्वमुचितमिति चेत्, सत्यम—— पवमानेष्टीनामस्ति प्रकरणम्, तत्र विश्वजिन्न्यायेन

फलकल्पनात्, रात्रिसत्रन्यायेन 'पुनात्येवैनम्' इत्यर्थवादिकफलकल्पनाद्वा । आधानस्य तु नाग्नयः फलम्, तेषां स्वतोऽपुरुषार्थत्वात् । ततश्च यथा द्वितीयाश्रुत्या प्रोक्षणादीनां व्रीहिमात्रार्थत्वावगमेऽपि प्रकरणादर्शपूर्णमासापूर्वीयव्रीह्यर्थत्वम्, एवमाधानस्यापि प्रकरणात् पवमानेष्ट्यपूर्वीयाग्निसंस्कारकत्वम् । सन्ति हि पवमानेष्टिष्वपि अतिदेशप्राप्ता अग्नयः । तथा च द्वितीयाश्रुतिसहितात् प्रकरणादतिदेशप्राप्ताग्निसंस्कारद्वारा पवमानेष्ट्यङ्गमाधानम् ॥

अथ सिद्धान्तयति—

न वा तासां तदर्थत्वात् ॥ १० ॥

वा-शब्द एवार्थे । नैवाग्न्याधेयं पवमानेष्ट्यङ्गम् । कुतः । तासां पवमानेष्टीनां तदर्थत्वात् । आधानं हि द्वितीयावगतसाध्यताकाग्न्यर्थमेव अग्नीनां स्वतः पुरुषार्थत्वाभावेऽपि फलवदग्निहोत्राद्यर्थतया पश्वादिवत् फलत्वोपपत्तेः । पवमानेष्टयोऽप्याधानवदग्न्यर्था एव । तासां संनिधौ हि 'यदाहवनीये जुहुति' इत्यादिवाक्यानि श्रूयन्ते ; तत्र हि पवमानेष्टिषु होमाधारतया आहवनीयादीनां विधानं न संभवति, पवमानेष्टिदशायामाहवनीयादिस्वरूपनिष्पत्त्यभावात् ; न चाधानमात्रात् तत्स्वरूपनिष्पत्तिः शक्या, तथा सति तदुत्पन्नानामाहवनीयादीनाम् 'यदाहवनीये जुहुति' इत्याद्यनारभ्याधीतवाक्यान्तरैः प्रकृतिभूतदर्शपूर्णमासौ प्राप्तानां चोदकत एव पवमानेष्टिष्वपि प्राप्तिसंभवेन तत्संनिधौ 'यदाहवनीये जुहुति' इत्यादिपुनराम्नानानर्थक्यापातात् । तस्मात् पवमानेष्टिसंनिधावाम्नातेषु 'यदाहवनीये जुहुति' इत्यादिवाक्येषु सप्तम्या द्वितीयार्थलक्षकत्वम् जुहोतेश्च होमसंयुक्तपवमानेष्टिलक्षकत्वमाश्रित्य 'पवमानेष्टिभिराहवनीयाद्यग्नीन्कुर्यात्' इत्येवं पवमानेष्टीनामग्न्यर्थत्वं विधीयते । एवं च पवमानेष्टिषु विश्वजिदाद्यन्यायेन फलकल्पनाक्लेशोऽपि न कर्तव्यः । ततश्च आधानवत्पवमानेष्टीनामप्यग्न्यर्थत्वात् 'गुणानां च परार्थत्वात्' इति न्यायेनाधानस्य न पवमानेष्ट्यङ्गत्वमिति भाष्यानुयायी पन्थाः ॥

पवमानेष्टिसंनिधौ 'यदाहवनीये जुहुति' इत्यादिवाक्यान्तराणि न सन्त्येवेति वार्तिकमते तु सूत्रमेवं योजनीयम्— नैवाधानं पवमानेष्ट्यङ्गम्, पवमानेष्टीनामाधानार्थत्वात् इति । आधानं हि स्ववाक्यश्रुताग्निभिः फलवत्; तत्संनिध्याम्नानात् पवमानेष्टयः अश्रुतफलास्तदङ्गमिति युज्यते; पवमानेष्टिषु विश्वजिक्न्यायेन रात्रिसत्रन्यायेन वा फलं कल्पयित्वा तत्प्रकरणपठितमग्न्याधेयं तदङ्गमिति कल्पनायाः क्लिष्टत्वात् । अस्मिन् व्याख्याने तदर्थत्वादित्येतत्समञ्जसं भवति; तच्छब्दस्य पूर्वसूत्रोपात्ताग्न्याधेयपरामर्शितायाः उचितत्वात् । अग्न्यर्थत्वादिति व्याख्यानस्य च क्लिष्टत्वात् तासां साक्षादग्न्यर्थत्वे प्रमाणाभावाच्च । तत्संनिधौ 'यदाहवनीये जुहुति' इत्यादिवाक्यान्तराणि तु गगनकुसुमकल्पानि । सन्तु वा तानि, तथापि आधानाङ्गभूतपवमानेष्टिहोमेषु

आहवनीयादिप्रापकाण्येव तानि स्युः। न चानारभ्याधीतयदाहवनीयादिवाक्यान्तरतस्तत्प्राप्तिः, पवमानेष्टिवेलायामाहवनीयादिस्वरूपनिष्पत्त्यभावात्, पवमानेष्टीनामाधानाङ्गतया तत्सहिताधानस्यैवाहवनीयादिस्वरूपनिष्पादकत्वात्। न चैवं सति पवमानेष्टिषु सांनिध्यपाठितैर्यदाहवनीयादिवाक्यैर्वा कथमाहवनीयादिप्राप्तिः, तदानीमाहवनीयादिस्वरूपनिष्पत्त्यभावादिति वाच्यम्; तदानीं परमापूर्वोत्पत्त्यभावेन आहवनीयादिस्वरूपनिष्पत्त्यभावेऽपि आधानमात्रजन्योत्पत्त्यपूर्वविशिष्टाग्न्यधिकरणकत्वप्रापणार्थत्वात्। एवं च सप्तम्या द्वितीयार्थलक्षकत्वं जुहोतेश्च होमसंयुक्तपवमानेष्टिलक्षकत्वं नाश्रयितव्यं भवति। तस्मादग्न्याधेयं न पवमानेष्ट्यङ्गम्, पवमानेष्टयस्त्वाधानाङ्गम्, आधानवदग्न्यर्था वेति स्थितम्। प्रयोजनं पूर्वपक्षे स्वर्गाद्यर्थाः पवमानेष्टयः, तदङ्गभूताग्निसंस्कारकमाधानम्, तदुत्पन्नाग्निषु पवमानेष्टिभ्यः प्रागप्यग्निहोत्राद्यारंभः; सिद्धान्ते तु सेष्ट्याधानमग्न्यर्थम्, न पवमानेष्टिभ्यः प्रागग्निहोत्राद्यारम्भः॥

इतोऽप्येवमित्याह—

लिङ्गदर्शनाच्च ॥ ११ ॥

'जीर्यति ह वा एष आहितो यदग्निः, तदेतान्यग्न्याधेयस्य हवींषि संवत्सरे संवत्सरे निर्वपेत्, तेनैष न जीर्यति, तेनैवैनं पुनर्नवं करोति' इति श्रूयते। अत्र 'एतान्यग्न्याधेयस्य हवींषि' इति पवमानहविषामग्न्याधेयसंबन्धित्वेन कीर्तनं तेषामाधानद्वारा साक्षाद्वाग्न्यर्थत्वे अवकल्पते, नान्यथा। अतोऽपि हेतोः सेष्ट्याधानमग्न्यर्थम्॥ वृत्तमधिकरणम्॥

अग्न्यर्थमाधानमिति स्थितम्। तत्किमग्निद्वारा प्रकृत्यङ्गम्, ततश्च चोदकतो विकृत्यङ्गमपि; उत न प्रकृत्यङ्गं नापि विकृत्यङ्गम्, किं त्वग्निमात्राङ्गमिति संशये, पूर्वपक्षयति—

तत्प्रकृत्यर्थं यथान्येनारभ्यवादाः ॥ १२ ॥

तत् अनारभ्यविहितमग्न्याधेयं प्रकृत्यर्थम्, चोदकतस्तु विकृत्यर्थमपि, 'प्रकृतौ वा द्विवक्तव्यत्वात्' इति न्यायात्— यथा अन्ये अनारभ्यवादाः 'यस्य खादिरः स्रुवो भवति' इत्यादयः॥

अथ सिद्धान्तयति—

सर्वार्थं वाधानस्य स्वकालत्वात् ॥ १३ ॥

वाशब्दोऽवधारणे। अग्निमात्रार्थमेवाधानम्, यत्तु आहवनीयाद्यग्निभिः शक्यते कर्तुम्—यथा प्रकृतिः विकृतिः तदुभयविलक्षणमपूर्वकर्म चाग्निहोत्रादि—तत्सर्वार्थमेवाधानमग्निद्वारेत्येतत्तु

५. आधानस्य सर्वार्थ- आर्थिकम्; नन्वेतावता आधानस्य सर्वकर्माङ्गत्वं सिध्यति। कुतः। आधा-
ताधिकरणम्। नस्य स्वकालत्वात्— कालिरनेकार्थकः। स्वतन्त्रतया आम्नातत्वात्; क्रतूः पन्थापकप्रमाणाभावादिति यावत्। अङ्गत्वं हि श्रुत्यादिप्रमाणैकगम्यम्; न तु वस्तुतः साधकतामात्रेणाङ्गत्वं भवति, तथा सति व्रीह्यादियागेषु कर्षणादेरप्यङ्गत्वापत्तेः। न च यथानारभ्यविधीयमानं खादिरत्वादिकं स्रुवादिस्वरूपे आनर्थक्यात् क्रत्वपूर्वसाधनत्वलक्षणया वाक्यादेव क्रत्वङ्गं संपद्यते, तद्वदाधानमप्याहवनीयाद्यग्निस्वरूपे आनर्थक्यात् अपूर्वसाधनत्वलक्षणया वाक्यादेव क्रत्वङ्गं भवतीति वाच्यम्; वैषम्यात्। स्रुवजुह्वादिशब्दा हि 'अङ्कुष्ठपर्ववृत्तपुष्करः स्रुवः', 'अर्धप्रादेशपुष्करा हंसमुख्यः स्रुचः' इत्याद्याकृतिविशेषवाचकाः। न च तत्र खादिरत्वादिजातिविशेषोऽपि प्रवृत्तिनिमित्तम्, क्वचित् 'पालाशः स्रुवः' इत्यादिदर्शनात्। अतो जातिविशेषनियमः तत्र विधेयः। स च स्वरूपेणाकृतिविशेषार्थत्वे अत्यर्थक्यात् क्रत्वपूर्वीयत्वलक्षणया आकृतिविशेषार्थतया विधातव्यः इति युक्तम्। तथा च 'क्रत्वपूर्वसाधनस्रुवादयो ये ते खादिरादिप्रकृतिकाः' इति वचनव्यक्तिः। इह तु आहवनीयादिस्वरूपस्य केवलमलौकिकतया तत्राधानेन विना सिद्धयनवगमात् 'आहवनीयाद्यग्नयो ये, तानाधानेन संस्कुर्यात्' इति वचनव्यक्तिर्न संभवति; किं तु 'आधानेनाहवनीयादिस्वरूपं निष्पादयेत्' इति वचनव्यक्तिः। ततश्चाहवनीयादिस्वरूपनिष्पत्तये आधानस्य विधावानर्थक्याभावान्न क्रत्वपूर्वीयत्वलक्षणा आश्रयणीया। आहवनीयाद्यग्नीनां च स्वतः पुरुषार्थत्वाभावेऽपि आहवनीयाद्यङ्गकफलवत्सर्वक्रत्वर्थत्वान्न विरोधः। प्रयोजनम्—पूर्वपक्षे प्रकृतिभूतदर्शपूर्णमासज्योतिष्टोमेषु तद्विकृतिष्वेव चाहवनीयाद्यग्नयः स्युः, न त्वपूर्वे अग्निहोत्रादिकर्मणि, आधानस्यानारभ्याधीतत्वेन प्रकृतिगामितया तदविकारेष्वप्रवृत्तेः; तेषामाहवनीयाद्यग्नयस्तु क्रयादिभिः संपाद्याः; सिद्धान्ते तु तेष्वपि स्वाधानसिद्धा एवाग्नय इति। वृत्तमधिकरणम्॥

पवमानेष्टिषु तदङ्गतया पवमानेष्टयः कर्तव्या न वेति संशये, पूर्वपक्षयति—

तासामग्निः प्रकृतितः प्रयाजवत् ॥ १४ ॥

तासां पवमानेष्टीनाम्, अग्निः, जातावेकवचनम्, आहवनीयाद्यग्नयः, पवमानेष्टिसंस्कृताः, प्रकृतितः दर्शपूर्णमासतः, प्राप्नुवन्ति। दर्शपूर्णमासयोर्हि पवमानेष्टिसंस्कृता अग्नयोऽङ्गमिति
६. पवमानेष्टीनामसंस्कृते- पवमानेष्टयोऽप्यग्निद्वारा दर्शपूर्णमासाङ्गम्; अतस्तद्विकृतिभूतपवमानेष्टि-
ऽग्नौ कर्तव्यताधिकरणम्। ष्वपि पवमानेष्टिसंस्कृता एवाग्नयोऽङ्गतया प्राप्तुमर्हन्ति। प्रयाजवत्, यथा दर्शपूर्णमासाङ्गभूताः प्रयाजादयः पवमानेष्टिषु प्राप्नुवन्ति।

अथ सिद्धान्तयति —

न वा तासां तदर्थत्वात् ॥ १५ ॥

वा-शब्दोऽवधारणे । नैव पवमानेष्टिषु पवमानेष्टयः प्रकृतितः प्राप्नुवन्ति । कुतः । तासां पवमानेष्टीनां पूर्वाधिकरणन्यायेनाग्निमात्रार्थत्वात्, प्रकृतिभूतदर्शपूर्णमासोपस्थापकप्रमाणाभावेन तदङ्गत्वाभावात्, आर्थिकस्य चानङ्गत्वात्, अनङ्गस्य चातिदेशाभावात्; अन्यथा गुणकामानामपि विकृतिष्वतिदेशापत्तेः । अस्तु वा पवमानेष्टीनां प्रकृत्यङ्गत्वम्; तथापि न तासां पवमानेष्टिष्वतिदेशोऽवकल्पते; पवमानेष्टयो हि कथंभावाकाङ्क्षिण्यः प्रकृतिं पश्यन्त्यः तदानीं प्रकृतेः पवमानेष्टिशून्यत्वात् तज्यतिरिक्तमेवाङ्गजातं गृहीत्वा शान्ताकाङ्क्षाः सत्यः न पवमानेष्टीः आत्मानमपि ग्रहीतुं प्रभवन्ति; ततश्च पवमानेष्टिविधिदशायां पवमानेष्टीनां दर्शपूर्णमासाङ्गतया अकल्पनत्वान्न तासां तास्वतिदेश इति फलितम् । असंभवाच्च— न ह्येकस्यैव शेषित्वं शेषत्वं च संभवति । न च पवमानेष्टीनामन्याः पवमानेष्टयोऽङ्गमिति व्यक्तिभेदान्न विरोध इति वाच्यम्; या हि पवमानेष्टयः प्रथमं क्रियन्ते, ताभिः किमाहवनीयाद्यग्नयो जायन्ते, न वा; नान्त्याः, वैयर्थ्यात्; नाद्याः, प्राथमिकीभिरेव ताभिः आहवनीयाद्यग्निरहिताभिराहवनीयाद्यग्निसिद्धौ तदुत्तरासां वैयर्थ्यात् । तस्मान्न पवमानेष्टिषु पवमानेष्टयः ॥ वृत्तमधिकरणम् ॥

सन्ति ज्योतिष्टोमे त्रयः पशवः अग्नीषोमीयः सवनीयः अनूबन्ध्यश्चेति । तत्र अग्नीषोमीयस्तावत् प्रायणीयाहे सोमक्रयसंनिधावुत्पन्नः 'आसोमं वहन्ति' इत्युपक्रम्य 'यदग्नीषोमीयं पशुमालभते' इति । तस्य च 'स एष उपवसथीयेऽहन् द्विदेवत्यः पशुरालभ्यते' इति वचनात् सोमक्रयाहादन्यस्मिन्नहनि सुत्यादिनात्पूर्वस्मिन् अनुष्ठानम् । सुत्यायाः पूर्वदिनमुपवसथीयमित्युच्यते । अहन्नित्यत्र सुपां सुलुगिति सप्तम्या लुक् । सुत्याहे सवनीयः पशुराम्नातः— 'आश्विनं ग्रहं गृहीत्वा त्रिवृता यूपं परिवीयाग्नेयं सवनीयं पशुमुपाकरोति' इति । अन्यत्राग्नीषोमीयपशुसंनिधावस्ति वाक्यम्— 'आग्नेयः सवनीयः पशुराग्नीषोम आलभ्यते' इति । अनूबन्ध्यस्तु पशुः अवभृथोत्तरोदयनीयानन्तरमुत्पन्नः 'मैत्रावरुणी वशामनूबन्ध्यामालभते' इति । पशुधर्मास्तु अग्नीषोमीयपशुसंनिधावाम्नाताः— 'यूपं छिनत्ति' 'यूपे पशुं नियुनक्ति' इत्यादयः । ते किं त्रयाणामपि पशूनां साधारण्येन विधीयन्ते, उत सवनीयपशोरेव, अथवा अग्नीषोमीयसवनीयपश्वोः, किं वा अग्नीषोमीयपशोरेवेति संशयः ।

७. उपाकरणादीनामग्नीषोमीयधर्मता-धिकरणम् ।

तत्र पूर्वपक्षयति—

तुल्यः सर्वेषां पशुविधिः प्रकरणाविशेषात् ॥ १६ ॥

पशुविधिः पशुधर्माम्नायः, तुल्यः पशुत्रयसाधारणः स्यात्तत्र्यः। कुतः। प्रकरणाविशेषात्— त्रयोऽप्येते पशवः ज्योतिष्टोमप्रकरणे विहिताः, तथा पशुधर्माश्च; ततश्च पशुस्वरूपे तेषामाम्नानानर्थक्यापत्त्या लक्षणया अपूर्वसाधनपश्वर्थत्वे सति प्रकरणाविशेषात् ज्योतिष्टोमगतसर्वपशुयागार्थत्वं विज्ञायते। अथ द्वितीयपक्षपरतयाप्येतदेव सूत्रं योज्यम्—पशुविधिः, जातावेकवचनम्, यूपच्छेदननियोजनादिधर्मविधिः, महाप्रकरणाविशेषात्, तुल्यः पशुत्रयसाधारणः संभाव्येत; इह तु सवनीयपश्ववान्तरप्रकरणेन महाप्रकरणं बाध्यते, 'आग्नेयः सवनीय. पशुरग्निष्टोम आलभ्यते' इति सवनीयपशूत्पत्तिसंनिधौ औपवसथ्येऽहनि पशुधर्माणामनुक्रमणात्॥

अथ तृतीयपक्षमुपक्षिपति—

स्थानाच्च पूर्वस्य॥ १७॥

चो भिन्नक्रमः। पशुधर्माः अवान्तरप्रकरणात् सवनीयपशोर्भवन्ति, स्थानप्रमाणात् पूर्वस्य च अग्नीषोमीयपशोरपि। तस्य ह्यग्नीषोमीयपशोरौपवसथ्यमहरुत्पत्तिस्थानम्, क्रयसंनिधावुत्पन्नस्यापि तस्य 'स एष उपवसथीयेऽहन् द्विदेवत्यः पशुरालभ्यते' इति तत्रोत्कर्षविधानात्। पशुधर्माश्च औपवसथ्येऽहन्येव समाम्नाता इति स्थानप्रमाणात्तस्यापि ते विज्ञायन्ते। न च बलवदवान्तरप्रकरणेन पशुधर्माणां सवनीयार्थत्वे लब्धे तत एव नैराकाङ्क्ष्यात् कथमग्नीषोमीयार्थत्वमपीति वाच्यम्, सवनीयपशुमादाय धर्माणां नैराकाङ्क्ष्येऽपि अग्नीषोमीययागस्य प्राणिद्रव्यकतया पशुधर्मापेक्षत्वेन तदाकाङ्क्षाबलेन धर्माणामप्याकाङ्क्षोत्थापनात्। आकाङ्क्षावशाच्च दुर्बलमपि स्थानं न प्रकरणेन बाध्यत इति तदुभयार्थाः पशुधर्माः— यथा प्रकृतौ प्रत्यक्षोपदेशाल्लब्धाङ्गभावा अपि धर्माः विकृत्याकाङ्क्षया दुर्बलेनाप्यतिदेशेन तदङ्गतामपि भजन्ते तद्वत्॥

अथ सिद्धान्तयति—

अस्त्वेकेषां तत्र प्राक्श्रुतिर्गुणार्था॥ १८॥

तुरवधारणे। अस्तु औपवसथ्याहात् परेद्युरेव सुत्याहे सवनीयपशोरुत्पत्तिः, एकेषाम् अन्येषां शाखिनाम् आम्नाता— 'आश्विनं गृहीत्वा त्रिवृता यूपं परिवीयाग्नेयं सवनीयं पशुमुपाकरोति' इति। तत्र तस्मिन् उत्पन्ने सवनीयपशौ प्राक्श्रुतिः गुणार्था सुत्याहात् प्राक् पूर्वेद्युः औपवसथ्येऽहनि श्रुतम् 'आग्नेयोऽग्निष्टोम आलभ्यः' इति वाक्यं गुणविधानार्थम्। औपवसथ्येऽहनि तावत् पशुधर्मानुक्रमणसंनिधौ 'आग्नेयः सवनीयः पशुरग्निष्टोम आलभ्यते, ऐन्द्राग्न उक्थ्ये, ऐन्द्रो वृद्धिणः षोडशिनि, सारस्वती मेष्यतिरात्रे' इति सवनीयान् पशूननुकीर्त्य, 'यथा वै मत्स्यो वीतो

जनमवधूनुते एवं वा एते अप्रज्ञायमाना जनमवधून्वते' इति निन्दित्वा, एभिः कथं सवनानि पशुमन्ति भवन्ति' इति प्रश्नमवतार्य, 'वपया प्रातःसवने चरन्ति पुरोडाशेन माध्यन्दिने सवने अग्नेस्तृतीयसवने' इति वपादिप्रचारविप्रकर्षो विधीयते। मत्स्यः, पीतः जले विविधं गच्छन्, अनवधारितगतिः, प्रेक्षकं जनमवधूनुते प्रेक्षणाय इतस्ततः संचालयति, एवमेते पशवः कथं प्रचरितव्या इति अप्रज्ञायमानाः प्रयोक्तारं जनं संचालयन्तीति निन्दा। वपापुरोडाशहृदयादिहविःप्रचाराणामेककालत्वस्य न्याय्यत्वात् प्रतिसवनं च प्रचारानुवृत्तेरविज्ञानात् त्रीण्यपि सवनानि कथमेतैः पशुप्रयोगवन्ति भवन्तीति प्रश्नः। तत्र पशुसंकीर्तनं प्रचारदेशविशेषाज्ञानप्रयुक्तनिन्दार्थम्, निन्दा च प्रश्नावतरणार्था, प्रश्नश्च प्रचारविप्रकर्षणविध्यर्थः— इति औपवसथ्येऽहनि सवनीयपशुसंकीर्तनं गुणविधानार्थमेव, न तु सवनीयपशूनां तत्रोत्पत्तिः, येन धर्मानुक्रमणं प्रकरणप्रमाणात् तेषामपि साधारणं स्यात्; 'आश्विनं ग्रहं गृहीत्वा' इत्यादिसुत्याहगतवाक्यादेव सवनीयपशूत्पत्तिः। ननु 'आश्विनं ग्रहं गृहीत्वा' इत्यादिवाक्यमेव गुणविधायकमस्तु; न च प्राप्तकर्मानुवादेनानेकगुणविधौ वाक्यभेदः शङ्क्यः, 'वपया प्रातःसवने चरन्ति' इति प्रधानोत्कर्षादेव पूर्वेद्युर्विहितानामपि तदङ्गानां प्रधानकालकर्तव्यत्वादुत्कर्षे सति, तेषां प्रातःसवनेऽपि कदानुष्ठानमित्यपेक्षायाम्, आश्विनं ग्रहं गृहीत्वा परिवीय' इति परिव्याणस्य वा, 'यत् त्रिवृता यूपं परिवीयोपाकरोति, तदाश्विनं गृहीत्वा' इत्युपाकरणस्य वा, आश्विनग्रहोत्तरकालविशेषमात्रं विधीयते, परिव्याणम् उपाकरणम् द्रव्यदेवते सवनसंबन्धश्च वाक्यान्तरप्राप्ताः अनूद्यन्ते; परिव्याणोपाकरणक्रमश्च पाठप्राप्तोऽनूद्यते इति न वाक्यभेदः इति चेत्— सत्यम्। प्रकरणान्तराधिकरणे हि— अनुपादेयगुणस्मभिव्याहृतवाक्य एव कर्मोत्पत्तिः, उपादेयस्य गुणस्य दूरस्थकर्मानुवादेनापि 'यदाहवनीये जुहोति' इतिवत् विधिसंभवादिति स्थितम्। तथा च औपवसथ्यगतवाक्यमेव सुत्याहेऽप्युत्पन्नं दूरस्थं कर्मानूद्य प्रचारविप्रकर्षलक्षणमुपादेयगुणं विधातुं शक्नोति। सुत्याहगतवाक्यं तु औपवसथ्योत्पन्नदूरस्थाविपरिवर्तमानं कर्मानूद्य आश्विनग्रहग्रहणोत्तरकाललक्षणमनुपादेयगुणं विधातुं प्रभवतीति तदेव सवनीयपशूत्पत्तिपरमास्थेयम्। तथा च औपवसथ्याहे पशुधर्माणां सवनीयावान्तरप्रकरणपरिग्रहाभावे सति, स्थानादग्नीषोमीयार्थत्वमेव सिध्यति॥

स्यादेतत्— नास्त्यत्र प्रकरणान्तरन्यायः, औपवसथ्योत्पन्नस्यापि कर्मणो वपाप्रचारोत्कर्षादुत्कृष्टस्य सुत्याहे प्रातःसवने बुद्धौ विपरिवर्तमानतया असंनिधानलक्षणप्रकरणान्तराभावात्; तथा च 'संनिधौ त्वविभागात्' इति न्यायेन 'पौर्णमास्यां पौर्णमास्यां' इतिवत् संनिहितकर्मानुवादेन अनुपादेयस्याप्याश्विनग्रहग्रहणोत्तरकालस्य गुणस्य विधिः सुत्याहवाक्येऽपि किं न स्यात्— इति शङ्कामुद्भाव्य परिहरति—

तेनोत्कृष्टस्य कालविधिरिति चेन्नैकदेशत्वात् ॥ १९ ॥

तेन वपाप्रचारेण, सुत्याहे प्रातःसवने उत्कृष्टस्य बुद्धौ विपरिवर्तमानस्यानुवादेन सुत्याहवाक्यं काललक्षणगुणविधिरस्त्विति चेत्, तन्न। कुतः। एकदेशत्वात् वपाप्रचारस्य समस्ताङ्गोपेतसवनीयपशुभावनैकदेशतया तन्मात्रोत्कर्षेण तदितराङ्गानामुत्कर्षालाभात्। तथा हि— परिव्याणस्य उपाकरणस्य वा आश्विनग्रहग्रहणोत्तरकालो विधेय इति वक्तव्यम्; तयोश्च नास्ति विपरिवृत्तिः। न च वपाप्रचारोत्कर्षेण तयोरप्युत्कर्षाद्विपरिवृत्तिः शङ्क्या, एकोत्कर्षेण हि अपरोत्कर्षो द्वेधा घटते— 'अङ्गानि तु विधानत्वात् प्रधानेनोपदिश्येरन्' इत्येकादशे अङ्गाना प्रधानकालत्वस्य वक्ष्यमाणतया प्रधानोत्कर्षे अङ्गोत्कर्षाद्वा, 'तदादि वाभिसंबन्धात्तदन्तमपकर्षे स्यात्' इति पाञ्चमिकन्यायाद्वा। नाद्यः— एकादशे हि 'अङ्गानां मुख्यकालत्वाद्धनादन्यकालत्वम्' इत्यत्र अनिर्ज्ञातकालानामेवाङ्गानां प्रधानकालत्वं वक्ष्यते; ततश्चौपवसथ्येऽहनि कर्मोत्पत्तौ तत्राङ्गानां कर्तव्यत्वेन निर्ज्ञातकालतया कथं प्रधानवपाप्रचारोत्कर्षेण उपाकरणाद्युत्कर्षः। न द्वितीयः— पञ्चमे हि एकस्याङ्गस्योत्कर्षे अपकर्षे च श्रुते तदादेरुत्कर्षः तदन्तस्यापकर्षश्च स्यात्, बद्धक्रमत्वात् इति सिद्धान्तयिष्यते; एवं च प्रकृते वपाप्रचारे उत्कृष्टे तदुत्तरभाविनामेव पदार्थानामुत्कर्षो भवेत्, न तु तत्पूर्वभाविनामुपाकरणादीनामपि। तस्मादुपाकरणस्य परिव्याणस्य वा प्रातःसवने विपरिवृत्त्यभावान्न तस्य सुत्यावाक्ये कालविधिरिति उत्पत्तिविधिरेवायं सवनीयपशोः। औपवसथ्यवाक्यं तु तत्र गुणविधिरिति सवनीयपशोस्तदानीमनुष्ठानाभावान्न तदर्थत्वं पशुधर्माणाम्॥

स्यादेतत्— औपवसथ्येऽहन्युत्पन्नस्य सवनीयपशोस्तदानीमेव स्वाङ्गसहितानुष्ठाने प्राप्ते सुत्याहे प्रातःसवने वपाप्रचाराद्युत्कर्षो विहितः। तत्र यदि वपाप्रचारादेव सुत्याहे अनुष्ठीयेत तत्पूर्वभाविनश्च पदार्थाः पूर्वेद्युरनुष्ठीयेरन्, तर्हि वपोद्धरणादिकमपि पूर्वेद्युरेवानुष्ठेयं स्यात्। तथा सति 'मुष्टिना शमिता वपोद्धरणमपिधायास्ते आ वपाया होमात्' इति विरुध्येत। न हि कश्चिद्वपोद्धरणच्छिन्नप्रदेशं मुष्टिना पूर्वेद्युरारभ्य परेद्युर्वपाहोमपर्यन्तमपिदधत् उपवेष्टुं शक्नुयात्, मध्ये आहारादिकर्मणामवर्जनीयत्वात्। ततश्च वपाप्रचारादेरुत्कर्षेण तत्पूर्वपदार्थानामपि सुत्याहे उत्कर्षे सति परिव्याणस्योपाकरणस्य वा तदानीं विपरिवृत्तिसत्त्वात् तत्राश्विनग्रहणोत्तरकालविधिः संभवतीति औपवसथ्येऽहनि उत्पन्नस्य सवनीयस्य प्रकरणसत्त्वात्तदानीमाम्नाताः पशुधर्माः सवनीयपशोरपि भवन्ति इत्याशङ्क्य, परिहरति—

अर्थेनेति चेन्न श्रुत्यविप्रतिषेधात्॥ २०॥

अर्थेन 'मुष्टिना शमिता' इति विहितकार्येण अनुपपद्यमानेन परेद्युः परिव्याणादिपदार्थानामपि प्राचामुत्कर्षो भवत्विति चेन्न; कुतः, श्रुत्यविप्रतिषेधात्— औपवसथ्येऽहन्युत्पत्तिपक्षे वपाप्रचारादेव सुत्याहे उत्कृष्यताम्; तत्पूर्वपदार्थास्तु पूर्वेद्युरेवानुष्ठीयन्ताम्; अथापि 'मुष्टिना

शमिता' इति श्रुतिः न विप्रतिषिध्यते । तत्र हि आसधातुरौदासीन्ये वर्तते— यथा 'क्षेत्राणि परिगृह्यास्ते' इति कर्षणादिकर्मणि उदास्त इति गम्यते; मुष्टिनेति च तृणपर्णादिमुष्टिरुच्यते; तथा च शमिता तृणपर्णादिमुष्टिना वपोद्धरणप्रदेशमपिधाय वपाहोमपर्यन्तं विशसनकर्मणि उदास्ते, न व्याप्रियत इत्यर्थः । ततश्च वपाप्रचारतः पूर्वपदार्थानां पूर्वेद्युरनुष्ठानेऽपि नानुपपत्तिः । तदेवं सवनीयपशोरौपवसथ्येऽहन्युत्पत्तिनिरासेन पशुधर्माणां तदवान्तरप्रकरणपरिग्रहाभावे सति स्थानप्रमाणबलादग्नीषोमीयपशुमात्रार्थत्वमिति सिद्धान्तं निगमयन् प्रथमपक्षं निरस्यति—

स्थानात्तु पूर्वस्य संस्कारस्य तदर्थत्वात् ॥ २१ ॥

तुरवधारणे । उक्तरीत्या पशुधर्माणां सवनीयपशुप्रकरणपरिग्रहाभावात् स्थानप्रमाणेन निःसपत्नेन पूर्वस्य अग्नीषोमीयपशोरेवैते धर्मा भवेयुः । ननु मास्तु पशुधर्माणामवान्तरप्रकरणपरिग्रहः; ज्योतिष्टोमिकमहाप्रकरणपरिग्रहस्तु स्यादेव; ततश्च ज्योतिष्टोमार्थतया विज्ञायमानाः पशुधर्माः आनर्थक्यतदङ्गन्यायेन त्रिष्वपि पशुषु निविशेरन्नित्यत आह— संस्कारस्य तदर्थत्वादिति । संस्कारस्य नियोजनादिधर्मजातानुक्रमणस्य अग्नीषोमीयमात्रार्थत्वात् । तथा हि नियोजनोपाकरणसंज्ञपनादिपशुधर्माणामयोग्यत्वान्न ज्योतिष्टोमीयमहाप्रकरणपरिग्रहः । न चानर्थक्यतदङ्गन्यायोऽत्रावतरति । तत्र हि प्रथमप्रवृत्तवाजपेयिकमहाप्रकरणम् सप्तदशारत्नित्वस्यायोग्यतां दृष्ट्वा ततो झटिति परावृत्य तदज्ञानानर्थक्यं पर्यालोच्य पुनरभिमुखीभूय, वाजपेयाङ्गपशुगतयूपद्वारा सप्तदशारत्नित्वं परिगृह्यातीत्यगत्या स्वीक्रियते । इह तु नियोजनादिधर्मतः परावृत्तेऽपि महाप्रकरणे स्थानादग्नीषोमीयार्थतया धर्माज्ञानस्यार्थवत्त्वोपपत्तेर्नागतिकत्वमित्यग्नीषोमीयार्थमेव धर्माज्ञानम् । तदयमत्र निष्कर्षः— सोमक्रयसंनिधावग्नीषोमीयः पशुरुत्पन्नः । स च चोदकतो दार्शिकाङ्गैः शान्तकथंभावाकाङ्क्षः औपवसथ्येऽहनि वचनादुत्कृष्टः सन् तत्राम्नातैः पशुधर्मैः उपकार्यमपेक्षमाणैः पुनरुत्थापितकथंभावाकाङ्क्षैः तैः संबध्यते । तथा चाग्नीषोमीयः पशुः सर्वेषां पशूनां प्रकृतिः । सवनीयपशुस्तु सुब्ब्राह्मे आश्विनग्रहग्रहणोत्तरकालकपरिव्याणादिसहितो विधीयते । तत्र परिव्याणादिकं प्रकृतितः प्राप्तमनूद्यते । प्राप्ताप्राप्तविवेकेनाश्विनग्रहणोत्तरकालादिविशिष्टो विधेयः । विशिष्टविधानाच्च न वाक्यभेदः । औपवसथ्येऽहनि सवनीयपशुवाक्यं तु प्रचारविप्रकर्षविधानार्थम् । अनूबन्ध्यायामपि चोदकतोऽग्नीषोमीयादेव धर्मा भवन्ति इति ।

इतोऽपि अग्नीषोमीयार्थमेव धर्माम्नानमित्याह—

लिङ्गदर्शनाच्च ॥ २२ ॥

'पुरोडाशेन माध्यन्दिने सवने' इति सवनीयपशौ पुरोडाशयागोऽनूद्यते । स चाग्नी-

षोमीयात् प्राप्यते। अग्नीषोमीयपक्षौ च 'अग्नीषोमाभ्यां पुरोडाशस्यानु ब्रूहि' इत्यादयोऽग्नीषोमीयलिङ्गका मन्त्रा आम्नाताः। पशुपुरोडाशश्च पशुदेवतासंस्कारार्थः, 'अवीवृधेतां पुरोडाशेन। इति मन्त्रलिङ्गात्, 'तेन पशुदेवता वर्धते' इति वाक्यशेषाच्च। अग्नीषोममन्त्रवानयं पुरोडाशयागश्च न सवनीयदेवतां संस्कर्तुं शक्नोति। न चोहेन तत्संभवः, पशुधर्मोपदेशस्य ज्यौतिष्टौमिकसर्वपशुसाधारणत्वे सवनीयपशोरपि प्रकृतित्वात्, प्रकृतौ चोहाभावस्य दशमे वक्ष्यमाणत्वात्। पशुधर्मोपदेशस्याग्नीषोमीयमात्रार्थत्वे तु सवनीयपशोस्तद्विकृतित्वात् ऊहेन सवनीयपशुदेवतासंस्कारकत्वं संभवतीति तत्र पशुपुरोडाशदर्शनं न विरुध्यते। तस्मादप्यग्नीषोमीयपशुमात्रार्थो धर्मोपदेशः।

ननु पशुदेवतार्थत्वं पुरोडाशस्य न साक्षात्; किं तु पशुसंस्कारद्वारैव; एवं हि श्रूयते—'सुषिरो वा एतर्हि पशुर्यर्हि वपामुत्खिदति यद्वीहिमयः पुरोडाशो भवत्यपिधानायासुषिराय' इति पुरोडाशयागसंस्कृतपशुहविःसंबन्धात् पशुदेवता वर्धत इत्युपपद्यते; छिद्रापिधानात्मकपशुसंस्कार श्चायमग्नीषोममन्त्रवतापि पुरोडाशयागेन संपद्यत इति पशुधर्मान्नानस्य पशुत्रयार्थत्वेऽपि न विरोध इत्यत आह—

अचोदना वा गुणार्थेन ॥ २३ ॥

पुरोडाशयागस्य पशुच्छिद्रापिधानार्थत्वं प्रत्यक्षपराहतम्; अतोऽर्थवादमात्रमेतत्। ततश्च गुणार्थेन छिद्रापिधानलक्षणगुणविधानप्रयोजनाय पुरोडाशस्य अचोदना विधिर्नास्ति। अतः साक्षात् पशुदेवतार्थ एव पुरोडाशयागः; पशुदेवतार्थत्वं च न केवलमदृष्टविधया, किं तु पुरोडाशयागीयमन्त्रतः प्रकाशनद्वारैव, यथाकथमपि दृष्टलाभे केवलादृष्टार्थत्वाश्रयणायोगात्। तदीयमन्त्रतः सवनीयदेवताप्रकाशनं च ऊहेनैव भवति। स च सवनीयपशोः प्रकृतित्वे सति न संभवति। अतः पशुधर्मान्नानमग्नीषोमीयपशुमात्रार्थमिति विज्ञायते। प्रयोजनम्— पूर्वपक्षे 'यद्देवत्यः पशुस्तद्देवत्यः पशुपुरोडाशः' इत्याग्नेयपशुसमानदेवताके सवनीयपुरोडाशे अग्नीषोमलिङ्गकमन्त्राणां निवृत्तिः, प्रकृताबूहाभावात्, धर्मोपदेशस्य पशुत्रयसाधारणत्वे सवनीयपशोरपि प्रकृतित्वात्; तथा अनूबन्ध्यायां वशायाम् 'प्राग्नये अरिं भरत' इत्यादिपुंलिङ्गमन्त्राणां निवृत्तिः। सिद्धान्ते तु धर्मोपदेशस्याग्नीषोममात्रार्थतया सवनीयानूबन्ध्ययोस्तद्विकृतित्वादूहसंभव इति ॥ वृत्तमधिकरणम् ॥

दर्शे तावत् 'ऐन्द्रं दध्यमावास्यायाम्' 'ऐन्द्रं पयोऽमावास्यायाम्' इति स्तो दधिपयोयागौ। तत्र पूर्वेद्युः सायं पयो दुग्ध्वा श्रपयित्वा आतत्य दधि क्रियते; परेद्युस्तु प्रातः पयो

८. शाखाहरणादीनामुभयदोहधर्मताधिकरणम्।

दुग्ध्वा केवलं श्रप्यते, तदिदं श्रुतशब्देन याज्ञिका व्यवहरन्ति। तत्र पूर्वेद्युः शाखाहरणवत्सापाकरणादयः पदार्थाः समाम्नाताः। ते किं दधिधर्माः उतोभयधर्मा इति संशये पूर्वपक्षयति—

दोहयोः कालभेदादसंयुक्तं श्रुतं स्यात् ॥ २४ ॥

दुह्येते इति दोहौ, दधिपयसी; तयोर्मध्ये श्रुतं पयः शाखाहरणादिधर्मैरसंयुक्तं स्यात्। कुतः। कालभेदात्, पूर्वेद्युः सायं दधि क्रियते; परेद्युस्तु प्रातः पयः; ततश्च दध्न एवानुष्ठानसादेश्यलक्षणसंनिधिरस्ति; दधिकरणस्य पूर्वेद्युर्विहितत्वेन तस्य पूर्वेद्युरेवेतिकर्तव्यताकाङ्क्षासत्त्वात् अवान्तरप्रकरणं च विद्यते; एवं च संनिधिप्रकरणाभ्यां दध्न एव एते धर्मा इति प्राप्ते, सिद्धान्तयति—

प्रकरणाविशेषाद्वा तत्संयुक्तस्य कालशास्त्रम् ॥ २५ ॥

वा शब्द एवार्थे। उभयधर्मा एवैते शाखाहरणादयः। कुतः। प्रकरणाविशेषात्। दर्शपूर्णमासयोर्हि प्रकरणे शाखाहरणादयो धर्मा आम्नाताः। ते च योग्यतया लिङ्गेन दधिपयोयागमात्रधर्माः संपद्यन्ते, न तु संनिधिवशाद्दधिमात्रधर्माः, संनिध्यपेक्षया प्रकरणस्य बलीयस्त्वात्। न च दधियागस्यावान्तरप्रकरणमस्ति, शाखाहरणादिधर्माणां दधियागसंदंशाभावात्। न हि शाखाहरणादिधर्मानुक्रमणस्य पुरस्तात्परस्ताच्च दधियागश्रवणमस्ति, येन संदंशे सति 'संदष्टं तदङ्गमितरत्पुनः' इति न्यायादवान्तरप्रकरणमुन्मिषेत्। नापि दधियागस्य पूर्वेद्युः स्थानमस्ति, परेद्युरेव तदनुष्ठानात्। ततश्च दधियागसंयुक्तस्य शाखाहरणादिधर्मजातस्यानुष्ठाने पूर्वेद्युःकालविधायकं शास्त्रं बर्तत इति कृत्वा तत्रानुष्ठानम्; न तु तावता दधिमात्रार्थता; तस्मादुभयधर्माः। प्रयोजनं पूर्वपक्षे दधिनिष्पत्त्यनन्तरं शाखानाशे प्रातर्दोह्यर्थं न शाखान्तरमुत्पाद्यम्; उपायान्तरेण वत्सापाकरणादि कर्तव्यम्; सिद्धान्ते तु शाखान्तरमुत्पाद्यम् ॥ वृत्तमधिकरणम् ॥

ज्योतिष्टोमे प्रातःसवने ग्रहधर्माः समाम्नाताः— 'ग्रहं संमार्ष्टि' 'गृहीत्वा खरे सादयति' इत्यादयः। ते किं प्रातःसवनिकग्रहार्थाः, उत सवनान्तरग्रहार्था अपीति संशयः।

९. सदनादीनां सवनत्रयधर्मताधिकरणम्।

ऐन्द्रवायवादिग्रहत्रयस्यभ्यासानां प्रातःसवनेऽनुष्ठानात् उत्पत्तेश्च अनुष्ठानसादेश्यलक्षणं स्थानमवान्तरप्रकरणं वास्तीति प्रातःसवनिकग्रहार्थमेव धर्मान्नानमिति प्राप्ते, सिद्धान्तयति—

तद्वत्सवनान्तरे ग्रहान्नानम् ॥ २६ ॥

प्रातःसवनादन्यत्र माध्यन्दिनतृतीयसवनयोरपि यत् ग्रहान्नानं तदपि, तद्वत् श्रुतवत्, धर्मग्राहकम्, महाप्रकरणात् स्थानस्य च तदपेक्षया दुर्बलत्वात्। अवान्तरप्रकरणं तु प्रातःसवनशब्दसंदंशाभावान्नास्ति। अतो महाप्रकरणात् सर्वग्रहार्थं धर्मान्नानम् ॥ वृत्तमधिकरणम् ॥

सोमपशुधर्मानुक्रमणे 'यूपं परिव्ययति' इति प्रकृत्य रशनाधर्माः श्रुताः— 'त्रिगुणा

भवति' 'दर्भमयी भवति' 'रशनया मध्यभागेन यूपं परिवीयाग्रान्तभागौ प्रवेष्टयाग्रे मूलं प्रवेश-
१०. रशनात्रित्वादीनां यति' इत्यादयः। ते तावत् अग्नीषोमीयपरिव्याणरशनार्थाः सवनीय-
पशुधर्मताधि- परिव्याणरशनायां चोदकतः प्राप्नुवन्तीत्यनुपदमेव स्थितम। अस्ति च
करणम्। सवनीयपशौ अपूर्वं परिव्याणान्तरम्— 'स आश्विनं गृहीत्वोपनिष्क्रम्य यूपं परिव्ययति' इति। अत्र हि चोदकप्राप्तपरिव्याणे आश्विनग्रहग्रहणोत्तरकालो न विधीयते, 'आश्विनं ग्रहं गृहीत्वा त्रिवृता यूपं परिवीयाग्नेयं सवनीयं पशुमुपाकरोति' इति सवनीयोत्पत्तिवाक्यादेव तत्प्राप्तेः। किं तु परिव्याणान्तरमेव यूपस्य संस्कारान्तरार्थमप्राकृतकार्यं कालविशिष्टं विधीयते, उपनिष्क्रमणं त्वर्थप्राप्तत्वान्न विधेयम्। तदेवंविधरशनासाधारणमपि त्रिगुणत्वादिधर्मज्ञानम्, उताग्नीषोमीयरशनामात्रार्थमिति संशयः। तत्र रशनाधर्माणां परिव्याणस्वरूपार्थत्वे आनर्थक्यापत्त्या क्रत्वपूर्वानुप्रवेशावश्यंभावे सति स्थानादग्नीषोमीयपरिव्याणरशनार्थमेव तदाज्ञानम्। तथा च त्रिगुणत्वादयो रशनाधर्माः सवनीयपशौ चोदकप्राप्तपरिव्याणरशनायामेव प्राप्नुवन्ति, नैतदपूर्वपरिव्याणरशनायामिति प्राप्ते, सिद्धान्तयति—

रशना च लिङ्गदर्शनात् ॥ २७ ॥

सवनीयपशौ अपूर्वपरिव्याणरशनापि रशनाधर्मोपदेशेन गृह्यते; तत्साधारणतया रशनाधर्मा उपदिश्यन्त इति यावत्। कुतः? लिङ्गदर्शनात्— दृश्यते निश्चीयते संदिग्धोऽर्थोऽनेनेति दर्शनम्, न्यायः; लिङ्गं च दर्शनं चेति समाहारद्वन्द्वः; लिङ्गात् न्यायाच्चेत्यर्थः। 'आश्विनं ग्रहं गृहीत्वा त्रिवृता यूपं परिवीय' इति सवनीयोत्पत्तिवाक्ये प्राकृतापूर्वसाधारणसवनीयपरिव्याणरशनायां त्रिगुणत्वानुवादो दृश्यते। रशनाधर्माणामग्नीषोमीयपरिव्याणरशनामात्रार्थत्वे तु तन्नोपपद्येत, सवनीयपशुगतापूर्वपरिव्याणरशनायां त्रिगुणत्वस्य चोदकतोऽप्राप्तत्वेन तदनुवादायोगात्। अतो लिङ्गादपि तद्रशनासाधारण्यं धर्माणाम्। न्यायाच्च— यूपं परिव्ययति इति हि द्वितीयाश्रुत्या परिव्याणं यूपार्थम्; तत्प्रणाड्या यूपार्थतां रशनाधर्माः प्रतिपद्यन्ते; तत्र रशनाधर्माणां परिव्याणस्वरूपे आनर्थक्यात् क्रत्वपूर्वानुप्रवेशावश्यंभावे सति अग्नीषोमीयार्थयूपार्थत्वेन परिव्याणं न विशेषणीयम्; किं तु अग्नीषोमीयसंबन्धियूपसंबन्धित्वमात्रेण, लाघवात्; तावतैवानर्थक्यपरिहारात्, अग्नीषोमीयसंनिधेरपि तावतैवोपपत्तेः; अन्यथा रशनाद्वयसाधारण्येन प्रवृत्तधर्मश्रुतिसंकोचापत्तेः। न च सवनीयपरिव्याणस्य सवनीययूपसंबन्धित्वेऽपि अग्नीषोमीययूपसंबन्धित्वाभावान्न तत्साधारण्यमिति वाच्यम्; एकादशे हि यूपस्य सौमिकपशुत्रयसाधारण्यं व्यवस्थापयिष्यते 'यूपाकर्मकालत्वात्' इत्यत्र; अतः सवनीयपरिव्याणमप्येतदग्नीषोमीयसंबन्धियूपसंबन्धीत्यदोषः। तस्मादुभयरशनार्थं धर्माज्ञानम्॥ वृत्तमधिकरणम्॥

ज्योतिष्टोमे 'प्रहं संमार्ष्टि' इत्यादयो ग्रहधर्माः अंश्वदाभ्ययोर्भवति न वेति संशये, पूर्वपक्षयति—

आराच्छिष्टमसंयुक्तमितरैः संनिधानात् ॥ २८ ॥

आरात् दूरे शिष्टं विहितम्, अनारभ्यविहितमिति यावत्; तथाविधमिदं ग्रहधर्मैरसंयुक्तं प्रत्येतव्यम्। कुतः ? इतरैः संनिधानात्। प्रकरणपठितैः ग्रहैः ग्रहधर्माणां संनिधानात्।

११. अंश्वदाभ्ययोरपि सदनादिधर्मवत्स्वाधिकरणम्।

असंनिधानादिति पाठे आराच्छिष्टम् अनारभ्यविहितम् ग्रहद्वयम् इतरैः प्रकरणपठितैः ग्रहधर्मैः असंयुक्तं प्रत्येतव्यम्, ग्रहद्वयस्य धर्मविध्यसंनिधेरिति योजना। प्रकरणात् सोमग्रहेषु निविशमाना ग्रहधर्माः प्रकरणपठितेषु संनिहितेष्वेव निवेशं लब्ध्वा अनारभ्यविहिते व्यवहिते ग्रहद्वयेऽस्मिन् न प्रवर्तन्त इति यावत् ॥

अथ सिद्धान्तयति—

संयुक्तं वा तदर्थत्वाच्छेषस्य तन्निमित्तत्वात् ॥ २९ ॥

वा-शब्दोऽवधारणे। ग्रहद्वयमिदं ग्रहधर्मैः संयुक्तमेव प्रत्येतव्यम्। कुतः ? शेषस्य संमार्गादिधर्मस्य तन्निमित्तत्वात् ग्रहप्रयुक्तत्वात्। अविशेषप्रवृत्तग्रहशब्दघटितवाक्यप्रमाणेन सर्वग्रहार्थत्वादिति यावत्। प्रकरणबलात् ग्रहधर्माणां प्राकरणिकग्रहमात्रार्थत्वं वदतः किमवान्तरप्रकरणं विवक्षितम्, महाप्रकरणं वा, नाद्यः, ऐन्द्रवायवादिग्रहविधीनां प्रातिस्विकशब्दसंदंशाभावात्; न द्वितीयः— महाप्रकरणेन प्राकरणिकग्रहार्थत्वं वदता हि 'ज्योतिष्टोमप्रकरणगतान् ग्रहान् संमृज्यात्' इत्येवं प्रकरणस्य धर्मविधिविशेषणत्वं वक्तव्यम्, तद्विना अनारभ्याधीतव्यावृत्त्यसिद्धेः; न च तत्संभवति, विनियोजकमात्रप्रमाणस्य प्रकरणस्य विशेषकत्वानुपपत्तेः। नन्वेवं सति ग्रहधर्मोपदेशस्य कर्मान्तरीयसुरादिग्रहसाधारण्यं स्यादित्यत आह— तदर्थत्वादिति। प्रकरणस्य स्वतो विशेषकत्वाभावेऽपि धर्मविधिषु उद्देश्यग्रहशब्दार्थस्य ज्योतिष्टोमापूर्वसाधनत्वरूपप्रत्यायनार्थतया तद्द्वारा विशेषकत्वसंभवादित्यर्थः। न चैवमपि संनिधेर्विशेषकत्वात् संनिहितग्रहमात्रार्थत्वं धर्माणामिति वाच्यम्, अपूर्वसाधननिवेशनमात्रेण धर्माणामर्थवत्त्वोपपत्त्या पुनः संनिधिना विशेषणस्यानाकाङ्क्षितत्वात्, अनारभ्याधीतग्रहद्वयस्य उत्पत्तितो धर्मविधिसंनिध्यभावेऽपि तस्य प्रकृत्यर्थत्वन्यायेन ज्योतिष्टोमगामिनोऽनुष्ठानसादेश्यलक्षणसंनिधेः सत्त्वाच्च। तस्मात् ज्योतिष्टोमीयसर्वग्रहार्था धर्माः। नन्वेवं सति 'मैत्रावरुणं पयसा श्रीणाति' इत्यपि सर्वग्रहार्थं स्यात्— श्रीणातीति मिश्रणमुच्यते— इति मन्दशङ्कां निराकरोति—

निर्देशाद्ध्रुवमतिष्ठेत ॥ ३० ॥

'मैत्रावरुणम्' इति विशिष्य निर्देशात् तत्रैव श्रयणं निविशेत; न तु महाप्रकरणमनुसृत्य प्रहान्तराण्यपि संक्रामति, प्रकरणाद्वाक्यस्य बलीयस्त्वात्। ततश्च श्रयणस्य प्राकरणिकसर्वार्थत्वबाधेन वाक्याद्व्यवस्था। इह तु प्राकरणिकत्वव्यवस्थाबाधेन वाक्यात्सर्वार्थता ॥ वृत्तमधिकरणम् ॥

अग्निचयनप्रकरणे 'प्राणभृत उपदधाति' इत्याद्याः काश्चिदिष्टकाः सन्ति। 'चित्रिणीरुपदधाति' इत्याद्या अनारभ्यविहिताश्च। इष्टकाधर्माश्चाग्निप्रकरणे समाम्नाताः, 'न खण्डा-

१२. चित्रिण्यादीष्टकानामुपदध्यात्' 'न कृष्णामुपदध्यात्' इत्यादयः। ते तावदनारभ्यविहिता-

मग्न्यङ्गताधिकरणम्। स्विष्टकासु प्रवर्तन्ते न वेति संशयः। तत्र अश्वदाभ्ययोरनारभ्यविहितयोरपि 'यस्यैवं विदुषोऽश्वशुर्गृह्यते' 'यस्यैवं विदुषोऽदाभ्यो गृह्यते' इति प्राकरणिकवाक्यद्वयेन विनियोगोऽस्ति। ततश्च प्रकरणसंस्पर्शात्तयोर्धर्मसंबन्धः। चित्रिण्यादीनामनारभ्यविहितानां 'यां कांचन ब्राह्मणवतीमिष्टकामभिजानीयात्, तां मध्यमायां चित्यामुपदध्यात्' इत्यनारभ्यवादेनैव विनियोगोऽवगतः, ब्राह्मणवतीरित्यनारभ्याविहिता उच्यन्ते; ततश्च चित्रिण्यादीनां प्रकरणसंस्पर्शाभावान्न धर्मसंबन्ध इति प्राप्ते, सिद्धान्तयति—

अग्न्यङ्गमप्रकरणे तद्वत् ॥ ३१ ॥

अप्रकरणे यदग्न्यङ्गं चित्रिण्यादि, तदपि अश्वदाभ्यवत् धर्मयुक्तं स्यात्; प्रकरणसंस्पर्शाभावेऽपि साग्निचित्यकत्वपूर्वसंस्पर्शात् तत्साधननिवेशिन इष्टकाधर्माश्चित्रिण्यादीनामपि भवन्ति ॥ वृत्तमधिकरणम् ॥

'यदि राजन्यं वैश्यं वा याजयेत्' इत्यादिवाक्ये सोमप्रत्याम्नायत्वेन फलचमसविधिरिति स्थितं पूर्वस्मिन्पादे। तत्र 'सोममभिषुणोति' इत्यादिधर्मोपदेशः किं सोमफलचमससाधा-

१३. भिषवादीनां रणः, उत सोममात्रविषय इति संशयः। उभयसाधारण इति ब्रूमः। सोममात्रधर्मताधिकरणम्। अभिषवादिविधिषु हि सोमशब्दो ज्योतिष्टोमापूर्वसाधनत्वरूपेणैव सोममाचष्टे, न तु तद्विशिष्टसोमत्वेन, अन्यथा 'व्रीहीनवहन्ति' इत्यादीनां यवेष्वप्रवृत्तिप्रसङ्गात्। एवं च फलचमसस्यापि क्रत्वपूर्वसाधनत्वाविशेषात् तत्साधारण्यमभिषवादिधर्माणामिति प्राप्ते, सिद्धान्तयति—

नैमित्तिकमतुल्यत्वादसमानविधानं स्यात् ॥ ३२ ॥

राजन्यत्वादिनिमित्ते विहितं फलचमसद्रव्यम् असमानविधानं स्यात्— समानं

साधारणं धर्मान्नानं यस्य तत् समानविधानम्; अभिषवादिधर्मोपदेशः सोममात्रविषयः, न तु फलचमसासाधारण इति यावत् । कुतः ? अतुल्यत्वात् फलचमसद्रव्यस्य कादाचित्कतया नित्यैरभिषवादिधर्मैः अतुल्यत्वात्; नित्यानित्यसंयोगविरोधादिति यावत् । यद्यपि व्रीहियवद्रव्ययोरपि प्रयोगभेदादनित्यत्वम्, तथापि तत्रागत्या अनित्ययोरपि वयोर्नित्यधर्मसंबन्धो युज्यते; इह तु प्रयोगतोऽपि नित्यस्य सोमद्रव्यस्य नित्याभिषवादिधर्माणां च अन्वयसंभवात् अनित्यफलचमसान्वयो न युज्यते; किं च शाब्दमेव नित्यत्वं धर्मान्वये प्रयोजकम्, न तु प्रयोगतः; ततश्च व्रीहियवद्रव्ययोः प्रयोगतः पाक्षिकत्वेऽपि शब्दतो नित्यत्वान्न नित्यधर्मान्वयविरोधः, फलचमसस्य तु 'यदि राजन्यम्' इति यद्युपबन्धादनित्यत्वात् न नित्याभिषवादिधर्मसंबन्धः । न हि अभिषवादिधर्मेण नित्येन ज्योतिष्टोमस्योपकुर्यात् अनित्यफलचमसद्वारेणेति युज्यते; नापि नित्यमभिषवादिधर्मसंस्कृतफलचमसेन क्रतोरुपकुर्यादिति, तथा सति फलचमसस्यापि नित्यत्वप्रसङ्गात्; नापि अभिषवसंस्कृतेन फलचमसेन राजन्यत्वादिनिमित्ते सति क्रतोरुपकुर्यादिति संगच्छते, अभिषवादिधर्माणामप्यनित्यत्वप्रसङ्गात् । अतो नित्यानित्यसंयोगविरोधान्न फलचमसासाधारण्यमभिषवादिधर्मान्नानस्य । नन्वपूर्वसाधनत्वरूपेणैव फलचमसस्य धर्मान्वयः; ततश्च अपूर्वसाधनत्वस्य ब्राह्मणयजमानकप्रयोगे सोमद्रव्यमाश्रित्य राजन्यादिप्रयोगे फलचमसद्रव्यमाश्रित्य च नित्यतयैव सर्वत्र प्रयोगेषु सद्भावान्न नित्यानित्यसंयोगविरोधः इति चेत्—सत्यम्; नित्यं नैमित्तिकं च द्रव्यं न युगपद्विधीयते, किं तु नित्यं विधाय नैमित्तिकं विधीयत इत्यनुपदमेव निरूपितम्—'नैमित्तिकं तु प्रकृतौ तद्विकारः संयोगविशेषात्' इत्यत्र; ततश्च नित्यसोमद्रव्यशास्त्रप्रवृत्तिवेलायां नैमित्तिकफलचमसद्रव्यशास्त्रस्य प्रवृत्त्यभावेन फलचमसद्रव्यगतापूर्वसाधनत्वानवगत्या सोमपदेन सोमद्रव्यगतापूर्वसाधनत्वस्यैव लक्षणयोपस्थितेः तद्विशेषणतया तस्यां दशायामभिषवादिधर्मविधयः स्वार्थान्विधाय निवृत्ताः पश्चात् नैमित्तिकद्रव्यशास्त्रप्रवृत्त्यनन्तरं नैमित्तिकद्रव्यगतापूर्वसाधनत्वानवगतौ न तद्विशेषणतयापि स्वार्थान्विधातुं शक्नुवन्ति, आवृत्तिप्रसङ्गात् व्रीहियवशास्त्रयोः पाठक्रमसत्त्वेऽपि तयोर्द्रव्ययोर्युगपदेव धर्मप्रवृत्तिरेकादशे वक्ष्यत इति न विरोधः । प्रयोजनं पूर्वपक्षे 'सोमं ते क्रीणामि' इत्यादिमन्त्राणां फलचमसद्रव्ये निवृत्तिः, प्रकृतावूहाभावात्; गुणकामानां प्रवृत्तिश्च; सिद्धान्ते तु तद्विपर्यय इति ॥ वृत्तमधिकरणम् ॥

नित्यकर्मणि आरब्धे च काम्यकर्मणि श्रुतद्रव्यालाभे प्रतिनिधिरुपादातव्य इति षष्ठे वक्ष्यते । तत्रावघातधर्मोपदेशः किं श्रुतप्रतिनिधिसाधारणः, उत श्रुतमात्रविषय इति संशये, पूर्वः पक्षयति—

प्रतिनिधिश्च तद्वत् ॥ ३३ ॥

प्रतिनिधिरपि फलचमसवदवघातविधान इत्यर्थः, प्रतिनिधिद्रव्यस्य श्रुतद्रव्यालाभनि-

१४. प्रतिनिधिष्वपि मुख्य- धर्मानुष्ठानाधिकरणम्।

मित्तकतया अनित्यत्वेन तत्र नित्यवदाम्नातधर्माणां संबन्धाभावात्; श्रुतद्रव्यविकारत्वाच्चातिदेशत एव तत्र धर्मप्राप्तिरिति यावत् ॥

अथ सिद्धान्तयति—

तद्वत्प्रयोजनैकत्वात् ॥ ३४ ॥

न प्रतिनिधिरसमानविधानः; किं तु तद्वत् श्रुतद्रव्यवत् धर्मोपदेशं लभते। कुतः? प्रयोजनैकत्वात्— येन शब्देन व्रीह्यादिद्रव्यमनूद्यावहननादिधर्माः प्रयुज्यन्ते विधीयन्ते, तस्य व्रीह्यादिशब्दस्य एकत्वात् प्रतिनिधेयनीवारादिसाधारणत्वात्। 'व्रीहिभिर्यजेत' इत्यत्र हि व्रीहिशब्दः आकृत्यधिकरणन्यायेन जातिवचनः, तत्र जातेः साक्षाद्यागसाधनत्वासंभवात् व्यक्तिद्वारा यागसाधनत्वं वाच्यम्; तदपि न संभवति, यागदशायामवहननपेषणादिना व्यक्तीनां विनष्टत्वात्; अतो व्रीह्यवयवानामेव यागसाधनत्वे व्रीहिशास्त्रस्य तात्पर्यं वाच्यम्; तत्र व्रीहिषु व्रीह्यवयवा बहुलाः सन्ति; नीवारेषु तु व्रीह्यवयवा नीवारावयवकभिन्ना अल्पाः सन्ति; तत्र यदि व्रीहयो न लभ्यन्ते तदा व्रीहिशास्त्रानुग्रहाय नीवारगता अल्पा अपि व्रीह्यवयवा ग्राह्याः, तत्र नीवाराणामुपादानं विना तद्गतव्रीह्यवयवानामुपादानासंभवान्नान्तरीयकतयैव तदुपादानम्; तच्च व्रीह्यवयवबुद्धयैव, न तु नीवारबुद्धया— इति षष्ठे वक्ष्यते 'सामान्यं तच्चिकीर्षा हि' इत्यत्र। तथा च व्रीहिगतानामिव नीवारगतानामपि व्रीह्यवयवानां व्रीहिशास्त्रतात्पर्यविषयीभूतत्वात्तदुपदेशः श्रुतप्रतिनिधिद्रव्यसाधारणः ॥

नन्वेवमपि व्रीहिगता एव तदवयवाः प्रथमावगताः; नीवारगतास्तु मुख्यद्रव्यालाभेऽपि कर्मणामवश्यकर्तव्यतया आक्षिप्ताः पश्चादवगताः; ततश्च कलञ्चमसन्यायेनात्रापि सामानविध्यं न संभवतीत्याह—

अशास्त्रलक्षणत्वाच्च ॥ ३५ ॥

व्रीह्यवयवानां व्रीहिगतत्वरूपेण यागसाधनतायां व्रीहिशास्त्रतात्पर्यविषयत्वाभावादित्यर्थः। अवघातपेषणादिना व्रीहिस्वरूपस्य विनष्टत्वेन यागनिष्पत्तिदशायामवयवानां व्रीहिगतत्वाभावेन व्रीहिशास्त्रस्य व्रीहिगतत्वविशिष्टावयवेषु तात्पर्यासंभवात् व्रीहिजननयोग्यावयवमात्रे तात्पर्यं वक्तव्यम्। ततश्च व्रीहिजननयोग्यत्वरूपेण तदवयवानां व्रीहिषु नीवारेषु च व्रीहिशास्त्रात् युगपदेव यागसाधनत्वमवगतम्, प्रवृत्तिनिमित्तस्य साधारणत्वात्। एवं च व्रीहिशास्त्रानुसारेण 'व्रीहीनवहन्ति' इत्यादिवाक्यगतस्यापि व्रीहिशब्दस्य व्रीहिजननयोग्यावयवसामान्यपरत्वं न्याय्यम्, न तु व्रीहिगतत्वरूपेण—इति सिद्धं प्रतिनिधीनामपि श्रुतद्रव्यसामानविध्यम्। ननु व्रीहिशास्त्रस्य

व्रीहिजननयोग्यावयवपरत्वे व्रीहीणामिव नीवाराणामपि मुख्यत्वमेव स्यात्, न तु प्रतिनिधित्व-मित्यत आह—चेति अनुक्तसमुच्चये। व्रीहिषु व्रीहिजननयोग्यावयवा बहुलाः सन्ति; नीवारेषु त्वल्पाः; प्रवृत्तेश्चैष स्वभावः—यत् बहुलावयवेषु सत्सु अल्पावयवेषु न प्रसरतीति। तस्मिद्धं प्रतिनिधीनां श्रुतद्रव्यसामानाधिकरण्यम्। प्रयोजनं पूर्वपक्षे प्रकृतौ 'व्रीहीणां मेध' इत्यादिमन्त्राणां नीवारादिशब्दविकारेण प्रवृत्तिः; सिद्धान्ते तु अविकारेण तत्प्रवृत्तिरिति॥ वृत्तमधिकरणम्॥

१५. श्रुतेष्वपि प्रतिनिधिषु मुख्यधर्मानुष्ठानाधिकरणम्।

'यदि सोमं न विन्देत् पूतीकानभिषुणुयात्' इत्यत्र पूतीकानामोषधिविशेषाणामभिषवादिधर्मोपदेशग्राहित्वलक्षणं सामानाधिकरण्यमस्ति, न वेति संशयः। तत्र व्रीह्यलाभे निमित्ते सति नीवारशब्देन नीवाराणां विधेयभावात् व्रीहिबुद्ध्यैव उपादानात् व्रीहि-सामानाधिकरण्ये सत्यपि सोमालाभे पूतीकानां पूतीकशब्देन विधानात् पूतीकबुद्ध्यैव उपादानात् फलचमसवन्न सामानाधिकरण्यमिति प्राप्ते, सिद्धान्तयति—

नियमार्था पुनःश्रुतिः॥ ३६॥

सोमालाभे तत्सदृशद्रव्येष्वन्येष्वपि प्राप्तेषु पूतीकानां कदाचित्प्राप्तत्वात् अप्राप्ततदंशपूरणाय नियमविधानार्थं पुनर्वचनम्; अर्थात्तु तदितरसदृशद्रव्याणां ग्रहणं निवर्तत इति न परिसंख्यानिबन्धनं त्रैदोष्यम्; न त्विह पूतीका अपूर्वतया विधेयाः, अत्यन्ताप्राप्तद्विधौ गौरवात्, कदाचित्प्राप्तत्वेनात्यन्ताप्राप्त्यभावाच्च; पूतीकग्रहणं तु पूतीकगतसोमावयवोपलक्षणम्; तस्मात् पूतीकानां सोमसामानाधिकरण्यम्। प्रयोजनं पूर्वपक्षे प्रकृतौ 'सोमं ते क्रीणामि' इत्यादिमन्त्राणां पूतीकशब्दविकारेण प्रवृत्तिः, सिद्धान्ते तु अविकारेण प्रवृत्तिरिति॥ वृत्तमधिकरणम्॥

१६. दक्षिणीयादिधर्माणामग्नेयस्तोत्रयुक्तसोमयज्यभ्यासप्रचारान्तकर्मकलापमनुक्रम्य, अनूयाजादिषु, अग्निष्टोमाङ्गताधिकरणम्।

ज्योतिष्टोमे अग्निष्टोमाख्यस्तोत्रयुक्तं सोमयज्यभ्यासप्रचारान्तं कर्मकलापमनुक्रम्य 'इत्यग्निष्टोमः' इत्युक्त्वा 'पशुकाम उक्थ्यं गृह्णीयात्' 'षोडशिना वीर्यकामस्य स्तुवीत' 'अतिरात्रेण प्रजाकामं याजयेत्' इति काम्यगुणाननुक्रम्य, अनूयाजादिषु, अग्निष्टोमाङ्गताधिकरणम्। दर्वसानीयान्तं यज्ञपुच्छमाम्नातम्। तत्र 'सोमेन यजेत' इत्युत्पन्नस्य सोमयागस्य 'ज्योतिष्टोमेन स्वर्गकामो यजेत' इति फलविधिः 'अग्निष्टोमेन यजेत' इति तु तस्य संस्थाविधिः; अग्निष्टोमशब्दो हि आग्निमारुतशस्त्रात् पूर्वभाविस्तोत्रविशेषे वर्तते, 'अग्निष्टोमेन स्तुवते' इति स्तौतिसामानाधिकरण्यात्; तथा अग्निष्टोमसंस्थाकलापेऽपि वर्तते, 'अग्निष्टोमः प्रथमयज्ञः' इति दर्शनात्। तत्र आकृत्यधिकरणन्यायेन विशेषणभूताग्निष्टोमसंस्थैवाभिधेया; ऋतुस्तु गवादिशब्देषु व्यक्तिरिव निरूढलक्षणया शक्तितुल्यया गम्यते; अग्निष्टोमसंस्था च इह अग्निष्टोमाख्यस्तोत्रादूर्ध्वं स्तोत्रव्यापारोपरतिर्विवक्षिता; ततश्च अग्निष्टोमस्तोत्रादूर्ध्वम् आग्निमारुतशस्त्रात-

दीयवज्यभ्यासप्रचारानूयाजादियज्ञपुच्छसत्त्वेऽपि न क्षतिः। न चाग्निष्टोमशब्दस्य स्तोत्रविशेषवाचिन एव लक्षणया अग्निष्टोमस्तोत्रसंबन्धेन क्रतावपि प्रयोगोऽस्त्विति वाक्यम्; तथा सति योऽयमुकथ्यादिसंस्थाकैः क्रतुभिर्यजते तस्मिन्नपि 'अग्निष्टोमेन यजते' इति प्रयोगापत्तेः, तेष्वव्याप्तेः अग्निष्टोमस्तोत्रसंबन्धसत्त्वात्। तदेवं स्तोत्रविशेषवाची, तत्संस्थावाची चाग्निष्टोमशब्दः; तत्र 'अग्निष्टोमेन यजेत' इत्यत्र यजिसामानाधिकरण्यात् संस्थानिमित्तकक्रतुपर एवास्थेयः। तथा चाग्निष्टोमसंस्थाकेन क्रतुना भावयेदिति प्रतीयमानोऽर्थः, तत्र क्रतुस्तावत् 'सोमेन यजेत' इत्युत्पत्तिवाक्यादेव प्राप्तः प्राप्ताप्राप्तविवेकेन लोहितोष्णीषादिवद्विशेषणभूताग्निष्टोमसंस्थैव विधीयते— अग्निष्टोमसंस्थया क्रतुमुपकुर्यादिति। उकथ्यषोडशिशब्दावपि स्तोत्रविशेषवाचकौ 'उकथ्यैः स्तुवते' 'षोडशिना स्तुवते' इति स्तौतिसामानाधिकरण्यात्, 'उकथ्यो यज्ञः' 'षोडशी यज्ञः' इति प्रयोगात् तत्संस्थाकक्रत्वोरपि वर्तमानौ आकृत्यधिकरणन्यायेन विशेषणभूततत्संस्थयोर्वाचकौ। उकथ्यसंस्थया पशून् कुर्यात्, षोडशिसंस्थया वीर्यं कुर्यात्, इत्यर्थः, उकथ्यमिति द्वितीया तु अग्निहोत्रमितिवदुपपाद्या; गृह्यास्तिन्तु 'सौर्यं चरुं निर्वपेत्' इत्यादौ निर्वपत्यादिवत् प्रत्ययमात्रानुग्रहाय फलवत्संस्थाङ्गत्वेन वाक्यान्तरप्राप्तग्रहणस्यानुवादकः, 'ग्रहं वा गृहीत्वा चमसं वोन्नीय स्तोत्रमुपाकुर्यात्' इति हि ग्रहणस्य स्तोत्रसंबन्धोऽवगम्यते; ग्रहणबलात्तद्वयभ्यासोऽपि गम्यते; ततश्च ग्रहणं स्तोत्रं तद्गृहयवज्यभ्यासश्चेत्येतत्सर्वमुकथ्यसंस्थायाः फलवत्त्वात् फलवदफलन्यायेन तदर्थं भवति। एवं षोडशिवाक्येऽपि योज्यम्। न चोकथ्यषोडशिशब्दाविह स्तोत्रपरावेव किं न स्यातामिति वाक्यम्, 'उकथ्यो यज्ञः' 'न वै षोडशी नाम यज्ञोऽस्ति' इत्यादिवाक्यशेषावगतयजिसामानाधिकरण्यबलेन संस्थानिमित्तकत्वस्यैवावधारणात् एवं च उकथ्यषोडशिवाक्यद्वयमेतत् 'उकथ्येन पशुकामो यजेत' 'षोडशिना वीर्यकामः' इति वाक्यद्वयं च समानार्थकं संपद्यते। अतिरात्रशब्दोऽपि रात्रिमतीत्य सांतिष्ठते इति व्युत्पत्त्या संस्थानिमित्तक एव। रात्रिमतीत्य यो वर्तते इति व्युत्पत्त्याश्रयणे तु अग्निष्टोमादिसंस्थेष्वपि क्रतुषु तत्प्रयोगापत्तेः, तेष्वपि सुत्याप्रयोगस्य पूर्वेद्युर्महारात्रे उपक्रम्य उत्तरेऽहनि समाप्यत्वात्। संस्थानिमित्तकक्रतुपरत्वेऽपि प्राप्ताप्राप्तविवेकेन संस्थैवात्रापि फलाय विधीयते— अतिरात्रसंस्थया प्रजां कुर्यादिति। तदेवं ज्योतिष्टोमः क्रतुः फलार्थः; अग्निष्टोमसंस्था क्रत्वङ्गम्। उकथ्यादिसंस्थास्तु फलान्तरार्थतया ज्योतिष्टोममाश्रित्य विधीयन्ते। तथा च चतुःसंस्थो ज्योतिष्टोमोऽवधारितः। सर्वास्वपि संस्थासु 'त्रिवृत्पञ्चदशः सप्तदश एकविंशः, एतानि वाव तानि ज्योतींषि, य एतस्य स्तोमाः' इति निरुक्तज्योतिष्टोमत्वमनुस्यूतं भवति। तदेतत् संस्थाभेदोपजननेऽपि नापैति— यथा देवदत्तस्य उन्मादाद्यवस्थाभेदेऽपि देवदत्तत्वं नापैति, तद्वत्। संस्थानां तु विरोधादन्योन्यं समावेशो नास्तीति स्थितिः। तदिह संशयः— किं दीक्षणीयाचङ्गविधानमग्निष्टोमसंस्थज्योतिष्टोमस्य का-

स्वसंस्थानां च साधारणम्, उताग्निष्टोमसंस्थज्योतिष्टोमस्यैवेति । तत्र पूर्वपक्षयति—

संस्थास्तु समानविधानाः प्रकरणाविशेषात् ॥ ३७ ॥

तुः फलचमसवैषम्ये । मा भूत्फलचमसस्य नैमित्तिकस्य सोमद्रव्यसमानविधानता; उक्थ्यादिसंस्थास्तु काम्याः ज्योतिष्टोमसमानविधाना भवितुमर्हन्ति । कुतः ? प्रकरणाविशेषात्— प्रकरणम् इतिकर्तव्यताकाङ्क्षालक्षणम् । तदेतत् ज्योतिष्टोमस्य क्रतोः तदाश्रितानां च काम्यसंस्थानां फलार्थत्वाविशेषादविशिष्टम् न ह्यत्र— नित्यमभिषवादिधर्मैः क्रतुमुपकुर्यादनित्यफलचमसद्वारेतिवत् नित्यानित्यसंयोगविरोधोऽस्ति; एतदेव हि फलचमसस्य असमानविधानता— यदेतदभिषवादिधर्माणां क्रत्वन्वये फलचमसस्य न द्वारत्वमिति; न हि तस्य स्वतो धर्मग्राहित्वमस्ति, अफलत्वात्; नित्यानित्यसंयोगविरोधश्च द्वारमवलम्ब्य धर्मान्वये, न तु स्वतो धर्मान्वयेऽपि; न च संस्थानामिह काम्यानां द्वारतयान्वयः, तासां क्रतुवदेव फलार्थतया स्वतो धर्मग्राहित्वात्; अन्यथा ज्योतिष्टोमस्यापि नित्यस्यैव धर्मविधानं स्यात्, न तु फलार्थस्य, फलकामनाया अनित्यत्वात् । ततश्च—नित्यं दीक्षणीयादिधर्मैः क्रतोरुपकुर्यात्, पश्वादिफलकामनायामुक्थ्यादिसंस्थाभिः उपकुर्यादित्यन्वये विरोधाभावात् तासां समानविधानता

इतोऽप्येवमित्याह—

व्यपदेशश्च तुल्यवत् ॥ ३८ ॥

स्वार्थे वतिः 'अभिद्धवदत्रा भात्' 'तृश्वत्क्रोष्टुः' इति व्याकरणसूत्रव्याख्यानमेदे आभीयं कार्यमसिद्धं भवति, क्रोष्टुशब्द ऋकारान्तः तृजन्तः क्रोष्टुशब्दो भवति इति तद्व्याख्यातिर्ति क्रयोर्ध्यबहुलत्वेन स्वार्थवतेः ज्ञापितत्वात्; अत एव च 'नित्यवदाज्ञातम्' 'सिद्धवत्कृतम्' इत्यादि संगच्छते । व्यपदेश ज्योतिष्टोमप्रकरणे विहितस्य धर्मोपदेशः सर्वसंस्थानां तुल्यो दृश्यते— 'यमग्ने पृत्सु मर्त्यमिति प्रचरणीशेषात्क्रतुकपणं जुहोति, यदग्निष्टोमः' 'अथ यदुक्थ्यो मध्यमं परिधिमनक्ति' 'यदि षोडशी द्रोणकलशमुपप्रुशति' इति 'यदतिरात्र एतदेव यजुर्वदन् इविर्धानं प्रपद्यते' इति । इदं च तत्तत्संस्थानां धर्मविशेषवचनं सामान्यधर्मविधीनामविशेषितानां सर्वसंस्थासाधारण्यं गमयति । किं च यदि सामान्यविहितमग्निष्टोमसंस्थस्यैव क्रतोः स्यात्, तदा 'यदग्निष्टोमः' इत्यनर्थकमेव स्यात्, तद्विनापि 'यमग्ने पृत्सु मर्त्यमिति जुहोति' इत्येतावतैवाग्निष्टोमक्रत्वङ्गत्वांसिद्धेः । किं च उक्थ्यादिसंस्थानां ज्योतिष्टोमप्रकरणपरिग्रहाभावे 'यदुक्थ्यः' इत्यादिवद्यदुपबन्धोऽनुपपन्नः, तस्यानेकसंनिहितापेक्षत्वात्, ततश्च 'तिस्र एव साहस्योपसदो द्वादशाहीनस्य' इतिवत् यदनुबन्धं विनैव धर्मविधानं स्यात्। अत उक्थ्यादिसंस्थासाधारण-